श्रीः
नाट्यशास्त्रम्
अभिनवभारती
नवमो ध्यायः

अलङ्क्रियन्ते गात्राणि यत्स्पर्शविवशस्थितेः।
स्पर्शतन्मात्रवपुषं संस्तुमः परमेश्वरम्।।

शिष्याणामनुसन्धानवद्धये प्राक्तनार्थोपसंहारपूर्वकं वक्र(स्त्व?)न्तरमासूत्रयन्नाह **एवमेत**दित्यादि। क्रियत इति कर्म अभिनेयमित्यर्थः। **हस्तादीना**मिति पादान्तानामनेनाध्यायेन लक्षणं वक्ष्यामि। विनियुज्यते नेनेति (**विनियोगः**) तद्यथा– 'एषो ग्निवर्षधारानिरूपण (तुलनाः ६–२०)' मित्यादि, तत्र चेतिकर्तव्यता– तद्यथा 'प्रविरलचलिताङ्गुलि' (६–२०) रित्यादि। **तत्त्वत** इति। अभिनयस्य द्विविधा इतिकर्तव्यता लोकधर्मी नाट्यधर्मी च। आद्या द्विविधा– चित्तवत्त्यर्पकत्वेनानुभावस्य, यथा–'गर्वे प्यहमिति तज्ज्ञैर्ललाटदेशोच्छ्रित'(तुलना–॰देशोत्थित? ६–१६) इति। केवलबाह्यावयवरूपा वा, यथा– पद्मकोशस्य कमपि निरूपणे। नाट्यधर्म्यपि द्विधा– नाट्योपयोगमूलभूतकैशिकीसम्पादनोचितालौकिकशोभाहेतुः यथा– आवेष्टितादिचतुर्विध– –करणरूपा। काचित्त्वंशेन लोकमुपजीवति, यथा– वर्णातुरेण हस्तेन तत्र व्यवहितेन लोक उपजीव्यते। लोको ह्यनिर्देश्यताशेषं वस्तुनिर्दिदिक्षुरीदशं तादशमित्थम्भूतमित्यवसरे प्रयुक्तमेव चतुरैः। एवं जनान्तिकादौ वाच्यम्। नटसमयमात्ररूपा नाट्यधर्मी, समयस्या– –किंचित्करस्य कल्पने प्रयोजनाभावात्।(२–३)

हस्तानुपदिशति **पताक** इत्यादिना। **तथा** चशब्देन त्रिपताकः प्रकारस्तस्यैव कर्तरीमुख इति दर्शनात्तन्निष्पत्तये संहिताकार्यदष्टादध्ययनपरशब्दगतध्यानं शब्दवद्धस्तान्तरत्वे पि दश्यमानेन तद्बुद्धिं विधेयेन दर्शयति। एवमन्ये पि त्रिपताका(दयो) व्याख्येयाः। क्वचित्तु **हस्त**सदशहस्तान्तरस्वीकाराय हंसपक्षश्च सन्दंश इति सन्दंशशब्दान्तरं चकारेण अङ्गुष्ठमध्यमाग्रनिष्पीडिताग्रमर्मतर्जनीलक्षणो पि शून्यभास्वरविद्युदाद्यभिनयविषये नत्ताचार्यप्रवाहसिद्धः कोहललिखितो पि हस्तः सङ्गतो भवतीति हस्तान्तराण्युत्प्रेक्ष्याणि। ते त्वसंयुता अपि भवन्ति। संयुतकरणं कार्य इति वक्ष्यते, यतः यत्राप्येतन्नास्ति तत्रापि प्रयोगयुक्त्या हस्तद्वयप्रयोगो भवत्येव, यथा परेण हारे नीयमाने भयात्पताकाद्वयस्यांसादिक्षेत्रे पराङ्मुखस्य प्रयोगः। एवं प्रतापनादावपि। एवमन्यत्रोत्प्रेक्षणीयम्।

किं च पताकादीनामपि द्विशो युगपत्प्रयोगे युतत्वमभिनेयविशेषे। तद्यथा कपित्थस्याधस्तादधस्तलः पताकः छेदाभिनये ''कुणिच्छ अह,

अस्तमच्छरजहिसीसहिच्छजत्तंति''(?)। चित्राभिनये चैतत्। एते तु संयुता एव। नत्वेत एव, पताकादीनामपि प्रयोगे क्वचित्संयुतत्वात्। एते च त्रयोदश संयुततात्व्यतिरेकेण न स्वार्थस्य गमकाः।

एतेषां त्वभिनयहस्तानां छिद्रच्छादनेनैकवर्तनानुप्रवेशादलातचक्रप्रतिमतां दर्शयितुं, मसणोद्धतवर्तनात्मकतया चैकवाक्यार्थविश्रान्ततां प्रथयितुं, नत्तस्य च वस्तुभूतत्वेनोक्तस्य स्वरूपमभिधातुं, नत्यन्त्यौ चेट्याविति नत्तादिविषये च सूचाङ्कुरादावुपयोगमपि तु दर्शयितुं नत्तशब्देन विशेष्यं निर्दिशति **नत्तहस्तानि**त्यादिना। संयुतासंयुतरूपोपजीविन एत इत्येकाकिनो पि प्रयुज्यन्ते (नाशंसन्त इति अन्ये पि न शंसन्ति...दर्शयन्ति) नन्विदं यथा लक्षणं यथा च कर्मण्यभिधेयतेति तथा निबोधतेति सम्बन्धः।(११–१७)

अथ यथोद्देशं पताकादीनां लक्षणमाह **प्रसारिताः समा** इति। समा इति प्रकृतिस्था इत्यर्थः। प्रसारिताग्रा वा इति पाठः। प्रसारिताः प्रधाना इत्यर्थः। सहिता अविरलाः। कुंचितत्वं पादस्य वक्ष्यते तल्लक्षणोपजीवनेनाङ्गुष्ठसन्निवेशः कार्य इत्यर्थः। पताकाकाररत्वात्पताकः। अत एव पताकाप्यनेनैवाभिनेया। एवमन्येष्वपि हस्तेषु नामनिर्वचनानुसारेण विनियोगः प्रदर्शनीयः। प्रविरलचलिताङ्गुलित्वादियोगे पि एकदेशविकारे तत्त्वप्रत्यभिज्ञानात्पूर्वापरकोट्योश्च मूलसन्निवेशाश्रयणात्पताकात्वमेव। एवमन्यत्रापि।(१८)

प्रहारस्य पातने कर्तव्ये, परेण च क्रियमाणे। प्रतापने शीतशमनायाग्निस्पर्शग्रहणे, राज्ञां च प्रतापे। शत्रुहृदयम्लाननिमित्तभूतप्रसिद्धिविशेषात्मनि तथा प्रकृष्टे चोद्धतादापि तथोपहरणाय ''हस्तच्छत्रनिरुद्धचन्द्रमहस'' (विद्धशालभंजिका) इत्यादौ। तथा अन्यस्य प्रेरणे अन्येन वा प्रेरणे तद्वारणाय। एषु च यथा लोकप्रसिद्धिः यथा नाट्याचार्यप्रवाहश्च ऊर्ध्वपार्श्वगाधोमुखसम्मुखपराङ्मुखोत्तानत्र्यश्रच चलत्वादिविभाग उत्प्रेक्षणीयः। प्रहारे हृदयलग्नतल ईषत्कम्पमानः, प्रहर्षे च रोमा चसम्मुख उद्गतः। अपिशब्दार्थसहितो (अहं) यथा अस्मदर्थो भवति अहमपि ममापि मयापि मय्यपीत्यादौ गर्वगर्भे प्रयोगे पार्श्वान्तरात्स्वपार्श्वमागच्छँल्ललाटाभिमुख ऊर्ध्वः कर्तव्यः। एष इति एतस्मिन्नर्थे भिनेता स्या(दिति चे)**द्विभक्ति**रतन्त्रा, एतदर्थनिरूपण इत्यर्थः। अग्नेः धारा ज्वालाः पुष्पवष्टिग्रहणमप्रसिद्धपांसुरक्तादिवष्ट्यन्तरोपलक्षणम्। **संयुतकरण** इति हस्तद्वयमीदशं कर्तव्यमित्यर्थः। संयुतासंयुतसम्बन्धा लोकोचिता चलनलक्षणा क्रिया यस्य तेनाग्निज्वालासूर्ध्वगमनं, जलधारासु अधोगमनमङ्गुलीनामूर्ध्वमुखहस्तस्य पुष्पवष्टौ शिरोदेशे अधोमुखस्य स्थितस्य क्रमाच्चलाङ्गुलेरधोगमनमिति सङ्गहीतम्। तेनैकाकिनो पि यत्प्रयोगदर्शनं तदवरुद्धम्। अ(प्र?)विरलास्सत्यश्चलिताः अ(प्र?)विरलं कृत्वा चलिता अङ्गुल्यो यत्रेति समासः संयुतहस्तलक्षणात् स्वस्तिकमुपजीव्यं नत्तहस्तलक्षणाद्वा।(२०)

तेन सम्मुखौ पताकौ मणिबन्धभुवि न्यस्तौ कृत्वा बाहुपरिभ्रमणयुक्त्या स्वपार्श्वसमं विच्युतिः, तत्क्रियायाः पल्वलं स्वल्पोदकं सरः पुष्पप्रकरं ह्रद्यं च तणं, यच्च भूमौ पिच्छिलं बलितण्डुलवैचित्र्यन्यायेन स्थापितं तदभिनयेदिति लोकांशोपजीविनी नाट्यधर्मी।(२१) **पुन**रेवेति वचनात् स्वस्तिकस्तद्विच्युतिः विच्युतिपूर्वकः स्वस्तिक इति क्रमः। तत्रा(धो)मुखेन स्वस्तिकेन तद्विच्युत्या च **संवतविवतम**र्धं संवतमर्धं च विवतम्। यथा– ''घट्योद्घाटकवाटघट्टितजवेन'' इति। पाल्यं पतमानाद्रक्षणीयं विच्युतिपूर्वकं शीघ्रं स्वस्तिककरणात्, **छन्नं निबिडं** स्पष्टं, तथैव **गोप्यं**, अन्यो मा द्राक्षीदिति, तज्जातं करणं स्वस्तिककरणात्। चकारेण अपाल्ये, अप्रच्छन्ने, अनतिनिबिडे अगोप्ये चाभिनयः।(२३) स च स्वस्तिकविच्युतिरूप इति दर्शयति। रेचयति स्वसन्निवेशाद्यापयति स्वक्षेत्राद्वा या क्रिया तद्रेचककरणम्। तथा यथायोगं तत्र परस्योत्साहनं प्रेरणं उत्साहजननं सत्पुरुषाभिनयनं च विरलाङ्गुलिक्षेपेणालपल्लवाकारवत् प्रधानं वस्तु अक्रमकरणेन निजपार्श्वगमनेन पार्श्वान्तरात्। **प्रांशून्न**तमूर्ध्वगतात्, पुष्करप्रहणने अधः पातनं, **पक्षं** पतित्रिणां, मुहुरूर्ध्वं कटिक्षेत्र उत्साहनवत् उत्क्षेपं कृतमथोर्ध्वगमनेन। अभिनयशब्दवत्पाल्यं च। (अभिनयशब्दस्य वैचि)त्र्यं पश्यन्तः उपाध्याया व्याचक्षते– अभिशब्देनाभिमुख्यं नशब्देन निषेधो, यशब्देन यदर्थो लक्ष्यते, तेन स्वपार्श्वोन्मुखदेशागमनेनाभिमुख्यमभिमुखत्वं पार्श्वक्षेत्रे तु रेचनपूर्वमधोमुखोत्तानपरिवर्तनेन च यच्छब्दार्थमभिनयेदिति।(२४) परिशब्दः शैघ्र्यात्पार्श्वतो र्थे उभयतो वा तो समन्तादर्थे च, तेन परिघष्टं यत्तलं तत् द्वितीयपताकहस्तेन पताकाकारेण क्षालनं मर्दनं मार्जनं पेषणं तद्विशिष्टमपि द्रव्यमभिनयेत्। यथाक्रमं च परिशब्दार्थे योज्यः पुनश्शब्दः। पर्वतोद्धारणशैलशिलादेश्चोद्धा(त्पा?)टनम्। चकाराद्वरदानमभयदानमित्येवमाद्यभिनयेत्। परिघष्टेतीतिकर्तव्यतां प्रसक्तां वारयितु**मेव**कारः, ''एनतुपुणापरिअ िचइतिं कोणें जिजिआलिह''(?) इत्यादौ, यथा पुनरेवशब्दार्थे द्योतकस्तथाङ्गिके पि पताकादिस्तथा व्यवहारदर्शनात्।(२५) न चैतावानेवास्य विषय इति दर्शयितुमाह **एव**मनेन प्रकारेण स्वबुद्ध्या तां तामितिकर्तव्यतामुत्प्रेक्ष्य प्रयोक्तव्यः। स्त्रीपुंसयोरुभयोरपि अभिनेत्रोरभिनेययोर्वा। अन्ये तु नपुंसकलिङ्गस्य स्त्रीपुंसाभ्यामेव स्वीकारात् समस्ते शब्दार्थे भिनेतव्ये विशिष्टेतिकर्तव्यतायुक्तस्यार्थस्य प्रयोग इत्याहुः।(२६)

अथ त्रिपताकमाह **पताके**त्वित्यादि। अनामिका वक्रा कनीयसी (तर्जनीमध्यमानां) तिसृणां पताकवदवयवस्थानात् त्रिपताकः त्रित्वस्याभिनेयाद्वा। **कर्मे**त्यभिनेयम्।(२७–२८) (आवाहनं) पराङ्मुखीनतर्जनीमध्यमाकु चनात्, ''आर्ये इतस्ताव''दित्यादौ। अवतरणमुत्तरेण पार्श्वान्तरं गच्छता ''अवतरत्वायुष्मा''नित्यादौ रथादेः। **विसर्जन**मनादरकृतमधस्तलकृतेन बहिरङ्गुलिद्वयक्षेपात्। **वारणं** ''मा कार्षी''रिति प्राङ्मुखेनाङ्गुलिद्वयचलनात्। **प्रवेशनं** पार्श्वतलेनाग्रगमनात् ''यावत्प्रविशा''मीति। यथोन्नामनं चिबुकादौ लालनेनोत्तानेनाङ्गुलिद्वयेन। **प्रणमनं** शिरोगतेन पार्श्वगतेन प्रणयनं समर्पणम्। **प्र(नि?)दर्शन**मुपमानोपमेयभावमीषद्विरलेनाङ्गुलिद्वयेन। विविधं विचित्रमिदं वा स्यादिदं

वेत्यादि अङ्गुलियुगनामोन्नामात्। वचनं भाषणं मुखक्षेत्रे उत्तानस्याग्रगमनात्।(२६) **मङ्गलद्रव्याणां** पूर्णकुम्भादीनामधोमुखेनाङ्गुलिद्वयेन। **स्पर्शः** द्रव्यादीनां, **शिरसः** स्पर्शः निवेशनं निवेशः सम्बन्धो नामिकया शिरसो वा सन्निवेशनं तत्क्षेत्रे सम्मुखमण्डलगतेनोष्णीषधारणं शिरस्यधोमुखेन भ्रमता मुकुटधारणं तूर्ध्वक्षेत्रे। (संवरणं) अनिष्टे गन्धे वचने च शब्दे पि नासादौ अङ्गुलीद्वयेनाच्छादनम्। **अस्यैव चे**ति। अतश्च मुकुटादिदर्शनेन तद्धेतोः राजादेरप्यभिनयः, तेन येन हस्तेनाभिनेयं यत्राव्यभिचारित्वेन बहुशो निर्दिष्टं तदनिर्दिष्टमपि तेनैवाभिनेयम्। यथा मुकुटधारणाभिनयेन राजांशः रेचित पताकयोगेन गर्वितः। अङ्गुल्यौ ये नित्यश्लिष्टे इत्येवकारः, तेन च त्रिपताकन्यस्त इत्यस्य ग्रहणात्। चकारेणान्वाचयकृतमङ्गुल्यन्तरस्य अधोमुखादिरूपत्वमनुजानाति। अधोमुखे च द्वे प्रस्थानोत्थानयोः चले चेति समासः। लघून्पक्षिणश्चटकादीन् , कटीक्षेत्रे लघुचालम्। लघु च स्रोतः क्रमेणोर्ध्वमधस्तिर्यग्गत्या लघुसर्पानग्रगत्याभिनयेत्। भ्रमरमक्षिकादीनां पुनरुपपादनं पक्षित्वेनाप्रसिद्धेः, तेन कटीक्षेत्रत्यागेन यथेष्टमेषां क्षेत्रमित्युक्तं भवति।(३१) अश्रुणस्तत्प्रमार्जनस्य चानामिकया स्वक्षेत्रगतयाधोगच्छन्त्याभिनयः। तिलकस्याभिनयो रोचनाचन्दनादिना तद्विरचनस्य च। एतेन क्रियाफलयोस्तुल्याभिनयो न्यत्रापीति सूचयति। तेन पतनवत्पतितो पि कर्तरीमुख इत्याद्यूह्यम्। रोचनाचन्दनस्य मङ्गल्यतिलकादिना स्वीकारादिकं व्याचक्षते। रोचनया अरुणरुचिर्लक्ष्यते, तत्रानामिकाद्वयसङ्घट्टेनाभिनयः। यथा–

कोउद्दळणाहं तथा तथा च केन समाणिवश्शक्रः।
सुकरं भर्जसुखं च दुःखं च।।(?)

आलम्भनं शरीरस्पर्शनं द्रोणिकाचमनम्, तस्मात् संज्ञायामपि कन्। संज्ञैवेयमिति लभेरत्रासम्भवात् न समासः, स्वल्पत्पं च, अत्रातिगौरवातिस्नेहादिना तथानामिकयैव स्पर्शनात् ''गामी अवा उच्चं अमीहउतोरउ''(?) इति। स्पर्शनमलकस्य रचनार्थं स्थानान्तरनयनं, यथा रत्नावल्यामुदयनेन सुसङ्गतायाः। अलिकस्य ललाटस्य दर्शन––मलकभ जनेनोत्तालकभ जनानीत्यादावित्यन्ये।(३२)

कर्तरीमुखं लक्षयति **त्रिपताक** इति चकारेण परो नीयते। **अवलोकिनी**ति असंश्लिष्ट इति यावत्। कर्तर्या ईदशमेव रूपं साध्यते तथाभिनीयते। पथीति पथक्पदं इतइत इत्यादौ मार्गप्रदर्शने, तेनात्राधोमुखेनेति संबध्यते। चरणस्य रचनं कस्तूरिकादिना पत्रभङ्गादिक्रिया, र जनमलक्तकेन। रज्यत्यस्मिन् हृदयमिति रङ्गः कुङ्कुमादिकृतश्चतुष्कोष्ठे भङ्गस्तिलकादिः तं करोति रङ्गयति। एवकारेण तर्जनीमुखलक्षणमुखस्याधोगमनानन्तरमेव पष्ठावलोकित्वं पुनरधोगमनं पुनः पष्ठावलोकनमिति चलनमाह। **दष्टमिति** दंशनं तत्तुल्यं च कर्तनादि नासिकाक्षेत्रात् कर्णान्तं गच्छता, श्रङ्गं स्वङ्गक्षेत्रे हस्तद्वयेन, लेखं (? ख्यं) पत्रकाविष्टस्य वाचनम्। व्यतिक्रमो पराधः।(३३–४०) परिवत्तं पराङ्मुखीभूतं विपर्यस्तं च। वितर्कितमूहनम्। न्यस्तं

निक्षेपणम्। भेदनं वैपरीत्यं मध्यमयोस्तर्जनीपष्ठगत्वं चलनं पुनः स्वरूपाप्तिस्तयोः समाहारे द्वन्द्वः। एतेन यथायोगं सङ्घातविग्रहीतविपर्यस्तप्रयोगो द्विस्त्रिश्चेत्याद्यूह्यम्। कर्तर्यास्यस्य कर्तरीमुखस्य यदङ्गुलीरूपं मुखं प्रधानं तेन भेदनवलनसहितेनेति सङ्गतिः।(४१–४२)

अर्धचन्द्रमाह **सहाङ्गुष्ठेने**ति। अङ्गुष्ठो पि **विनतः चाप**वदिति श्लिष्टाह्रस्वत्वं निषेधति। **ख्यात** इति नाम्नैव लब्धरूपः।(४३) बालतरवश्चोर्ध्वं गच्छता, उपर्युत्तनेन अर्धेन्दुरित्यन्वर्थबलाल्लब्धम्। तेन शशिलेखेत्यनेन लेखामात्रमभिनेयं विश्लिष्टतर्जनी––केनेत्युक्तं भवति। **कम्बुरि**ति शङ्ख एवानेनाभिनेयः, तद्ग्रहणं तु कर्कटे वक्ष्यते। प्रकोष्ठान्तरसंमुखेन वलयः। निर्घाटनं बलान्निष्कासनमिति। तस्यायस्तमटवीघोषणमित्यसत्, आयस्तं खेदं पराङ्मुखेन गण्डभ्रूविभ्रमात्तमभिनयेत्। मध्ये उदरादौ, उपमीयत इत्युपमा ततः ष्यञ्, तेनायमर्थो मध्यस्य तदुपादीयमानत्वं कार्श्यं तदभिनयेत्। **पीनं** च पीवरं, अर्धान्मध्यमेव। चकारादर्धचन्द्रद्वयेनाभिनयेत्। अन्ये तु पानं चषकादि व्याचक्षते पानमिति पठन्तः।(४३–४४) जघनो नितम्बस्याग्रभागः, पार्श्वभागश्च कटी। आननतले च पत्राणि भङ्गाः। तलपत्रमाभरणविशेषः। पत्रं दन्तपत्रं नलिनीदलं वा। आदिशब्दान्मणालादि। एतच्च तत्तत्क्षेत्रगेन यथायोगं पार्श्वद्वययोगं पार्श्वद्वयान्तावधोवर्तितलेनैकैकेनान्यसहितेन वाभिनयेत्।(४५)

अरालमाह **आद्या धनुर्नते**ति। आद्यस्तर्जनीमध्यमादयः कनिष्ठान्ताः पूर्वस्याः पष्ठेष्वदूरे तिष्ठन्तीति। अयं हस्तस्त्वरालः कुटिलत्वात्। अरालपक्ष्मण इत्यादौ वक्रार्थे रालशब्दः।(४६) **सत्त्वं** स्थैर्यम्, **शौण्डीर्यं** गर्वः, **वीर्य**मुत्साहः, **कान्ति**श्शोभा, **दिव्यं** गगनस्थं, **गाभीर्यं**–

यस्य प्रभावादाकाराः क्रोधहर्षभयादिषु।
भावेषु नोपलक्ष्यन्ते गाम्भीर्यमिति तत्स्मतम्(२२–३६)

आशीर्वादाः स्वस्ति भद्रं पुण्याहमित्यादयः। **हितसंज्ञकाः** सुखभावाः। तत्र हृदि पार्श्वे ग्रतः स्थैर्येण चलत्वेन भ्रमणागमनं यथायोगं प्रयोगः। एतावत्यंशे प्यभिनेयमरालेन।(४७) **सङ्ग्रहो** बन्धनं केशानाम्। **उत्कर्षो** विकीर्णतापादनम्। पुनर्ग्रहणाद्द्विस्त्रिरन्तरालस्य गमनभ्रमणादि लभ्यते। **तथैव** चेति यथा सर्वाङ्गनिर्वर्णनं भवति तथा कार्यमिति। तेन द्वितीयपार्श्वात्स्वपार्श्वगमनं लभ्यते।(४८) कौतुकं विवाहात्पूर्वभावी वधूवरयोराचाराः अन्तर्विवाहः प्रसिद्धः। विवाहो ग्नौ साक्षिणि। अङ्गुल्यग्राणां हस्तद्वयगतानां स्वस्तिकाकारेण यद्योजनं तेनोपलक्षितेन परिमण्डलं प्रदक्षिणदिक्क्रमेव भ्राम्यता कौतुकविवाहयोगो भिनेयः। च शब्दस्तुशब्दस्यार्थे। **एव**कारो भिन्नक्रमः। **सम्प्रयोगः** संश्लेषमात्रस्तु अङ्गुल्यग्रस्वस्तिकयोगादेव केवलात्।(४९) देवताविषयं प्रदक्षिणक्रमं, परिमण्डलं वर्तुलं, महाजनं जनसमूहम्। विरचितं पुष्पप्रकारादि। एतेनैव परिमण्डलेन पार्श्वान्तरात्स्वपार्श्वं गच्छताभिनयेत्।(५०) आह्वाने पतदङ्गुलि निवारणे बहिःक्षिप्ताङ्गुलि। **निर्माणं** अपूर्व उदयः उदितो ''भअवं मिअळंछक(?णो)'' इत्यादौ, निश्शेषेण वा मानं परिच्छेदो वर्तनं वा, यथा ''जळणिहिअळंवेमा''(?) इति।

निर्दानं तणाद्युत्पाटनमित्यन्ये। अभूता सष्टिर्वीप्सा निर्दानमित्यन्ये। अनेकं पथग्भूतं संबन्धाभावरूपं यत्रोच्यते तत्र बहिः पुनः क्षिप्ताङ्गुलेः प्रयोगः। यथा ''कहिं ह कहिं ह'' इत्यादौ। गन्धस्य सुरभित्वादाघ्राणम्। **शुभः शुभे चैष** इति पाठः। **एष** हस्त इत्यर्थः। चैवेत्यन्ये पठन्ति अध्याहारं कल्पयन्तः, एवकारेण तत्क्षेत्रगत्वं हस्तस्येत्याहुः।(५१) त्रिपताकस्य यान्यावाहनमवतरणमित्यादीन्यभिनेयानि तान्यरालस्य यत्प्रयोगाङ्गयुक्त्या सम्पत्तिर्भवति तत्तेनापि प्रयोज्यानि स्त्रीभिः। न तु तासां त्रिपताको निषिध्यते, पुंसस्त्रिपताकस्थाने रालो निषिध्यते।(५२)

शुकतुण्डमा**हारालस्ये**ति। **तुः** पूर्वस्माद्विशेषमाह। द्वितीयो पि शब्दार्थे, तर्जन्या अपि वक्रिमाणमनुजानाति तदाकारत्वात्। शुकतुण्ड इति शब्देन प्रत्येकमेक एव ह्ययं वाक्यार्थः। **नाहं न त्वं न कृत्यमि**ति न च सर्वथा निषेधे अयमभिनयः, अपि तु **अर्थे** अर्थनायां सत्यामीर्ष्याप्रणयकलहादाविति यावत्, अर्थनमर्थः, एरच् (पा३–३–५६)। **सावज्ञं** यदाह्वानं **विसर्गश्च** प चभिरङ्गुलिक्षेपात्स्पश्य इतिकर्तव्यता, सकृत् द्विस्त्रिर्वा प्रयोगयुक्त्या। धिगित्यनेन निन्दार्थेनानुपादेयं लक्ष्यते, ''किन्तेन बालवधपातकदूषितेन'' इत्यादावयमभिनय इत्यर्थः।(५३–५४)

मुष्टिमाह **अङ्गुल्यो यस्ये**ति। **तलमध्य** इति अङ्गुष्ठमूलाशङ्कां शमयति। **अग्रे** सम्यक्स्थिता इति अग्रगोपनविरलत्वं च परिहरति। **उपरीति** मध्यमाङ्गुलिदेशं सम्पीडयन्नित्यर्थः। **संज्ञितः** लोके ह्यत्रैव मुष्टिशब्दः प्रसिद्ध इत्यर्थः। **व्यायाम** इति युद्धे प्रतिमल्लप्रकोष्ठग्रहणे खङ्गयुद्धे च। सकल(असि?)ग्रहणात् छुरिकायुद्धदण्डधारण इत्यादि योज्यम्। निर्गमस्यार्द्रकसुरसादेः। **पीडने** स्तनपीडने महिष्यादिदोहने। **संवाहने** मत्पीडने। असियष्टीनाम्, **तथे**ति संवाहने वारणे मार्जने।(५५–५६)

शिखरमाह **अस्यैव** चेति। पुनर्मुष्टिग्रहणं मुष्टिकर्तृणामधिकारे शिखरेणाभिनेये द्वये तत्कर्मणां च दढपीडनादौ मुष्टिमाह, अत एवोक्तं **प्रयोक्तभि**रिति। **रश्मिः** प्रग्रहः किरणो वा तेषां **संवाहनं** ग्रहणमिति संबन्धः अत्र च द्वयोरेकस्य वा प्रयोगः उत्तानाधोमुखपार्श्व––गोर्ध्वादिभिश्च। प्रयोगानुसारेणालकस्योत्क्षेपणं गण्डतलादेरुत्पीडनं वा कुटिलीकरणार्थम्।

कपित्थमाह **अस्यैवे**ति नामोच्चारणं पूर्ववत् प्रयोजनं, कपित्थाकारे स्मिन् अङ्गुष्ठ––तर्जन्या**वङ्गुली**। **शस्त्राणी**ति शराकर्षणानीत्यर्थः। कार्यं सुकृतम्, अत्र छोटिकाप्रयोगः।(५६–६०)

अथ खटकामुपमाह **उत्क्षिप्तवक्रे**ति। उत्क्षिप्ता सति वक्रा अनामिका कनीयसी। पुनर्नामोच्चारणात् शराकर्षणकार्यसत्यपथ्यादावस्य प्रयोगः। तुरेकः पूर्वस्माद्विशेषे, तुर्द्वितीयो वधारणे। विरलत्वं मनाक् अनामिकाकनिष्ठिकयोर्भवति सहशब्दात् विश्लेषाशङ्का न स्यात्। खट काङ्क्षायामित्यस्य क्षुत्तट्पिपासार्तयोरिति वुन्। खटको विटभोग्रधूः(?) तस्य आमुखे यतो यं वक्ष्यते तः खटकामुखः।(६१) होत्रं स्रुगादि उत्तानेन। हव्यमाज्याद्यामुखेन। प्रग्रहस्य वल्गादेः परिकर्षणं गतिरोधनाय, व्यजनं तालवन्तादिकं

चलता। आदर्शधारणं सम्मुखेन, आदर्शो ज्ञातो येनैव गौरीवाहाकारिकामनेनाभिनयन्ति(?)। खण्डनं तालवन्तादेर्व्यजनव्यापारो वा। पेषणं कुङ्कमस्य मगमदचन्द्रादेः हस्तद्वयेन भागद्वये दीर्घवत्तचक्रक्रमणाक्षैः, ''परिवत्तपाद'' इत्यादौ। आयतदण्डकाष्ठादीनां ग्रहणं, मुक्ताप्रालम्बानामादौ बाहुद्वयमुभयान्तग्रहणसूचकम्। वस्त्रान्तालम्बनं विवाहे च वधूनां प्रणयकोपादौ च पथानुसरणे। आकर्षणस्य केलिवशेन केशादेरयमभिनयः। उत्तरीयालम्बनं स्वभावायोगात् स्त्रीप्रदर्शने यमभिनयः, स्वक्षेत्रे चातुरश्चार्थं तत्कूर्परावधि द्वितीयस्य निवेशं कुर्वन्ति।(६३–६४)

सूचीमुखमाह खटकाख्य इति। सूच्याकारमेवास्य मुखम्।(६५) नताधोमुखा, लोला पार्श्वान्तरं यान्ती, कम्पिता तत्रैव स्पन्दमाना, विजम्भिता कुंचिता प्रसारिता, ऊद्वाहिता ऊर्ध्वं गच्छन्ती, चला अभिनयत्वेन व्रजन्ती।(६६) (चक्रं) आयुधे कर्मोपकरणे रथाङ्गे च राष्ट्रजने च। चक्रे ऊर्ध्वमुखं पार्श्वगतं पार्श्वान्तरं भ्रमन्ती कार्या, विद्युत्युर्ध्वमुखा गतागता। एवमन्यत्रोत्प्रेक्ष्यम्। म जर्यो लताः, कर्णचूलिका कर्णपूरः, कुटिलगतयो मीनाद्याः, साधुवादाः भद्रं शोभनमित्याद्याः,(६७) बालसर्पाणां पथगुपादानं गतिवैलक्षण्यान्मीनेभ्यः। वल्लीलताम जरीणामवान्तरभेद उत्प्रेक्ष्यः, तद्यथा– अलाबूप्रभतयो वल्ल्यः द्राक्षाप्रभतयोः लताः, चूतादीनां म जर्यः। शिखण्डः कुमारकाणां काकपक्षः। परिपतनं पातः, वक्रं वक्रत्वं, **मण्डलं** वर्तुलत्वं, समाहारे द्वन्द्वः। **भूयो** बहुतरमित्यस्मिन्नर्थे चायमभिनयः। ऊर्ध्वलोलितत्वोक्तिः प्रयोगवत्त्या वैचित्र्येण विभजनीया।(६८) **तारा** नक्षत्राणि। **घोणा** नासिका। (एकः) एकत्वसङ्ख्या। **दण्डः** परं प्रति तर्जनम्। **यष्टिः** लगुडः पथुर्वा, नक्षत्रे तर्जन्यूर्ध्वा। **दंष्ट्रिषु** चकारादंष्ट्रित्वेनाप्रसिद्धेष्वपि राक्षसादिषु। आस्ये योगो भागः सक्विलक्षणस्तेन सम्बद्धा नता सती। **तथे**ति तेन दष्ट्राकारेण कार्या सम्मुखतला कार्येत्यर्थः।(६९) **पुनरपीत्**यूर्ध्वाधोमुखत्वप्रसतमवधार्यते। **ग्रहण**मिति, भावप्रधानः सर्वशब्दः, कात्स्न्र्येन ग्रहणमित्यर्थः। **लोकस्य** प्रत्यक्षेणावलोक्यमानस्य वा स्मर्यमाणस्य वा। **तथैवे**ति अयमिति पुरोनिर्देशेन, स इति च कर्णक्षेत्रे परावत्तिनिर्देशेन, ग्रहणस्य लोकतः स्मरणात्मकमभिनयः। एकशब्देन प्रथमत्वात् आद्यो मुख्यो ह्रस्वश्च, **वीप्सा**पेक्षया तत्र तत्र प्रणता, ऊर्ध्वा यान्ती दीर्घे तून्नता, विपरीता दिवसे एकतो धस्तलप्रणता अन्यतः प्रोत्तनतलोन्नता परस्परश्लिष्टा संयुतकरणत्वेन पार्श्वात्पार्श्व––संवरणादुदयास्तमयसूचिका।(७०) पूर्वं **कुंचिता** ततो विजम्भिता प्रसारिता वक्रान्तिके कार्यविचारे यदा(?) याप्युत्सारिताभिनीयते। ''श्रवणाभ्याशे वक्राधिका जम्भणा रक्ता(वाक्य?) रूपणावसरे'' इति वा पाठः। **मे**ति वारणार्थे **प्रसारिता, वदेति** अत्रार्थे उत्कम्पितोत्तानाकुंचितप्रसारितेत्यर्थः। रोषस्य दर्शने स्वेदमार्जने च प्रसारितैव ललाटपट्टादौ स्वेदं हरन्ती।(७१) कुन्तलाः केशाः, गण्डाश्रयाः पत्रभङ्गादयः, तद्विषये भिनये कर्तव्ये तत्क्षेत्रगा। **गर्वे** यो हङ्कारः तत्राभिनये ललाटगता। रिपोः प्रत्यक्षस्य निर्देशे अग्रनता, परोक्षस्य रणपूर्वसंरभस्तु विशेषः अनुसन्धाने त्रितयात्मिका ''स चायं

दुष्टात्मा''इति। क्रोध इति संरम्भपूर्वः कोपः पूर्वकृत इति।(७२) किमर्थात्मा प्रश्नः, तत्रासाविति च दूरगतवस्तुनिर्देशे। कर्णकण्डूयनं प्रसिद्धम्, कटुकवचनमपि च।(७३) **संयुक्ते**ति अधस्तलयोः पार्श्वनैरन्तर्यादित्यर्थः। तद्विभागात्तु भुवि विश्लेषिताभ्यां द्वाभ्यामभिमुख (परिमुखे) पराङ्मुखाभ्यां वामपार्श्वं गच्छन्तीभ्यां दिनावसानमभिनयेत्। **वामो** हि सोमस्य दक्षिणस्तु सूर्यस्याग्रभागः दक्षिणपार्श्वं गच्छन्तीभ्यां निशावसानम्। **विश्लिष्टाभ्यामि**ति तालमात्रान्तराभ्यामिति दीर्घह्रस्वतांशत्वादौपचारिकाभ्याम्। द्वाभ्यां त्वित्यङ्गुष्ठप्रसारणे सति आकु चनादित्यर्थः।(७३–७५) **परिमण्डलं भ्रमितया मण्डलमादर्शयेच्च चन्द्रस्ये**ति। **च**शब्दो विकल्पार्थः। हरस्य भगवतस्ततीयनयने प्रदर्शिते सति यदभिनयनं तत्र कर्तव्ये सति ललाटे ऊर्ध्वा वा कार्या। एवं शक्रस्याभिनयने ललाट एवोत्ताना तिरश्चीना च, अङ्गुल्या एवात्र प्राधान्यात्। खटकामुखमध्यमया यल्लोके महेश्वरशक्राभिनयनं दश्यते तत्रालाक्षणिकं मन्तव्यम्।(७६–७८)

अथ पद्मकोशं लक्षयति **यस्याङ्गुल्यस्तु विरला** इति। **ऊर्ध्वा** इति चतुर्वेदवचना(?) इति यावत्। पद्मस्येव कोशो भ्यन्तरं विनतं यस्येति तथा। **ग्रहण**मिति गह्यते नेनेति ग्रहणमभिनय इत्यर्थः। एवं कुचौ दश्येते अनेनेति कुचदर्शनं पद्मकोश इति पूर्वेण संबन्धः। बिल्वादीनां तु ग्रहणे ता एवाङ्गुल्यो ग्रपर्वण्यतिकुचिताश्च भवन्ति। क्रव्यादानामामिषलाभे आमिषग्रहणे च। लभिरत्र ग्रहणे। आमिषलाभे सति यद्ग्रहणं तत्रेति केचित्।(८०) बलेर्हरणं दानं, वैचित्र्यप्रापणं वा। अग्रपिण्डो गवादेः, भोजनाय, मतस्य वा, यत्र यत्रोत्सवादौ नान्दीमुखश्राद्धादावपसव्यता न कार्या पर्यग्रं पिण्डदानम्। पुष्पप्रकरश्चेति द्विस्त्रिर्विकीर्णाग्रेण।(८१–८३)

सर्पशिरसमाह **अङ्गुल्यस्संहता** इति। संहताः श्लिष्टाः सहाङ्गुष्ठेनेति कुचितो ङ्गुष्ठ इत्यर्थः। निम्नं तलं मध्यस्याभिमुखस्य, सर्पशिरस्तुल्यत्वाद्वा तस्येदं नाम।(८४) सलिलप्रदाने देवेभ्यः, सलिले च प्रतिग्रहार्थं प्रदीयमाने प्रतिगहीतुरभिनयो येन। सर्पगतावधोमुखः। तोयोपसेचनं कुङ्कुमचन्दनादौ। आस्फोटनं मल्लयुद्ध ऊरुबाह्वादिषु।

मगशीर्षकमाह मगस्येव शिरस्स्थे शङ्गे यस्य। शीर्षशब्दः प्रकृत्यन्तरम्।(८६) **इहे**ति प्रत्यक्षाधिकरणनिर्देशे। **साम्प्रत**मिति वर्तमानकालनिर्देशे। **अस्ती**त्यभ्युपगमाभिनये संभावाभिनये च। **अद्ये**ति वर्तमाननिर्देशेन गतार्थत्वे पि साभिनयेन सूचीमुखेन बाधा माभूदिति पुनरुपात्तम्। एतावत्यधोमुखो यम्। शक्तेरुल्लासने क्षपाते चोर्ध्वमुखः। गण्डादौ स्वेदमार्जने तदाभिमुखतल ऊर्ध्वमुखः। कुट्टमितं हर्षवशात्सह दुःखोपचारेण स्त्रीणां चेष्टालङ्कारः, तत्राभिमुखतलो बाह्ये विकीर्णाङ्गुलिः।(८७)

काङ्गुलमाह **त्रेताग्निसंस्थिता** इति। त्रेतारूपा अग्नयः आहवनीयादयः, तद्वत्संस्थान––मासामिति। विरलयोः श्लिष्ट एवाग्रगो ङ्गुष्ठ इत्यर्थः। कङ्गुः प्रियङ्गुः तां लातीति तस्यायमर्थः। कङ्गूच्चयने कीदशः करो भवति। काङ्गुलो वश्चिक इति तु केचित्।(८८)

एतेन तरुणानि फलानि तेषामुद्योते, मुक्ताफलबदराणि गत्या **लघूनी**ति परिमितानि मत्पिण्डग्रासानीत्यर्थः। अङ्गुल्यः अङ्गुष्ठस्तर्जनीमध्ये च तासां बहिःक्षेपः।(८६–६०)

अलपल्लवमाह **आवर्तिता** इति। कनिष्ठादिक्रमेण वर्तना परिवर्तनं वा कुर्वन्त्यः। इयर्तीत्यरः चलः चलत्पल्लवाकारत्वादलपल्लवः। अलपद्मक इति (च) तन्नाम। **प्रतिषेधस्य कृते** अभिनयकरणाय। कस्य त्वमिति, नास्तीति च मिथ्यादिक्षेपार्थे च। शून्यवचनानि 'तच्छास्त्रमसत्प्रयुक्त'मित्यादीनि। पुनरर्थे अहमर्थे उपन्यासे च विस्मये अभिनयः स्त्रीणामुपन्यस्यते पुनःपुनरभिनीयते विस्मयापादकत्वादित्युपन्यासः।(६१–६२)

चतुरमाह **तिस्रः प्रसारिता यत्रे**ति। मध्य इति मध्यमाया **मध्य** एव। चत्वारो ङ्गुल्यङ्गुष्ठाश्लिष्टत्वेन सन्त्यस्मिन्निति, अच्प्रत्ययाकारान्तश्चतुरशब्दः। चत्वार्यभिनयनाद्वा चतुरः। सत्त्वकैतवादिषु मुखरागभेदाद्भेदः। विवतं प्रकारमेकेन, अनावेशे आवेशे तु द्वाभ्यां, नयनयोरभिनेययोः उपमानोपमेयभावे पद्मदलादिके चैकाकितां निषेद्धुमेवकारः।(६३–६६) परगतं लीलाद्यनेनाभिनीयत इति। रुचिं दीप्तिम्। विभावनं ऊहापोहरूपां प्रकर्षं वा। दष्टिव्यापारे तु कर्तरीमुख एव। सङ्गतं मैत्रीमन्योन्यमग्रश्लेषात्,(६७) माधुर्यं हृद्यं, शकारादिवचनादिषु, दाक्षिण्यमानुकूल्यं, मार्दवं मदुत्वम् अङ्गुष्ठमध्यमादर्शनेन। शीलं स्वभावं, वेषं नेपथ्यं वेशं वा गणिकास्थानम्।(६८) विभवं पार्श्वात्पार्श्वं गच्छता, अभि(वि?)भवमभिगच्छता चाभिनयेदित्येवमन्यदुत्प्रेक्ष्यम्। दारान् संयुताभ्यां सम्मुखस्वस्तिकेन दर्शयेदिति। **एवं** वक्षःप्रभतिशिरो न्तं क्षेत्रविशेषः संयुतासंयुतत्वे च चलत्वस्थिरत्वे सम्मुखपराङ्मुखोत्तनाधोमुखत्र्यश्रत्वादिकं च यथायोगमुत्प्रेक्ष्य अभिनयविशेषं कुर्यात्।(६६–१००)

भ्रमरं दर्शयति मध्यमाङ्गुष्ठेति। सन्दंशो ग्रसंयोगः। तदाकृतित्वाद्भ्रमरो हस्तः।(१०१–१०३)

हंसवक्रमाह **तर्जनीमध्यमाङ्गुष्ठा** इति। **निरन्तरा** इति विरलत्वं निषेधति।(१०४) श्लक्ष्णादयः श्लक्ष्णत्वादौ वर्तन्तेते। प्रस्पन्दनमर्दनमथनविधूननक्षेपणाभ्यावर्तानापसारणादि रूपं यथायोगं युक्त्या योज्यम्।(१०५)

हंसपक्षमाह **समाः प्रसारिता** इति कनीयस्या ऊर्ध्वम्। **तथे**ति परिश्लिष्टा मूलविनताः कार्या इति यावत्।(१०६) निवापसलिले तस्योदके दातव्ये धर्मार्थं चोदकदाने। पराङ्मुखाङ्गुलिपष्ठेन च चिन्तया गण्डसंश्रयणे केचित्। तदसत्, हनुधारणं ह्येतत्, कस्माद्गण्डसंश्रयं पत्रभङ्गादि।(१०७) आलिङ्गने महास्तम्भे चाभिनेये संयुतकरणत्वं मन्तव्यं, बाहुद्वयमण्डलीकरणेन रोमहर्षणाद्द्वितीयस्कन्धात् स्कन्धान्तरगमनं, परोक्षे प्रियजनस्पर्शे द्वितीयहस्तस्वस्तिकेन। अनुलेपने अङ्गसमालम्भने। **यथारस**मिति श्रङ्गारहास्याद्भुतादौ करुणादावपि व्यभिचारिविशेषयोगात् संभाव्यत एवायम्। दुःखे च सति हनुधारणं यत्तदत्र रसेषु ये भावाः अनुभावा दष्टिविशेषरोमा चादयः तैरुपबंहितः स्फुटीकृत(श्लो॰१११) इति सर्वहस्तविशेषाय मन्तव्यं मध्ये परिभाषणात्।(१०८–१०६)

सन्दंशमाह तर्जन्यङ्गुष्ठसन्दंश इति स्पष्टार्थः। पुष्पाणां सूक्ष्माणामपचये **अग्रसन्दंशः** शल्यानां कण्टकादीनां ग्रहणे। वन्तमाकृष्य पुष्पस्योद्धरणं यदा कुङ्कुमपुष्पादिः। **वर्तिशलाकया** अ जननाडिकावर्तिकया न्यूनादीनां पूरणम्। **वेधने** मुक्तादीनां, यो **गुणो** धनुराकृते(ष्टे?)स्तत्र संयुतकरणत्वं च न संश्लेषणस्यैव, अपि तु हस्तद्वयस्याधारमात्रमेव। तच्च पार्श्वद्वयगतत्वेन उपर्युपरिभावेनोत्प्रेक्ष्यम्। **पेलवम**सारम्। **प्रवाल**स्य रचनं गण्डतलबाहुशिखरादौ पत्रभङ्गकरणमित्यर्थः। यदि वा पल्लवस्यैव पत्रच्छेद्यालङ्कृतस्य ललाटादौ निवेशितस्य तत्रापसंश्लेषणार्थमस्य हस्तस्य प्रयोगः। **नारीभि**रिति परिमिताल–––क्तकपीडनमनेनेति दर्शयति (११०–११६)।

मुकुलमाह **समागताग्रा** इति। मुकुलाकारत्वान्मुकुलः। देवार्चनादिप्रारम्भे मुकुल–––व्यापारावेशे तु पद्मकोशवदिति पठता पिटकस्य चुम्बन इति केचित्। शपिटेति (विटेति?) पाठः। स्वाभिप्रायमाविष्कर्तुं प्रमदासन्निधौ स्वहस्तमेवमुकुलितं विटाश्चुम्बन्तीति **विटचुम्बनम्** । यदि वा विटैर्नारीणां कुचचिबुकादिस्थानेषु अङ्गुलिप चकेन समं सशब्दं नखस्पर्शने कामसूत्रेष्वाच्छुरितकमिति तद्विटचुम्बनम्। **हिरण्यं** कङ्कणद्वारेणाभिनीयते ङ्गुलीयकादीनां तु मोचने। **गणना** प चसङ्ख्या। **तज्ज्ञै**रित्युचितामितिकर्तव्यतामनुसन्धापयति (११७–११६)।

ऊर्णनाभमाह पद्मकोशस्येति। ऊर्णनाभिर्जालकारः क्रिमिः। तस्य यतो मक्षिकादिग्रहणे ईदक्करणानां सन्निवेशो भवत्यतो मत्वर्थीयो त्राच्प्रत्ययः। केशानां ग्रहणे चौर्येण परदर्शनशङ्कया लाघवाद्यद्ग्रहः। यत्र सिंहव्याघ्रादि स्वस्तिकेन चिबुकक्षेत्रगतेनाभिनयेत्। ते हि स्थिताः स्वस्तिकेन, आसने कररुहवन्तश्च। प्रस्तरः पाषाणः, निकषपाषाण इत्यन्ये। दर्भच्छटा इत्येके (१२०–१२१)।

ताम्रचूडमाह **मध्यमाङ्गुष्ठसन्दंश** इति। चूडामुक्तकुक्कुटाकारत्वात्तम्रचूडः। **तालेष्वि**ति ?(ताल इति?) कालमानो यथा क्वचित्तलभुवि सहिज्जु(?) इत्यादौ। संज्ञितं बालादे–––राह्वानम्। अन्ये तु लक्षणान्तरमस्य पठन्ति, ''**अङ्गुल्यः संयुता**'' इत्यादि। मुष्टिरेव प्रसारितकनिष्ठ इत्यर्थः। क्षिप्रं कृत्वा मुक्ताभिरङ्गुलीभिरिति (१२२–१२६)।

असंयुता इति। असंयुतास्तावदेते भवन्ति। न त्वेते संयुता एव। नाप्येत एव कोहलादिभिरन्येषां दर्शनात्। **अतश्चे**ति। एभ्य एवानुसंयुतेभ्यः अन्यश्लेषाद्ये संयुता उत्पद्यन्ते तान् स्वयं निबोधत मदीयं वचनमनादत्योत्प्रेक्षध्वम्। तथा हि कूर्परधीतत्रिपताकेन पार्श्वे खटकामुखेन स्त्रीणामभिनयः, खटकेन कर्णान्तमागच्छता वामेन च कपित्थमुष्ट्यन्यतरेण बाणमोक्षस्य। एतच्चित्राभिनये प्रतिजागरिष्याम इत्यास्तां तावत्। चकारादन्यानि च वक्ष्यमाणानि निबोधतेति सम्बन्धः (१२७)।

तेषाम जलिं तावल्लक्षयति **पताकाभ्यां** त्विति। अन्यस्य श्लेषे पि न नामान्तरम्। यथा सूचीमुखयोः संबन्धान्यभिनयन्ते। अत्र तु नामान्तरमिति तुशब्दः। स्मत इति लोके पि ''प्रा जलिः पुष्पकेतुः'' (कुमा॰२–६४) इत्यादौ प्रसिद्ध इत्यर्थः। सम्यग्ग्रहणेन सम्मुखं

सर्वासामङ्गुलीनामयं श्लेषो लक्ष्यते। उक्तमेव विनियोगं विभजति **देवतानामि**ति तिस्रो भिवन्दनापेक्षया कर्मणि षष्ठी, **स्त्रीणामि**ति कर्तरि षष्ठी (१२८–१३०)।

कपोतमाह **उभाभ्यामि**ति, सङ्ख्यापदोपादानं यथारुचि आधाराधेयभावप्रति–
–पत्त्यर्थम्। कम्पत इति कपोतो भीरुः पक्षी तत्प्रकृतिरन्यो पि कपोतस्तस्य यतो यं भवत्यतो नाम्नैव भीतविषयतास्य। तथा हि– रामाभ्युदये प्रथमे ङ्के वटोः। कुचाभिनये यमेव प्रधानः। वक्षस्थ इति सर्वत्र सम्बध्यते। भीताभिनये तु कम्पिते पि। स्त्रीभिरित्यधमोपलक्षणम्, विनयग्रहणादौ कुट्टनादेरपि। अयमेव च कूर्माकारत्वात् कूर्मक इति लोके प्रसिद्धः। अङ्गुलिपरिघष्यमाणावयवत्वात् अङ्गुलिघष्यमाणस्समुखः। खेदश्चिन्ता (१३१–१३२)।

कर्कटकमाह **अङ्गुल्यो यस्ये**ति। अन्योन्यस्य चान्तराणि मध्यानि तैर्निस्सताः। अन्योन्यसंमुखकर्कटदंष्ट्राद्वयाकारेण अङ्गुलीनामत्रावस्थानात् कर्कटः। मदने ङ्गकृते अङ्गमोटने, अग्रतः पार्श्वतः ऊर्ध्वं वा भुजयुगलात्पराङ्मुखाङ्गुलिः। सुप्तोत्थितपद–
–मुपलक्षणम्। सर्वदा हि जम्भणे स्य प्रयोगः। बहद्देहाभिनये तूदरक्षेत्रे सम्मुखतलो यं हस्तः। हनुधारणे ङ्गुलिपष्ठप्रतिष्ठापितहनुदेशः। शङ्खग्रहणे कि ित्सङ्कुचितो न्यो–
–न्याभिमुखाङ्गुलिः। एतदेवाह अर्थेति– अभिनेयस्यार्थस्य यत्तत्त्वं परमार्थः तद्ये जानन्त्यभिनये नुसन्धातुं शक्नुवन्ति तैः (१३३–१३४)।

अथ स्वस्तिकमाह **मणिबन्धनविन्यस्ताव**िति। यत्र शुद्धमेव स्वस्तिकपदमुपादीयते तत्रेदश एव सन्निवेशः प्रदेशेषु मन्तव्यः, यथा– चित्राभिनयादावर्थप्रकरणादिवशात्त्वन्यत्रापि प्रवर्त्येत। यथा– स्वस्तिकविच्युतिकरणादित्यादौ (६–२०) पताकयोगे पि तथापि मणिबन्धनविन्यस्तत्वं नामानुयाय्येव रूपम्। अत एव केचिदेतावतास्य लक्षणं परिशिष्टं तूदाहरणदिगर्थमिति प्रतिपन्नाः। **स्त्रीप्रयोजिता**विति। पताकस्वस्तिककर्माणि स्त्रीभिरनुनैव कार्याणीत्यर्थः। स्वस्तिकार्थलक्षणसमाकृतित्वात्स्वस्तिकः (१३५–१३६)।

खटकावर्धमानमाह **खटक** इति लभ्यते। अन्ये त्वन्योन्याभिमुखं खटकद्वयमस्य रूपमित्याहुः। खटकस्य आ समन्तात् बहिर्योगादिदं नाम। श्रङ्गारार्थेषु श्रङ्गारप्रयोजनेषु ताम्बूलग्रहणादिषु। तथा हि वक्ष्यते–

''खटकावर्धमानं तु कृत्वा विटगतिं व्रजेत्'' इति।(अ१२–१११)

तथेति प्रयोजन एव प्रायेणेश्वरीप्रसादनादौ प्रणाम इत्यर्थः।

''कुमुदोत्पलकुन्देषु कर्तव्यः शङ्खधारणे''

इति वा पाठः (१३७–१३८)।

उत्सङ्गमाह **अरालौ** त्विति। **विपर्यस्ता**विति स्वस्तिकरूपौ। **उत्तना**विति स्वसम्मुखौ, वर्धमानकाविति विनतौ तेन दक्षिणो वामस्कन्धक्षेत्र इति यावत्। अत एव च प्रकोष्ठस्वस्तिकत्वं लक्ष्यते। स्वस्तिक एव दक्षिणपार्श्वस्थ इति विपर्यस्तत्वमिति केचित्। अधोनखत्वमित्यन्ये। स्वस्तिकाकारौ कूर्परौ कृत्वा कक्षक्षेत्रात् प्रवेशमुक्ताद्बाह्ये ङ्गुल्यो

यदा भवन्ति पष्ठं च हस्तयोर्बहिर्मुखं तदा विपर्यस्तत्वमिति तु युक्ततरम्। उत्सङ्गग्रहण--योग्यत्वकरणादुत्सङ्गः। स्पर्शस्य परोक्षस्य ग्रहणे भिनये। **निष्पेषः** पीडनम्, तेन सह यद्यत्क्रियते अतिप्रयत्नेन साध्य इत्यर्थः। **रोष**करणे यथा– 'एषो स्मि ते दढनिपीडनबाहु--यन्त्रे'त्यादौ। **अमर्ष**करणे यथा– विदूषकादेरीर्ष्याकरणे प्रसादनानङ्गीकरणे पर्यायात्--सकृत्प्रक्षेपात्। सिंहावलोकित इत्यन्ये पठन्ति। कर्तरि कर्मणि वा षष्ठीति व्याचक्षते (१३६–१४०)।

निषधमाह **मुकुल**न्त्विति। कपित्थहस्तेन परिवेष्ट्यमानमुकुलं तदभ्यन्तरे निषण्णमास्त इत्यतो यं निषधः। (सङ्ग्रहः) सम्यग्ग्रहणं शास्त्रार्थादेः, **परिग्रहः** स्वीकारः, **धारणम**--त्यजनम्, **समयो** नियमः, **सत्यवचनं** तथ्यमिति, सङ्क्षेपस्तात्पर्यम्, समस्तमनेनैव संक्षिप्यमाणमपि। स्वीकृताभिनयेन हि तद्वति द्रव्ये भिनय इत्युक्तम्। संक्षिप्तं तु सम्यक् क्षिप्तं क्वचित्स्थापितमित्यर्थः (१४१–१४७)।

दोलं लक्षयति **अंसा**विति। हस्तयोः प्रकर्षेण लम्बमानत्वादेव स्कन्धयोः शैथिल्यमदढत्वं भवति। पताकाङ्गुलीनामवष्टम्भान्युद्धारणाय वा करणक्रियायामङ्गुलिशैथिल्यलक्षणायां सत्यामित्यर्थः। दोलाकारत्वेन दोला। अभिनयनव्यापारे योगो यस्य स तथाविधो यं हस्तः। **कार्य** इत्यनेन तत्र तत्राभिनेये पार्श्वात्पार्श्वान्तरगमनं निपतनं स्तब्धत्वमित्यादिकां तावदितिकर्तव्यतां सूचयति। अभितो ग्न्यादिव्यसनजो दोषः (अभिघातः) (१४८–१४६)।

पुष्पपुटमाह **यस्तु सर्पशिरा** इति। अङ्गुलिस्थाने निरन्तरं बाढमपि। सम्मुखत्वं माभूदित्याह **पार्श्वे**ति। **द्वितीय** इति सर्पशिराश्च हस्तः। हस्तपुटेनेदशेन पुष्पग्रहणमिति। पुष्पपुट इतरः (१५०–१५१)।

मकरमाह **पताकौ** त्विति। अङ्गुष्ठयोर्मकरकर्णद्वयवदवस्थानान्मकरः। **द्वीपिन**श्चित्र--कायाः। मत्स्यानामिति **प्रदर्शनमि**ति संबन्धः। **अर्थयोगे**नेति अग्रपार्श्वादिषु स्थितचलना--दिनार्थवशात्प्रयोज्य इत्यर्थः (१५२–१५३)।

गजदन्तमाह **कूर्परांसोचितावि**ति। कूर्परांसशब्देनोभयसामीप्यं तयोरन्तरालं गह्यते पूर्वदक्षिणे तु यथा तत्राकुञ्चितौ तत्स्थानसंवेष्टनपरौ। तद्यथा वामे बाहौ दक्षिणो दक्षिणे वामहस्तः स्तम्भाकारवेष्टितदन्ताकृतियोगाद्गजदन्तः। वधूनां वराणां च विवाहस्थाननयने शिलोत्पाटने गतागतत्वं मन्तव्यम् (१५४–१५५)।

अविहत्थकमाह **शुकतुण्डावि**ति। अभिमुखौ पूर्वाननावञ्चितौ वर्तनया अधोमुखौ सन्तावाविद्धावधोगमितौ। अवहित्थसूचकत्वादवहित्थः। एवं हि कुर्वन्नाशयमात्मीयं नो भिनत्ति (१५६–१५७)।

वर्धमानमाह– ज्ञेयो वै वर्धमानश्च हंसपक्षौ पराङ्मुखाविति। अन्योन्यं स्वस्तिकवदवस्थितौ लक्ष्ये तु अन्योन्यनिकटौ दश्येते। स्वस्तिकताहीनावेव केवलं पराङ्मुखौ परस्परचलनेन विस्तारयोगाद्वर्धमानत्वम्। आदिशब्देन वक्षःकवा(?पा)टादि (१५८–१५६)।

उपसंहरन् सूचयति **उक्ता ह्येत** इति। उक्ता ह्येते यस्मादेते उक्ताः सङ्क्षेपमाश्रित्याभिनेयविषये निरूपिताः। तुरिति तस्मादन्यत्राप्युक्तात् अभिनेयात् अर्थादभिनया अर्थान्तरे पि साधयितुं शक्याश्चार्हाश्च। तुर्हेतौ, यस्मादाभिमुख्यतया, नार्थमनेकरीति त्वदष्टार्थमर्थे र्थतः (१६०–१६१)।

एवमभिनयमभिधायाभिनयान्तरमप्यस्तीति दर्शयति **नास्ति कश्चिदि**ति। नाट्यमिह तदुपयोगिनो विभावादयः। अत्र हेतुः **यस्य यदश्यत** इति (१६२)।

एवमुक्तानामेवाभिनयानां साङ्कर्येण प्रयोगमनुज्ञायानुक्तमपि सङ्ग्रहीतुमाह **अन्ये चा**पीति। अर्थो भिनयसामर्थ्यं शोभातिशयः। **छन्दत** इति नाट्याचार्येच्छाप्रवाहानुसारिण्यामित्यर्थः। **रसाः** स्थायिनः। **भावाः** स चारिणः तत्सूचकानि यानि विचित्राणि चेष्टितानि सात्त्विकोपाङ्गानि तैः सह। एवं लोकधर्मीप्रदर्शने प्रसिद्धोदाहरणमात्रमभिधेयानां परिगणनमित्याख्येयम् (१६३–१६४)। देशः क्षेत्रविशेषः प्रयोगः सुकुमारोद्धतरूपकविशेषः। अर्थस्य **युक्ति**रूपपत्तिः। मुख्यगौणलाक्षणिकव्यङ्ग्यादिभेदेन। **अवेक्ष्ये**ति विचार्येत्यर्थः। **प्रयोक्तव्या** इति शक्यार्थे कृत्यः। **विशेषत** इति। पुरुषाणां तदपेक्षया सामान्यानामाचारा भवन्ति। अत एवोत्तमानामतिस्वल्पप्रचारो हस्ताभिनयः (१६५)। **रसभावकृतानी**ति। स्थायिस चारिभेदेन तत्तद्विभावभेदवशादित्यर्थः। तथा हि, केशानां विदूषकं प्रत्याकर्षणं खटकामुखेन, प्रियां प्रत्यरालेन, क्रीडायां कलहे मुष्टिनेत्याद्युत्प्रेक्ष्यम् (१६६)। ऊर्ध्वाधोदूरगमनादन्यथाकरणमुत्कर्षणादि। परिग्रहो मण्डलेन ग्रहणम्। निग्रहो विनाशनं, तोदनं ताडनं, विक्षेपस्त्यागः सावज्ञं, धूननं कम्पनम्। विसर्गः सादरं त्यागः, स्फोटनं विकासनं, मोटनं सङ्कोचनं, **इति** प्रकारे। एवंप्रकारा अन्ये पि। रसभावकृतानीति यदुक्तं तत्स्पष्टयितुमाह सर्वे नेत्रभ्रूमुखरागाद्यैर्व्याजिताः कार्या इति। प्रचार ऊर्ध्वोद्वर्तनपाश्वाधोमुखादिः। परोक्षाभिनयने दष्ट्यादयो हस्तानामनुगताः, प्रत्यक्षे तु विपर्ययः (१६७–१७१)।

एतत्सर्वमुपसंहरति **करणमि**ति। करणमावेष्टितादि, **कर्म** विधेयं, स्थानं, ललाटादिक्षेत्रं उत्तनादिसन्निवेशस्थितिश्च, प्रचारः स्वल्पादिः। युक्तिर्मुख्यगौणाद्युपपत्तिः, न हि गौरयं ब्राह्मण इत्यत्र मगार्थो हरिणाभिनयेन कर्तरीमुखमगशीर्षकप्रायेणाभिनीयते। अपि तु मौर्ख्याभिनये, चतुरशुकतुण्डशिखरनिषधप्रायेण। युक्तिश्च विशेषणविशेष्यभावादिविचारः। तद्यथा तद्गुणसंविज्ञाने बहुव्रीहौ वत्तिपदार्थान्यपदार्थाः अभिनेयाः, ''सपुलकस्वेदोद्गमोत्–––कम्पये''ति (रत्ना१–१) उपलक्षणविमुक्ते त्वन्यपदार्थमात्रं, तत्राप्युपलक्षणताप्रतिपत्त्यै वत्तिपदार्थो प्यभिनेयः। स त्वनावेश इति तूपाध्यायाः। क्रिया त्रिधा विधिनिषेधानुभयरूपा। गच्छ मागच्छेत्यादौ विधौ हि प्रत्ययार्थस्यैव, निषेधे चार्थस्यैव, अनुभयरूपे प्रकृत्यर्थस्यैव, अवतरत्वार्य इत्यादौ तु न विधिः, अपि तु प्रकृत्यर्थमात्रं प्रदर्शयितव्यम्। लोटा तु स्वाभिप्रायमात्रं प्रकाश्यमानमप्रधानमिति प्रकृत्यर्थ एवाभिनेयः। अत्र व्यापकं हेतुमाह **लोकोपचारेणे**ति (१७२)।

करणं कृत्वे (कर्मे?)त्यत्र स्थानमुक्तम्। तद्विभजत्युत्तमानामिति। उत्तमे सुवर्णादिद्रव्ये सन्निकृष्टाः मध्यमे मध्यमाः अधमे विप्रकृष्टाः। ललाटादिशब्दानामुपलक्षणार्थत्वादिति केचित्। एतेषु क्षेत्रेषु वर्तनानिवेशपूर्वकमुत्तमादयोः राजामात्यविदूषकादयो भिनयान् यथोचित एवाभिनयस्थाने कुर्युरित्यनेनोत्तमा देवतागुरुनपादयो यदा निर्दिश्यन्ते तदा ललाटक्षेत्रचारिभिः अ जल्यादिहस्तैः, मध्यमास्तु चतुरादिभिर्वक्षःक्षेत्रचरैः, अधमाः शुकतुण्डाद्यैरधः क्षेत्रचरैः। तेन चन्द्रतारादिदर्शने धमस्यापि ललाटक्षेत्रचरा हस्ता इत्यादि न विरुद्धमिति। इदं च युक्ततरमित्युमपाध्यायाः– ये चतुरारालाद्यैः सत्यानतगाम्भीर्यशौण्डीर्यादिविरुद्धविषया उक्तास्तेषां विभागार्थमिदं वचनम्। ये धान्यादय उत्तमा अर्थास्तेषामभिनये ललाटक्षेत्रगत्वमित्यादिक्रमेण (१७३)।

अभिनयगतं विशेषान्तरमप्याह **ज्येष्ठे स्वल्पप्रचाराः स्यु**रित्यादि। प्रयोगे ज्येष्ठे नाटकादौ चतुर्वर्गोपायोपदेशिनि प्रत्यक्षताप्राधान्यादल्पो हस्ताभिनयो, मध्यमे तु र जनाफले भाणकादौ मध्यमः प्रत्यक्षे हि तत्राकाशभाषितप्राधान्यात्, अधमे तु नत्तकाव्ये षिद्गकादौ च काल– इति केचित्। एतत्त्वव्यवस्थितत्वादयुक्तम्। नाटके पि भूयस्त्वमस्य। परस्थस्याभिनेयत्वे उत्तमपात्रेण तु प्रधान एवाभिनयः कार्यो न विशेषणात्, अस्मिन्नाट्ये गहीतविशेषणा विशेषधीरिति मन्यमाना एतदमष्यन्तो न्ये त्वाहुः– यत्र पदार्थसमुदायो ह्येकेनाभिनयेन शक्यप्रतिपत्तिरनेकेन वा चलत्वात्। तद्यथा– ''या स्रष्टुः सष्टिराद्या'' (शाकु१–१) इत्यत्र। तत्रैक एव जलहुताशनाभिनय उत्तमेन प्रयोज्यः। अधमेन त्वनेकश्च चलस्वभावत्वात्। मध्यमेन मध्यम इति प्रचारो वर्तना योत्तमे ल्पेति वा। एतत्तु शोभाविच्युतिकारित्वात्, '' अथ नयनसमुत्थं''(रघु २–७५) इत्यादौ प्रयत्नोपहृतस्य (उपमानद्वयस्य) पदार्थे वाक्यवचनमित्यस्य प्रौढत्वस्याभिनये नानुसरणप्रसङ्गान्नाद्रियते। ये परिमितमभिनेयं गमयन्ति ते स्फुटमेवार्थकस्य गमकाः, अर्थप्रकरणादेस्तत्र सुखेन सहायत्वात्। अनन्तार्थजातव्यवच्छेदकत्वं हि क्लेशः। तादशा उत्तमप्रकृतिषु हस्ताः। अधमास्तु यथावचनं श्लिष्टमाहुस्त(था प्रकीर्ण)भूयस्त्वमभिनेये सन्दिह्यमानस्याभिनयायत्तमुत्कर्षणं विकर्षणमित्यादि– एवं केचित्। अपरे त्वाहुः– प्रचारस्त्रिधा प चधा च वक्ष्यते। तत्रोत्तमस्य च फलत्वादेकरस एवोत्तनादिकः प्रचारः, अधमस्य त्वतिसङ्कीर्ण इति। इदन्त्वत्र युक्ततमम्– ज्येष्ठे भिनये प्रत्यक्षवर्तमानात्मज्ञस्थविषये हस्तव्यापारो ल्पः। ''हिअअ समस्सस''(शाकु अ–७) इत्यादौ। तथा ''तन्वी मेघजलार्द्रवल्कलतया'' (विक्र ४–३८) इत्यादौ। अत्र हि सात्त्विकभूयस्त्वात् ज्येष्ठत्वम्। अप्रत्यक्षभाविभूतपरस्थरूपे तु सात्त्विकावकाशाभावो नावेशादिति तत्राधमो भिनयः, ''सत्त्वहीनो धमः (२२–२) स्मतः'' इति वचनात्। तत्र विप्रकीर्णा विक्षिप्ता बहुलतमा हस्ताः। यथा कु जरक सुन्दरकादीनां परस्थवत्तयुद्धवर्णने। एतद्व्यतिरिक्ते तु मध्यमो हस्तप्रयोगः। यथा विदूषकेण प्रत्यक्षं दश्यमानेनानावस्थावेशकारिणि उद्यानादिवर्णने (१७४)।

लक्षणं सौष्ठवं लक्ष्यते। सौष्ठवं लक्षणं प्रोक्तं वर्तनाक्रमयोजितम् (१०–७७)।।इति। तद्धीना अधमानाम् (१७५)। (**अथवे**त्यादि)। अन्ये त्वाहुः– यादग्येषां लक्षणमुक्तं तेन्यथा परिपूर्णाश्लिष्टाकृतयो भिनयाद्धीनानां श्लिष्टवर्णोच्चारणवदिति। (विपरीतेति) भयजुगुप्सादिप्रयोगे शीतकालादियोगे च सौष्ठवमस्फुटाकृतित्वं, अवहित्थादौ चासौष्ठवयोगे पि सौष्ठवमित्यादि वैपरीत्यम् (१७६)। विहस्तो हस्तवैकल्याधानं, मत्ते मद्येन, प्रमत्तः प्रमादात्, उन्मत्तो पस्मारी (१७७–१७६)। किं सर्व एवात्र हस्ताभिनय इत्याशङ्क्य प्रतिप्रसवार्थमाह **कार्य** इति। ये हस्ता आन्तरीं चित्तवत्तिं सूचयन्ति कपोतक इव भयं, कर्कटक इव मदनविजम्भां, दोल इव शोकं, शुकतुण्ड इवेर्ष्यां ते **कार्या** एव, सात्त्विकवदनुभावस्य भावत्वात्तेषां सात्त्विकश्च **कार्य** एवेत्यावत्त्या ये तु बाह्यद्रव्यगुणादिगमकास्ते न कर्तव्या इति (१८०)। यत्र तु सर्व एव न कर्तव्यास्तं विषयमाह **यत्र व्यग्रावि**ति यथा सारथेः प्रतोदरश्मिव्यग्रहस्ततायाम्। (विलोकनैरिति) विलोक्यते चित्तवत्तिरनेनेति मुखरागादि, **कुर्यादि**ति स्फुटयेदित्यर्थः। **अर्थदशकैरि**ति। अनुवत्तिलक्षणोपरोधकृतैरित्यर्थः (१८१)।

हस्तानां दिग्भेदावस्थानकृतं प्रचारमाह **उत्तान** इत्यादि। उत्तानो यथा– 'विरचितमुर्वीसंस्थ'मित्यभिनये(६–२२) पताकः, यथा वा जिह्वाभिनये आस्यक्षेत्रगो ग्रजस्त्रिपताकः। पार्श्वगो यथा धनुरभिनये मुष्टिः। अधोमुखो यथा समुद्राभिनये ललाटक्षेत्रगः। स्वस्तिकपताको, यथा ''संवतविवतं पाल्य''मित्यत्र त्रिपताकः ''उत्तानो धस्तलस्त्र्यश्रो ग्रगो धोमुख एव च। प चप्रचारा हस्त''स्येति भट्टोद्भटः पठति। तत्राधस्तले धोमुखो न्तर्भूतः उत्तने ग्रजः, त्र्यश्रः त्रिपार्श्वग एव। अत्रापि तु समविषमत्र्यश्रिताद्यवान्तरभेद उत्तानादेर्भवति। इत्थं त्रैविध्यमेव युक्तम्। तत्र रसनिष्पादनमभिनयस्य वस्त्वित्युक्तं तच्च करणानुभावात्मकं, तत्राङ्गहाराः करणस चयाः, करणस्य च लक्षणमुक्तम्। ''यानि स्थानानि याश्चार्यो नत्तहस्ताः'' (४–५६) इत्यादि। तत्र स्थानकचार्यः स्वक्षेत्रे (अ–१३) लक्षयिष्यन्ते (१८१–१८२)।

हस्तप्रसङ्गानत्तहस्ता वक्तव्याः। कि चाभिनयकृताप्येषां क्वचिद्व्याकर्तुं, यथा लताहस्तौ प्रतिपद्येते नत्ताभिनयनं प्रति (६–२००), यथा वा करिहस्तस्य हस्त्यभिनयम्। एवं चतुरश्रादीनामपि प्रयोगवशात् द्रष्टव्यमित्याशयेनाह **अत ऊर्ध्वमि**ति। नत्तस्य करणात्मकस्याश्रयाद्धेतुता। एभ्यो भिनयहस्तेभ्य ऊर्ध्वमित्येतद्गणना पष्ठे भिनयनहस्तत्वेनापि गणनायोग्यादित्यर्थः। तत्र चातुरश्र्यमूलं नत्ते ङ्गस्य जीवितमिति तन्निमित्तभुवौ चतुरश्रौ तावदाह **वक्षस** इति। वक्षो तिक्रम्य यो ष्ठाङ्गुलो देशः तत्रस्थौ। परस्परं त्वष्ठाङ्गुलान्तरत्वात् प्रत्युत चातुरश्र्यं भवतीत्युत्प्रेक्ष्यमेव। **प्राङ्मुखा**विति यत्सम्मुखः प्रयोक्ता तत्सम्मुखावेव, न तु प्रयोक्तसम्मुखौ। कूर्परयोरंसयोश्च तुलाधारणवत्समत्वमवैषम्यम्। अङ्गचातुरश्र्यदानाच्चतुरश्रौ। आकर्षणविशेष एवायमभिनयो पि द्विवचनादपवादविहीनत्वे द्वयोरेव प्रयोग उपपादनीयो हेतुर्हस्तान्तरस्य

द्वितीयप्रकारयोगे पि केवलस्यैव चतुरश्रतापदेश एव, तुल्यरूपत्वाच्च न चतुष्षष्टिताव्याहतिरिति। एवं सर्वत्र (१८२–१८४)।

अथोद्ववत्तौ– **हंसपक्षकृताविति**। आदौ चतुरश्रौ तत उद्वेष्टितवर्तनया हंसपक्ष (कृत) इति, कृतशब्देनाह विधिम्। एको विवर्तते उत्तानः स तु, परस्त्वधोमुखः सन्नावर्तते वक्षस्स्थानमित्यर्थः। एतदेवाह **तालवन्तवदि**ति। आवर्तनकाल ऊर्ध्वं वर्तमानत्वादुद्वत्तै। नामान्तरेण तालवन्तविषयत्वमभिनेयत्वं ब्रूते (१८५)।

अथ तलमुखौ– **चतुरश्रस्थिता**विति। **तथे**ति व्यावत्तेद्वत्तपूर्वकत्वमस्याह। तेन परिसमाप्तिकाले स्वस्वपार्श्वस्थाङ्गौ त्र्यश्रस्थितौ हंसपक्षावेव। अन्योन्यसंमुखतलत्वात्तलमुखौ। ''मंडल महुरिजिम वज्जइ'' (मर्दलं मधुरं वादयति) इत्यादिविषये चायमभिनयो पि (१८६)।

अथ स्वस्तिकौ विप्रकीर्णौ च – **तावेवे**ति। तलमुखावेवेत्यर्थः। अन्तस्समीपः। स्वस्तिको नामलक्षणविशेषः। (विच्युताविति) विशेषेण सहसाच्युतावित्यर्थः। एवं पूर्ववत्तनत्तकरचतुष्टयं स्वरूपोपजीवित्वं (स्वस्तिक)विप्रकीर्णयोः (१८७)।

अरालखटकामुखौ– अरालखटकामुखावाह **अलपल्लवसंस्थानावि**ति। स्वस्तिकवत्पताकौ कृत्वा अलपल्लवोपलक्षितया व्यावर्तितकरणवर्तनया परिवर्तनान्तया तावेवोर्ध्वमुखौ पद्मकोशौ विधाय समनन्तरमेव भाविनलिनीपद्मकोशाभ्यामरालवर्तनया एकमरालं द्वितीयं खटकामुखं चातुरश्र्यसंस्थानेन कुर्यात्। स्वस्तिकेनेति त्वपरे। अरालौ ततः खटकावित्येके (१८८–१८९)।

अथाविद्धवक्त्रौ– भुजांसकूर्पराग्रैरिति। वत्तनुरोधादेवं पठितम्। अयं त्वर्थः, अंसाभ्यां कूर्पराग्राभ्यां भुजाग्राभ्यां च क्रमेणोपलक्षितं यत्कुटिलं सविलासं (पताकौ) कृत्वा आवर्तनं व्यावर्तितकरणं कनिष्ठादि तद्युक्तावाविद्धौ हलधारिणौ सन्तावधोमुखतलौ यदा भवतस्तथेदं नाम (१९०)।

अथ सूचीमुखौ– हस्तौ तु सर्पशिरसाविति। चतुरश्रस्थानगौ सर्पशिरसौ मध्यमाङ्गुलिनिविष्टाङ्गुष्ठौ कृतौ यदा तिर्यक्प्रसारितं पार्श्वगमनेन सह विकाशितं मुखं तर्जन्यग्ररूपं द्वयोस्तादशौ बाहु (बहिः?) प्रसारणेन पर्यायशः क्रियेते तदा सूचीमुखो सूचीवद्बाहु (द्बहिः?) प्रसारणात्। तत्र तुशब्दः पर्यायं द्योतयति।

सूचीमुखौ– मध्यप्रसारिताङ्गुष्ठौ स्वस्तिकौ सर्पशीर्षकौ। इत्येकेषां पाठः (१९१–१९२)।

अथ रेचितौ– अर्धरेचितौ **चापी**ति। केचित् रेचितावित्यस्य पौनरुक्त्यपरिजिहीर्षवो द्वे लक्षणे इत्याहुः। तेन द्रुतौ भ्रान्ताववविकृतावेव हंसपक्षौ रेचितौ, तथा प्रसारितोत्तनतलत्वेन विकृतावपि रेचितावितिं। अन्ये त्वेकमेव वाक्यमित्याहुः। रेचितौ सन्तौ यौ द्रुतभ्रमौ तौ रेचितसंज्ञाविति। न पौनरुक्त्यम्। संज्ञयैवार्धरेचिते लब्धे पुनर्वचनमविशेषेण चातुरश्र्यस्य स्थितिं सूचयन् नत्तहस्तान्तरेष्वपि अङ्गपर्यायेण प्रयोगं सूचयति (१९३–१९४)।

अथोत्तनावचितौ– अचितावितिः। त्रिपताकौ हस्तावंसकपोललललाटानामन्यतमक्षेत्रे **कृतौ** अचनक्रियया युक्तौ, अन्योन्याभिमुखावर्धतिरश्चीनौ, तथासंयोः कूर्परयोश्चा चनं किंचिच्चलनं भवति। अचनसमये उत्तानत्वप्राप्तेः पुनरप्य चनेनोद्गमनक्रियायोगान्मदूत्तानावचितौ (१६५)।

अथ पल्लवौ– मणिबन्धनमुक्तौ त्विति। ऊर्ध्वव्यावर्तितकरणेन बाहू प्रसार्य परिवर्तितक्रियया स्वस्तिकाकृती पताकौ। पल्लवाकारत्वात् तथोक्तौ। शिथिलौ पल्लवावित्यन्ये पठन्तः त्रिपताकावित्यनुवर्तयन्ति।

अथ नितम्बौ– बाहुशीर्षादिति। पताकाविति वर्तते। स्कन्धक्षेत्राद्विचित्रत्वेनोत्तानत्वाधोमुखत्वपर्यायत्वेन निष्क्रान्तौ पताकौ, नाम्ना क्षेत्रस्याक्षेपात् नितम्बक्षेत्रे तथैव पर्यायेण वर्तमानौ नितम्बौ (१६६)।

अथ केशबन्धौ– केशदेशादिति। आदौ पार्श्वक्षेत्रात् तत्पार्श्वपरिवर्तनपूर्वकमुत्थितौ शिरःक्षेत्रं प्राप्तौ, अत एव केशदेशान्नितम्बहस्तोक्तवदेव विचित्रहस्तत्वेन निष्क्रान्तौ तथा तेनैव प्रकारेण पुनः केशदेश एव पर्यायशो गतागतत्वेन प्रत्यावर्तमानौ। केशसम्बन्धात्केशबन्धौ। आचार्यसंमतौ च शोभातिशयकरणात् (१६७)।

अथ लताहस्तौ– तिर्यक्प्रसारितौ चेति। पताकाविति वर्तते। अन्ये तु नितम्बादिषु त्रिपताकावित्यनुवर्तयन्ति लताहस्तान्तेषु (१६८)।

अथ करिहस्तः– समुन्नत इत्यादि। संश्लेषक्रमेण य उन्नतः। **विलोलित** इति दोलावन्नीतः। अपरग्रहणात्त्रिपताक एव ललाटाख्य इति केचित्। खटकाख्यो पर इत्यन्ये पठन्ति। सजातीयतयानारम्भो स्य चतुरश्रवत्, विजातीयारम्भो पि नत्तभ्यासस्य व्यपदेशादरालखटकामुखवत्। अतो न द्विवचनम्। एकैकस्य पथक्प्रयोगे करिहस्तत्वाभावादित्येकवचनमेव। तदाकारत्वाच्चेदं नाम (१६९)।

अथ पक्षवचितौ पक्षप्रद्योतौ च– कटिशीर्षेति पाठः। वत्तौ पक्षावचितौ गतौ, तत्सम्मुखौ तु तं द्योतयतीति तथोक्तौ। एवकारेणानयोः व्यामिश्रतया प्रयोगशोभा भवतीत्याह (२००–२०१)।

अथ गरुडपक्षौ– अधोमुखेति। अधोमुखै नितम्बक्षेत्रे भूत्वा तलेनाविद्धौ ऊर्ध्वगमनं झटिति कुर्वाणौ। तार्क्ष्यभुजाकाराक्षेपात् लिङ्गवाक्यप्रामाणत्वात्सुकरणं प्राप्तं त्रिपताकबाधेन पताकावुपलभ्येते (२०२)।

अथ दण्डपक्षौ– हंसपक्षकृताविति। एकस्य हंसपक्षस्य व्यावर्तने विलासेन पार्श्वाद्वक्षः क्षेत्रस्य निकटस्य वर्तनं तत्समकालमेव द्वितीयस्य स्वदेहपरिवर्तनेन वर्तनं भुजप्रसारणपर्यन्तं पुनरपरेणाङ्गेनेति द्वावपि प्रसारितभुजौ व्यावर्तितपरिवर्तितौ च भवत इति पक्षे पार्श्वतो दण्डवद्भुज इति दण्डपक्षौ। युगपदेव द्वयोरपि प्रसारणं व्यावर्तनपरिवर्तने तु क्रमेणेत्यन्ये (२०३)।

अथोर्ध्वमण्डलौ– ऊर्ध्वमण्डलिनाविति। वक्षोदेशाद्व्यावर्तितकरणेन ललाटक्षेत्रेण पार्श्वगमनं विधाय ततो पि मण्डलवद्भ्रमणेन प्रसारितावूर्ध्वमण्डलिनौ। प्रसारितभुजाविति वर्तते। ललाटप्राप्तिपर्यन्तेनैवानयोर्लक्षणं शिष्टं तु पार्श्वमण्डलिनोरिति केचित्। तावेव पार्श्वविन्यस्ताविति वचनान्नत्तप्रसिद्ध (चक्र) वर्तनात्मकावूर्ध्वमण्डलावित्यन्ये (२०४)।

अथ पार्श्वमण्डलौ– तावेवेति। ऊर्ध्वमण्डलावेव पार्श्वगतौ पताकाकृतौ परस्परसम्मुखौ। अन्ये तु निर्वचनसमर्थनाशयेन स्वपार्श्व एवाविद्धभुजभ्रमणवर्तनात्मकमनयो रूपमाहुः।

अथोरोमण्डलिनौ– उद्वेष्टित इति। चकारसंनियोगेन यौगपद्यमाह। उरस इति प चमी। तत आरभ्य पार्श्वक्षेत्रे भ्रमितावेकस्यागमनस्य परस्य गमनमिति वर्तनया। षष्ठीत्यन्ये वदन्तः तत्रैव स्थानमित्याहुः। ऊर्ध्वपार्श्वोरोमण्डलिषु हंसपक्षावित्यपरे वर्तयन्ति (२०५)।

अथोरःपार्श्वार्धमण्डलौ– अलपल्लवकारालाविति। वक्षोदेशत उत्तानो हस्तः संस्तम्भो लपल्लवसंस्थानदायिना व्यावर्तितकरणेन निष्कृष्यते। तत्समकालं च पार्श्वप्रसारितभुजो द्वितीयो हस्तस्तर्जन्याद्युद्वेष्टितसन्निवेशेनारालरूपदायिना वक्षोदेशमानीयते। पुनरेवमिति। उरसि अर्धमेको हस्तः पार्श्वे च द्वितीयो मण्डलवद्गतागतक्रमणे कुरुत इति तथोक्तौ (२०६)।

अथ मुष्टिकस्वस्तिकौ– हस्तौ तु मणिबन्धान्त इति। एकः कु ंचितो रालवर्तनया, अपरो ंचितो लपल्लववर्तनया पुनरङ्गपर्याय इत्येवं वर्तनानन्तरं खटकामुखाभ्यां स्वस्तिक इति पारम्पर्येण मुष्टिप्रभवत्वात्खटकस्य मुष्टिकस्वस्तिकव्यपदेशो मुष्टिशिखरकपित्थखटकानामन्यतमप्रयोगानुज्ञानार्थमिति तद्विदः (२०७)।

अथ नलिन्याख्यौ पद्मकोशौ– पद्मकोशाविति। पद्मकोशौ सम्मुखौ श्लिष्टमणिबन्धौ। ततो प्येकस्य कनीयसः सम्मुखमपरस्याङ्गुष्ठं मुखं क्रियया परिवर्तनमिति केचित्। इदं त्वत्र युक्तम्– व्यावत्तेन परिवत्तौ यदा पद्मकोशाविति सङ्गतिः। अस्मिन् मुष्टावेव स्वस्तिकक्षेत्रे करौ कृत्वा द्वयोरपि यदा व्यावर्तितकरणेन कनिष्ठादिना परिवर्तनमन्योन्यपराङ्मुखता तदनन्तरं च पद्मकोशद्वयं तदा। नलिन्यामनेककमलसम्भवादिदं नाम (२०८)।

अथोल्बणौ ललितौ च। करावुद्वेष्टिताग्राविति। वक्षःक्षेत्रादुद्वेष्टितप्रधानौ हस्तौ विधायोर्ध्वस्कन्धक्षेत्रे प्रसारितावाविद्धौ च स्कन्धाभिमुखचलदङ्गुलीकावलपल्लवौ भवतस्तदोल्बणौ। हर्षपरवशां चित्तवत्तिं सूचयतः इत्युल्बणौ (२०९)।

अथ ललितौ– अलपल्लवावेव तु शिरःक्षेत्रप्राप्तौ चलिनौ ललितौ चातुरश्चेणाङ्गलालित्योपादानात्।

अथ वलितौ– कूर्परस्वस्तिकगताविति। कूर्परस्थाने स्वस्तिकौ लताहस्तौ बाह्वोर्वलनाद्वलितौ **इति।** शब्द एवंप्रकारवर्तनान्तसूचकः (२१०)।

करणसंश्रयान्करान्वक्ष्यामीति करणासक्तत्वाद्विशेषणभागस्यैव संश्रियमाणस्य करणस्य प्रवचनं फलतः। यथा लोहितोष्णीषा ऋत्विजः प्रचरन्तीति वचनान्तरादत्विजां प्रचारलाभात्

द्वाविति (?) विभक्तिरूपपदार्थविधानपरेति करणं करणानि वा इति ह्यर्थे पाठः। (करणं) क्रियते सम्पाद्यते बलादेवाभिनयविशेषो, येनाङ्गुलितुलनक्रियाविशेषेण स्वसमाप्तौ निराकाङ्क्षायां स करणं, यथा कनिष्ठाद्यावर्तनेनालपल्लवः, विपरीतवर्तनायां तु परिसमाप्त्यभावे वर्तनायाः क्रियान्तराकाङ्क्षा। तदेवेदमङ्गतत्त्वविदस्त्रोटनमङ्गस्येति व्यवहरन्ति। तेन येषु हस्तेषु तर्जन्यादेः कु चनं तेष्वरालवत्क्रिया, यथा शुकतुण्डचतुरमगशीर्षकादिषु। एवमन्यदुत्प्रेक्ष्यम्। पताकस्य तु सर्ववर्तनासु कार्यकरणतया साधारण्यं सर्वप्रकृतित्वम्। तत एव प्राधान्यात् पताकव्यपदेशः। **नाट्य**शब्देनाभिनयनहस्ताः नत्तशब्देन **नत्त**हस्ताः सूचिताः। **अभ्यन्तरेण** तलसम्मुखत्वेन बाह्यपार्श्वात् देहं प्रति वक्षःक्षेत्रपर्यन्तप्राप्त्या। अतो वैपरीत्येन बहिर्मुखत्वं कनिष्ठाद्यावर्तत इति तलसम्मुखमेवाभ्यान्तरत्वं वक्षःक्षेत्रात्तु बहिर्निर्गमन्। एतद्विपर्यासेन बाह्यता (२११–२१८)।

ननु किमेतैरावेष्टिताद्यैरित्याशङ्क्य एतेषां साधकतमत्वं दर्शयति **नत्ते भिनययोगे** चेति। नत्ते नाट्ये च करणानि प्रकर्षेण योजयेत्। केन हेतुनेत्याह **पाणि**भिरिति, यतो वर्तना जाता जन्यजनकाश्च पूर्वपश्चाद्भावित्वेन। पाणयो नत्तनाट्यहस्ताः। कथं प्रयोजयेदित्याह **मुखभ्रूनेत्रयुक्तानीति**। यतो हि वर्तना धावन्ति तत एव मुखा(दी)नीति तात्पर्यम्। नेत्रभ्रूमुखरागाः यैर्व्याजिता इति त्वियमभिनयेषु पूरणार्था प्रक्रिया। इयं तु वर्तनास्वित्यपौनरुक्त्यम् (२१६)।

बाहुलग्नत्वादङ्गुलिक्रियायास्तद्भेदानाह **तिर्यक्तथोर्ध्वसंस्थ** इत्यादि। तिर्यगिति पार्श्वगत्या, ऊर्ध्वः शिरसो प्युपरि गच्छन्, अधोमुखो भुवमाश्लिष्यन्, अ चितो वक्षोदेशान्निष्क्रम्य शिरःक्षेत्रमेव प्रत्यागतः, अपविद्धो, मण्डलगतेः सर्वतो भ्रमन्। पष्ठं स्वकायस्यानुसरतीति पष्ठानुसारी (२२०)। उद्वेष्टितो मणिबन्धनवर्तनया निष्क्रामणप्रसारितस्य तु स्पष्टमेवाग्रमनुधावन्। एतेषु करणेषु चतुर्षु द्रुतमध्यविलम्बितादिवैचित्र्येण बाहुपर्यायेण च समस्तानि योजनया यदा नियुज्यन्ते तदा घातवर्तनादिशतसहस्राण्यत्रैवान्तर्भूतानीति यदेके चत्वारिंशतमन्ये शतमाहुस्तन्मिथ्यैव। तदाह **करणगता वि**शेषा अवश्यं ज्ञातव्या इति। **नि**त्यमेतद्व्यतिरिक्तप्रयोजनाभावात् (२२१–२२२)।

अथोरसः कर्माण्याह **आभुग्न**मित्यादि (२२३)। **निम्न**मिति ससङ्कोचम्। **क्वचि**दिति मध्ये मध्ये, **श्लथं** शिथिलं निरवष्टम्भं कृत्वा व्याभुग्नावधः पतन्ताविवांसौ (२२४)। यत्र शीतेनापि विना दुर्दिने। एवमेव मार्गे भ्रमणमिति **वर्ष** इत्युक्तम् (२२५)। सम्यगुत्थितं कृत्वा निष्क्रान्तौ शुद्धा(भुग्ना?)वंसौ यत्र। हिक्का स्पष्टम् (२३०)।

शिष्टकटीत्रिकस्कन्धकर्माणि पार्श्वकर्माणीति (२४०)।

गतेषु तदुक्त**मपविद्धक्रियात्मक**मिति निष्क्रियत्वमिति यावत् (२५४)।

बहिः पार्ष्णिक्षेपाच्च पतनमाविद्धमूरोः वर्तना करण इति क्रियायां सत्यामित्यनेन पुनः पुनः पादतलाग्रात्तु स्थानं च कर्तव्यमिति दर्शयति। ऊर्ध्वविकृतस्य घट्टनानुद्धट्टितः उद्वेष्टितरूपं यत्करणमुद्वेष्ट्यन्ते यदाङ्गुल्य इत्यादि तदेव बाहुकर्मभेदाद्बहुधा। तत्रास्य

प्रयोग इति वर्तनाश्रयो विनियोगः। केचित्तु **प्रयोगमासाद्या**नुकरणार्थमप्यस्य प्रयोग इत्यूचुः। यथा **विक्रमोर्वश्यादौ पुरूरवः**प्रभतेः। एतेन नाट्यविषयो विनियोग उक्तः। अग्रेण तलेन च न त्वरत इति (२६६)। तथा तोदनं प्रेरणम्, निकुट्टनं तदवग्रहणं स्थितं स्थानकादि, शुम्भनं पीडनं, (ताडनं) हननं, विक्षेपो भूतस्यापसारणं भ्रान्तकं मनसः, विविधरेचकः करपादरेचकः (२७५)। अ ंचिता इति प्रसताः। अ ंचितमुद्वर्तितं विदूषकादिगतौ (२७६)। भ्रमरी चारी, येषु प्रयोगेषु ते भ्रमरकाः (२७७)। सूचीं षष्ठं पादमन्ये पठन्ति। नूपुरस्य पादभूषणस्य करणे बन्धने। कट्यूरुजङ्घापादकर्माण्येव परव्यामिश्रीभूततावैचित्र्येण समुदिततया प्रयुज्यमानानि चारीत्युच्यन्ते। तत्समुदायस्य मण्डलभेदेन गतिर्निष्पद्यत इति कट्यादिपादान्तकर्मणैव चार्य उक्ताः। अत एव तासां विनियोगः पथङ्नोक्तः (२८०)।

समनन्तरं त्वध्यायत्रयं तद्वैचित्र्योदाहरणप्रदर्शनार्थमित्येतत्सर्वं मनसि कृत्वाह **पादजङ्घोरुकरण**मित्यादि। **सम**मिति सह (२८१)। अत्र हेतुः **पादस्ये**ति नाभिजङ्घोरुकरणमित्यादिकर्मस्वन्यं पादकर्मेत्यर्थः।

एतदेव स्फुटयति **यथा पाद** इति (२८२)। **तयो**रिति मध्ये जङ्घापि स्वीकृता। अत्रैवं सर्वमाङ्गिकमियतैवोक्तमिति दर्शयति **इत्ये**तदिति (२८३)। अनन्तरवक्तव्यमासूत्रयति **अतःपर**मिति। चारीव्यायामा लक्ष्यन्ते उपलक्ष्यन्ते उदाहरणतया येनेति शिवम्।।

शिशिरतरकिरणकलिकालङ्कारविभक्तिभक्तभङ्गुरतापः।
अभिनवगुप्तो नवमाध्याये सन्देहताहमपनुदतति स्म।।

इति श्रीमहामाहेश्वराभिनवगुप्तविरचितायां
नाट्यवेद विवतावभिनवभारत्यां
आङ्गिकाध्यायो नवमः।।

श्रीः
नाट्यशास्त्रम्
दशमो ध्यायः

निश्चलस्थितिमद्व्योमभूचारीसद्गतिप्रदः।
सर्वदा ध्वनिमात्रात्मा शम्भुर्विजयतात् प्रभुः।।

चारीव्यायामलक्षणमित्युक्तम् (१)। तत्र समासे सन्देहः व्यायामशब्दार्थे च, चरेर्हि (इञ्) करणे भावे वा औणादिक इति, 'कृदिकारादक्तिन ङीष्' इति च चारीशब्दः प्रसिद्धार्थ इत्यभिप्रायेण सन्देहद्वयमपाकर्त्तुमाह– **विधानोपगता** इति। अन्योन्ययोजनापतिताश्चार्यो व्यायामशब्दस्यार्थ इति तात्पर्यम्। चार्य एव व्यायाम इति कर्मधारय इत्यर्थः। अन्वर्थस्तु व्यायच्छन्ते इति परस्परतया आपतन्ति। कुत्र नियम इत्याह– **परस्परं** पूर्वा चारी परत्र नियता (न तु) पूर्वस्यामिति, तेनाकर्मकत्वादात्मनेपदं परस्परोपपदाच्चेति कर्मव्यतिहारजमात्मनेपदं निषेधति, न तु 'आङोयमहन' इति। ननु किं तन्नियमनमित्याह। **विधानोपगता** इति प्रधानेनैकस्या यतः अपरा उपगता बलादेवागता। नन्वेवमन्योन्याश्रयम्? न, अङ्गेन प्रधानभूतेन केनचित्, सम्यगायुक्ताः प्रयुक्ताः प्रवर्तिता यत्नायत्नापेक्षया बहुवचनम्। एतदुक्तं भवति– किंचिदङ्गं प्रधानं यत् संभवति यथा हस्तो वा अभिनये, पादो वा गतौ, तदा तदुपयोगिनी चारी प्रधानं, तच्चारीसंपत्त्युचिता च पूर्वा चारी आश्रीयते परया चेति परस्परनियमवत्यश्चार्योव्यायाम इति (२)।

तत्र व्यायामस्य संक्षिप्तमध्यमविस्तीर्णतया भेदान्निरूपयति। **एकपादप्रचारो** एकः एकाकिपादेन, श्रोण्यादिप्रचारो व्याक्षिप्तः। **द्विपादेति**। पादशब्देन तत्प्रचारः। **नामे**ति **तु**र्व्यायामप्रसिद्धादन्यदेवेदं संज्ञात्वेनाधुनैव नियम्यत इत्यर्थः। एष संक्षिप्तो व्यायामः अभिनयान्तरादौ (३)। **करणाना**मिति बहुवचनात् त्रीन् (त्रीणि?) 'कपि जलानालभे'तेति यथा। अन्यथा बहुत्वानियमे खण्डानां मण्डलेभ्यः क्व प्रविभागः। एष मध्यमो व्यायामः उपवर्त्येधमानौ। **त्रिभिश्चतुर्भि**रित्येतच्चतुरश्रतालाभिप्रायेण, **वा**ग्रहणान्मिश्रणमपि सूचयन् सङ्ख्यान्तरमपि गह्णीते। तथा हि– चतुर्थे सूचीविद्धाख्ये (तुलना – ११–२१) मण्डले तु याश्चारीर्वक्ष्यति 'सूचीमाद्यं पदं दद्यौ'दित्यादि (तुलना – ११–१३) सप्तमे त्वलाताभिख्ये – 'भ्रान्त्वा चारीभिरेताभिः पर्यायेणाथ मण्डलम्। षट्संख्यं सप्तसंख्यं वा' इति (तुलना – ११–३०) द्वादशे द्व्यर्धिका इति। एवमन्यत्र (४)। तत्र लौकिकत्वं तावच्चारीणां दर्शयति **चारीभिरिति** नत्तं वा ङ्गहारात्मकत्वं च तच्चारीभिः प्रसतं च व्याप्तमिति प्रत्येकं चेष्टितं

गतिः। **शस्त्रमोक्ष** इति चक्रकुन्तादियुद्धं युद्धमिति, खड्गहननादियुद्धं नियुद्धं च। प्रकृते प्युपयोजयति– **यदेत**दिति। यच्छब्देन व्याख्यातधर्मपूर्वकं, एतच्छब्देन व्याख्यास्यमानधर्मयोगं परामश्यत इति वितततां नाट्यस्याह। किंचिदङ्गमिति शिरोहस्तादि, किंचिद्धि, **चार्या** सह किंचित्पूर्वापरभावेन। **संप्रवर्तत** इति संवर्तते खलत्वेन प्रवर्तते क्रियया, सम्यक् प्रवर्तते वा, अनित्येनेति वैकल्पिको प्युपसर्गार्थयोगः तथाङ्गे पि स्वीकारतत्त्वं(?) निरूप्यत इति **भर्तमित्रा**चार्यः (६)। प्रकृताधिकारिखेदावहत्वाच्च न पदवाक्यवित्परिचिततताप्रकटनमात्रलालसात्मकमतिरिति विरम्यति(म्यते?)। **लक्षणमि**ति उदाहरणम्। **नत्त** इति, करणाङ्गहारादौ। **यस्मिन्नि**ति। 'नपुंसक'मित्येकशेषः, **तथे**ति उक्तं, वक्ष्यते चेति शेषः। तत्र नत्ते उक्तं, युद्धे वक्ष्यते न्यायेषूह्यमिति शेषः, गतौ च द्वादशाध्याये वक्ष्यते– इत्यध्यायत्रयस्यार्थ इह सूचितः (७)। तत्रोद्देशमाह– सभावेति (भौम्यः इति?) भूमौ भवा भौम्यः, एवमाकाशिक्यः उपरिचरताम्। स्मता इति वेदोदाहरणे त्र यावत्स्मर्यते तावद्व्युत्पादनार्थं, शिष्टानि। तैर्वक्तव्यम् तेनैतन्नाशङ्कनीयम्। यदि नेदं परिगणनं कियता भेदेनोक्तेति न तत्र स्पष्टम्। यल्लक्षणमनन्वर्थं च, तद्व्याक्रियते (८–१३)।

अथ समपादा– ननु समपादा कथं वा चारीत्याह– **स्थानसंश्रये**ति यदा समपाद एव स्थानान्तरं गच्छति तदा चरणश्चारी भवत्येव योग्यतया तथा व्यपदेशादिति भावः (१४)।

अथ स्थितावर्ता– **भूमिघष्टेने**ति, अग्रतलस चरे**णाभ्यान्तरमण्डलं** द्वितीयपार्श्व जानुस्वस्तिकान्तं, **पुनः** शब्दो विशेषं द्योतयन् सन्नि(वेश)योगमाह। तेन स चेत् स्वस्तिकत्वेन श्लिष्टस्ततो द्वितीयमुत्सारयेत् स्वपार्श्वं कर्षयेदेकस्य स्थानमपरस्यामिति तथा।

अथ शकटास्या– **निषण्णाङ्गस्त्वि**ति प्रयत्नघतपूर्वकाय इत्यर्थः। शकटमसनीयं क्षेप्यं यया। एकस्मिन्नु पादे समे ङ्गुल्यंचितं पक्षेतरं कृत्वा जानुनः कु चने जङ्घाप्रसरणे च स्वपार्श्वे च त्र्यश्रितलस चरस्थापनं नु निरोधन(रेचन?)मिवेति केचिदेनामाहुः। एतच्च लक्षणं लक्ष्यार्थासङ्गतमेव (१६)।

अथाध्यर्धिका– **सव्यस्ये**ति दक्षिणस्य। **पष्ठत** इति पार्ष्णिदेशे। **तस्ये**ति दक्षिणस्योपसर्पणे स्वपार्श्वार्धत्र्यश्रिततया स्थितिः। अव्यतिरेकेति अध्यर्धतालान्तरत्वादयो मन्तव्याः। एकस्य पूर्णता गतिरन्यस्य पादस्य पूर्णार्धकेत्यन्ये। करणप्राधान्याच्चैवमुक्तं वामस्यापि पष्ठसङ्गतमेव (१७)।

अथ चाषगतिः– **सव्ये**ति दक्षिणस्य पष्ठत इति, सव्यो पसर्पत्येव सर्वत्र। **प्रसारित** इति तालमात्रमग्रतः पुनः स एवापसर्पितो द्वितालमात्रं पश्चान्नीतः, वामः सव्येन सहापसर्पति। किंचिदुत्प्लुत्य सव्यवामावपसर्पतः श्लिष्यतश्चेति सत्रासमपसर्पणादौ चाषस्येव गतिः चाषगतिः। सव्योपसर्पि चेत्यन्ये पठन्ति, तत्र श्लिष्टत्वं शब्दो(सव्यो?)क्तत्वमपसर्पणं चार्थः (१८)।।

अथ विच्यवा– पादस्येति पादयोरित्यर्थः (१९)।

अथैलकाक्रीडिता– उत्प्लुत्या किञ्चिदेकः सक्थिगुल्फदेशेभ्यः पुनरुत्प्लुतिः अङ्गान्तरेणैवमिति पर्यायशः पतनं यत्र चार्या सा अजिकागतितुल्यत्वादेडकाक्रीडिता (२०)।।

अथ बद्धा– केवलयोरेवोर्वोर्वलनं स्थित एव जङ्घास्वस्तिक इति बद्धां केचिदाहुः। अन्ये तु स्वस्तिकापसरणेन पाददतलाग्रयोर्मण्डलभ्रमणपूर्वकं स्वस्वपार्श्वगमनमिति यदूरुबन्धनमाहुः। जङ्घयोः संबन्धनात् अनुबद्धा(२१)।।

अथोरूद्वत्ता– अग्रतलस चरस्य पादस्य संबन्धिनी पार्ष्णिर्द्वितीयपादपष्ठभागोन्मुख्यं यदा भवति, जङ्घा च जानुनमनादाकुञ्चिता उद्वत्ताद्वितीयजङ्घासम्मुखं वलनात् तथा। ऊरोरूर्ध्वविवर्तनात् लज्जेर्ष्यादिविषया ऊरूद्वत्ता। अन्ये तु पार्ष्णिद्वितीयस्य तलस चारबाह्योन्मुखीत्याहुः (२२)।।

अथाङ्किता– अग्रत इति। अपिस्समुच्चये, वा पर्याये। तेन समस्थितस्यैकस्य द्वितीयस्तलस चरः क्रमादग्रे पष्ठे च निर्घष्टः श्लिष्टः कार्य इति अङ्किता, पादस्य स्वस्थानातिक्रमणात्। अङ्क अतिक्रमहिंसयोरिति पठन्ति, सत्त्वे च रूपम्[1] (२३)।। मधुसूदनी reads : अङ्क अतिक्रमहिंसयोरित्यस्य इतचि रूपं पठन्ति सत्त्वे च and observes इसी अङ्क धातु का भाव में यह रूप है। यहाँ 'सत्त्वे' का अर्थ भाव है।

अथोत्स्पन्दिता– बाह्येन कनिष्ठाङ्गुलिभागेन अभ्यन्तराङ्गुष्ठभागेन निवर्तते चेदु(भयोः पादयोः) गमागमं कुरुते। किमवधीत्याह पादरेचितस्यापसारेण शोभापेक्षयोत्क्रान्तमस्याम्। यन्नद्याः प्रत्यावर्तनरूपस्पन्दितकृत् तत्तुल्यत्वादियमुत्स्पन्दिता। रेचकं नत्तहस्तमत्र केचिदाहुः (२४)।।

अथ जनिता– **तलस चरपादः प्रवर्तित** इति। एतदेवास्याः स्वरूपं मुष्टेर्वक्षोगामित्वं हस्तान्तरस्य च प्रवर्तनमितिकर्तव्यतामात्रम्। समस्तगतीनामियं जननं करोति प्रारम्भरूपत्वादिति जनिता (२५)।।

अथ स्यन्दितापस्यन्दिते– क्रमसमो निषण्णोरुः पादो दक्षिणस्तु प चतालान् प्रसारितः। ''तालः स्मतः मध्यमया'' इति। सा स्यन्दिता प्रसारणधर्मत्वात्। एतद्विपर्ययादस्या अपि सव्येन स्यन्दितेनेति अङ्गपर्यायाच्च लब्धाप्येषा प्रयोगे साहचर्यनियमख्यापनार्थं पुनर्निरूपिता। आलीढप्रत्यालीढयोस्तु पादद्वयमपि त्र्यश्रितसंस्थानं मण्डलस्थानतो जीवित्वं यद्वक्ष्यते 'अस्यैव दक्षिणं पादं प चतालान्' इत्यादि स्यन्दितायास्तु नैवमिति शेषः। स्थानस्य स्थितिप्रधानता चार्यास्तु गतिप्रधानतेत्यपि विशेषः (२६)।

अथ समोत्सरितमत्तल्ली– तलस चरजङ्घास्वस्तिकेनाभ्यन्तरे यदान्यस्य तदेव च द्वितीयतलस चरं करोति ततो घूर्णमानस्योस्तयोः उपसर्पणमित्यन्ये। समः अविकलः(अ) अवनं रक्षणम् उत् तदर्थं सरितः गतिमान् मदनं मत् मदं तनोतीति मत्तत् तस्य लयो गमनं यस्यामिति समोत्सरितमत्तल्ली। सरितशब्दो रि गतौ विन्यस्यते सहेन समासे च

[1] अग्रत एव प्रसिद्धेति कीर्तिधरः।

मदनं मुत्क्षिपः लयनं लीः। सरिशब्दस्य प्रातिपदिकात् तचि वा सरितशब्दः। सं आ उत् सरित् इत्यन्ये पठन्ति। मदेन यो न विकलीभूतः रक्षार्थं चान्यतरः पलायते तस्य वै द्विधा गतिरिति मध्यमदविषयेयं चारी सम्पद्यते (२७)।

अथ मत्तल्ली– **पादाभ्या**मिति भूमिश्लिष्टाशेषतालाख्यामिति जङ्घास्वस्तिकयोगेनार्धत्र्यश्रितभागाभ्यां घूर्णमानत्वेनापसर्पणाद्वा, अगाढ(?गाढ)मदविषया मत्तल्ली (२८)।

नियुद्धकरणाश्रया इति नियुद्धे नादिसिद्धा एताः करणाङ्गहारेषु च ततो नाट्ये। स्मता इत्यानेनोपवेदसंबन्धत्वेन वेदो त्र प्रमाणमिति दर्शितं, विनियोगदिक्प्रदर्शनं चेदं मन्तव्यम् (२६)।

अथातिक्रान्ता– **उत्क्षिप्ता यस्य पार्ष्णि**रिति (६–२७७) कुचितं तद्द्वितीयगुल्फक्षेत्रे कृत्वा किंचित् पुरतः प्रसार्य प्रकृतिभेदेन चतुस्तालाद्यन्तरमुत्क्षिप्याग्रेण भूमौ निपात्यत इति गन्तव्यातिक्रमादतिक्रान्ता (३०)।

अथापक्रान्ता– ऊरू च स्तनोपलक्षितां पूर्वं (बद्धां) कृत्वा ततः पादमुद्धत्य पार्श्वे क्षिपेदित्यपक्रमणादपक्रान्ता (३१)।

अथ पार्श्वक्रान्ता– कुंचितं पादं स्वपार्श्वेनोपरि नीत्वा भूमौ पाष्र्ण्या पातयेदिति पूर्वं कु चनाद्बलादेवोद्घाटितत्वं भवति, तस्य हि लक्षणं ''स्थित्वा पादतलाग्रेण पार्ष्णीर्भूमौ निपात्यत'' इति (६–२६६) इयमेव पार्ष्णिचण्डघातेति प्रसिद्धा। अन्ये तु द्वितीयोरुक्षेत्रं यावदुत्क्षिप्योद्घाटितेन पातयेदित्याहुः (३२)।।

अथोर्ध्वजानुः– **क्रमस्तब्ध**मिति यथा तस्योत्क्षेपस्तथास्य स्तब्धतेत्यर्थः (३३)।

अथ सूची– **जानूर्ध्वं** जानुपर्यन्तां जङ्घां प्रसारयेत्, यदि वा जानुनोरूर्ध्वमूरुपर्यन्तां जङ्घां सकलां प्रसार्याग्रयोगेनापातयेदिति। सूच्याकारत्वात् सूची (३४)।।

अथ नूपुरपादिका– **पष्ठत** इति ''पार्ष्णिर्यस्य स्थिता भूमौ'' इत्यंचितं (६–२७५) कृत्वा तं पष्ठतः स्फिक्पार्ष्णिश्लेषपर्यन्तं नीत्वा स्वपार्श्वे ग्रतलेनांचितं जङ्घां पातयेदिति। नूपुराणां झणज्झणिति शब्दजननात् स्वरितार्थत्वमनया भवति नूपुरयोजनं चेति तथोक्ता (३५)।

अथ डो(?दो)लपादा– **उत्क्षिप्येति** दक्षिणक्षेत्रान्तं स्वपार्श्वं निनीय ततो पि स्वपार्श्वं दोलयेदिति दोलाकारेण नयेत्, ततः स्वपार्श्वे पाष्र्ण्या निपातयेत् (३६)।

अथाक्षिप्ता– **आक्षिप्ये**ति। अग्रतस्त्रितालोत्क्षेपादर्धमण्डलवत् पार्श्वान्तरं नीत्वा स्वस्तिकेन पाष्र्ण्या भुवि पातयेत् (३७)।

अथाविद्धा– विश्लिष्टजङ्घस्यैव स्वस्तिकस्य संबन्धी **कुंचितः** पादः **प्रसारितः** तत आविद्धस्सन् स्वपार्श्वे द्वितीयपार्ष्णेः क्षेत्रे पाष्र्ण्या पातितः कार्यः (३८)।

अथोद्वत्त– **आविद्ध**मिति आविद्धचारीसंबन्धिनं कुंचितमित्यनेन आविद्धाशेषभूतेयमिति दर्शयति। आवेष्टनं द्वितीयोरुक्षेत्रगपार्ष्णित्वम्। तमेव पादमुत्प्लुत्य भ्रमरकं कृत्वा पातयेत्। ततो द्वितीयमित्यूर्ध्वं वर्तमानत्वादुद्वत्ता (३६)।

अथ विद्युद्भ्रान्ता– **पष्ठत** ऊरुमूलादिति केचित्। उपाध्यायस्तु पष्ठतः पार्श्वात् पश्चाद्भागे वलितं कृत्वा शिरःसंश्लेषात् तद्द्वारेण सर्वत ऊर्ध्वाधःपार्श्वेषु मण्डलवद्भ्रमितं प्रसारयेदिति विद्युद्भ्रान्ता (इति) (४०)।

अथालाता– पूर्वं पश्चाद्भागे प्रसारितस्ततो वलनेनाभ्यन्तरीकृतो द्वितीयोरुदेशादभिमुखतलं च नीतः, ततः स्वपार्श्वापार्ष्ण्या पातित इति अलातचक्राकृतिरलाता (४१)।

अथ भुजङ्गत्रासिता– द्वितीयोरुमूलक्षेत्रान्तं कुंचितमुत्क्षिप्य कटिजानुनिवर्तनेन नितम्बसम्मुखपार्ष्णित्र्यश्रमूरुं विवर्तयेत्। स्वपार्श्वगजानुकमुत्तानपादतलं कुर्यादिति पादोपान्तभुजगभयभावितगतिसादश्याद्भुजङ्गत्रासिता (४२)।

अथ हरिणप्लुता– अतिक्रान्तचार्युक्तकुंचितं पादमुत्क्षिप्योत्प्लुत्य च तमेव पातयेत्, तदनन्तरं द्वितीया जङ्घा अंचितपाता सती पष्ठभागे पश्चाद्देशे क्षिप्ता कार्येति मगप्लुतितुल्या, ''सधि(?त्थि) होदु'' इत्यादौ विदूषकादेर्दश्यते (४३)।

अथ दण्डपादा– नूपुरपादोक्तं कुंचितं पादं द्वितीयपार्ष्णिग्रं कृत्वाग्रतः प्रसारयेत्; **कथं**, क्षिप्रं कृत्वा तथा **आविद्धकरणं**, आविद्धस्वदेहक्षेत्रसम्मुखीकृतजान्वग्रात् क्रिया यत्र। ऊरुजानुजङ्घस्य स्तब्धत्वेन दण्डाकारत्वाद्दण्डपादा (४४)।

अथ भ्रमरी– अतिक्रान्तचार्युक्तं कुंचितं पादमुत्क्षिप्य भुजङ्गत्रासितवत् त्र्यश्रमूरुं विवर्त्य द्वितीयपादतलभ्रमणे **त्रिकं परिवर्तयेदिति** सर्वशरीरपरिवर्तनद्वारेण नेमिभ्रमणाद्भ्रमरी (४५)।

इतिकर्तव्यताशेषं विनियोगादिकं चासां दर्शयति– **ललिताङ्गक्रियात्मिका** इति **धनुर्वज्रे**त्यादि च (४६)।

अथ कायशोभां निरूपयन् व्यापकविनियोगं चारीणां दर्शयति– **अग्रगा**वित्यादि। इदं तात्पर्यम्– इह कदाचिद्गतेः प्राधान्यं, कदाचिद्धस्तव्यापारस्य, कदाचिद्द्वयोः, आद्ये पक्षे पादविक्षेपस्यानुगौ तदनुसारिणौ तत्पश्चद्भाविनौ च हस्तौ, द्वितीये हस्तव्यापारस्यानुसारेण पश्चाद्भावेन च पादौ, ततीये द्वयोरपि। तुल्यकालताविनियोगपारतन्त्र्येण च प्रवत्तिः। **योग** औचित्यम् (४७)। कायशोभायोजनायेह चात्राध्यायाग्रे चार्यः प्रस्तुताः (१०–७३) इति तत्प्राधान्यं यदा भवति तदा प्रयोजना कीदशी कार्येति स्पष्टयितुमाह– **यतो हस्त** इति। **तथे**ति तेनैव प्रकारेण, **उपाङ्गानि** भ्रूनेत्रादीनि (४८)। ननु पादस्य क्रियायां यदि हस्तस्य गतिक्रिया तर्हि तद्विश्रान्तौ हस्तस्य को वत्तान्त इत्याशङ्क्याह– **पादचार्या**मिति समाप्तायामिति शेषः। एवकारो प्यसंभावनां निरस्यते। **हस्त** इति (४६)। अर्धचन्द्रो नत्ते नाट्ये, नत्ते तु पक्षप्रद्योतौ पक्षवंचितावपि पादस्य धरणीप्राप्तौ कीदक् कायसन्निवेश

इत्याशयेन स्थानकान्यभिधित्सुः पूर्वोपसंहारपूर्वकं प्रतिजानीते– **एताश्चार्य** इति। ललितत्वमङ्गस्य यत इयतीभिरेवेमा उत्तानत्वे। तावानेव गतिप्रकार इति यावत्। **स्थानानि** भावे करणे धिकरणे वा व्युत्पत्त्या कायसन्निवेशाश्च या उच्यन्ते। **सर्वशस्त्रविमोक्षण** इति साधारणो विनियोग उक्तः। **आसाम**पि चारीणां पूर्वं गतिरूपत्वं गतेश्च पूर्वं पश्चाद्भाविनी स्थितिरिति भावः (५०)। **नणा**मिति स्थानकानि तु निरूपयिष्यन्त इत्यर्थः। **पक्षस्थित** इति पार्श्वाभिमुखाङ्गुलिः। **त्र्यश्र** इति किंचिदग्राभिमुख्यमस्पशत् (५१–५२)। अंचिता कुटिला जानुनमनाज्जङ्घा यत्र। सौष्ठवे यदङ्गं वक्ष्यते तेन पुरस्कृतं पूजितं, सौष्ठव अप्रधाने वा अङ्गपुरस्कृतं प्रधानम्। **हि** यस्मात् **विष्णुरत्राधिदैवतम्** तस्माद्वैष्णवम्। तेन तस्य तादशस्य वा स्त्रीप्रधानस्य सूत्रधारादेः प्रयोगे स्थानकमिदम्। एवमुत्तरत्र मन्तव्यम् (५३)। एतदेवाह– स्थानेनानेनेति, स्वभावजः अनावेशितः (५४)। (विप्रमङ्गलेति) विप्रैः क्रियमाणं यन्मङ्गलाशीर्वचनादि तस्य धारणं प्रतीप्सन् (५६)। स्वस्थादीनामिदं स्थानकम्। लिङ्गस्थाः शैवाद्याः व्रतस्था ऊर्ध्वकायादिप्रज्ञाङ्गाः(?) (६१)। निषण्णावचलौ विश्रान्तौ तु (ऊरू) यत्र सूच्यपेक्षया। कियत्याकाशदेश इत्याह– **तालास्त्रयो र्धता**लाश्चेति सार्धतालत्रयादधो नभोदेश इत्यर्थः (६२)। विशाखः स्कन्दः। व्याप्याङ्गानामेव युद्धादौ निर्गमनात् तेषामेव वेगादानपार्ष्णिचोदनाक्रमेण (६३–६४)। **ऐन्द्रे त्विति** शेषं द्योतयन् सार्धतलद्वयान्तर्नभोदेशनिषण्णोरुत्वमत्रापि सूचयन्निति (६५)। मण्डलेश्वरविषयत्वान्मण्डलम् (६६)। अश्वानां वाहने वैशाखं, इदं तु हस्तिनां तेभ्यस्स्थूलानामिति प्रक्रमात् (स्थूलतमात्) पक्षिणो त्र गरुडादयो मन्तव्याः।

अस्यैवेति निषण्णोरुत्वं तथा त्र्यश्रत्वं द्वयोः सूचयति (६७)। आसमन्ताल्लीढा स्पष्टा भूमिर्येनेत्यालीढम् (६८)। संफेटः सङ्घर्षः (६६)।

आलीढपरिवर्त इतीयदेव लक्षणं पूर्वमुक्तं त्वितिकर्तव्यतास्पष्टकरणार्थम् (७०)। कुंचितमिति प्रसारणविपरीतं भूय उत्तानाकुंचितो त्र पादः (७१)। ननु प्रयोक्तृभिः शस्त्रविमोक्षः कार्य इत्युक्तम्। तस्य प्रयोक्तृभिः न्यायानामित्यादिव्यायामाच्चेति नामानुसारादेषां वत्तिविभागे परिशेषता। आरभट्या वार्षगण्यः। कटिच्छेद्यमिति भावे कृत्यम्। कटीस्थानादिषु परस्य हन्तव्येष्वतिक्रमेण चत्वारः (७३)। **एभि**रिति एभिर्न्यायैरुपलक्षिताः (७४)। शस्त्रमोक्षणविषयाः **प्रविचाराः** प्रकृष्टाः विचित्रा गतिविशेषाः परिश्रान्तिशब्दाश्चारीव्यायामखण्डमण्डलात्मकाः कार्याः (७५)। न्यायशब्दस्यार्थं दर्शयति न्यायेनाङ्गौचित्येन यान्यङ्गोदाहरणादि न्यायादेव च परबन्धनस्वभावितात्तिरूपात् प्रवर्तितानि तैः यत एतयोः क्रिया अतो न्यायाख्याः (७६)। **अथापि चे**त्यनन्तरं चेत्यर्थः (७७)। परिवेष्टनेन गमनं नयनं परिगमः (७८)। मणिबन्धोद्वेष्टनेन शस्त्रस्योद्वेष्टनं उद्वेल्लितेनेत्युद्वेष्टितेन (७६)। पष्ठत इति कायस्य पश्चाद्भागे (८२)। युद्धप्रसङ्गेन सर्वं प्रयोज्यमापततीत्याशङ्क्याह– **न भेद्य**मिति भावे प्रत्ययः (८६)। **संज्ञामात्रेणे**ति यथा परो जानाति युध्येते इमाविति एवं त्विमावित्यादिविषयं निधाय नाटकादौ संज्ञामात्रेणापि तेन

नानुचितमिति दर्शयति (८७)। **अथवे**ति व्यवस्थितविकल्पः (८८)। अङ्गसौष्ठवं यदुक्तं तस्य सिद्धये परिकरमाह व्यायाममिति। व्यायामो ङ्गशिक्षाभ्यामङ्गयोग्यकालमेव एवं द्रुतादेः चच्चत्पुटादेश्चानुसन्धेरङ्गमात्मीकृतन्तालाख्यं पठ्यते (८९)। **सन्नं** स्वविश्रान्तिपरिणतं गात्रं यस्य (९१)। **कूर्परांसशिर** इति प्राण्यङ्गत्वादेकवद्भावः। **तथे**ति साम्येनेत्यर्थः (९२)। अधमानामत्र स्वातन्त्र्यं दर्शयति **मध्यमोत्तमै**रिति (९३)। सौष्ठवं यदर्थं तत्सर्वसामान्यभूतं चातुरश्र्यमाह– **कटिनाभिचरा**विति क्रमेण यौगपद्येन च (९४)। खङ्गयुद्धे यथान्यायास्तथा धनुर्युद्धे पि कर्माणि सन्तीति दर्शयति। **प्रमार्जन**मिति प्रथमं धनुषो मार्जनं ततो पि बाणेन ग्रहस्ततो पि शरस्य सन्धानं ततो मोक्षः (९६)। व्यायामे प्रस्तुते तदुपयोगि सौष्ठवं तत्प्रसङ्गगतं च धनुः कर्माभिधाय प्रयोगमेव व्यायाममाह– **तैलाभ्यक्तेने**ति। तैलमत्र तिलतैलम्। यवागूर्यवान्नम् (९७)। योगाय विद्याविशेषसंबन्धाय प्रभवतीति योग्या गुणनिका (९८)। तस्य वस्तिविधिश्च तैलघतादिभिः यथादेशकालप्रकृतीति मन्तव्यमायुर्वेदात् (९९)। **रसक**मिति मांसरसं सेवेतेति संबन्धः। पानकानि च स्निग्धानीति संबन्धः। योग्या वा किमनेनेत्याशङ्क्याह– **आहाराधिष्ठिता** इति (१००)। **अशुद्धकाय**मित्यनेन वमनविरेचनविशुद्धगात्रस्य व्यायामे धिकार इति दर्शयति। अशुद्धगात्रत्वं चाजीर्णयोगे पि। **प्रक्लान्त**मिति अध्वश्रमादिना (१०१)। **अचलैरि**ति यत्र यत्र क्रियायां योज्यते तत्र तत्रैव प्राप्तपरिणतिभिरित्यर्थः। **मधुरै**रिति ललितैः (१०२)। अङ्गक्रिया अङ्गसिद्धिः। **एव**मित्युपसंहरन्नध्यायान्तरमासूत्रयति। (विकल्पनं) विचित्रतया कलयन्ते येन प्रकारेण तं वक्ष्यामीति सूत्रयन्नङ्गानुसारायातचारीपरम्परात्मनां मण्डलात्मनामसङ्ख्येयत्वं सूत्रयन्नुदाहरणमात्रार्थमध्यायान्तरमिति निरूपयतीति शिवम् (१०३)।

इत्थं दशममध्यायं व्याचष्टे च समासतः।
शिवस्मतिकृतार्थो पि परार्थं दुःखलात्मजः।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां चारीविकल्पो नाम दशमो ध्यायः।।

श्रीः

नाट्यशास्त्रम्

एकादशो ध्यायः

गतिमण्डलवैचित्र्यमासूत्रयति या सदा।
तथा नेदिष्ठनिर्मात्रीं शक्तिं वन्दे महेशितुः।।
स्वल्पे पि पाठ्ये न त्याज्यः को प्यध्यायो मया यतः।
विभोर्विश्वात्मनः स्तोत्रं मुख्यमन्यत्प्रसङ्गतः।।

शस्त्रमोक्षणे मण्डलानीति संबन्धः। इहेत्यस्मिन्नध्याये श्रुते श्रुतितद्दिशान्यान्यपि निबोधत, एषामियत् सामान्यलक्षणं **चारीसंयोगजानी**ति (१)। आकाशगतानां युद्धपरिक्रमेषु प्राधान्यात्पूर्वमुद्देशः आकाशभूचारीप्राचुर्यान्मण्डलेषु तथात्वम् (२–५)। **आद्यमि**ति दक्षिणम्। **उद्वाहित**मिति लक्षणैकदेशेन शकटास्यां सूचयति। एवमन्यत्र (६)। त्रिकन्त्विति (?त्रिकं चेति) भ्रमरीमाह (८)। बाह्यभ्रमरकं वामपदेन (९) **आस्पन्दि**तमिति स्पन्दितां चारीमाह, तामेवान्ये आस्कन्दितेत्याहुः (११)। दण्डक्रम इति दण्डपादा चारी (२१) **त्रि**कावर्तादि अन्ते पठितत्वात् परिसमाप्तिस्थानगतामेव भ्रमरीमाश्रित्य यन्मण्डलं दण्डपादाख्यं तत्रेति संबन्धः। **निकुट्टक**मित्यनेन तलस चरपादो लक्ष्यते (२४)। उद्वतमूरूद्वत्तदिकां चारीम् (२५)। समावर्तनं सम्यगावर्तनं सव्यापसव्यभ्रमरकद्वयेन (२६)। एताभिश्चारीभिः पर्यायेण षट्कृत्वः सप्तकृत्वो वा प्रयुक्ताभिः परिमण्डले चतुर्दिकं भ्रान्त्वान्तरालिकैः पादक्षेपैरिदमिदं कुर्यादिति सङ्गतिः। संख्याशब्देनाभ्यावत्तिर्लक्ष्यते (३०)। अतिक्रान्तस्यैव विशेषणं ललितं स चरतीत्यत एव मण्डलस्येदमेव नाम (३९)। **स चे**ति। स एवेत्यर्थः (५१)।

आस्फोटनमिति पादतलेन भूमिताडनं युद्धेष्वास्फालनमिति प्रसिद्धम् (६०)। **च**शब्दो प्यर्थे। अतः परमपि मण्डलानि योजयेत्। कथमित्याहुः। समाः परस्परं योजनोचिताश्चार्यो यत्र तत्रोहने प्युदाहरणं दर्शयति **समचारीप्रयोग** इति समानां भौमत्वेनाकाशीयत्वेन च चारीणां प्रयोगो यत्र। एवमनया दिशा बहूनि कल्पयेदित्याह आचार्यबुद्ध्योपलभ्यो भागः प्रयोगयोग्यो भवतीति (६९)। खण्डानां प्राधान्यमपि दर्शयति **खण्डानीति। वाद्येनानुगतानीति** ''गत्या वाद्यानुसारिण्या'' (अ४–२८२) इति नत्तविषयतुर्याध्यायाद्धि वैपरीत्येन नाट्ये गतौ प्राधान्यमाहेति शिवम् (७१)।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां मण्डलाध्याय एकादशः समाप्तः

श्रीः

नाट्यशास्त्रम्

द्वादशो ध्यायः

श्रुत्यन्तविश्रान्तविधिर्या गतिः परमात्मनः।
तां महानन्दसन्दोहत वमूर्तिं स्तुमः सदा।।

प्रकरणसंगतये प्रकृतानुपूर्वकं निरूपयिष्यमाणं प्रतिजानीते **एव**मिति। व्यायामानामन्योन्य संमीलनयोग्यानां चारीणां 'संहत्या योगे मिश्रीभावे सति मण्डलानां कल्पनमनुक्तमपि कर्तुं शक्यं बुद्ध्येति तत उपरम्यते। तत्राङ्गिकस्य रसभावयोर्विनियोगशो(विभागशो?) विनियोगस्य कृतत्वाद्यद्यपि तन्मिश्रणे पि पथग्विनियोगेन वक्तव्यं, तथापि शिष्यहितप्रतिपन्नो मुनिर्दिशं दर्शयितुं शिरःप्रभतिपादान्ते (यानि) अङ्गसंधेयानि कर्माण्युक्तानि तन्मेलनबलेन यो देहसंनिवेशो गतौ वा स्थितौ प्रकाराभावात्तस्य विनियोगं प्रकटयिष्यन् चारीमण्डल प्रसंगस्याचित्तवत्तित्वाद्गतिविनियोगमेव प्रतिजानीते। गतिश्च प्रकृतिं रसमवस्थां देशं कालं चापेक्ष्य वक्तव्या। प्रतिपुरुषमभिधानात्। तत्र प्रक्रिया पूर्वमुच्यते, तदेतत्तुशब्देन यावच्छब्दपर्यायवाचिना क्रमार्थेन काकाक्षिवदुभयतो धावता द्योतितम् (१)। तत्राप्रविष्टस्य का गतिरिति प्रयोगोपक्रमं सूचयति **तत्रोपवहन**मिति। यदङ्गानुसारालाप इति प्रसिद्धं तमालापं कृत्वा ध्रुवायां सम्यक् प्रवत्तयां, कथम्?, भाण्डवाद्यपुरस्कृतत्वादिरूपत्रययुक्तं कृत्वेति, त्रीण्यपि क्रियाविशेषणानि। तन्त्रीभाण्डं वाद्यमानं पुष्करवाद्यम्। मार्गो देशः, रसः स्थायिचित्तवत्तिः, वीप्सायामव्ययीभावः। यो यः कश्चिद्गहोद्याननिर्देशः, रत्यादिश्चित्तवत्तिविशेषः, तेनोपेतं कृत्वा, या ध्रुवा तथा उत्तमादिप्रकृतीनां यस्यावेशनं बुद्धौ प्रवेशो यत्र तथा कृत्वा। एतदुक्तं भवति– हंसाद्युपमानमुखेन प्रकृतिविशेषः, चित्तवत्तिविशेषः, उद्यानादिविशेषश्चावश्यं ध्रुवासूपनिबन्धनीयः (२)। एवं ध्रुवायां प्रवत्तयामेवं सत्याम्। पटे पकर्षिते यवनिकायामपसारितायां तदा सामाजिकानां नेपथ्यगहादयमागत इति नटी निवर्त्यते। चकारत्तत्काले पुनरुपोहनम्। ध्रुवाप्रवेशो लये मध्ये वलितया– वलनिकेति कोहलेन प्रयोगवलनाद्युपदिष्टं– शुष्काक्षरगानं कृत्वा, प्रवेश एव तथा समुचितस्थानकदष्टिमुखरागादिभियुक्तः कर्तव्यो यथा सामाजिकानां झटित्येवान्विताभिधाननयेन मुख्यरसव्याप्तिरुदयते। प्रगीतं गीयमानग्रामरागाग्रगतैकगमकाकर्णने समग्रग्रामत वसंवेदनवशः।

अन्ये तु नानार्थरससम्भव इत्यत्र **यथामार्गकलोपेत**मिति पठन्ति। उभयतः शेषत्वेन व्याचक्षते– मार्गेषु चित्रादिषु याः कला द्विमात्राचतुर्मात्राष्टमात्रेति ग्रामेषूच्यन्ते चालिप्तकादिषु कला वाद्याक्षराणीति। यद्यपि पात्राणामध्रुवा अपि प्रवेशा वक्ष्यन्ते तथापि संभवमात्राभिधानमेतदुत्तममध्यमयोर्वा प्रस्तावादेवमुक्तम्। तयोर्हि ता ध्रुवाः प्रवेशास्ते पि वा चकारेण संगहीता एव (३)। एकः समो न्यः पक्षः। **स्थानमि**ति त्र्यश्रे र्धद्विकतालभागिति

वैष्णवं सममन्यत् समुन्नतम् (४)। स्वप्रवेश एव सन्ने अचले प्रसन्ने, नात्युक्षिप्ते अधो वा उपरि वा अधोगामित्वं यत्नेन परिहार्यमिति श्लोकार्थमेव शिक्षयितुं स्फुटमुपायमाह **ग्रीवाप्रदेश** इत्यादिना सार्धेन श्लोकद्वयेन। स्वस्थमयूरवदञ्चितं सुरूपं शिरो यत्र (५)। **नाभिसंस्थ** इति चातुरश्रयप्रस्तावः खटकामुखः, वाम इत्यर्धचन्द्रः (६–७)। न चेदमुपविष्टस्थानकमपि तु गत्यानन्तर्यौचित्यात्तुस्थितस्थानकमेवेति दर्शयितुमाह **पादयोरन्तर**मिति। ''द्वौतालावर्धं च पादयोरन्तर''मिति (१०–५२) यत्स्थानकलक्षणं सूचितं तदेव कार्यं नान्यदुपवेशनादित्यर्थः। तत्र स्थानकानन्तरं गतिमुपक्षिपति **पादोत्क्षेप** इति स युक्तस्तेन भाविलक्षणेन देशकालपरिच्छेदेन च कर्तव्यः। स्वकरमानेन च तालः पात्रस्येत्यर्थः (८)।

तत्र देशपरिच्छेदं तावदाह **एकताल** इति। तालः प्रसारितमध्यमाङ्गुष्ठान्तरं ''तालः स्मतो मध्यमया'' इति। संख्याक्रमेणाभिधाय स्थायिस्थानभूतोत्तमप्रकृति––विश्रान्तत्वात्प्रयोगजातस्य तदुपक्रमं विनियोगमाह **चतुस्ताल**स्त्विति। **तु** शब्दो प्यर्थे कदाचिदन्यथापि भावात्। **तथा**शब्दो राज्ञां देवसदशगत्यसंभवसंभावनापसारणद्योतकः (९)। स्त्रीणां नीचानां साहचर्यादधमानामिति मन्तव्यम्। तेषां हि लिङ्गित्वादधमत्वं किञ्चिन्न संभावयेत। यथाशोभमिति नाट्यधर्मीकाममित्यर्थः (१०)।

देशनियममुक्त्वा कालनियममप्यौत्सर्गिकं तावदाह **चतुष्कलो ही**ति। **तथा चे**ति तेनोत्क्षेपेण यत्पादस्य पतनं तदुत्तमानां चतसभिः कलाभिः यस्मात्तदर्धार्धक्रमेण मध्यमाधमयोः परिभाषित इत्युत्सर्गतयेति भावः। तत्र गतिचतुष्टयं मागध्यादि वक्ष्यते यत्तत्रार्धमागध्यादौ क्रमेण चित्रादित्रयविनियोगात् । ''निमेषाः प च मात्रा स्यात्'' इति कलासामान्यलक्षणलब्ध औत्सर्गिकः सर्वत्र ध्रुवकमानेन चतुष्कलः पादपातः, तथा चोत्तमपरिग्रहे द्विपदी कोहलेनोक्ता––

''स्यादुत्तमानां द्विपदी चतुर्गुरुसमन्विता।
तत्रोत्क्षेपनिपाताभ्यां यस्मात्पादद्वयं भवेत्।।'' इति

लक्ष्यश्च इत्थमेव धिक्डिधिं इति द्विपदीभागेन पादेन पादपातः। अत्र ध्रुवके चतस्रः कला भवन्ति धिगडाधिङ् इत्यस्य हि कालः कखगघङ इत्यादिना, नहि व्य जनकालः स्वरकालात्पथक्, तानि गुरोश्च प्रचलत्वं खडतलचडस्तद्विद्भिस्त्रिपुटमेवावधार्यते(?)। तत्र हि 'तागडुधिं'–इत्येवंरूपं लघु कला तस्यास्तिस्रो मात्राश्चतुर्थे गुर्वक्षरे (द्वे) मात्रे इति च मात्राः। सर्वत्र चैवं प्रकारः समनन्तरग्रहणे विश्रान्त्यभावेन दुष्करः प्रयोग इति स्थानचेष्टाविश्रान्तिप्रक्लतये मध्यगता विरामरूपैका मात्रा लक्ष्यविद्भिः प्रकल्पिता, तद्वशादुक्ता तादशां चतुर्भिर्वा द्रुताः कलायां प्रतिभासन्त इत्यास्तां तावत्। इह चित्रमार्गेण चतुष्कलपादपतनमिति न्याय (नायं?) लक्ष्यलक्षणशोभाबाह्यत्वादपेक्ष्यते च।

अथ लयकालनियमशेषमाह **स्थित**मिति विलम्बितम्। **समवेक्ष्ये**ति प्रकृत्यादि भेदविभागेनेत्याह तमेव दर्शयति यथा प्रकृतीति धैर्यस्थैर्यविलम्बितलयमध्यसंमतं संवेदनं

यथार्थमिथ्यागोन(गौण?)गतधैर्यगाम्भीर्यादिकृतं मन्तव्यं (**यथाप्रकृती**ति) न तु जातिकालादिकृतम्। विदूषकस्य द्विजत्वे पि अविमलात्मत्वात् केवलमुत्तमघोषणायैव रचितं जात्यादि योजनीयम्। उत्तमस्याप्यन्यथाभावे कथंचिदुत्तमं सदप्यविद्यमानाया इति **प्रचुरे**ति लोकप्रसिद्धमेवेदमुक्तमित्यर्थः। न केवलं प्रकृतितो वयवभेदो यावच्चित्तवत्तिभेदेनाभिप्रेत्याह स वबलेन च लयत्रयं योज्यम्। सत्त्वं चित्तवत्तिः तेन संग्रामादावुत्तमस्यापि द्रुतं, शोकादावधमस्यापि विलम्बितम् (१३)। अथैतदनुसारिण्यां गत्युपयोगिन्यां ध्रुवायां विधिरिति दर्शयति **एष** एव त्विति। अत्र गत्यनुसारी तालविधिः, अन्ये त्वन्यथेत्युक्तं ताले। यस्तालालयः कलासहितः स कलातालालयः इति मध्यमपदलोपी समासः। तेनायमर्थः— ध्रुवाताले पि गत्यनुसार्येव कलाविधिर्लयविधिश्च। अत एवैतदनुसारेण भट्टलोल्लटगोपालादिभिर्भङ्गोपभङ्गविभङ्गविषये तालदीपिकादौ चिरन्तनसंमतो ध्रुवातालानां विनियोगः प्रप चतो दूषितः। तत्तु ध्रुवाध्याये विचारयिष्याम इत्यास्ताम्।

एवं देशकालनियममुक्तं प्रकृते योजयति **पुनर्गतिप्रचारस्ये**ति। गतिषु प्रचारो वैचित्र्यं प्रयोगं पुनः श्रणुतेति संबन्धः। संघटना ह्यनुक्तेति भावः (१४)। **स्वभावात् त्वि**ति। **तु**ना विशेषद्योतकेन मन्थरगतौ चतुस्तालत्वमुक्तं, स्वभावगतौ तु त्रितालत्वं, दीप्तगतौ तु प चतालत्वमपि कार्यमिति दर्शयति। तां गतिप्रचारघटनामाह **पार्श्वक्रान्ते**रित्यादि।

''कुचितं पादमुत्क्षिप्य पार्श्वोत्थानोत्थितं न्यसेत्।
उद्धट्टितेन पादेन पार्श्वक्रान्ता'' (१०—३२)

इति पार्श्वक्रान्ता चारी। **रङ्गकोणं** पूर्वोत्तरम् (१६)। द्वितीयकोणामित्युत्तरपश्चिम**मेव**मिति। अन्यस्मिन्निति कोणद्वये तिदिशति। पूर्वरङ्गे चैषा प चपदी व्याख्याता (अ५—७३)। वेधः पार्ष्णिक्षेत्रे सूचीपादनिपातः। **वामवेधमि**ति अन्तराविद्धमुखं (तत्) प्राप्तिसिद्धौ कोणैर्गत्वा ब्रह्मस्थानस्यानुल्लंघ्यतामाह। एतच्च प चपदीगमनं सर्वत्रौत्सर्गिकम् (१७—१६)। विशेषमप्याह **रङ्गे विकृष्ट** इति। भरतशब्देन उपचारतस्तद्विद्यायोनिसंबन्धः सूच्यते। **गतागते**रिति परिमितायां दिशि प चपदी गतागतेन नियमः एकत्रैव स्थाने द्वौ पादविक्षेपाविति मन्तव्यम्। विकृष्टायां च भूयो भूयः प चपदी (२०)।

अत्रैव विषये विविधप्रमाणा पातरीतिः, तद्द्विलयद्विभङ्गचतुर्भङ्गादयः प्राधान्येन। व्यामिश्रगतेरपि विशेषं व्याचिख्यासुः समगतिमुपसंहरति **यः समै**रिति। **तथैवे**ति साम्येनेत्यर्थः (२१)। मिश्रगतिमाह **अथे**ति। **परिवारित** इत्युत्तमत्वेन विवक्षित इत्यर्थः। तेन देवादिवत् साध्वाश्रीयमानमुत्तमप्रकृतावपि(?)नायं विधिरन्यस्यैव तत्र प्राधान्यात्। तदोत्तमपादपाते मध्यमस्य द्वौ नीचादे(रेकः, उत्तम)स्य चत्वारः (२२)। अत्रैव च चतुस्तालादिविभागे निश्चयार्थं प्रश्नमुत्थापयितुमुपसंहारमुत्तमविशेषाभिधानसहितमाह **दैत्यदानवे**त्यादि (२३)। **सर्वेषा**मिति देवदूतादीनाम्। **उद्धता ये त्वि**ति मातलिप्रभतयः (२४)। देवांशजा इति लोकपालांशविनिर्माणा राजानः। वेदेषु तथाध्यात्मशास्त्रेषु वेदान्तेषु,

येषामनेन प्राधान्यमुक्तम्। (अनुकरणं) देवादीनां वर्णनात्, उक्तं च विराजविद्धराजगुह्यमिति(?) देवानुकरणे नाल्पत्वमित्यर्थः (२८)। **अय**मिति चतुष्कल इत्यादिः। **स्वच्छन्दगमनं** स्वस्था गतिः। संभ्रम आवेगः उत्पातो त्रोन्मादादिः। (उक्त) **प्रमाण**मिति उक्तरूपमित्यर्थः (२६)। सर्वासां प्रकृतीनां गतिरिति कलालयतालाश्रिता। सर्वमेतदिति तु युक्तम् (३०)। एतदेवास्य दूषयति चतुरर्धं द्वे उत्तमस्य, एका मध्यमस्य, अर्धं नीचस्य; अवस्थान्तरबलात् (३१–३२)। (**नीचेष्वर्धकलं भवे**दिति) अनेन कलातुर्यभागो भरतमुनिना सूचितो यं लक्षणविदो वत्तकारं द्रुतमाहुः, यद्यथा प चमांश उक्तनीत्या श्वासादिविश्रान्तिपूर्वक इति चतुर्धा स एव द्रुतो युक्तः (३३)। चतुष्कलादप्याधिक्यमस्तीति दर्शयति। **ज्वरार्त** इत्यादि। भयेन यो न्वितो जातोरुस्तम्भः, अन्यथा ह्यस्य त्वरिततरा गतिर्वक्ष्यते। **विस्मय** इति तत्कृतस्तम्भ इत्यर्थः। अवहित्थ इति कृतकधैर्याणां कृतकं हि नः सुश्लिष्टं कर्तुं पार्यत इति। तत्राधिक्यमेव भवति तत एव हि कुशलाः कृतकतां विदुः (३४)। अत्यादरवदौत्सुक्येन सम्यगन्वितो य एव श्रङ्गारभेदस्तत्रैव विप्रलम्भ इति यावत्। **स्वच्छन्दगमन** इति कार्येण विना क्रीडाचङ्क्रमणे। **अधिकले** इत्यधिशब्दो धिकार्थः। **अधिकला**मिति केचित्। आधिक्यं प्रकर्षेण चतुःस्वरूपेण संख्या चैतत् प्लुतस्य विरामस्य च स्वरूपाधिक्ये तालबोधः संख्याधिक्येन षडष्टकलादेर्विकृष्टमधिकृतं कलान्तरं परिमाणं यथा तथाभूतः पादपातो यस्याम्। अत एवैतदापानप्रसङ्गविचारणाद्वक्ष्यति–

षट्कलन्तु न कर्तव्यं तथाष्टकलमेव च।
पादस्य पतनं तज्ज्ञैः खेदनं त वेत् स्त्रियाः।। (१२/१८४–१८५) इति।

चतुरर्धैककलमिति वचसा सप्तकस्य च निषेधेन च त्रिकलप चकलादीनामभावं सूचयति। विषमाणां सपरिमाणोत्क्षेपणनिपातनात् योगात्तलविदां हि साम्यमुपनिषद्भूतं तच्चात्र स्फुटयति (३५)।

एवमेतेषु षट्कलादप्यधिकं मानं, तथा च तपःशान्तानां परिक्रमे यत्तूल्ल(स)नाख्योलयः कोहलादिभिरुक्तो यस्यातिविलम्बितः कालावधौ। एवं कलाधिक्यमभिधाय न्यूनत्वमप्यस्तीत्याह **अस्वस्थकामित**मित्यादि। अस्वस्थे प्रच्छन्नकामिते हि त्वरातिशयः (३६)। अनिष्टं यदा बान्धवादेः श्रुतं तदा तदन्तिकं द्रुतगमनं, अद्भुतदर्शनविषये यदा क्षेपः प्रक्षिप्तता, पुनरेतन्न दुष्यत इति। अत्ययो तिक्रमणं शीघ्रसंपादनं प्रयोजनमस्य। यन्नाभिरुजितमवश्यकर्तव्यं च त वरया क्रियते, त्वरयान्वितं सुकार्यं अभिरुचितमेवेति विशेषः **त्वरान्वित**मिति। इयता यद्यापि सर्वं लभ्यते तथापि कविनटव्युत्पादनाय प्रप चः (३७)। अपराधो भिनेयः शत्रोरन्य एव, यद्वा यस्यापराधः कृतो गुर्वादेस्ततश्च रुषा गतः सो पराद्धः। एतेष्विति एवंप्रकारेष्वन्येषु मदादिष्वपीत्यर्थः। **विकला**मिति विकलः कलापरिमाणं यस्याः कला अर्धकला तुर्या सा यद्यपि तत्र नादरणीयं तत्त्रिभागषड्भागादिरपि तत्र भवति। अत एव संभ्रमोत्पातरोषेषु चतुरर्धकलमित्यनेन पौनरुक्त्यं तस्याविषयत्वादस्य तु विषमभागविषयत्वात्। तथाहि मत्तगतौ शेखरकस्य

खण्डकप्रयोग हि 'गहिदुं धि' इत्येवं रूपे मात्रा ततीये ततीयस्य नामात्र धं धग् इत्येकः पातः, त्सुक इति द्वितीयो, धि इति ततीयो नचैषां साम्यम्। एतेन च कलानां साम्यं न्यूनाधिकतानिरूपणेन समविषमकलाभागभङ्गाभिधानेन गुरुलघुद्रुतप्लुतानां स्वीकारात्तद्वैचित्र्यम्। इयमपि (भङ्गोपभङ्गविभङ्ग) प्रकारप्रस्तारसंगहीता लक्ष्यसिद्धा भङ्गलयव्यवस्था प्रतिपाद्याक्षरतदर्थादिरूपा च धाराबन्धादिविषया घातमार्गशब्देन प्रसिद्धा व्यवस्था स्फुटमेव दर्शिता। माभूदेवं कालप्रमाण(कलापरिमाण?) नियमाभिधानं गजस्नानीभूतमित्याह **उत्तमानां गतिर्या त्वि**ति। तुरेवार्थे अन्यक्रममनेनैवेत्यर्थः। एतदुक्तं भवति– अनियमेन निदर्शितेन नियमो विप्लुतः, तथापि कलाधिक्ये षट्कलतोत्तमस्य तत्र मध्यमस्य चतुष्कलता, अधमस्य द्विकलता। यत्र न्यूनकलमुक्तं तत्राप्युत्तमस्य कला, मध्यमस्यार्धकला, अधमस्य कलातुर्यभाग इति कथं विप्लवः (३६)।

एवं प्रकृतिभेदेन गतिमभिधाय रसविषयेण दर्शयितुं प्रथमं पुरुषार्थोपयोगिरसविषयाणि निरूपयन् प्राधान्याच्च श्रङ्गारे तावदाह **गतिः श्रङ्गारिणी**त्यादि। स्वस्थकामितमप्रच्छन्नम् (४०)। अर्थसमाश्रये सिद्धे सूचायाः पुनर्वचनं, हृद्यस्य पदार्थस्य पर्यालोचनं सातिशयं चमत्कारकारीति निरूपयितुं तत्र चर्वितचर्वणवत्पुनः पुनः कंचिदपि भागमत्यजन् सूचां श्रङ्गारे कुर्यादिति दर्शयति। युद्धवीरादौ हि प्रधानानुसंधानमेवोचितं तन्मध्यपतितानां कार्यान्तराणामपर्यालोचनीयत्वात्, पर्यालोचने आचार्यं मातुलान् भ्रातॄन् स्वजनमित्याद्यापत्तेः, ये पि चान्तरमार्गा इत्यत्रत्यान् नत्ते सूच्यान् परिहर्तुमित्यर्थसमाश्रयणामित्यसत् (४१)। सापि हि निरर्थिका सूचैव हि कथं स्यात्। सूचातो पि चानन्तरमस्य प्रकृतां गतिमाह। नानेति शोभनो गन्धः सुगन्धः नानापुष्पैः सह सुगन्धः। अत्र समासान्ताभावः (४२)। सललितैः सविलासैः। सौष्ठवेनाङ्गचातुरश्रचेण युक्तैः, लयो विलम्बितं तालं चतुरश्रादि भूयः पुनः सामान्येन युक्ताप्युत्तमगतिः पुनर्विशेषतया निरूप्यत इति भावः (४३)। प्रच्छन्नं कृत्वा कामितं यत्र श्रङ्गारे सागरिकादाविव वत्सराजादेः, तदन्यत्र सीतादाविव पौलस्त्यप्रभतेस्तु, वेपमानदेहः (४५)। निर्वाणदीपः। वेलातुल्यवस्त्रः इति। तथाहि चन्द्रालोके सितवस्त्रावगुण्ठितो घनसारपरागपु जम जुगात्रो मुक्ताप्रायप्रचुराभरणो वस्त्राद्युपलक्षणम् (४६)। प्रच्छन्नकामस्तु। एवंविधकामिविषयमेव सुभद्राभिधानं ध्रुवातालमाहुः कोहलाद्याः। यस्य हि प्रस्तारो द्रुतलघुमिश्रः। शब्दशङ्कीत्यादिना खण्डितां कलां सूचयन् मिश्रप्रयोगां गतिमत्राह। उत्सुक इत्यादिना कार्ये (४७)। बेपमान देहः। प्रस्खलन्नित्यादिना कलातुर्यांशात्। विप्रलम्भे तु श्रङ्गारिण्येव करुणव्यामिश्रा गतिर्व्यभिचारिसंवादिन्यभिप्रेत्य पथङ्नोक्ता। एवं विषयाभिलाषप्रागे श्रङ्गारे भिधाय तद्रूप एव रौद्रे गतिं निरूपयति **रौद्रे रसे** त्विति (४८)। दैत्यादिप्रयुक्तं यदुक्तं तत्केनाशयेनेति शङ्काशमनायाह **एक एवे**ति। ननु किं तेषां क्रोधेन विनापि रौद्रता, ओमिति ब्रूमः। कथमिति चेत् रसाध्यायोक्तन्यायेनानु रसयितुमाह **नेपथ्यरौद्र** इत्यादि **स्वभाव** इत्यन्तम्। एवमेक एव रसस्तेषामिति कथितं, रसाध्याये चैतत्प्रपञ्चितम् (४६–५२)। **चतुस्तालान्तरोत्क्षिप्तै**रिति तालान्तरपातित्वं

द्वितीयतालान्तरालापेक्षयेति केचित्। उपाध्यायास्तु– तालशब्देनात्र कालमानमुक्तं न तु देशमानं, तेन यावता कालेनोत्क्षेपस्ततो न्यूनेन पतनमिति। एतदनु प्रकृतिसन्धिसंरभत्वं चाभिदधता विषमगतित्वमेषामनुज्ञातम्। तथा च कोहलमुखाः कलातदर्थद्वयलक्षणेन नर्तनकोत्फुल्लकादिना रौद्रादौ परिक्रममाहुः (५३)। **तद्विधा** इति भीमसेनादयः अनेन युद्धवीरे प्येषैव गतिरिति सूचयति।

अथ रौद्रप्राणौग्र्यविवक्षामध्ये पुरुषार्थप्राणायातबीभत्साश्रयां गतिमाह **अहृद्या**त्विति। श्मशानरूपा युद्धपतितकबन्धप्रभतिविरचिता अत एव रणेन कश्मला जुगुप्सिता (५४)। आसन्नपतितत्वेन कलार्धतुर्यांशत्वादि, विकृष्टपतितत्वेन कलासार्धकलादि सूचयति (५५)।

अथ वीरगतिमाह **अथ वीरे** चेति। विस्तारेण क्षेप इति स्यन्दितापस्यन्दितादेर्ग्रहणम्। तत्र च कलयार्धकलादि च प्रयोगः। तत **एवोल्लास**निकाख्यं तालमत्राहुर्लक्ष्यविदः। द्रुतेन प्रचारेणाधिष्ठानं गन्तव्ये देशे यस्यामिति। मल्लघटीत्र्यश्रादि विकृष्टपतितत्वे कलासार्धलघुद्रुतप्रचारं सूचितमनेन वीरे रौद्रे वा प्रवेगस्य स्पर्शभावत्वात् (५७)। तत्र गतिमाह **कलाकालगतै**रिति। पादैरिति बहुवचनेन त्रयः पादपाता गह्यन्ते। तेन कलया कालेन च सन्निधानात् तालगतैव गतिरिति लघुपातनं येषाम्, अथवैको लघुपातो द्वावन्योन्यद्रुतपातौ कलामात्रं च विराममित्येवम् (५८)। **उत्फुल्लकप**रिक्रमः स चोभयोर्वीररौद्रयोः क्रमः। **उत्तमाना**मिति। ननु बीभत्सस्यैवोत्तमविषयतैवं? केनैतदुपदिष्टं भवतः? पुरुषार्थसाधनो बीभत्सः उत्तमेष्वेवैतदभिहितरसविषयव्यभिचारियोगे तु (५६)। मध्यमानां गतिमाह **विस्मये** चेति। चकारादावेगादौ व्यभिचार्यन्तरेष्वपि। विक्षिप्तः इतस्ततो गतो व्याकुलप्रायो लघुद्रुतबहुलः परिक्रमो यस्य। तथा विस्मय एव व्यभिचारिरूपे स्थायिनि अद्भुतरसरूपे मध्यमानाम्। **पुनरेवमि**ति पुनर्ग्रहणादुत्तमानामद्भुते पि स्वच्छन्दगतिरेव पूर्वोक्तेति दर्शयति। केवलं तत्र विस्मयो वदन उत्पाद्यो मुखरागेः। **एतच्चे**ति परं हास्यं स्मिताद्यतिहसितपर्यन्तं, यदोत्तमानां स्वस्थगतिरेव तदा मध्याधमानान्तु अपहसितातिहसितयोर्विक्षिप्तगतित्वमेव। अन्यच्चेति तावद्विदूषकगतौ वक्ष्यमाणम्, एवं प्रसङ्गाद् द्रुतहास्ययोग्यगतिरभिहिता। करुणे तूच्यते **पुनश्च करुण** इति। ''ज्वरार्ते चे''त्यादिश्लोकेन यद्यपिस्तोकगतिरुक्ता तथापि यद्वक्ष्यत इति पुनश्शब्दार्थः। स्थितपदैः विलम्बितैः (६१–६३)। आयतं दीर्घं कृत्वा **उत्सृष्टै**रित्यत्तैः। **ऊर्ध्वनिरीक्षणैः** देवोपालम्भसूचकैः। **न प्रमाणं तथाविधमि**ति नात्र सर्वथा प्रमाणाभावः अपि त्वनियन्त्रितमेव पातात्मकं प्रमाणम्। अत एवात्र विलम्बितलयेन लघुत्रयेण द्रुतलयेन गुरुप्लुतमात्रेण च विरामेण जम्भलिकाख्यो लयः कोहलेन दर्शितः (६४)। उरसः पात आभुग्नत्वात्। करुणप्रसङ्गात्प्रहारे गतिमाह (६५)। **चूर्णा**नि परिमितोत्क्षिप्तानि अधिकपतितानि पादानि, तेनाध्यर्धिकातो ल्यान्तरं स्यात्। करुणे रसे दारिद्र्यमभिभवस्त्वत्र शीतः वर्षभवः संभाव्यत इति। तद्भवगतिमाह **शीतेन** चेति (६७)। **अथे**त्यनेन मध्यमोत्तमानामनुभावन्यूनभावेन शीतादिगतिं सूचयति। **तेषा**मिति पिण्डीकृतानां गात्राणां, चकारेण कम्पनं सङ्कोचनं

समुच्चीयते। एवकारेण सौष्ठव चातुरश्र्यादि निरस्यते (६८)। **करा**विति कटिपातरूपावित्यर्थः। गात्राणि पिण्डीकृत्य करौ वक्षसि च कृत्वा या गतिः लोके तस्याभिगमने यो यं शीताभिनयस्तत्र कर्तव्यः। प्रयोक्तभिर्नटैर्गात्रकम्पनं कुब्जीभूतो देह इत्यादि कार्यमिति पदसङ्गतिः (६९)। एवंकरुणे तत्प्रसङ्गेन चान्यत्रापि गतिमभिधाय भयानकं कथयति **ये चान्य** इति। येषामुत्तमत्वं कुलाद्यौचित्यात्। अथ सत्त्वविहीनाः। तद्यथा– विराटपुत्र उत्तरः (७१)। द्रुतैरित्यनेन धारालयादिः कोहलोक्तः सूचितः (७२)। अनुसरण इति शत्रोः पष्ठतः आगमनमित्यर्थः (७३)। नणां पुनराक्षिप्तविक्रमं यत्तेनोपाहृतं मध्येमध्ये कृतधैर्यं यस्यामित्यर्थः। तेन मध्ये गुरुलघुपादपाता अपि। तदाह– **क्वचिदासन्नपतितैरि**त्यादि (७४–७५)।

अथ शान्तरसे गतिर्वक्तव्या। स च प्राधान्येन तथा प्रयोगसौन्दर्यमावहति, अतो न्तस्संस्काररूपता येषां वणिक्प्रभतीनामस्ति ''वीरप्रशान्ता वणिज'' इति वचनात् यतिप्रभतयो पि च शान्तरसप्रधानाः ये नाटकादौ प्रसङ्गाः भवन्ति तेषामुभयेषामपि गतिमाह **वणिज**मित्यादिना। सचिवा अमात्याः। **स्वभाव**शब्देन तत्र तत्रानाविष्टमेव रूपमाह। नैष्ठिकमिति ब्रह्मचर्य एव प्रवर्त्तित इत्यर्थः। युगं चतुरहस्तम् (८०)। उपस्थिता झटिति संस्कारप्रबोधप्रभवा स्मतिर्यस्य। शान्तत्वादेव हि हृदयं नियम्यमेषां वणिगमात्ययतिप्रभतीनां निर्जने विषय इति सन्धिबन्धमेव नित्यनिरूपणपरं यस्य। **लिङ्गं** जपभस्मकौपीनादि (८१)। **अन्येष्वि**ति नाममात्रवत्तिषु तत्र तु विपर्यासो यथोचितं द्रष्टव्यः। तद्यथा, लोलं चक्षुः मनश्च चलम्, लिङ्गं पुनर्जटादि भवति, एवमन्यदुत्प्रेक्ष्यम् (८२–८४)। व्रतानुगत्वं स्फुटयति **विभ्रान्ता** चेति। उन्मत्तदिव्रतं हि श्रूयते आगमेषु तत्तदुचितैरित्येवमेव गतिरित्यर्थः (८५)। क्रमणादुत्क्रान्तं कृत्वा गतिः पाशुपतानां परमेश्वरव्रतधारिणां गतिरत्युदात्तेत्यर्थः। यदि वा परमयोग्यवस्थायां नाकुलदर्शनप्रतिपन्नानामुन्मत्तव्रतमप्यस्ति, तद्विषमेवोद्भ्रान्तत्वं गतौ। एवं रसान्तरसङ्गतिरुक्ता। यच्चान्यैः रौद्रानन्तरं शान्तरसाभिप्रायेण पठितम्।

''रूपादित्वनिराशंसः परोपायविचिन्तकः।
चतुष्कलैर्द्विपातैश्च पादैर्भ्रान्तगतिं व्रजेत्'' इति।

तदनर्थमेव, एतद्ग्रन्थे पुनरुक्तमपुष्कलार्थं, पुस्तके कथं दष्टमिति स्वकल्पितमेवेत्युपेक्ष्यम् (८६)।।

एवं रसानुसारेण गतिमुक्त्वा देशानुसारेणाप्याह। **अन्धकार** इति अन्धत्वेन गमन इति (८७)। **विसर्पितै**रपक्षेपणशून्यैः। **मार्गप्रदर्शिभिः** मार्गान्वेषणपरैरित्यर्थः। कर्तव्या गतिरितिच्छेदः तदाह चूर्णपदैः चूर्णपदैरित्यनेन खण्डधारालयं द्रुतबहुलं गुर्वन्तं कोहलोक्तं सूचयति (८८)। समपादेन स्थानकेन रथेन गतिः यस्मिन् देशे तं व्रजेत्, रथविशिष्टा वा गतिः, सामान्यके अकर्मकरभसात्मिका शास्त्र इतिवत्। कूबरं युगन्धरं, प्रतोदः प्रेषणकः, प्रग्रहो वल्गा (८९), वाहनानि रथ्यानि तानि, प्रकृतिविभागौचित्येन विचित्राणि तुरगवलीवर्दखरोष्ट्रकानि चित्राणि लिखितानि अस्य सूतस्यैव कर्तव्यानि तच्चित्रपटं

सूतस्यैव हस्ते आवर्जयेदिति यावत् (६०)। चूर्णपदानां लयविशेषनिरूपणाय पुनर्ग्रहणं **द्रुतैरि**ति। **रङ्गमण्डल** इत्यनेनेदमाह– यथा वस्तुतो सौ रङ्गमण्डल एव गतिक्रियां करोति तथात्र सर्वं तच्चित्रं तद्रथाकृति कर्तव्यं त वनुगतपदमात्रमेव, येन रथो यातीति प्रतीयते। एवं सर्वत्र। अत एवाह **विमानस्थस्यापी**ति। दिव्यस्याकाशगामिनो पि पुष्पकादेरित्यर्थः (६१)। अथ रथप्रसङ्गादुद्धतं क्रियान्तरमप्याह **आरोढु**मिति। उद्वहेदूर्ध्वं प्रापयेत्। **वैपरीत्येन** अधोमुखत्वेन गात्राधोनयनेन चेत्यर्थः (६२)। अथाकाशगतिं विमानप्रसङ्गादाह– **अधो वलोकनेने**ति। **मण्डलावर्त**परिवर्तुलगतिरितिकेचित्। आकाशीयानां चारीमण्डलानां पुनःपुनरावर्तनेनेति तूपाध्यायाः (६३)। एतामिति वक्ष्यमाणां कारयेन्नाट्याचार्यो नटैः (६४)। ऋजुभिः सरलैः ललितजङ्घैः। अत एवायतैरुत्क्षिप्तपातितैः, कुटिलया गत्या आवर्तितैः भ्रमितैः। उन्नतनतैरित्यन्ये पठन्ति, उत्क्षेपणकाले उन्नतैः पातनकाले तु नतैरिति व्याचक्षते। **भ्रश्यत** इत्यबुद्धिपूर्वकं पतत इत्यर्थः। **अपविद्धौ** त्वरितडोलाकारपातौ भुजौ यस्याम् (६५)। **अर्थवशा**दिति स्फुटयति **अवतरणमि**ति। तटादवतीर्य ततः शरीरं प्रयोगेन तारयेत् (६७–६८)। प्रतारणमिति एतत्प्रकारं व्याचष्टे। **जलप्रमाणापेक्षा** त्विति। एतत्स्फुटयति **तोये ल्प** इति। उत्कर्षः ऊर्ध्वं नयनं, प्राज्ये भूयसि जले यः प्रचारस्तत्र पाणिविचित्रकर्षणेन पताकसर्पशीर्षकादिनोपलक्षितगतिरिति संबन्धः (६६–१००)। अबुद्धिपूर्वकन्तु जलेन नीयमानस्य गतिमाह **प्रसार्ये**ति। **एकैक**मिति पर्यायेणेत्यर्थः। अशेषे ङ्गे आकुलत्वं यस्यां गतौ तथा आधूतमुच्यते तिर्यक् सकृदुद्वाहितं तुलयेत्, अस्वतन्त्रत्वाच्चैवं भवति। कैश्चित्तु पर्यायशः पार्श्वत्वमुक्तं, तदसत्। परिवाहितं ह्येतत् बुद्धिपूर्वके च जलप्रतरणे तत्स्यात्, नत्विह (१०१)। जलप्रसङ्गात् नौगतिमाह– **नौस्थस्ये**ति (१०२)। एवं प्रसङ्गान्नौगतिमुक्त्वा प्रकृतमेवारोहणमनुसन्धत्ते। **प्रासादारोहणमि**ति (१०३)। ननु वक्षप्रासादादि तत्र किं रङ्गमण्डले रथचित्रपटादिन्यायेन दर्शनीयं, नेत्याह **संज्ञामात्रेणे**ति। संज्ञा उक्तरूपारोहणाद्यभिनयः (१०४–१०६)।

प्रसङ्गादन्यत्राप्यभिनयं दर्शयति। **अङ्कुशग्रहणादि**त्यादि। तेन चित्रपटादिवियोगे पि रथगमनाद्यभिनयनं न युक्तम्। सौकर्यात्तु तत्करणमपि भवत्विति भावः (१०७)। स्वस्तिकसंयुतैरित्युक्तमेव विभजति **पार्श्वक्रान्तमि**ति। एवं देशापेक्षया गतिरुक्ता। नागादिप्रसङ्गात्तु सर्पगतिरपि (१०६)।

अथावस्थाभेदेन गतिं निरूपयन् विटावस्थायां तावदाह **विटस्यापि चे**ति (११०)। स्वं प्रकृत्युचितं यत्सौष्ठवम् (१११)। क चुकमिति तन्नेपथ्योचिता वत्तिः तदिच्छत्यात्मन इति ''क्यचि च''। क चुकीयः। **वयो वस्थाविशेषत** इति यदुक्तं तद्विभजत्येवमिति वक्ष्यमाणक्रमेण (११३)। **विष्कम्भः** स्थैर्यं तद्येषामिति मत्वर्थीयो कारः। **समुद्वहन्नि**ति यत्नेनाकर्षन्।

एतदेव दष्टान्तेन शिक्षयति **पङ्कलग्न** इवेति। अत एव **ख जकहेलाविलम्बित**लघुमयस्य कोहलोक्तस्य सङ्ग्रहः (११४)। **विष्कम्भ**ने यष्ट्यादिके

कृतं समन्वितं प्राणो बलं येन (११६)। **विकूणनं** सङ्कोचनं विमर्दनमिति मिश्रपरिहारार्थम्। स्थूलस्येति महाकायस्य श्रमकृत्स्वेदः (११६)।

पद्भ्यां सह विपर्ययगतैरिति पादचेष्टा तथा करक**र्म**ण्यनुवर्तनीयेति (१३०)। कुहकाः अधमा लिङ्गिन इति केचित्। **कुहक**शब्देन हास्यरस इत्येतत् (१३१)। तले पादतले शल्यादिक्षतमस्य तस्मिन् गतिमाह **पादेनाग्रतलस्थेने**ति **नर्कुटः** (१३५)**। प्रवेश** इति यद्यस्मादीदशः प्रवेश्यमानः पात्रविशेषः रङ्गे भवति ततो ङ्गहास्यमिति। प्रवेशपदेन नाट्य एव रसो न लोक इति दर्शयति (१३६)। असंबद्धं निरर्थमनुचितं च, तद्व्याचष्टे **अनर्थकै**रश्लीलश्चेति, अश्रियमशोभां रातीति रेफस्य लत्वम् (१४०)। **तस्मादि**ति त्रिप्रकारं हास्यमाश्रित्य क्वचिदेकः प्रकारः क्वचिद् द्वौ क्वचित्सर्व इत्यनेन क्रमेण विदूषकः स्वामिनः प्रकृतिं राजामात्यश्रेष्ठिप्रकृतिभावं चित्तवत्तिं करणीयं ज्ञात्वा विभागः कार्यः। न च राजनि संनिवत्ते श्लीलभाषणं समुचितम्। एवं सर्वत्रोह्यम् (१४२–१४३)।

गत्युपयोगिनं वत्तन्तमस्याभिधाय गतिमाह– **स्वभावजायामि**ति। अनावेशे सति बकवद्गमनस्योक्तत्वात्। लयो विलम्बितः, तालः प्लुतलघुगुरुप्राय इह स्वीकृतः। **अन्या** द्रुतलयत्वेन प्लुतकालमानाद्बाहुल्येन शोकादिः स्वभावजा (१४४–१४५)। गर्वात्मको पि विकारो भवतीत्याशयेनाह **अलाभलाभादि**ति। अलाभः लाभपूर्वकाल्लाभात्। भुक्तं वस्त्राद्युपलक्षयति। भयादौ तु परित एवास्य क्रमः (१४६)। (शकारस्यापीति) शकारबहुला यस्य भाषा स शकारः। शकारोपलक्षितशकादिजनपदवासीत्यन्ये, यद्वक्ष्यते 'शकाराभीरचण्डाल' (अध्या१७–६०) इत्यादि। हीनाशय उत्तमपदे भिरोपितः शकार इत्यन्ये। अध्वहारस्य श्लोकः–

प्राकृते पि शकारस्य विभूतिर्न प्रसिद्धये।
तद्विभूतिरपभ्रंशे तापस्येव प्रकाशिता(?)।।

ममापि चात्रार्थे श्लोकः–

लब्धापशब्दघटना विधुतश्च धर्मः
स्वार्थप्रतीतिकलनां प्रति का कथैव।
मूर्धन्यतां गमयता भवता शकारः
शक्नोति यत्र न विधे हृदि किं न्यधायि।।

तथा–

सकलजनतालभ्यः सो यं शकार इति स्फुटं
विरचयति यन्मूर्धन्यत्वं विमुर्हतलक्षणा।
हततनुरियं लोके जातापशब्दपरम्परा
परिचयमयी वार्ता कीर्तिं निकृत्य निकर्तनी।। इति

प्रतिज्ञाचाणक्ये तन्महाकविना भीमेन राजापि विन्ध्यकेतुः शकार इति भूयसा व्यवहृतः (१४७)। वस्त्राभरणसंस्पर्शालोकनगर्वयोगो त्र पक्षे क्लिष्टतरः न चार्यदेशजातिः शकारः

कश्चित्प्रसिद्धः, म्लेच्छजातीनां पथगेव निर्वक्ष्यते ''म्लेच्छानां जातयो यास्तु'' इत्यादिना, तस्मादिहायमीदश एव शकार इति युक्तम् (१४८)।

प्रभविष्णुनेति वचनादिदं सूचयत्यसावतरणप्राधान्येन, ये ऋक्षवानरादयो जाम्बवत्सुग्रीवाङ्गदहनूमत्प्रायाः, तेषामेवेयं गतिः। अन्येषां तु स्वजात्यानुरूप्येणैव। **तस्यैवे**त्यालीढस्यानुगतं गात्रं वामभागगमनमित्यर्थः (१५४)।

स्खलितमिति पदम्। तथा विशेषेण च्युत इत्यर्थः (१७३)। **प्रकृतिसंस्थितामि**त्यविशेषोक्ता। **वाम**श्चेति (१७८)। लताख्यं बाह्यपार्श्वे कनिष्ठाङ्गुलिदेशे (१८०)।

यो विधिरिति वामवेधं ततः कुर्यादिति (१८३)। अतिदेशेन चेदं दर्शयति यावती काचिद्रसप्रकृतिदेशकालापेक्षा नृणां गतिरुक्ता सा सर्वैवोक्तविलासरूपप्रकारानुविद्धा स्त्रीणामपि विवक्षिता। दिक्कालपरिमाणत्वं यत्र शोभोदात्तं तत्र विशेषमाह। एतत्प्रागेव व्याख्यातं चतुष्कलादभ्यधिको न स्त्रीणां मानविधिरिति। अष्टकलग्रहणं तदप्यधिकं मानं पुरुषेष्वपि नास्तीति सूचयति। अन्यथा षट्कले निषिद्धे काष्टकलस्य संगतिस्तन्निषेधेन (१८४–१८५)। **स्थानीया** मध्यमवयसः, अत एव मध्यमप्रकृतित्वमनूद्यम् (१८६)। **आद्यं** दक्षिणम्। **परिवाहितमि**ति (१८७) सविभागमधमानां गतिमाह **प्रेष्याणामि**त्यादि। **उद्भ्रान्तगामिनी**ति समदविकारा (१८८), **आविद्धो** वर्तनाबहुलो बाहुजानां विक्रमस्य (१८९) नार्या **अर्धमि**ति नपुंसकलक्षणा ततीयप्रकृतिरुच्यते, समप्रविभागविवक्षया चार्धनपुंसकमिति समासः (१९०) उदात्तत्वं पुरुषाणां लालित्यं योषितां गतौ। **गति**रिति चतुस्ताला चतुष्कला च, अनुत्तमस्त्रीणां द्विताला द्विकलेति ततो प्यर्धा कापुरुषाणां, तत्कर्मकराणामेकताला एककला चेति। किमुत्तमानामेवेयं स्थाने दर्शयति मध्यमोत्तमानां नणां अपुंसां यद्गतिचेष्टितं तदेव तदोदात्तमध्यमोत्तमनीचानां स्त्रीणां तथा तत्कर्मकराणां कुर्यादित्युत्तमग्रहणम् (१९१–१९२)।

सर्वग्राहकं दर्शयितुं यत्रोत्तमादिविभागो नोद्भिन्नः तत्र गतिमाह **बालाना**मपीति (१९३)। **तद्भावगमनादि**ति। यदेवं रूपं यो गह्णाति तदीयैव तस्य गतिः। विपर्ययपरिग्रहे च विशिष्टार्थं कारणमाह **व्याजेने**ति। **व्याजः** कस्यचित्कार्यस्य साधनाय, यथा विदूषकस्य संकेतस्थाने चेटिकावस्त्रधारणम्। क्रीडा यथा इष्टजनस्याकृतौ नायिकानाम्। **व चना**दिति यथा विदूषकं व चयितुं चेटकस्य स्त्रीवेषकरणम् (१९६)।

अपिचेति ग्रहणात् स्त्रीपुंसयोर्नपुंसकेन सह तस्य च ताभ्यां सह विपर्ययं दर्शयति। अत्रैव विपर्यये गतिविपर्ययप्रसङ्गेन व्यभिचारिभावसात्त्विकोपाङ्गाद्यभिनयविपर्ययमप्याह **धैर्योदार्येणे**ति। धैर्योदार्ये सामान्याभिनयोक्ते। ताभ्यां भावा उपलक्ष्यन्ते। **बुद्ध्ये**ति स्थायित्वम्, **स वेने**ति सात्त्विकाः, **कर्मणे**ति स्थानकादिविषयः, **वेषे**ति आहार्यप्रकाराः, **वाक्ये**ति वाचिकगतसंस्कृतादिप्रयोगः, **चेष्टितै**रिति अन्तरालस्थाने त्रिपताकादयः (१९७–१९८)।

यथास्थानकगतैः पूर्वपश्चाद्भावि तथोपवेशनात्मकमासनमपीति तद्विधमाह **तथासनविधिरि**ति (२०२)। **तथैवे**ति गतौ हि शयनमपि पूर्वपश्चाद्भावि शयनाश्रय इति शेषः, विष्कम्भेन वैशाखस्थानकोचितेन विस्तारेणाचितौ विस्तीर्णान्तरौ सुन्दरौ पादौ, न त्वत्राचितपादलक्षणयोगः। स्वस्थे पुंसि यदुपवेशनमासनपीठिकादौ तत्र त्रिकमुन्नतं स्यादिति संबन्धः। ''इति शब्देन वाक्यार्थः, स्यादित्यत्र कर्तव्याख्येय'' इति **स्या**दिति। **हस्ता**विति कर्कटरूपौ समाहारद्वन्द्वे (२०३–२०४)। संप्रणष्टशब्देनेन्द्रियमात्र इति पाठः मन इति पाठे प्रोच्यत्वे कृते त्वध्याहृत्य संगतिः कार्या। अपाश्रयन्तीत्यादिकमाश्रितम् (२०६)। **उपवेशये**दिति स्वार्थे णिच् आचार्ये वा कर्तभूतमात्रम्, आचार्यास्तु बाहू प्रसार्यैवासने उपवेशयेत् विश्रामयेदित्याहुः। पिण्डितत्वमङ्गानां जानुविश्लेषादूर्ध्वकायं कुटिलीकरोतीत्युत्कटं संज्ञायां कुटतेः। अत्र च विरलत्वं जानुनोः स्फिग्भ्यां भूमेः परामर्शः, पूर्वत्र तु नैतदुभयमपीति विशेषः (२०७)। **पित्र्य** इति श्राद्धादौ, **निवापसलिल** इति पिततर्पणे प्रतिग्रहार्थं परस्य सलिलदाने तत्प्रतिग्रहे च। सन्ध्याशब्देन तदवसरोचितं जपध्यानादि। **विष्कम्भित**मिति विस्तरितमेकं भूमौ जानु द्वितीयं यथास्थितं, यन्त्रनिकटढौकगमनशंक्यं सन्तापादिभयात्। तत्र च कार्यं मन्त्रं तदुपलक्षणम् (२०८)। **होमादिकरणेष्वि**ति (२०६)। अभिगमनं वन्दनम्। **शोके चे**ति **नीचानामि**ति सर्वत्रात्र संबध्यते (२१०)। नीचानां शोकजनितो यस्तीव्राक्रन्दस्तत्रैव, नीचा यदा मतमवलोकयन्ति, संबन्धमात्रे षष्ठीत्युभयप्राप्त्यभावान्न नियमः। कुस वाः शिवादयः यदा नीचानां त्रासयन्ति तदा। नीचा यदा किंचिद्याचन्ते तदा जानुद्वयक्षेपो भूमौ (२११)।

अथासनात्मककालसंनिवेशप्रसङ्गेन तदधिकरणेषु विधिमाह **तथासनविधि**रिति। बाह्यः सर्वजनविषयः आभ्यन्तरो राजोचितः (२१२–२१३)।

मुण्डासनं चातुरी (२१८), मसूरकं वस्तुशून्यं, काष्ठासनं पीठकं, वेत्रलताकृतं वेत्रासनं वेत्रासनादन्य एव रूढो वर्णकम्बलखण्डः विस्तारिकेत्यन्ये। राज्ञी राजवंश्या देवी, सेनापतिप्रभतिपुत्र्यो राज्ञा परिणीताः भोगिन्यः संगहीतकन्याः (२१६)। भूमिरेवासनं **भूम्यासनम्। एव**मिति नरपतिसंनिधौ। अन्यदात्मस्वेच्छयेति दर्शयति **तथा स्वगहे**ति (२२०)। वार्ताशब्देन सेनापतेरमात्यगहगमन इत्यादि सूचयति (२२१)। **नियमस्थ** इति कस्यचिदङ्गविष्टरो न्यस्य मगाजिनम्। **लिङ्गिनामि**ति। यथा शाक्यानां ब्रुसी, शैवानां मुण्डासनं, क्षपणकानां वेत्रवल्कलडिम्बकम् (२२२)। तदेवाह ब्रुसीत्यादि। स्थानाय हिता वद्धाः तन्निकटे व्यवस्थादष्टादष्टोपयोगिवद्धा ये भवन्ति अत एवाह **कुलविद्ये**ति। **आसनसत्कार** इहास्यतामिति (२२३–२२४)।

तत्र विभागामाह **सम** इति तत्तुल्यजाति विद्यः। सममिति त्रित्वाच्चासनापेक्षया **मध्य** इति किंचिदूनेन, मध्यममिति स्वासनात्प्रमाणतो प्यूनं हीन इति स्वापेक्षया भूम्या सह भूमिरेव इहास्यतामिति निर्देश्या स एव तस्यासनसत्कारः (२२५)। **काष्ठ**मिति एकमेव दीर्घं भरसहं पर्यङ्कं दर्शयितुं काष्ठमित्युक्तं न तु काष्ठमयमिति (२२६)।

अथ शयनसंनिवेशनमाहाकुचित(मिति) दिक् या निजशरीरस्य कुटिलीकरणात्सा स्यात्। बाहुमध्यमपसरेण विक्षेपयोगात् पार्श्वे संनिवेशनवशात् पूर्वकायस्यापरकायस्योर्ध्वनयनं नान्यशयनसंनिवेशात् (२२८)।

अर्थवशेनेति लौकिकेनेत्यर्थः। अथैतदुपसंहृताध्यायानन्तरावकाशं संगतिप्रदर्शनपूर्वकमाह **अतःपरमि**ति। रङ्गे यत्परिक्रमात् परिक्रमणवत्ते गत्यध्याये निरूपितं तदुपयोगः कक्ष्याविशेषविभाग इति शिवम् (२३५)।

यावद्गतिभेद(विधि)प्रकटनमध्यायमिह विवणुते।
स्मरमथनचरणसरसिजपरागभूतो भिनवगुप्तः।।

इति श्रीमहामाहेश्वराचार्याभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां गतध्यायो द्वादशः समाप्तः।

श्रीः

नाट्यशास्त्रम्

त्रयोदशो ध्यायः

देहस्तु(स्य?) बाह्याभ्यन्तरभेदिकक्ष्याविभागधर्मीविविधां प्रवत्तिम्।
आसूत्रयन्दोषविशुद्धिदक्षक्रमो र्कदष्टिर्जयताद्वषाङ्कः।।

इहाभिनयानन्तरं यद्यपि सर्वा वत्तिप्रवत्तय उद्दिष्टाः सर्वान्ते च रङ्गे (३६) सूचिता कक्ष्या, तच्चतुर्विधाभिनयाभिधानानन्तरमेतदध्यायार्थो वक्तव्यः। तथापि प्रत्यभिनयमियतीतिकर्तव्यतोपयुज्यते। तदभिधानं विना(ना)ङ्गिकमेवोक्तं स्यादिति वक्तव्यम्। तदुद्देशे तु सामान्यशब्दत्वान्नास्ति प्रत्येकमुद्देशने हतिः। तथोद्देशने पि च गौरवं स्यात्। अतएव वादिना कक्ष्यादेरपथग्भावे यो हेतुरुक्तः क्रमोल्लङ्घनादिति तस्यासिद्धत्वं विरुद्धता च, प्रत्युत प्रत्येकप्रसङ्गत्वलाभात् क्रमस्यापदार्थत्वान्नार्थप्रमाणकत्वान्मुख्यश्रौतपदार्थबाधकत्वमयुक्तं, श्रुत्या वाक्यप्रमाणस्य

बाधनादिति तु भट्टलोल्लटोक्तं प्रकृते सिध्यति विरोधाभावात्, क्रमस्य च मध्यत्वात् गतिरूपप्रयोगहेतुत्वात्, अतस्तदवसर एवाभिधानं युक्तम्। तद्द्वारेणाभिनयाङ्गतामगात्। तदेशत्रयं वक्तत्रयं वक्तव्यम्। तत्र प्रथमं कक्ष्याभिधाने यमभिप्रायः इह गतिर्गन्तव्यदेशाश्रयात्, देशश्च जलस्थलादि बहुतरसमविषमादिस्वभेदसहितं काव्यार्थतामात्रेणैवेह संभवन्नपि प्रयोगस्थाने न संभवत्येवेति, तस्य परिहारार्थं कक्ष्यानिरूपणं कर्तव्यम्। अत एव पूर्वाध्यायान्त उक्तं परिक्रमे गतावुपयोगिनां स्थानविशेषाणां सम्यग्विभागं वक्ष्यामीति। सेयमध्यायसंगतिस्तां दर्शयितुमाह **ये तु पूर्व**मिति। **तु** शब्दादूरत्वं पूर्वतायाः सूचयन् द्वितीयाध्यायार्थं स्मारयति **तेषा**मिति प्रत्येकमित्यभिप्रायः। मण्डपस्य यो विशिष्टो भागो न्तरङ्गपीठात्मकस्तं विज्ञाय विभागतो ज्ञात्वा कक्ष्यागत्युपयोगिनां स्थानविशेषं प्रयोजयेत्, विभागेन संबन्धं नयेत्। नाट्यदेशानुसारेण प्रकोष्ठे त्यक्ते यो देशो वशिष्यते तत्रैव चातुरश्रीयम्। अत एव वामदक्षिणभागयोः कुतपविन्यासः शिष्टे कक्ष्याविभागः (१)।

रङ्गस्य को विभाग इत्याह **ये नेपथ्यगहद्वार** इत्यादि। (पूर्वामिति) द्वितीयाध्याये प्रकीर्तिते भाण्डस्य ततातोद्यसहितस्य त्रिपुष्करस्य (२)। ततः किमित्याह **कक्ष्याविभाग** इति। तेन भाण्डेन यत्परित आक्रान्तं तद्विवर्ज्य शेषे रङ्गपीठदेशे निष्क्रमणप्रवेशगत्याद्युपयोगी स्थानविभागो निर्देश्यः प्रेक्षकाविधिः संक्रमयितव्यः। ननु कः स्थानविभाग आह– **परिक्रमेणे**ति। परिक्रामन्त्यनेनेति परिक्रामः चार्यादिसंनिवेशः तद्वशादेकस्यापि रङ्गदेशस्य स्थानभेदनापत्यागः, यथा– ''आरोढुमुद्वहेद्गात्रं'', ''अतिक्रान्तेन पादेन'' (१२–१०२) इत्यादिना विशेषे तु प्रासादपर्वतादिरूपत्वमस्यैव (३)। ननु भाण्डवाद्यविनिर्मुक्ते रङ्गपीठदेशे क्रमविशेषस्थानभेदक्लप्तिः। तन्नेत्याह **कक्ष्याविभाग** इत्यादि विशिष्टे शिष्टे देशे स्थानान्तराणि कल्पनीयानि तानि कविजनस्मरणार्थमुपलक्षणत्वेन पठन्ति। गहादीनि पथिवीस्वर्गपातालभेदात्पुनरुदाहृतानि सर्वसंग्रहाय त्रैलोक्यमित्युक्ते पि स्मरणार्थं वर्णनोद्देशः (४–६)।

ननु सर्वत्र प्रयोगे सर्वे त्रैलोक्यवर्तिनः स्थानभेदात्किं संभाविनः, नेति दर्शयति नगरे वेत्यादि। निपातैरनुक्ता अटव्यादयः साक्षात्। तथा वीप्साद्योते। यत्र यत्र वार्ता वत्तन्त इतिवत्तबलायातः प्रकर्षेण वर्तते तत्रमध्ये यो देशविभागस्तमेव प्रवर्तयेत् रङ्गपीठे दर्शयेत् न सर्वमित्यर्थः (७), विशिष्टे देश इत्युक्तं न रङ्गपीठस्य। विशेषं दर्शयति **बाह्येचे**त्यादि। भागत्रितये सति कस्मिंश्चिद्भागे देशादि कल्पयित्वा तत्रैव दूरादिभेदं परिकल्पयेत्, भूयस्त्वाल्पत्वादिभिन्नेन परिक्रमेण कल्पयेदित्यर्थः (८)। बाह्यादिभेदं निरूपयति **पूर्वप्रविष्टा** इति पूर्वभूताः प्रधानभूताः सन्तः पूर्वं ये प्रविष्टास्ते, अभ्यन्तरा इति अधिष्ठितो देशविशेषो भ्यन्तरकक्ष्या प्रधानभूतस्तु पूर्वप्रविष्टो पि प्रधाने प्रविशति स्वकक्ष्यान्त्य इत्येव। पश्चात्प्रविष्टानां तु स्थानं बाह्यकक्ष्या। ते तु येन स्थानविशेषेण प्राक्प्रविष्टमुपसर्पन्ति सदेशो मध्यमा कक्ष्या (६)। एतदुक्तं भवति पूर्वप्रविष्टस्य स्वस्थान एवेतिवत्तेचितगहोद्यानादिविभागः पश्चात्प्रविष्टस्यापि पूर्वप्रविष्टेन सह यावन्न च संमिलनं

तावत्प्रेक्षायामेव मध्यमकक्ष्यायां तु गतिपरिक्रमादिः तत्संमेलनार्थं संमिलितानां तु कक्ष्याविभागो विच्छिद्यत इति संमेलन इतिकर्तव्यतामाह **तेषां त्वि**ति पूर्वप्रविष्टानां, कर्मणि षष्ठी। पूर्वप्रविष्टस्य यो दक्षिणो भागस्तं वीक्षमाणः स्थितो यथा प्रेक्षकस्य यः पराङ्मुखीभवतीत्यर्थः एषां प्रवत्त्ये दाक्षिणात्यादिके क्रमः एतद्विपरीतमन्यत्र। प्रव यवयवोद्भाविनं क्रममथशब्देन सूचयति। तेदेनमाह (प्रा)धान्येनोत्तराभिमुख्यं दक्षिणस्यामात्मनिवेदनं यथाविदितिवत्तवशात्तदङ्निबध्यते। यः पूर्वप्रविष्टैः सह संमिलितस्य सर्वबाह्यकक्ष्यायामेवेति तु शब्दस्यार्थः (१०)। का खल्विह दक्षिणा दिगित्याह **यतोमुखमि**ति समासः यदपेक्षं भाण्डस्य मुखं सा दिक् पूर्वा। ननु भाण्डस्य मुखं दुर्मानमित्याह **द्वार**मिति। नेपथ्यग्रहणे गहस्य यन्मुखद्वारं, भाण्डोपादानं तु तस्य प्रतियोजने पूर्वतां प्रकटयति प्राधान्यज्ञापनेन (११)। **तेनैवे**ति पूर्वप्रविष्टपात्रान्तर योगेनेत्यर्थः (१२)।

एवं बाह्ये वा मध्यमे वापि तथैवाभ्यन्तर इति विकृष्टं दूरमित्यादि विभजति **सैव भूमि**रिति (१७) विकल्पानां मध्याल्पत्वरचनादिश्च न केवलमल्पत्वबहुत्वकृतमेव। परिक्रमवैचित्र्यं यावदन्यदपीति दर्शयति **नगरे वे**त्यादिना **प्रयोगत** इत्यन्तेन। प्रयोगो नाट्ये। दिव्यानां देवयोनीनां पिशाचादिब्रह्मान्तानां यन्नगरादिद्वीपादिविषयागमनं तदाकाशेनैव विमानगामिना विमानेन मायया वा अदर्शनरूपया अन्याभिर्वा बलादाहरणादिक्रियाभिर्विविधप्रयोजनाभिः कार्यमिति संबन्धः (१६)। न च दिव्यानामेष एव प्रकारः किं तु अन्यो प्यस्तीत्याह **नाटक** इति। वेषशब्देन न चापादभूतलं वपुर्लक्ष्यते। तेन वरप्रदानाद्यनुग्रहनिमित्तच्छन्नस्वरूपाणां देवानां मानुषैर्दर्शनं भवति, तदा नाटके प्रयोगे तेषामपि भूमिसंचरः, संचरत्यस्मिन् भूमिरेव स चरः (२०)। अयं तु देवेषु सामान्यकल्प इत्याह **दिव्याना**मिति। पुराणेषु त्वयं सामान्यविधिरित्याह **भारत** इति न त्विलावतादावित्यर्थः (२२)। वर्षं प्रचारार्थमाह **हैमवता** इति हिमवति बाहुल्येनैषां गतिरित्यर्थः, एवं सर्वत्र (२८–३०)। **नील** इति अद्रिविशेषे, तस्यैव विशेषणं वैडूर्यमये, एतच्च कवेः शिक्षार्थम् (३१)। दिव्यानां पिशाचादिब्रह्मान्तानामावासः (३२)।

ननु वर्षान्तरेषु दिव्यपर्वतेषु यदुचितं गमनं तत्कर्तुं शक्यमित्याह तेषामिति। **च**कार इहार्थे जम्बूद्वीप इव दिव्यानामपि कक्ष्याविभागस्थानविशेषोपलक्षिता गतिरित्यर्थः। एतत् स्फुटयति **न तेषा**मिति (३३)। परिच्छदविशेषश्च तदीयः परिचारः स्वाभितो न कार्य इत्यर्थः, परिच्छेदो वा ज्ञानं तद्दूरव्यवहितादिविषयं न प्रदर्शनीयम्। कथं तर्हि, आह, मानुषगत एवैषां सर्वो भावः कार्यः, कथं, मानुषलोकवत् यथामानुषलोके अंशावतरणे नायकानां रामादीनां किंचिदुत्कृष्टं सातिशयं मनुष्योचितमेव चरितं तथैव दिव्यभावबहुवत्तीनामपीत्यर्थः (३४)। न निमषतीत्यनिमिषं रूपं तेषां नैव कार्यम्। तुरवधारणे। अत्र हेतु**रिहेति।** भावा व्यभिचारिणो, रसाः स्थायिनो दष्टावेवेति स्पष्टयति **दष्ट्यामि**ति। **सूचितः** सूचाभिनय एव विभाव्यते विभावादिशेषयुक्तत्वे स्फुटीभवतीत्यर्थः। अत एव **न तेषां चेष्टित**मित्यनेन साध्यो प्ययमर्थः पुनरुपात्तः प्राधान्यात् (३६)।

एवं सर्वोपकारित्वादुद्देशस्य संग्रहे सर्वं पश्चादभिधानं तेनैवं न यद्यपि कक्ष्याविभागः सूचितस्तथापि चारीपरिक्रमप्रसङ्गेन गत्यध्यायानन्तरं दर्शितः। इदानीं त्वाङ्गिकोपयोगिधर्म्यादित्रयमुद्दिष्टं, तत्र वत्तीनामग्रतो निरूपणं भविष्यति, तत्र च हेतुः वत्त्यध्याय (अ २०) एव वक्ष्यामः। यद्यपि धर्मः पूर्वमुद्दिष्टस्तथापि 'यत्र वार्ता प्रवर्तत' इत्यनेन कक्ष्याविभागकल्पितदेशभेदाभिधानप्रसङ्गेन च देशविभागप्रतिपन्नाः प्रवत्तय आक्षिप्ताः किं च पात्रस्य सति प्रवेशे कक्ष्याविभाग उत्तरद्वारेण दाक्षिणात्यावन्त्योः प्रवेशो, अन्ययोस्तु सव्येनेत्येवं प्रवत्तिविभागं प्रवेशकभेदमाक्षिपति। सो पि तत्स्थानेनेदमिति तदुपयोगित्वेनापि समनन्तरं प्रवत्तयो वक्तव्या इति मनसि कृत्वाह **चतुर्विधे**ति। प्रवत्तिः तस्मादित्यर्थः। प्रश्ना इति **कस्मा**दिति चतुष्कप्रश्नः अर्थं तावदाह **पथिव्या**मिति प्रवत्तिः देशविशेषगता वेषभाषासमाचारवैचित्र्यप्रसिद्धिरुच्यते। तत्रैवं योजना– देशे देशे येष्वेव वेषादयो नेपथ्यं भाषा वा आचारो लोकशास्त्रव्यवहारः वार्ता कृषिपाशुपाल्यादिजीविका इति तान् प्रख्यापयति, पथिव्यादिसर्वलोकविद्याप्रसिद्धिं करोति प्रवत्तिर्बाह्यार्थे यस्मान्निवेदने निश्शेषेण वेदने ज्ञाने प्रवत्तिशब्दः। ''अस्त्येषा भुवने प्रवत्तिरभवद्रामेण रामस्य यत्'' इत्यादौ।

अथ संख्याप्रश्ने स्वाभिप्रायमाह **यदे**ति। **देशा** इति। तत्कृत्वापि चतुष्टयी प्रवत्तिरित्युक्तं न चत्वार एव देशाः। स्यादेतदेव तावत्यस्तावदुक्ता अभ्यधिकास्तु त्यक्ता इत्याशङ्कयाह **समानलक्षणत्वात्प्रयोग** इत्युच्यते महद्भिरिति शेषः। **प्रयोग** इति नाट्यम्। चतसणामेव समानलक्षणानामेतत्प्रवत्तिचतुष्टयसाधारणस्वभावः सर्वप्रयोगे युष्मन्मते न त्वन्यो व्यवहारः कश्चिद्दर्शितः। तथा च लोभक्रोधमोहैस्तु साधारणीकृतजगच्चिन्ताद्याशु प्रदेशः पराक्रियते तथा प्रकृते पि।

ननु चतुस्साधारणप्रयोगो नत्वन्यो त्र प्रविशति व्यवहार इत्येतदुक्तम्। विस्मरणशीलो भवान् न स्मार्यते। उक्तं पूर्वरङ्गान्ते (अध्या) ''इत्येषो वन्तिपा चालदाक्षिणात्योद्भ्रमागधैः। कर्तव्यः पूर्वरङ्गः''स्त्विति पूर्वरङ्गस्य प्रयोगस्य गर्भाधानीयस्थानीय इत्युक्तम्। तत्रैवाभ्युपगमपूर्वकमुत्तरमाह। तत्तु सत्यमित्यादिना नानादेशवेषेत्यन्तेन अभ्युपगमोक्तदेशादिशब्देन प्रवत्तिमभिदधता। **आसा**मिति व्याख्यातम्। **किंत्वित्या**दिनोत्तरमाह। एतदुक्तं भवति– वत्तिसंश्रितं वत्तीराश्रितमेतच्चतुर्विधम्। ननु का प्रवत्तिः प्रत्येकं तत्रैवाभ्युपगमः प्रवत्तिः, नेत्याह लोकानुगुणानुसारेण। लोको हि दक्षिणापथः पूर्वदेशः पश्चिमदेशः उत्तरभूमिरिति चतुर्धा विभागो स्ति, न चैष निर्बन्धनः सादश्यसंभवात्। तथाहि दाक्षिणात्येषु श्रङ्गारप्रचुरतया कैशिक्याः संभवः। पश्चिमेष्वावन्त्येव संगहीतेषु सापि सति धर्मप्राधान्य इति सात्त्वत्यस्ति। प्राच्येषु तु घटाटोपवाक्याडम्बरप्राधान्यो भारत्यारभटीयोगः। उत्तरभूमिः प्राधान्यात्तु भारत्यारभटीयोगे पि कैशिकीलेशात्तु प्रवेशसहिष्णवो यद्वक्ष्यते ''प्रयोगस्त्वल्पगीतार्थ'' (१३–५१) इति। अर्थशब्देन तत्प्रयोजनं नत्तवाद्यादि। इत्येवं चित्तवत्तिभेदसादश्याल्लोको यश्चतुर्धाविभागः स एवस्मिन्नुक्तः।

ननु किमित्ययं संक्षेप आदतः, आह यस्माल्लोको बहुविधभाषाचारादियुक्तः कस्ते प्रतिपदं वक्तुं शक्नुयात् शिक्षितुमभ्यसितुं वा प्रयोक्तुं द्रष्टुं वा, चित्तवत्तिप्रधानं चेदं नाट्यमिति तदेव वक्तुं न्याय्यम्। एतदेव स्पष्टीकुर्वन्नाह **भारतीत्या**दिना। प्रयोगे वागङ्गचेष्टासु अभिनिर्वत्तं लोकप्रसिद्धमित्यर्थः। चकारेण तत इत्याकृष्यते। तल्लोकप्रसिद्धचतुष्टयमवलम्ब्य ब्रह्मणा प्रयोग उत्पादितः। अयं ग्रन्थश्चिरन्तनैर्वत्तीनां चतुर्ष्वेव दष्टान्ततामाश्रित्य व्याख्यातः, तत्र च वैषम्येण दूषणमुक्तम्, वत्तीनां हि सनिमित्तं चतुर्धादेः प्रवत्तीनां तस्माच्चतुष्त्वमात्रेण दष्टान्तो यमिति व्याख्यानेषु गजस्नानीयमानयनेनालूनविशीर्णः कृत इत्यास्तां तावत्।

कैशिकी प्रायेणास्यामिति बहुव्रीहिः। असामानाधिकरण्यात्सामानाधिकरण्ये पि वा सामानायामाकृतौ भाषितपुंस्त्वाभावान्न पुंवद्भावः। केशैर्निर्वत्तास्तेषु भवेदित्यादिर्व्युत्पत्तिर्निमित्तमात्रम्। एतच्च वक्ष्यामः संक्षेपेण (अध्या २०)। दक्षिणसमुद्रस्य विन्ध्यस्य च मध्ये ये देशास्तेषु दाक्षिणात्या (३६)। एतेनैव सिद्धे सति देशभेदानां प्रतिपाठस्तदन्तरालानां पर्वतकच्छादिम्लेच्छानां निषेधेन प्रसिद्धया देशोपसङ्ग्रहणार्थः कवीनाम्। एवमुत्तरत्र (४१)। **नित्यानित्य**मिति। अनादिरयं देशभेदेन चित्तवत्तिक्रमः। दष्टो हि वस्त्राभरणात्मना देशभेदोचितः स्वभावभेदः (४३)। **बाहुल्येने**ति नात्र भविष्यति प्रमाणाभावादित्यादिना शुष्कतर्केणासूयितव्यमिति भावः (४४)। **एषे**ति अवन्तिप्राग्ज्योतिषकामरूपीया। **पुराण** इत्यागमपूर्वकत्यमाह। तुरुष्काश्चारट्टक—दरकखसप्रभतयः मध्यमायामेव प्रविष्टाः, ते तु व्यवहारबहिष्कृतत्वात् स्वकण्ठेन न पठिताः। **अल्पगीतार्थ** इति लेशतः कैशिकीमनुजानाति। तत्र प्राग्देशानां सीमात्वेन दक्षिणत उद्रा्ः समुद्रनिकटे, उत्तरतो मागधाः, तदुभयमध्यवर्तित्वादौद्रमागधी, अतएवोद्रकलिङ्गानामुभयोपजीवित्वाभिप्रायेण वत्तिद्वयमध्ये गणनम्। गिरीणामन्तर्ये भवास्ते न्तर्गिराः, 'गिरेश्च सेनक'स्येति समासान्ते मत्वर्थीये वाचि रूपम्। दक्षिणोत्तरव्यतिरेकेण परिक्रमणस्थानाभावात् नैकट्याद् द्वे प्रवत्ती एकीकृत्य प्रयोगाभिधानम्। तत्र दाक्षिणात्य उत्तरेण द्वारेण प्रविश्य पश्चिमायां दिशि परिक्रम्य ततो पि दक्षिणस्यां ततः पूर्वस्यां ततः उत्तरस्यां परिक्रमेत्। परिक्रम्य च तस्यामेव दिश्यात्मनिवेदनं कुर्यात्। तदुक्तं दक्षिणाभिमुख इति। तत उत्तरस्यां पूर्वां ततो पि दक्षिणां ततः पश्चिमां प्राप्योत्तरद्वारेणैव निष्क्रामेत्। एवं सा वत्यादौ, तद्विपर्ययेण पा चाली। तदस्या दक्षिणद्वारेण प्रवेशो निष्क्रमणं च प्रदक्षिणेन दक्षिणदिशा प्रवेशो भ्यन्तरकक्ष्याव्यवस्थितपात्रनिकट एवेति स्यात्। एवमपसव्यप्रवेश इति।

विशेषान्तरमाह **एकीभूता** इति। (पार्षदमिति) परिषदि स्वामित्वकृतं वा प्राधान्यं देशकृतं कालकृतं प्रयोजनकृतं बहुतरपात्रपरीक्षायातोचितं यद्वैचित्र्यकृतमिदमवेक्ष्य सङ्करो पि कर्तव्यः, तदाह **एकीभूता** इति प्रधानानुयायिन्य एवेत्यर्थः।

एवं प्रयोक्तरि परिक्रमोपयोगः। प्रवत्तीनां प्रत्येकविषये पि तं दर्शयन्नाह **येषु देशेष्वि**त्यादि (या) **प्रवत्ति**रित्यर्थः, सा वत्तिर्येषु रूपकेषु। तेन तेन काश्मीरनायक देशे नाटिकानुचिता,(?)तस्यां कैशिकीप्राधान्येन दाक्षिणात्योचितत्वात्। देशादौचित्ये तच्चेष्टितव्यावर्तनेन प्रतीतिविघाताद्रसमयत्वाभावः। रसाश्च नाट्यस्य प्राणाः व्युत्पत्तिरपि वा परेव भवेत्, असत्यताशङ्का च समूलघातं विहन्यादेव प्रयोगमित्यनेनाभिप्रायेणाह **तद्वत्तिकानी**ति। येषु देशेषु यो वत्तिप्रकार उक्तः स येषु रूपकेषु नाटकादीनामन्यतमेषु भवति, नाट्यशब्दवाच्यस्य प्रयोगस्याश्रयः। नाटकशब्दो त्र न रूपकविशेषे, अपि तु नाट्य एव। यथा–

''हास्यस्थानानि यानि स्युः कार्योत्पन्नानि नाटके''। (अ ६/६० प्रथमार्धं) इत्यत्र नाटक उन्नयति प्रेक्षकान् संवेशेन व्युत्पत्त्या च तथा तद्भावानुप्रवेशेन प्रयोक्तृनिति। नाटकं कृताविति पाठे गात्राणि विक्षिप्यन्ते अभिनयप्रयोगायास्मादिति संज्ञाकाले। अन्ये तु नटशब्दं कठादिवच्चरणादिच्छन्तो नटानां कर्मश्लाघ्यमिति गोत्रचरणाच्च श्लाघादिविशेषणत्वाद् वुञित्याहुः (पा ५–१–१३४) लौकिकं च लिङ्गमिति नैवं शङ्कितव्यमेतद् वुञू तस्यैकान्तिकं स्त्रीत्वमिति। आविद्ध उत्कटः, अङ्गानां हारो हरणं यत्र। छेदेन भेदेन प्रधानः आहवः संग्रामः, आह्वयन्ते परस्परं वीरा यत्रेति। मायामन्त्रौषधादिकृतं रूपपरिवर्तनादि, (इन्द्र)जालः हस्तलाघवसादश्यादिकृतं , पुस्तं द्रुमण्मयमाकृत्यादि। **तथैव च** नाविद्धं (आविद्धं?) स्त्रीकर्मरूपाणां स्वरूपं स्वक्षेत्र एव वक्ष्यामः। शौर्यमभीरुत्वं, वीर्यमुत्साहः, बलं कायधर्मः पराक्रमः। **मानुषेष्वि**ति बाहुल्यापेक्षमेतत्। एवं चत्वारि भिन्नानि डिमाद्युद्धतानि वर्गसुकुमाराणि नाटकादीनि।

एवमन्तरङ्गोपकारित्वात्कक्ष्यामाधारमुक्त्वा तदाक्षिप्तं च वत्तिभेदमभिधाय धर्मा निरूप्यन्ते। तथा हि लोकस्वभावमेवानुवर्तमानं धर्मीद्वयम्। लोको नाम जनपदवासी जनः, स च प्रवत्तिक्रमेण प्रपचितः। तत्प्रसङ्गेनैव तावद्धर्म्यायाता। सा चाङ्गिकशेषतया वक्तव्या। प्रसङ्गाच्च वाचिकाहार्यादिविषयाण्युच्यन्ते तुल्यलक्षणत्वादि। सा च द्वेधा। यद्यपि लौकिकधर्मव्यतिरेकेण नाट्ये न कश्चिद्धर्मो स्ति, तथापि स यत्र लोकागतप्रक्रियाक्रमो र जनाधिक्यप्राधान्यमधिरोहयितुं कविनटव्यापारे वैचित्र्यं स्वीकुर्वन् नाट्यधर्मीत्युच्यते।

तदेतदाह धर्मी या द्विविधेति। प्रोक्ता उद्दिष्टेत्यर्थः। पूर्वमिति 'रसाभावा' इत्यादिसंग्रहविभागावसरे (अ ६–१०) लौकिकस्य धर्मस्य मूलभूतत्वान्नाट्यधर्मं वैचित्र्योल्लेखभित्तिस्थानत्वादिति लोकधर्मीमेव लक्षयति **स्वभावभावोपगतमि**त्यादि । काचित्तद्विषयाधर्मी, काचिन्नटविषया। यो यस्य स्वभावतो भावः स्यात् स्थायिव्यभिचार्यादिः तेनोपेतम्। कथमधिकृतत्वादित्याह (**शुद्धमि**ति)। शुद्धत्वात् स्वविकल्पितेन व्यामिश्रत्वात् **तथेति** शुद्धं कृत्वा। लोकवार्ता लोकप्रसिद्धिः तस्यां या क्रिया व्यवहारो वत्तान्तस्तया शुद्धमेव कृत्वा युक्तं यन्नाट्यं नटनीयं कार्यं सा लोकधर्मी धर्म्यास्तद्वतश्चाभेदोपचारात्सामानाधिकरण्यम्। अङ्गलीलया वर्तनादिकया वर्जितं कृत्वा।

स्वभावबलपतनप्रहारनादावसरविवादादाविव पताकादिना यो भिनयस्तेनोपेतम्। नानात्वेन च स्त्रीपुंसोः स्त्रियां प्रयोज्यायां योषिदेव प्रयोक्त्री पुरुषे तु पुरुष इत्येवंभूतं यन्नाभ्यस्तचेष्टितं सा लोकधर्मी तद्धर्मव्यपदेशात् यदि वा समुदायरूपस्य काव्यं ताभ्यां मनसो एकदेशभूता धर्मी।

एतदुक्तं भवति– यदा कविर्यथावत्तवस्तुमात्रं वर्णयति नटश्च प्रयुङ्क्ते, न तु स्वबुद्धिकृतं र जनावैचित्र्यं, तत्रानुप्रवेशयंस्तदा तावान् स काव्यभागः प्रयोगभागश्च लोकधर्माश्रयः तत्र धर्मी। अर्थाभिनये सहकारिरूपा इति कर्तव्यतारूपा वेति दशशततमादितरत्न प्रवेशानाह शून्यतायाम् (?)। काव्यनाट्ययोर्हि लोकानुसारित्वं वा वैचित्र्ययोगित्वं वा धर्मः। तत्र किमेतद्भावमुद्भावमुच्यते तदास्तामेतत्।

अथ नाट्यधर्मी लक्षयति **अतिवाक्यक्रियोपेतमि**ति। इतिहासादिवाक्यमतिक्रम्य या उचितर जकेतिवत्तकल्पनात्मिका क्रिया। **राजशेखरेण** रामनिर्वासना दशरथवेषराक्षसविरचिततत्त्वकल्पना, तया तदुपेतं भावसत्त्वं स्वभावचित्तवत्तिमतिक्रम्य यत्स्थितं कविकल्पितचित्त्वत्त्यन्तरयुक्तमित्यर्थः। यथा स्वभावचपलविदू– –षकचित्त्वत्त्यतिक्रमात् यथा वत्सराजेन मन्त्रिसमुचितगाम्भीर्यावहित्थयोजनं वसन्तकस्य तथा, स्वभावभाषितमतिक्रम्य यत्स्थितं यथाराज्ञाः संस्कृतम्। एवंभूतं काव्यं काव्यगतानाट्यधर्मी नटगता तु नाट्यलक्षणलक्षितं कृत्वा लीलया शोभाप्रधानतया अङ्गहाराणि मनोहराणि तत्प्रधानैरभिनयैः उपेतं तथापाठे स्वरालङ्कारसंयोजनया युक्तं यत्र च पुरुषो न स्वरूपे तिष्ठति, अपि तु स्त्रीबलमाश्रयीत, प्रयोज्यः पुरुषो यत्र न स्वरूपस्थः अपि तु स्त्रिया प्रयुज्यते तन्नाट्यधर्मी। **भवेदि**त्यनेन संभावनामाचक्षाण इदमाह नैवेदं समयमात्रं निष्ठमिति वक्तव्यं अपि तु संभाव्यमानमेव। सद्र जनोपयोगि वस्तूपयोगि च न ह्यासन्नवचनस्यापि अश्रवणमन्यैरप्यश्रूयमाणस्य च श्रवणं लोके पि कदाचन न भवति। केवलं तन्त्रे तत्सौन्दर्यार्थमानीयते। यथोक्तमुपाध्यायैः–

यदत्रास्ति न तत्रास्य कवेर्वर्णनमर्हति।
यन्नासंभवि तत्र स्यात्सम्भव्यत्र तु धर्मतः।।

अत्र नियमहेतुः सौमनस्यं तत्र नाट्यधर्मव्यापकत्वं बहुतरोदाहरणनिदर्शनदिशा दर्शयितुमाह **लोके यदि**ति अभियोज्यं क्रियासु पदं मूर्तत्वात् केवलं साभिलाषं लोके पि कलाशिल्पकल्पनाकलितमतस्तदपि मूर्तिसंपादनेन प्रयुज्यते प्रयोगः क्रियते। यथा मायापुष्पके ''ततः प्रविशति ब्रह्मशाप'' इति। श्रण्वन्ति जनान्तिकापवारितकयोः। अनुक्तं श्रूयते, आकाशभाषितं च, गतादावाकाशादौ। **मूर्तिमन्त** इति प्रक्रिया तु कर्म कायवत्प्रयुज्यन्त इत्यर्थः। तद्यथा– ''अग्रे पर्वत एष कथमत्र गन्तव्यम्'' इत्यादि। चर्म खेटकं वसुनन्दादि अपूर्णरूपं दारुवस्त्रचित्रादिरूपतया प्रयुज्यते। **ललितै**रिति आवेष्टितादिचतुर्विधकरणोपगहीतवर्तनाप्रवर्तितैः। उत्क्षिप्तानि चतुस्तालादिना (अ. ६–२७३–२८६) यानि पदानि तेषां क्रमात्कालविभागाश्चतुष्कलत्वादयः। **च** शब्द

इवशब्दार्थः। नत्यत इव यद्गम्यते नत्तसदशी विशाखा सा या गतिरित्यर्थः, तद्भावे लटौ। एतत्प्राणितमेव नाट्यमित्याह **यो यं स्वभाव** इति। अङ्गैरातोद्यादिभिरभिनयैश्च यदुपेतत्वं विधायकस्य नाट्यधर्मीत्वं विधानमिति प्रथमाध्याये (१–११८) श्लोकादिभन्नार्थ एवायं, तत्र नाट्यलक्षणपरो वाक्यार्थ इति विवतं चैतत्तत्रैवाध्याये। प्रसङ्गोपयोगेन सर्वाभिनयप्रकारसारा नाट्यधर्माभिहिता तां दर्शयति **यश्चे**ति। **च**कारः प्रसङ्गं द्योतयति। **प्रोक्त** इति समनन्तरमेव। व्यापकत्वमेव नाट्यधर्म्या उपसंहरति (नाट्यधर्मीत्यादिना) उपदेशद्वारेण नाट्यधर्मीप्रवत्त गतिः। अत्र हेतुः **न ह्यङ्गाभिनयादि**ति। अङ्गानि च गीतातोद्यादीन्यभिनयाश्चेति द्वन्द्वसमाहारः। राग इति सामाजिकप्रीतिः। नाट्यधर्म्या यदि व्यापकत्वाल्लोकस्वभावभाविन्या न प्रयोजनमुक्तयेत्याशंक्याह **सर्वस्य सहज** इति। **हि** शब्दो हेतुमद्भावं द्योतयति। तदयमर्थः– यस्मात्कविगता नाट्यगता वागङ्गालङ्कारनिष्ठा नाट्यधर्मीरूपा सर्वप्राणीवती, **अर्थत** इति अर्थमपेक्ष्य प्रवर्तते अभिनयश्च सर्वाभिनेयमर्थमपेक्ष्य प्रवर्तते, तस्मात्सर्वस्य संबन्धी सहजो भावो लोकधर्मलक्षण उक्तो भित्तिस्थानीयत्वेन नाट्यधर्म्या सहजसंवादिकर्मणः। अङ्गं वर्तनारूपं गुणलक्षणानि च अलङ्कारचेष्टा अलङ्कारा उपमादयश्च।

अध्यायार्थमुपसंहरति **एवं कक्ष्याविभागस्त्वि**ति। धर्मी ह्येकवचनं नाट्यधर्म्या अत्र प्राधान्यादन्यस्यास्तत्रैव मग्नत्वात्। **युक्तय** इति प्रवत्त्यः अथोपसंहारे च प्रयोजनं धर्म्यादयो उपकरणभूताः, तेषामल्पबाहुल्यविरचितक्रमाभिधानं योजयित्वेति प्रतिपादनमध्यायार्थप्रकरणप्रस्तावे च प्रथमेन योजयति। अन्येन च भाविप्रकरणार्थमासूत्रयति **उक्तो मयेहाभिनय** इति स मयेत्यात्मज्ञानोत्कर्षणं व्युत्पत्तिं शिष्याणामुत्पादयति। यद्यप्यस्य शाखानत्तं (करवर्तना) चाङ्गाहारश्च वस्तुनीत्युक्तं, तथापि भावाध्याये सात्त्विकप्रसङ्गेन (७–६४) अङ्कुरस्याभिहितत्वात्, सामान्याभिनये च (अ २२–४१) तदुक्तं वक्तव्यशेषस्य वक्ष्यमाणत्वादाङ्गिकाभिनयोपसंहारादेवोपसंहरति। वाक्यमेवाभिनयः त वतश्च धर्मी, अभिनेयो वाक्यं हास्यादौ यद्यपि वाक्याभिनय उक्तस्तथापि सत्युक्तस्वरूपमभिनेयमिति तथाह **यथावदि**ति, अत एव पुनरुक्तम्। स्वराः अचः व्य जनानि हलः वर्णा अज्झल्समुदाया इति शिवम्।।

शीतांशुमण्डलकशेखरपादप कि जल्कपूगपरिपूतशिरोरुहेण।
वत्तिः कृताभिनवगुप्तपदाभिधेन कक्ष्याङ्कचित्रतललक्षणवर्णने स्मिन्।।

इति श्रीमन्महामाहेश्वराचार्याभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां कक्ष्यावत्तिधर्म्यभिधानं नाम त्रयोदशो ध्यायः।

श्रीः

नाट्यशास्त्रम्

चतुर्दशो ध्यायः

द्विधास्थितं स सदाविभक्तं विश्वान्पदार्थान् समुपाददानम्।
पाणीन्द्रियं संव्यवहाहेतु यस्येश्वरं तं वरदं नमामः।।

आङ्गिकाभिनयानन्तरं वाचिकस्य भेदं नाट्यनुप्राणकतया पूर्वोद्दिष्टाङ्गिकस्य विषयसमर्पणप्राणत्वाच्च वाचिको लक्षणीय इत्येवंभूतामध्यायसङ्गतिं करोति **यो वागभिनय** इति। वागेवाभिनयः वाचिकाभिनयः। **पूर्व**मिति षष्ठे ध्याये स निरूप्यते, त वेन चास्याभिधानप्राधान्यात्। अत्र हेतुमाह **वाचि यत्नस्तु कर्तव्य** इति कविना निर्माणकाले नटेन प्रयोगकाले। कुत इत्याह **(नाट्यस्यैषेति)** एषा हि तनुर्नाट्यस्य सकलप्रयोगभित्तिभूतत्वेनातोद्यगीताभिनयानुग्राहकत्वात् स्वयमभिनयरूपत्वाच्च। प्रदर्शितं चैतदस्माभिरूपाङ्गाभिनयारम्भ एव (अध्या–८)।

यत्तु कैश्चिदभिधीयते चित्तवत्तिं प्रति शब्दानां बहिरङ्गत्वं तदसत्। तथा हि यदुच्यते व्यतिरेकाभावान्न रसादयः शब्दवाच्या इति, तत्र सर्वैः शब्दव्यतिरेकाभावो सिद्धः, अभिनयचतुष्टयसामान्यं बहिः सर्वत्र प्रतीतिस्फुटतायां व्याप्रियत इत्यवोचाम सप्तमे ध्याये।

अथ श्रङ्गारादिशब्दानां वाचिकानामभावे पि तत्प्रतिपत्तिः।

परिणतशरकाण्डापाण्डुरा गण्डपाली
हिमसमयनिमीलत्पुण्डरीकायमाणम्।
नयनमधरबिम्बं श्वासविश्रान्तितान्तं
तव सुतनु तनोति प्राणितं मन्मथस्य।।

इत्यादावयमेव च व्यतिरेकाभावः। तदप्यसत्। एतावतापि हि वश्चिकादिवत् निमित्तन्तरमपि तत्प्रतीतौ सुवचनम्। वश्चिको न्यो गोमयजो न्य एव वश्चिकप्रभव इति चेदिहापि तत्समानम्। न हि श्रङ्गार शब्दे यादशी प्रतीतिस्तादश्येवान्यतः, न च न भवति श्रङ्गारशब्दात्तत्प्रतीतिः श्रङ्गारहास्येति (६–१६) श्लोकस्य काकवाशितदेशीयतापत्तेः। यथासंकेतं हि शब्दात्प्रवर्तमानात्सिद्धं साध्यं चाभिधातुं केन प्रतिहन्यत इति साध्यनामकापि बिभीषिका। किंचेदमपि श्रङ्गारायते हसति करुणायते इत्यादि साध्यशब्दशब्दनीयत्वं प्रति किं वक्तव्यं स्यात्, अवश्यं चैतत्, अन्यथा ''याते द्वारवतीं'' इत्यादौ सोत्कण्ठयेति, उत्कमिति चानुवादो विफल एव स्यात्, तद्रूपास्पर्शे तदनुभावसमाकर्षणस्याप्ययोगात्। स्थायिव्यभिचारिणां च भेदप्रतीतौ–

यान्त्या तया वलितकन्धरमानतं त–
दावत्तवन्तशतपत्रनिभं वहन्त्या।
दिग्धो मतेन च विषेण च पक्ष्यमाल्या
गाढं निखात इव मे हृदये कटाक्षः।। (मालती १–३२)

इत्यादावनुभावप्रत्ययो पि दुर्लभीभवेत्, का कथा रसस्य वलितावत्तदिग्धनिखातादीनां कटाक्षशब्दे जीवभूतानां क्रियासु प्रतिपत्तेरभावात्। ''लीनेव प्रतिबिम्बितेव लिखितेव'' इत्यादावेषैव वार्ता।

''तथा सहासरभसव्यावत्तकण्ठग्रहं'', ''वपुरलसलसद्बाहु लक्ष्म्याः'', ''कतिचिदहानि वपुरभूत्केवलमलसेक्षणं तस्याः''।।

रम्याणि वीक्ष्य मधुराणि निशम्य शब्दान्
पर्युत्सुको भवति यत्सुखितो पि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि।। शाकु (५–२)

''निद्रानिमीलितदशो मदमन्थरायाः'', ''विवण्वती शैलसुतापि भावमङ्गैः'' इत्यादिकाव्येषु सहृदयहृदयसागरसमुच्चलद्रागमगाङ्कप्रतिबिम्बेषु जीवितभूतानां हासालस्यौत्सुक्यनिद्रामदागमाभिलाषागमादीनां शब्दास्पष्टत्वेन विभावानुत्साध्यस्वभावे वीतरागतेव बतकाकक्रीडाकल्पनैव स्यात्। सिद्धस्वभावानामेव पदैरभिधीयते, तत्र भवनमिति तदनुभवतीति तत्साध्यस्वभावतेति चेत्, अन्यतरधर्ममुखेन क्रियाख्यस्य धर्मिणो द्वाभ्यामपि यथासङ्केतस्पर्शाद् द्वितीय धर्मास्पर्शस्योभयरोपि तुल्यत्वात् साध्यतार्थं क्रियाया जीवितमिति चेत् धर्मद्वयवति धर्मिणि क एषो न्यतरधर्मपक्षपातः, न च सिद्धता धर्मो स्या नास्ति तथात्वे वा कदाचिदपि कूलदर्शनं न स्यात्। भवनमिति वारोपितगौणीप्रतिपत्तिः स्यात्।

सापि बलादारोपस्थानस्य चानीतस्यैव केनापि शब्देनास्पष्टत्वात्, तस्मात्सिद्धाभिधायिना वा श्रङ्गारादिशब्देन स्पश्यत एव तदर्थः। न तु सर्वो वक्ता

कविरित्यतिप्रसङ्गलक्ष्यमाणप्रबन्धबन्धुरं काव्यनिर्मातत्वं हि कवित्त्वं, न चित्तवत्ति प्रतिपादकत्वम्।

यत्तु श्रङ्गारादिशब्दाद्यवर्धिन प्रतीतिरिच्युच्यते तत्र सङ्केत स्मतिं मुक्त्वा नान्यह्यवधानं वि : विततलक्षणपौर्वापर्यं विपाको यमिति सङ्केतग्रहणे किं तथा प्रतीतिः। एतेनान्वयाभावः प्रत्युक्तः। विभावादिभ्यो पि पूर्णकाव्यप्रक्रिया परिगतमन्तरेण न रसादयः। (यथा)

उद्याने तु स्थितावेतावन्योन्यं ददतौ दशम्।
मध्येभुवं लिखन्तौ च प्राप्य सङ्गमसङ्गतौ।। इति

तस्मादपूर्णत्वे तुल्यो न्वयाभावः। तासां तु – सिद्ध एव। यत्तूपाध्यायैः काव्यकौतुके रसोद्देशपरश्लोके– इत्यादिनिरूपितं तदुक्तान्यार्थतयैव न गहीतव्यम्।

नन्वेवं रससूत्रे शब्दो प्युपादातव्यः?। तदिदमायातं– उत्सङ्गसङ्गिनि बालके तदन्वेषणमिति। अत्र भावोपादाने हि किं न संगहीतम् ''यदयमनुभावयति वागङ्गस वकृत'' इति (७–७)। आवत्या च वागित्यत्रैव छेदः। तद्यदि वाग्भवति तदेतान्यर्थं व्य जयन्ति वाक्सहितानि स्वार्थं व्य जयन्ति एकतस्त्र्यात्मकतश्च वागिति समासयोगेनाह। सैवेयमुपयोगिनी किंतु चतुर्थगोपायभूता परमपुरुषार्थस्वभावा विश्वकारणभूता भगवती भारतीत्याह **वाङ्मयानी**ति वाचि फलरूपायां निष्ठा येषाम्। कुत इत्याह **वा**गिति। इह भावानां सत्तासंबन्धनिजलक्षणार्थक्रियाकारित्वादिकृतं यत्स वं तत्प्रधानकबोधत्वभूतं शपथशरणं, तस्य बोधस्य पारमैश्वर्यं स्वातन्त्र्यं प्रत्यवमर्शात्मकमेव जडवैलक्षण्यदायीति विभक्तमस्मत्परमगुरुपादैः प्रत्यभिज्ञादौ, अस्माभिश्च तद्विवरणे भेदवादविदारणादौ च। एवं वागेवावभासिका सैव च निर्वाहिकी, अवभासनैव हि परमार्थतो निर्वाणम्। तदाह **वाग्घि सर्वस्ये**ति वागेव विश्वाभुवनानीति श्रुतेः शब्दविवर्तादिरूपत्वं च प्रसाधितं तत्र भवि र्भर्तहरिप्रभतिभिरिति तदिहानुसरणीयम्। सर्वाकारत्वे च वाचः इतिवत्तमपि यच्छरीरं नाट्यस्येति (अ २२–१) यद्वक्ष्यते तन्न विरुद्धं, तस्यापि वाङ्मयत्वादिति तत्रैव निर्णेष्यते।

तत्र शास्त्रान्तरप्रसिद्धानपि रसाङ्गत्वेन कविशिक्षार्थं नटस्य च तत्र तत्राभिधेये विश्रान्तिकरान् कर्तव्यतयेत्युपदेशार्थमागमानिति निर्दिशति आगमेत्यादि। अर्थद्वारेण रूपसौन्दर्येण चैषामुभयधा च योगः, क्षुभितं मह्यमिदं मे क्षुब्धमिति मन्थेः प्रतीतिः स्यात्। अर्थभेदे पि स्वरूपसौन्दर्यं सार्वत्रिकं, विषयभेदेन च 'अस्यन्दिष्यन्त सिन्धवः' इति हि कर्तव्ये 'अस्पन्दिष्यन् सर्वे सिन्धवः' इति दुर्भणम्, अश्रवं च 'मक्ष्यं माक्षति वक्षसः क्षतभवान्वेपक्षतं क्लीबितम्'(?) इति– अत्र रौद्रे मोक्ष्यतीति हृद्यम्। अत्र 'कदा संमार्जयिष्यति' इति लोचने न तु कदा संमार्क्ष्यतीति, एवं वैकल्पिके पि आगमे सौन्दर्यात्, अभावपक्षो वा 'आगच्छद्य प्रियतः' इति सुव्यक्तमेव। एकान्तसंप्रतीतिनश्चेति धुटो स वपक्ष एव। आगमेनादेशो प्युपलक्ष्यते। मुग्धाशब्दस्थाने न मूढाशब्दः प्रयोगार्हः।

नाम यथा मदनरिपुरिति भगवत्पर्यायश्चेति तदीयश्शङ्गारवर्णने न प्रयोज्यम्। आख्यातमपि यद्वैचित्र्यमावहति, ''स्मरसि स्मर मेखलागुणैः'' इति वर्तमानप्रत्ययेन तत्साक्षात्करणमुपालम्भविषयता, त्वमेवात्र साक्षी अनतं न प्रकटितं, अन्यथा स्मतवानिति मेखलागुणैरिति स्यात्। उपसर्गात्मकृतार्थयोगिनो यथा– निर्मित इत्यर्थे न मितिः। अधिकद्योतको यथा– ''मुहुरुपचितैर्दष्टिरालुप्यते'' इति। उपसर्गैः कर्मप्रवचनीया अप्युपलक्ष्यन्ते (यथा) ''किं स्यादर्जुनतः प्रति'' इति, ''विचितं नास्तीति'' प्रतीतिः पुनरेव स्यात्, अजुनकृते विचितमिति। तद्धितप्रत्ययोपलक्षणम्।

मीमांसते ह्रदयमात्मन एव बाला
नाम्नापि मानकलनां सहते न जातु।

न तु चित्तं विचारयत्यात्मन एवेति। एवं सुध्धातुप्रत्ययपदं न तल्सु कृत्सु वाच्यं गौरवभयात्तु नोदाह्रतम्।

स्त्रीप्रत्ययो यथा– 'अध्यासीनः सवैदग्धी' कर्म तया कृती न तु वैदग्धीमिति स्त्रीप्रत्यनेन सौभाग्यातिशयप्रतीतेः।

तद्धितो यथा– ''शास्त्रवं च पपुर्यशः'' इति न तु शत्रूणां चेति, तद्धितव या ह्येकार्थीभावान्वयात् तद्गासीकृतमपि यशस्ते स्वयंग्राहीचक्रुरित्यर्थः। निपातो यथा– ''हहा हा देवि धीरा भव'' सूः (आः?) किमत्र किरातैर्यत्र वान्ति वर्षानिला विशेषेण निरङ्कुशा इति,..... एकार्थीभावो यत्र सति वत्तं.....। समासो यथा– ''मध्येगङ्गायमुनमनु नेति, न तु मध्ये गङ्गायमुनयोरिति। एवं समासान्तरेषु वाच्याम्। शुद्धेषु सङ्कीर्णेषु चागमादयो निवत्तान्ता विद्यन्ते यत्रेति मत्वर्थीये च।

सन्धिर्द्विधा नेरन्तर्यं रूपश्लेषश्च– भवतोयेति विपर्ययेण नैरन्तर्ये असिद्धता, तत्रास्थिरा इति रूपश्लेषे बीभत्साश्लीलने। सूत्रं ब्राह्ममिति पथगपि द्विश्रुति सङ्गः पदयोः नैकपदवत्ता, ब्रह्मसूत्रमित्यनुस्वानस्योत्तरसंक्रान्तिव्यतिरेकेण चात्मनि विश्रावयितुमशक्यत्वादेकपदवद्भावः।

विभक्तयः सुप्तिङ्वचनानि, तैः कारकशक्तयो लिडाद्युपग्रहाश्चोपलक्ष्यन्ते। यथा– ''पाण्डिम्नि मग्नं वपुः'' इति वपुष्येव मज्जनकर्तकत्वं तदायत्तां पाण्डिम्नश्चाधारतां गदस्थानीयतां द्योतयन्नतीव र जयति, न तु पाण्डुस्वभावं वपुरिति। एवं कारकान्तरेषु वाच्यम्।

वचनं यथा– ''पाण्डवा यस्य दासाः'' सर्वे च पथक्चेत्यर्थः। तथा वैचित्र्येण ''त्वं हि रामस्य दाराः'' किं यथा कीर्तिस्तवश्वेतेति, न तु श्वेतं यशस्तवेति। उपग्रहः– ''कुर्वाणो भुजशालिनो'' न तु कुर्वते, भुजशालित्वं लिङ्गम्। ''परिमदितमणालीकोमलान्यङ्गकानि''। आसमन्तादितिवैचित्र्यं यथा– ''आपाते पि विकारकारणमहो वक्त्राम्बुजन्मा स वः''। नियुज्यते क्रियायामिति धातुः, तस्य वैचित्र्यं (यथा) ''ग्रस्तं कुलान्ते जगतः'' न तु भुक्तम्। ग्रसिति स्वदनमात्रे परिभाषिते पि ग्रासातिशयसंरम्भः कुले तत्र वर्तते, पूर्ववदत्रापि

द्वन्द्वान्मत्वर्थीयः। एतदेवोपजीव्यानन्दवर्धनाचार्येणोक्तं 'सुप्तिङ्वचने'त्यादि। अन्यैरपि सुबादिवक्रतेति।

इत्येवं दशभिरङ्गैरुक्तो कवितावाचिकशब्दनिष्ठो व्यवहारः विभज्य स्थानाकरणादिज्ञानं च कवेर्गाढशिथिलमसणपरुषादिगुम्फविशेषविभागायोपदिष्टं न तस्य च सम्यगुच्चारणापदेशाय वर्गश उपादानं, सावर्ण्येन प्रबन्धसौन्दर्यज्ञानार्थम्, तथा– ''दत्तानन्दो धनिनमनसर्ता वतिधन'' इत्यादौ। **घोष** इति अनुप्रदानविशेषः। नासिका तद्वापारो न्ते यस्य तथाभूतो धर्मो नुस्वारः। तत्र घोषबाहुल्यताद्गाढता, तथा–

''अङ्गं दधन्निबिडचन्दनमङ्गानानां
नैदाघवातसदनं न तु मन्मथस्य।''

अत्राकारतकारावेवाघोषौ। एतदर्थ एव च स्थानादिविभाग उपन्यस्तः। एतत्स्वरलक्षणाध्याये (अ– १७) स्फुटयिष्यामः। **कपयो**रुच्चारणाय ककारपकारौ जिह्वाशब्देन स्थानकरणौ

(**सवर्णसंज्ञ** इति) ये यत्र तुल्ये तत्सवर्णभूमयः। पुनर्ह्रस्वदीर्घादिरूपतया समानसंज्ञाद्भेदे प्यनुप्रासादावभेदादव्य जनभेदे(?).....स्वरा.....भावादेकवचनादि
भूतकालयुक्तं नामेति– संबन्धः। करिष्यमाणं क्रियमाणं क्रियाकृतमिति यथाभूतादियुक्तं गमनागमनाभ्यां पूर्वापरीभूताध्यक्षापरोक्षभूताभ्यां युक्तमाख्यातं प्रथितः साध्यो र्थो वाच्यत्वेन यस्य। पुरुषैरुत्तममध्यमप्रथमैर्विभक्तम्। धात्वर्थानुपसजन्ति उपरागेणान्यादशान् कुर्वन्ति तेनोपकारेण प्रातिपादिकार्थस्य युक्तसंबन्धेन प्रकरोतीति हि शब्दः। प्रकर्षप्रातिपदिकार्थोपरागेण वा धात्वर्थं विचित्रं करोति यद्वा तु स्वार्थे धात्वर्थानुपसजन्ति अतः उपसर्गान् प्रातिपदिकार्थे च युक्त्या उपसर्गाः यथा प्राचार्यः प्रान्तेवासी, प्रातिपदिकार्थयुक्त्या वद्धश्च धटश्च धातुयुक्त्या पचति पठति च पाक(पाठ)योरेव हि समुच्चयशब्दौ युक्तौ अयुक्त्याश्रयात्तु पादपूरणार्थमुच्यते यत्र द्योतनेन विना न खण्डना द्योतनेन च सति वाक्यमलंकृतं भवति। तद्यथा– ''मिलति न खलु यस्या'' इति खलुशब्दः प्रयासस्याकृतार्थत्वं द्योतयति। तच्च तेनापि विना स्फुटमेव वाक्यार्थत एव लाभात्। ''अहरहरनुरागात्'' इति निर्भज्य वचनं द्योतितस्यापि स्फुटीकरणम्, तद्युक्ता। ''अहो बतासि स्पहणीयवीर्यः'' प्रातिपदिकार्थानेतैरर्थैरुपनिपतितैर्ज्ञापयति । तद्धितः– तस्मै प्रातिपदिकार्थाय हितस्तत्प्रातिपदिकार्थं च यस्य वा स्वात्मीकुरुते यतः प्रत्ययादिविभागावयवः काव्ये तन्मतं संप्रयोगप्रयोजनमैन्द्रे भिहितं, संयोगस्येति संबन्धः। चान्द्री ज्योत्स्ना, सत्त्वं तद्भावः (सूक्तं) सौक्त्यं, वचनं प्रवचनं, काठकमादित्यश्रुत्या, तुर्यप चमाध्यायविहिता निर्देश्यन्ते।

एकस्य पदस्य बहूनां वा पदानां समाप्तिं प्राप्तानाम्। वाशब्दाद् द्वयोरपि। येनार्थो विभज्यते विभक्त्याख्यः प्रत्ययः, तेषां च पदानां द्वैविध्यं धातोर्वा संबन्धि यदुत्पन्नं लिङ्गस्य वा अर्थवल्लिङ्गमिति संज्ञायां संबन्धि व्युत्पन्नं यदि वा लिङ्गस्य संबन्धिन्यो विभक्तयः

सुपः धातोस्तिङः। **पद** इत्येकपदे नास्त्यतिसंहितेत्याह। **निबद्धो** भाविच्छन्दोविधिना बद्धः संघट्टना यथा। **पदबन्धा** इत्युक्ते पदं निरूपयति **तत्रे**ति परिमितवक्तव्यत्वादित्यत्राशयः। यतिर्विरामः च्छन्दो क्षरसंख्या नियमः अक्षरनियमो गुरुलघुनिवेशनियमः एतद्विहीनं चूर्णपदमर्थश्रङ्गारवीराद्यपेक्ष्यक्षराणि परिमितानि भूयांसि वा यत्रेति असमाससंघट्टनात्मकमुक्तमिति। इदं तु केवलं पठनकर्मत्वाद्गद्यमित्युच्यते। वर्णा गुरुलघुत्वच्छेदः पादसंख्या सामान्यलक्षणमाह प्रमाणेन श्रोत्रेन्द्रियेण नियत आत्मा यत्र श्रव्यमित्यर्थः। इदं तत्पद्यं पादेषु भवति, गद्यमिति निगदनीयत्वे पि विशेषसंज्ञया व्यपदेशः।

अथ तस्य लक्षणं कर्तुं छन्दःस्वरूपं तावदित्याह **एव**मित्यादि विविध (वर्ण)भूषणैः सालङ्कारैः पादैश्चतुर्भिरिति संबन्धः षड्विंशकमिति तावत्परिमाणमेकाक्षरात्प्रभति षड्विंशत्यक्षराणि तदुक्तादीन्युत्कृत्यन्तानि छन्दांसीत्यर्थः। पादचतुष्टये तुल्यलक्षणं समं, अतुल्यलक्षणं विषमं (अर्थसमं) प्रथमततीययोर्द्वितीयचतुर्थयोः। संज्ञाभिश्छन्दोभेदा आश्रिताः।

कथं ते भेदा इत्याह **प्रस्तारयोगत** इति प्रस्तारे योगो युक्तिः तेन तत्र युक्तिर्वक्ष्यते–

''प्रकीर्य सर्वं गुरु तत्र पूर्वगुरोरधो लं परपूर्य तत्वम्।
स्यात्पूर्वपूर्वं गुरुणेति यावत्सर्वत्र लः प्रस्तरणे तदेव।।

एतद्यथा भेदाः। अक्षरस्याष्टौ गायत्रीप्रभतीनि, तत एवारभ्य प्रयोगार्हतेति सूचयति उक्त्यादीनामश्रवत्वात्। तदाह **प्रयोगजानी**ति लक्ष्यतो स्थितानि, अपि तु वेदवद् दश्यन्त इति भावः। **वत्तानि च चतुःषष्टि**रित्यादिना स्वकण्ठेन संख्यां पठति यावत्।

षट्कोट्यस्तु सहस्राणां शतानि ह्येकसप्ततिः।
अष्टौ चैव सहस्राणि शतान्यष्टौ तथैव च।
चतुःषष्टिस्तु वत्तानि ह्युत्कृतावपि संख्यया।। इति (६७१०८८६४) प्रमाणम्। अभिकृत्यन्तानां संख्यां प्रमाणीकृत्याह तिस्रः कोट्य इत्यादिना। तदङ्कं पूर्वेण पिण्डयित्वा सर्वसंख्याज्ञानं क्रमवशात्।

एकादिकक्रमवशाद् द्विगुणादिपिण्ड्या–
च्छन्दः प्रमाणकलितानथ पिण्डयेत्तान्।
एकं क्षिपेत्तदुपरीति समस्तवत्त–
संख्याप्रकाशनविधौ लघुरभ्युपायः।।

यथा त्र्यक्षरे तत्पिण्डयित्वा एकाक्षेपादेकसंख्यावत्। षड्विंशत्यक्षरे– ''ह्यंश उक्तक्रमेणेह द्वैगुण्यं यावदुत्कृतेः''।। इति। एकाक्षरे द्वौ, ह्यक्षरे चत्वारः, त्र्यक्षरे ष्टौ, चतुरक्षरे षोडशेत्यादिसंक्षेपः। अनेनैवोपायेन विचार्य ग्रन्थे पाठो निश्चेयः। सर्वेषां वत्तानामित्यादावर्थः समासेन जयदेवो भ्यधात्– ''सर्वादिमध्यान्तग्लौ त्रिकौ म्नौ भ्यौ ज्रौ स्तौ'' इति (अ १–२) त्रिकैरूपलक्षिते पि वत्ते त्रिकसंख्यानतया छन्दो न पूर्यते, यथोष्णिक् अत्रैकमधिकमक्षरमधिकत्वेनोक्तं, अनुष्टुभि द्वे, तत्र त्रिकबीजानि गुरुलघुरूपाण्येव कर्तव्यानि। तथा चैकं गुरुलघु वा द्वे गुरुणी लघुनी लघुगुरुणी गुरु लघुनी वा तदाह

यदेकमधिकमिति। ग्लावित्यादिश्लोकेन व्याचष्टे **नैवातिरिक्त**मिति। **सम्पदि**ति स्वराट् विराट् भुरिक् निवत् श्रुतावेव संभवो न काव्य इति तात्पर्यम्। एतन्निरूपणं तु उपयुज्यते यत्र वेदवाक्यसदश वाक्यं निर्णीयते, यथा अभिज्ञानशाकुन्तले। अर्थस्यावान्तररूपस्य समाप्तिर्लक्षणतो यतिः ''मीलति सति राज्ञो'' यथा ''आयान्त्या तुल्यकालं'' इति, न तु ''जम्भारातीभकुम्भो वं'' इति उच्छब्दो र्थसमाप्त्यभावात्। **चतुर्भाग** इति पादान्ते छेदः कर्तव्यः, न तु ''ताम्बूलवल्लीपरिणद्धपूगास्वेला'' इति। प्रयोगी प्रतिपादमङ्कुरीकृत्य पठन्मध्ये विश्राम्यति। विश्रान्तौ चात्र वत्तभङ्गो र्थभङ्गो भिनेयो त्र श्राव्यत्वा ट्टशङकरादिभिरुपगतमेतत् ''क्वचिदुपान्त्यो वा'' इति। अधिष्ठात्री **देवता** वक्त्र्यादयः। **शरीराश्रये**त्यादि। यथोक्तं कात्यायनेन–

वीरस्य भुजदण्डानां वर्णने स्रग्धरा भवेत्।
नायिकावर्णने कार्यं वसन्ततिलकादिकम्।।
शार्दूललीला प्राच्येषु मन्दाक्रान्ता च दक्षिणे।। इत्यादि।

प्लुतस्याप्यत्र प्रयोगो भवत्येव। यथा– ''यतो पि मानेन स एष मूढो द्रोणारिरेयातिपद्यात्रिलग्नो(?)'' स तु पाठो दीर्घवत्पठितव्यः प्रयोक्त्रा त्रिमात्र एव। **श्वेतादय** इति प्रातिशाख्यादौ छन्दांसि (छन्दसि?) विविधवर्णं कृतं तदनुपयोगान्नास्माभिर्लिखितम्। भगवते कृत इति केषांचिद्दोदकतोदकादीनां गीयमानतया शोभातिशयो भवति श्लोकः, स्रग्धरादीनां तु पाठेन। **इति** शब्देन प्रकारार्थेन व्याचष्टे **दिव्य** इति। **प्रथम** इति स्तोत्रशास्त्रेषु सप्तानामेव छन्दसां बाहुल्येन दर्शनात्। देवस्तुत्यादौ देवेषु वक्तष्वयं **गण** इत्यर्थः। गण इति द्वितीयो दिव्यनिवत्तै गण इत्यर्थः तेन मानुषेषु वक्तष्वयं प्रायेण। ततीयस्तु दिव्यमानुषेषु च रामादिषु नरपतिषु च।

प्रस्तारस्तत्र संख्यादि सर्वमिति संश्रयशब्देनाह, तद्गणसंविज्ञानाच्च प्रस्तारो प्युच्यते। प्रस्तरणं विताननम्। लक्षणमङ्कसंख्येत्यर्थः। गतं नष्टमिति स्वरूपेणैव न ज्ञातं, उद्दिष्टं तु स्वरूपेण ज्ञातं न संख्यया। तज्ज्ञानोपायेन नष्टादयः शुद्धाः (सिद्धाः?)।

तत्र वर्णगतो मात्रागतश्चेति प्रस्तारो द्विधा तमुदाहरति। **द्विकौ ग्लावि**ति वर्णसंख्यादि नियमेन यौ गुरुलघू। द्विकै संख्यापरिमाणौ तौ **मात्रिकौ** मात्रागणनेषूक्तौ। अन्येनाधिकृतत्वादेकेन भेदेन मिश्रौ भवतः।

अत्र प्रस्तारे प्युपायमाह **गुर्वधस्तादि**ति। आद्यस्यैव गुरोरधो लघुः सर्वोन्यसनीयः। यत्र द्वौ भागौ मिश्रौ विषमसंख्यायां तदा द्विरिति भूयो भूयो मात्राप्रस्तारो निरूप्यते। मात्रापरिकल्पतौ यस्त्रिमात्रचतुर्मात्रादिः समूहो गणमात्रसंख्याया लघ्वक्षरसंख्यया तत्र प्रथमं प्रस्तार इत्याह पथग्लक्षणीयो पि भागो त्र संख्यायास्तत्र गुरुः सर्वतो न्यसनीयः। यत्र तु द्वौ भागौ मिश्रौ, विषमसंख्यायां तत्राद्यो लघुरन्यो गुरुः शेषं वर्णप्रस्तारेण तुल्यम्। केवलमात्रासंख्येति वचनाद्गुणानान्यासे पूर्वत्र मात्रा देया। यत्र वर्णप्रस्तारः विषममात्राप्रस्तारे प्युदाहृत एव। द्वितीयस्तु तदाह गुरुरिति जातावेकवचनं गुरु इत्यर्थः।

लघुनी चकाराद्गुरु तथाशब्दादन्यद्भेदत्रयं, चतुर्मात्रा आर्याणां प्रस्तारे गणभेदः प चदश इत्यर्थः, प चमात्रो ष्टधा, एवं षष्ठो त्र प्रस्तार्यातीत इति वर्णवत्तेष्वेव च कृत इत्यर्थः। अन्यत्र तु मात्राकृतो गणविभागः तदपेक्षया गुरुलघुव्यवस्थानात्स्वातन्त्र्येण।

तत्रोद्दिष्टमाह **द्विगुणितादि**ति वर्णवत्तेष्वेव चेदं सर्वं मन्तव्यम्। भेदं पश्यैकमेकमङ्कं द्विगुणितं च दत्वा द्विद्विरिति भूयो द्विगुणितादपि द्विगुणितं कृत्वान्त्यं परिसमाप्य गुरु संबन्धिनो ङ्कान् हरेत् पुंसथेत् (प्रस्तरेत्?)। लघोः संबन्धिनो ङ्कान् पिण्डीकृत्य तेन पिण्डेनातिक्रान्तेनैतावदयं भेद इति संख्यां निर्दिशेत्, यथा चतुरक्षरस्येदशं क्रियाभेदं यच्च लघ्वङ्कगणनातिक्रान्तौ।

अथैकादिलघुज्ञानार्थं पीठं रचयति **आद्यं सर्वगुर्वि**त्यादि। कोश इत्याद्यन्तयोर्मध्यगो भेदगणः। सो स्य लघोः संख्यया निश्चयं कुर्यात्। तद्यथा चतुरक्षरौ प्रथमान्तौ सर्वगुरुः सर्वलघुश्च, एकद्वित्रिलघवस्तु चतुः षट्चतुः प्रकाराः संक्षेपत इति एतदङ्कव्यामिश्रणेन संख्या लभ्यते षोडशभेदाश्चतुरश्चतुरश्चेति।

संख्यास्थान उपायान्तरमाह **एकादिका**मिति। छन्दो क्षरोपरि एकद्विचत्वारीत्यदीनि निक्षिपेत्। तत्र पूर्वेणोत्तरस्य पूर्वेण मिश्रणं कुर्यात् यावत्पर्यन्तं गणपिण्डस्तां चैकादिकामेकेन मिश्रितं कुर्यादित्येवं समवत्तानां संख्या। लघूनामित्थं षोडशाभिर्गुणयेत्। ततो गुणराशेः षोडशसंख्यामवपातयेत्। तेन चतुरक्षरे विंशत्यधिकं शतमर्धसमवत्तानां तामपि संख्यां गुणयित्वा गुणराशिं पातयेत्। तेन च सहस्राणीति शतान्यशीतिश्चेति चतुरक्षरे विषमवत्तानि।

अथ नष्टमाह **वत्तर्धपरिमाणं** त्विति संख्यामर्धेन छिन्द्यात् यत्र विषमाङ्कं न पूर्यते तत्र पूरणार्थमेकमधिकं कुर्यात्। तदाह **यथाक्रम**मिति। तत्र गुरुः। सैककरणात्प्रयत्नगौरवाल्लघुरन्यथा च्छेदनात्। एवं पुनः पुनर्यावदक्षराणि पूर्णानि यथावच्चतुरक्षरे प चमो भेदः कीदगिति– पूर्वं प चाङ्कस्य सैकच्छेदात् गुरु, पुनरापि त्र्यङ्कस्य सैकच्छेदात् गुरु, द्वयोश्च समच्छेदाल्लघु एकस्य सैकच्छेदाद्गुरु, एतेनेदशः प चमो भेदः।

एतदुपसंहरन्नध्यायान्तरमासूत्रयति **एव**मिति। व्याकृतेन विभागेन लघुप्रधानानि वा लक्ष्ये निवेशयेत् कविरुपबध्नीयादिति शिवम्।।

पार्वतीवदनाम्भोजभङ्गनेत्रत्रयीभुवः।
दासो भिनवगुप्ताख्यश्छन्दोध्यायमपप्रथत्।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायामभिनवभारत्यां नाट्यवेदविवतौ छन्दो ध्यायश्चतुर्दशः समाप्तिमगमत्

श्रीः

नाट्यशास्त्रम्

अथ प चदशो ध्यायः

समस्तवत्तानि विना न येन पटू वश्रोत्ररसायनस्य(?)।
छन्दांसि यस्मात्प्रभवन्ति वन्दे तं वाङ्मयं रूपमिहाष्ठमूर्तेः।।

यदुक्तमक्षराणि निवेशयेदिति (१४–१३३) तत्र श्रव्यताकृतं प्रविभागमाख्यातुमुपचक्रमे **छन्दांस्येव**मिति। एषां छन्दसां नाट्यप्रयोगयोग्यानि वत्तानि निबोधतेति संबन्धः। गुरुलघुनियमेन श्रव्यता वर्तते येषु तानि वत्तनि श्राव्यार्थत्वात्, अधिकरणे क्तः। गायत्रीत आरभ्य प्रयोगार्हतेति पूर्वाध्याये निरूपितत्वात् तदुपक्रममेवाह **आद्ये पुन**रिति, मध्ये तु लघुन्यर्थात्। गायत्र्यैव गायत्रम्। तत्रेहाध्याये भरतमुनिकृतमिति त्रिकैर्मकारादिभिः कैश्चित्कंचिल्लक्षणं स्वीकृतमिति द्विविधः पुस्तकपाठो दश्यते मध्ये च चिन्तनाय पुस्तकेषूभयमपि पठ्यत इति। एत**न्नाम्ना** प्रसिद्धा, ख्यातरूपा श्लाघनीयेत्यर्थः। त्वया यन्मदीयं मनःप्रविष्टं व्याप्तमाक्रान्तं तत्सिंहवन्नखविलेखनं तत्र तादशं वत्तं तद्यथाक्रान्तं जातमिति यावत्।

शोभां स्वां स्वभाववर्तने ये भेदाः। वैडूर्यच्छायानि यानि दलानि तत्तत्स्फुरत्सुवर्णतुल्यानि वर्णानि तदभ्यन्तरकेसराणि।

मयूरवह्याकोचमस्याः, मयूरीभिर्वा (सारी) गतिविशेषो भवतीत्याहुः। मन्दं मन्दं दोधकेन गीयमानं वत्तं दोधकवत्तम्। (एष इति) यावन्मुरजघाततुल्यं गर्जितं श्रुत्वा।

उपेन्द्रवज्रो अस्या उपमानत्वेन सा तथा मत्वर्थीयो उपेन्द्र वज्रन्तु इन्द्रधनुषा उपमितमुपेन्द्रवज्रमुपमितसमासः, द्विगुप्राप्ते परवल्लिङ्गनिषेधः। **स्मितेन कान्त्ये**ति इन्द्रधनुषो पि वर्णवैचित्र्यं च भवति। (श्लो–४५) आत्मने सुहृदे **दूरवर्जितं प्रियं** दूरत्यक्तं किं त्वया न कृतं दूरत्यक्तमित्यर्थः। कुत इत्याह यत्पलायनेति। मदनसंश्रयो भावो यस्य कामफलमिति यावत्।

(किमिदमिति) तोटकस्य छेदकस्य वत्तं चेष्टितम्।

(मन्मथनेति) नत्तगीतयुक्ता न भवसीति संबन्धः।

(स्मितेति) प्रमिताक्षरा भण्यते सा यस्यां स्मितभाषित्वादिगुणा युक्ता सा तादशी सुसुखी युवतिरपि कस्यचि वेदिति शेषः।

(परुषेत्यादि) भवत्पारुष्यं वाक्यं तदीयया कशया अभिहता वरतनुर्हरिणप्लुतमिव करोति।

(उपवनेति) पुटस्य युगलस्य वत्तं तथा चोपवनं सलिलं चेति युग्मं, एवमन्यत्।

(चित्रैरिति) वसन्तस्य यस्तिलकस्तस्यास्ति उपमानं त्वनेनेति

साक्षादिति छन्दानुवर्तिनीत्यर्थः।

(नान्दीमुखीति) नान्द्यां मङ्गलदुन्दुभेरिव मुखं यस्या।

असाविति (तोयधरैरिति) गज एव वा गजोचितं विलासं करोति इदमिदं विक्ष्य।

(**रूपोपेता**मिति) भुजङ्गविजम्भितं कृत्वा भगवतो हस्ते न्यस्तम्।

नानावत्तसमु वा इत्यनेन तुल्यच्छन्दसां वत्तानां लक्षणं पथक्पथक्पादे विरचय्य स्वयं विषमा ऊह्या इत्याह।

द्वौ समाविति प्रथमततीयौ द्वितीयचतुर्थौ। **द्वौ विषमावि**ति प्रथमद्वितीयौ ततीयचतुर्थौ, वीप्सागर्भमेतत्। द्वाविति सिद्ध इति लक्षिते। **सार्वपादिक**मिति लक्षणीयमितिशेषः द्वयोरित्यत्रापि। छेद इति पादेषु विभाग इत्यर्थः। (समवत्तविकल्पनं) समवत्तेषु विकल्पिता ये चित्राश्छेदाः ते प्रोक्ताः।

(सगुर्वन्त इति) गुर्वन्तः सः, सर्वलघुः नः त्रिकौ नेष्येते। प्रथमादक्षरादनन्तरः चतुर्थादक्षरादूर्ध्वं तु प्राकूलघुः यकारं तु न प्रयोज्यानि

ननु **हतशोभानी**ति चेत् कथं प्रयोज्यानीत्याह यान्यत्र प्रतिषिद्धानीति गीतं पाठ्यमानत्वाभावात् न वत्तगता श्रव्यतापेक्षते केवलं तालयोजनार्थसाम्यमवश्य––कर्तव्यमिति मात्राणां वर्णानां नियमस्तत्राश्रीयते।

अर्धो ष्टमो गणः सान्ताः सप्त गणाश्च। चतुर्मात्रा यस्मात्तदगर्धं यः स्यात् षष्ठो गणो द्विभेदः एकभेदमाह पश्चादर्धे यः षष्ठो गणस्तस्मिन् कर्तव्ये लघुरेकः कर्तव्यस्तस्य स्थान इत्यर्थः। गुरुमध्यो जः सर्वलघुः चतुर्लघुस्तत्र च द्वितीयादारभ्य लघ्वोर्यतिरर्धे तदनन्तरं पादारम्भः कर्तव्यः, अन्ते च प्रथमादिर्यतिः, प चमे च गणे समाप्ते यातिः। **अयुग्गण** इति विषयं प्रथमततीयप चमसप्तमरूपं। **युग्गणः** समः **स एव चेति** जकारस्तत्र न वर्ज्य इति यावत्। अर्धद्वये पि गणत्रये छेदः कर्तव्यः स चैव पाद उच्यते तदाह **प्रथमततीयौ पादौ द्वादशमात्रा**विति। प्रथमे र्धे गणत्रयं प्रथमः पादः द्वितीयपादे चान्यं गणत्रयं ततीयपादम्। **पथ्ये**ति पथि साध्वित्यर्थः।

आर्याणां भेदं दर्शयितुं तत्प्रस्तारमित्याह।

चतुःप चप्रकाराणां चतुष्काणां विशेषतः।
प्रस्तारयोगमासाद्य बाहुल्यं संप्रदर्शयेत्।। इति

अयुक्स्थानगतानां चतुष्प्रकाराश्चतुर्गणाः। समस्थानगताः प चप्रकारास्तेषां यो विशेषः परस्परसंकीर्णतातत्कृतमार्याणां प्रस्तारबाहुल्यं निरूपयेत्। अन्त्या सर्वलघु कार्या प चप चाशदक्षराणि, प्रथमार्धे एकान्न त्रिंशत्, द्वितीये षड्विंशतिः।

शिशिररतरकिरणपरिकरसकलकलविरचितकपिशकचनिचय।
समहृदय (तनुविनिहितधरणिधरवरसुत जयजय शिव।।)

लघुद्वयं द्वितीये षष्ठे स्थाने लघुः तथा च **लघुवर्णत्रय**मिति। अत्र मात्रावत्तानां संज्ञाज्ञानार्थमाह। **सर्वेषामेवे**ति। पूर्वं कृत्वा यो विकल्पसंख्याभेदः तस्योत्तरसंख्यया सह

गुणसंहननं कृत्वा यो भवति पिण्डस्तेन संख्यां वदेत्। तत्र समस्तानां प चभेदः विषमश्चतुर्भेदः षष्ठो द्विभेदः द्वितीये र्धे त्वेकभेदः, अष्टममेकभेदम्। तदत्र पूर्वाङ्केनोत्तराङ्कस्य गुणनं तेनान्याङ्कस्य षोडश स्थानानि। संख्यालाभः तत्र चतुर्भिः प चानां गुणने विंशतिस्तया चतुर्णां गुणने विंशतिस्तया च गुणानां गुणने विंशतिस्तया चतुर्णा गुणने विंशतिस्तया च गुणानां गुणने विंशतिरित्यादि मन्तव्यम्। तदाह–

आर्याः शतसहस्राणि ज्ञेया ह्येकान्नविंशतिः।
अष्टौ कोट्यः सहस्राणि विंशतिश्च प्रमाणतः।।

न लघुरिति। अपि तु प्रथमार्धवदपरार्धे पि षष्ठो द्विभेदो गणः आर्यागीतावित्यर्थः।

अध्यायार्थमुपसंहरन् भाविनं विषयमासूत्रयति वत्तैरित्यादि। **काव्यबन्धा** इत्यनेनेदमाह यथा प्रासादकुड्यादिके कर्तव्ये प्रथमं भूमिः, तद्वात्काव्ये निर्मातव्ये भूमिकल्पः शब्दच्छन्दोविधिः क्षेत्रपरिग्रहं वत्तसमाश्रयमित्यादि विरचयन् भित्तिस्थानीयं लक्षणयोजनं चित्रकर्मप्रतिममलङ्कारगुणनिवेशनं गवाक्षवातायनादिदेशीयो दशरूपकविभागः, उपयोगनिरूपणाप्रख्या काक्वादिप्लुतिः, एवंभूतवाचनिकाभिनयस्वरूपं चतुर्दशादिभिः षड्भिरध्यायैरुच्यते। तत्राध्यायद्वयं वत्तलक्षणविधानं तु भविष्यति।

यद्यपि रूपकविरचनकाले परिपक्वप्रज्ञस्य न क्रमप्रतिभासस्तथाप्यपोद्धारधिया कल्प्यत इत्याहुः। प्रबन्धस्य यो युक्तो भ्यासः तन्निष्पत्तिः प्रबन्धाभ्यासः तत्संपत्तिः अभिनयार्थनिर्वर्तनं तदभिनयोपारोहणमिति स एव क्रम इत्युपाध्यायाः। यदाहुः–

महाकवीनां पदवीमुपात्तामारुरुक्षताम्।
नासंस्मत्य पदस्पर्शान्संपत्सोपानपद्भतिः।। इत्यादि।

क्रमोल्लङ्घने हि सति नाटकादिविरचयतां महान्तः प्रमादापभ्रंशा भवन्ति। न हि सर्वो वाल्मीकिर्व्यासः कालिदासो भट्टेन्दुराजो वा, तेषामपि प्राग्जन्मार्जितक्रमाभ्याससमुदितसंस्कारपाटवोत्पादितः कुलप्रतिभङ्गज्ञानातिशय इति शिवम्।।

इति प चदशाध्याये ध्यायिना परमेश्वरम्।
कृताभिनवगुप्तेन गुप्तार्थप्रकटीक्रिया।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां वत्तविधिर्नाम प चदशो ध्यायः

श्रीः

नाट्यशास्त्रम्

षोडशो ध्यायः

विचित्रं रूपकभुवो लक्षणं भूषणं भुवः।
भास्यते येन तं वन्दे प्राच्यधीसाधितं शिवम्।।

(ननु) काव्यबन्धाः षट्त्रिंशल्लक्षणान्विताः कर्तव्या इत्युक्तं, तत्र गुणालङ्कारादिरिति वत्तयश्चेति काव्येषु प्रसिद्धो मार्गो, लक्षणानि तु न प्रसिद्धानि, किं च पुरुषस्येव काव्यस्य लक्षणगुणालङ्कारव्यवहारो न युक्तः पुरुषस्य शरीरचैतन्यभेदात् कटकादीनां ततो पि भेदात्, काव्यस्य पुनर्विरचनकाले प्रतिपत्तिकाले वा प्रापकसत्तायां तेषामगणितत्वाच्च। दण्डिनापि

''काव्यशोभाकरान्धर्मानलङ्कारान्प्रचक्षते''

इति ब्रुवता गुणमध्य एव तत्र प्रसादादीनभिदधता च गुणालङ्कारविभागे प्यसंभवीति सूचितं भवति। सत्यमेतत्, किं तु विरचनविवेचनसामर्थ्यसमर्थनायावश्यं काल्पनिको पि विभाग आश्रयणीयः। तत्र कल्पनायां विप्रतिपत्तयः केचिदाहुः– इह गुणास्तावदात्मनि चिन्मये श्रङ्गारादौ वर्तन्ते, श्रङ्गारे चावश्यं च लक्ष्यत इति पथक्सिद्धत्वादलङ्कारः, शरीरनिष्ठमेव यत्पदं पथक्सिद्धं तल्लक्षणम्, येन शरीरस्य सौन्दर्यं जायते। तच्च सिद्धरूपं साध्यरूपं वा, यथा श्यामेति, 'मदमन्थरगामिनी' इति च। एतदेव लक्षणं, तच्चालंक्रियते। अलङ्कारैर्युक्तं काव्यं लक्षणैर्विना न शोभते। क्रियावाच्योपमेयभेदेन तदेतल्लक्षणं द्विधेति यथा 'श्यामा विशालाक्षी', 'मत्तमातङ्गगामिनी' इति च।

अन्ये मन्यते– इतिवत्तखण्ड(ल)कान्येव सन्ध्यङ्गकानि लक्षणानीति च व्यपदिश्यन्ते। निमित्तभेदात् पूर्वापरसंबन्धेन बीजोपक्षिप्ते र्थे निर्वहणपर्यन्ते परस्परसन्धायकत्वेन सन्ध्यङ्गतया व्यपदेशः, रसविशेषोपयोगितया वत्यङ्गवाचोयुक्तिः, काव्यगतख्यातिप्राशस्त्योपयोगितया महापुरुषगतपाशध्वजपा––दरेखादिवल्लक्षणशब्दवाच्यता। तदुक्तं तत्रैव–

लक्षणान्येव बीजार्थक्रमनिर्वाहकानि च। इति,
प्रतिसन्धितदङ्गानि फलसिद्ध्युपपत्तितः।। इति।

(काव्ये धीरोदात्तादिगुणाधानं वस्तुवर्णनाभङ्गिर्वेति केचित्)

तदत्र प्रथमपक्षे वर्णनीयप्रधानभूताधिकारपुरुषगतगुणादिविभाग एव काव्ये पर्यवसीयते। द्वितीयपक्षे तु वर्णनीयः सकल एवेति। वत्तिलक्षणो र्थः काव्यभेदात् त्रेधा विभज्यते। एकेषां तु दर्शनं– कवेर्यः प्रतिभात्मा प्रथमपरिस्पन्दः तह्यापारबलोपनता गुणाः, प्रतिभावत एव हि

रसाभिव्य जनसामर्थ्यं माधुर्यादेरुपनिबन्धसामर्थ्यं, न सामान्यकवेः। अनेन शब्देनेदं वस्तु वर्णयामीत्येवंभूतवर्णनापरपर्यायद्वितीयव्यापारसंपाद्यास्त्वलङ्काराः।

शब्दनमीभिः शब्दैरर्थानमीभिरर्थैः संघटयामीत्येवमात्मकस्तु यस्ततीयः कवेः परिस्पन्दः तदधीनात्मलाभादिशब्दारत्मार्थात्मककाव्यशरीरसंश्रितानि वक्ष्यमाण–
–श्लेषादिगुणदशकसमभिव्य जनव्यापाराणि शब्दार्थोपसंस्कारकल्पानि क्रियारूपाणि लक्षणानीति, यदुक्तं तत्रैव–

इति शब्दार्थयोर्येयं संश्रिता देहभूतयोः।
काव्ये तया दर्शितानि लक्षणानि (विदुर्बुधाः)।। इति,
काव्ये प्यस्ति तथा कश्चित् स्निग्धः स्पर्शो र्थशब्दयोः।
यः श्लेषादिगुणव्यक्तिदक्षः स्याल्लक्षणस्थितः।। इति,
चेष्टालङ्कारदष्टान्तचिह्नं.....।। इति च

अत्र पक्षे कविव्यापारभेदाद्गुणालङ्कारलक्षणविभागः।

अपरे संगिरन्ते– अभिनेयानां काव्यबन्धानां वक्ष्यमाणस्वरूपं च रूपकं समभिदध्यात्, कवेः स्वसामर्थ्याधानाय तावदभ्यासो निर्माणविधेयो लक्षणं, मस्तकसंपूर्णश्चादौ क्रमेण तु तथाभूतो भिनेयार्थः काव्यबन्धो (लक्षणोन्नीतः) तेन च लोकोत्तरहृद्यवर्णने योगात्। तथा हि किञ्चित् प्रबन्धजातं गुणालङ्कार निकरप्रधानं यथा मेघदूताख्यं तद्विभूषणम्, एवमन्यदपि, इति।

'प्रबन्धधर्मा लक्षणानि' इति केचित्तु ब्रुवते। कवेरभिप्रायविशेषो लक्षणमितीतरे पुनर्मन्यन्ते। केचिद् यथास्थानविशेषं यद्गुणालङ्कारयोजनं तल्लक्षणमिति। परे त्वभाषन्त– अलङ्कारादिनिरपेक्षेणैव निसर्गसुन्दरो यो भिनेयविशेषः काव्येषु दश्यते, अमरुकश्लोकेष्वपि, तत्सौन्दर्यहेतुर्यो धर्मः सलक्षणः स एव चार्थः काव्यशरीरविशेषरूपो लक्षणम्। उपमादीपकरूपकाणामानन्त्याद् भेदमाहुः। तुशब्देन अर्थे न चित्रत्वं लक्षणमिति।

इतरेषां तु मतं यथा तन्त्रप्रसङ्गबाधातिदेशादि मीमांसाप्रसिद्धं वाक्यविशेषव्यवच्छेदलक्षणं तथा काव्यविशेषव्यवच्छेदकं भूषणादिलक्षणजातमिति त्वयं पक्षो द्वितीयपक्षान्न भिद्यते। एतेषु तु पक्षेष्वन्यतमग्रहे विशेषणानि न संगच्छन्ते स्पष्टेन पथा। इदं तु दशपक्ष्यां वस्तु।

इह काव्यार्था रसा इत्युक्तं प्राक्। उक्तं च वर्णनीयं शब्दनीयं कवेः कर्मेति च व्युत्पत्तित्रयं काव्यमिति। अनेनाभिधेयं अभिधानं अभिधां च स्वीकृत्यावस्थीयते, अपि च शब्दव्यापारो भिधातव्यापारः प्रतिपाद्यव्यापारश्चेति त्रिगतः। तत्र शब्दस्य रसाभिव्यक्तिक्षमार्थप्रतिपादकत्वं स्वयं च श्रोत्रे च संक्रन्तिमात्रं नान्तरीयकतया तद्रसदर्शनयोग्यतापादन सामर्थ्याद्गुणशब्दवाच्यम्, आवर्तमानो द्वितीयो वर्णः पदं वा प्राक्तनवर्णनादशोभाहेतुरलङ्कारः। एवमर्थस्यापि, यद्रसाभिव्यक्तिहेतुत्वं सो र्थगुणः यस्तु वस्त्वन्तरं वदनस्येव चन्द्रः सो लङ्कारः, यस्तु त्रिविधो प्यभिधाव्यापारः स लक्षणानां

विषयः। तथाहि– इदमनेन शब्देनानयेरितकर्तव्यतया मुनाशयेनेत्थंभूतबुद्धिजननाय ब्रुवे इति कविः प्रवर्तते, स तथाभूतं रसवत्काव्यं विधत्ते। तत्र चित्रवत्त्यात्मकं रसं लक्षयंस्तत्तद्रसोचितविभावाद्वैचित्र्यसम्पादकस्त्रिविधो भिधाव्यापारो लक्षणशब्देनोच्यते। इत्येषां सामान्यलक्षणम्। यथा च पीवरत्वं स्तनर्योलक्षणं मध्यस्य तु कुलक्षणं, एवं किंचिदभिधीयमानं केनचिद्रूपेण रसोचितेन विभावादिरूपेण तमेव पदार्थक्रमं लक्षयल्लक्षणं अन्यत्र तु तत्कुलक्षणं, तेन सर्वे लङ्कारा गुणास्तत्समुदायाद्विलक्षणा भवन्ति। तथा स्वार्थो पि च क्वचिदर्थमात्रं स्वयं सुन्दरस्वभावो र्थः कुत्रचिच्छन्द इति त्रिविधव्यापारगामी; तद्द्वारेणाभिधानाभिधेयतद्गुणालङ्काराद्यनुग्रहः शब्दानां शब्दैरर्थानामर्थैः शब्दानामर्थैस्तथापरैः संघटनां विचित्रां कारयमाणाभिधाव्यापारवती ह्युक्तिर्निर्वाणप्रधानधुराधिरोही लक्षणाख्य एव।

अत एव पूर्वं ''काव्यबन्धास्तु कर्तव्याः षट्त्रिंशल्लक्षणान्विताः'' इति लक्षणान्येव हि प्रधानं तत्प्रसङ्गेन गुणालङ्कारा इति तात्पर्यम्। विशेषलक्षणव्याख्याने चेतत्स्फुटयिष्यामः।

तत्र लक्षणान्युद्देष्टुं तावदाह **विभूषण**मित्यादि **यथारसं** त्वित्यन्तेन श्लोकचतुष्टयेन। यथारसं ये भावा विभावानुभावव्यभिचारिणः, तेषां यो र्थः (तं) स्थायिभावरसीकरणात्मकं प्रयोजनान्तरं गतानि प्राप्तानि, यदभिधाव्यापारोपसंक्रान्ता उद्यानादयो र्थास्तद्रसविशेषविभावादिभावं प्रतिपद्यन्ते तानि लक्षणानीति सामान्यलक्षणम्। अत एव काव्ये सम्यक्प्रयोज्यानीति विषयस्तेषामुक्तः।

भट्टनायकेनापि त एव(?)शिक्षित्वाभिधाव्यापारप्रधानं काव्यमित्युक्तं–

शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पथग्विदुः।
अर्थे त वेन युक्ते तु वदन्त्याख्यानमेतयोः।
द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यगीर्भवेत्।। इति।

भामहेनापि–

''सैषा सर्वैव वक्तोक्तिरनयार्थो विभाव्यते'' (२–७५) इत्यादि।

तेन च परमार्थे व्यापार एव लक्षणं, स तु विषयद्वारेण विशेषलक्षणे तु निरूप्यत इति तत्खीकृतत्वादर्थो पि लक्षणं, व्यापारो पि च तद्विदां तु तदभ्यासपराणां च तथाभूतकाव्यात्मकविषयावलोकने झटित्येव प्रतिभाति। तदन्यत्रानुमानेन प्रतिभया स्वसंवेदना– इत्यनेन प्रयोजनम्। कुशलशिक्षितव्यापारो हि तत्काव्यदशि भात्येव।

षट्त्रिंशदिति च नान्यदिति वारणपरं कविहृदयवर्तिनामपराणामपरिसंख्येयत्वात्। किं तु बाहुल्येन तावदियता लक्ष्यव्याप्तं, इयति च कविनावधातव्यमिति संख्यानिरूपणम्।

तथा च मतान्तरेण भरतमुनिरेवान्यथाप्युद्देशलक्षणेन नामान्तरैरपि च व्यवहारं करोति; तत एव पुस्तकेषु भेदो दश्यते तं च दर्शयिष्यामः। पठितोद्देशक्रमस्त्वस्मदुपाध्यायपरम्परागतः।।

तत्र विभूषणं लक्षयितुमाह **अलङ्कारै**रिति। भूषणैः कटकादिभिः विभज्य स्थानदेशकालदशापुरुषादिविभागं विचार्य न्यस्तैरिव गुणालङ्कारैर्यदलङ्करणं तद्भूषणं नाम लक्षणं कविव्यापारः, तद्द्वारेण शब्दार्थव्यापारावपि।

एतदुक्तं भवति– इह गुणा अलङ्काराश्च विषया इत्यनेन निबद्धाः काव्यार्थीकृतानामभिधेयानां रसविशेषविषयं विभावादिभावं विवरीतुं समर्थाः। तथा हि हास्यरसप्रधाने प्रहसनादौ शुष्कश्रोत्रिये वक्तरि प्रयोक्तरि श्रोतरि वा गुणविनिवेशितं तु लक्षणं भजत्यलङ्कारश्च। तथा हि पादताडितके श्रोत्रियं श्रोतारमभिप्रेत्य विटस्यापि निर्गुणपुरुषस्यैवोक्तिः ''मा मुसलेनापाकार्षीः, मा कुसूलाग्निना धाक्षीः'' इति शोभां पुष्णाति। अनौचित्यनिबन्धस्तु करुणविप्रलम्भादौ यमकस्य, यथा–

विना प्रियतमेनाद्य विरहानलतापिता।
दह्येच्चूतस्य विच्छेदं किं तु हा नलतापिता।।

स्थाने निवेशस्तु यथा–

लीनेव प्रतिबिम्बितेव लिखितेवान्तर्निखातेव च
प्रोत्कीर्णेव च वज्रलेपघटितेव'' इति। (मालतीमाधवात्)

अत्रापि लोके उत्प्रेक्षापरम्परैव हीयं सातिशयकामावेशावस्थासमुद्द्योतितप्रियतमा––विषयविचित्रसंकल्पगर्भसंभवौन्मुख्यप्राणत्वाद् विप्रलम्भस्य कामावस्थानां च माधुर्यप्रसादोपेते च काव्ये श्रोत्रपथमवतरत्येवेति प्रतिपाद्यते। सुकुमारचित्तवत्ति––सुभगो यमुत्तमश्चेत्येवं समस्तस्य गुणालङ्कारवर्गस्यानुग्राहकमिदं कविव्यापाररूपं, तद्वशाच्च शब्दार्थतह्यापाराद्यपि स्पशद्विभूषणाख्यं लक्षणम्। एतमेवार्थं सम्यगानन्दवर्धनाचार्यो पि विविच्य न्यरूपयत्–

ध्वन्यात्मभूते श्रङ्गारे समीक्ष्य विनिवेशितः।
रूपकादिरलङ्कारवर्ग एति यथार्थताम्।। (ध्वन्यालोक २/१७)

इत्युक्त्वा क्रमेण–

विवक्षातत्परत्वेन नाङ्गित्वेन कदाचन।
काले च ग्रहणत्यागौ नातिनिर्वहणैषिता।। (ध्वन्यालोके– २–१८)

इत्यादिना ग्रन्थसन्दर्भेण सोदाहरणेन। तच्चास्माभिः सहृदयालोकलोचने तद्विवरणे विस्तरतो व्याख्यातमिति तत्कुतूहलन्तदेव गह्णीयात्। इह तु प्रसक्त्या ग्रन्थभूयस्वादुद्विजते लोक इति न विस्तारितम्।।

अथाक्षरसंतिमाह **यत्राल्पै**रिति। अक्षरशब्देन यदच्छाशब्दप्राधान्यं, यदच्छाशब्देषु स्वरूपस्यैव प्रवत्तिनिमित्तत्वात् तेनाल्पैरेवाक्षरैः श्लिष्टैर्विप्रकृतावित्युक्ताभिरुपलक्षित्वेनैव विचित्रं तद्रसोचितविभावादिभावं प्राप्यमाणो र्थ उपवर्ण्यते, श्रोतृणां हृदयमुपसंक्रामयितुं यत्तस्मिन् कविव्यापारो क्षरसङ्घातस्तत्कारणत्वात्।

तथाहि मानिनीत्यक्षराणि ईर्ष्याविप्रलम्भे, तरुणीत्याभिलाषिके, वरतनुरिति संभोगे विभावतां तामेव प्रापयन्ति। अस्तीतिव्युत्पत्तिस्तथापि पर्यन्ते मानादिशब्दानामन्ततो वा धातुप्रत्ययमात्रादेरवश्यं यदच्छात्वमित्यक्षराणामेव संघातः प्रधानं यदच्छाशब्दप्राधान्ये उदाहरणं यथा–

विस्रम्भादुत्तमाङ्गं प्लवगबलपतेः पादमक्षस्य हन्तुः
कृत्वोत्सङ्गे सलीलं त्वचि कनकमगस्याङ्गमाधाय शेषम्।
बाणं रक्षःकुलघ्नं प्रगुणितमनुजेनादरात्तीक्ष्णमक्ष्णोः
कोणेनोद्वीक्षमाणस्त्वदनुजवदने दत्तकर्णो यमास्ते।।

विस्रम्भादित्यादीनां मैत्रीप्रधानवालिहननपूर्वकसाम्राज्यदातत्वबलाच्चेत्युक्तम्। अक्षस्य यो हन्तेत्येकाकिनापि येनाशोकवनिकाविप्लोषणं राक्षसबलक्षपणं च कृतं, सो पि यत्र प्रधानप्रकृतिर्भवतीत्युक्तम्। त्वचीति प्रहतमारीचवत्तान्तः। बाणमित्यादिना तत्रैवास्य बहुमान इत्युक्तम्। राक्षसविषयदैववैगुण्यमित्युक्तम्। अत्र च यत्र यद्व्यापारस्तत्र प्राधान्यस्य का कथेति। प्रगुणितमिति बहुतररणसंमर्दधुरन्धरतया कुटिलीकृतस्यापि क्षेत्रबहुमाने पुनर्योजनम्। **त्वदनुजवदन** इति भेदोपायकृता नीतिसंपत् परपक्षे च विपर्ययम्। **दत्तकर्ण** इति तदाकर्णनमात्रमेतत्, न तु हृदये निर्व्याजं तेजोजाज्वल्यमानौजसि भेदं प्रतिको प्यस्य बहुमानः। **अय**मिति गम्भीरधीराकृतिः प्रत्यासन्नश्चास्त इति। यद्यपि प्रकृते नापि कश्चित्क्षोभो त एवोक्तं सलीलमिति। अत्र चार्थस्यालङ्कारघटनाप्रयासमन्तरेणैव सुन्दरत्वं लक्षणकृतमेव।

ननु साभिप्रायमात्रत्वं नामार्थस्य तु गुण ओज इत्युक्तम्। शोभाः सहृदयाः अर्थो जडस्तस्याभिप्राय इति कथं, भाषावक्तृश्रोत्रोः स इति चेत् तद्गतो र्थस्य गुण इति कथम्।

अथ वस्त्वन्तराक्षेपकत्वमेव तस्य स गुण इत्युच्यते तद्वस्त्वन्तरमाक्षिप्यं वक्त्रभिप्रायरूपमेवाक्षेपकत्वमपि कविमनीषाव्यापारबलादेव तथाविनिवेशनात्, प्रकारायोगे तथाभावात्। अत एव प्रौढिर्वस्तुतो वक्तृगतैव नान्वर्थे काममुपचर्यतामित्यलं बहुना।

एतेषां च लक्षणानां संकीर्णत्वेन लक्ष्यं दश्यते बाहुल्यापेक्षया तूदाहरणं मन्तव्यम्।

अथ शोभा– सिद्धैरर्थैरिति। यथा–

मेदश्छेदकृशोदरं लघुभवत्युत्थानयोग्यं वपुः
स वानामपि लक्ष्यते विकृतिमच्चितं भयक्रोधयोः।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्या हि व्यसनं वदन्ति मगयामीदग्विनोदः कुतः।।(शाकु २.५)

अत्र पादत्रयेण प्रसिद्धा एवार्था अभ्यसनीयत्वेन शोभमानास्तैः समविकलं मगयालक्षणमर्थं कृत्वा अप्रसिद्धो नुचितो पि सो र्थ उचितो विचित्रश्च निरूपितः। न चात्रालङ्कारः कश्चिदिति कविव्यापारेण यः शब्दार्थव्यापारादेवार्थघटनात्मा तत्कृतं हृद्यं लक्षणार्थमेव। अशोभनो प्यर्थो मुना नयेन शोभत इति शोभेयमुक्ता।।

अथाभिमानः– **धार्यमाणस्तु बहुभि**रिति। यथा ममैव–

शीतांशोरमतच्छटा यदि कराः कस्मान्मनो मे भशं
संप्लुष्यन्त्यथ कालकूटपटलीसंवाससंधुक्षिताः।
किं प्राणान् न हरन्त्युत प्रियतमासंजल्पमन्त्राक्षरै–
र्वार्यन्ते किमु यद्विमोहविवशात्सन्तापतन्त्रा स्थितिः।।

अत्र हि तादश्यर्थस्यार्थेन घटना कृता यस्यां कार्ययुक्तिभिः फलयोजनाभिधार्यमाणो हृदये स्थाप्यमानो नावतिष्ठत इति। वार्यमाणो पि वा न निवर्तते। तवायं बद्धः। तथाभूतो र्थो लौकिकत्वात्तावानुपायः कविनालङ्कार उपमानोपमेयभावस्य कथंचिदप्यस्वीकारात्केवलं वक्तुरभिमतं वदता किमिव मयाप्येवं तदपि नैवेत्यभिधानमभिधानाख्यलक्षणम्। एतदेव सादश्यनाम्नाप्यन्यैरुक्तम्।

दष्टश्रुतानुभूतार्थकथनादिसमु वम्।
सादश्यं क्षोभजननं सारूप्यमिति संज्ञितम्।। इति।

अमतकरत्वं हि चन्द्रस्य श्रुतं कालकूटसहोदरत्वं च, मन्त्राणां विषशमनं दष्टं, स्वयमनुभूतं मोहादि तत्समुद्भवं यत्प्रकृते सादश्यं तेन लोकदष्टेन तुल्यवत्तान्तत्वं तत्क्षोभं हृदये नवस्थानं जनयति– यद्यमतसदशश्चन्द्रपादाः तत्किमेवमङ्गं विदध्युरिति। एवमन्यत्।

अथ गुणकीर्तनं– **कीर्त्यमानैर्गुणै**रित्यादि। (यथा)–

पथुरसि गुणैर्मूर्त्या रामो नलो भरतो भवान्
महति समरे शत्रुघ्नस्त्वं तथा जनकः स्थितौ।
इति सुचरितैर्मूर्तिं बिभ्रच्चिरन्तनभूभतां
कथमसि न मान्धाता देवस्त्रिलोकविजय्यपि।।

अत्र हि विविधा ये हि पथुरामप्रभतयो वा समु वैर्गुणैः कीर्त्यमानैस्तद्गता दोषा न परिकल्प्यन्ते। तथा हि पथुरसीत्युक्ते तथा दोषा अपि केचिद्बलाद्भूमिदोहनप्रभतयः प्रतीयेरन्, नलो सीति द्यूतव्यसनितापि। एवमन्यत्र। अत एव न दोषो त्र प्रधानम्। गुणैरिति सुचरितैरिति निरूपिते तु चारुत्वमिति गुणकीर्तनं नाम लक्षणम्। श्लेषानुग्राहित्वे स्थिते लक्षणानि ह्यलङ्कारानपि चित्रयन्ति। तदग्र एव वक्ष्यामः। अन्यत्र पाठः–

लोके गुणातिरिक्तानां बहूनां यत्र नामभिः।
एको हि शब्द्यते तत्तु विज्ञेयं गुणकीर्तनम्।। इति।

अयं स्पष्टार्थः।

अथ प्रोत्साहनं– **उत्साहजननै**रिति। औपम्यस्य संश्रयणमन्वेषणं यत्रेति अनेन, यत्नान्वेषणे पि तस्य भाव इति दर्शितम्। यथा भट्टेन्दुराजस्य–

हरवषभ तवैव तस्य माता जयति जगत्यसमानसूतिरेका।
निवसति परमेश्वरो पि यस्मिन् सहतनयः सगणः सहावरोधः।।

अप्रस्तुतप्रशंसाप्यत्र तद्वैचित्र्यं प्रोत्साहनत्वलक्षणकृतमेव, केवलं त्वियं यथालक्ष्मीरिति, स च भवान् मुरारिरित्यादि। इदमन्यत्र प्रियवचनमिति पठितम्–

यत्प्रसन्नेन मनसा पूज्यान्पूजयितुं वचः।
हर्षप्रकाशनार्थं तु सा प्रियोक्तिरुदाहृता।। इति।

अथोदाहरणं– **यत्रैकस्यापी**ति। यथा–

वल्मीकं किमुतोद्धतो गिरिरयं कस्य स्पशेदाशयं
त्रैलोक्यं तपसा जितं यदि मया दोष्णा किमेतावता।
सर्वं साध्वथवा रुणत्सि विरहक्षामस्य रामस्य चेत्
त्वद्दन्ताङ्कितवालिप(क?)क्षरुधिरक्लिन्नाग्रपुङ्खं शरम्।।

अत्र हि रावणीयदशितिपरिधट्टित (वालिकक्ष)पाटने उदाहृते स स्वावमानो र्थे वगते त्यागः तत्राप्रतीकारः पुनराभिमानो दर्प इत्यादि गम्यते। अक्षरसंहतेश्च विशेषः– तत्रावयोपादातव्यशब्दान्तरस्थाने शब्दान्तरोपादानं हनूमत इति वक्तव्ये क्षस्य हन्तुरिति, इह तु त्वद्दन्तेति तदीयाधिकारोदाहरणम्। अन्ये पठन्ति–

यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात्।
साध्यन्ते निपुणैरर्थास्तदुदाहरणं स्मतम्।। इति।

तुल्यैरर्थैस्तत्समयभाविभिर्यदुक्तं यद्वाक्यमिति स एव फलतो र्थः।।

अथ निरुक्तं– **निरुक्तं द्विविध**मिति। सिद्धिर्लक्षणेन स्वीकारः। तया प्रसाधितं तथ्यं, ततो न्यदतथ्यम्। उदाहरणं यथा ममैव–

वीरोत्सवे सङ्गरसीम्नि मूढं यः प्रापयत् सत्यपथं कथंचित्।
सत्यार्जुनः सो पि च नाम कृष्णः प्रसिद्धिरित्थं वितथैव सर्वा।।

परस्परं नाम्नोरन्यत्र तथ्यत्वं स्वविषये त्वतथ्यतेति। न चायमर्थः श्लेषः, स हि तुल्यसंख्ययोः। यथा ''गावो वः पावनानां'' इति गोशब्दस्य रश्मिषु सुरभिषु चानादित्वेन प्रसिद्धेः। इह त्वेकत्रान्यत्वे कृतः समय इति। एवं पथक्तथ्यातथ्ययोरुदाहार्यम्। अन्यत्र पाठः–

निरवद्यस्य वाक्यस्य पूर्वोक्तार्थप्रसिद्धये।
यदुच्यते तु वचनं निरुक्तं तदुदाहृतम्।।

पूर्वं यत्प्रोक्तो बाह्यस्य संबन्धी कश्चिदर्थस्तस्य प्रसिद्धये वद्यभावस्य वाचकं यदुच्यते तेन निरुक्तमिति निरर्थकमेवात्र वाच्यम्। यथा सत्यं सराजगतिषु र जनादिति (?)।

अथ गुणानुवादः– गुणानुवाद इति परिमितस्यापादितोत्कृष्टगुणेतयोपमा, तत्कृतो गुणानामुत्सेकः। यथा–

पालिता द्यौरिवेन्द्रेण त्वया राजवसुन्धरा।।

ननूपमेयमलङ्कारः, किमतः, उक्तं ह्यलङ्काराणां वैचित्र्यं लक्षणकृतमेव। एत एव शिक्षितैरपि दण्डिप्रभतिभिर्ये निरूपिता उपमाभेदाः, तत्र यो भेदकों शः

आचिख्यासासंश्रयनिर्णयादिरर्थः, स तादक्पथगलङ्कारतया गणितः। गणने पि वा संसष्ठिसङ्करापत्तिः। अर्थमात्रं तदिति चेत् तर्हि तदेवलक्षणम्। यथा हि राजता विभज्य विचार्यमाणा इत्थमवतिष्ठते– मकुटाद्यलङ्कारः शौर्यादिगुणो व्यूढोरस्कत्वादिलक्षणसमुदायो राजालङ्कार्यश्च गुणवांश्च लक्षणीयश्च, तथा काव्यमपि तेन गुणालङ्कारव्यतिरिक्ताः सर्वे लक्षणमिति मन्तव्यम्। ''अस्त्युत्तरस्यां'' इति हि पूर्वार्धे आख्यानं नाम लक्षणम्। नन्वेवं सर्वत्र लक्षणयोगः, क आक्षेपार्थः प्रियमेवास्माकमदः तत्सर्वमलङ्कारयुक्तं काव्यम्। ननु गौर्वाहीक इति रूपकयोगे पि, किं न काव्यम्? दोषपरिवर्जन गुणवत्त्वरसवत्त्वादिवैकल्यादिति चेत्, अस्मास्वापादितो दोषस्त्वयैवोन्मूलित इत्यास्ताम्।

अन्यत्र तु पाठः–

गुणाभिधानैर्विविधार्थप्रयोजितैः।
गुणातिपातो मधुरैर्निष्ठुरैर्वा भवेदिह।। इति।

मधुरैर्गीतैः (गुणैः) निष्ठुरैर्वा उत्तमैर्वा उपमानभूतैर्ये प्रयाजिता गुणास्तदभिधानैरुपलक्षितो गुणनिपात इत्यर्थः।।

अथातिशयः– **उत्तमार्थाद्विशिष्ट** इति उक्तादप्यर्थाद्विशेषो। यथा भट्टेन्दुराजस्य

यावन्त्येव पदान्यलीकपिशुनैरालीजनैः शिक्षिता
तावन्त्येव कृतागसो द्रुततरं संपाद्य पत्युः पुरः।
प्रारब्धपरतो यथा मनसिजस्येच्छा तथा वर्तितुं
प्रेम्णा मौग्ध्यविभूषितस्य सहजः को प्येष कान्तः क्रमः।।

अत्रेर्ष्यात्मा यः प्रेमण्युत्तमे र्थस्ततो पि विशेष उक्तः। प्रतिपदं चाभिप्रायो स्ति स विवेचनीयः। न चेयमतिशयोक्तिः संभाव्यमानत्वात्। सो पि वा लक्षणेनालङ्कार इति वक्ष्यामः समनन्तरमेव। अन्यत्र तु पठ्यते–

बहून् गुणान् कीर्तयित्वा सामान्यजनसंभवान्।
विशेषः कीर्त्यते यत्र ज्ञेयः सो तिशयो बुधैः।। इति।

अथ सहेतुः– बहूनां **भाषमाणाना**मिति। बहून् भाषमाणाननादत्यैकस्यासाधारणस्यार्थस्य निर्णयः कर्तव्यत्वेनावलम्ब्य सिद्धस्य प्रमाणोपमानवचनमुपक्षेपवचनं मम तावदेवं प्रतिभासते इति सहेतुः। यथा भट्टेन्दुराजस्य–

एके वारिनिधिप्रवेशमपरे लोकान्तरालोकनं
केचित्पावकयोगिनं निजगदुः क्षीणे ह्यि व चन्द्रार्चिषाम्।
मिथ्या चैतदसाक्षिकं प्रियसखि प्रत्यक्षतीव्रातपो
मन्ये हं पुनरध्वनीनरमणीचेतो धिशेते रविः।।

(एकस्येति) एकमसाधारणम्। (**सिद्धोपमानेति**) डुमिञ् प्रक्षेपणे इत्यस्योपमानम्। अन्यत्र पाठः–

यत्प्रयोजनसामर्थ्याद्वाक्यं शिष्टार्थसाधनम्।

समासोक्तं मनोग्राहि स हेतुरिति संज्ञितः।। इति।

सम्यगस्यते ह्रदि क्षिप्यते येन स समासः उपपत्तिस्तयोक्ता।

अथ सारूप्यं– **अपदेशस्तु परोक्षे यस्मादुत्पद्यते नुकरणेने**ति। यथा ममैव–

सैन्दूरीकृतसान्द्रकुङ्कुमरसप्रच्छायमालोच्यते
यत्प्राच्यां दिशि वक्रिमा पदमिदं दग्द्वन्द्वलेह्यं महः।
तत्तेजो जरठांशुतां कलयता भाविप्रवासावधिं
सन्ध्यामुग्धवधूकपोलफलके कीर्णो नखाग्राङ्कुरः।।

अत्र यदिति निर्देश्यं परोक्षवस्तु त वस्यापरिज्ञानात्। अनुकरणेन प्रच्छायमात्रेण, अपदेश्यमालोच्यमिति लक्षणेन सैन्दूरीकृतेत्यादिना। समानं सप्रमाणकं करणं दर्शनक्रिया यस्य तादशे वस्तूनि सारूप्यं लक्षणम्। पौर्णमास्यामपि वक्ररेखेवेन्दोर्भागो लक्ष्यते उदयाचलान्तरितत्वात् सन्ध्यासमये। न चेयमुपमा उपमेयस्याभावादुपमेयमेव हि पूर्वार्धेन लिंग्यते। पुस्तकान्तरेषु तु पाठः–

यथादेशं यथाकालं यथारूपं च वर्ण्यते।
यत्प्रत्यक्षं परोक्षं वा दष्टं तद्वर्णतो पि च।। इति।

प्रत्यक्षं वस्तु परोक्षमिव देशकालरूपानुसारेण वर्ण्यते।

अथ मिथ्याध्यवसायः– **अभूतपूर्वैर्यत्रार्थैरि**ति। अपारमार्थिकैरेवार्थैस्तत्तुल्यस्या––वस्तुभूतस्यार्थान्तरस्य यस्य वक्तव्यापारे सति निश्चयः सो यम्। यथा ममैव–

यो दुर्जनाद्वाञ्छितसिद्धिमीहते स नूनमुत्क्रामति तं सुखैधिनम्।
जुह्वज्ज्वलाग्नौ विगतार्थमण्डलं प्रसह्य षष्ठं विषयं प्रसाधयेत् (?)।।

काव्यलक्षणमित्यनेन काव्येषु लोकविपर्यासबाहुल्यमवश्यं भवतीति दर्शयति। अन्ये तु पठन्ति–

विचारस्यान्यथाभावस्तथा दष्टापदष्टयोः।
सन्देहात्कल्प्यते यत्र सविक्षेपो विपर्ययः।।

विचार्यत इति विचारो र्थः अदष्टमित्यर्थः। सन्देहो त्र भ्रमः, अथवा अन्यथाभावो विपर्ययः। संशयो पि हि वस्तुतां विषयत वमन्यथाकारं दर्शयन् विपर्यय एव।।

अथ सिद्धिः– **बहूनां च प्रधानानामि**ति। प्रसिद्धानां मध्ये एकमित्यप्रसिद्धं यन्नाम कीर्त्यते तस्यासाधारणत्वस्य प्रयोजनस्य संपत्तये करणं तत्र निवेशनं यस्य तादक् तत्कीर्तनं सिद्धिहेतुत्वात्सिद्धिः। यथा–

भद्रेश्वरः सुरसरित्स भवानहं च
त्रैलोक्यसारमिह संप्रति जीवलोके।
भद्रेश्वरः सुरवरेषु सरित्सु गङ्गा
त्वं पार्थिवेष्वहमतीव सुदुःस्वितेषु।।

अत्र भवानहं चेत्यप्रसिद्धं प्रसिद्धमध्ये उपात्तं साधारण्यसिद्धिं विधत्ते।

अथ पदोच्चयः– **गुणैर्बहुभिरेकार्थै**रिति। एकतात्पर्यार्थनिष्ठैर्बहुभिः शब्दैर्ये वाच्यत्वेन स्वीकृता धर्मास्तदुपलक्षितत्वेनैव यद्वस्तुनः प्रशंसनम्। कथं, नानार्थैर्ग्रथितात्मकमुपलम्भितरूपं कृत्वा तत्पदानामुच्चय उत्कर्षेण चयः बाहुल्यं यत्रेति पदोच्चयः।

असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं जननयननिर्माणमफलम्।
अदर्पं कन्दर्पं मरणशरणं बान्धवजनं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः।।

अत्र ह्यवान्तरावगमकारिणामवान्तरवाक्यरूपाणां पदानां तात्पर्यमभिन्नं स्वार्थे तु भिन्नम्। पदशब्दन्तु। अन्ये पठन्ति– पादो भाग इति।

पूर्वत एवार्थः।

अथाक्रन्दना– **आत्मभावमुपन्यस्ये**ति। तीव्रः साक्षादवाच्यो यो र्थस्तस्य परं प्रति सादश्ययोजनप्रकारैरात्मभिप्रायं प्रमुखे दत्त्वा तत्समन्ततः भाषणं स्फुटकथनं तन्निजभावाविष्करणप्रधानत्वादाक्रन्दो नाम लक्षणम्। यथा ममैव–

किं पान्थ त्वरसे विलोकय (निशां या ह्युन्मुखी) पाण्डुरा
चन्द्रं चुम्बितुमीहते प्रकटयन्त्यग्रे सरागां स्थितिम्
यद्वा नागरभोगदुर्ललितकैर्न्यस्तापि न ज्ञायते
ग्रामे ग्राम्यजनोपभोगसुभगं निर्व्याजरम्यं सुखम्।।

अत्रोत्तरेणार्धेन ग्रामीणो रम्यतमो भोजनशयनादिसंभोग इति वक्त्र्या मोहप्रायो वाच्य आत्माभिप्रायः। तदरोचकत्वं तदुभयं प्रमुखे निधाय निशाकरवत्तान्तसादश्येन तीव्रः स्वात्मानुराग आविष्कृतः। अन्ये पठन्ति–

रूपकैरुपमाभिर्वा तुल्यार्थाभिः प्रयोजितैः।
अप्रत्यक्षार्थसंस्पर्शस्तुल्यतर्कः प्रकीर्तितः।।

प्रथमार्धेन परसादश्यमुक्तम्। अप्रत्यक्षस्यात्मभावस्य संस्पर्शनाज्ज्ञापनेत्यर्थः।।

अथ मनोरथः– **हृदयस्थस्य भावस्ये**ति। यथा–

णिग्गंध दुरारोहिं पुत्तअ (मा) पाडळिं समारूढ।
आरूढणिपडिआ के इमी ए ण कआ इह ग्गामो।।

अत्र पादपामारोहन्नेव वद्धविदग्धया कश्चिद्दुराशयपुंश्चलीसंगमोत्सुकः स्वाभिप्रायद्योतनेन प्रबोध्यते, तत्प्रस्तुतमेवान्यदपदिश्य। अत एवाप्रस्तुतप्रशंसा, सापि चात्रैवान्तर्भूता। नन्वलङ्कारे ह्यलङ्कार्यत्वं ह्यसत् इति केयं युक्तिः, लक्षणं तु भवति लक्षणत्वादेव।।

अथाख्यानं– **पष्टैरपुष्टैरपि चे**त्यादि। प्रश्नपूर्वका यत्र बहवो निर्णीयन्ते यथा ''बाले नाथ विमु च मानिनि'' इत्यादावुक्तिप्रत्युक्तौ, प्रश्नसदशैर्वा शक्याशक्यवस्त्वभिधानैर्यत्र निर्णयः। यथा–

रामो सौ भुवनेषु विक्रमगुणैर्यातः प्रसिद्धिं परां

इत्युक्ते यदि प्रसिद्धः कथं मया न ज्ञायत इत्याशंक्याख्यातं–

अस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति किम्।

किं तस्य प्रसिद्धौ निदानमित्याशंक्य पुनराख्यातं–

वन्दी वैषयशांसि इत्यादिना।

नाटकाश्रयमित्यनेन भूयो लक्ष्यमाणस्येत्याह। अन्ये पठन्ति–

वाक्यैः सातिशयैर्युक्ता वाक्यार्थस्य प्रसाधकैः।

लोकप्रसिद्धैर्बहुभिः प्रसिद्धिरिति कीर्तिता।।

स्पष्टम्।।

अथ याच्ञा– **आदौ यत्क्रोधजननमि**ति। प्रथमार्धेन हितं व्याख्यातम्। तेन प्रथमं यत्तदात्वे परुषमायत्यां च सत्फलं वस्तूच्यते, ततश्च प्रियम्। पुनः शब्दात्ततो हितं पुनः प्रियमित्येवं प्रबोध्यस्य प्रबोधधिया याचनाद्याच्ञा। यथा ममैव–

भूमिः कण्टकीनी पुरो विटपिनः प्रायो बहूपद्रवाः

भूयश्चैष दिवाकरो मगयते सन्ध्याङ्गनासङ्गमम्।

तद्विश्रम्य जनो यमत्र सदने ग्राम्योचितं सेवतां

प्रातः पान्थ विचार्य चेतसि चिरं स्थातासि गन्तासि वा।।

पाठान्तरं तु–

हितैः प्रसन्नवचनैर्यत्परस्यानुवर्तनम्।

क्रियते वाक्यचेष्टाभिस्तद्दाक्षिण्यमुदाहृतम्।। इति।

अथ प्रतिषेधः– **कार्येषु विपरीतेष्वि**ति। यथा अमरुकस्य–

लग्ना नांशुकपल्लवे भुजलता न द्वारदेशे र्पिता

नो वा पादयुगे तया निपतितं तिष्ठेति नोक्तं वचः।

काले केवलमम्बुदालिमलिने गन्तुं प्रवत्तः शठः

तन्व्या बाष्पजलोपकल्पितनदीपूरेण रुद्धः प्रियः।।

अत्र ततीयपादेन विपरीतकार्यप्रवत्तिरुक्ता। आद्यार्धेन कार्यज्ञत्वं नायिकायाः, तथापि निवारणं तुर्यपादेनोक्तम्। अन्ये त्वधीयन्ते–

यद्वाक्यं वाक्यकुशलैरुपायेनाभिधीयते।

सदशार्थाभिनिष्प या स लेश इति कीर्तितः।। इति।

वाक्यमिति वाक्यार्थो निषेधो वा नदीपूरश्च वर्षासु रोधको दष्ट इति सदशाभिधानेनोपायेन निषेधः कृतः।।

अथ पच्छा– **यत्राकारो वैवाक्यैरि**ति। यथा–

किं भीमाद्गुरुदक्षिणां गुरुगदाद्भीमप्रियः प्राप्तवान्। इत्यादि

अत्राकारेणाभिप्रायसूचकेन काक्वादिनोद्भूतानि द्योतितशक्तिकानि वाक्यानीति भावः। यत्र भावरसोपेतमित्यन्ये प्राच्यं पादमधीयन्ते।।

अथ दष्टान्तः– **विद्वान्पूर्वोपलब्धौ यत्समत्वमि**ति। यथा ममैव–

हा हलाहललेहने हतमतिः सो यं समुत्कण्ठितो
गाढाङ्गारगरिम्णि चैष जडधीर्देहं निविक्षेप्स्यति।
ग्राम्यो प्याजगरीं गुरुं गलगुहां मोहादयं धावति
व्याधूयेतरसङ्गतानि यदयं सार्थं खलैः खेलति।।

यदयमित्यादि कस्य हेतोर्हालाहलकालकूटकबलनादिना येन साम्यं कृतं स दष्टान्तः। न चेयमुपमा, यतो निदर्शनेन प्रत्यक्षीकरणाय कृत इत इदमेवं कर्तुमुद्यत इति, न च रूपकं यदेतत्करोति तत इदमस्य भविष्यतीति भिन्नकालत्वात्, तदाह पूर्वोपलब्धौ सत्यमिति।

अथ भासनं– **अनेकयुक्ति यद्वाक्यमि**ति। यथा–

''कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सो भिमानी'' (वेणी) इत्यादि। भास्यते प्रकृतः क्रोधादिर्येन। पाठान्तरं–

ईप्सितार्थप्रसिद्ध्यर्थं कीर्त्यन्ते यत्र सूरिभिः।
प्रयोजनान्यनेकानि सा मालेत्यभिसंज्ञिता।। इति

अथ संशयः– **अपरिज्ञातत वार्थमि**त्यादि। यथा–

तिष्ठेत्कोपवशात्प्रभावपिहिता दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्या मनः।
तां हर्तुं विबुधद्विषो पि न च मे शक्तः पुरोवर्तिनी
सा चात्यन्तमगोचरं नयनयोर्यातेति को यं विधिः।। (विक्रमो. ४–२)

अत्राद्यो भागः संशयोदाहरणं, अनन्तरस्तूपप युदाहरणम्।

अथाशीः– **यथाशास्त्रार्थसंपन्ना**मित्यादि। यथा–

'पादाग्रस्थितया' (रत्ना. १–१) इत्यादि। सर्वं वचनं न चाशरीरलङ्कारः स्तुत्या एव वर्णनीयत्वात्। अन्ये पठन्ति–

यत्रार्थानां प्रसिद्धानां क्रियते परिकीर्तनम्।
परापेक्षाव्युदासार्थं तन्निदर्शनमुच्यते।। इति।

प्रसिद्धानां देवतादीनां परापेक्षा साध्याकांक्षा तस्माद् व्युदासस्तत्संपत्त्या। अत एव दष्टान्तादस्य भेदः इति।।

अथ प्रियं– **आदौ यत्क्रोधजनन**मिति। यथा–

किं वक्तान्तैः परगहगतैः किं तु नाहं समर्थः
तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः।
गेहे गेहे विपणिषु तथा चत्वरे पानगोष्ठ्यां
उन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः।।

अत्र भ्रमति वल्लभेत्यादौ क्रोधजननं हन्त कीर्तिरिति हर्षकृत्। अन्ये पठन्ति–

वाच्यमर्थं परित्यज्य दष्ट्यादिभिरनेकधा।
अन्यस्मिन्नेव पतनादाशु भ्रंशः स उच्यते।। इति

दष्टिदर्शनं प्रकृतिमुखरादिवाक्यमिति पूर्वोक्तमित्यर्थः। न चेयं व्याजस्तुतिः निन्दाभागे स्तुतेरभावात्, पूर्णतायास्तु निन्दाया अभावात्। यथा वा–

''प्रद्योतस्य सुता'' इत्युक्त्वा वसन्तकं विप्रतारयितुं राजा वसन्तशब्दमाचष्टे। मधोश्च समयः प्रसूनसमय इत्यनादत्य तदाकर्णने निवत्त्यङ्कुरेण हृष्यति विदूषके समय, इतिशब्देनान्यत्र पतनात्प्रणयक्रोधत्वं चेति प्रियवचनम्। प्रियकार(?) इति लोक एतत्सिद्धम्।

(अथ कपटं– **छलयुक्त्ये**ति। व्याजप्रयोगेण अभिसन्धानं व चना अभिभावकं तिरस्कारकं छलोक्त्या कथितस्यार्थस्यान्यथाग्रहणं अपलापो वा कपटं, तस्य सङ्घातो लक्षणम्। कपटो वस्तुक्रमाद्दैवाच्छत्रोर्वा समुद्भूतः। वस्तुक्रमोद्भूतस्य मालतीमाधवे मकरन्दस्य मालतीवेषधारणं, दैविकस्य नागानन्दे जीमूतवाहनस्य शङ्खचूडच्छलनं, शत्रुकृतस्य तु छलितरामे लवणासुरप्रयुक्तयो राक्षसयोर्मन्थराकैकेय्योर्वेषधारणं सीताया अन्तर्वत्न्या निर्वासनं च कृतम्। यथा वा कृत्यारावणे प्रथमे ङ्के सीतावेषधारिण्या शूर्पणखया लक्ष्मणो वञ्चितो भिभूतश्च ''ता सव्वहा अण्ण एव्व दे अणिट्ठं अभिप्पाअं लक्खेमि'' इत्यादिना वचनेन।) अन्ये पठन्ति–

यत्र संकीर्तयन्दोषं गुणमर्थेन योजयेत्।
गुणातिपाताद्दोषं वा गर्हणं नाम त वेत्।। इति

तत्त्रिविधमपि वागुपचारसामान्याच्छलमत्र स्वीकृतम्।

अथ क्षमा– दुर्जनोदाहृतैरिति। दुर्जनोक्तैर्वचनैः क्रोधजननैः सभायां ताडितो पि यः पुरुषो क्रोधेनः क्रोधहीनः स एव क्षमावान्। तद्वर्णनोचितः कविव्यापारः क्षमेत्यर्थः। अनेन च यथोचिताभिन्नवत्तिसंचयः सर्वो विभावाद्युचितो निर्वर्त्यमानः काव्यलक्षणत्वेन सूचितः। क्षमा यथा ममैव–

श्रोत्राय दुष्टवचनं प्रति किं न कोपः
क्षोभं करोति हृदये ननु कोप एव।
मित्रं ममैष तु निजात्मनि यो पकारं
कृत्वा ममाशुभकलङ्कविघातहेतुः

अन्येषां पाठः–

सिद्धान् बहून् प्रधानार्थांस्त्यक्त्वा यत्र प्रयुज्यते।
विशेषयुक्तं वचनं विज्ञेयं तद्विशेषणम्।।

सिद्धानिति लोकप्रसिद्धान्प्रधानभूतानशक्यापजयांस्त्यक्त्वानादत्यक्रोधाद्यद्वचनं विशेषेण युक्तं, यथा ''ममायं परम्परः (परिवादः?) सुहृत्प्रत्ययः स्वात्मनि क्षोभः पुण्यादिकमुररीकृत्यापि ममापुण्यसंचयं दुःखोपभोगदानेन शमयति'' इति।

अथ प्राप्तिः– **दष्ट्वैवावयवं कंचिदि**ति। यथा–

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात्।
द्वारे स्य पाण्डुसिकते पदपङ्क्तिर्दश्यते भिनवा।। (शाकु ३–७)

अत्र पदपङ्क्तिलक्षणमंशं दष्ट्वानयात्र भवितव्यमिति शकुन्तलायाः सद्भावो नुमीयत इति।

अथ पश्चात्तापः– **अकार्यं सहसा कृत्वे**ति। सहसेत्यविचार्य अकार्यं कृत्वा यथा– अंगुलिशुकाहमिस इदोसल उप्पन्ना। जस्सकबलजो भूतभूहि भुव ओहिण्णो।।
कार्यमकृत्वा यथा–

मुखमंसविवर्तिपक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तत्। इति। शाकु।

अन्ये पठन्ति–

अनेकार्थविचारस्तु विचारः परिकीर्तितः।। इति।

अनेकस्य कार्यरूपस्यार्थस्य (कृता)कृतस्य विचारः किमेतत्कृतमिति।

अथानुवत्तिः– **प्रश्रयेणार्थसंयुक्त**मिति। यथा भट्टेन्दुराजस्य–

राज्ञा यद्यनुरुध्यसे यदि भवेद्वाच्यं पुरो मादशां
तत्संक्नन्दनगोप किंचन मनाक् संचूर्यमाणश्चिरं
कं प्रत्याययितुं प्रयासरसिको यत्नेन रत्नायसे।।

अप्रस्तुतप्रशंसात्वे पि हि यदप्रस्तुतस्य शरीरवैचित्र्यं तल्लक्षणकृतमेव, लक्षणं हि शरीरमित्युक्तम्। कटकाद्यैरपि हि यद्वैचित्र्यं कुशलसुवर्णकारोत्प्रेक्षितं तल्लक्षणमहिम्नैव। तत्तेनोपमानशरीरस्योपमेयशरीरस्य वा वैचित्र्यं लक्षणानामेव व्यापारः; इत्येवमुपमारूपकदीपकानां त्रयाणामलङ्कारत्वेन वक्ष्यमाणानां प्रत्येकं षट्त्रिंशल्लक्षणयोगात् लक्षणानामपि चेकद्वित्र्याद्यवान्तरविभागभेदादानन्त्यं केन गणयितुं शक्यम्, इदानीं शतसहस्राणि वैचित्र्याणि सहृदयैरुत्प्रेक्ष्यन्ताम्। परे त्वधीयते–

उभयोः प्रीतिजननो विरुद्धाभिनिवेशयोः।
अर्थः प्रसादजनको ज्ञेयस्त्वनुनयो बुधैः।। इति।

उभयोरत्र वक्तवाच्ययोस्तयोश्च विरुद्धाभिनिवेशः। एकस्य तत्त्वविश्रान्तता अपरस्य त्विषा रत्नवदाचरितमिति।

अयोपपत्तिः– **प्राप्तानां यत्र दोषाणा**मिति। प्राप्ता नामिति वीप्सागर्भो निर्देशः, दोषाणामित्युपपत्त्ययोगदष्टत्वेनावस्तुभूतानामित्यर्थः। यथा– ''तिष्ठत्कोपवशा'' दित्यादि। यथा वा–

क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयो पि दश्येत सा
दोषाणां प्रशमाय मे श्रुतमहो कोपे पि कान्तं मुखम्।
किं वक्ष्यपन्त्यकल्मषाः कृतधियः स्वप्ने पि सा दुर्लभा
चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्यो धरं पास्यति।।(विक्रमो) इति

अन्ये त्वधीयते–

परिगह्य तु शास्त्रार्थं यद्वाक्यमभिधीयते।
विद्वन्मनोहरं स्वन्तमुपदिष्टं तदुच्यते।। इति।

शास्त्रार्थशब्दः प्रमाणोपलक्षणम्। **स्वन्त**मिति शोभनो न्तो निश्चयो यत्र।

अथ युक्तिः– **साध्यते यो र्थसंबन्ध** इति। यथा–

लावण्यसिन्धुरपरैव हि केयमत्र
यत्रोत्पलानि शशिना सह संप्लवन्ते।
उन्मज्जति द्विरदकुम्भतटीव यत्र
यत्रापरे कदलकाण्डमणालदण्डाः।।

अत्र महद्भिरुत्कृष्टैर्नेत्रवदनादिभिः परस्परशोभात्मकानुकूल्योपलक्षितेन समवायेनैकविश्रान्त्यार्थः संबध्यमान उपपद्यमानो पूर्वतरङ्गिणीलक्षणः साधित इति योजनादियं युक्तिः। प्रतीयमानं रूपकमत्रेति चेत् किं ततः शरीरं लक्षण मयमेवेत्युक्तमसकृत्। एकीयः पाठः–

अभूतपूर्वो ह्यर्थो यः सादश्यात्परिकल्पितः।
लोकस्य ह्रदयग्राही सो भिप्राय इतीरितः।। इति।

अथ कार्यं– **यत्रापसारयन् दोष**मिति। दोषमपसार्य गुणं यदात्वे र्थनीये नियोजयति गुणाभिवादं वापसार्य दोषनर्थे योजयति आश्रित्य तेनार्थं योजयतीत्यर्थः। प्रथम उदाहरणं–

''तावत्स्वात्मनि संश्रितद्रुमलताश्लेषो ध्वगैर्वर्जनम्''। इत्यादि।

द्वितीये ममैव–

विश्वप्रभो वितरतां कमलां किमन्यद्
भूयात्स को पि घटितो भवतोपकारः।
दूराघ्वगेषु पुनरम्बु तथा विकीर्ण–
मन्ते यथा त्रिभुवने प्रसतं यशस्ते।।

एतत्कैश्चिद्गहनमित्युक्तम्। अन्ये त्वधीयते–

अर्थान्तरस्य कथने यत्रान्यो र्थः प्रतीयते।
वाक्यमाधुर्यसंपन्ना सार्थापत्तिरिति स्मता।। इति।

अत्र हि महांस्त्वयास्योपकारः कृतः, अध्वगानां च महदम्बु दत्तमित्युक्ते विश्वप्रभो इति पुनरिति पर्यालोचनादर्थान्तरस्यापत्तिः।

अथानुनीतिः– **अपूर्वक्रोधजनित**मिति। अपूर्वस्य सातिशयस्य क्रोधस्य जननाय यो पराधस्तम्। यथा–

प्रसीदेति ब्रूयामिदमसति कोपेन घटते। (रत्ना २–१६)

अन्ये पठन्ति–

वाक्यैः सातिशयैर्युक्तो वाक्यार्थः स प्रसाधकैः।
लोकप्रसिद्धैर्वहुभिः प्रसिद्धिरिति कीर्तिता।। इति।।

अथ परिदेवनं– **दोषैर्यदन्यनामोक्तै**रिति। यथा बालरामायणे दशरथनाम्ना ये दोषा उक्ता रामनिर्वासनादयस्तैरेव प्रसिद्धार्थैः सद्भिर्यत्प्रयोजितं वचनं परमार्थेन सम्बन्धो रक्षस एव युक्तो न तु दशरथे तत्परिदेवितं ''नरेन्द्रवद्धःस्त्रीवशं न्यस्तमयस।'' इत्यादिना। अर्थेन प्रयोजनेन ये न्यनामोक्ता अर्थाः प्रसिद्धार्थैर्यत्प्रयोजितं संवादितमन्यहृदये दोषाः संबन्धं संबन्धनं तच्चार्थेन सम्बन्धं परमार्थत उचितं तत्परिदेवितम्। यथा–

एनां पश्य पुरस्तटीमिह किल क्रीडाकिरातो हरो
गाण्डीवेन किरीटिना सरसभं चूडान्तरे ताडितः।
इत्याकर्ण्य कथाद्भुतं हिमनिधावद्रौ सुभद्रापते–
र्मन्दं मन्दमकारि येन निजयोर्दोर्दण्डयोर्मण्डनम्।।

तटावलोकनेन प्रयोजनेनात्र धन जयव्यापारो य उक्तस्तेन राजनि कस्मिंश्चिद्दोषसंबन्धो हृदये जनितः ''किं तुल्यमानुषत्वे र्जुनपराक्रमन्यूनता मम तत्किं मण्डनया अधिकारस्थानां ह्यद'' इति तत्र परमौचित्यख्यापनं प्रयोजनम्। अन्ये पठन्ति–

परदोषैर्विचित्रार्थैर्यत्रात्मा परिकीर्त्यते।
अनुक्तो न्यो पि वा कश्चित्स तु क्षोभ इतीरितः।। इति।

परस्य दोषो येभ्यस्तादशा ये विचित्रा अर्थाः परगुणास्तैर्हेतुभूतैरदष्टो प्यर्थ आत्मा अन्य इति दष्टत्वेन कीर्त्यते, अन्यो वा कश्चिदात्मव्यतिरिक्त इति क्षोभो हृदयसंचलनात्। इयमेवानुक्तसिद्धिः–

प्रस्तावेनैव शेषो र्थः कृत्स्नो यत्र प्रतीयते।
वचनेन विना जातु सिद्धिः सा परिकीर्तिता।। इति।
दोर्दण्डमण्डनाकरणे प्रस्तावादेव गम्यते पौरुषातिशयदर्पादिसर्वम्।
एष चोत्कृष्टानामेवाभिप्रायो भवतीति प्राप्यत्वादन्ते लक्षणमिदमुक्तम्।

एवं कविव्यापारबलाद्यदर्थजातं लौकिकात्स्वभावाद्विद्यमानं तदेव लक्षणमित्युक्तम्। तत्र शरीरकल्पस्यालङ्कारा अधुना वक्तव्याः। तन्निरूपयितुमुद्दिशति **उपमेत्या**दि। काव्ये तावल्लक्षणं शरीरं, तस्योपमादयस्त्रयो र्थभागे, यथा हि पथग्भूतेन हारेण रमणी विभूष्यते तथोपमानेन शशिना तत्सादश्येन वा कविबुद्धिच चलतया परिवर्तमानत्वात्पथक्सिद्धिनैव प्रकृतवर्णनीयवनितावदनादि सुन्दरीक्रियत इति तदेवालङ्कारः। तस्य च त्रिधा स्थितिः संपूर्णेन स्फुटेन उपमानोपमेयत्वेन। यत्र च वर्णानां संनिधिरूपमानोपमेयद्योतकसाधारणधर्माणां क्वचिदन्तर्लीनेनोपमानोपमेयमेकीक्रियते तत्र रूपकव्यवहारः। तत्र हि पदार्थे प्रयुज्यमानः शब्द इवार्थं गर्भीकरोतीति न्यायः। क्वचित्तु एकप्रघट्टकावस्थानबलादुपमागतिः, यथा दीपके। उपलक्षणंचैतद्वैचित्र्यान्तराणाम्।।

उपाध्यायमतं तु– लक्षणबलादलङ्काराणां वैचित्र्यमागच्छति तथा हि– गुणानुवादनाम्ना लक्षणेन योगात्प्रशंसोपमा, अतिशयनाम्नातिशयोक्तिः, मनोरथाख्येनाप्रस्तुतप्रशंसा, मिथ्याध्यवसायेनापह्नुतिः, सिद्धया तुल्ययोगितेति,

एवमन्यदुत्प्रेक्ष्यम्। लक्षणानां च परस्परवैचित्र्यादप्यनन्तो विचित्रभावः, यथा प्रतिषेधमनोरथयोः संमेलनादाक्षेप इति। उपमाप्रप चश्च सर्वो लङ्कार इति विद्वद्भिः प्रतिपन्नमेव।

तत्रोपमां लक्षयति यत्किंचिदिति। काव्यबन्धेषु काव्यलक्षणेषु सत्स्वित्यनेन गौरवि गवय इति नायमलङ्कार इति दर्शितम्। बन्धो गुम्फो, फणितिर्वक्रोक्तिः कविव्यापार इति हि पर्यायाः। लक्षणं त्वलङ्कारशून्यमपि न निरर्थकम्। भूयांश्चात्रोदाहरणमार्गो दर्शितः।

गुणशून्यं तु न काव्यं किंचिदपीयति च महापुरुषो दष्टान्तः अहेयत्वप्रदर्शनार्थमेवं हि प्रसादादीनां गुणवाचोयुक्त्या व्यवहारः तद्विना काव्यरूपत्वाभावात्। सुन्दरास्पदं तु शरीरमुपलक्षणमुपमाद्यन्तरेण तु भवत्येव काव्यमिति प्रकटीकर्तुमुपमादीनामलङ्कारत्वेन व्यवहारः, न तु लोक इव स्फुटात्र पथक् सिद्धिरस्ति। तथा हि दण्डिना काव्यशोभावहा धर्मा अलङ्कारा सर्व उक्ता इति केचित्। यत्किंचिदित्यनेनोपमीयत इति क्रियार्थः संबध्यते न कर्म। उप समीपे प्रेक्षणनिमित्तन्तरैरपि संभवतीत्यत आह **सादश्येने**ति। उपमीयत इत्यनेनोपमेय उक्ते सादश्येनेति साधारणो धर्मः, गुणः संबन्धः आक्रियते द्योत्यते अनेनेति गुणाकृतिः इवादिः शब्दः आश्रीयमाणो यस्यामिति (गुणाकृतिसमाश्रया)। अत्रोदाहरणानि क्रमेण दर्शयति, तेषु लक्षणयोजनं तुल्यं ते इत्यादिना।

एवमुपमानोपमेयसंख्याभेदेन तद्भेदानुक्त्वा तद्गतशरीरभेदेन शरीरभेदानाह **प्रशंसा चै**वेत्यादिना। उपमानस्य प्राशस्त्यात्प्रशंसोपमा। एवं सर्वत्र।

जङ्गमाः पर्वताः उपमानाभिमताः कल्पिताः अन्यस्य सादश्याभावात्। एवमत्र सदशेन कल्पितः सः। असदशीत्यन्ये पठन्ति, व्याचक्षते च सदश इहोपमेय उच्यते, तथा च व्युत्पत्तिः समान इव दश्यमानस्तमिवात्मानं पश्यतीति। यत्रोपमेयस्यैवोपमानता सेयं सदशी किंचित्सदशमित्थमुपमानं भवति। यत्र सादश्यगमकं स्फुटं पदं नास्ति न च सर्वात्मना रूपक इव वस्तुद्वयमीलनं तेन समासव्यंग्या किंचित्सदशीत्युक्ता। तदुदाहरति **संपूर्णे**ति। सप्तमी उपमानपूर्वपदस्येति समासबलादुपमानताप्रतिपत्तिः तत्र ह्युत्तरपदलोपः सन्नियोगशिष्टत्वात् क्यङि सलोप इव मत्तमातङ्गमनमिवगमनमस्या इत्युत्तरपदलोपो पि स एष लोके काव्ये च तद्भेदाः दश्यन्ते। ते लक्षणद्वारेणोक्ता इति ग्राह्याः स्वयं स्वीकर्तुं शक्याः। अस्मिन्ये नोक्तास्ते लोकात्काव्याच्च ग्राह्या इत्यन्ये, शेषा इत्यत्र पुनरुक्तम्।

अथ दीपकं– **नानाधिकरणार्थाना**मिति। नाना ये शब्दान्तरवाक्यपदात्मानस्तेषां, अधिकरणार्थानामाश्रये अर्थो र्थता येषां तथाभूतानां साकांक्षाणामिति तेषां यत्सम्यक् प्रकर्षेण दीपकमाकांक्षापूरकं क्रियागुणजात्यादि तद्दीपकं यत एकेनावान्तरवाक्येनासंयुक्तं सत्तथाकरोति ततो दीपकप्रकृतित्वात्तथोक्तमित्यर्थः।

अथ रूपकं– **स्वविकल्पेन रचित**मिति। स्वविकल्पेन यद्रूपं वदनस्य रचितं चन्द्रात्मकं तद्रूपयति परमिति रूपकम्। तस्य द्वौ भेदौ तुल्यैरवयवैः सर्वैरेवान्यरूपीकृतैर्युक्तं, यदि वा किंचित्सादश्ययुक्तं रूपितम्। अत्रापि किंचिदन्ये रूपसादश्याद्युक्तं रूपान्तररूपितं

यत्रैकदेशविवर्ति प्रसिद्धं द्रव्याद्यस्ति। य इति युक्तः पाठः। ततो हि समासोपमात्वं पद्मानना इत्यादेर्निवार्यते। हंसकुलानां नर्मसचिवत्वमरूपितमपि गम्यत इत्ययमंशो द्वितीयस्योदाहरणम्। अन्योन्यमिहेति पाठः, इवशब्दे तूपमाशंक्योत्प्रेक्षो वा। सा त्विह कल्पितोपमा। उपमांशस्यास्फुरणा याभिमानाख्यं लक्षणं सैवं यस्यालङ्कारकारैरलङ्कारतयोक्ता, तत्रोपमोद्भेदश्च तद्युक्तालङ्कारता भूष्यभूषकयोः पथगभावात्। नोचेत्तल्लक्षणमेव। तत्केचित्पठन्ति–

नानाद्रव्यानुरागाद्यैर्यदौपम्यगुणाश्रयम्।
रूपनिर्माण (वर्णना?) युक्तं तद्रूपक(मिति स्मतम्)।। इति

व्याकुर्वते च– रूपकशब्दस्यान्वर्थाख्यायकमेतत्, औपम्यस्य गुणत्वेन प्रधानतया संश्रयो यत्र तथा कृत्वा रूपस्य यान्यरूपेण निश्चित्य वर्णना तद्रूपकम्। कथं तन्निश्चय इत्याह नानाभूतेन पथग्भूतेनापि द्रव्येण यो नुरागः स्फटिकस्येव लाक्षया तत आदिग्रहणाद् भ्रान्तिगौणलाक्षणिकादिभेदानां ग्रहणम् (इति)।

एवमर्थविषयलक्षणप्रसङ्गेनार्थालङ्कारान् प्रदर्श्य शब्दालङ्कारस्वरूपमाह **शब्दाभ्यासस्तु यमक**मिति। तुरर्थालङ्कारेभ्यो व्यतिरेकमाह। शब्दशब्देनवर्णः पदं तदेकदेश इति सर्वं गह्यते। तेनानुप्रासः, लाटीयादेरनेनैवोपसंग्रहः। यमै द्वौ समजातावुच्येते तत्प्रकृतित्वाद्यमकम्। तेनैकस्याक्षरस्य पदस्य वा द्वितीयं सदशं निरन्तरं सान्तरं वा शोभाजनकमलङ्कारः। यथा मुक्ताफलस्योचितमुक्ताफलान्तरपद्मरागादेर्वोपाश्रयविशेषः समुचितसहासीनसत्पुरुषमध्यपतनं वा सत्पुरुषान्तरस्य। पादे **आदि**ग्रहणं तदा मध्यान्तादिषु विकल्पितवचनान्नास्त्यपि स्थापननियमो नुप्रासलाटीयादिसंग्रहायेत्याह। **विशेषदर्शन**मिति विशेषणामुद्देशलक्षणानामित्यर्थः। **अक्षर**मिति एकमनेकं च संहृतम्। रश्मीनां मण्डलमोघो यस्य। तपनीयमण्डलं सौवर्णं चक्रम्।

सारभूतानां जातीनां वधूनां युवतीनां संबन्धिनी। परिवारत्वेन स्थिता रामारामा सर्वैव स्त्रीव्यक्ता ईषत् स्फुटाकारा। चन्द्रवतीनां रजनीनां रात्रीणां संबन्धिनी यामंयामं सर्वप्रहरम्। स्मयते यतः पुष्पे विकसिते सभ्रमरके तद्विना वा विस्मयते। केतकीकुसुमव सुरौ दन्तावस्य सो यं, प्रकारकमाननं यस्य तादक् शोभते हस्ती। तथा केतकीकुसुमात्मकौ पाण्डुरौ दन्तौ यस्य तत्प्रवरकाननं हस्तिरूपं शोभते। ''अत्र चार्थभेदो मुनिना नादत'' इति तदप्रसिद्धम्। व्युत्पत्त्यादिना परहृदयं वेदितमस्माभिः।

द्वे शङ्गे यस्य विगतं शङ्गं यस्य। एते युधि संचिताः सङ्घीभूताः चितामाधिरूढाः। शत्रुभिः कर्तभिः खगैः शरैः अनुपुङ्खगैः पुङ्खान्तमग्नैः आहताः हताः। आहतप्रकारमाह– ताः छिन्नपक्षाः शैला इव खगैः गध्रादिभिः तलैः पक्षबाहुभिः निहताः भूयः। एतैरेव चिताः व्याप्ताः। ''निहतानामस्तं मरणं लान्ति तैर्निहतास्तलैः'' इति क्लिष्टत्वादुपेक्ष्यम्।

वारणपुष्पाणामयं संबन्ध्ययं कालः शरल्लक्षणः। वारणानां हस्तिनां अनामयं आमयाभावे सति समदत्वे सति वारणानां वारणं निवारणं विद्यते येषां तेषां शत्रूणामयं, कालः कृतान्तो थवा। रणानां संग्रामाणां कालः क्षेपः चिन्ताप्रवर्तयितेत्यर्थः।

लक्षणानां प्राधान्यमित्युक्तपूर्वं तत्तथैवोपसंहरति **एभिर्लक्षणै**रिति अर्थः क्रियायां रसचर्वणायां युक्तं योगं येषां, विभावादित्वं ह्येतत् प्रसादादीत्युक्तमधस्तात्। **अतःपर**मिति वक्तव्यान्तरमाह। केषुचित्पुस्तकेषु चैतद्ग्रन्थः पश्चाद्दश्यते, बाहुल्येन प्रथमं दश्यत इति तथैव व्याचक्ष्महे। तत्र पादानां वाक्यस्य तदर्थानां च यथा दशरथ इति वक्तव्ये बलात्परिकल्पितेन वस्तुतो पर्यायशब्देनाभिधानं 'अधिकनवविमान' इति। न हि यदच्छाशब्दाः पर्यायभाजः।

अर्थान्तरं यथा– ''चिन्तामोहमनङ्गमङ्ग तनुते विप्रेक्षितं सुभ्रुवः'' इति अत्र कामः स्वीकृतः चिन्तादिशब्देनावर्णनीयमपि वर्णितम्। यत्तु प्रसक्तानुप्रसक्तिकया बहुराप्रकृतवर्णनं तत्प्रबन्धदोषरूपं सन्धितदङ्गविधानेन पराकृतमिति नेह निरूपणार्हम्।

अर्थहीनं यथा– ''अद्यापि स्मरासि रसालसं मनो मे मुग्धायाः स्मरचतुराणि''। अत्रपूर्वापरव्याघातादसंबन्धता। यथा वा ''स महात्मा भाग्यवशान्महापथमुपागतः'' इति। अत्र हि सावशेषः प्रकरणापेक्षो वस्तुनिश्चयः, अभाग्यवशादित्यपि संभाव्यत्वात्।

भिन्नार्थं त्रिधा– तत्र मष्यो दूरसंबन्धव्यवधाने सति यत्रार्थो यथा–

ज्वरं भु जीतस जातमलपाकं चिरस्थितम्।
अजादुग्धोदनं हन्यात् त्रिदोषोत्कोपसंभवम्।। इति

ग्राम्यं यथा– ''भद्रे भजस्व मामिदं ते दास्यामि'' इति। ततीयं भिन्नार्थं यथा– ''स्याच्चेदेष न रावणः'' इत्युक्त्वा, ''क्व नु पुनः सर्वत्र सर्वेगुणाः'' इति। उद्दिष्टं ह्यत्र रावणस्यानुपादेयत्वं क्व नु पुनीरत्येननान्यथाकरणाद्भेदितम्।

एकार्थं यथा– ''कुन्देन्दुहारहरहाससितं'' इति। एकप्रयोजनं हि सर्वमेतत्। न हि काव्यं शास्त्रवदुपदेश्यं कश्चित्किंचिज्जानीयादिति प्रवर्तते।

अभिप्लुतार्थं यथा–

स राजा नीतिकुशलः सरः कुमुदशोभितम्।
सर्वप्रिया वसन्तश्रीर्ग्रीष्मे मालतिकागमः।।

अत्र प्रतिपादमर्थस्य परिसमाप्तवादभिप्लुतत्वं, एकवाक्यत्वेन निमज्जनाभावात्।

न्यायादपेतं देशकालविरुद्धं कलाशास्त्रादिविरुद्धं च यथा–

सुवीरेष्वस्ति नगरी मथुरा नाम विश्रुतां
अक्षोटनालिकेराढ्या यस्याः पर्यन्तभूमयः।। इत्यादि।

विषमं यथा– ''अयि पश्यसि सौधमाश्रितामविरलसुमनोमालभारिणीम्'' इत्यादि। यदि दोषो नेनैव संगहीतः सन्धानं द्वयोर्नैरन्तर्यं विचारयोगः अन्योन्यलयो वेति त्रिधा तदनुपारूढमयुक्तं पारुष्याद्युत्पादकं वा यत्रापशब्दः स्मतो मुनित्रयेणादतः। एतन्मध्ये तु

केचित् 'नित्यदोषाः, यथा अपशब्दः, केचिदनित्या यथा– ग्राम्यं हास्यादौ तस्येष्टमत्वात्। एतदाह यथास्थूलमिति। आनुपूर्व्यं, अव्ययेनाव्ययीभावः तेनोत्तरोत्तरम्। एते दोषाः स्थूलाः यथा च गूढार्थं गूढलेखप्रहेलिका(दि) पताकास्थानकादिषु प्रयोज्यम्, अर्थान्तरमनुवादे, अर्थहीनादि हास्ये, भिन्नार्थं श्रोत्रियादौ वक्तरि, एकार्थं परप्रत्यायने, अभिप्लुतार्थमुन्मादादौ, भिन्नवृत्तं च विसन्धि स्वविषये। एवमेते दोषाः क्रमेणापातविषयाः। इह यतो र्थप्रतीतिस्तावदस्ति अपशब्दस्तु दोष एव ततः कस्याश्चिदर्थप्रतीतेरभावात् स हि न कांचिद्भाषामनुपतति सङ्कताभावात्तमर्थं प्रतिपादयेत्।

अथ गुणेषु प्रतिजानीते– **एषां विपर्ययाद्गुणा** भवन्ति, एतद्दोषविघात एव गुणो भवतीत्यर्थः। किं अविशेषेण नेत्याह माधुर्यौदार्यलक्षणमङ्को येषाम्। एतदुक्तं भवति– एतद्दोषविहीनं श्रुतिसुखं दीप्तरसं च यदि भवति तावता गुणान्तरैरलङ्कारैश्च हीनमपि काव्यं लक्षणयोगाव्यभिचारीत्युक्तम्।

अन्ये पि गुणाः सन्तीति दर्शयति श्लेषः प्रसाद इत्यादि। **काव्यस्ये**ति पदस्य वाक्यस्य तदुभयगतस्यार्थस्य वेत्यर्थः। तत्रश्लेषमाह **ईप्सितेनार्थजाते**नेति। अर्थभागानां कविसमुत्प्रेक्षितया परस्परसंबद्धया योजनया संपन्नं यदीप्सितमर्थजातं तेनोपलक्षितार्थस्पोपपद्यमानस्योपपद्यमानतात्मा गुणः श्लेषः। यथोदाहृतं वामनेन–

दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा–
देकस्या नयने निमील्य पिहितक्रीडानुबन्धच्छलः।
ईषद्वक्रितकन्धरः सपुलकप्रेमोल्लासन्मानसा–
मन्तर्हासलसत्कपोलफलकां धूर्तो परां चुम्बति।।

अत्र मनोरथातीतो प्येककालनायिकायुगलहृदयग्रहणलक्षणार्थस्तथोपपादितो येनासंभावनास्पदं न भवति तेन कुटिलो प्ययं क्रमो न हृदये उल्बणत्वं भजते मज्जति हृदये यतः सर्वस्येति।

अथ शब्दगुणमाह नित्यार्थे पदानां श्लिष्टता परस्परं योनिः सन्धिबन्धनतयानेकमेकपदमिव भाति तदेव मासण्यमुच्यते। अतश्च पदान्तरपाठस्यावश्यापेक्षतयां यथा ब्रह्मसूत्रमिति। उक्तं चैतच्छन्दो ध्याये। तथा सन्धीयमानयोस्तथासन्धेः साजात्यं सावर्ण्यं च संपद्यते वस्त्रखण्डयोरिव सूत्रस्येव च। यथा– ''अस्त्युत्तरस्यां दिशि देवतात्मा'' (कुमा १–१) (वामन ३.२.६ उदाहरणम्) अस्ति शब्दस्योत्तरशब्दस्य सन्धीयमानयोस्तकारेण तकारेण संयोगे तयोश्च साजात्यं, 'स्यन्दिशि' इत्यनयोः सन्धेर्नकारस्य वर्ग्यत्वाद्दकारेण सावर्ण्यं, 'दिशि देवता' इति नैरन्तर्यसन्धौ दकारेण साजात्यं, इकारैकारयोस्तालव्यांशत्वेन सादश्यं, 'देवातात्मा' इत्यत्र तकारेणाकारेण च। न चानुप्रासमात्रमेतत्, एकपदानुप्रासे पि प्रामाण्यभावात्– 'इन्दिरान्दिराणां ललितो निनादः' इत्यनुप्रासे च सावर्ण्येनोपयोगीति। अन्ये पठन्ति–

विचारगहनं यत्स्यात् स्फुटं चैव स्वभावतः। इत्यर्थश्लेषः वक्रघटमानं वेत्यर्थः सुप्रतिबद्धश्च श्लेष इति पदश्लेषः।

प्रसादमाह– **अप्यनुक्तो बुधै**रिति। यत्रार्थे अनुक्ते पि बुधैः कष्टकल्पनया अव्याख्यातो प्यर्थः प्रयोजनं स्वयं जायते सो र्थो वैमल्याश्रयो पि वैमल्यमुपचारात् सो र्थो वा काव्यस्य वैमल्यं स्वयं जानंश्चानुपयोगिपरिवर्जनात्। वैमल्यशब्दवाच्याज्जलस्येव पांसुभिरसंपर्का वतीति वैमल्यमर्थस्य प्रसादः। यथा– ''सवर्णा कन्यका रूपयौवनारम्भशालिनी'' इति विवाह्यत्वं प्रापणीयताह्यत्वं संभोगयोग्यता, गहस्थसहधर्मचारिणीत्वमित्युपयोगी सर्वो यमर्थः। तेनाबुध्वैतदुदाहरणान्तरं वथा भ्रमणम्– ''आविलपयोधराग्र''मिति (विक्रमो ५–८) एतदपि तूदाहरणं पददूषणं तु सम्यगज्ञाने प्रयुक्तम्(?)। अप्रसादस्तु ''उपास्तां हस्तो मे विमलमणिका चीपदमिदम्'' अत्र विमलमन्यथोपयोगात् पांसुरिव जले त्राप्रसन्नतां करोति। सुख इति न प्रयत्नमपेक्षते। यः शब्दार्थो यः संयोगः शब्दविषय इत्यर्थः, कलामात्ररूप एव यत्र सन्धिः अत एव शैथिल्यात्मा स शब्दगुणः प्रसादः। प्रसन्नता स्फुटत्वं लक्षणीयविभागता पदानाम्। यथा–

अथ सविषयव्यावत्तात्मा यथाविधि सूनवे
नपतिककुदं दत्त्वा यूने सितातपवारणम्।

इत्यादि। अत्र निरन्तरतां मुक्त्वा नान्योन्यलयो नान्योन्यापत्तिसन्धिरस्तीति शिथिलता। एकश्च गुणः को पि शोभत इति स्वानुभवसिद्धः, तेन व्यावत्तात्मेति गाढता कृता, ककुदं दत्त्वेति चापरः सवर्णपक्षे।

समतामाह– **नातिचूर्णपदै**रिति। शब्दानां समत्वात्समः चूर्णपदैरसमासरचना यत्र सातिशया न भवति, अतिशयश्च प्रतियोगिनमपेक्षते इति। दीर्घसमासो त्यन्तसमासश्च विषमता, तद्विपर्ययेण समता उपक्रान्तमार्गापरित्यागरूपेत्युक्तं भवति। यथा–

गाहन्तां महिषा निपानसलिलैः शङ्गैर्मुहुस्ताडितं
छायाबद्धककदम्बकं मगकुलं रोमन्थमभ्यस्यतु।
विस्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्लवे
विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः।। इति

(अत्र) अवान्तरवाक्ये समस्तद्विपदा हि नातिदीर्घा वत्तिः।

''प्रसीद चण्डि त्यज मन्युम जसा जनस्तवायं पुरतः कृता जलिः।

किमित्थं–

इति चूर्णपदैरुपक्रम्यासमाप्त एव वाक्यान्तरे वाक्यार्थे पि दीर्घः समासः कृतः–

उत्कम्पितपीवरस्तनद्वयोन्मिषत्सुप्तविलासमास्यते''।।

पूर्वत्र ('गाहन्ता'मित्यत्र) त्ववान्तरार्थसमाप्तावर्थान्तरोपक्रम एव समासेन 'छायाबद्धकदम्बक'मित्युपक्रान्तो पि न चैत्यात्कूपपतनामिव चूर्णपदं प्रयुक्तं 'मगकुल'मिति। सेयं समता जाता शब्दगुणा अर्थो पि समत्वात्, किं तत्समत्वं आह **व्यर्थाभिधायिभिरि**ति

निष्प्रयोजनमर्थं ये भिदधति शब्दानां न त्वेतदवैमल्पमिति प्रसादेन निरस्तम्। नैतत्, नहि सर्वथा निष्प्रयोजनता, अपि तु सदपि प्रयोजनं दुर्बोधं, तदाह– **दुर्बोधनैरि**ति। अभिधीयते स्मै इत्यभिधानं प्रयोजनम्। यथा–

च्युतसुमनसः कुन्दाः पुष्पोद्गमेष्वलसा द्रुमाः
मलयमरुतः सर्पन्तीमे वियुक्तधतिच्छिदः।
अथ च सवितुः शीतोल्लासं लुनन्ति मरीचयो
न च जरठतामालम्बन्ते क्लमोदयदायिनीम्।।

इत्यत्र ऋतुसन्धिवर्णनप्रक्रमे मलयमरुतः प्रक्रमं भिनत्ति न च सर्वथा निरर्थको विप्रलम्भोद्दीपनत्वात्। किं तु प्रक्रमं स्फुटं न पुष्णातीति विषमता। समता तु ''मनसा च गिरं गह्णन्तीमे किरन्ति न कोकिलाः'' इति (द्वितीयपादस्थाने यदि पठेत्)।

समाधिमाह– **अभियुक्तैर्विशेष**स्त्विति। यस्यार्थस्य द्वितीयस्यार्थस्य अभियुक्तियुक्तैः प्रतिभातिशयवद्भिः विशेषो अपूर्वः स्वोल्लिखित उपपद्यते ससमाहितमनः संपाद्यविशेषत्वादर्थो विशिष्टः समाधिः, यत्र कवेस्तत्पूर्विकयोल्लेखस्तत्सर्वमिहो––दाहरणम्। यथा–

आश्वपैहि मम सीधुभाजनाद्यावदग्रदशनैर्न दश्यसे।
चन्द्रमद्दशनमण्डलाङ्कितः खं न यास्यसि हि रोहिणीभयात्।। इति।

अयानिरन्यच्छायायोनिश्चेति, एतत्तदेवज्ञानं विषयः न चानेकं किंचित् सारस्वतस्य हि सर्वोर्थनिमित्तत एव। तदन्यस्य सर्वो न्यच्छायायोनि। व्यक्तभाव्यवास्यत्वादपि कविह्रदयगतप्रतिभातिशयतारतम्यादनवस्थितम्(?)।

शब्दगुणश्च समाधिः, तमाह **तेन चे**ति। समाधिशब्दस्य यो र्थः परिहारलक्षणस्तेन यः परिकीर्तितः परितः समन्तादाक्रान्त्या उच्चारणे संपन्नः स च समाधिः। आक्रान्त्या उच्चारणे आरोहावरोहक्रममेव आक्रमणेन गतितुल्यम्। आरोहश्चोर्ध्वगमनद्वारः प्राणमारुतरूपाया उच्चरूपः, अपक्रमणमवरोहो विपर्ययः। उच्चत्वं स्थानकरणवशात्, बाह्याभ्यन्तरप्रयत्नवशाच्च। तथा हि–

(निरानन्दः कौन्दे मधुनि परिभुक्तोज्झितरसे
न सालेसालम्बो लवमपि लवङ्गे न रमते।
प्रियङ्गौ नासङ्गं रचयति न चूते पि चरति
स्मरल्लक्ष्मीलीलाकमलमधुपानं मधुकरः)।।

तत्र नकाराद्दन्त्यान्मूर्धन्यो रेफ उच्चस्थानस्थितो यद्यपि दन्त्यः तथापि संयोगो निरन्तरप्रयत्नाधिक्येन विवततमेन चाकार द्वयेन द्विवारप्रयत्नकेन च जिह्वामूलीयेन चोच्चत्वभाजा आरोहणमस्फुटीकरणमिति नशब्दो वरोहणं संपन्नमप्यसंपन्नकल्पम्। आरोहणसौकर्यायैव प्रत्युत मध्ये ह्यत्र का विश्रान्तिः। अभावे उच्चतमसङ्कलनसोपानारोहखेदायैव भवति निरास्वाद्यः कौन्द इति यथा एव निरानन्द

इत्यत्र यावन्महाप्राणो जिह्वामूलीयश्च श्वासानुप्रदानो द्विवारयुक्तस्तावदारोहयत औकार आकारमवेक्ष्य रूपविवत औकारतो पि नकारः ततो पीकारोकारयोः ऊनं विवतत्वं, अकारस्तु संवतः इत्यवरोहः। औकारस्तु मध्ये वरोहसौकर्यायेव दूरारोहाद्धि दूरावरोहणं चेति चूलिकायाः कूपपतनकल्पम्। खेदो यथा–

''कुर्वाणाः परमं महच्च मनस'' आकारोपध्मानीयेभ्यो झटिति संवते कारे निपातनात्। ''निवेशः स्वःसिन्धोः''– इत्यत्र क्रमेण विवततरः स्पर्श इति क्रमेणारोहः। ''तुहिनगिरिवीथीषु जयति''– अत्र विवतेभ्यः उकारादिभ्यः संवते कारद्वये पातः इकारस्त्वन्यत्वान्न च विश्रान्तिस्थानमिति नारोहः। यदि वा (सि)न्धोरिति विवतरापेक्षया आरोहसंस्कारे उकारे वरोहबुद्धिरेव स्फुटत्वे वरोहः। जयतिमपास्यं तदयमिति पाठः(?) अनुस्वारो हि संवारप्रयत्नः। ''नराः शीलभ्रष्टाः व्यसन इव मज्जन्ति तरवः'' इति अकार इकार अकारेभ्यो वरोहमरेभ्यो विवते इकारे आरोहः, अन्ते च विसर्जनीये आरोह एव। तेन स्वभावप्रतिभादर्शनानुविद्धा भगवती वाणी स्वरसोपनिपतिता स्वरसंभारप्रभावानुरोधेनैवारोहावरोहक्रमं भजते। प्रतिभादष्टिशून्यत्वात् अन्ध पदवदारोहादि न भजेत्।

नन्वियता पाठसौकर्यं स्यात्, श्रोतस्तु किमायातम्, अनभिज्ञो देवानां प्रियः, यथा हि कर्कशशर्करानिकरकण्टकिते देशे दुस्स चरे संचरज्जनं पश्यन्त्या अपि सुकुमारहृदयायाः प्रमदायास्तदात्मानुप्रवेश इव जायमानं खेदमतितरामादत्ते प्रहारपातादौ वा, तथा सहृदयस्य स एव मार्गः, सुकुमारता हि वैमल्यापरपर्याया सहृदयत्वं हृदयस्य हि कविहृदयतादात्म्यापत्तियोग्यतैव उत्कर्षः। तत एवोक्तं–

शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।

वेद्यते स हि काव्यार्थत वज्ञैरेव केवलम्।। (ध्वन्या १–७) इति।

अभिधानकोशमपि हि पठतां सुप्तिङ्विभक्तीश्च विदुषामपि न काव्यतत्त्वावबोधः तस्माद्वर्णोच्चारणप्रयत्नेन परुषपठनस्पर्शजनितो यः खेद उच्चारयितुः स एव श्रोतुरपि पारुष्यमाधत्ते। ''नीरन्ध्यध्ववधूनिबन्ध्यनुगतप्राणैकबन्धक्रमः'' (?) इत्यादौ। वर्णगतं च लालित्यपारुष्यादि पुष्कराध्याये पि (अ) वक्ष्यते। अन्यैरप्युक्तं ''तेन वर्णा रसच्युतः'' इत्यादि। स्वभावतो हि केचन वर्णाः सन्तापयन्तीव निकृन्तन्तीव रेफककारादय इव परुषवत्तिपूर्वकाः, अन्ये तु निर्वापयन्तीवोपनागरिकोचिताः। लोकगोचर एवायमर्थः स्वसंवेद्यो पीति न वितत इत्यास्तां तावत्।

माधुर्यमाह– **बहुशो यच्छ्रुत**मित्यादि। यदिति यस्माद्धेतोर्वाक्यं श्रुतं संशयविपर्ययोरास्पदं न भवतीति तन्माधुर्यम्। द्राघीयसि समासे तावश्यं भवत इति तद्विरह एव माधुर्यं शब्दगुण इत्युक्तं भवति। यथा– ''गाहन्तां महिषा निपानसलिलं'' (शाकु २–६) इत्यादि। पुनः पुनरप्युक्तमर्थजातं यस्माद्धेतोरपनीतमवगाहनेन वैरस्येन

तद्वचनवैचित्र्यात्मकं माधुर्यमर्थगुणः वचनान्तराभिधेयतया हि स एवार्थो विचित्रो भवति। यथा–

रसवदमतं कः सन्देहो मधून्यपि नान्यथा
मधुरमथ किं चूतस्यपि प्रसन्नरसं फलम्।
(सकृदपि पुनर्मध्यस्थः सन्रसान्तरविज्जनो
वदतु यदिहान्यत्स्वादु स्यात्प्रियादशनच्छदात्।।)

अत्र रसवदमतमिति य एवार्थः स एव कः सन्देह इत्युक्तया विचित्रया परिनिश्चयस्थैर्याभिधायिन्या निश्चयीकृतः। निश्चयस्थैर्यमेव च नान्यथेतिवचनान्तरेण विपर्ययनिराकरणसंभावनान्तरनिरासं च क्रमेण विदधता विचित्रीकृतमिति मधुरो यमर्थः।

ओजो लक्षयति– **समासवद्भिर्बहुभि**रिति। बहुभिरेकसमाससंज्ञायुक्तैरथ च विचित्रैर्यमकैः पदैर्यदुक्तं यो बन्धस्तदोजः। यथा–

मन्थायस्तार्णवाम्भःप्लुतिकुहरवलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितनभोदुन्दुभिस्ताडितो सौ।। (वेणी) इति

यथा सानुरागैर्यत्र वर्णो वर्णान्तरमपेक्षते तत्र सानुरागत्वम्।

''विलुलितमकरन्दा मम्जरीर्नर्तयन्तो''

अत्र **र** इति शब्दो **न्द**शब्दं स्वगुरुत्वायापेक्षते, **न** इत्ययंशब्दो **य** इत्ययं च **न्ते** शब्दं च, **नो** इत्ययं च **न्ते** गुरुत्वात्। स्वविश्रान्तिजनितकालोपचययलभ्यं गुरुत्वं नाकांक्षतीति द्वितीयपादपाठं समनन्तरमेवापेक्षते।

''विलुलितमधुधारा म चरीर्लोलयन्तः।''

इति पाठे **धा**शब्दो **लो**शब्दो **ति**शब्दश्च जात्यापेक्षत इति। स तदेव गाढत्वमुच्यते निबिडावयवतैव समासेन संक्षेपेण युक्तानि पदानि यत्रार्थभूयानिति संक्षेपो नामार्थगुण ओजः।

ओजखी किमतो पि भूयः समाक्षिपति, तथा एकमपि वस्तु उदारैर्बहुभिः पदैरुपनिबध्यते विस्तरात्मकत्वमप्योजो र्थगुणः। संक्षेपो यथा–

ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च शूलिनम्।
सिद्धं चास्मै निवेद्यार्थं तद्विसष्टाः खमुद्ययुः।। (कुमा ६–६४)

विस्तरस्तु–

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ट्यूतमैशम्। (रघु २–७५)

सौकुमार्यमाह– **सुखप्रयोज्यै**रिति। क्वचित्पदस्य स्वयं पारुष्यं भवति यथा द्राढा अजड्ढा निर्द्वैतं, सदक्त्वव्यवसितिः, इति। क्वचित्संहिता– दर्व्याख्यार्वीविधूयते। तदुभयरहितत्वं

सौकुमार्यं शब्दगुणः। यथा– '' गाहन्ता''मित्यादि। अत्र च यद्वक्तव्यं तत्समाधिलक्षणे निर्णीतम्। परुषे पि चार्थे सुकुमारेणार्थेन या संपत्तिस्तदर्थगुणः सौकुमार्यमपारुष्यरूपम्, एकाकिनि देवतासहाय इति, मते यशःशेष इति, जडे देवानांप्रिय इति।

अर्थव्यक्तिमाह– **सुप्रसिद्धाभिधाने**ति, प्रसिद्धमभिधानमभिधाव्यापारो यस्यां काव्यक्रियायां सार्थकव्यक्तिः शब्दगुणः। यथा ''गाहन्ता''मिति। विपर्यये तु किरातादिनिदर्शनं यच्चार्थे वर्ण्यते स तथैव लोके प्रसिद्ध इत्यर्थस्य गुणो र्थव्यक्तिः। यथा–

पष्ठेषु शङ्खशकलच्छविषु च्छदानां
राजीभिरि जितमलक्तककलोहिनीभिः।
गोरोचनाहरितबभ्रुबहिःपलाश–
मामोदते कुमुदमम्भसि पल्वलस्य।।

उदारतामाह– **दिव्यभावपरीतं यदि**ति। यत्र मानुषोचितमपि दिव्यतया करुणादियुक्तमपि श्रङ्गारेण विस्मयस्थानमप्यद्भुतेन युक्तं वर्ण्यते तद्गतैर्वा विभावानुभावादिभिः तदुदीर्य तत्रौदार्यमर्थगुणः। एतदेवाग्राम्यत्वमित्यन्यैरुक्तम्। ग्राम्यं हि वस्तु यथास्थितमयोजितरचनाविशेषं प्रसिद्धिमात्रप्रमाणमुच्यते, ततो न्यदग्राम्यम्। यथा–

त्वमेवंसौन्दर्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वां
अतः शेषं चेत्स्याज्जितमथ तदानीं गुणितया।। इति।

यत्राद्भुतेन यत्कृतो र्थः **अनेकभावसंयुक्त**मिति शब्दगुणस्य लक्षणम्, एकभाषाचित्रत्वादनेकताचित्रत्वं पदान्तस्यैकस्यानेकव्यक्तिरक्षरसंख्यावैचित्र्यं सन्धानसाजात्यं च पिण्डीबन्धनत्तसादश्येन, तत्र हि गुल्मजातश्रङ्खलिकादिभेदेनेत्थंभूतो नर्तकीसंनिवेशो भरते तदुक्तं विकटत्वं नरीनत्यमानत्वमिति पदानामौदार्यमिति। यथा–

स्वचरणविनिविष्टैर्नूपुरैर्नर्तकीनां
झटिति रणितमासीत्तत्र चित्रं कलं च।।

अत्र प्रथमपादे एकाक्षरत्र्यक्षरचतुतक्षरमिति विचित्राणि पदानि, रेफे तद्द्वितीयापदाक्रमणाद्व्याप्तिः, तकारयोः सन्धानात्सन्धिसाजात्यं, तकारसकारयोः संस्थाननयैर्नैकट्यं च। विपर्ययस्तु–

''चरणकमललग्नैनूपुरैर्नर्तकीनां झटिति रणितमासीन्म जुचित्रं च तत्र'' अत्र द्वे अपि पदे त्र्यक्षरे। तावेवेदं भाषितविचित्रत्वम्। यथा–

''अथ यदि तव वक्त्रं चण्डि भूयो पि नाम''

इति न ह्रद्यं, ''रणितमासीन्म जु चित्रं न तत्र'' इति तकारमकारयोरसाजात्यं सकारमकारयोश्च संस्थानत्वमिति।

कान्तिमाह– **यन्मनः श्रोत्रविषयमिति**। यन्मनोविषयमाह्लादयति यथा श्रङ्गारविभावरूपं लीलादिचेष्टालङ्कारसुन्दरं काव्यार्थरूपं तत्कान्तिगुणयुक्तं तदेव दीप्तसत्वमित्युक्तमन्यैः। विभावादीनां दीप्तत्वमिति यावत्। यथा–

प्रेयान् सायमपाकृतः सशपथं पादानतः कान्तया
द्वित्राण्येव पदानि वासभवनाद्यावन्न यात्यात्मना।
तावत्प्रत्युत पाणिसंपुटलसन्नीवीनिबन्धं धतो
धारित्वैव कृतप्रमाणकमहो प्रेम्णो विचित्रा गतिः।।

अत्र हीर्ष्यानुभावस्य, रत्यनुभावस्य, औत्सुक्यानुभावस्य च दीप्तमित्यर्थगुणः श्रोत्रविषयीभूतमिव यदाह्लादि काव्यं तत्कान्तिर्नाम शब्दगुणः।

कुरङ्गीनेत्रालीस्तबकितवनालीपरिसरः–

अत्र हि समासवत्यपि रचना (न) श्रोत्रेन्द्रियैकतानतामावहति। तदेतल्लोके मधुरकाव्यमिति प्रसिद्धम्। माधुर्यमभ्यस्तपदत्वमुक्तम्। अन्ये त्वौदार्यकान्त्योर्लक्षणद्वयं विपर्यासेन पठन्ति।

एतदुपसंहरति– **एवमेत** इति। चकाराच्छन्दांसि वक्तानि जातयश्च। **एषा**मिति (नि)वक्तच्छन्दः प्रभतीनां दोषान्तानाम्। अनित्यदोषा हि विनियुज्यन्ते पीत्युक्तम्।

लघ्वक्षरप्रायेति यत्र अतनुवाही चित्तवत्तिपरिस्पन्दः, तत्र लघ्वक्षरप्रधानं वक्तं वीरादावुपमारूपके, मसणवाहिनि तु हृदयस्पन्दे गुर्वक्षरप्रायं करुणादौ। रौद्रादावापि कदाचित्तद्भवति। यदा विलम्ब्य परखलीकारं स्मत्वा ब्रवीति ''कर्ता द्यूतच्छलानां'' इति तथा ''यो यः शस्त्रं बिभर्ति'' इत्यादौ। अत एव भयानके हास्ये शान्ते वा यथायोगं संवेदनस्पन्दताचर्व्यमाणस्वाद्यताश्चर्यकृतो विभागो वक्तानां मन्तव्यः। **उदारमधुरैरि**ति। औदार्यं शब्दगुणो प्राधान्येन तदनुयायि च गुणान्तरं माधुर्यं, स्वानुयायिगुणसंहितमसणेषु रसेषु। अर्थगुणास्तु यथायोगं सर्वत्र, तदाह **प्रमदाभिधेयै**रिति। प्रमदो हर्षः हर्षजनको गुणसाकल्यवानभिधेयो र्थो येषां भावार्थो हृदयगतो भिप्रायः क्रियाविशेषश्च तं दर्शयति **स्मते चे**त्यादि। एतदेव च क्रमेण विभजति **आकार** इत्यादि। द्वावेतावनुस्वारेणानुनासिक्येन वा युक्तौ कार्यौ आण्डदण्डादि। **ह्रस्वदीर्घप्लुतानीह यथाभावं यथारसम्। काव्यबन्धेष्वषेशे**ष्विति वचनादन्यत्र विषये दूराहूत्यादिषु प्लुत उक्तः तत्रासौ प्रयोज्य एवेति दर्शितम्। **चेक्रीडितं** यङन्तम्। आदिग्रहणेन ण्यन्तसमन्ताः (सन्नन्ताः?)। एते नटोचिताः प्रयोगाः न भान्ति। ते यतो ललिता यथा वेश्यापरिग्रहे द्विजैर्यज्ञक्रिया मगाजिनदण्डकमण्डलुघताभ्यङ्गादि संभवद्भिरपि न भाति। एवं तद्व्याख्याने रौद्रादिस्वविषये यत्पुरुषाभ्यनुज्ञानं तद्विरुक्तं स्यादितीत्थं व्याख्या– ललिताः सुकुमारप्रयोगास्ते परुषैः पदैर्न भान्तीति विशेषनिषेधः शेषाभ्यनुज्ञापक इति न्यायादन्यत्र तत्प्रयोग इत्युक्तं भवति। तथा हि– ''वयोद्वितीयाः सरिति सगेश्चम (?)'' इत्येवमादिरपि विधिप्रयोज्य एव, ''आख्यातामर्षतर्ष्य'' इत्यादौ। एतदेव साधर्म्यवैधर्म्यद्वारेणोपपादयति वेश्या यथा मगचर्मघताभ्यङ्गदण्डादियुक्तैर्द्विजैर्न शोभते। वैधर्म्येण दष्टान्तमाह यथा तैरेव

यज्ञक्रिया भाति न तथा वेश्या तदङ्गत्वात्। बहुव्रीहेर्वा यज्ञक्रियापत्न्यप्युच्यत इति शिवम्।।

इति षोडशमध्यायं ग्रन्थनिर्ग्रन्थिकं व्यधात्।
यशोराशेर्यशोरागनाम्नो दौहित्रदहेजः।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां लक्षणालङ्कारदोषगुणाध्यायः षोडशः समाप्तः।।

श्रीः

नाट्यशास्त्रम्

षोडशो ध्यायः (अनुबन्धः)

समस्तार्थालङ्कारवर्गस्य बीजभूताश्चमत्काराः कथाशरीरवैचित्र्यदायिनो वक्रोक्तिरूपा लक्षणशब्देन व्यवह्रियन्ते। लक्षणानि गुणालङ्कारमहिमानमनपेक्ष्य स्वसौभाग्येनैव शोभन्ते। लक्षणं महापुरुषस्य पद्मादिरेखादिवत्काव्यशरीरस्य सौन्दर्यदायि। अलङ्कारस्तु रत्नाभरणादिवदेव, येन विनापि स्वसौन्दर्येणैव पुरुषः प्रविभासते। गुणस्तु प्रवत्तिद्योतितो धैर्यादिवत्काव्यस्य शब्दार्थरचनामाश्रयति। यथा लक्षणरहितः पुरुषो न सुन्दरशब्दवाच्यस्तथालक्षणवर्जं कथाशरीरं गुणालङ्कारोज्ज्वलमपि नीरसत्वं भजत्प्रौढकाव्याभिधानं नार्हति। कथाशरीरसंपन्नेषु काव्येष्वेव लक्षणानि निर्वर्त्यन्ते न तु मुक्तकादिवारणपरमुक्तम्। लक्षणान्यसंख्येयानि, तेषां चमत्कृतिविशेषगरिष्ठाणि षट्त्रिंशदेव मुनिना संगहीतानि। कोहलादिभिस्तच्छिष्यैः प्रकीर्तितान्यपराणि कानिचिल्लक्षणत्वेन प्रसिद्धिमुपगतानि कालप्रवाहे भरतग्रन्थ एव पाठान्तरनिबन्धरूपेण प्रक्षिप्तानि स्युः। सौन्दर्यजनकत्वकारणेन भोजादिभिरुभयपाठगतान्यपि लक्षणानि स्वीकृत्यान्यैरपि कैश्चिच्चमत्कृतिभूतैर्लक्षणैः सह चतुःषष्टित्वेन प्रकटितानि।

यद्विवेचितमतिगम्भीर प्रौढवाचा भगवता वत्तिकारेण लक्षणान्यसंख्यानीति तदुपष्टभ्यैव भिन्नपाठो पि बालानां समुपवेद्य इत्यभ्यूह्य तन्मध्य एव संक्षेपेण प्रकाशितः।

भूषणं लक्षयति– अलङ्कारैरिति भरतोक्तैरुपमादिभिर्गुणैश्च यत्र कथाशरीररचना समुल्लासिता तद्भूषणं नाम लक्षणम्। चित्रार्थैरिति विभावादिसामग्रीप्रत्यायकतया रसोद्द्योतकैरर्थविशेषैः मतान्तरे वक्रोक्तिरूपैः। यथा कृत्यारावणे सप्तमे ङ्के क चुकिनं दष्ट्वा लक्ष्मणविभीषणौ– आर्य, कथय कथय।

का चु– का गतिः श्रूयतां – आर्या खलु सीता रावणाज्ञया किङ्करोपनीतं भर्तुर्मायाशिरो वलोक्य सखीभिराश्वास्यमानापि निवत्तप्रयोजनापि 'नाहमात्मानं क्लेशयामि' इति (इत्यर्धोक्तौ तिष्ठति)।

सर्वे– किं कृतवती

का चु– यन्न शक्यते वक्तुम्।

शशिन इव कला दिनावसाने कमलवनोदरमुत्सुकेव हंसी।

पतिमरणरसेन राजपुत्री स्फुरितकरालशिखं विवेश वह्निम्।। इति।

यथा वा रत्नावल्यां प्रथमे ङ्के यौगन्धरायणस्य वचनं विश्रान्तविग्रहेतिश्लोकः। भूषणाख्यलक्षणेन काव्यं सामान्यवचसो भिद्यते, '' तात्पर्यमेव वचसि ध्वनिरेव काव्ये'', ''यत्रालङ्कारवर्गो यं सर्वो प्यन्तर्भविष्यति'' ''शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पथग्विदुः। द्वयोर्गुणत्वे व्यापारप्राधान्येकाव्यगीर्भवेत्'' ''द्वे वत्मनी गिरो देव्याः शास्त्रं च कविकर्म च। प्रज्ञोपज्ञन्तयोराद्यं प्रतिभो वमन्तिमम्'' इत्यादिना भोजकुन्तलक भट्टनायकतोतादिभिरुक्तरीत्या गुणालङ्कारवर्गः सर्व एव लक्षणशब्देन परिगहीतः। गुणालङ्कारेरैव यत्र कथारूपा वक्रोक्तिरतिशयिता तत्र भूषणम्। अक्षरसंघातो विविधश्लेषोक्त्या वा अक्षरविपर्यासेन वोक्तिप्रत्युक्तिवैचित्र्यं यथा उभयाभिसारिकायां विटः– भगवति वैशिकाचलो हमभिवादये।

परिव्राजिका– न वैशिकाचलेन प्रयोजनं, भवेद्वैशेषिकाचलेन।

विटः– अस्त्येतत्कारणं.....

परि– षट्पदार्थबहिष्कृतैः सह संभाषणमस्मद्गुरुभिर्निरुद्धम्।

विटः– युक्तमेवैतत्। कुतः–

द्रव्यं ते तनुरायताक्षि दयिता रूपादयस्ते गुणाः
सामान्यं तव यौवनं युवजनः संस्तौति कर्माणि ते।
त्वय्यार्ये समवायमिच्छन्ति जनो यस्माद्विशेषो स्ति ते
योगस्ते तरुणैर्मनो भिलषितैर्मोक्षो प्यनिष्टाज्जनात्।।

परि– सांख्यमस्माभिर्जायते अलेपको निर्गुणः क्षेत्रज्ञः पुरुषः।

विटः– हन्त निरुत्तराः स्मः।

यथा वा शाकुन्तले सप्तमे ङ्के ''तापसी– सर्वदमन, शकुन्तलावण्यं पश्य'' इत्यत्र शकुन्तलाशब्दः सूचितः।।

शोभा– सिद्धैः प्रयोजनैरसिद्धस्य शुभसंघटनं यत्र निर्णीयते सूच्यते वा श्लेषवक्रोक्तिध्वनिविशेषमहिम्ना चमत्कृतो र्थः। केचित्स्वभावस्य प्रकटनमित्याहुः, अपरे तु यूनोः प्रभावप्रकटनमित्याचक्षते। अर्थप्रधाने वस्तुन्येषापरं शोभते। यथा रत्नावल्यां प्रथमे ङ्के यौगन्धरायणः–(द्वीपादित्यादिपठित्वा) ''कः सन्देहः।

प्रारम्भे स्मिन् स्वामिना वद्धिहेतौ दैवेनेत्थं दत्तहस्तावलम्बे।
सिद्धे भ्रान्ति र्नास्ति सत्यं तथापि स्वेच्छाचारी भीत एवास्मिभर्तुः।।

यथा वा कथाशरीरसंघटनवैचित्र्यरूपशोभाया अभिज्ञानशकुन्तलायां मधुररप्रसक्तिः।

परेषां दुर्भेद्यपरमार्थेन तुल्यार्थप्रयुक्तेन वाक्येनः निगूढाशय कस्मैचिन्निपुणैर्यत्र प्रकाश्यते तदुदाहरणं, यथा देवीचन्द्रगुप्ते प्रावेशिकी ध्रुवा कुमारचन्द्रगुप्तस्य संशयाकुलमानसस्य प्रवेशावसरसूचकमर्थमुद्द्योतयति–

एसो सिअकरवित्थरपणासिआसेसवेरितिमिरोहो।
निअविहवरोणचन्दो गअणगिहं लंघिउं विसइ।।

यथा वा प्रद्युम्नाभ्युदये ततीये ङ्के न्तर्नाटिकायां सूत्रधारवचनं–

देव दनुजाधिप त्वां त्रिभुवनलक्ष्मीरिव स्वयंरागात्।
अभिरूपमभिसतवती नलकूबरमत्र नाटके रम्भा।।

सामाजिकीभूतयोः सखीप्रभावत्योः सखी ''पिअसहि एसो एव्व मग्गो मअणपरवसाणं इत्थिआणं'' इत्युपदिशति। अत्राभिसरणमेव प्रद्युम्नसङ्गमोपाय इत्यर्थः साध्यते।

हेतुः– फलसाधनशक्तियुक्तं मितशब्दार्थं विचित्रभङ्ग्युक्तं वचनम्। यथा तापसवत्सराजे षष्ठे ङ्के कृतमरणनिश्चयां वासवदत्तां परिबोधयन्यौगन्धरायण आह– देवि प्रसीद,

आसष्टेः प्रतिपार्थिवं युवतयो जाता मनोवल्लभाः
मग्नास्ते व्यसनार्णवे च बहवस्ताभिः सहैवेश्वराः।
देव्या यत्तु कृतं तदाविकलतामुत्सज्य लोकेत्तरं
तस्यैषा कृपणोचितेन विधिना किं ग्लानिरुत्पद्यते।। इति।

देव्यायत्कृतं तदिष्टार्थसाधनमेव अचिरेणैव शुभफलमनुभवसीति।

संशयो समाप्तवाक्यत्वात्साधनीयविषयस्वरूपे सन्दिग्धावस्था। एषो र्थकामप्रधानेषु रूपकेषु निपुणं प्रयुज्यते। यथा कुन्दमालायां षष्ठे ङ्के रामायणकथावाचकौ कुशलवौ सीतावत्तान्तं पठन्तौ–

सीतां निर्जनसंपाते चण्डश्वापदसङ्कुले।
परित्यज्य महारण्ये लक्ष्मणो पि न्यवर्तत।।
ततः प्राणैः परित्यक्ता निराशा जनकात्मजा।

इति तूष्णींभवतः।

रामलक्ष्मणौ–

अप्रियाख्यानभीतेन कविना संहृता कथा।

किमितः कल्याणमावेदयति। एवं तावदनुयोक्ष्ये (इति पच्छतः)।

संशयालङ्कारस्तु संशयाख्यलक्षणाद्भिन्नचमत्कारतया भिद्यते।

संक्रुद्धस्य ललाटलोचनभुवा सप्तार्चिषा धूर्जटे–
र्निर्दग्धे मकरध्वजे रतिरसौ किं स्याद्गहीतव्रता।
संवादाद्वनदेवता मुनिवधूवेषप्रप चे मनः
कृत्वेत्थं रमते त्र विग्रहवती किं वा तपश्श्रीरियम्।।

इत्यादिषु संशयो लङ्कार एव न तु संशयाख्यलक्षणम्।।

धर्माविरुद्धतया सर्वलोकमनोग्राहि वचनं निदर्शनोपष्टम्भं दष्टान्तसंज्ञकं लक्षणम्। यथा धूर्तविटे– ''स्त्रीषु प्रसङ्गो न कर्तव्यः'' इत्यत्र ''भावः किं पश्य''तीत्युक्ते ''विटः– भोः

उपदेशमात्रं खल्वेतत्। तमहं न पश्यामि यः स्त्रीषु प्रसङ्गं न गच्छेत्, श्रूयन्ते हि महेन्द्रादयो प्यहल्याद्यासु विकृतिमापन्नाः'' इति।

यथा वा पद्मप्राभतके स्वसोदरीप्रेयसो नुयोगे संदिग्धमानसां देवसेनामाह शशः–

दक्षात्मजाः सुन्दरि योगतारा: किं नैकजाताः शशिनं भजन्ते।
आरुह्यते वा सहकारवक्षः किं नैकमूलेन लताद्वयेन।। इति।

प्राप्तिर्यथाकुन्दमालायां ततीये ङ्के लक्ष्मणः कानिचित्पदचिह्नानि सैकते दष्ट्वा राममाह–

विलासयोगेन परिश्रमेण वा स्वभावतो वा निभतानि मन्थरम्।
पदानि कस्याश्चिदिमानि सैकते प्रयान्ति तुल्यं कलहं सविभ्रमम्।।

रामः– (निर्वर्ण्य सहर्षं) किमुच्यते कस्याश्चिदिति, ननु वक्तव्यं सीतायाः पदानीति। पश्य–

समानं संस्थानं निभतललिता सैव रचना
तदेवैतद्रेखा कमलरचितं चारुतिलकम्।
यथा चेयं दष्ट्वा हरति हृदयं शोकविधुरं
तथा ह्यस्मिन् देव्या सपदि पदपङ्क्तिर्विनिहिता।। इति।

अभिप्रायः–

अभूतपूर्व इत्यसत्पदार्थः केवलकल्पितः। केचित्स्वाद्यवस्तुन्यभिमान इत्याहुः तद्वैचित्र्यरहितत्वादुपेक्ष्यम्। यथा तापसवत्सराजे चतुर्थे ङ्के सांकृत्यायनी यौगन्धरायणोद्योगं विमश्य प्रणिधिं प्राह–

दूरमुदीर्णे च रिपोवेवमकि ंचित्करे च विजिगीषौ।
भवता तु नयगुणशतैः सो यमसूत्रः पटः क्रियते।। इति।

यथा वा वत्सराजचरिते द्वितीये ङ्के चोरः–

भूमिः कराग्रेण विवर्तिताद्य श्वासेन भग्नो हिमवान्महाद्रिः।
आसारवष्ट्या शमितो ग्निरौर्वो विनिर्हतः कीटशतैरनन्तः।। इति।

निदर्शनं– यथा उभयाभिसारिकायां–

शान्तिं याति शनैर्महौषधिबलादाशीविषाणां विषं
शक्यो मोचयितुं मदोत्कटकटादात्मा गजेन्द्राद्वने।
ग्राहस्यापि मुखान्महार्णवजले मोक्षः कदाचि वेद्
वेशस्त्रीबडबामुखानलगतो नैवोत्थितो दश्यते।।

निरुक्तं– यथा वत्सराजचरिते प्रथमे ङ्के भरतरोहकः राजानमाह– प्रसह्य हरणे केवलं प्रमादिता ख्यातिः।

राजा– किमेतत्।

भर– सदोषेषु कार्येषु यदल्पदोषं तत्प्रारब्धव्यम्।

वसुवर्मा– स्वामिन् तत्राप्यहं वाच्यदोषं न पश्यामि। कुतः–

नीता बलात्प्रकृतिभद्रतरा सुभद्रा यद्वासुभद्रभगिनी कपिकेतनेन।
देवस्य तेन समभूद्वचनीयता किं तेजःप्रकाशयशसां यदुदन्तिनां वा।।

शालं– साधु, निरुक्तमभिहितं वसुवर्मणा।

सिद्धिः– प्रधानानां स्पहणीयानां प्रयोजनान्तराणामतर्कितोपलब्धानां परिकीर्तनम्।

यथा कौमुदीमहोत्सवे चतुर्थे ङ्के मन्त्रगुप्तवचनं–

सङ्गतिश्चिरमचिन्तितपूर्वा निर्वतप्रणयिनी मिथुनानाम्।
आधिराज्यमधिरोहति तस्याः षोडशीमपि कलां न मघोनः।। इति।

विशेषणं– यथा तापसवत्सराजे ततीये ङ्के राजा विदूषकमाह– अयि मूढ–

वत्तिर्मूलफलादिभिः क्षितितले शय्या जटाधारणं
वासो वल्कलमीदशं कृतमिदं सामान्यमन्यैरपि।
संवेगाभिभवे विमूढमनसा यन्नानुयाता प्रिया
तन्मिथ्यापरिबोधितेन न कृतं स्नेहानुरूपं मया।। इति।

गुणातिपातो– यथा धूर्तविटे विटः–

जात्यन्धां सुरतेषु दीनवदनामन्तर्मुखाभाषिणीं
हृष्टस्यापि जनस्य शोकजननीं लज्जापटेनावताम्।
निर्व्याजं स्वयमप्यदष्टजघनां स्त्रीरूपबद्धां पशुं
कर्तव्यं खलु नैव भोः कुलवधूकारां प्रवेष्टुं मनः।।

अत्र कुलस्त्रीसमुचिता विनयलज्जादयो गुणा विपरीतार्थयोजिताः।

अतिशयो विलक्षकुरुपतौ धतराष्ट्रं प्रति भीष्मः–

एतत्ते हृदयं स्पशामि यदि वा साक्षी तवैवात्मजः
संप्रत्येव तु गोग्रहे यदभवत्तत्तावदाकर्ण्यताम्।
एकः पूर्वमुदायुधैः स बहुभिर्दष्टस्ततो नन्तरं
यावन्तो वयमाहवप्रणयिनस्तावन्त एवार्जुनाः।। इति।

तुल्यतर्को– यथा वत्सराजचरिते ष्टमे ङ्के राजा–

नवार्कभापल्लवितामलोदरे सुगन्धिरेणूत्करकेसरोज्ज्वले।
रसामतज्ञो भ्रमरः सरोरुहे किमर्कपुष्पे प्रणयं करिष्यति।। इति।

पदोच्चयो यथा वत्सराजचरिते षष्ठे ङ्के राजोत्तमसचिवं वर्णयति–

खड्गो रक्षान्धकारे रविररितिमिरे कार्यभारेषु धुर्यः
दीपो मन्त्रान्धकारे सुरगुरुरनये सङ्क्रमो व्यापदोघे।
उत्कण्ठायां सभागी गतिरनवसरे चन्दनं शोकतापे
संक्षेपान्मानुषाभो हितशिवसुखदो भव्यचिन्तामणिर्मे।।

दष्टं प्रत्यक्षं यथा मालविकाग्निमित्रे–

वामं सन्धिस्तिमितवलयं न्यस्य हस्तं नितम्बे

कृत्वा श्यामाविटपसदशं स्रस्तमुक्तं द्वितीयम्।
पादाङ्गुष्ठालुलितकुसुमे कुट्टिमे पातिताक्षं
नत्तादस्याः स्थितमतितरां कान्तमज्वायताक्षम्।। इति।

परोक्षं यथा पादताडितके मदनसेनाया वर्णनं–

उत्क्षिप्तालकमीक्षणान्तगलितं कोपाचितान्तभ्रुवा
दष्टार्धोष्ठमधीरदन्तकिरणं प्रोत्कम्पयन्त्या मुखम्।
शि जन्नूपुरया विकृष्य विगलद्रक्तांशुकं पाणिना
मूर्धन्यस्य सनूपुरः स मदया पादो र्पितः कान्तया।। इति।

उपदिष्टं यथाविमारके प्रथमे ङ्के राजा–

धर्मः प्रागेव चिन्त्यः सचिवमतिगतिः प्रेक्षितव्या स्वबुध्या
प्रच्छाद्यौ रागरोषौ मदुपरुषगुणौ कालयोगेन कार्यौ।
ज्ञेयं लोकानुवत्तं परचरनयनैर्मण्डलं प्रेक्षितव्यं
रक्ष्यो यत्नादिहात्मा रणशिरसि पुनः सो पि नावेक्षितव्यः।। इति।

यथा वा तन्त्रान्तरविषये धूर्तविटे–

शून्ये वासं प्रमर्द्य द्विरद इव लतां यो हरत्याशु नारीं
मत्तां वा यो विदित्वा ह्यभिभवति शनै र जयन्वाक्यलेशैः।
अन्यं कृत्वोपधिं वा छलयति कुरुते भावसङ्गूहनं वा
तस्यैतच्चेष्टितं भो न भवति विफलं वामशीला हि नार्यः।। इति।

प्रवत्तार्थानुसारि परोक्षार्थसाधकं बहूपायोपाधिदर्शनं वाक्यं विचारः–

यथा मुद्राराक्षसे प चमे ङ्के राक्षसवाक्यं–

साध्ये निश्चितमन्वयेन घटितं बिभ्रत्सपक्षे स्थितिं
व्यावत्तं च विपक्षतो भवति यत्तत्साधनं सिद्धये।
यत्साध्यं स्वयमेव तुल्यमुभयोः पक्षे विरुद्धं च य–
त्तस्याङ्गीकरणेन वादिन इव स्यात्स्वामिनो निग्रहः।।

अथवा विज्ञातापरागहेतुभिः प्राक्परिगहीतोपजापैरापूर्णमिति न विकल्पितुमर्हामि।। इति।

विपर्ययो यथा रावणं प्रति सचिवः–

उदर्कसिद्धिमिच्छद्भिः सद्भिर्न खलु दश्यते।
चतुर्थीचन्द्रलेखेव परस्त्रीफालपट्टिका।।

रावणः– परस्त्रीकुचकुम्भेषु कुम्भेषु वरदन्तिनाम्।
निपतन्ति न भीरूणां दष्टयः शरवष्टयः।।

यथा वा मत्तविलासे शाक्यभिक्षुः– परमकारुणिएण भअवदा तहागएण पासादेसु वासो पज्जंकेसु सअणं पुव्वण्हे भोअणं एदेहिं उवदेसेहिं भिक्खुसङ्घस्स अणुग्गहं करन्तेण किं

णु हु इत्थिआपरिग्गहो सुरापाणविहाणं अणादिट्ठं। अहवा सव्वञ्ञो एदंउणपेक्खदि। अवस्सं एदेहि दुट्ठबुद्धत्थविरेहि णिरुच्छाणाणि पळामुट्ठाणि इति तक्केमि।।

भ्रंशो यथा वेणीसंहारे द्वितीये ङ्के क चुकिनमाह दुर्योधनः–

सहभत्यगणं सबान्धवं सहमित्रं सहानुजम्।
स्वबलेन निहन्ति संयुगे न चिरात्पाण्डुसुतः सुयोधनम्।।
क चु– (कर्णौ पिधाय सभयं) शान्तं पापं प्रतिहतममङ्गलम्।। इति।

अनुययो यथा रामाभ्युदये द्वितीये ङ्के रामपराक्रमस्तुतिव्यग्रं मारीचमाह रावणः– आप्रतिपक्षपक्षपातिन् क्षुद्र राक्षसापशद! किं बहुना–

तवैव रुधिराम्बुभिः क्षतकठोरकण्ठस्तुतैः
रिपुस्तुतिभवो मम प्रशममेतु कोपानलः।
सुरद्विपशिरस्स्थलीदलनदष्टमुक्ताफलः
स्वसुः परिभवोचितं पुनरसौ विधास्यत्यसिः।।

इति खङ्गमाकर्षति। तदा प्रहस्तः (उभयोर्मध्ये निपत्य)– प्रसीदतु प्रसीदतु, महाराजः, नेदमनुरूपं स्वामिनः। देव–

लोकत्रयक्षयोद्वत्तप्रकोपाग्रेसरस्य ते।
ईदशश्चन्द्रहासस्य भत्येष्वनुचितः क्रमः।। इति।

माला यथा तापसवत्सराजे राजा–

दष्टा यूयं निर्जिता विद्विषन्तः प्राप्ता देवी भूतधात्री च भूयः।
संबन्धो भूद्दर्शकेनापि सार्थं किं दुष्प्राप्यं यन्न लब्धं भव यः।। इति।

दाक्षिण्यं यथा रत्नावल्यां द्वितीये ङ्के शीर्षवेदनव्याजेन गन्तुमुद्यतां वासवदत्तां पटान्तेन गहीत्वा निरुन्धन् वत्सराजः ''प्रिये, प्रसीदेति ब्रूयाम्'' इत्यादि वदन्निष्क्रान्तायां प्रेयस्यां ''अलमरण्यरुदितेन'' इति ब्रुवन्तं विदूषकमाह– ''मूढ! न लक्षितस्त्वया देव्याः कोपः तत्सर्वथा देवीप्रसादनं मुक्त्वा नान्यमत्रोपायमाकलयामि। तदेहि देवीं प्रसादयितुमभ्यन्तरमेवप्रविशावः'' इति। अत्र राज्ञो नुवर्तनं दाक्षिण्यम्।

गर्हणं दोषस्य गुणीकृतत्वं यथा धूर्तविटे–

प्रणष्टा न व्यक्तिर्भवति वचसः सैव मदुता
न रागो नेत्राब्जे त्यजति न च लज्जा व्यपगता।
स्मतिः प्रत्यायाता परिह्रषितमद्यापि च मुखं
मदो दोषांस्त्यक्त्वा त्वयि परिणतस्तिष्ठति गुणैः।।

गुणातिपाते दोषो यथा वत्सराजचरिते द्वितीये ङ्के विष्णुत्रातः–

नपाः प्रभुत्वात्प्रतिषेधवामा जिह्मो विधिस्तद्वशवर्ति कार्यम्।
साचिव्यतो नापरमस्ति पुंसां विषाददुःखायशसां निदानम्।।

यथा वा तापसवत्सराजे ततीये ङ्के लामकायनः–

पूर्वाह्णे कृतभोजनव्यतिकरान्नित्यैव नीरेगता
कण्डूतिर्वपनादपैति शिरसः स्नानं यदा रोचते।
जात्याचारकदर्थनाविरहितं ब्राह्मण्यमात्मेच्छया
धूर्तैः स वहिताय कैरपि कृतं साधुव्रतं सौगतम्।।

अर्थापत्तिर्यथा धूर्तविटे–

आदष्टस्फुरिताधरे भवति यो वक्त्रारविन्दे रसः
प्रीतिर्या च हृतांशुके च जघने का चीप्रभोद्द्योतिते।
लक्ष्मीर्या च नखक्षताङ्कुरधरे पीने कपोले स्त्रियो
रक्तं तेन विरज्यते न हृदयं जात्यन्तरे पि ध्रुवम्।।

अत्र जन्मान्तरे पि तस्या अनुरक्तिरनुर्वर्तत एवेत्युक्ते जन्मान्तरेष्वपि विरागो न प्रभवति तस्माद्भवबन्धविमुक्तिर्न स्यादित्यर्थापत्तिर्नाम लक्षणम्।

प्रसिद्धिः– प्रसाधकैः प्रकृष्टसाधकैः, प्रसिद्धैः पूर्वमेव सिद्धैः। यथा गदायुद्धे बलदेवः दुर्योधनमाह– भीमसेन इदानीं तव युद्धव चनामुत्पाद्य स्थास्यति।

दुर्यो– किं चाहं भीमसेनेन वञ्चितः।

बल– अथ केन भवानेवंविधः कृतः।

दुर्यो– श्रूयतां,

येनेन्द्रस्य च पारिजातकतरुर्मानेन तुल्यं हृतो
दिव्यं वर्षसहस्रमर्णवजले सुप्तश्च यो लीलया।
दीप्त्या भीमगदां प्रविश्य सहसा निर्व्याजयुद्धप्रियः
तेनाहं जगतां प्रियेण हरिणा मत्योः प्रतिग्राहितः।।

अत्र वाक्यार्थस्य साधका एव भगवतो विष्णोः पारिजाताहरणलीलावटपत्रशयनादयः। अन्ये तु प्रसादकैरलङ्कारिभिरिति गह्णन्ति।

पच्छा शोकादिपरवशतयात्मानं वा परं वा परोक्षे संबोध्य पच्छन्निवाभिधानम्। तन्नोत्तरमपेक्षते तस्यैव प्रत्यायकत्वात्।

यथा रामचरिते हनुमान् सीतां दष्ट्वाह–

स्थाने वसीदसि रघूद्वह किं विधातः
अस्यास्त्वयेक्षितमलक्षणमङ्गकेषु।
अद्यापि जीवसि दशानन हे हनूमन्
केयं तवाभिमुखवर्ति रिपोः प्रतीक्षा।। इति।

सारूप्यं– आदिशब्देन दर्शनश्रवणानुभवनान्युमलक्षितानि। अत्र रूपविभ्रान्त्या न क्षोभजननमेव लक्षणस्य चमत्कृतिः। यथा छलितरामे लक्ष्मणेन बध्बानीतो लवो रामयज्ञशालायां हिरण्मयीं सीतां दष्ट्वाह– ''अये कथमियमम्बा राजद्वारमागता'' इति सहसोत्थाय प्रणम्य तदनन्तरं का चनमयीति निर्वर्ण्योपसत्योपविशति।।

यथा वा वेणीसंहारे– दुर्योधनं हत्वागच्छन्तं भीमसेनं दुर्योधनमिति चार्वाकवार्तयैव भ्रान्त्वा धर्मसूनुस्तं गाढं गहीत्वाह.....

आशैशवादनुदिनं जनितापराधो
मत्ते बलेन भुजयोर्हतराजपुत्रः।
आसाद्य मे न्तरमिदं भुजप जरस्य
जीवन्प्रयासि न पदात्पदमद्य पापः।। इति

मनोरथो यथा विकटनितम्माप्रहसने विकटनितम्बाह

अन्यासु तावदुपमर्दसहासु भङ्गः
लोलं विनोदय मनः सुमनोलतासु
मुग्धाननामरजसं कलिकामकाले
बालां कदर्थयसि किं नवमालिकायाः।।

अत्रात्मानमेव सुमनोलतात्वेनापदिशति।।

लेशो यथाविमारके द्वितीये ङ्के धात्री नायकमाह– अय्य किं चिंतीअदि अविमारकः– भवति शास्त्रं चिन्त्यते।

धात्री– किं णाम एदं रमणिज्जं सत्थं चिंतीअदि।

अवि– भवति योगशास्त्रं चिन्त्यते।

धात्री– (सस्मितं) पडिग्गहीदं मंगलवअणं, जोअसत्थं एव्व होदु।

अवि– को नु खलु वाक्यार्थः। अन्यदप्यभिलाषवशादन्यथा संकल्पयामि। इत्यादि। अन्ये तु लेख इति पठन्निङ्गितज्ञानाभिधानमिति च लक्षयन्ति।

क्षोभो यथा रत्नावल्यां ततीये ङ्के सागरिकैवेति मत्वा वासवदत्तामुपलालयतो राज्ञः सा स्वावकुण्ठनमपनीय वैलक्ष्यमुत्पादितवती।

राजा (अ जलिं बध्वा–) प्रिये वासवदत्ते, प्रसीद प्रसीद।

वास (अश्रु निपातयन्ती) मा एव्वं भण। अण्णगदाइ एदाइ अक्खराइ।

विदू– भोदि, महाणुभावा खु तुमं ता क्खमीअदु दाव एक्को अवराहो पिअवस्सस्स।

वास– णं पुढमसंगमे विग्घं करन्तीए मए जेव्व एदस्स अवरद्धं ण अज्जपुत्तस्स।

अन्ये तु '' आत्मन्यभूत तद्भावभावन''मिति, परे ''त्वन्यगते हेतावन्यस्मिन् कार्यकल्पन''मिति च लक्षयन्ति।।

गुणकीर्तनं यथा वत्सराजचरिते चतुर्थे ङ्के शालाङ्कायनः– नीलनागव्यपदेशेन समन्ततः शस्त्रप्रभाभासुरैरस्मद्योधैः परीतेन महति भयस्थाने विगतसंभ्रमं–

तेन प्रोक्तं धैर्यगाम्भीर्यशौर्यप्रज्ञातेजोनीतिदाक्षिण्यगर्भम्।
वाक्यं सामाद्यं सोर्जितं श्रोत्ररम्यं शास्त्रीकर्तव्यं तद्बुधैः स्वार्थकामैः।।

भरतरोहकः– एष संक्षिप्तविस्तरो नाम।

राजा– ततस्ततः–

शाल– देव, यस्तस्य युद्धे महति प्रवत्ते पराक्रमः साहसला चनः सः
प्रद्युम्नारामार्जुनभीमकर्णसाम्बाभिमन्युष्वविचिन्त्य एव।। इत्यादि

राजा– अहो तु खलु स्वभावसिद्धानां गुणानामव्यभिचारिता। कुतः–

अविदित इति नैकधा प्रयत्नाद्बहुदिवसं बहुधापरीक्षमाणः।
द्विगुणमभिविराजते गुणैः स्वैर्मणिरिव जातिविशेषवान्महार्हः।।

सिद्धिर्थथा तापसवत्सराजे यौगन्धरायणो डोलायितचित्तां वासवदत्तामाह–

कौशाम्बीं परिभूय नः कृपणकैर्विद्वेषिभिः स्वीकृतां
जानास्येव तथा प्रमादपरतां पत्युर्नयद्वेषिणः।
स्त्रीणां च प्रियविप्रयोगविधुरं चेतः सदैवात्र मे
वक्तुं नोत्सहते मनः परमतो जानातु देवी स्वयम्।।

यथा वा तत्रैव द्वितीये ङ्के विनीतभद्रो देवीप्रस्थानं वर्णयन्नाह–

मामुद्धिश्य तथा देव्या बाष्पसंरुद्धकण्ठया।
आर्यपुत्रं प्रतीत्युक्तं वक्तव्यं न समाहितम्।।

प्रियोक्तिर्यथा वत्सराजचरिते सप्तमे ङ्के भरतरोहको वत्सराजाय वासवदत्तां वीणाभ्यासार्थमर्पयितुकामस्तं दष्ट्वाह–

या शेते कौस्तुभस्य द्युतिकिसलयिते शारदव्योमनीले
विष्णोर्वक्षस्युदारे रजनिकरकराकारहारोपहारे।
साभ्येत्यालिङ्गतु त्वां प्रशिथिलगलितेनोत्तरीयेण लक्ष्मी–
र्हर्षादापीडयन्ती नवकमलरजोरोचनाभ्यां स्तनाभ्याम्।। इति

(एवमेव श्रव्यप्रबन्धेष्वपि कथाशरीरसंविधानसंभाषणवैदग्ध्यरूपः कविव्यापारो लक्षणाख्यो द्रष्टव्यः।)

इति षोडशाध्यायानुबन्धः समाप्तः।

श्रीः

नाट्यशास्त्रम्

सप्तदशो ध्यायः

यदान्तररसास्वादकाकुविश्रान्तिसुन्दरम्।
रसाक्षपक्षगं वन्दे तद्वपुः पारमेश्वरम्।।

चतुर्दशाध्याये वाचिकोक्तक्रमे संस्कृतं प्राकृतं च वाक्यमित्युक्तम्। तत्र संस्कृतप्रसङ्गेन छन्दोवत्तलक्षणादि निरूपितम्। अनेन त्वध्यायेन प्राकृतस्य स्वरूपं निरूप्यते। शास्त्रप्रसिद्धसंस्कृतविपरीतप्राकृतप्रसङ्गेन नामधेयिभागरूपरूपणं शास्त्राविहितानां विपरीतरूपत्वात्, नाट्यसमयपातिनो भावमारिषादिनामसमूहस्य पठनधर्माश्च प्राकृते पि किमन्यथा संस्कृतवद्वेति चिन्तायां प्रसङ्गेन कार्यस्वरूपं निरूपितम्। दशरूपकनिर्णयानन्तरं समुचितनिर्णयमपि तथा–

अलङ्कारा विरामाश्च ये पाठ्ये संस्कृते मताः।
त एव यत्नतः कार्याः स्त्रीपाठ्ये पि च संस्कृते।। (१७–१३३)

इत्यध्यायोपान्ते प्राकृतपाठ्यमेवोपसंहरिष्यामीत्यध्यायसङ्गतिः। एतामेव दर्शयति **एवं तु संस्कृत**मित्यादि। पाठविशेषमर्हति, यत्नेन वा पठनीयं, विशिष्टेन रूपेण वा पठनार्हं आन्तरचित्तवत्तिवशादेव वा तथा पठितुं शक्यं, आचार्ययत्नेन वा पठनीयमिति पाठ्यम्। तत्र प्राकृतस्य सामान्यलक्षणमाह (संस्कारेति) संस्कृतमेव संस्कारगुणेन यत्नेन परिरक्षारूपेण वर्जितं प्राकृतं, प्रकृतेरसंस्काररूपाया आगतम्।

नन्वपभ्रंशानां को नियम इत्याह **नाना** यान्यवस्थान्तराणि देशविशेषास्तेष्वात्मा नियतस्वभावो यस्यां, देशविशेषेषु प्रसिद्ध्या नियमितमित्येव संस्कृता एव वाचकाः अनुमाना वन्ये ते त्वन्यत्वे प्रसिद्धिं गता इत्युक्तम्। अवतिष्ठन्ते न्यस्मिन्नित्यवस्थाः देशाः। संस्कृते समे पि प्रातिपदिके विभक्तौ भवितव्यं विपर्यासेन स्वरेण वा देशीपदमपि स्वरस्यैव प्रयोगावसरे प्रयुज्यत इति तदपि प्राकृतमेव, अव्युत्पादितप्रकृतेस्तज्जनप्रयोज्यत्वात् प्राकृतमिति केचित्। संस्कृतेन समानशब्दानुदाहरति **कमलामले**ति। विभक्तौ लिङ्गस्य प्राकृते स्वातन्त्र्यादवश्यं भेदेन भाव्यमित्याह वाक्ये समासोपपन्नं योजितम्। एतत्परिज्ञानस्य फलमाह **एवं संस्कृतमपि योग**मिति। भाषाश्लेषे पताकास्थानकादौ चास्य प्रयोग उक्तः। **अपि** शब्देनेदमाह प्राकृतप्रयोगे समासे पि न संस्कृतसमतेति कमल अमल इन्दु इत्यादौ।

विभ्रष्टमाह ये वर्णा इत्यादि। एतदेव प्रप चयते **'एओआरपराणि अ'** इत्यादिना। एकारात्परः ऐ, ओकारात्पराः औ, ऐकारैकारौ च, येभ्यस्तानि(च)। कियन्ति आह **पाअए**

पादसंख्यया चत्वारीत्यर्थः ऋ ॠ ऌ ॡ। **अंकारपरो** विसर्जनीयः। **वस**कारमध्ये शषौ। (**कचवग्गो**ति) कचतवर्गाणां अन्त्यवर्णाः ङ ञ न इति द्वादशवर्णा न सन्ति। (**कगे**ति) कगादयो लुप्यन्ते तदीयश्चार्धः, स्वराणामेव। (**खघे**ति) खादीनां हत्वं, **खे**ट, परि**घ**, अ**थ**, **धा**न्य (**भा**व्यादीनां) व्य जनस्य न भवति।

भद्रादिषु न भवति। अपि च चोद्रहह्वददुःखादीनामिति। अत्रोदाहरणानि मुखं मुहं इत्यादिकानि। अनादौ स्थाने टकारो डकारश्च **अस्पष्टो** लघुप्रयत्न उच्चार्यः येन क्रमाद्दकारश्च लकाराच्छायौ भवतः। यथा उदरं उदलं **तथैवे**ति।

अपरस्परनिष्पन्ना इत्यन्योन्यमाश्लिष्टा असंयोगरूपा इत्यर्थः। यत्रसंयुक्तास्तेषामिति षष्ठीबहुवचनम्। क्रमेण स्वयमुदाहरति वच्छो इत्यादि। (विपरीत इति) ब्रह्मा बम्हावत् हत्वमिति, उपरिगतो धस्तादिति शक्रं अर्कः (इति) द्वितीयं संयुज्यमानमपास्य स उपरिगत एव चादेशः क्रियते सक्को अक्को। मुनिना च दिग्दर्शिता, विस्तारविजिज्ञासुः प्राकृतदीपिकादिकमवलोकयेत्। उत्पलविरचितायां च सूत्रवत्तौ पद्धतौ च स्फुटं पूर्णं च सर्वमस्तीति तत्रादरः कार्यः।।

संस्कृतप्राकृतरूपैव भाषा वक्तुभेदाच्चतुर्धा संपन्नेति दर्शयति **संस्कृतं प्राकृतं च पाठ्य**मिति। संस्कृतैव भाषा स्वरभेदादिपूर्णसंस्कारोपेता संस्कृतभाषा भाषाभेदानामुक्ता वैदिकशब्दबाहुल्यादार्यभाषातो विलक्षणत्वमस्या इत्यन्ये। पशुपक्षिप्रभतीनां यद्गुतं तत् नाट्यप्रयोगे कुत्राप्यवसरे संभाव्यमित्याह **नाट्यधर्मी**ति। **उपचारो** व्यवहारः। **कारणव्यपदेशेने**ति अवस्थादिवशात् यथा– अर्जुनस्य बहन्नलारूपेण प्रच्छन्नस्य कारणान्याहरते।

ऐश्वर्येणेति श्रुताध्ययनशून्यत्वमनेन लक्ष्यते। क्रीडापीत्यन्ये। व्याजलिङ्गं ये प्रविष्टा जीविकाद्यर्थम्। **चक्राचरा** ये चक्रेण जीवन्ति। भागवता इह देवलकाः। उत्तमग्रहैः देवगन्धर्वादिभिराक्रान्तानां संस्कृतभाषेत्यभिप्रायेणाह **नीचग्रहे**ति। नीचग्रहैः पिशाचादिभिरुपसष्टेषु स्वीकृतेष्विति। नीचजातयश्चण्डालाद्याः। चोक्षा भागवतविशेषा, ये एकायना इति प्रसिद्धाः। लिङ्गस्था यतिप्रभतयः। शिल्पकारिकाः कलासु विदग्धाः। राज्ञः स्त्री महादेवीरूपा उपचाराद्राजशब्दवाच्येति ''अन उपधा लोपिनि'' इति ङीपि राज्ञी यदि पुंयोगादित्यत्र अत इति वर्तते। राज्ञ्याः संस्कृते निमित्तं दर्शयति **सन्धिविग्रहे**ति यस्माद्राज्ञः सन्धिविग्रहसंबन्धं षाड्गुण्यादि तथाग्रहनक्षत्रचेष्टितं, शुभाशुभरूपं पक्षिरुतं च शुभाशुभमितीयत्सर्वं नपपत्न्या ज्ञेयं, तस्माद्राज्ञः सा प्रतिशरीरकल्पा कदाचित्संस्कृतयोग्यापि भवति।

सुखाश्रयमिति। अनेन विशेषलक्षणप्रयोगादि निरस्यति। आम्नायः पुराणादिः लोको नुवर्तते अनुमन्यत इति यावत्। **भुवी**ति अवतीर्णानामिति शेषः। **शुद्धास्वि**ति अनुलोमवशेन संस्कारवत्सु जातिष्वपीति पाठः।

देशभाषां संक्षिप्यमाह **मागधी**त्यादि। भाषा संस्कृतापभ्रंशः, भाषापभ्रंशस्तु विभाषा सा तत्तद्देश एव गह्वरवासिनां प्राकृतवासिनां च, एता एव नाट्ये तु। अन्ये तु निदर्शनार्थत्वादस्य पैशाच्यादयो पि प्रयोज्या इत्याहुः। नरेन्द्राणां यदन्तःपुरं तन्निवासिनामिति संबन्धः। **दीव्यता**मिति कितवानाम्। **शकारा** नीचाभिजनाः आर्थीभूतत्वेन सदर्पाः। **शकाराबहुला** भाषा शकारभाषा। **पुल्कसो** डोम्बः मतप इत्यन्ये। वनौकसामियं **वनेचरी**त्यर्थः। सुरङ्गाखनकाः सन्धिच्छेदकृतः। कारा बन्धनगहम्। व्यसनं कस्यांचिदापदि जातायां मा मां लोको ज्ञास्यतीतित्यभिप्रायेणात्मनो रक्षार्थं नायको पि मागध्या व्यवहरेत्। द्रमिडकादि पूर्वविधानादिनिषेधो विशिष्टेष्विति पर्यन्तवासिषु द्रमिडेषु द्रष्टव्यो, बर्बरान्ध्रादिसाहचर्याद् भाङ्गेलदेशादिगतेषु। गङ्गासागरमध्य इति पूर्वदेश उपलक्षितः।

विन्ध्यसागरमध्य इति दक्षिणसौराष्ट्राः। सुराष्ट्रावन्तिदेशेष्विति पश्चिमः वेत्रवत्यादिनोत्तरः। **वाक्यविधान**मित्येकेनापि पदेन सकलो वाक्यार्थः स्फुटीक्रियते, अन्योन्यरूपता नीयत इत्यभिप्रायेण वाक्यग्रहणं पदविधानं हि भविष्यति। **देवानां** देवाः स्तुत्याः। **तथे**ति स्त्रीत्वेन भगवतीति। **नानाश्रुतधराः** बहुश्रुताः। **क्षाम्य**मित्यङ्गीकर्तव्यम्। सचिव इति राज्ञो मन्त्री।

सपरिवारं नाम्नेति **उत्तमो** राजा हीनैः स्वनाम परिगह्य, यद्यन्नाम वत्सराज सोमवंशमौक्तिकमणे इत्यादि तेन, भाष्यः। **सपरिहास**मिति वा पाठः परिहासः परितोषोपलक्षणं तेन चाटुकारादि परितोषावसरे हीनैरपि राजा नाम्ना संभाष्यः। ''उदयने महीं शासति को विपदामवकाशः'' इत्यादौ। कारुकाः स्तूपकारादयः शिल्पिनश्चित्रकारादयः। **भावेत्या**मन्त्रणं विवक्षितमित्यन्यविभक्त्यन्तो न प्रयोज्य इत्येत वयुक्तम्। **वयस्ये**त्येवमादावपि प्रसङ्गात्संभाषणापक्रमकृताद्यामन्त्रणविभक्तिः सर्वत्र विवक्षितैव। अधमैर्जनैः समानो धम एव, **हंहो हण्डे** इति वा संभाष्यः। चकाराद् विनापि हेशब्देन। **कर्म** पाकादि, विद्या त्रय्यादि। जातिर्गोत्रं देशो वा। शाक्याः सौगताः, निर्ग्रन्थाः क्षपणकाः। शेषाः पाषण्डा इति पाशुपतादयः। स्वसमयो यथा पाशुपतानां भापूषन्, भासर्वज्ञ, इत्यादि संभाषणम् तथा क्वचिद्वाक्यादिशब्देन। **अपत्यप्रत्ययेने**ति कौरवेत्यादिना महाराजेति। यौवनादन्यत्रार्यपुत्रेति श्वशुरेण व्यपदेशः, तस्य यौवनं शृङ्गारोचितमुक्तं भवति। अनुजो ज्येष्ठेन पुत्रवत् **वत्स तात पुत्र**केति संभाष्यः। **पुरुषाभाषण**मिति भूयस्त्वाक्षेप उपसंहारः। स्त्रीसंभाषणं त्वपि मध्ये निरूपितं **तपस्विन्य** इति पूर्वं तेषां योषित इति, अत्र स्वयमतपस्विन्यो पीत्युक्तमिति न पुनरुक्तम्। **गुरुभार्या** मान्या अन्या वा स्त्री, स्थानीया पूज्या ईषद्वद्धा। **पत्नी**ति सहधर्मचारिणी, अत एव नटी नाट्यवेदमहासत्रदीक्षितेन सूत्रधारेणार्येणार्ये इत्यामन्त्यते। **पितनाम्ने**ति माठरपुत्री। सुतस्येति सोमशर्मजननी। वेश्या स्वेन परिजनेन अज्जुके इति संभाष्या।

सर्वदेति यौवने पि पुरोहितादिभिरार्येति भार्या वाच्या। **औत्पत्तिका**नीति स्वयं वा येन कल्प्यन्ते, अत एवाख्यातानि तल्लिङ्गार्थानि प्रकृतार्थसूचकाभिधेययुक्तानि कार्याणि।

एतदेव निदर्शनेन स्फुटयति **ब्रह्मक्षत्रस्ये**त्यादिना। शौर्योदात्तानीति **भीमपराक्रम** इति यथा। **विजयार्थानी**ति शुभलक्षणविजयवतीत्यादीनि। देवदत्तावसन्तसेनाविदग्धमित्रेत्यादि वेश्यानाम्। **नानाकुसुमनामानी**ति मालतीमल्लिकेत्यादि कुसुमग्रहणं तन्म जर्याद्युपलक्षणं चूतलतिकेत्याद्यपि हि दश्यते नाम। **मङ्गलार्थानी**ति सिद्धार्थका इत्यादीनि। **गम्भीरार्थानि** अभोक्ष्य इत्यादीनि। नास्ति संकेतको भार इत्याशयेन पच्छति अत्रोत्तरं नामानुरूपमिति। नाम किलेश्वरेच्छावशात्स्वरूपक्रोडीकारेणैव जायते। तथा हि नामाक्षरे ग्रहाभिचारयन्त्रकर्मादिपीडिते शान्तिकपौष्टिकाद्युपचारभाजि वा तथैव पुरुषस्य फलोदय इत्यभिप्रायः। कवित्वयुक्तो नट इत्यभिप्रायेणाह **भाषाविधानं ज्ञात्वा, तत** इति तत्परिज्ञातपूर्वकं काव्यं कृत्वा प्रयोगे पाठ्यं प्रयु जीतेत्यर्थः। यदि त्वन्यः कविस्तदा पाठ्यस्य संज्ञा च मूलभूतत्वात् प्रयोक्तत्वेनोक्तो द्रष्टव्यः। **षडलङ्कारसंयुत**मिति स्वरस्थानवर्णकाक्वलङ्काराङ्गानि षट् अत्रालङ्कारशब्देन विवक्षितानि, एतैर्हि भूषितं काव्यं पाठ्यमुच्यते।

एवं हि वक्तव्यत्वमुपादानस्य सकल स्वविवक्षाविशिष्टार्थप्रतिपादकत्वं पठनार्हं च पाठ्यं तत्स्वराद्यायत्तं सर्वमिति। अत एवाह **पाठ्यगुणानि**ति गुणाः उपकारकाः, यदुपकृतं काव्यं पाठ्यं भवतीत्यर्थः।

उद्देशक्रमेण व्याचष्टे **तत्रे**त्यादि। स्वरगतं वितत्य गेयाधिकारे प्रकटयिष्यामः। इह काकुषु स्वरा एव वस्तुत उपकारिणः। तत्परिकरभूतं तु स्थानादि स्वरेषु प्रकृतिभूतेषु काकुरूपता जन्यते। तत्र स्थानशब्देनैषां स्वरूपनिष्पत्तेराश्रयो दर्शितः। उदात्तनुदात्तस्वरितकम्पितरूपतया स्वराणां यद्रक्तिप्रधानत्वमनुरणनमयं त यागेनोच्चनीचमध्यमस्थानस्पर्शित्वमात्रं पाठ्योपयोगीति दर्शितम्। यदि हि स्वरगता रक्तिः पाठ्ये प्राधान्येनावलम्ब्येत तदा गानक्रियासौ स्यात्, न पाठः। पूर्णस्वरत्वाभावादङ्गानां भेद इति चेत् न, अपूर्णस्वरत्वे पि गानत्वप्रतिज्ञानात्, षाडवौडुवितयोः त्रिचतुरस्वरत्वे वि गानप्रतीतिर्भवत्येव, यथा कृत्रिमवंशिकायां त्रैस्वर्ये, भिन्नषड्रजभाषायां च कालिन्द्यां चातुस्स्वर्ये। तस्माद्गानवैलक्ष्याय रक्तिलक्षणं धर्ममनादत्योच्चादिस्थानस्पर्श एवात्र प्रधानमिति वक्तुं वर्णोपादानम्। अन्यथा स्वरसप्तकातिरिक्तस्योदात्तदेर्भावादनर्थकं तदुपादानम्।

यत्तु किंचिदुदात्तादिधर्माणां गात्रस्य निग्रहः कण्ठविवरस्य संवतेत्यादिशिक्षा–––पठितोदात्तादिधर्मप्राप्तेरुच्चाद्यलङ्कारेषु यथा स्यादिति प्रयोजनमुक्तं, तत्राप्यस्मदुक्तं चेन्न प्रयोजनं किं तद्धर्मप्राप्त्या कृत्यमिति न वि ः।।

नन्वेवं स्वराभिधाने किं प्रयोजनं, उच्यते– प्राणभूतं तावद्ध्रुवागानं प्रयोगस्य, तत्र जात्यंशकविनियोगो भविष्यति तदिदानां पाठावसरे किं सर्वथैव त्यक्तव्यमित्याशङ्काशमनाय तत्स्थायिस्वराश्रयणं प्रमुखीकृत्य पाठः कर्तव्य इत्येतत्स्वराभिधानस्येह प्रयोजनम्।

एवमुपगानवैलक्षण्ये संपन्ने बाह्यार्थसमर्पणेन चित्तवत्तिसमर्पणया वाभिनयानुभावरूपतालाभाय काकुरर्थरसभेदेनाभिधीयते। तत एव काकुरूपत्वमेव सर्वत्रानुयायि अतिशायित्वे मुख्योपयोगात्। तथा चोच्चदीप्ताद्यलङ्कारेष्वप्युत्तरत्र काकुशब्देनैव मुनिर्व्यवहरिष्यति। काकोरेवोपकारसंपादकाः परिपूर्णतायायिनो — —लङ्काराः, अलमिति पर्याप्त्यर्थः, इह न भूषणार्थः। अङ्गानि तु विच्छेदादीनि रसमर्थं शोभादि कर्म च पोषयितुं काकोरेवोपकारीणीति, एवं परमार्थतः काकुरेवायं प चमी रूपान्तरै पूर्णीक्रियते। काक्वा च पठ्यमानस्य स्वोचितचिज्जडस्वरूपार्थाभिमुख्येन नयनेनाभिनयता नीयत इति काकुरेवात्र प्रधानम्। तथा चैतदध्यायान्ते चोपसंहरिष्यति ''उक्तं काकुविधान''मिति। अन्यथाङ्गषट्कमध्यपतितस्योपसंहारो न्याङ्गनिरूपणं चाभिधानमिति सर्वमसम जसं स्यात्। तस्मात्काकुरेवात्र प्रधानमिति उपाध्याया **हि** वचनस्य सङ्केतितमर्थमन्यथाकारं समर्थयन्ति।

ननु श्रुतमर्थमनादत्य कथं काकुरेवं कुर्यात्। तत्रोक्तमन्यैः वस्तुस्वभावो त्र द्रष्टव्यो न हि दष्टे नुपपन्नं नामेति। वयं तु ब्रूमः— इह येयं प्रथमेन संवित्स्पन्देन प्राणोल्लासनया वर्णादिरूपविशेषहीना वाग् जन्यते सा नादरूपा सती हर्षशोकादिचित्तवत्तिं विधिनिषेधाद्यभिप्रायं वा तत्कार्यलिङ्गतया वा तादात्म्येन वा श्रुत्यन्त्यादि गममतीति तावत्स्थितम्। तथा च प्राण्यन्तरस्य मगसारमेयादेरपि नादमाकर्ण्य भयरोषशोकादि प्रतिपद्यते, तदयं नादाच्चित्तवत्त्याद्यवगमो नुमानं तावत्। ये त्वेते वर्णविशेषास्ते तन्नादरूपसामान्यात्मकपदतन्नुग्रन्थिमया इव प्राच्यप्रयत्नातिरिक्तनिमित्तान्तरापेक्षाः, तत एवान्यत्रानभिप्रेते न्यथापि प्रयोक्तुं शक्याः, अत एव दष्टव्यभिचाराः। नादस्तु झटित्युद्भिन्नमुखरागपुलकस्थानीयो नान्यथासिद्धो न्यथासिद्धं शब्दार्थं बाधत एव वा। यथोक्तं ''भीरु न मे भयं'' इति ब्रुवन्नाशयते भयमित्यन्यप्रकारतां वा वाक्यार्थस्य विशेषार्पणेन विधत्ते। एतच्च वक्ष्यामो ग्न इत्यास्तां तावत्। सर्वथा पाठ्ये काकुः प्रधानमिति स्थितम्। अत्र **हास्यशङ्गार**योरित्यादिना जात्यंशकविनियोगं भविष्यन्तमनुवदंस्तद् द्रुतस्थायिस्वरानुसारेण काकोः प्रयोग इति दर्शयति।

अथैषां स्वराणामाश्रयान् दर्शयति **त्रीणि स्थानानी**ति। ननु पाठावसरे वर्णा यत्र मूर्धन्यास्तत्र कथमुरःस्थानस्वरनिष्पत्तिः, एवमन्यत्र वाच्यम्। उक्तं मन्द्रनादात्मिकाया वाचः स्वरसप्तकं रूपं, सा चोरःस्थाननिष्पन्ना सती मूर्धानमभिघ्नन्ती मूर्धन्यं वर्णं तद्रूपं मन्द्रस्वरानुविद्धं दर्शयति। न च मूर्धस्थानत्वे पि तस्योच्चताकृतं तारत्वमापद्यते। अन्यदेव हि वर्णनिष्पत्तिस्थानं, मूर्धान्तर्वर्त्यनुविवरमात्रं स्थानान्तरम्। स्वरनिष्पत्तिस्तु विततविते मूर्धकाये निष्पद्यमाना तारत्वं संपादयन्ती एवं तारमन्द्रमध्यता सवर्णानां सर्व (स्वर?) स्थानभेदसंपाद्यमानवपुषामप्युपपद्यते। तत्र स्वरग्रहणादेवाक्षिप्ते स्थानभेदे पुनः स्थानोपादानं षट्षष्टिस्थानभेदनिवत्त्यर्थम्। तथा ह्युरःस्थाने द्वाविंशति स्यानानि यत्र श्रुतयः स्वराश्च। एवं कण्ठे मूर्ध्नि च। तावतां च स्पर्शे स्फुटं गानमेव स्यात्, न पाठ्यमित्यवोचाम। अत एव

गुणशब्दो न धर्मवचनः पाठ्यगुणानिति, किं तु, उपकरणवचनस्थानं च यदेवोपकरणं भवति। अपि च **शारीर्यामथ वीणायामि**त्यादि केचिद् व्याचक्षते– इहार्थकाकुस्तावद्विधिनिषेधाद्यर्थावगमिका, स्वरकाकुस्तु चित्तवत्तिसूचिका। एदद्व्यापारद्वयशून्यान्नेपथ्यपाठवैतालीयपाठादिविषया दूरस्थाभाषणादिविषया च शोभासंपादनदूरश्रवणादिप्रयोजना स्वरकाकुः सा तेन वक्ष्यत इति। एवं प्रष्टव्यास्तावत्– यो यं स्वरकाकोर्विषय उक्तस्तत्र यद्यर्थरूपं किंचिदभिधेयं तत्रावश्यमर्थकाकोर्वा पथक्स्वरकाकुः। तथा हि नेपथ्यपाठे पि क चुकी पठति 'वीरो यमङ्गदः पठति', 'यौगन्धरायणः पठति' इति, एवंभूतवत्तिचित्तवत्त्यादिविशेषप्रतिपादकेनैव पाठेन भवितव्यम्। वैतालीयपाठे पि समुचितावसरावेदनप्रधाने वश्यमर्थ आदातव्य एव। उक्तं चैतत्– अर्थानपेक्षया किमभिनयनमन्यचिन्तया, पुस्तकवाचकपाठो ह्यनुक्रिय– –माणो भिनयतामवलम्बते। अन्यथाभिनयरूपत्वाभावेतदुपकरणधर्म्यादितत्फल– –रसादिव्यतिरिक्तत्वे स्वरातोद्यगानादिवैलक्षण्ये च चिन्तयैव किं प्रयोजनमिति। न स्यात्काकुसामान्यलक्षणमेतेन किं घटत इत्यन्ये। एव**मपि भवतीत्य**समर्थितं स्यात् तद्धि पूर्वप्रक्रान्तवस्तुसमर्थनेन प्रयुज्यत इति मुनेः शैली। तस्मात्पूर्वोक्तस्थानत्रय– –समर्थनार्थो यं श्लोकः। तदयमर्थः– शारीर्यां वीणायां केवलमुरःशिरःकण्ठलक्षणेभ्यः त्रिभ्य एव स्थानेभ्यो, न तु षट्षष्टिस्वरपरिव्यक्तर जनात्मकगानोपयोगिव्यापारः काकुभूतः सूचकरूपः संप्रवर्तते।

अथशब्दो वधारणे। बाह्यायां हि प्रतिबिम्बितायां वीणायां र जनात्मकखरस्वरूपव्यतिरेकेण न काकुसंपत्तिः। वीणाग्रहणं शरीरगतविवत– –मध्याकाशदेशपरिग्रहार्थं, न शरीरमात्रे स्वनिष्पत्तिः, अपि तु तत्रैव। येयं बाह्यवीणादण्डस्थानीया उत्तरोत्तरस्थानपरम्पराविशिष्टा, सा स्थानसोपानपङ्क्तिः स्वरनिष्पत्तिस्थानम्, अत एव काकुस्वरमपि लक्षितम्– कक लौल्ये, लौल्यं च साकांक्षते यथा स्वरवैचित्र्यं लक्ष्यते ईषद्यतो वाच्यभूमिः संपद्यते सा काकुः, ईषदर्थे कुशब्दस्य कादेशः। काकुर्वा जिह्वा तद्व्यापारसंपाद्यत्वात् काकुः।

एवं स्थानस्वरूपं विभज्य तस्य विषयभेदमादर्शयितुमाह **आभाषणं च दूरस्थ** इत्यादि। शिरसेति शिरोनिष्पन्नेन तारेण नादेनेत्यर्थः। नातिदूरे कण्ठेनेति मध्येन, उरसा समीपे मन्द्रेणेति यावत्।

एवं स्थानत्रयस्य पथगुपयोगमभिधाय युगपद्दर्शयति **उरसोदाहृतं वाक्य**मित्यादिना। मन्द्रस्वरेण वा पाठमारभ्य क्रमेण तारं गत्वा मध्येन परिसमाप्नुयादिति श्लोकार्थः। यदा हि न दीप्तेन क्रोधादिना नापि मन्द्ररूपेण शोकादिनाविष्टहृदयो भवति तदा क्रमेण वक्तव्यवस्तुविषयोत्साहविस्फारणात् तारान्तं गच्छन्नुपसंहारे मध्य एव विश्राम्यतीत्यनवशिष्टस्यायं सामान्येन पाठधर्मः। अत एव शान्ते व्याभिचारिबलावेशशून्यतायामयमेव पाठधर्मः। वैतालीयपाठे चायमपि सामान्यधर्मो स्तु। न

तद्विषये स्वरकाकुः। कस्तर्हि तस्या विषयः, उच्यते– कदाचिदर्थस्य धर्मपु जवाच्यस्य धर्मान्तराधानं काकुरुच्यते, कदाचित्स्वरजनकचित्तवत्त्यर्पणं करोति। यत्र रसस्वरकाकुव्यवहारः कदाचिद्वा नादात्मनि स्वात्मसूत्रे सुगुम्भितस्य स्वग्रन्थ्यात्मनो वर्णराशेर्दूरश्रवणं किंचिच्छ्रवणमश्रवणं वेत्यस्मिन्नर्थे व्याप्रियते। तत्रापि स्वरकाकुरुच्यते। यत्रोक्तमभाषणं दूरस्थमित्यादि तदेवं व्यतिरिक्ते स्वसेवा व्यापाराद् व्यतिरिक्तजडचिद्भेदेन भेदात् तदर्थरसस्वरभेदात् त्रिधैव काकुः।

एवं स्थानभेदमुक्त्वा क्रमप्राप्तं वर्णस्वरूपमाह **उदात्त**श्चेति। उच्चता नीचता मध्यमता उच्चनीचोभयडोलावलम्बनमिति चत्वारः स्वरधर्माः। वर्णा गुणा यदि वा पाठक्रियाविस्तारका विवण्वते प्रकटयन्ति स्वार्थविशेषमिति वा।

पाठ्ययोगे काव्ये स्वरस्य रक्तिभागमपहाय वर्णा एव वक्तव्याः। रक्तिभागाभिनिवेशे तु गानयोगो न पाठ्ययोगः स्यादित्यवादिषुः। तत्रान्वयव्यतिरेकाभ्यां रक्तिभागे नुदात्तादिवर्णभागः कादिवर्णभागः। तस्य स्फुटतास्फुटत्वमित्याह यो धर्मस्तन्त्र्यामनुरणनप्रधानामरक्तकण्ठे गातरि यथाकथंचिद्वक्तुं प्रवत्ते हुडुक्कामुरजादौ च पथग्लक्ष्यत एव। एवं प्रधानतया धर्मान्तराणि मग्नत्वेन तत्रापि सन्त्येव। अत एवाह **तपोधनाः** सूक्ष्मवेदिनो यूयमत्राधिकृता विचार इत्याशयः। एषां वर्णानां विषयमाह– **हास्यश्रङ्गारयो**रित्यादि। मध्यमप चमावित्यादौ प्रकरणे यथासंख्यं न विवक्षितमित्येवं हास्ये मध्यमायाः प चम्या वा जातेः स्थायिस्वरत्वं गहीत्वा तत्रैवोच्चमध्यमस्थानस्पर्शेन पठेत्। एवं श्रङ्गारवीरादिषु त्रिषु षाड्ज्या आर्षभ्या वा स्वांशं गहीत्वा तत्रैवोदात्तकम्पितैः पाठः, करुणे निषादवत्या गान्धार्या वा स्थायिनमालम्ब्यानुदात्तेन पाठः, बीभत्से धैवत्यंशस्वराश्रयेण स्वरितकृतः (पाठः)। भयानके तत्स्वरावलम्बनेनैव (धैवतांश) कम्पितप्रधानः (पाठः)– इत्येवं भविष्यत् (अ–२६) जातिविनियोगानुसारिस्वरानुवादेन वर्णेषूदात्तादिषु तात्पर्यं, न तु स्वरेषु। तेषां तु पथगुद्देशप्रयोजनं षष्ठे दर्शितमन्तरालापपरिग्रहमिति।

एवं काकोः स्वरूपोत्पत्तिं प्रतिपाद्य तस्या अर्थविषये व्यापारं दर्शयन्नुद्देशक्रममप्यनुसर्तुमाह– **द्विविधा काकु**रिति। वाक्यस्येति साकांक्षं यत्र वाक्यं तत्र काकुः, तथा वक्तगता वाकांक्षा वाक्य उपचर्यते। सा च प्रकरणादिबलान्निश्चीयते। विशिष्टविषयत्वं चाकांक्षायास्तत एवावगम्यते। तदाह– **अनियुक्तार्थकं वाक्य**मिति। यादशो वाक्यात्सङ्केतबलानार्थः प्रतीयते तादश एव यत्र न्यूनाधिकः प्रमाणबलेन निर्णययोग्यस्तद्वाक्यं निराकांक्षं, तद्विपरीतं साकाङ्क्षम्।

एवं वाक्यस्य स्वरूपं प्रतिपाद्य तन्निष्ठां काकुमभिधातुमाह **तत्र साकाङ्क्ष**मित्यादि। अनियुक्तार्थं यत्साकांक्षमुक्तं तन्मन्द्रोपक्रमं तारसमाप्तिकं पठनीयमिति। सर्वाणि क्रियाविशेषणानि कियन्ति तत्र तारतेत्याह **कण्ठोरःस्थान**(गत)मिति। तथा वर्णा उदात्तादयो लङ्काराश्चोच्चनीचदीप्तादयो परिसमाप्ता अर्धस्पष्टतयैव त्यक्ता यत्रेति क्रियाविशेषणम्। एवंभूतो यः क्रियाविशेषणत्वेन वाक्ये पठ्यमाने ध्वनिधर्मविशेषः सा काकुः।

यदि वा धर्मिनिष्ठ एवेति। तत्राकांक्षार्थान्त एवातदर्थगत एव वा विशेषे तदर्थाभावे वा। तथा च–

यद्रामेण कृतं तदेव कुरुते द्रोणातमजः क्रोधनः। इति

अत्र काकुः कृत इत्युदात्तकम्पितवर्णस्योच्चदीप्तालङ्कारस्य चासमाप्त्या, अतो प्यधिकं कुरुत इति काकुप्रभावादर्थान्तरे गतिः। 'स एष दशकन्धर'मिति श्लोके 'तदात्मज इहाङ्गद' इत्यत्र साकांक्षा काकुः स्वगतान् वालिपुत्रोचितान्विशेषानर्पयति। 'स्वस्था भवन्ति मयि जीवति' इत्यत्र साकांक्षा काकुर्भावनाभावमाह, वचनोच्चारणं त्वर्थे संभावनां विदधतावश्यनिषेधात्मनो विषयमर्पयति। तदियमर्थाभिप्रायसमर्पकाभिनयरूपार्थकाकुः साकांक्षा। एतद्विपरीता निराकांक्षा, तस्याः शिरःस्थान एव मन्द्रःतारताप्रतिस्थानं, ह्युत्तरोत्तरतारत्वमधराधरमन्द्रत्वं च वक्ष्यामः। अलं पर्याप्तं काकोः स्वरूपं येन संपाद्यते सो लङ्कारः। तत्स्वरूपं च स्थानत्रयस्य प्रत्येकमूर्ध्वाधोमध्यकल्पनया उदात्तानुदात्तस्वरितकम्पितनिर्वाहात् तत्र मध्यो भागस्तावदनावेशे सर्वत्र स्थित एव। इत्यावेशेनोर्ध्वमधरं स्थानत्रयस्य प्रत्येकमवलम्ब्यत इति षडलङ्कारा भवन्ति। तत्र शिरस्याग्रभागे तार उच्यते दूरस्थाभाषणादौ, स विषयो त्र स्वरकाकोरित्युक्तम्। विस्मयावगतौ तु सैव रसकाकुः, परस्य त्रासनाभिप्रासेण तु सैव विभावकाकुः। स्वरकाकोरेव श्रुतिकाकुश्चेति भेदेन शिरस्येव ऊर्ध्वस्तारतम आक्षेपादौ, तारशब्दः प्रकर्षोपलक्षणम्। अत्र ह्याक्षेपादौ यथावस्थं श्रुतिविभावरसकाकुभेदत्रयं विभजनीयम्। उरस्यूर्ध्वभागे स मन्द्रः, उरस्येव नीचभागे मन्द्रतमो नीचः। दैन्ये काकुर्द्विरूपतामेति– स्वचित्तवत्त्यर्पणाद्रसकाकुः परस्य रूपोत्पादनाद्विभावकाकुः। उभयस्यापि तत्र प्राधान्येनादरणात्, अन्यत्र तूभयस्यानादरणात्प्रधानांशेनैव व्यपदेशः। स्वभावाभाषणं यत्र कश्चिदावत्तकण्ठस्वर एव वक्ता भवति, त्रासने पतितः त्रस्तपतितः, त्रासावसरे तु दीप्तैव काकुर्भवति। कण्ठगत इति कण्ठस्थाने ऊर्ध्वभागे निष्पन्नः, तेन स्थानभेद एवालङ्कारत्वे प्रयोजकः। अत एव त्वरित इत्यनेन पुनर्लयविधानम्। लल्लं सविलासं, लडं विलासं लातीति क्विबन्ते कर्मण्युपपदे लडयोरैक्यमिति। मन्मनमव्यक्तं अहमेव मनो मन्ता यत्रेति, अनेनाश्रूयमाणमनुनासिकोपलक्षितमित्यपरे। ''लल्लमन्मनौ नायिकागतौ बालविनोनसान्त्वनादौ, मु चेत्येवं प्रायपराभियोगानङ्गीकरणादौ च'' इत्युपाध्यायाः। मन्द्रापि काकुश्चात्र भवतीति संग्रहश्लोके वक्ष्यते। आत्ययिकं शीघ्रसंपाद्यं यत्कार्यम्। आयस्तमावेगः। कण्ठस्थाने तु नीचभागे निष्पन्नो विलम्बितः। लल्लत्वमविवक्षितमेव। अव्यक्तार्थः प्रवादः– अन्तरङ्गत इति लोके प्रसिद्धो यत्र। परो बुध्यतां च न बुध्यतां चेति वक्तुरभिप्रायो भवति यन्न स्वगतं न परगतमत्रेति। अलङ्कारेषूच्चा दीप्ता द्रुता चेति यथायोगं स्थानत्रयमत्र स्वीकृतमित्यर्थः।

अथ सर्वसंग्रहार्थमाह **यानि सौम्यार्थयुक्ता**नीति। सोम इव ह्लादकः सौम्यः, शाखादित्वाद्यः। सुखस्य हेतवः कार्यश्चेति सुखभावकृतशब्देन समासभेदात्संगहीतम्।

नानाश्रयोपेतमिति नानास्थाननिविष्टं कृत्वेत्यर्थः, स्थानभेदः काकूनां पर्याप्ताकारीत्युक्तम्। अतः काकोरेव प्राधान्यात्तामेवोपसंहरति **अथाङ्गानी**त्यादिना।

प्रस्तावान्तरं दर्शयति तत्र वर्णोच्चारणे वर्णध्वनिशून्यो यः कालस्तदाश्रयो ङ्गव्यवहार इति वद्धाः, स हि षोढा कालः ''ततश्च भूयान् पुनरादिमध्यौ'' भूयान् पुनरित्ययं हि विच्छेदः। आदौ मध्यः मध्यान्ते चार्पणं वाक्ये पूर्वं भूयान्मध्ये द्रुतश्च विपरीतको यः स विसर्गः। बहुषु द्रुतो थ मध्यो मनाग्द्रुतो न्ते नुबन्धः स्यात्। त्रिस्थाने द्रुतमध्यविलम्बितयुग् दीपनं सदारोहि विपरीतं प्रशमनं स्यात्, लयत्रयं चैकरूपनिर्वाहादिति संग्रहकारः।

एतन्मतेनैव लक्षणानि व्याचक्षते। एतच्चासत्। द्रुतमध्यादिलयैरेवास्यार्थस्य न त वान्न च लयव्यवहारसाम्ये कालस्येति नियमकारणमस्ति। किं च लयवैषम्यस्य वाक्यचैतन्यापेक्षया न भागत्रयकल्पनयैव भेदा उक्ताः, भुजङ्गविजम्भितादिवाक्ये नन्तभागसंभावनात्। भागत्रये च द्रुतमध्यविलम्बितानां द्विभेदत्रिभेदत्वानन्त्ये षट्संख्यानियमविप्लवः। ''क्वाकार्यं'' इति हि श्लोकप्रथमखण्डेषु मध्यमलयो भूयो पि दश्यते। सेत्यादिषु पाश्चात्यखण्डेषु तत्स्मरणजनितसुखविश्रान्तिदायिषु विलम्बित इति द्विलयभेदः प्रयोगः। भागत्रयकलनायामपि साम्येन वैषम्येण चानन्तप्रकारता भवतीति कथं स्यात्। कस्मादेतत्सर्वं लयाभिधानेनैव न संगहीतम्। तस्मात्सूत्रस्थानीयपदरत्नानां पाठकाले त्वादावुक्तत्तद्धर्मषट्कमङ्गषट्कमुच्यते। तथा च मध्ये त्रुटितत्वमत्रुटितत्वं वा तावतो विच्छेदानुबन्धौ, पीवरत्वमपीवरत्वं वा इमावर्पणविसर्गौ, आरोहणमवरोहणं वा ते दीपप्रशमने। एवं भावाभावतः, उपचयापचयतः, आरोहावरोहतश्च षड्भेदो नादः। वाक्यस्य न्यासं त्यजनमनादरणं तन्नादस्येति यावत्। वैस्वर्यं स्वरत्वेन विहितेषु अन्तरालश्रुतिविशेषेषु ध्वनि (वि)संवादना वतीति सर्वत्राभ्यूह्यम्। **हास्या**दयः शब्दास्तद्व्यभिचारिणो पि स्वीकुर्वते। ततश्च तद्व्यभिचारिणो न्यरसान्, रसान्तरे पि तदा व्यभिचार्याश्रये वा काकुरिति मन्तव्यम्। **सर्वेषामि**त्यादिनाङ्गानां मूलभूतं स्थानभेदं स्मारयति। **तत्र दूरस्थ** इत्यादिना विनियोगवाक्यानां लक्ष्ये एकवाक्यतां सूचयति। तथा हि श्रङ्गारे यदुदात्तस्वरितमुक्तमर्पणविच्छेदाद्यङ्गजातं विलम्बितं चालङ्कारः तद्दूरस्थाभाषणे कर्तव्ये शिरःस्थाने षड्जप चमयोरन्यतरस्थायिस्वराश्रयेणांशस्वरविभागचतुश्चतुष्कशिरसेत्यादिना पौनरुक्त्यं स्यात्।

अथ दीपनप्रशमनयोर्वक्तव्यशेषमाह **मन्द्रात्तारं न गच्छेदि**त्यादि। मन्द्रतरात्तारं तारतमान्मन्द्रं चेत्यर्थः।

उद्देशग्रन्थ एव केचिल्लया विरामाश्चेत्यभिधीयन्ते।

अन्ये त्वाहुः– कालस्य सर्वस्यापरिभाव्यत्वान्नोद्देशेन प्रयोजनं मतिमन्तस्तु मन्यन्ते। विच्छिदेनैव च लयमेतत्स्वीकृतम्। विच्छेदो विरामः, स च कियन्तं कालमिति लयो पि तेनैव स्वीकृतः। तेन विच्छेदस्य परीक्षेयं कथितेति। तत्रेति विच्छेदे, अर्थसमाप्तिनिमित्तं विरामो वास्य कार्यः। अर्थो वान्तरवाक्यार्थः। न **च्छन्दोवशादि**त्यनेन कविना

प्रयोगपरतन्त्रेण तदा स तदवसरोचितविरामवति वत्ते ग्रहणप्रयत्नः कार्यः। प्रयोक्त्रापि कविपरतन्त्रेण न भाव्यमित्यत्रापि तेनार्थवशाद्विरामः कार्य इत्याख्यातम्। संख्यात्र नियमोपलक्षणं **एकद्वित्री**ति। किमित्येतावत्यवान्तरवाक्यार्थे विच्छेदः **किं गच्छे**ति।

नन्वेवमेकवाक्यत्वाभावो दूषणमित्याशंक्य प्रत्युत भूषणमेतदित्युपपादयन्नाह– ''सूचासु चाङ्कुरगते च तथोपचारेष्वल्पाक्षराणि हि पदानि भवन्ति काव्ये'' इति। बहुप्रकारैः सूचाभिनयैः अङ्कुरप्रकारैश्च युक्तमित्थं काव्यं भवति यदि स्वल्पाक्षराणि पदान्यसमस्तानि भवन्ति। बह्वक्षरपदे, दरिद्राश्च किं यस्ते(?) इत्यादौ न मध्ये सूचाङ्कुरयोरुपपत्तिः।

''तस्यास्तन्मुखमस्ति सौम्यसुभगं किं पार्वणेनेन्दुना''

इत्यादौ तु तस्या इत्युक्त्वा मध्ये सूचया तदित्यसाधारणविशेषस्मरणं स्वात्मनि तच्चावलोकने तथाकर्णने च प्रच्छन्नस्थिताया नायिकाया निवत्त्यङ्कुरे वैचित्र्यं पुनः परिचुम्बनाभिलाषसूचायोगपूर्वकं मुखमिति पाठस्तत्कृतो नायिकाया रणरणकादरदर्शको निवत्त्यङ्कुर एवात्र मन्तव्यः। यत्राङ्कुरो भविष्यति तद्विषयमेतदिति त्वसत्, पुष्पापचयनाटने यदोचितपरिक्रमणादौ पूर्वभाविना स्वल्पाक्षरेण पदयोगेन वैचित्र्याभावात्।

अथास्य विच्छेदस्याङ्गस्य प्राधान्यं दर्शयति– **एवं विराम** इत्यादि। अस्मिन्निति विरामे सत्यभिनयस्थितो यथाविषयं प्रयोक्तुं शक्यः। स च विरामाद्गम्यते। विरामे सत्यर्थं दर्शयति अभिनये न्यथा असम जसत्वं स्यादिति तात्पर्यम्। यदि वाभिनयो विरामे स्थित इत्यभिनयकार्यं विराम एवोद्वहतीति तात्पर्यम्। तदाह **तत्र व्यग्रावि**ति। पूर्वं दष्टिप्राधान्यतात्पर्येणेत्यपौनरुक्त्यम्। व्यापकत्वमस्या दर्शयति **प्रायो वीरे च रौद्रे चे**ति। **कुचिता**विति संकोचवन्तावित्यर्थः।

भयाच्चेति श्लथावेव। उच्चदीप्तकाकुः पदान्तेन, वीररौद्रयोरपि स्निग्धरादिवत्ते अर्धादौ विरामो न कार्यः, अपि तु पादान्ते पठितस्तावत् प्राणसंवेदाभावात्। प्राणवशेन वेत्यगतिकागतिरिति वद्धाः। तच्चासत्। शिक्षावशेनाहरणीयो हि तत्राविच्छेदः। तस्मादयमर्थः– पदान्ते विच्छेदः कार्यो, यदि वा प्राणवशेन प्राणा रसभावाद्याः, तदौचित्येन छेदः। पादादावपि तावदनेनानुबन्धो पि विच्छेद उपयोगीति दर्शितम्। **शेष**मिति न यत्र चित्रवत्तेः प्राधान्यं अपि तु विभावादेः, तत्रार्थवशेनैव विरामः। **कृष्याक्षराणी**ति कृषतीति कृषो विलम्बितो लयः तत्र साधूनि कृष्याणि सन्ध्यक्षराणि, यथा आ, ई, ऊ इति दीर्घाः। कलालक्षणो यः कालः तत्प्रमाणेन विलम्बितेन पाठ्यं कार्यमिति विच्छेदस्यैव प्रमाणं दर्शितम्। **शेषाणामि**ति ह्रस्वानाम्। **अर्थयोगे**नेति यथा स्फुटा प्रतीतिर्भवति तथा विच्छेदः कार्यो न त्विति विलम्बितं पठेदित्यर्थः।।

ननु कियत्कलाप्रमाणमित्याह **विलम्बित**मिति। **गुर्वक्षर**मिति कृष्यम्। **वा** शब्दादधिकमनुजानाति **कारणोपेत**मिति कारणं दीर्घकालं स्मरणमिति चिन्तनादिभिः, व्याध्यपस्मारादिभिर्वा कारणैरुपेतं, स्पष्टास्पष्टादिभिरित्यन्ये। वत्तविरामादर्थविरामः प्रथममिति दर्शयितुमाह ये विरामा इति। तज्ज्ञैस्तद्विरामात्मकं वत्तगतं वस्तु, **उत्क्रम्या**पीति

विशेषोपक्रमो पीति सामान्योपसंहारः। तादशा विरामेण न पठेत्, येनावगतो विवक्षितः शब्दो भवति, 'वरदं ध्यायति' इत्यत्र वर(द)शब्देन यदा विच्छेदः क्रियते तदा मध्य इति शब्दान्तरप्रतिभया ध्यायति शब्दो वगच्छतीति। **भिन्नवत्तं** च कृत्वा न पठेत् यथा विच्छेदं न कुर्याद्येनान्यवत्तभ्रान्तिर्भवति। तथा हि– ''भव शङ्करभाजनं ये जगतीह भवन्ति केचन'' इत्यत्र **ये** इति शब्दस्य पूर्वपादेन सह पाठे औपवेदवत्तभेदो यद्यपि भवति तथापि द्वितीयपादे वत्तभङ्गः। तेन वत्तं न पठेदिति विच्छेदस्यैव प्राधान्यज्ञापनार्थमेतद्युक्तमिति। शब्दच्युतभिन्नवत्त दोषाभिधाने न पौनरुक्त्यम्। इह वस्तुतस्तदभावे पि विच्छेदवशेन तत्प्रतिभोदयात्।

एतदेव तात्पर्येणाह– **विश्रमेन्नाविरामे**ष्विति। एवं विच्छेदस्य भूयोविषयव्यापकत्वमभिधाय तन्न्यूनां दीप्तां दर्शयितुमाह **दैन्ये काकुं न दीपयेदि**ति शोकादिकमग्नचित्तवत्तिं विमुच्यान्यत्र दीपनं सर्वत्र शोभावहमिति भावः।

एवं स्वराः क्रमो मर्यादा स्थानत्रयमाश्रयः उदात्तादयः स्वरूपं अलङ्काराः स्वरूपपरिपूरकाः इतिकर्तव्यतारूपाण्यङ्गानि। स्वरभेदाच्च काकोर्विशेषः स्वरभेदो हि तस्यामेव काकौ विवक्षितायां रसभावादि धर्मान्तरोदयो, न हि स्वराणां स्थानभेदो लङ्कारो ङ्गादिकृतः। **वर्जितं काव्यदोषै**रित्यादिना प्राक्तनाध्यायार्थेन सह सङ्गतिमस्याध्यायस्य दर्शयति।

एवं संस्कृते काकुविधानं प्राकृताध्यायप्रमेयभूते प्राकृते प्यतिदिशति **अलङ्कारा विरामा**श्चेत्यादिना। अध्यायार्थमुपसंहरन् भाविनो ध्यायस्यार्थमासूत्रयति दशरूपेति दशरूपविधाने यत्पाठ्यं तदनेन त्रिप्रकारेण योज्यमित्युपसंहारः। **तु**शब्दो व्युत्क्रमं सूचयति। प्रसङ्गादक्रमप्राप्तमपि काकुविधानमुक्तम्। **अनुपूर्वश** इत्यादि यत्तु क्रमापन्नं तद्दशरूपं विकल्प्यमानं वक्ष्यामीति शिवम्।।

इति काकुविकल्पलक्षणे स्मि–
न्नध्याये मुनिदिक्समर्थिते र्थम्।
प्रकटीकुरुते स्म चन्द्रमौळे–
रभिनवगुप्तसमाख्य एकदेशम्।।

इति श्रीमन्महामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां काकुविधानं नाम सप्तदशो ध्यायः।।

श्रीः

नाट्यशास्त्रम्

अष्टादशो ध्यायः

रूपं यदेतद्बहुधा चकास्ति तद्येन भावी भाविता न जातु।
तच्चक्षुरर्कात्मकमीश्वरस्य वन्दे वपुस्तैजससारधाम्नः।।

दशरूपोपकारिकाक्वादियोजनमिति तत्स्वरूपं वक्तव्यमिति सङ्गतिरुक्तैव **तद्वर्तयिष्यामी**ति किमनेनोच्यते, तदस्य प्रयोजनं प्रदर्श्यते। कश्चिदेवमाशङ्कते, ''रसा भावा'' (अ ६–१०) इत्यादि सूत्रसारसङ्ग्रहे दशरूपशब्दस्य नामानि न श्रुतं, तत्कथमुक्तं दशरूपविधाने पाठ्यमिति तं प्रत्याह **वर्तयिष्यामी**ति। रूप्यते प्रत्यक्षीक्रियते यो र्थः तद्वाचकत्वात्काव्यानि रूपाणि दशानां रूपाणां विभागः कल्प्यते अस्मादिति **दशरूपविकल्पनं** सूत्रं तेनायं षष्ठीसमासः दशरूपमिति। तेन बहुव्रीहौ दशरूपं काव्यमिति भेदान्तरापाकरणं स्यादित्याशङ्क्य द्विगुः, पात्रादिप्रक्षेपश्च यो व्याख्यातस्तत्प्रयासमात्रमेव। तदयमर्थः– यतः सूत्रादाङ्गिको वाचिकशब्दे प्रकृतिप्रत्ययार्थविभागः कल्प्यते तत्र वाग्भाग एवायं वितत्य वर्ण्यते, तेन तदेव सूत्रं वर्णितं विवरणेन प्रपञ्चितं भवतीति नानिर्दिष्टं निरूप्यते किञ्चिदिति। **नामत** इत्युद्देशेन **कर्मत** इति लक्षणेन क्रियते, तेन विजातीयाद्वत्तिः, कर्मलक्षणं, प्रकृष्टः उचितो योगः परस्परसंबन्धवैचित्र्यकृतो भेदः उत्प्रेक्ष्य इत्यर्थः। प्रयोगाय प्रयोगत इति व्याख्याने प्रयोगत इति विफलमेव। उक्तव्याख्याने तु कोहलादिलक्षिततोटकसट्टकरासकादिसङ्ग्रहः फलं, नाटिकायाः उदाहरणत्वादिति। तत्रोद्देशं तावदाह **नाटक**मित्यादि। सप्रकरणमिति सहशब्देनाङ्कप्रवेशकसन्ध्यादिसाम्यं नाटकेन प्रकरणस्याह। नाम्नामर्थो लक्षण एव व्याख्यास्यते। सत्यपि च पुराणादावुपदेशदायिनि कर्मफलसंबन्धप्रदर्शके तत्रोच्चावचमनियतकविकन्थाप्रायमिह तु किञ्चित्प्रयोज्यं किञ्चित् सूच्यं किञ्चिदूह्यं किञ्चिदुपेक्ष्यमित्येवं वैचित्र्ययोगः। ''सन्ध्यादिव्यवस्थे''ति ''दशरूप सप्रयोजन''मिति– एतत्तु फल्गुप्रायं, फलं तत्पूर्वमेवोक्तम्। प्रत्यक्षतोदितरसावेशजनितनिर्वतिसारत्वादस्येतिहासादेर्विशेष इत्यूह्यम्। सूच्यादिविभागस्त्वितिहासादावप्यस्त्येवेति न च पाठफलं दशरूपकमपि प्रयोगपर्यन्तमेतदित्युक्तप्रायम्। तत्र महासामान्यरूपं काव्यलक्षणे ध्याये कृतमित्यवान्तरसामान्यलक्षणमुद्देशानन्तरं वक्तव्यमिति दर्शयति। प्राक्च सामान्यलक्षणं ततो विशेषलक्षणानि चोद्देशक्रमेणेति चानुपूर्व्यार्थः। तत्र सामान्यलक्षणमाह **सर्वेषामेव काव्यानां मातका** इति।

तत्र केचिदाहुः– वत्तिप्रभवत्वं दशरूपकस्य सामान्यलक्षणं, वत्तीनां तदङ्गानां चाभिनये काव्येष्वसंभवात्। एतच्चासत्, आस्तां काव्यार्थः। सर्वो हि संसारो वत्ति चतुष्केण व्याप्त इत्युक्तं प्रथम एवाध्याये स्माभिः यदि चाभिनेयविषय एव वत्तिव्यवहारस्तदा वत्त्यध्याये

यद्वत्तीनां समुत्थाननिरूपणं ''यां यां वत्तिषु संश्रिता'' (२०–१५) मित्यादितत्सर्वमसङ्गतं, भगवतो हि नाभिनेतता, किन्तु स्वचेष्टावेशमात्रम्। सर्वशब्दे च प्रकटनाटकादिविषये वर्ण्यमाने प्रथमश्लोकार्धं पुनरुक्तार्थमेव। यत्तु ''स्वनामधेयैर्भरतैः'' (२०–२६) इति ''बहुगीतनत्तवाद्ये''ति (२०–५३) ''वागङ्गाभिनयवतीति'' (२०–४२) च भरतव्यवहारो गीताभिनयाभियोगश्च नानाभिनेय इति तदप्यकि ंचित्करम्। तावद्धि वत्तीनां लक्षणं ''या वाक्यप्रधाना'' (अ २०–२६) इत्येतावदेव भारत्या लक्षणम्। अन्यत्तु प्रयोगप्रदर्शनमिति तत्रैव व्याख्यास्यामः। वत्त्यङ्गान्यपि सर्वकाव्येषु सन्त्येव।

नन्वेवं वत्तिजत्वं कथं दशरूपकलक्षणम्, उच्यते, **प्रयोगत** इत्येतदर्थकमेव। तदयमर्थः– यद्यपि सर्वेषामभिनेयानभिनेयानां काव्यानां वत्तयश्चेष्टा मातर इव, **ताभ्यो** पि वाच्यरूपत्वेन कविहृदये व्यवस्थिताभ्यः काव्यमुत्पद्यते। तथापि प्रयोगं प्रयुज्यमानत्वात्प्रयोगयोग्यत्वमभियसंधाय **वत्तिभ्यो विनिस्सत**मभिनेयकाव्यं प्रत्यक्षभावनायोग्यवत्तिचतुष्टाभिधायकत्वं दशरूपं सामान्यलक्षणमित्यर्थः। दशानां नाटकादीनां रूपमिति षष्ठीसमासः।।

अन्ये त्वाहुः। एकैकस्य रूपकस्य दश दश रूपाणि संभवन्ति। तथा च वीथ्यङ्गानां सर्वत्र संभवः। परगतवचनानुरूपभाषणरूपभाणयोगश्च किंब्रवीषीत्याकाशभाषिते। एवमन्यदपि। तेन दशरूपाणि यस्य तद्दशरूपं काव्यमित्यर्थः। अत एव न सकलः प्रबन्धो नाटकम्, अपि तु प्रबन्धस्य कि ंचिद्रूपं, तल्लक्षणांशबाहुल्यात्तु तव्यपदेशयोगः। अत एव न दशसंख्याविभागार्थो येन सट्टकादीनां त्यागः स्यात्। तत्रापि हि दशरूपलक्षणयोगो स्त्येव। एतच्च स्वावसरेषु वितनिष्यामः।

ननु प्रयोगयोग्यचेष्टाप्रतिपादकत्वं चेत् सामान्यलक्षणं, तर्हि चेष्टातिरिक्तस्य कस्यचिदसंभाव्यत्वान्नास्त्येव विशेषलक्षणमेषामित्याशङ्काशमनं विशेषलक्षणावकाशं दर्शयितुमाह **जातिभिः श्रुतिभि**श्चेत्यादि। दष्टान्तेन प्रकृतं घटयन् व्युत्पादनीयमपि व्युत्पादयतीति समानतन्त्रसिद्धमेव दष्टान्तमदीदशत्। स्वरेषु ग्रहादिदशकविभागनियता जातिः। रक्तो रक्तो वा ध्वनिः, ध्वनिः स्थानं तदन्तरालं च श्रुतिः, कर्माधिकरणकरणव्युत्पत्याश्रयात्। स्त्रियाः खलनाविति हि नादतं लक्ष्ये। तत्र षाड्जीप्रभतयो जातयः सप्त, प चमस्य चतस्रः श्रुतयोः, धैवतस्य तिस्रः, इति षड्जग्रामः। गान्धार्याद्या एकादश जातयः, प चमास्रश्रुतिः धैवतस्तु चतुःश्रुतिरिति मध्यमग्रामः।

वस्तुतस्तु षड्जादिस्वरसमुदायो ग्रामः। तत्र स्वरा इति श्रुतिपक्षे बहुवचनं लक्ष्यविदः समर्थयन्ति– मध्यमग्रामे प चमपरित्यक्तां श्रुतिं धैवत एवोपभुङ्क्त इत्यत्र प्रमाणाभावात् सर्व एव द्वित्रिश्रुतिकाः (श्रुत्युत्कृष्टत)या समधिकश्रुतयः क्रियन्ते, काकल्यन्तराभ्यां च चतुस्त्रिश्रुतयो न्यूनश्रुतय इति सर्वस्वराणां श्रुतिकृतं वैचित्र्यमस्तीति। एतच्च स्वावसरे वक्ष्याम इत्यास्ताम्। इह त्वनेन दष्टान्तेनैतदुक्तं भवति– स्वरसमुदायरूपत्वाविशेषे पि स्वराणां पर्यायतः प्राथम्यप्राधान्यल्पत्वभूयस्त्वपूर्णत्वापूर्णत्वारोहन्त्यत्वमध्यत्वादि प्रविभागभेदैः,

यथान्यः षड्जग्रामो न्यो मध्यमग्रामः, तथैव वत्तीनां स्वरस्थानीयानां प्राथम्यप्राधान्यादिना दशकेन रूपकं रूपकान्तरादि्भद्यते। यथा चतुःश्रुतिः प चमस्त्रिश्रुतिश्च भवन् ग्रामान्यत्वं करोति तथा सैव वत्तिः श्रुतिस्थानीयैरङ्गैः क्वचित्संपूर्णा क्वचिन्न्यूनेत्येवमपि रूपकविभाग इत्येतज्जातिभिः श्रुतिभिरिति द्वयेन दर्शितम्।

अथ वत्तिविभागं संक्षेपतो भिधत्ते **ग्रामौ पूणस्वरावि**ति। जात्याश्रययोर्जातिद्वारेण षाडबौडुविकांशयोगे न्यूनस्वरताप्यस्तीति षडजग्रामरागो मध्यमग्रामरागश्चेह ग्रामशब्देन व्यपदिष्ट इति केचित्। तदसत्, इह हि ग्रामशब्देन जातिसमुदायो भिधीयते। तत्र यद्यप्यंशके न्यूनस्वरतामपि भवति, तथापि समुदायस्य पूर्णतायाः का हानिः। तस्मादयमत्रार्थः– यथा विचित्रसन्निवेशतालम्बनसुन्दरतमसंपूर्णस्वरसमुदायरूपात् ग्रामद्वयादिभागकल्पनया जात्यंशकानां पूर्णापूर्णादिस्वरभेदभाजां प्रसवः, एवं नाटकप्रकरणाभ्यां पूर्णवत्तिवत्त्यङ्गाभ्यां वत्तिन्यूनानां च रूपभेदानां परिकल्पनम्। तत्र वत्तिन्यूनानि रूपकाण्याह **वीथी**त्यादि। शेषाणि रूपाणीति वक्तव्ये प्रतिपदं नामग्रहण ज्ञापयति। एतदनुक्तान्यपि रूपकाणि संभवन्ति, अत एव रूपकविशेषगणनामाभ्यो विनिस्सतमिति लक्षणस्योदाहरणमात्रम्। तेन वत्तीनां विनियोगविकल्पसमुच्चयैः वत्त्यङ्गानां च बहवो रूपकभेदा भवन्ति। तेषां परं कोहलादिभिर्नाममात्रं प्रणीतम्। लक्षणेन त्विह सङ्गहीता एव ते। तत्र नाटकप्रकरणे एव सर्ववत्तिपूर्णे इति नियमः, न तु विपर्ययः। मुद्राराक्षसस्य कैशिकीहीनस्य कृत्यारावणस्य च नाटकस्य दर्शनात्, वेणीसंहारे च सात्त्वत्यारभटीमात्रं दश्यत इति केचित्।

अन्ये तु तत्राप्यवश्यं वत्त्यन्तरानुप्रवेशो स्ति। यदि परिमितिवत्तिव्यापकत्वात् लक्ष्यते, अपूर्णवात्तित्वे पि विरूपकतैव स्यात्। सकलाङ्गप्रक्रियापरिपूर्णत्वादेव नाटकात्प्रकरणं च प्रधानम्। तथा हि कैश्चिद्विनेयः प्रसिद्धिमनुरुध्यमानो दष्ट इति सप्रसिद्धेतिवत्ते नाटके विनेयः। कश्चित्तु किमेतदपूर्वमिति प्रसिद्धे वस्तूनि रूपकान्तरमेव तु तदाभासं तत्सर्वं विनेयो भिनववस्तुवत्तकौतुकपरतन्त्र इति समुत्पाद्यवस्तुना प्रकरणेन विनीयते। विनयश्चास्य धर्मार्थकामेषु सर्वपुरुषार्थेष्वपवर्गे पि च तथा भवति, यदि सकलं तदुपयोगिव्यापाराश्रयणं सर्वव्यापाराक्षिप्तं पूर्णवत्तिकत्वमिति। द्विवत्तित्रिवत्त्यादिकं न नाटकं भवति। रूपान्तरमेव तु तदाभासं, तत्कैशिकीविहीनत्वे पि यथा श्रङ्गारयोगस्तथा समवकारे तथा तल्लक्षणं वर्णयिष्यामः।

ननु पूर्णवत्तिकत्वाविशेषे नाटकप्रकरणयोः को भेदः, कैशिकीहीनत्वे चाविशिष्टे वीथ्यादेः मिथः को विशेष इत्याशङ्कां वारयन् कर्म (श्लो) शब्दाक्षिप्तविशेषलक्षणार्थं दर्शयति **अत ऊर्ध्वमि**त्यादिना काव्यस्य बन्धनं परस्पराश्रयसंबन्धेनैव एकवाक्यताकरणसंबन्धः स विकल्प्यते येन तद्विशेषलक्षणं वक्ष्यामीति। नाटकं प्रकरणादपि प्रधानं प्रसिद्ध्युपजीविनी हि कल्पनावस्तुसंभावना, अनुभवमूलत्वात्, तस्या उत्प्रेक्षा अपि हि प्रमाणागतेष्वेव वस्तुषु स्वातन्त्र्येण योजनामात्रेण व्याप्रियन्ते, षड्दन्तो हस्ती खे धावतीति।

तेनेतिहासादिप्रमाणवस्तुसिद्धप्रदर्शकं नाटकं तावल्लक्षयितुमाह **प्रख्यातवस्तुविषय**मित्यादि। प्रख्यातौ भारतादौ यद्वस्तु तद्विषयो स्य, तत्रापि किंचिदप्रसिद्धं भवति, तन्निराकरणाय **प्रख्यातोदात्ते**ति श्रीशङ्कुकः। एतत्तु प्रख्यातवस्तु विषयो स्येति इयता गतार्थमित्युपाध्याया इत्थमाहुः इह त्रिविधया प्रसिद्धया प्रसिद्धत्वं भवति, अमुक एवंकारी अमुत्रदेश इति। तत्र प्रकर्षेण ख्यातं वस्तु तथा विषयो मालवपा चालादिदेशो यस्मिन् चक्रवर्तिनो पि हि वत्सराजस्य कौशाम्बीव्यतिरिक्ते विषये कार्यान्तरोपक्षेपेण विना यन्निरन्तरं निर्वर्णनं तद्वैरस्याय भवति, तत्र प्रसिद्धिखण्डनेन प्रतीतिविधातात्, का कथा रसचर्वणायाः। एवं तावद् द्वे प्रसिद्धी उक्ते, प्रख्यातोदात्तेत्यनेन ततीया प्रसिद्धिरुक्ता। उदात्त इति वीररसयोग्य उक्तः। तेन धीरललितधीरप्रशान्तधीरोद्धतधीरोदात्ताः चत्वारो पि गह्यन्ते। **राजर्षिवंश्येत्य**नेन प्रख्यातमपि यद्वस्तु ऋषितुल्यानां राज्ञां वंशेन साधुनोचितं, तथा प्रख्यातत्वे पि देवचरितं वरप्रभावादिबहुलतयोपायोपदेशायायोग्यमिति नैतदुभयं निबन्धनीयमिति फलतः प्रतिषेधो दर्शितः। राजानः ऋषय इवेत्युपमितसमासः, तद्वंशे साधु चरितं यस्मिन्निति बहुव्रीहिः। न च सर्वथा देवचरितं तथा वर्णनीयम्। किन्तु दिव्यानामश्रयत्वेन प्रकरीपताकानायकादिरूपेण, उपेतमुपगमो ङ्गीकरणं यत्र। तथा हि नागानन्दे भगवत्याः पूर्णकरुणानिर्भरायाः साक्षात्करणे व्युत्पत्तिर्जायते। निरन्तरभक्तिभावितानामेवन्नाम देवताः प्रसीदन्ति, तस्माद्देवताराधनपुरस्सरमुपायानुष्ठानं कार्यमिति। यदि तु मुख्यत्वेनैव देवचरितं वर्ण्यते तत्तवद्विप्रलम्भकरुणाद्भुतभयानकरसोचितं चेन्निबध्यते तन्मानुषचरितमेव संपद्यते, प्रत्युत देवानामधियाधानं प्रसिद्धिविघातकम्। तत्र चोक्तो दोषः, विप्रलंभाद्यभावे तु का तत्र विचित्रता र जनाया एतत्प्रमाणत्वात्। अत एव हृदयसंवादो पि देवचरिते दुर्लभः, न च तेषां दुःखमस्ति। यत्प्रतीकारोपाये व्युत्पादनं स्यात्। नायिका तु दिव्याप्यविरोधिनी यथोर्वशीनायकचरितेनैव तद्वत्तस्याक्षेपात्। डिमादौ तु दिव्यानां नायकत्वे भिप्रायमावेदयिष्याम इति प्रसिद्धित्रययुक्तमपि वस्तु न निष्फलं व्युत्पत्तये भवतीत्यत आह **नानाविभूतिभिर्युतं** धर्मार्थकाममोक्षविभवैः फलभूतैर्विचित्ररूपैर्युक्तम्। तत्राप्यर्थकामौ सर्वजनाभिलषणीयाविति तद्बाहुल्यं दर्शनीयमिति कथयति **रिद्धिविलासादिभि**रिति ऋद्धिरर्थस्य राज्यादिसमद्धिः विलासेन कामो लक्ष्यते, आदिशब्दः प्रधानवाची, तत्प्रधानाभिः फलसम्पत्तिभिः युक्तमित्यर्थः। तेन राज्ञा सर्वं राज्यं ब्राह्मणेभ्यो दत्त्वा वानप्रस्थं गहीतव्यमित्येवंप्रायं फलं नोपनिबन्धनीयम्। तत्फलमपि दष्ट सुस्वार्थी हि लोको बाहुल्येनेति तत्रास्य प्रतीतिर्विरसीभवेत्। **गुणै**रित्यप्रधानभूतानि चेष्टितानि हेयानि प्रतिनायकगतानि अपायप्रधानानि तैर्युक्तम्। तेषां पूर्वपक्षस्थानीयानां प्रतिक्षेपेण सिद्धान्तकल्पस्य नायकचरितस्य निर्वाहाज्जनपदकोशादिसंपत्तिसमद्धिः। कौमुदीमहोत्सवादयो विलासाः सन्धिविग्रहादयो गुणा इति व्याख्यानं चाणक्य (शास्त्र) परिचयवेदनमात्रफलं, वस्तुशब्देन राजर्षिवंश्यचरितशब्देन च सर्वस्यार्थराशेः संग्रहात्। अवान्तरवस्तुसमाप्तौ विश्रान्तये ये विच्छेदा अङ्काः ये च निमित्तबलात् अप्रत्यक्षदष्टानां

चेष्टितानामावेदकाः प्रवेशकाः तैराढ्यं नाटकं नाम रूपकम्। तस्मादस्य तन्नामेत्याह **नपतीनां यच्चरित**मिति यद्यस्मान्नपतीनां संबन्धि व्युत्पाद्यानां सामर्थ्यात् नपतीनामेव नाटकन्नाम तच्चेष्टितं प्रह्वीभावदायकं भवति, तथा हृदयानुप्रवेशर जनोल्लासनया हृदयं शरीरं चोपायव्युत्पत्तिपरिघट्टितया चेष्टया नर्तयति नटनतौ नत्ते इत्युभयथा हि स्मरन्ति। तदिति तस्माद्धेतोः, नामास्य नाटकमिति।

ननु पुराणाद्युपनिबद्धो पि तदर्थः कस्मान्नटानेवेदं भावयतीत्याह **नाने**ति। बहुप्रकारा अत्र संभावयन्ति संपादयन्ति यानि चेष्टितानि नटव्यापारात्मानो भिनयाः तैरेतत्प्रह्वीभावदायकं हृद्यतमरसास्वादसूचीद्वारप्रवेशितं तत्कर्तव्यसूत्रं हृदयरोहणरूढशौर्यादिधर्मरत्नग्रथनकारि भवतीति ह्युक्तमसकृत्।

ननु नपचरित एव किमित्ययमास्वादो न देवचरित इत्याह **बहुधे**ति। बहुप्रकाराः उपायवैचित्र्याद्याः सुखदुःखोत्पत्तयास्तासां कृतं संपादनं यत्र, देवचरिते तु तन्नास्तीत्युक्तम्। अत एव प्रतीतिविघातस्य वैरस्यदायिनः संभवो यत्र यत्र तन्नाटके नोपनिबद्धव्यम्। तेन वर्तमानराजचरितं चावर्णनीयमेव, तत्र विपरीतप्रसिद्धिबाधयाध्यारोपस्याकि ंचित्करत्वात्, योगानन्दरावणादिविषयचरिताध्यारोपवत्। एतदर्थमेव प्रख्यातग्रहणं प्रकर्षद्योतकं पुनः पुनरुपात्तम्। अत एव वेदशास्त्रं न नाटकं, नियोगेन हि तत्र पुमान्प्रवर्त्यते, न फलोत्पत्त्या। फलप्राधान्यपक्ष्ये पि तत्र सन्देहः। एवं पुराणादावपि। इह तु बाधोदयासहिष्णुप्रत्यक्षायमाणा चिरविलम्बितप्रतीतिसिद्धा सुखदुःखोत्पत्तिरिति। अनेन वाक्येनैतदुक्तं भवति– यद्यपि सर्वरूपकाणामर्थो हृदये प्रविष्टो विनेयांश्च विनीतान् करोति। तत एव नाटकशब्दः सामान्यवचन इति ''कार्योत्पन्नानि नाटके'' इत्यादिषु स्थानेषु दर्शितः। तथापि ह्यवश्यव्युत्पाद्या राजानो यद्व्युत्पत्तिद्वारेण विश्वं व्युत्पन्नं, तेन तदीयहृदयसंवादयोग्यनपतिचरितप्रदर्शनेन प्रधानतया प्रधाने र्थे व्युत्पाद्यन्ते, अमात्यादयः तदङ्गत्वेनैव प्रयोगस्य च यथोचितं समुद्गकस्थगगनवद्व्युत्पादकव्युत्पाद्यभावात्तेन प्रधानपुरुषार्थे प्रधानविनेयानामन्यत्रान्येषां वेदयतो वनतिं व्युत्पत्तिं ददाति, तत एव नाटकमुच्यते।

श्रीशङ्कुकस्तु व्याचष्टे विजिगीषुररिर्मध्यमोदासीनौ मित्रं मित्रमित्रमिति। एषां चरितमिति बहुवचनेन लभ्यते। अन्ये त्वाहुः– पूर्वं राजर्षिवंशप्रभवा नायका उक्ताः। अनया त्वार्यया चन्द्रगुप्तबिन्दुसारदयो पि संगह्यन्त इति। व्याख्यातमर्थद्वयमेतत्पूर्वयार्ययैव सङ्गहीतमिति प्रथमव्याख्यत एव युक्तो र्थः।

यत्तु कैश्चिदभिधीयते–

देवा धीरोद्धता ज्ञेयाः स्युर्धीरललिता नपाः।
सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्तितौ।। (२४–१८)
धीरप्रशान्ता विज्ञेयाः ब्राह्मणा वणिजस्तथा।। (२४–१९)

इति वचने पर्यालोच्यमाने देवादीनां नाटकनायकत्वानुपपत्तेः, धीरललित एक एव नायक इति। तदसत्, न हि जनकप्रभतीनां रामादीनामपि वा धीरललितत्वम्, यदाह– ''धीरोदात्तं जयति चरितं रामनाम्नश्च विष्णोः'' इति।

यत्तु पठितं तत्र धीरललितत्वं राज्ञ एव वर्णनीयं नान्यस्य, सेनापत्यमात्ययोर्धीरोदात्तत्वमेव, देवानां धीरोद्धतत्वमेव, द्विजातीनां धीरप्रशान्तत्वमेवेति, एवं परं द्रष्टव्यं– अत एव प्रख्यातोदात्तेत्यत्र चत्वारो पि नायकाः स्वीकृता इति व्याख्येयम्।

एवं निर्वचनमनयार्यया दर्शितं, प्रख्यातवस्तुप्रभतिरर्थो न्यत्र सुप्रसिद्धः अङ्कप्रवेशकौ त्वप्रसिद्धौ इत्यङ्कस्वरूपं तावद्वितत्य कथयति **अस्यावस्थोपेत**मिति। **अस्य** नाटकस्य यत्कार्यं बिन्दुकृतया विस्तारणया विततीकरणरूपया अननुसन्धानजननबलादेकावस्थानुरूपमाधिकारिकमितिवत्तं सम्पाद्यम्, तदवस्थया प्रारम्भादिकयोपेतं परिपूर्णं प्रकर्षेण संबन्धं प्रेक्ष्य अङ्कः कर्तव्यः। एतदुक्तं– इतिवत्तस्य बिन्दुसूत्रस्यूतस्य प्रारम्भाद्यवस्थाप चकचारिणो यदा प्रारम्भावस्था पूर्णत्वमेति तदाङ्कच्छेदो बिन्दुद्वारानुसन्धीयमानद्वितीयाङ्काभिधेयरूपो विधेयः। एवं प्रयत्नाद्यवस्थाचतुष्टये पि वाच्यमिति प च तावदङ्का इति मुख्यः कल्पः।

नन्वेवं न्यूनत्वे आधिक्ये वाक्यानां कथं निर्बन्ध इत्याह **नाट्यतत्त्वज्ञै**रनयैव दिशा सो ङ्कः, अपिशब्दादन्यथा कर्तव्यः। तुर्विशेषं द्योतयति। यदा प्रारम्भावधिप्रधानं भवतीति तदा यस्या एवोपक्रमोपसंहारावस्थाद्वयापेक्षया द्वावङ्कौ, अन्यासामेकैकाङ्कतेति यावत् सर्वासामवस्थाद्वययोगेन संपादनमिति षडङ्कत्वात् प्रभति सप्तजातप्राप्तौ(?) दशाङ्कत्वम्। काचिदवस्थां प्रधानीकृत्य यदा अवस्थान्तरेण मिश्रीकृत्य बघ्नाति तदा नाटिकाया न्यूनाङ्कत्वमिति। एतत्तु शब्देन तत्त्वज्ञशब्देन च दर्शितम्। तत्रावस्थाः ''प्रारम्भश्च प्रयत्न''श्चेत्यादिना वक्ष्यन्ते (अ १६–८), ''प्रयोजनानां विच्छेदे यदविच्छेदकारण''मिति बिन्दुः वक्ष्यते, 'यदाधिकारिकं वस्तु सम्य'गिति (अ १६–२६) कार्यम्।

अथ कस्मादङ्क इत्याह **अङ्क इति रूढिशब्द** इति। भावैः रसैश्च गूढश्छन्नः व्याप्तो र्थो ङ्कशब्देन यादच्छिकेनोच्यत इति भट्टलोल्लटाद्याः गूढ इति पाठं व्याचक्षिरे। अन्ये रोहत्यर्थानिति पठन्ति, व्याचक्षते च रूढी रोहणं तेनोत्सङ्ग उच्यते यो नाटकांशः शृङ्गारादिरसैर्विभावानुभावव्यभिचारिणो र्थाः तथा भावैर्विभावाद्यैः यथास्वं भावादीनर्थान् हृदयमारोपयति अर्थान् वहति, नानाप्रकारैश्च वक्ष्यमाणैः 'ये नायक निगदिता' इत्यादिभिः विधानैरुपेतः तस्मादुत्सङ्गवदारोहणं संबन्धादङ्क इत्युच्यते। एतत्पुष्कलमिव अजावि(जि?)ना रूढैरत्रार्थैर्वत्त्यदर्शनात्। तस्मादयमत्रार्थः– अङ्क इत्ययं लक्षणे रूढः शब्दः अन्यतो व्यवच्छेदकं लक्षणम्। एतदपि च नाट्यरूपकस्य नानात्वमन्यतोभेदं विधत्ते अनभिनेयात्, अभिनेये हि य एकदेशः स रसभावैरुपलक्षितानप्यर्थान् **रोहयति** हृदयसंवादससाधारणताकरणेन प्रत्यक्षीभावनया रसाध्यायोक्तयाभिरोहणं बीजस्येवाङ्कुराकारतया रसाकारोदयप्ररोहो भवति। स चानभिनेयरूपकांशैरेव संपाद्यत

इत्यभिनेयात् भेदमादधानो भिनेयस्य रूपकस्य लक्षणं भवत्येव। एवमङ्कशब्दस्यान्वर्थो व्याख्यातः। स्वरूपन्तु वक्तव्यं तदर्शयति– **यत्रार्थस्य समाप्ति**रिति। प्रारम्भाद्यवस्थालक्षणो र्थो यत्र समाप्यते सो ङ्कः। अङ्कसमाप्तायामपि वा अवस्थायां यदा बीजस्य संहरणं यथास्वं सन्धिभेदेनोचितं भवति तदाप्यङ्कच्छेदः। तत्रोत्पत्तिरुद्घाटनमुद्भेदो गर्भनिर्भेदः फलसमानयनमिति मुखादिषु यथाक्रमं बीजस्य दशाविशेषाः संहारशब्दवाच्याः। अङ्कविच्छेदे चार्थविच्छेदो माभूदित्यवलग्नः संबन्धो बिन्दुर्यत्र तादगङ्कः कर्तव्यः। यथा तापसवत्सराजे ततीयाङ्कसमाप्तौ–

आदौ मानपरिग्रहेण गुरुणा दूरं समारोपितां
पश्चात्तापभरेण तानवकृता नीतां परं लाघवम्।
उत्सङ्गान्तरवर्तिनीमनुगमात्संपिण्डिताङ्गीमिमां
सर्वाङ्गप्रणयप्रियामिव तरुश्छायां समालम्बते।। (३–१७)

इति राज्ञ उक्त्या पद्मावत्याः परिणयाभ्युपगममनुसन्दधत्या प्राप्तिसंभवाख्यततीयावस्थाप्रदर्शिनि भाविनि चतुर्थे ङ्के बिन्दुर्योजितः।

एवमङ्कस्वरूपमनेन निरूपितमिति चिरन्तनाः। तच्चैतत्पुनरुक्तं ''अस्यावस्थोपेतं कार्यं प्रसमीक्ष्ये''त्येतेन हि कियन्नोक्तं यदनेन लक्षणेनाभिधीयते। तस्मादिदमत्रार्थतत्त्वं– अङ्कस्वरूपं तावदस्यावस्थोपेतमित्यनेनैवोक्तं, नामनिर्वचनं च 'अङ्क इति रूढिशब्द' इत्यनेन दर्शितम्। अनया त्वार्यया अङ्कस्य त्रैविध्यमुच्यते। तथा चोक्तं कोहलादौ (कोहलेन?)–

त्रिधाङ्को ङ्कावतारेण चूडयाङ्कमुखेन वा।
अर्थोपक्षेपणं चूडा बह्वर्थैः सूतवन्दिभिः।।
अङ्कस्याङ्कान्तरे योगस्त्ववतारः प्रकीर्तितः।
विश्लिष्टमुखमङ्कस्य स्त्रिया वा पुरुषेण वा।।
यदुपक्षिप्यते पूर्वं तदङ्कमुखमिष्यते।।

अत्रार्थस्य कस्यचित् सम्यगन्यत एवानभिसन्धानपूर्विकाप्तिः प्राप्तिरिति चूडा दर्शिता। तद्यथा रत्नावल्यां वैतालिकपाठाद् 'दशामुदयनस्य' इत्यन्तः उपयोगी सम्यगर्थः प्राप्तः तत्प्रत्यभिज्ञामूलत्वात् सागरिकानुरागस्य, तथाचाह 'अअं सो राआ उदअणो (अयं स राजा उदयनः)' (१–२३) इत्यादि। तदर्थमेव च वसन्तक्रीडादिसर्वमुपक्षिप्तम्। तदेव च राजानुरागस्य शय्याफलकादिकृतस्य मूलमिति चूलिकेत्युक्तम्। तेन प्रथमः चूलिकाङ्कः यत्र त्वङ्के सर्वेषामङ्कानां यो र्थो बीजलक्षणस्तस्य संहारः संमिलित्वेन प्राप्तिर्भवति सो वताराङ्कः। यथा रत्नावल्यां द्वितीयो ङ्कः। तत्र हि 'ईरिसस्स कण्णआजणस्स ईरिस एव्व वरे अहिळासेण होदव्वम्।। (ईदशस्य कन्यकाजनस्येदश एव वरे अभिलाषेण भवितव्यम्)' इत्यादिप्रकृतमेव सर्वं वर्ण्यते। यत्र त्वनुसन्धानमात्रप्राणत्वेन तदुपयोगितया वत्तान्तमुच्यते तदुपश्लिष्टमङ्कमुखम्। स एवेह **कि जदवलग्निबिन्दु**रित्यनेन ततीयो भेद

उक्तः। यथा रत्नावल्यां ततीये ङ्के ऐन्द्रजालवत्तान्तनिरूपणं चूलिका तस्याश्चभेदः, चूलिकास्यापि तदभिसन्धानाभावात्। इह त्वभिसन्धानं यौगन्धरायणादीनामस्त्येव। तेनायं संक्षेपः– अङ्के यद्वर्णनीयं वस्तुतत्तावत् द्विधा प्रधानं तदुपयोगि च तदुपयोग्यपि किञ्चिद्दैववशादुपयोगं याति किञ्चिदभिसन्धिबलादिति त्रिविधो ङ्कार्थः। स कदाचिदेकस्मिन्नङ्के मिश्रभावेनापि निबध्यत इति चूलिकाङ्कमुखयोरङ्कभेदयोः प्रधानार्थस्पर्शो नैवास्तीति।

तथा प्रवेशकद्वारेण मुख्यचरितमपि शङ्कां वारयितुमाह **ये नायका** इति। धीरोदात्तादयो विजिगीषुतन्मित्रप्रभतयो वा ये नायकाः प्रतिनायकाश्च तेषां चरितं, तदुपायानुष्ठानं तथा **संभोगः प्रत्यक्षः** सन्निहितः साक्षाद् दश्यमानो, न तु सूच्यमानो, यत्र तादगङ्कः नयति प्राप्नोतीति, वत्तं फलं वेति **नायक** चरितप्रत्यक्षतया व्युत्पत्तिः, प्रेक्षकाणां **संभोगाप्रत्यक्षत्वे** च तद्गतकेवलक्लेशदर्शनात् वैरस्यं सामाजिकस्य स्यात्। किमनेन महता कष्टेनेति तत एवोक्तं न निस्सुखः स्यादिति। **नानाप्रकारावस्थौ** प्रतिनायकगतौ चरितसंभोगावनुपादेयावविषये चेति हेयावस्थौ, नायकगतौ तु तद्वैपरीत्यादुपादेयावस्थाविति तु शब्दस्यार्थः। अविकृष्ट इत्यदीर्घः। दीर्घो हि प्रयोक्तप्रेक्षकाणां खेदाय स्यात्।

एवं प्रधानवर्णनीयस्य वत्तमुक्त्वा तदुपयोगिवत्तस्य दिशं दर्शयितुमाह– **नायकदेवी**त्यादि। नायका मुख्याः पताकादयः देव्यो महादेवीभोगिनीप्रभतयः। गुरुजनो मातपितभ्रात्राचार्यादिः सार्थवाहो त्र सेनापतिः। इतिवत्तवशाद्वणिगेव वा, एषां संबन्धी अङ्कः एतदर्थाभिधायक इति यावत्। अत एव **नैकेन** विचित्रेण **रस**विशेषेण युक्तस्तथा हि देवीयोगे श्रङ्गारः नायके वीर इत्येवमन्यदुत्प्रेक्ष्यम्। नायकानां देव्यादय इत्यन्ये। **अङ्क** इति। अनेकरसाङ्कितत्वादपि अङ्क इति नामेत्यर्थः। न केवलं चरितसंभोगावेव प्रत्यक्षौ, किन्त्वन्यदपि यत्र र जनातिशयो स्तीति दर्शयन्नाह **क्रोधप्रसादशोका** इति। शापोत्सर्गः शापकृतस्यानर्थस्य नाशः, यथोक्तस्यानर्थकाभावस्य शङ्काभयत्रासकृतो **विद्रव** इति गर्भसन्धौ वक्ष्यते। **उद्वाहो** विवाहः। **अद्भुतस्य** संभवो भ्युपगमः उपक्रमो **दर्शनं** च निर्वाह इत्येतच्चान्यस्यापि र जकवर्गस्योपलक्षणम्। अक्षजं ज्ञानं प्रति गतानीति प्रत्यक्षजानि। **प्रत्यक्षशब्देन** तदेकदेश उच्यते तत्र जातानीत्यन्येन्द्रियवर्गस्य प्रत्यक्षता तावद्भवति, कदचित्तत्त्वप्रत्यक्षमपि।

अथाङ्कस्य प्रयोगकालपरिमाणमियदिति दर्शयति **एकदिवसप्रवत्त**मिति। तादशमवान्तरेणा**र्थेन** प्रयोजनेन युक्तं **बीज**मुपायानुष्ठानं वर्णनीयताया **अधिकृत्य**ाङ्कः कर्तव्यो यस्य प्रकृष्टं च यद्वर्तनं प्रयोगरूपं तदेकदिवसेनेति मुहूर्तप चदशकेनैव, यतस्तावन्तं कालमावश्यकानि भोजनादीनि अशक्यनिरोधनानि ततः परन्तु प्रयोगकलश्चेत् तत्प्रेक्षकप्रयोक्तृणां तदाप्यावश्यकस्य सन्ध्यावन्दनभोजनादेरविरोधेनत्येवं कार्यानेकत्वमेकत्राङ्के निषिद्धम्। क्वचित्त्वभ्युमगतमपि। अन्ये तु सर्वामेवार्यां निषेधपरत्वेनाहुः। अन्ये त्वेकाङ्केनेति ततीयां मन्यमानाः सर्वेयमार्या विधिपरेत्याहुः।

यान्यवश्यंभावेन कार्याणि भोजनादीनि तानि किं प्रत्यक्षेणैव दर्शनीयानीति यः शङ्कते तं प्रत्याह **रङ्गन्त्वि**ति। **तत्रे**त्यावश्यकेकर्तव्ये न चासमाप्तावुपक्षिप्तावान्तरकार्ये पात्रनिष्क्रमणमिति दर्शयति। **बीजा**र्थेति उपक्षेपात्मनो बीजस्य यत्प्रयोजनं तेन या युक्तिः संबन्धस्तत्र युक्तमुपायभूतं कार्यं प्रयोजनानुसारि विशिष्टरससम्पदोपेतं विधाय तत्परिसमाप्तौ यवनिकया तिरोधानरूपं निष्क्रमणं दर्शनीयम्। बीजार्थयुक्तिरुत्पत्त्युद्घाटनोद्भेदगर्भनिर्भेदफलसमानयनात्मेत्यन्ये।

एवमितिवत्तनियममङ्के प्रदर्श्य तदितिवत्तकालनियमं दर्शयति, **क्षणयाममुहूर्तानां** यानि लक्षणानि कर्तव्यान्यस्मिन् क्षणे सन्ध्यानुष्ठेयेत्यादीनि तैरूपेतां दिवस**स्यावस्थां** ज्ञात्वा सर्वं कार्यं प्रत्येकं सर्वात्मना परिपूर्णरूपमत एवाशेषं **विभजेत्** विभागेन दर्शयेत्। नाडिकाभिरष्टधा दिनं रात्रिं च विभज्य छायाप्रमाणेन वेति तेन एकदिवससंपादितमुपयोगि चेष्टितमङ्के बध्नीयादिति तात्पर्यम्।

ननु तन्मध्ये यत्कार्यं मध्याह्नस्नानभोजनादि तद्दिवसमध्य एव वा यद्वृत्तं दूरस्थं दशरथमरणादि तत्कथं वाच्यमित्याह– **दिवसावसानकार्य**मिति। दिवसे वसानं समाप्तिर्यस्य तत् सर्वं कार्यं यद्यङ्के प्रत्यक्षेण प्रदर्शयितुं न युज्यते **तदाङ्कच्छेदं कृत्वा प्रवेशकैः** प्रदर्शनीयम्। अदष्ठमप्यर्थं हृदि प्रवेशयन्तीति प्रवेशकाः। चूलिकाङ्कावताराङ्कमुखप्रवेशकविष्कंभका इहाभिप्रेताः। तथा च कोहलो र्थोपक्षेपप चकमुक्तवान्।

एवमङ्कलक्षणं वितत्याभिहितमर्धनोपसंहरन्नर्धान्तरेणाङ्कसन्धानरूपस्य प्रवेशकस्य सामान्यलक्षणं दर्शयन्नार्यां पठति **सन्निहितनायक** इत्यादि। नायकशब्देन तच्चरितसंभोगौ तौ सन्निहितौ प्रत्यक्षौ यत्रैकाङ्के पि रूपके ङ्को नायकचरितप्रत्यक्षताशून्यः कार्यः, किंपुनरन्यत्रेति प्रकरणे नाटके वेत्युक्तम्।

अन्ये त्वेदुत्तरार्धेन संबन्धयन्तो रूपकान्तराणि प्रवेशकशून्यानि भवन्तीत्याचक्षते। **परिजनकथानुबन्ध** इति चतुर्णां लक्षणं सूतमागधादेश्चूलिकाङ्गस्य स्त्रीपुरुषादेर्वाङ्कमुखोमकरणस्य चेटीक चुकादेर्वा प्रवेशविष्कम्भोपयोगिनः परिजनत्वात्कथयैव परस्परश्लिष्टयानुबद्धो ङ्कावतारः। यथोक्तम्–

अङ्कान्तर एवाङ्को निपतति यस्मिन्प्रयोगमासाद्य।
नाट्यार्थकथायोगाद् विज्ञेयो ङ्कावतरो सौ।। इति।

तत्रायं प्रवेशको ङकार्थसन्धानाय भवतीति पूर्वोपक्षिप्तमङ्कं संख्यानुवादद्वारोण दर्शयति **प्रकरणनाटकविषय** इति। सन्ध्यवस्थानपरिपूर्णोपनिबद्ध एवाङ्का उपक्रमोपसंहारवैतत्ये दश कस्यचित्संक्षेपेण षडित्येवम्, अन्यतो न्यूनाधिकत्वमनुचितमित्यर्थः। अङ्कमध्येषु तु सन्धानानि षट् चित्राणि संपादयितुं प चविधः प्रवेशकः कार्यः। अङ्कान्तर**सन्धिष्वि**ति निमित्तत् कर्मसंयोगे सप्तमी। **अपि**शब्देन प्रवेशकशब्दस्यावत्तिः सूच्यते। **चो** हेतौ।

प्रवेशकशब्दश्च महासामान्यवचनः प चसु वत्तः, इह तु मध्यमसामान्ये प्रवेशकविष्कम्भकद्वये वर्तते।

तदयमर्थः– यस्मान्मासकृतं वर्षसञ्चितं वा यच्च तत्कार्यं सामाजिकानां हृदयगतं तस्मात् प्रवेशकविष्कम्भकौ कर्तव्यौ। परिमितन्तु यदनुसन्धेयं तत्राङ्कमुखमल्पानुसन्धेये चूलिका, अल्पतमे अङ्कावतारः। तत्र केचित् वनवासादयोद्ध्याप्रवेशानन्तरं रामानुसन्धानमनुसन्धनीयं माभूदित्याशयेन व्याचक्षते मासेन मासाभ्यां मासैर्वर्षेण वर्षाभ्यां वर्षैः इति। कदाचित्तु वर्षादूर्ध्वन्तु ये महाप्रभावाश्चिरातीतमप्यनुसन्दधते रामादेस्तेषां बहुतरो हि कालः प्रवेशकैर्वर्णनीयः। ये तु पुरुषप्रायास्तेषां वर्षादूर्ध्वमनुसन्धानं नैवास्ति, तथा च मार्गशीर्षं तैषीं चान्तरेण दीर्घकालयात्रा आवर्षारात्रान्मासाष्टकमुक्तेति संगिरन्ते।

एतच्चासत्, मासवर्षादीनां स्वीकृतनियतपरिमाणानां द्विवचनबहुवचनान्तत्वे वत्त्ययोगस्य दर्शितत्वात्।

सौर्यके मासजाते च परिमाणं स्वभावतः।
उपाधिभूतमाश्रित्य संख्याभेदेन वर्तते।।
वयस्त्विति परिच्छेदः क्रियते पि न गम्यते।
इष्ठो भेदादते तत्र परिमाणमनर्थकम्।।

इत्यादिबहु च वर्षादूर्ध्वमिति च निषेधः फल्गुफल एव स्यात्। तस्मादेकवचनान्तेनैव समासः। न च रामायणभारतादिचरितत्यागप्रसङ्गः। कार्यग्रहणं ह्येतदर्थं मुनिना कृतं, यत्र हि यत्ननिष्पाद्यं सञ्चितं तदेव वर्षं गण्यते वर्षान्तराणि तु तत्र विद्यमानान्यपि अविद्यमानकल्पानि। रामचरिते हि चतुर्दशवर्षाण्यरण्यनिवासो यद्यपि कार्यः, वर्षाणि त्रिचतुराणि भवन्ति यत्र मारीचवधसुग्रीवराज्यदानाद्यवान्तरकार्यं संभवति। तस्माद्वर्षादूर्ध्वमित्यनेन कार्यं वर्षद्वयादि निषिध्यत इत्येवं वर्षसहस्रायुषो पि वर्षशतान्तरालवत्तचरितव्याख्याने पि न किञ्चिद्दुष्यति। तेन प चाङ्के नाटके प च कार्यदिनानीति संक्षेपः, दशाङ्के तु दशेति विस्तरः।

अङ्कच्छेदे निमित्तान्तरमप्याह– **यः कश्चित्कार्यवशादि**ति। कार्यवशात्कार्यस्य तत्रायतत्वात् यः पुरुषो नायकः सो नेकयोजनव्यवहितमध्वानं यदा प्रतिदिनं गमनं विश्रान्तिः शय्येत्येवमादि कथं रङ्गे प्रदर्श्य तदन्तेनाङ्कच्छेदः कार्यः। डिमादिनायकस्य तु दिव्यस्याकाशयानकादिना सर्वं युज्यते। अनायक पुरुषस्त्वविच्छिन्न एवाङ्के निष्क्रामति। ननु दिवसावसानकार्यं केनोपपद्यत इति **आवश्यकाविरोधेने**त्यादिना यदुक्तं ततस्तिलमात्रेणाप्यधिकं वाच्यमस्य न लभ्यते वाक्यस्य। अत एवैतत् भट्टलोल्लटाद्यैर्न पठितमेव।।

उपाध्यायास्त्वाहुः– नेदं निमित्तान्तरं अपि तु पूर्वं तावत्कथितं **यद्यङ्के नोपपद्यत** इति तस्यैवोदाहरणमनयैवार्यया दर्शितम्। यथा नायकस्य प्रकृष्टाध्वगमनमिति पूर्ववदिति तदर्हमिति भवति पूर्वलक्षणार्हो ङ्कच्छेदो यमिति यावत्। अपिशब्द उदाहरणान्तरमपि

सूचयति। अङ्कार्थसन्धानप्रयोजनस्य प्रवेशकस्य स्थानं वाच्यम्। विषयं चाह अङ्कान्तरानुसारीति अङ्कमध्ये भवतीति यावत्। अङ्कान्तरं पूर्वाङ्कान्तरमनुसरति तस्य पश्चाद्भवतीत्यर्थः। प्रत्यङ्कान्तं यो बिन्दुः अनुसन्धानाभिधायिवाक्यं यत्संक्षिप्तं प्रयोजनं तदधिकताकरणं विस्तारमुद्दिश्येति वाच्यमुक्तं, प्रकरणे नाटके चावश्यं प्रवेशकस्तस्यावश्यमुत्तमप्रकृतिविषये उपदेशाय प्रवत्तो परिमितेनोपायेन भूयस्तरावान्तरकार्ये प्रत्युत्पत्तिबहुनां चामात्यादीनामपि स्वकार्यनिरूपणाय प्रवेशकः, अन्यत्र रूपके परिमितकार्योपदेशात् न तथा प्रवेशकोपयोग इति वितनिष्यामः।

अथ विष्कम्भकाद्भेदमस्य दर्शयन् प्रवेशक शब्दो तिविशेषशब्दवाच्यपि भवतीति दर्शयति **नोत्तममध्यमपुरुषैरि**ति। उत्तमादयो पि भवन्ति परिजनास्तन्निवत्त्यर्थमेतत् । उदात्तं संस्कृतं वचनं तस्य निषेधः। अन्ये त्वाहुः– उदात्तं स्वात्मकार्यविश्रान्तं वचनं निषिध्यते, 'आणत्तंमि भट्टिदारिआए' इत्यादिना हि स्वकृत्यं प्रधानोपयोग्येव दश्यते, तत्र न स्वतन्त्रं प्राकृती भाषा। आचारश्च व्यवहारः प्राकृत एव। प्रयोग**माश्रित्ये**ति क्वचित्तु प्रयोगवशात्संस्कृतभाषाचारो विष्कम्भके पि कर्तव्य इति दर्शयति। **संक्षेपार्थमधिकृत्ये**ति यदुक्तं तदेव विभजति **कालोत्थानगतिरसावि**ति। कालोदयस्य गतिरवगमो यतः कालोदयसूचकः कश्चित् प्रवेशकः। यथा– ''अज्ज वसन्दमहूसवे सबहुमाणमाहूय'' इत्यादि (रत्ना)। **अर्थाभिधाने**ति प्रत्येकं संबध्यते, तेन व्याख्यादीनां विषयान्तानां चतुर्णां यो र्थस्तदभिधाने युक्तस्तदुद्देशेन प्रवत्त इति प चप्रकारः प्रवेशक इति यावत्। व्याख्यायत इति व्याख्या। तथा हि– केनचितप्रवेशकेन गूढो व्याख्यायत इत्यर्थः। यथा तापसवत्सराजे अमात्यप्रणिधिः– 'मामिज्जइ असवासएहि हाळाहळस्सपमादसंकिदा (भ्राम्यते पार्श्वकैः प्रमादशङ्कितैः।)'' (तापस अ ४) इत्यादि। अनेन हि नातिव्यवधानोक्तं पद्मावतीगहे च यद्वासवदत्तास्थापनं तस्य गूढं प्रयोजनं व्याख्यातम्। संरम्भः कार्यविशेष (**विषयः**?) अभिप्रायस्तस्यार्थ उपायान्वेषणादि तदभिधानयुक्तः प्रवेशको, यथा नत्तपारे ''गति..... उपस्थितमिदं तत्प्रयोजन''मित्यादि। अनेन वासवदत्तामपहृत्योज्जयिनीं निनीषोर्वत्सेशस्य प्रयोजकत्वं प्राप्तानाममात्यानां संरम्भः शालङ्कायनेनोक्तः। **कार्यं तु** यदाधिकारिकमित्यादि (१६–३), तस्यार्थः प चाङ्गस्यानुष्ठानम्। तद्यथा– कर्मणामारम्भोपायः पुरुषद्रव्यसंपद्देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिरिति। तथाभूताभिधानयुक्तश्च प्रवेशको बाहुल्येन तापसवत्सराजप्रतिभाचाणक्यमुद्राराक्षसादिषु। विषयस्तु भाविनो ङ्कावतारस्येतिवत्तं, तस्यार्थो विशेषरूपः, तदभिधानेन युक्तः प्रवेशको यथा– नागानन्दे द्वितीये ङ्के चेटिकाद्वयेन मदनावस्थेतिवत्तस्य विशेषवर्णनं चन्दनलतागहादि दर्शितम्। अन्यान्यपि प्रवेशकस्य प्रयोजनानि सन्ति। न त्वेतत्परिगणनमित्याह– **अनेकार्थ** इति।

नन्वेवंभूतो र्थो यः प्रवेशके प्रदर्श्यते समासेन विस्तरेण वेत्याशंक्याह **बह्वाश्रयमपी**ति। सन्धिं चिकिर्षव इति अङ्कार्थसन्निवेशनिमित्तं ये प्रवेशकाः प चाप्युक्ताः

चूलिकादयस्तैर्वाङ्काश्रयं बहुवक्तव्यं विततमपि कार्यं संक्षिपेत् यावत्सन्धानोपयोगि तावतत्र ब्रूयात्। यतो, बहुभिर्गद्यगतैरसमस्तैः पदैरसंस्कृतप्रायैः खेदो भवति। अनेन प्रवेशकादौ उत्कलिकाप्रायं बहुतरसमाससङ्कीर्णमभिनयशाखात्रोटनकारित्वात् समाससंशयेनार्थानिश्चायकत्वाच्च न कर्तव्यमित्यपि दर्शयति।

दिवसावसानकार्यं यद्यङ्के नोपपद्यते सर्वम्।
अङ्कच्छेदं कृत्वा प्रवेशकैस्तद्विधातव्यम्।।

इति यदुक्तं तत्रानुपपत्तिर्बहुप्रकारा भवतीति दर्शयितुमाह **यत्रार्थस्य समाप्ति**रिति। यत्प्रत्यक्षप्रयोज्यमपि प्रयोगवशादङ्के समाप्तं भवति तत्प्रवेशकेन कर्तव्यम्, बहुतरत्वं प्रयोगस्य बहुमानास्पदत्वम्।

तदयमत्रार्थः— यत्र दिवसकार्याण्यनेकानि तत्र तन्मध्ये यत्सुन्दरप्रयोगमुप—
—देशोपयोगि च तत्प्रत्यक्षेण दर्शनीयम्। अन्यत्सर्वं प्रवेशकेन वत्तान्तार्था तदवशिष्टेनेतिवत्तनिर्वाहफला अल्पा संक्षिप्ता कथा यस्य प्रवेशकस्य। एवं प्रत्यक्षप्रयोज्यप्रवेशकोपयोगो दर्शितः, अन्यत्रापि तं दर्शयति **युद्धं राज्यभ्रंश** इत्यादि। युद्धे शस्त्रसंपातस्य बाहुल्यं राज्यभ्रंशे पि पतनमरणादेः नगरोपरोधे बलस्य यन्त्रसुरङ्गादिदानस्य। इह केचिदाहुः मरणं द्विविधम्, किंचिदन्यसंबन्धिन्या क्रियया संपाद्यं यथा चक्रेण दैत्यस्य शिरश्छेदं, किंचिदन्यसंबन्धिक्रियानैरपेक्ष्येणैव व्याध्याभिघातादिप्रभवम्, तत्राद्यस्यैव निषेधः क्रियते। एतदर्थमेव **कृत**ग्रहणं, तद्धन्यक्रियावाचकं न च तद्युद्धेन संग्रहीतम्, अयुद्धे पूर्वकस्याप्यशङ्कितशिरश्छेदस्य दर्शितत्वादिति। त एवं प्रष्टव्याः— इदं मरणं प्रयोज्यमिदमप्रयोज्यमिति न तावदत्र विषयविभागे निदानमुत्पश्यामः। मतस्य कथं निष्क्रमणं कथं वावस्थानं, ततो नाट्योपयोगिसमस्तध्रुवागानादिप्रक्रियाविलोपः सामाजिकानां विरसताप्रतिपत्तिरिति तु सर्वत्र मरणं समानं तस्मादङ्गे मरणमप्रयोज्यमेव। ननु मरणानुभाववर्णनेनेदानीं किं कृत्यं, युद्धवीररौद्रादावप्येतदनुभाववर्णने किं प्रयोजनं तदनुभावापरिज्ञाने प्रवेशकैरपि कथं वर्णनं स्यादिति चेन्मरणे पि समः समाधिः।

किं च यत्र प्रत्यापत्तिशून्यं मरणं तत्प्रक्रियाविलोपकत्वान्न प्रयोज्यम्। यत्तु क्वचित्प्रत्यापत्तिः यथा जीमूतवाहनस्य तदेव क्षणमात्रानिश्चितचेष्टात्मकं प्रयोज्यमेवेति सो पि मरणानुभावसाक्षात्करणस्य विषयः। यद्वाहिनीनामपि साटोपपरिक्रमणं शस्त्रवर्णनादिप्रारम्भरूपमदः प्रयोज्यमपि तु तन्निर्वाहो न प्रदर्शनीयः। एतदेव कारणे स्फुटीकृतं युद्धमेव यन्निर्वाहपर्यन्तं यावन्मरणमेव यदचिरप्रत्यापत्तिर्न भवति तन्न प्रत्यक्षेण प्रयोज्यं, **प्रवेशकै**रिति उपक्षेपप चकमध्यादन्यतमेनोपक्षेपेणेत्यर्थः। अन्ये त्वाहुः— व्याधिजमभिघातजं च मरणं रङ्गे प्रयोज्यं, अपुनर्जनिनिष्क्रान्तिरहितप्रकृतिर्विधेयेति।

अथ सर्वथा यद्विषयं मरणं नाख्येयं तद्दर्शयति **अङ्के प्रपेशके** चेति। प्रकरणे नाटके नायकस्य प्रत्यक्षेण वा वर्णनया वा न मरणं वर्णनीयम्। अङ्क इति प्रत्यक्षेण, प्रवेशक इति वर्णनया।

ननु प्रत्यक्षेण ये न कस्यचिन्मरणं प्रयोज्यमिच्छन्ति तन्मते अङ्कग्रहणं किमर्थं, तत्राहुः वधशब्देन (न) मरणमुच्यते, अपि तु परकृतघातदानादि, तत्रान्यघातदानाद्यपि प्रत्यक्षेण रङ्गे प्रदर्श्यते। अचिरप्रत्यापत्तौ समाश्वासे यस्तु नायकस्तस्य ख्यातस्य न घातदानादि प्रदर्शनीयम्। अन्ये तु ख्यातं नायकं पताकानायकादिकमिच्छन्ति। **अपसरण**मिति पलायनम्। यथोक्तं– ''अशक्ये सर्वमुत्सज्यापगच्छेत्, अदष्टा हि जीवतः पुनरावत्तिः'' इति। ग्रहणं वा कार्यं सनिबन्धनबन्धनमिति। यथा **वासवदत्तनत्तधारे**(पारे?) वत्सराजस्य। **सन्धि**रिति सन्धानं, यदुक्तम्–

प्रवत्तचक्रेणाक्रान्तो राज्ञा बलवताबलः।

सन्धिनोपनमेत्.....।। इति (अर्थशास्त्रे ७–३–२२ अध्या)

अपसरणबन्धनसन्धीनां विषयविभागसूचनायाह। प्रधानरसानुसारेण यत्काव्यं यत्काव्यार्थस्तस्य श्लेषा बन्धनाद्युपपत्तयः तैरुपलक्षितमपसरणादिकार्यमिति यावत्। **कार्यविशेषै**रिति केषांचित्पाठः।

अथ यद्यदप्रयोज्यं प्रत्यक्षेण तस्य सामान्यद्वारकं संग्रहं दर्शयितुमाह– **न महाजनपरिवार**मिति। महाजनः संख्यया तेन परिवारः परिवारणं यत्र यत्र वस्तूनि तन्नाटकमिति तद्युक्तं नाटकं प्रकरणम्। वाग्रहणादन्यदपि न कार्यम्। एतदुक्तं भवति– बहुतरपुरुषसाध्यं यत्किंचित्तद्यथा समुद्रे सेतुबन्धनमित्यादि, तत्सर्वं प्रत्यक्षेण न प्रदर्शनीयम्। तथा महतो जनस्य पितापुत्रश्वश्रूस्नुषागुरुशिष्यादेः परितो वरणं व्रीडातङ्कादियोगेन यत्र जायते वैरस्यं वा महाजनस्य सभ्यस्य च यत्र परिवरणं चित्तसङ्कोचः तत्सर्वं परिचुम्बनाद्यपि न प्रत्यक्षप्रयोज्यम्। यदि च प्रत्यक्षप्रयोज्यं तत्र प च कार्यपुरुषाः यदि वा चत्वारः प्रकरीपताकादिरूपाः तेषां च परिवारस्वभावास्तावन्त एवेति यदि प्रकर्षस्तदा दशाष्टौ वा रङ्गे प्रविष्टा भवन्ति। ततो धिकेषु त्वभिनयचतुष्टयं सम्यगविभावनीयं स्यात्, देवतात्रापरिदश्यमानजनसमाजवत्। ऐवमङ्के प्रवेशकस्वरूपं वितत्याभिहितम्, अधुना तत्समुदायस्य नाटकस्य यादग्रूपं तद्दर्शयति **काव्यं गोपुच्छाग्र**मिति। क्रमसूक्ष्माङ्गामिति केचित्। अन्ये तु यदा गोपुच्छे केचिद्वालाः ह्रस्वाः केचिद्दीर्घाः एवं कानिचित्कार्याणि मुखसन्धौ परिसमाप्तानि कानिचित् प्रतिमुखपर्यन्तानि कानिचिदवमर्शावसानानि पराणि निर्वहणपर्यवसायीनि, तद्यथा रत्नावल्यां प्रमोदोत्सवो मुखसन्धावेव निष्ठित इत्यादि यावत् बाभ्रव्यवत्तान्तो मुखोपक्षिप्तो निर्वहणनिष्ठां प्राप्तः। साररूपाश्च पदार्थाः पर्यन्ते कर्तव्याः।

अत्र हेतुमात्र **सर्वेषां काव्यानामि**ति। नाटकादीनां **निर्वहणो द्भुतरसः** कर्तव्यः। एवं हि तानि काव्यानि रसभावानां युक्त्यां परस्परसंबद्धानि युक्तानि भवन्ति, नान्यथा एकवाक्यतां

च विना कः प्रबन्धार्थः। तथा च शङ्गारवीररौद्रैः स्त्रीरत्नपथिवीलाभशत्रुक्षयाः करुणादिभिस्तन्निवत्तिरितीयता क्रमेण लोकोत्तरासंभाव्यमनोरथप्राप्तौ भवितव्यमद्भुतेन। असाधारणलाभो हि यदि फलत्वेन कल्प्यते वश्ये क्रियायाः किंचिदस्त्येव फलमात्रमिति किं तत्रोपायव्युत्पादनायत्तेनत्यद्भुतावसानत्वमकार्यम्, केन व्युत्पाद्यजनस्यैवं बुद्धिर्जायते– 'अहो दुष्करमप्युपायक्रमेण सिध्यति' इति, ''उपायेन वर्तितव्यं'' इति। पूर्वोक्तमुपसहरति वक्तव्यानन्तरं चाक्षिपति **नाटकलक्षणमेतदि**त्यादि। क्वचिल्लक्ष्यं प्रसिद्धम्, इह तु लक्षणबलेन तस्यैव यत्नप्रसाध्यत्वमिति दर्शयति। लक्षणयुक्त्या लक्षणद्वारेण युक्तिः हृदयानुप्रवेशनया हेतुभूतया संपाद्ययेत्यर्थः। तत्र प्रकरणस्य सभेदस्य सलक्षणं नामनिर्वचनं चाह **यत्र कविरात्मशक्त्ये**ति। वस्त्विति साध्यं फलं, शरीरमिति तदुपायं वस्त्वादिकं काव्याभिधेयमात्मशक्त्या प्रकुरुते यत्काव्येन तत्प्रकरणमिति बुधैर्ज्ञेयमिति संबन्धः। यत्र समुत्पाद्यं न भवति तत्र यो नुत्पार्द्यो शः न कुत्रस्थो ग्राह्य इति दर्शयितुमाह **यदनार्षमि**त्यादि। अनार्षमिति पुराणादिव्यतिरिक्तबहत्कथाद्युपनिबद्धं मूलदेवचरितादि। **आहार्यमि**ति पूर्वकविकाव्याद्वाहरणीयं समुद्रदत्तचेष्टितादि।

ननु च तत्रांशे कविकृतत्वाभावात्कथं प्रकरणवाचोयुक्तिरित्याह **उत्पन्ने** पूर्वसिद्धे **बीजं वस्तु** च यत्र तादशमपि तत्, यदिति वस्तुभूतैः बहत्कथादौ काव्यान्तरे वा प्रसिद्धैर्गुणैर्युक्तं, प्रकरोति तदिति तस्माद्धेतोरेतदपि प्रकरणम्। तेन बहत्कथादिसिद्धस्य मूलदेवादेरधिकावापं कविशक्तिर्यदा विधत्ते तदा प्रकरणम्। एवं पूर्वकविसमुत्प्रेक्षितसमुद्रदत्तचेष्टितादिवर्णने पि अधिकावापं विदधत्कविः प्रकरणं कुर्यादिति तात्पर्यम्। नन्वस्येतिवत्तस्य कथं योजनेत्याशंक्य पूर्वोक्तमेवातिदेशद्वारेण स्मारयितुमाह **यन्नाटके मयोक्तमि**ति। 'नानाविभूतियुक्तमद्धिविलासादिभि'रित्यादिनायकफलवत्वमुक्तं तत्, **वस्तुशरीर**मिति 'अङ्कप्रवेशकाढ्यं' **वत्तिभेदाश्चे**ति ''नानारसभावचेष्टितैर्बहुधा। सुखदुःखोत्पत्ति–––कृत''मिति, **सलक्षणा**मित्यङ्कप्रवेशकयोर्लक्षणयुक्तमिति।

केचित्तु शरीरग्रहणेन गतार्थं तस्माल्लक्षणमित्यङ्कपरिमाणमङ्कान्तरसन्धानहेतुषु च प्रवेशकेषु यत्प्रयोज्यमुक्तं 'दिवसावसानकार्यं यद्यङ्केनोपपद्यत' इत्यादि तत्सर्वं प्रकरणे पि योज्यम् (इति)। अतिदेशायातमतिप्रसङ्गं वारयत्यार्याद्वयेन **विप्रवणिगित्यादिना।** सचिवो मन्त्री, अमात्यो धिकृतः सार्थवाहस्तावत्पण्यानामाहर्ता तद्देशक्रयविक्रयकृतो वणिजो न्य एव। **नैकविध**मित्यनेकरसयुक्तमित्यर्थः। 'नैकरसान्तरविहित' इति तदतिदेशमात्रमिति सूचितम्। प्रख्यातोदात्तेति प्रसक्तं निषेधति **नोदात्ते**ति। तन्निषेधे चार्थान्नाटके वैपरीत्यमायातम्। नाटके च देवो नायकत्वेन निषिद्ध इति प्रकरणे कर्तव्यत्वेनापाद्यत इत्याह **न दिव्यचरित**मिति। तथा दिव्याश्रयमिति यदनादेशाद् देवानां प्रयोज्यत्वं प्रसक्तं तदप्यनेन निषिद्धम्। नाटके देवानामिवेहापि राज्ञः प्रवेशे शङ्कमाने निराकरोति **न राजसंभोग** इति, यदि वा औत्पत्तिकत्वे पि न राजोचितसंभोगोत्प्रेक्षा विप्रादिषु करणीयेत्यनेन शिक्षयति, अत एव

राजनियमः। उचितो न्तःपुरजनः क चुकिप्रभतिः तद्व्यतिरिक्तो बाह्यजनो त्र चेटदासादिः प्रवेशकादौ कार्य इत्यर्थः।

एतदेव दर्शयति **दासविटश्रेष्ठियुत**मिति क चुकिस्थाने दासः, विदूषकस्थाने विटः अमात्यस्थाने श्रेष्ठीत्यर्थः। वेश्यावाटो वेशः तत्र या स्त्री तस्याः य उपचारो वैशिके (अ २३) वक्ष्यते स कारणं यस्य शङ्गारस्य तेनोपेतं, कुलस्त्रीविषयं चेष्टितं मन्दं यत्रेति। उपाध्यायास्तु मन्दकुलानां स्त्रीणां चरितं यत्रेत्याहुः, तेन कुलाङ्गनापि तत्र मन्दकुलैवेति दर्शितं भवति। एतदेवाभिमन्यमानेन पुष्पदूषितके शोकदत्तादिशब्दाकर्णनेन समुद्रदत्तस्य शङ्का योपनिबद्धा सा न दोषाय निर्वहणान्तोपयोगिनी हि नन्दयन्तीनिर्वासनं तस्याश्च गहान्तरावस्था। इदमेव मुखसन्धौ मूलं परपुरुषसंभावनामूलत्वात्। एवमनभ्युपगमे तु श्वशुरेण वध्वा असन्निहिते पुत्रे निर्वासनं शबरसेनापतिगहे वस्थानमित्युत्तमप्रकृतीनामनुप––पन्नमेव। तस्मात् स्ववर्गापेक्षयेदमुत्तमत्वमद्यतने राजोचितानामुत्तमप्रकृतीनां वणिङ्मात्रे समारोप्य तद्दूषणं यत्कृतं न तेन ब्रह्मयशःस्वामियशः खण्डितं अपि तु स्वयश एव। ये हि मिथ्यायशो मिथ्या कलङ्कयितुमुद्यतास्तेषां स्वयश एवेति यशोमात्रावशेषता न हि नायकशब्दमात्रादेव दुर्योधनवदेव शङ्काद्यनुचितम्। प्रकरणे हि तादश एव नायकः केवलमन्यवणिगपेक्षया स उत्तमो स्तु, व्युत्पाद्यश्च तत्रैवंविध एवेत्यलमवान्तरेण।

अथास्य सप्तविधस्यापि प्रकरणस्य प्रत्येकं भेदत्रयं दर्शयितुमार्यात्रयं पठति **सचिवे**त्यादि। सचिवादीनां संबन्धिनी यत्र गार्हस्थ्योचिता **वार्ता** पुरुषार्थसाधकमितिवत्तं न तत्र वेश्याङ्गना नायिकात्वेन निबन्धनीया, विटादीनां तु नायकत्वेन कृतानां गार्हस्थ्यचिन्तायां सापि निबन्धनीयेत्युक्तं भवति। यदि गहस्थचिन्तावर्णनं न भवति श्रेष्ठिसार्थवाहादीनां च विप्रादिवदविरुद्धो वेश्यायोग इति सापि प्रदर्शनीयेति लब्धमर्थात्। तत्र न तु कुलस्त्रीसंगमः कर्तव्यः। तदाह **यदि वेशयुवतीति। अथ कुलजनप्रयुक्तमि**ति। एवं श्रेष्ठिसचिवादिविषयं शुद्धं भेदद्वयमुक्तं, विटादिविषयस्तु सङ्कीर्ण एव वेश्याकुलजाभ्यां भवति।

तदाह **यदि वा कारणयुक्त्ये**ति। विटे वेशस्त्री प्रधानत्वात् पूर्वमुक्ता कुलस्त्री तु तत्रापि पितपितामहाद्यनुरोधादिति कारणशब्देनोक्तम्। अविकृता भाषा कुलस्त्रियाः शौरसेनी, वेश्यायाः संस्कृता, आचारः कुलस्त्रियां विनयप्रधानः, अन्यस्यां तद्विपरीतः। तथा च देवीचन्द्रगुप्ते वसन्तसेनामुद्दिश्य माधवस्योक्तिः (माधवसेनामुद्दिश्य चन्द्रगुप्तस्योक्तिः?)–

आनन्दाश्रु सितेतरोत्पलरुचोराबध्नता नेत्रयोः
प्रत्यङ्गेषु वरानने पुलकिषु स्वेदं समातवन्ता।
कुर्वाणेन नितम्बयोरुपचयं संपूर्णयोरप्यसौ
केनाप्यस्पशताप्यधोनिवसनग्रन्थिस्तवोच्छवासितः।। इति।

अत्र हि व्युत्पाद्यस्तथाविध एव तादश्येव च वत्तङ्के एवमेतत्। एकविंशतिः प्रकरणे भेदाः। प्रकरणे नायकापेक्षया प्रायशः उपयोगिनो पि मध्यमा एव संभवन्तीति तत्र विष्कम्भकस्य

बाहुल्येन संभावनमित्याशयेन प्रकरणे विष्कम्भकं लक्षयति **मध्यमपुरुषै**रिति। विष्कम्भयत्युपस्तम्भयतीति विष्कम्भकः। संस्कृतेन वचनेनानुगतं च सङ्कीर्णो प्यस्त्येवेति प्रवेशकेन वार्थक्रियाकर्तव्यतामेव कर्तव्यत्वेनाभिसन्धाय विष्कम्भकः कार्यः। तामेवार्थक्रियां स्पष्टयति **संक्षेपात्सन्धीनामर्थानां** चेति। सन्धीनां यः संक्षेपो युद्धराज्यभ्रंशादीनां चार्थानां यः संक्षेपस्तमभिसन्धाय अङ्कस्याङ्कयोर्वान्तराले मध्ये विष्कम्भको योज्यः।

ननु कोहलेन मुखाङ्कस्य चायमन्तरान्तरे विहितः

''मध्यमपुरुषनियोज्यो नाटकमुखसन्धिमात्रस चारः।

विष्कम्भको हि कार्यो नाटकयोगे प्रवेशकवत्।'' इति।

तत्कथमुक्तमङ्कान्तरानुसारीति, उपलक्षणार्थमेतदित्यदोषः। तथाहि बीजं बिन्दुश्च प्रथममुपक्षिप्येते, तत्र च पथग्जनस्यालब्धनिवेशत्वात् सचिवादिगोचरत्वाच्च तदुपक्षेपे विष्कम्भकस्यैवावसर इति यदुच्यते तदङ्कान्तरेष्वपि मन्त्रगुप्ततायां तुल्यमिति तत्राप्यनिवारितो विष्कम्भकप्रवेशः। पथग्जनो पि वा यत्र मन्त्रचिन्तायामनुप्रवेश्यते तत्र प्रवेशको पि प्रथमोपक्षेपे न योग्य इति युक्तम्। सामान्येनाङ्कान्तरानुसारीति अङ्कस्य मध्य इत्यनेन प्रस्तावनाङ्कमध्यवर्तिता– –प्युक्तैव। प्रवेशकविष्कम्भकविषये लिङ्गवचनयोरतन्त्रत्वात् स्त्रीणामप्यनुप्रवेशः संख्याधिक्यस्य च।

एवं सकलपुरुषार्थविषया व्युत्पत्तिः नाटकेन प्रधानस्य राजप्रायस्य क्रियते, प्रकरणेन च मध्यमप्रायस्य, अपूर्वकुतूहलवतस्तत्रापि चैकविंशकस्याभिधानात् चित्रव्युत्पत्तिः। तत्र रूपकलक्षणस्य संकीर्णतया बहवो भेदाः सन्तीत्युक्तं सामान्यलक्षणे। तत्र प्रधानभूतयोः सर्वरूपकप्रसरणकारिणोः नाटकप्रकरणयोर्लक्षणसाङ्कर्ये दर्शिते सर्वरूपकाणां दर्शनं तत्त्वतीत्यभिप्रायेण तदेव दर्शनीयम्। उद्देशक्रमानुसारेण तु तल्लक्षणविस्तरणं पुनस्तल्लक्षणपरामर्शे च गौरवमित्यभिप्रायेणार्यात्रयं पठति **प्रकरणनाटकभेदादि**त्यादि। प्रकरणनाटकाभ्यां भेदात् लक्षणान्यत्वा**न्नाटिका ज्ञेयेति** दूरेण संबन्धः। उत्पाद्यं वस्तु चरितं च नायकं च नपतिमन्तःपुरकन्यां सङ्गीतशालाकन्यां वाधिकृत्य प्राप्यत्वेन अभिसन्धय कर्तव्या। स्त्रियः प्रायेण बाहुल्येन यत्र। चत्वारो ङ्काः यस्याः कस्याश्चिदवस्थायाः सरसो वस्थासमावापः कार्य इति यावत्। ललिताभिनयात्मिकेति कैशिकीयं बद्धेत्यर्थः सुष्ठु पूर्णतया विहितानि चत्वार्यपि कैशिक्यङ्गानि यत्र। ''अङ्गगात्रकण्ठेभ्य'' इत्यत्र स्वाङ्गविशेषणाभावात् ङीष् प्रयोगः। एतदपि न मुनित्रयमतमित्यनादत्यमिति त्वन्ये। रतिपुरस्सरः संभोगो राज्यप्राप्त्यादिलक्षण आत्मा प्रधानभूतं फलं यस्याम्। अत एवाह राजगतैरूपचारैः व्यवहारैर्युक्ता, अन्यां चेदुद्दिश्य तत्र व्यवहारः, तत्पूर्वनायिकागतैः क्रोधप्रसादव चनैरवश्यं भाव्यमिति दर्शयति **प्रसादेने**ति, आर्यानुरोधात्क्रोधस्य पश्चात्पाठः।

ननु यस्याः क्रोधो भवति सा न काचिदुक्तेत्याशंक्याह नायकेति। नायकस्य येयं देव्याद्या नायिका तथाभिलषितनायिकान्तरविषये दूतीकृतं सपरिजनं परिजनसमद्धिर्यस्यां। एतदुभयप्रधानं सर्वं तत्रेत्यर्थः। अन्यत्सन्ध्यङ्गादि सर्वं पूर्ववदेव। तत्रैका नायिका

तावद्व्याख्याता भवति। षट्पदेयं नाटिकेति संग्रहानुसारिणो भट्टलोल्लटाद्याः। श्रीशङ्कुकस्त्वयुक्तमेतदित्यभिधायाष्टधेति व्याचष्टे। तथा हि देवी कन्या च ख्याताख्याताभेदेन चतुर्धा, कन्या त्वन्तःपुरसङ्गीतकभेदेन द्विधेति। घण्टकादयस्त्वाहुः— नायको नपतिरित्येतावन्मात्रं नाटकादावुपजीवितः न तु प्रख्यातत्वमपिद्भेदद्वयादन्ये ष्टाविति षोडशभेदा इति। नायको नपतिरिति ये प्रथमां पठन्ति तैर्यत्रेत्यध्याहृत्यैकवाक्यतायां तूभयस्य कार्यम्। अन्ये प्रथममार्यार्धं पथगेव च वाक्यं योजयन्ति **प्रकरणभेदा**त्प्रकरणलक्षणांशात् उत्पाद्यं वस्तु नाटकलक्षणांशाच्च नपतिर्नायकः **स्थिते यत्रेत्य**भिप्राये नाटिकैवंभूतेति।

अन्ये तु प्रकरणनाटकभेदात् नाटिका भिद्यते नाटकशब्देनाभिनेयं रूपकमात्रं तस्यां सौकुमार्यप्रदर्शनाय स्त्रीत्वेन निर्देश इति प्रकरणिकापि सार्थवाहादिनायकयोगेन कैशिकीप्रधाना लभ्यत इत्याहुः। यद्यपि च नाटिकैवमुक्ता, तथापि प्रकरणनाटकलक्षणे एव तथा स्थिते तत्रेत्यभिप्रायेणोपसंहरति **प्रकरणनाटकलक्षण**मिति अन्यदासूत्रयति **वक्ष्याम्यतः परमि**ति।

ननूद्देशक्रमत्यागे किंफलं उद्देशस्तावदत्र न परिगणनार्थ इत्युक्तं, तेनास्य प्राधान्यान्नाटिकया च विच्छिन्नो सावुद्देशक्रमः। यथा च नाटकप्रकरणयोर्व्युत्पाद्यभूयस्त्वं तथा समवकारे पि तत्र त्रिवर्गोपायप्रदर्शनात्। केवलं तत्तद्देवताभक्तानां तच्चरितपुरस्सरतया तस्य तस्योपायस्यादरणीयत्वं भवतीत्यनेनाभिप्रायेण दिव्यो त्र नायकत्वेन निषिध्यते। तदीयं च भूयस्तरं न भूयस्तरं विततवत्तमनुक्रियया प्रदर्श्यते, येन तन्मध्यपतितानां भवति निर्वेदादीनामभावे प्रयोगस्यार जकत्वं नाटकगताङ्कैकदेशवत्, नाटकादौ तु भूयस्तरं चरितमनेकाङ्गर जकवर्गेण विना न र जकमेवेति नाटकादौ दिव्यनायकनिषेध उक्तः। (नोक्त?) तत्र हि राजप्रभतयो बहुतरफलानुबन्धिनि महति फले संप्रयाससाध्ये व्युत्पाद्यन्ते, न तथेह किन्तु त्रिवर्गोपायमात्रे।

अन्यरूपकाणां तु त्रिवर्गोपायत्वं नास्ति एकाङ्कत्वात्, डिमस्तु चतुरङ्को पि पश्चान्निर्दिष्ट इत्यत्र तल्लक्षणे कारणं वक्ष्यामः। तस्मात् त्रिवर्गव्युत्पादकत्वा दनेकाङ्कत्वाच्च तादशरूपकानन्तरमेवाभिधानं युक्तमित्यलं बहुना।

देवासुरस्य यद्बीजं फलसंपादनोपायस्तेन **कृतो** विरचितः। देवासुरा अपि चाप्रख्याता बहत्कथादौ श्रूयन्ते स्वयं वा केनचिदूह्यन्त इति तन्निरासार्थं **प्रख्यात**पदम्। यद्यपि देवाः पुरुषापेक्षयोद्धतास्तथापि स्वापेक्षया गाम्भीर्यप्रधानतयो**दात्ता** उच्यन्ते भगवत्रिपुररिपुप्रभतयः। प्रशान्ताः ब्रह्मादयः, उद्धताः नसिंहादयः। अत्र यत्र तावत्येव समापन्नं **त्र्यङ्क** इत्युक्तम्। अर्थत्रयं च **कपटविद्रवशङ्गाराः** प्रत्येकं त्रिविधास्तत्र प्रत्यङ्कं विद्रवादयस्त्रयस्तथाहि कपट उपायांशे विद्रवो व्यापत्तिसंभावनांशे शङ्गार फलांशे, एवं द्वितीये ङ्के ततीये च। **द्वादशनायकबहुल** इति प्रत्यङ्कमिति केचित्। अन्ये तु प्रत्यङ्कं नायकप्रतिनायकौ तत्सहायौ चेति चतुराहुः, समुदायापेक्षया हि द्वादशेति। **सप्रहसन** इति वचनात् प्रथमे ङ्के

कामश्शङ्गारः प्रयोज्य इत्याह तत्रैव हास्यस्यागमनात्। **स्त्रि(क्रि?)योपेत** इति कामश्शङ्गारात्मकं द्वादशघटिकामध्यसंपाद्यैः कपटाविद्रवप्रहसनलक्षणैरुपायैः प्राप्ते प्रथमाङ्के निबध्नीयादिति तात्पर्यम्। द्वितीये त्वङ्के घटिकाचतुष्टयगामिभिः कपटादिभिरुपायैः यद्यपि प्रत्यङ्कं वस्तुपरिसमाप्तिरस्ति तथापि ततीये वस्तुसमाप्तिग्रहणेनेदमाह– बीजे तावदङ्कत्रयार्थ उपक्षेप्तव्यः, तदनन्तरमङ्क– –द्वये वान्तरवाक्यार्थसमाप्तिरन्योन्यविशिष्टैव विधेया। ततीये त्वङ्के वान्तरवाक्यार्थः। ततीयस्ताभ्यां प्रतिसंबद्धः। एवं महावाक्यार्थनिर्वाहहेतुसंबद्धतैव सर्वस्य जायते। एवं हि सानुसन्धाना विततदशो पि त्रिवर्गसिद्ध्युपायव्युत्पत्त्यनुगहीता भवति, निरनुसन्धानापि तावत्तावत् परिसमाप्त्या तावत्युपाये निजहृदयसंवादबलादिति। अत एव संबद्धो वकीर्णश्च यत्रार्थः समवकारस्तदाह **अङ्कोङ्क** इति। तुर्व्यतिरेके अङ्कत्रयसंबन्धो भवति, न त्वङ्को ङ्कः परस्परमित्यर्थः। **काव्यबन्ध**मिति। सर्ववस्तु काव्यबन्धोपश्लिष्ठमित्यर्थः अन्यथा हि समवकार एकं कार्यमिति केयं फणितिः।

एतदेव निर्वाचनेनाह **अर्थ हि समवकार** इति। समवकार इत्यस्मिन् शब्दे र्थ वाच्यमप्रतिसंबन्धमिति नातिसंबद्धं कि ित्संबद्धं वस्त्विच्छन्ति संशब्दबलादवशब्दबलाच्च। प्रतिशब्देनातिशय उक्तः स निषिद्धः। त्रिविद्रव इत्युक्तं तत्त्रयं वक्तव्यमचेतनकृतमन्यकृतमुभयकृतं वा यदनर्थात्मकं वस्तु, यतो विद्रवन्ति जनाः **स विद्रव** इति त्रिविधः। तत्राचेतनकृतमुदाहर्तुं जलवाय्वादिग्रहणम्। चेतनकृते **गजेन्द्र** उदाहरणम्, द्वयकृते **नगरोपरोध**स्तस्य युद्धाग्निदानादिसंपाद्यत्वात्। कपटो व चना तस्याश्रयणमङ्गीकरणम्। त्रिधा तत्र व चना, बुध्द्यैव कदाचित्केवलया कपटो भवति स हि वस्तुगतक्रमविहितः वस्तु फलं तत्प्राप्तौ वस्तुगतः फलसाधकः कर्ता, तस्य यः क्रम उपायचिन्तनादिः तेन विहितः यत्रानपराद्ध एव व चनेच्छाभावे व चनायाः संपत्त्ययोगात्। यत्र तु द्वयोरपि न कश्चिदभिसन्धिदोषः काकतालीयेन तुल्यफलाभिसन्धानवतोरप्येक उपचयेनापरस्त्वपचयेन युज्यते, तत्र व चना सा दैवकृता व चना, न च कस्यचित्सुखमन्यस्य दुःखमुत्पादयतीति।

धर्मे र्थे काम इति सप्तम्या कार्यत्वं कारणत्वं चोच्यते। तेन धर्मो यत्र हेतुर्वा साध्यो वा नायिकालाभे स धर्मश्शङ्गारः। एवमर्थकामयोर्वाच्यम्। यत्र श्शङगार इति तद्विषयः प्रमदा व्यपदिश्यते, व्रतादियुक्त्या प्राप्यो यत्र च प्राप्ते धर्मप्रार्थनारूपमात्महितं यज्ञादि पत्नीसंयोगकृतं सिध्यतीति संबन्धः अनेकधेति राज्यभूमिगोसुवर्णादिभेदेनेत्यर्थः। रतिबहुमानो र्थार्थमिति योषितां पुरुषाणां च।

ननु च देवेषु कथमर्थार्थित्वं, गन्धर्वयक्षादिषु संभवत्येवेति केचित्। यदर्थनीयं तदर्थो देवेष्वपि चैतत्संभवतीत्यन्ये। उपाध्यायास्त्वाहुः– तत्र नायकयोरनुप्राप्तिरप्यन्यगतैव। यथा भगवतो भवानीपतेः गिरिराजपुत्रीसङ्गमनमिन्द्रादीनां तारकाक्रान्तनिजराज्यसमुन्मोचनाय भवतीति। **कन्यायां विलोभो** नायकस्य तस्याश्च तस्मिन्निति परस्परानुराग**कृत** इत्यर्थः।

स्त्रीपुंसयोरुद्यानस्थानादि प्राप्तौ निभत इति प्रच्छादनपूर्वकं यदि चासावेवास्मीति प्रकटं कृत्वा यः श्रङ्गारः सः कामप्रयुक्त एव। स्त्री पुनरत्र परस्त्री विवक्षिता, यथा शक्रस्याहल्या।

नन्वेवं श्रङ्गारयोगे काव्ये कैशिकीहीनता। कैशिक्यं वत्तौ हीनामिति तत्र समासः, तेन नर्माद्यङ्गचतुष्कतदुपर जकगीतनत्यवाद्याद्यभवात् कैशिक्या हीनात्र भवति। उपाध्यायास्त्वाहुः— न कामसद्भावमात्रादेव कैशिकीसंभवः, रौद्रप्रकृतीनां तदभावात्। विलासप्रधानं यद्रूपं सा कैशिकी, न च चरितम् तद्रूपानुप्रवेशे पि तद्व्यवहारः, प्राधान्यकृतो ह्यसावित्युक्तम्। तेन तत्र विषये भारत्यादिवत्त्यन्तराभिधानमेव युक्तमिति। उष्णिक्सप्तभिः गायत्री षड्भिः बन्धकुटिलानि विषमार्धसमानि तान्यत्र समवकारे सम्यग्योज्यानीति। नैव प्रयोज्यानीत्युद्भटः पठति, स्रग्धरादीन्येव प्रयोज्यानि नाल्पाक्षराणीति स व्याचष्ठे। एवं श्रद्धालवो देवताभक्ताः तद्देवयात्रादावनेन प्रयोगेणानुगह्यन्ते, निरनुसन्धानहृदयाः स्त्रीबालमूर्खाश्च विद्रवादिनाहृतहृदयाः क्रियन्त इत्युक्तः समवकारः।

अथेहामगमाह **दिव्येति** दिव्यानां पुरुषाणां **आश्रयणं** नायकतया तेन **कृतः, दिव्यस्त्री**निमित्त्**मुपगतं युद्धं** यत्र। दिव्यानुप्रवेशात्समवकारवत् असंबद्धार्थता मा प्रसांक्षीदित्याह **सुविहितेन** संश्लिष्टेन वस्तुना निबद्धः, **वि**गतानि **प्रत्ययकारणानि** विश्वासहेतवो यत्र। मध्ये च तत्र दिव्यानामपि प्रवेशो भवतीति दर्शयति **उद्धतपुरुषे**ति **स्त्री**निमित्तको **रोषः**, संक्षोभ आवेगः स्त्रीनिमित्तं यानि **भेदनाप्र(प?)हरणावमर्दना**नि यथायोगं स्त्रीविषयाणि अन्यविषयाणि तैः प्राप्तं वस्त्वधिष्ठानं प्रमदालक्षणं यस्य तादशः श्रङ्गारो यस्मिन्। **अवमर्दनं** दण्डः। **सुसमाहितः** काव्यबन्ध इत्यनेन वीथ्यङ्गान्यत्र योज्यानीति दर्शयति। अङ्कपरिमाणं नायकसंख्यां वत्तिरसविभागं च व्यायोगातिदेशेनाह **यद्व्यायोग** इति। **कार्य**शब्देनाङ्क उच्यते। तनैक एवाङ्कः नायकास्तु द्वादश समवकारातिदेशेन व्यायोगे तल्लाभात्। अत्र तु समवकारातिदेशेन सर्वसंपत्तेर्गौरवं स्यात्।

ननु युद्धमवमर्दनं चेत्युक्तं तत्रास्य प्रत्यक्षप्रयोज्यता माभूदिति दर्शयति **यत्र** त्विति। वधेप्सितानां वध्यानां भवेदिति संभाव्यत इत्यर्थः। तत्रेति येषामिति चार्धमाहार्यं। **व्याज**मिति पलायनादि। ईहा चेष्टा मगस्येव स्त्रीमात्रार्था यत्र स ईहामगः।

अथ डिममाह प्रख्यातवस्तुविषय इति। नाटकतुल्यं सर्वमन्यत्केवलं सन्धीनां रसानां चासमग्रता च श्रङ्गारहास्यवर्जं **षड्रसत्वे** पर्यायेण शान्तस्य प्रयोगः स्यादित्याह **दीप्तरसे**ति। काव्ययोनिः काव्यवस्तु। देवादयो बाहुल्येनात्र **सा वत्यारभटी**ति। 'जातिरप्राणिनाम्' इति केचित्। सा वत्यारभटीवत्तिसंपन्नं वत्तिद्वयं यत्र वत्तिसमूहे वा वत्तिशब्दः सा वत्यारभटीलक्षणव्यावत्त्या संपन्नः। डिमो डिम्बो विद्रव इति पर्यायाः, तद्योगादयं डिमः। अन्ये तु डयन्त इति डियः उद्धतनायकास्तेषामात्मनां वत्तिर्यत्रेति। ''इको ह्रस्वो ङ्यो गालवस्य'' इति ह्रस्वः। **नानाश्रयभावसंपन्न** इत्यनेन सर्वभावयुक्तत्वादितिवत्तवैचित्र्यमाह।

नाटकादनन्तरं डिमलक्षणं यद्यप्युचितं तथापि तद्गतप्रवेशकादिसंभवनिराकरणार्थं तत्प्रकरणादपकृष्यास्याभिधानं, तेन दिनचतुष्टयवत्तमेवात्र प्रयोज्यम्। अङ्कावतार एव चात्र भवति। चूलिकाङ्कमुखयोस्त्वत्रापि युद्धादिवर्णने समुपयोगो स्त्येव। ततश्च वस्तुतः प्रवेशकाद्यनिषिद्धमेव, प्रवेशकस्य ह्यसंभव एव। सरसेतिवत्तवशाद्वा यथाङ्केष्वन्योन्यासंबन्धात् यथा समवकारे बह्वङ्के पि तस्मात्प्रकरणोत्कर्षो स्य तस्यावसरभावात्। तत्र हि नाटकान्तरमस्याभिधाने प्रकरणस्य न तत्स्पर्धित्वमुक्तं भवेत्। तदनन्तराभिधाने नाटिकादिभेदः कथं ख्याप्यः। नाटिकायां च स्त्रीप्रधानत्वात्, त्रिश्रङ्गारसमवकाराभिधानमेव ततः परं न्याय्यम्। तत्प्रसङ्गेन च दिव्यपुरुषसंबन्धादीहामग उक्तः, तदनन्तरं च दिव्यपुरुषाधिकारेण रूपकाणीति पूर्वमनेकरसयुक्तत्वेन विततेतिवत्तत्वादयमभिधातुं युक्तमित्यलं बहुना।

व्यायोगस्तु डिमस्यैव शेषभूतो, दिव्यनायकाभावात् केवलमत्रोदात्तस्य राजादेः नायकता, अपि त्वमात्यसेनापतिप्रभतेर्दीप्तरसस्य, अत एवाह **प्रख्यातनायके**ति उदात्तग्रहणमपाकर्तव्यमित्यर्थः। **यथा समवकार** इति द्वादशेत्यर्थः। तावदङ्कपरिमाणशङ्कामतिदेशात् प्रत्यास या प्रसक्तां वारयितुमाह **एकाङ्क एवे**ति। एवकारेणैकाहचरितविषयत्वान्न्यायप्राप्तमेवात्रैकाङ्कत्वमित्याह।

ननु प्रख्यातनायकशब्देन किमत्र गहीतमित्यतिप्रसङ्गं शमयति **न चे**ति। चो भिन्नक्रमः। दिव्यैर्देवैः नपैः ऋषिभिश्च नायकैः न निबद्धो यं भवतीत्यर्थः।

ननु कस्मादयं व्यायोग इत्याह **युद्धनियुद्धे**ति व्यायामे युद्धप्राये नियुध्यन्ते पुरुषा यत्रेति व्यायोग इत्यर्थः। नियुद्धं बाहुयुद्धं **संघर्षः** शौर्यविद्याकुलरूपादिकृता स्पर्धा। दीप्तं काव्यमोजोगुणयुक्तं, दीप्तरसाद्या वीररौद्राद्याः, तदुभयं योनिः कारणमस्य।

रौद्राद्यनन्तरं "रौद्रस्य चैव यत्कर्म स ज्ञेयः करुणः (६–४०)" इत्युक्तत्वात्तत्प्रधानमुत्सष्टिकाङ्कमेतदनन्तरमाह। **प्रख्यातवस्तुविषय** इति। प्रख्यातं भारतादियुद्धे विषये निमित्ते सति यत्तत्करुणबहुलं चेष्टितं वर्ण्यते तत्ख्यातं स्त्रीपर्ववत्तान्तवत्, माभूदित्य**प्रख्यात**ग्रहणेनोक्तम्। तेनोभयोपादानस्य परस्परविरुद्धार्थत्वादकि ित्करत्वं नाशङ्कनीयम्। **निवत्तयुद्धा उद्धतप्रहाराः** पुरुषा यस्मिन्। **परिदेवितं** दैवोपालम्भात्मनिन्दारूपमनुशोचनं यत्र। **निर्वेदितानि** येषु श्रुतेषु निर्वेदो जायते तादृंशि भाषितानि यत्र। **व्याकुला चेष्टा** भूमिनिपातविवर्तिताद्याः। **सात्त्वत्यारभटिकैशिकीहीन** इति समाहारद्वन्द्वगर्भद्वन्द्वान्तरगर्भस्ततीयासमासः। उत्क्रमणीया सष्टिर्जीवितं प्राणा यासां ता उत्सष्टिकाः शोचन्त्यः स्त्रियस्ताभिरङ्कित इति तथोक्तः। वत्तिभिरुत्सष्टत्वा(दित्य)न्ये तदा द्वित्वं च त्रित्वमुद्देशस्यैकदेशेन। अयमङ्क इति निर्दिष्टो वत्तनुरोधात्। इह च करुणरसबाहुल्याद् देवदेवैर्वियोगः रौद्रबीभत्सभयानकसंबन्धो दिव्ययोगे भवत्यपि न तु करुणयोगः। नन्वेवं देवानां युद्धान्यप्यनुचितमित्याशंक्य प्रसङ्गात्समवकारादौ देशविशेषोपयोगं दर्शयति **दिव्यनायककृत**मिति। तेषां

भारतवर्षावतीर्णानां युद्धादिकं प्रदर्शयेदित्यर्थः। अत्र राज्ञः पच्छति कस्याद्भारतमिष्टमिति। अत्र प्रयोगे प्रतिवक्ति **वर्षेष्वन्येष्वि**ति देशत्वेन भोगभूमित्वेन विहितेष्वपीत्यर्थः। उपवनं गत्वा क्रीडा जलक्रीडादिकाः विहरणमुपवन एव स चरणं नार्या सह रतिः संभोगः प्रमोदो दिव्यपानादिकृतम्। नन्वेवमिलावतकुरुप्रभतिषु वर्षेषु मा तेषां देवानां वत्तं व्याख्यायि तथापि स्वनिवासेषु व्यावर्णतामित्यत आह **ये तेषामधिवासा** इति वसन्ति तेष्विति वासाः। **पर्वता** इति कैलासादयः, **संभोग** इति सा हि तेषां भूमिः भोगस्थानं, तस्मिन्निति भारतवर्षे **कर्मारम्भः** आरम्भग्रहणेनेदमाह **न तेषां** दुःखं पूर्णं कदाचिद्भवति। दुःखपूर्णतायां देवत्वस्यैव विघातानवस्थानप्ताप्त्या स्वरूपलोप इति युक्तमुक्तम्। करुणरसबाहुल्यादुत्सष्टिकाङ्कैः दिव्यैर्वियोग एव तेषां सुखबाहुल्यात्तत्सन्निधाने अन्यस्यापि शोकावसरपराकृतेरिति गाढदुःखाभिभूता, एवंभाराः सुखेन विनेया भवन्ति, यथोक्तं प्राक्'स्यैर्य दुःखार्दितस्य च' (१–१११) इत्युत्सष्टिकाङ्कप्रयोगः।

एवं र जनप्रधानेन करुणेन युक्तं रूपकमभिधाय र जनाप्रधानं हास्यप्रायं प्रहसनं लक्षयति विभागमुखेन **प्रहसनमपि विज्ञेय**मिति द्विविधमिति। विभागः **शुद्धं सङ्कीर्ण चा**पीति। अपिशब्दो तिक्रमः, **तथेति** सामान्यलक्षणम्। तदयमर्थः द्विविधमपि तथा प्रहसनरूपं हास्यरसप्रधानमित्यर्थः। **लक्षणविशेषं** विशेषलक्षणम्। भगवत्तापसविप्राः यतिवानप्रस्थगहस्थाः, अन्ये शाक्यादयस्तैरुपलक्षितम्। हास्यप्रधानवचनसंबन्धशीलनादिना **कुत्सितैः पुरुषै**रत एव प्रहस्यमानैः सामर्थ्यात्तैरेव भगवदादिभिर्युक्तम्। तथापि च भाषाचारौ यत्र **न विकता**वसत्याश्लीलरूपौ तथा **विशेषे**ण **भावैः** व्यभिचारिभि**रुपपन्नानि पदानि** कथाखण्डानि यस्मिन्। नियतगतिः एकप्रचारं यद्वस्तु तद्विषयः प्रहसनीयलक्षणो यत्र, **तच्छुद्धं** प्रहसनम्। अत्र निर्विचनं यतः परिहासप्रधानान्याभाषणान्यत्र बाहुल्येन भवन्ति तेन यत्रैकस्यैव कस्यचित् चरितं दुष्टत्वात्प्राधान्येन प्रहस्यते तच्छुद्धमित्यर्थः। यत्र तु वेश्यादिभिर्योगो त्युल्बणं चाकल्पादि तदेकद्वारेणानेकवेश्यादिचरितेन हसनीयेन सङ्कीर्णत्वात् सङ्कीर्णम्। अन्ये त्वाहुः– येषां स्वभावत एव चरितं शिष्टमध्ये सभ्येतरतमत्वेन प्रहसनार्हं तदविशुद्धत्वात्सङ्कीर्णम्, तद्योगाच्च रूपकम्। ये तु स्वभावतो न गर्हिता भगवत्तवसादिचेष्टाविशेषास्तेषां प्राकृतपुरुषसंक्रान्तिदौरात्म्योदितामन्यसंबन्धदूष्य––माणतया प्रहसनीयतां यातास्ते स्वभावशुद्धाः तद्योगाद्रूपकं शुद्धमिति। उभयसाधारणीमपि कवेः शिक्षामाह **लोकोपचारे**ति। वार्ता प्रसिद्धिर्यदि सा लोकव्यवहारसिद्धा भवति, यथा शाक्यानां स्त्रीसंपर्कः प्रहसनीयो भवति, न चौर्यम्। एवंभाविप्रसिद्ध एवोपहसनीयः। अत्राधिकरणं स्वयमेवाह **धूर्तप्रविवादे**ति। धूर्ताः कृत्रिमतापसादयः विटादयश्च। तद्विषये यः प्रकृष्टो विवादः विरुद्धतयावभासस्तेन फलभूतेन संपाद्यतया यदुक्तं प्रहस्यमानं तथाभूतचरितावलोकनेन हि संस्कृतमिति व्युत्पाद्यो न भूयस्तान्व चकानुपसर्पतीति। **वीथ्यङ्गै**रिति वक्ष्यमाणैः, **यथायोग**मिति तेषां संप्रयोगे संख्यायाः क्रमस्य तु न कश्चिन्नियम

इति दर्शयति। प्रहसनस्याङ्कनियमानभिधानात् शुद्धमेकाङ्कं सङ्कीर्णं त्वनेकाङ्कं वेश्यादिचरितसंख्याबलादिति केचित्।

अन्ये त्वेकाङ्कप्रकरणमध्यपातित्वादेकाङ्कमिति मन्यन्ते प्रथमसंख्ययातिक्रमे भेदाभावपरित्यागे च प्रमाणाभावात्।

अथ हास्यरसोचितविटधूर्ताद्यनुप्रवेशेन समानयोगक्षेमं भाणं लक्षयितुमाह **आत्मानुभूतशंसी**ति। एकेन पात्रेण हरणीयः समाजिकहृदयं प्रापयितव्यो र्थो यत्र स भाणः। एकमुखेनैव भाण्यन्ते उक्तिमन्तःक्रियन्ते अप्रविष्टा अपि पात्रविशेषा यत्रेति भाणः। तत्र स प्रविष्टः पात्रविशेषः आत्मानुभूतं वा शंसति परगतं वा वर्णयति। तत्र च प्रयोगप्रयुक्तिमाह **परवचन**मिति। परसन्धिवचनं स्वयमङ्गविकारैरभिनयेत्।

ननु तत्परवचनमयुक्तं कथमभिनयेत् आह **आकाशे** शून्ये यानि पुरुषकथितानि दष्टानि यत्र शून्ये तेन वर्ण्यन्ते वा कश्चित्पश्यत्याकर्णयति च तत्र च तद्वचनं स एवानुवदन् सामाजिकान् बोधयति। यथा ''भो बाडब, अले किं ब्रवीषि'' इत्यादौ न केवलं परवचनमभिनयेत्, किन्तु प्रतिवचनैः स्वोक्तैः सह, अतएवो**त्तरोत्तरग्रथितैः** योजनाभिरुपलक्षितैः। ननु यो सावेको त्र प्रविशति स क इत्याह **धूर्तवटे**ति। नानाप्रकारावस्थाविशेषात् लोकोपयोगिव्यवहारात्मकात्मा वाच्यं यस्य, अत एव **बहुचेष्टः सततं कार्य** इति सकलसामान्यपथग्गतोपयोग्यस्तु लोकव्यवहारो वेश्याविटादिवत्तान्तात्मा निरूप्यत इति बाहुल्येन पथग्जनव्युत्पत्तियोनिरूपकमिदं राजपुत्रादीनामपि शंभलीवत्तान्तो ज्ञेय एवाव चनार्थमिति **संप्रयोज्य** इत्यर्थः।

इदमिह मीमांस्यं– य एते उत्सष्टिकादयो रूपकभेदाः ते तावदेकरसा एव, यद्यपि नाटकादयो प्येवमेव। तथाहि सर्वरसयोग्यतायामपि नाटके प्रकरणे च धर्मार्थादिवीर एव प्रधानं परमार्थतः सर्वेषु नायकभेदेषु वीरत्वानुगमदर्शनात्। समवकारे तु यद्यपि हि श्रङ्गारादित्वमुक्तं तथापि वीर एव प्रधानं रौद्रो वा, डिमव्यायोगयोरप्येवम्। ईहामगे पि रौद्रप्राधान्यमेव, नाटिकायां तु श्रङ्गार एव प्रधानम्। एवं तावद् वीररौद्रश्रङ्गारा यथास्वं (किं) पुमर्थत्रयप्राणभूतत्वेन वर्तमाना, एतेषु प्रयोगेषु शान्तबीभत्सरसौ तु चरमपुमर्थयोगात्तत्र च सर्वस्य नाधिकारो पि कस्यचिदपश्चिमजन्मनो धिकारान्नाटके यद्यपि तत्फलप्रधानतया प्राधान्यमबलम्बेयातां तथापि नासौ प्रचुरप्रयोग इति तयोः पुरुषार्थप्रवरप्राणितयोरपि वीरादिरसान्तराध्यावापेनावस्थापनम्। एवं तावत्पुमर्थविषयो रूपकरसविषय एव परमार्थतः, तथापि त्वितिवत्तवैतस्याद्रसान्तरप्रयोगो पि तदङ्गतया तत्र भवति। एवं तत्प्रधानचेष्टायोगाद्वत्तिवैचित्र्यमत्रोचितमेव। उत्सष्टिकाङ्कप्रहसनभाणास्तु करुणहास्यविस्मयप्रधानत्वाद् र जकरसप्रधानाः, तत एवात्र स्त्रीबालमूर्खादिरधिकारी। न च विततमत्रेतिवत्तम्, इतिवत्तवैचित्र्यमपि तत्र नास्ति। तथाहि– उत्सष्टिकाङ्के तु वत्तित्रयं तावद्वचसा निषिद्धं, भारती चात्र कथं वत्तिः, चेष्टा हि करुणे प्रधानं, तदुपकरणं तु परिदेवितात्मिका भारती, तस्मात् फलसंवि याख्या वत्तिः, वाक्चेष्टयोः फलानुभव इति

यस्या लक्षणं, साभ्युपगन्तव्या। अवश्यं चैतत्, अन्यथा मूर्छामरणादौ वाक्चेष्टयोरभावे निर्वत्तिकतैव स्यात्। कि च यदि तावत्पुमर्थकामोद्देशेन कैशिक्यभिधीयते धर्ममर्थं चोद्दिश्य वत्तिद्वयं वक्तव्यम्। तस्माच्चेष्टात्मिका न्यायवत्तिरन्यायवत्तिर्वाग्रूपा तत्फलभूता फलसंवित्तिरिति वत्तित्रयमेव युक्तमिति भट्टोद्भटो मन्यते।

यदाह–

आद्ये वाक्चेष्टाभ्यां पुरुषार्थचतुष्टयेन चाष्टविधे।

षोडशधा फलवत्तिस्तद्वयतो नेकधा तु रसभेदात्।। इति।

तदत्र केचिदाहुः– सा वत्यां यद्यपि कैशिकी शक्यान्तर्भावा तथापि र जकत्वातिशयात् पथगुपात्ता(त्), स्वरवन्मुखजाभिनयतश्च, न चान्यायवत्तौ (वत्तित्वं) पुमर्थचतुष्कयोगोपपत्तिविप्रतिषेधात्, फलवत्तौ च वत्तिसामान्यलक्षणं व्यापाररूपत्वं यदि नास्ति तत्कथं वत्तित्वम्। अस्तिचेद्वाक्चेष्टातिरिक्तो मानसो व्यापारो न कश्चित् लोकसिद्ध इति सूक्ष्मो वाक्चेष्टागत एवोपेत्यः। ततश्च मरणमूर्छादावपि प्राणात्मकायीयव्यापारसंभव एव यदनुस्मरणे लयतालगानानि प्रवर्तन्ते, संवेदनमपि च मूर्छादौ नास्तीति शक्यं वक्तुमिति फलवत्तिरपि तत्र कथं। तस्मात्तत्र सा वत्येव वत्तिः। यदि बाहुल्यापेक्षा वत्तिमयं काव्यमिति व्यवहारो रूपकसमुदायापेक्षया खण्डस्यावत्तिकत्वे पि समुदितस्य रूपकस्य वत्तिमयत्वात्। यच्छकलीगर्भमतानुसारिणो मूर्छादावात्मसंवित्तिलक्षणां प चमीं वत्तिं सकलकार्यनिवत्त्यनुमेयां मूर्छाकर्मानुभावेन च फलेनावच्छिन्नामात्मव्यापाररूपां मन्यन्ते, न च परिस्पन्द एवैको व्यापार इति मनसिकृत्य तन्मतं भावानां बाह्यग्रहणस्वभावत्वमुपपादयद्भिः भट्टलोल्लटप्रभतिभिः पराकृतमिति न फलवत्तिर्वा काचिदिति चतस्र एव वत्तयः (इति)।

वयन्तु ब्रूमः। को यमस्थानसन्त्रासः। यत्किंचिदिह नाट्ये समस्ति तच्चेद्वत्तिष्वन्तर्भाव्यं तदाभवैदेतत्– न चैवम्। रङ्गो हि नाम का वत्तिः, मदङ्गपणववंशाद्या का वत्तिरपि हि भवेत्। तस्माद्व्यापारः पुमर्थसाधको वत्तिः स च सर्वत्रैव वर्ण्यत इत्यतो वत्तयः, काव्यस्य मातका इति, न हि किंचिद्व्यापारशून्यं वर्णनीयमस्ति। मदमूर्छादिवर्णनायामपि मनोव्यापारस्य सा वत्याख्यस्य संभवात्, करुणदावपि च मनोदेहव्यापारसंभवे पि बाहुल्येन वाग्व्यापारसंभवाद् भारतीवत्तिरुच्यते। वत्त्यन्तरनिषेधस्तु तदङ्गानामपरिपूर्णत्वात्। न च कायवाङ्मनसव्यापारं तद्वैचित्र्यं वान्तरेणान्यः कश्चिद्व्यापारः संभवतीत्यसकृदुक्तम्। तस्मात्करुणप्रधाने भारती वत्तिः परिदेवितबाहुल्यात्।

यत्तु ''शङ्गारहास्यकरुणैरिह कैशिकी स्यात्'' इति कोहलेनोक्तं तन्मुनिमतविरोधादुपेक्ष्यमेव, तस्य तु यत्र यत्रानुल्बणा चित्त्वत्तिः सा सा कैशिकीत्याशयः। एवं प्रहसनभाणयोरपि वाग्व्यापारप्राधान्यादेव भारतीवत्तिः, मूर्छादौ तु व्यापाराभावे वत्त्यभाव एव। न हि सर्वं नाट्यं वत्तिब्रह्मतया समर्थनीयमित्यलमतिप्रसक्त्या।

अथ सर्वान्ते सर्वरसमयत्वादवितत्तस्वभावत्वाच्च संक्षेपेण शक्यव्युत्पत्तिदायिनीत्वेन प्रधानभूतत्वात्तदङ्गानां च नाटिकादिभाणान्तसमस्तरूपकोजीत्यत्वादू वीर्थीं लक्षयति।

एकहार्यैरित्याकाशपुरुषभाषितैरित्यर्थः। द्विहार्येति उक्तिप्रत्युक्तिवैचित्र्येणेत्यर्थः। अङ्गान्युद्दिशति–

उद्घात्यकावलगितावस्पन्दितानाल्यसत्प्रलापाश्च।
वाक्केल्यथ प्रप चो मदवाधिबले छलं त्रिगतम्।
व्याहारो गण्डश्च त्रयोदशाङ्गान्युदाहृतानीति।

इत्युदाहरणमात्रमेतदिति यावत्। एतानि क्रमेण लक्षयति **पदानि त्वगतार्थानी**ति।

नन्वेषामुक्तिवैचित्र्यरूपत्वं चेल्लक्षणालङ्कारादिभ्यः को भेद, इतिवत्तोपकरणरूपत्वे तु सन्ध्यभङ्गेभ्यः कथमन्यतो रसोपकरणतायां वत्त्यङ्गेष्वन्तर्भावः। न चैतद्व्यतिरिक्तम्, एषां सामान्यलक्षणमस्ति। तत्र केचिदुक्तलक्षणादिविशेषरूपत्वमेवैषां प्रतिपन्नाः विवेचकास्तु तद्व्यतिरिक्तान्येवैतानीत्याहुः।

तथाहि प्रश्नप्रतिवचनयारेन्याभिप्रायरूपेण योगेन यद्वैचित्र्यं तद्वीथ्यङ्गम्, अत**एवोदाहृतानी**त्येषां सामान्यालक्षणम्। **उदाहृतानि** प्रतिवचनानीत्यर्थः। तानि च सर्वाणि प्रतिवचनशून्यस्य काव्यस्याभावात् तेन विचित्राणीति लभ्यन्ते। अत एव वीथी पङ्क्तिरन्योत्तरासहिष्णुत्वात् विचित्रोक्तिप्रत्युक्तिगर्भत्वाल्लक्षणालङ्कारादीनां तु नोक्तिनियतं रूपमिति विशेषः। तत्र यदा विवक्षितमुत्तरं दातुं शक्तो यं स्यादिति यन्मम मनसि वर्तते तदेव वक्ति नवेत्येवमादिना निमित्तेन यदा प्रष्टैव प्रतिवचनं वैचित्र्यमभिसन्धाय पच्छति, प्रतिवक्तोचितमभिधत्ते तदा तदुत्तरमुद्घात्यकम्। प्रश्नात्मके उद्घाते साध्विति यत्, तत्राज्ञातार्थे कन्। पदान्यर्थगतानि प्रश्नरूपा**ण्यादरात्कृता**नि पर्यायैः पदान्तरैरुत्तररूपैः नराः सुधियो **योजयन्ति**। तदुत्तरपदसमूहात्मकमुद्घात्यकम्। यथा पाण्डवानन्दे–

का भूषा बलिनां क्षमा, परिभवः को यं सकुल्यैः कृतः,
किं दुःखं परसंश्रयो, जगति कः श्लाघ्यो य आश्रीयते।
को मत्युर्व्यसनं, शुचं जहति के यैर्निर्जिताः शत्रवः,
कैर्विज्ञातमिदं विराटनगरे च्छन्नस्थितैः पाण्डवैः।।

यत्रान्यस्मिन्निति। यत्रोत्तरे दीयमाने अन्यानुसन्धानपूर्वके प्यन्यत्कार्यं सिध्यति तदान्यकार्यावलगनादवलगितम्। यथा ''अवि सुहाअदि दे लोअणाणा''मिति विदूषकेण पष्टे (राज्ञः) ''सुखयतीति किमुच्यते'' इति ''कृच्छ्रेणोरुयुग''मित्याद्युत्तरं वसन्तकप्रत्यायनोद्देशेन प्रवत्तमपि सागरिकागतमास्थाबन्धजीवितं मुख्यं श्रङ्गाराख्यं कार्यं साधयतीति।

आक्षिप्ते त्विति। **शुभाशुभं** दैवं तेनाबुद्धिपूर्वकं कुत्रचिदर्थे **आक्षिप्ते पि** कौशलात्तत्तत्प्रच्छादनेच्छया यत्रोत्तरो **न्यो र्थ** उच्यते **तदवस्पन्दितं** चक्षुःस्पन्दनादिवदन्तर्गतसूचनीयसंभवात्। यथा–

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।
निपतन्ति धार्तराष्ट्राः कालवशान्मेदिनीपष्ठे।।

अत्र दैववशादयमर्थ आयातः सत्पक्षे अमधुरागीर्येषान्ते, तथा प्रकर्षेण साधिताः आधिसहिताः यैर्दिशः कृताः धतराष्ट्रात्मजाः पतन्तीति। तत्रोत्तरं प्रतिहतममङ्गलम्। पुनः सूत्रधारः ननु शरत्समयवर्णनया हंसा नभस्तलं धार्तराष्ट्रा इति व्यपदिशामीत्यादि अवस्पन्दितत्वमेव सूचयति ''न खलु न जाने किन्त्वमङ्गलत्वात् शङ्कितमेव मे हृदय''मिति।

हास्येनोपगतार्थेति प्रहेलिका परवितारणकारि यदुत्तरं, अत एव हास्ययुक्ता सा नालिका प्रणालिका व्याजेत्यर्थः। प्रकर्षेण हेलिका नर्मादिक्रीडारूपं यस्याः सा प्रहेलिका। यथा– सुसंगता ''जस्य किदे तुमं आअदा सो एत्थ एव्व चिट्ठदि''। **सागरिका** ''सहि कस्स किदे''। सुसङ्गता (सहासम्) ''अइ अप्पसङ्कीदेणं चित्तफलअस्स''। अनया भङ्ग्या आच्छादितं च गर्भगतं चास्य वस्त्विति।

मूर्खजनसन्निकर्ष इति यदुत्तरं मूर्खं प्रति वस्तुतो हितमपि शब्दच्छलाद्यथा प्रियं तादशं च मूर्खैः प्रियांशेन गह्यते न तु हितांशेन। तथाभूतभङ्गीभूत द्वयाश्रयणं च सिद्धत्त्वात्करोति। एवं हि तात्कालिकः कोपो पि रक्षितो भवति प्रियाभिधायित्वात् कालान्तरसंभाव्यश्च यथार्थाभिधायित्वात् यथाव्यसनिना राजपुत्रेण किंसुखमिति पष्टे तेनोत्तरं दीयते–

सर्वथा यो क्षविजयी सुरासेवनतत्परः।
तस्यार्थानां सुखानां च समद्धिः करगामिनी।।

असतो साधुभूतस्य वस्तुनः प्रलपनमस्मिन्नित्यसत्प्रलाप इति।

एकद्विप्रतिवचनेति। एकं द्वयोः प्रतिवचनमस्याम्। द्विग्रहणमनेकोपलक्षणम्। तदमुना सर्वप्रश्नोत्तरवर्गः स्वीकृतः। यथा–

नदीनां मेघविगमे का शोभा प्रतिभासते।
बाह्यान्तरा विजेतव्याः के नाम कृतिनो रयः।।

यदसद्भूतमिति यथा रत्नावल्याम् ''सुसङ्गते, कथमहमिहस्थो भवत्या ज्ञात'' इति राजन्युक्तवति सुसङ्गतयोच्यते ''ण केवळं भट्टा चित्तपळहेण ता देवीए णिवेदइस्सं'' इत्यादौ आभरणदानपर्यन्ते प्रप चः। तथाहि– द्वयोः सागरिकासुसङ्गतयोः राजविदूषकयोः परस्परसंबन्धमाश्रित्यासद्भूतमसत्यं देव्यै निवेदयामीत्युक्तम्। संस्तवश्च तत्रास्ति ''भट्टिणो पसादेण किमिदं मए'' इति हास्यमपि परिहासरूपं विद्यते। एकस्य च राज्ञो र्थे प्रयोजने सागरिकासङ्गमे हेतुर्भवत्येवेति अन्यथाभिधानात्प्रप चः।

यत्कारणादिति गुणानां दोषत्वं दोषाणां वा गुणत्वं यत्र क्रियते **तन्मदवम्। विवादकृतमि**त्यनेन लक्षणाद्विशेषमाह, इदं वत्त्यन्तरं स्वभावमित्यर्थः यथा ''शिरः श्वा काको वा द्रुपदतनयो वा परिमशेत्'' (वेणी) इत्यत्र दोषस्य गुणीकरणं, विवादाकर्णनेन सह ''यदि शस्त्रमुज्ज्ञितमशस्त्रपाणयः'' (वेणी) इत्यत्र कर्णवचनेन प्रतिज्ञातपरिपालनस्य गुणस्यापिदोषीकरणं विवादकृतमेव। मदवमिति मर्दनं मत्परपक्षमर्दनेन स्वपक्षमवति रक्षतीति।

परवचनमात्मनश्चेति परस्य वचनमात्मनश्च वचनं परस्परमर्थविशेषलाभो यत्र भवतीत्युत्तरोत्तरस्याधिकाधिकस्यार्थस्य **समुद्भवो** यत्र तदधिबलम्। एतदुक्तं भवति– यत्रोक्तिप्रत्युक्तिक्रमे क्रियमाणे परस्परप्रज्ञानोपजीवनबलात्स्वपक्षसु– –घटितादधिबलसंबन्धादधिबलम्। यथा नागानन्दे ''रागस्यास्पदमित्यवै'' मीत्यादित आरभ्य विदूषकेण सहोक्तिक्रमेण स्वपक्षो द्रढिमानमानीतो यावदाह ''ननु शरीरतः प्रभतिसर्वमेव मया परार्थं प्रतिपाल्यते'' (अ) इति।

अन्यार्थमेव वाक्यमिति यद्वाक्यं प्रयोजनान्तरमुद्दिश्य वचनमुच्यमानं कस्यचिद्वचनमन्यस्य हास्यमपरस्य रोषं जनयति तच्छलम्। यथा–

कस्स व ण होइ रोसो दट्ठूण पिआए सव्वणं अहरम्।
सब्भमरपदुमघाइरि वारिअवामे सहसु एह्णिम्।।

एतद्वचनं सखीसंबन्धि भर्तप्रत्यायनं प्रयोजनमुद्दिश्य प्रयुक्तं तस्य पत्न्या अपि संबन्धिानां छलं विदग्धजनस्य हास्यं सपत्न्या वचनं रोषं जनयति।

श्रुतिसारूप्यादिति शब्दसारूप्याद् **बहव** इति प्रश्नप्रतिवचनस्य स्वभावा **यत्र नियुज्यन्ते युक्तिभि**रिति काक्वादीनां तथैवोपपत्तिभिः। त्रिशब्दो नेकोपलक्षणम्, अनेकमर्थं गतमिति त्रिगतं वाक्ये मुख्यमुत्तरमनेकप्रश्नसाधारणम्। इह तु य एव प्रश्नस्तदेव प्रतिवचनमिति विशेषः। यथा–

सर्वाक्षितिभतां नाथ दष्टा सर्वाङ्गसुन्दरी।
रामा रम्ये वनान्ते स्मिन् त्वया विरहिता मया।। (विक्रमो ४–२७)

अत्रैतदेवोत्तरं साकांक्षाकाकुप्रयोगे पि प्रतिबिम्बे वामदक्षिणवैपरीत्यवन्निराकांक्षा काकुः संवत्त यत एतद्धास्यम्। एवमहास्य उदाहार्यम्।

प्रत्यक्षवत्तिरिति प्रत्यक्षशब्देन भावी प्रत्यक्ष उच्यते। तदयमर्थः– भाविनि प्रत्यक्षे र्थे दैववशाद् वत्तिर्यस्य स व्याहारः विविधो र्थो भिनीयते येन। यथा ''उद्दामोत्कलिकां'' (रत्ना २) इत्यादि।

संरम्भसंभ्रमयुतमिति संरम्भेणाकृतिविशेषेण यः संभ्रम आवेगः तद्युक्तं यद्विरुद्धवस्तु यदनेन कृतं पूर्वोक्तवस्त्वपवदनमेव च तद्वचनं दष्टार्थगर्भत्वात्, गण्ड इव गण्डः ईषदसमाप्तं वचनं **बहुवचनं** तत्कृते**नाक्षेपेण** कृतं स्वयं प्रतिवचनतां पूर्ववचनस्य गतमित्यर्थः। तथा च कोहलः–

वचसां संबद्धानामन्ते यत्स्यात्पदे त्वसंबन्धः।
संबद्धमिवाभाति हि तद्गण्डो नाम बीथ्यङ्गम्।।

अनेनेषदसमाप्तिरेव दर्शिता। यथा दुर्योधनेन भानुमती प्रत्युच्यते–

अध्यासितुं तव चिराज्जघनस्थलस्य
पर्याप्तमेव करभोरु ममोरुयुग्मम्।। (वेणी) इति।

तत्र प्रविश्य क चुकी

भग्नं भीमेन मरुता भवतो रथकेतनम्।। इति।

तत्रोरुयुग्ममिति पूर्वविश्रान्तमपि भग्नमित्यत्र संबन्धयोग्यं जातम्।

एतैः त्रयोदशभिरङ्गैर्युक्ता वीथी, तस्याश्च सर्वरसत्वस्याभिधानात् पर्यायेण रसानां प्राधान्यादुत्तमो मध्यमो धमो वा नायको भवत्येव। तथा च कोहलः—

उत्तमाधममध्याभिर्युक्ता प्रकृतिभिस्तथा।

एकहार्या द्विहार्या वा सा वीथीत्यभिसंज्ञिता।। इति।

अधमप्रकृतेस्तु न नायकत्वमिति ध्रुवं प्रहसनकभाणकादौ किं ब्रूयात्, हास्यादिरसप्रधानत्वे ह्यधम एव नायकः। कथाशरीरफलेन प्रधानतया संबध्यमानो नायक उच्यते। अनायकत्वे पि चास्याधमत्वं नानुपादेयं स्यात्। परिवारतया तस्यानुप्रवेशो ह्यनिवारित एव सर्वत्र।

अध्यायार्थमुपसंहरन् भाविनमर्थमनुसन्धत्ते **इति दशरूपविधानमि**ति। लक्षणत इत्यनेनेदमाह दशैव तानि लक्षणानि उदाहरणानां तु का गणना। एतच्च पूर्वमेव दर्शितम्। तत्रैषां पुमर्थोपयोगो निजनिजलक्षणावसरे दर्शित एवेति पौनरुक्त्यं नाश्रीयत इति शिवम्।

इति विमलशिशिरदीधितिकलितशिरोमण्डनाङ्घ्रिदास्यचणः।

अभिनवगुप्तो गुप्तं दशस्वरूपं सत वकं व्यवणोत्।।

इति श्रीमन्महामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां दशरूपकविधानं नामाष्टादशो ध्यायः समाप्तः।।

इति

श्रीः

नाट्यशास्त्रम्

एकोनविंशो ध्यायः

(सन्धिनिरूपणम्)

देहे ससन्ध्यङ्गणे समस्ते
यत्स्थापनं स्पर्शनवत्तिकारि।
तदिन्द्रियं यस्य वपुर्नमामि
तमान्तरस्पर्शमयं महेशम्।।

''पुनरस्य शरीरविधाने''त्यादिना (१८–१२७) शरीरमितिवत्तात्मकं विधानं च तस्य विधानरूपप्रकारात्मकं, सन्धयश्च मुखादयो विधयश्च सन्ध्यङ्गस्भावा लक्षणीयत्वेन प्रतिज्ञाताः, तत्र शरीरमादौ लक्षयितव्यमिति दर्शयति **इतिवत्तं त्वि**ति। **तु**शब्दो व्यतिरेकेकाव्यमात्रस्यानभिनयेनयस्य तावद् वत्तमात्रं शरीरं, नटनीयस्य त्वभिनेयरूपस्य **इति** एवंप्रकारतया यदुपस्कृतं वत्तं, अत एवेतिवत्तशब्दवाच्यं तद्वस्तु शरीरं, रसाः पुनरात्मा शरीराविर्भावकाः, अत एवार्थनिर्मापकत्वात् अर्थतादात्म्यात् अर्थरूपताध्यासात् अर्थैकज्ञाननिवेशितत्वात् अर्थोपर जकत्वात् अर्थनिमित्तत्वाद्वा, इतिवत्तार्थैकयोगक्षेमत्वं वागात्मनां शब्दानामिति। तदाशयेन–

वाचि यत्रस्तु कर्तव्यो नाट्यस्यैषा तनुः स्मता। (ना. शा. १४–२) इति पूर्वमुक्तम्, इह वत्तं शरीरमिति दर्शितमित्यविरोधः। स तु कथं प्रकारवैचित्र्य इत्याशंक्याह **प चभिः सन्धिभि**रिति। एतदुक्तं भवतिप्रकारवैचित्र्यकल्पनामया एव सन्धयः। तत्र पारम्यपरतया प चसंख्येति, तेन हीनसन्धित्वे पि न कश्चिदत्र विरोधः।

अन्ये तु सर्वत्र प चैव सन्धयः, अपूर्णाङ्गत्वात्तु कस्यचित्सन्धेर्हीनसन्धित्वमुच्यत इत्याहुः। एतच्च स्वस्थाने वितनिष्यामः।

एवमितिवत्तशब्दे **इति** भाग्यस्य यो र्थः सो प्रसिद्ध इति कृत्वा द्वितीयार्धेन प चभिरित्यादिना व्याख्यातः, न तु सन्धिनिरूपणमेतदुद्देशक्रमस्तस्यानेकविधत्वात्। {१}

एवं शरीरमभिधाय तस्य विधानशब्देनोद्दिष्टं प्रकारवैचित्र्यं दर्शयति **इतिवत्तं द्विधा चैवे**ति। इतिवत्तं स्थितं सत्, बुधो विवेचकः कविर्द्विधैव परिकल्पयेत्। **च**कारात् प्रकरणादावितिवत्तं च कल्पयेत्। तच्च द्विधा। **एकमपर**मित्यनेनेदमाह – न निसर्गतः कि िचदाधिकारिकम्, अन्यद्वा। कविधिया यदेतदाधिकारिकं कृतं तदापरस्य प्रासङ्गिकतास्तीति द्विधाशब्देन सूचितं, तदेवेदं दर्शितम्। ''अधिकरणविचाले च'' (पा. ५–३–४३) इति **धा**प्रत्ययः। एकं राशिं द्विधा कुर्विति यथा तेनैकमेवेतिवत्तं द्विशाखमिति यावत्। {२}

तत्प्रकारद्वयं क्रमेण दर्शयति **यत्कार्य हीति**। प्रधानत्वेन सम्पाद्ये फले यो ज्ञानेच्छाप्रयत्नक्रियालक्षण आरम्भः तत्कार्यमिति वक्ष्यते– **'यदाधिकारिकं वस्तु'** (१६-२६) इति, तथाभूतो य आरम्भो मुख्यैफलप्राप्त्या परिकल्प्यते स **आधिकारिकमि**तिवत्तम्। **हि** यस्मात् तथैव ज्ञेयम्। निरुक्तेनाधिकारः सर्वत्रानुयायित्वं हृदयानुयायित्वं प्रयोजनमस्य। प्रासङ्गिके पि हि तदन्तर्लीनमेव। यथा– आधिकारिके सहाप्तेनाचिख्यासासाधनैषाफलजिहीर्षानिष्पत्तौ यथा न शक्त्यन्तरव्यापारणं, तद्वत्प्रासङ्गिके पि सर्वत्र शक्त्यन्तरव्यापाराभाव एव। शक्त्यन्तरे पि पथग्व्यापार्यमाणे तस्याप्याधिकारिकत्वमेव स्यात्। प्रतिज्ञानिर्वहणं जगत्कण्टकरावणोद्धरणं शरणागतविभीषणरक्षणमित्याद्यपि हि प्रधानफले सीताप्रत्यानयनलक्षणे विवक्षिते न शक्त्यन्तरव्यापारसाध्यं, अपि तु तदुपयोगिसामाद्युपायचतुष्टयतद्द्विकत्रिकादिभेदसम्पादन––नान्तरीयकोपनीतमेव। **तापसवत्सराजे** राज्यप्रत्यापत्तेः प्रधानफलत्वे वासवदत्तासङ्गमपद्मावतीप्राप्त्यादौ क्रियान्तरानुपयोग एव मन्तव्यः। यदि ह्यस्य वासवदत्ताप्राप्त्युपायत्वं पद्मावतीपरिणयस्य नोच्यते न वत्सराजस्तत्र प्रवर्तेत, तदप्रवृत्तौ कुतः प्रधानफलमिति सर्वप्रासङ्गिकमेकरूपमेव। प्रसक्तिर्हि प्रसङ्गः तत आगतं प्रासङ्गिकं, प्रसज्यते वा प्रधानफलनिष्पत्तये इति प्रसङ्गस्तत आगतमिति। तेन शक्त्यन्तरयोगायोगाभ्यां च यत्प्रासङ्गिकस्यानेकविधत्वं टीकाकृद्भिरभ्यधायि न तदुपाध्यायाः संमन्यन्ते। अत एवाह **कारणात्फलयोगस्ये**ति। अयमर्थः – आधिकारिकं नामस्त्वितिवत्तं (यतः) फलसंबंन्धं करोति स कविना वर्णनोपायारोहमानीतः तत्समर्थाचरणेन प्रयुज्यते। एवमन्यत्स्यादितिवत्तमिति पूर्वपक्षमाशंक्य तत्रोत्तरमवान्तरेणाह **तस्योपकरणार्थं त्वि**ति। **हि**रप्यर्थे भिन्नक्रमः आनुषङ्गिकमपि कीर्त्यत इति। {३-४}

ननु फलप्राप्तिलक्षणेन प्रयोजनेन सप्रयोजनत्वमाधिकारस्य लक्षणत्वमुक्तम्, फलप्राप्तिश्च प्रासङ्गिके प्यस्ति सा प्रासङ्गिकीति चेत्, सिद्धे प्रासङ्गिकस्याधिकारिकाद् भेदे भवेदेतत्, तत एव तत्सिद्धौ चक्रकान्योन्याश्रयदोषः तस्मात्फलप्राप्तिरेव विशिष्य वक्तव्येत्यभिप्रायेणाह **कवेः प्रयत्नान्नेतृणां युक्तानामि**ति। समुत्कर्षं प्राधान्यमवलम्ब्य फलप्राप्तिः कल्प्यते, प्रधानफलप्राप्तिप्रयोजनमाधिकारिकमित्यर्थः।

ननु फलप्राप्तेः कथं प्राधान्यम् आधिकारिकनिर्वर्त्यत्वादिति चेत् स एव दोष इत्याशङ्क्याह **कवेः प्रयत्नादि**ति। कविर्यत्फलमुत्कर्षेण विवक्षति तत्प्रधानफलम्। ननु पुरुषेच्छा यद्यनियन्त्रिता, तदा पुनरपि स एव प्रश्न इत्याह। नेतृणां युक्तानां विध्यपाश्रयाद् धीरोदात्तादिभेदानां नायकानां मध्ये यो यत्र नायको युक्त उचितः तस्य यो विधिः सम्पाद्यं वस्तु तदपाश्रयप्रयत्नाद्धेतोः कविफलं प्रधानमिति। यस्मिंश्च विधौ यो नायको युक्तः उचितस्तस्य मयैतत्कर्तव्यमित्यभिसन्धानाभावे पि तत्सन्निधौ फलं नायकत्वं विना कर्तव्यम्, यथा **तापसवत्सराजे** वत्सराजस्य राज्यप्रत्यापत्तिः कर्तव्यतायाममात्याभिसंहितायाम्, अत एव ह्यस्यासौ नेता फलस्य चाक्रष्टा अमात्यसम्पादिताभिसन्धिप्रत्युपायपरम्परार्जितस्यापि।

नन्वेवमपि रामस्य स्वदारप्रत्यानयनकण्टकोद्धरणभीताभयवितरणादौ सर्वत्र कर्तव्यतौचित्यमस्ति, तथापि न व्यवस्थितं लक्षणमित्याह **फलस्य चे**ति। **च**कारेण समुत्कर्षादित्यस्यावत्तिर्द्योत्यते। तेनायमर्थः– यदेव फलं तावत्यंशे अधिकमुत्कर्षवलम्बते तत्रैव तस्यौचित्यं कविना कल्पनीयम्। तथा हि– रावणोच्छेदाद्यवधि सीताप्रत्यानयनमेव समुत्कृष्टं भवति, तस्यैव सम्पादनायेतरप्रवत्तिः, सचिवायत्तसिद्धिस्तु यतो वत्सराजस्ततो यौगन्धरायणाद्यमात्यवर्गप्रयत्नस्तावानसाविति तदमात्याद्यभिसंहितराज्यप्राप्तिफलस्यैव तत्रोत्कर्षः। स ह्येवं मन्यते– राज्यभाररिचन्ता एतैर्या कृता सा मयैवेति। एवमधिकाधिकं हृदयविपरिवर्तमानं समुचितं च नायकस्य फलं यद्यदा कविप्रयत्नेन विवक्ष्यते सम्पाद्यतया तदा तस्य प्रधानफलत्वं, रामाभ्युदयादौ सीताप्रत्यानयनादेरिव, न हि तत्राश्वमेधयागादेर्नायकोचितस्य कविविवक्षितत्वमस्ति।

नन्वेमपि कविविवक्षैव पुनरपि प्रधानीभूता तत्र चोक्तो नियमहेत्वभाव इति तत्राह **विध्यपाश्रयादि**ति। विधीयत इति विधिः सव्युत्पत्तिः तस्यापाश्रयात्। एतदुक्तं भवति– यादशि पुरुषार्थे व्युत्पत्तिः कर्तव्या तदुचितनायकग्रहणेन कविः प्रवर्तमानो न स्वेच्छया प्रवत्तो भवतीति। **हि**शब्देन समुच्चयाभिधायिनैतत्सूचितंविध्यपाश्रयाद्युक्ता ये नेतारस्तेषां यत्फलं तस्योत्कर्षाद्यः कवेः प्रयत्नः ततः फलप्राप्तिः समुत्कर्षावलम्बिनी कल्प्यत इति तात्पर्यम्। {५-६}

अथ कविप्रयत्नेन साध्ये व्यापारः परिस्पन्दो यो वाङ्मनसगतस्तस्य या अवस्था **आनुपूर्व्ये**ति उद्देशक्रमेणैव प्रयोक्तभिः कविभिर्निबन्धनीयतया ज्ञातव्याः ता उद्दिशति **प्रारम्भश्चे**ति। **च**कारै**स्तथा**शब्देन चावश्यंभावि क्रमत्वमासामुच्यते। न हि प्रेक्षापूर्वकारिणो वस्थान्तरासम्भावनायां प्रारम्भ उचितो भवति, तत्प्रारम्भश्चेदुत्तरोत्तरोत्तरावस्थाप्रसर एव। **प चम** इत्यनेन क्रमो विवक्षित इति दर्शयति। एताः क्रमेण लक्षयितुमाह **औत्सुक्यमात्रबन्ध**स्त्विति। महतः प्रधानभूतस्य फलस्य युज्यमानस्य तत्तन्नायकोचितस्य यद्बीजमुपायसम्पत् तस्य यदौत्सुक्यमात्रं तद्विषयस्मरणोत्कण्ठानुरूपं, अनेनोपायेनैतत् सिद्ध्यतीति, तस्य बन्धो हृदये निरूढिः प्रारम्भः, सा च नायकस्यामात्यस्य नायिकायाः प्रतिनायकस्य दैवस्य वा। तस्या हि तथैवानुमानाद् व्यवस्था। दैवसाध्यमपि च समुद्रदत्ताभिमतप्राप्त्यादिकं पुण्योपार्जनं प्रयत्नबहुमानसिद्धये दैवसाहाय्यस्य पुरुषकारस्य फलवर्तिता तद्व्युत्पत्तिलाभाय (च) प्रदर्श्यत इति। **एवमपश्यत** इति तदुपायव्यतिरेकेण फलप्राप्तिमपश्यतः फलदर्शनमसंभाव्यमानं विवेचयतः फलमुद्दिश्य यो व्यापारः उपायविषयपरमौत्सुक्यगमनलक्षणं, तेन विनेदं फलं न भवति तस्मात् स एवोपायो न्वेष्यः इत्युपायविषयस्मरणेच्छासन्तानस्वभावः, स प्रयत्नः। **ईषत्प्राप्ति**रित्यादि। भवत्यस्मादिति **भावः** उपायः, तस्य सहकार्यन्तरयोगः प्रतिबन्धकवारणं च मात्रपदेनापसारितम्। तदयमर्थः– उपायमात्रेण लब्धेन यदा कदाचिद् विशिष्टफलप्राप्तिरीषत् कल्प्यते संभावनामात्रेण

स्थाप्यते न तु निश्चीयते तदा प्राप्तेः सम्भवः। संभावनायोग्यत्वमसंभावनाविशिष्टत्वं नाम ततीया कर्तुरवस्था। {**७-११**}

नियतां तु फलप्राप्तिं यदेति। फलस्य प्रकर्षेणाप्तिर्यतः सहकारिवर्गः प्रतिबन्धकविध्वंसनसहितता च सामग्रीरूपतः, तां सामग्रीं, यदा तेन भावेन पूर्वोपात्ततया मुख्योपायेन नियतां नियन्त्रितां फलाव्यभिचारिणीं पश्यति तदा नियतफलप्राप्तिर्नामावस्था। ननु कर्तरीत्याशङ्क्याह **सगुणा**मिति– गौणी उपचरिता तस्येयमवस्था। नियतफलकर्तविषयत्वेन नियतफलप्राप्तिशब्दो विषयविषयिणोरभेदोपचाराद्युक्त(उक्त?) इति यावत्। अत एव पश्यतीत्यनेन दर्शनमेवावस्थेति दर्शितम्। यदि वा सह गुणेन दर्शनेन वर्तते, नियतफलप्राप्तिदर्शनं तन्नामावस्थेत्यर्थः। ये त्वकारप्रश्लेषादभावेन नियतां सन्देहमयीमिति व्याचक्षते ते नियता फलप्राप्तिः संदिग्धा चेत् कथमेतद्विरुद्धं संगच्छतामिति प्रष्टव्याः। {**१२**}

अभिप्रेतं समग्र चेति। यस्मिन्नितिवत्ते कर्त्रवस्थात्मनि नायकस्याभिप्रेतं तादशम्, अपि च नानुचितं, अपि तु प्रतिरूपमुचितं संभवात् पूर्णं **क्रियाफल**मिति समनन्तफलं न च विधिफलमिव स्वर्गादि कालान्तरापेक्षि वर्ण्यते, सावस्था नायकस्य फलयोगः फलोत्पत्तिर्नाम। तत्र सचिवामात्यादेरपि यावस्था सा वस्तुतो नायकगामिन्येव भवतीति नाटकेषु नावश्यं सर्वा नायकस्य साक्षादेवोपनिबन्धनीयाः, अपि तु सचिवादिगतत्वेनापि फलयोगस्तु साक्षादेव तद्गत इत्यभिप्रेतमित्यनेन दर्शितम्। अवस्थान्तराणि सचिवादिगतान्यपि पर्यवस्यन्ति नायकादेरेवेत्येतदेव सुकविना **रत्नावल्यां** ''प्रारम्भे स्मिन् स्वामिनः सिद्धहेतौ'' (अ१–७) इति श्लोकेन प्रतिपदमुक्त्वा अस्मदभिप्रायः समुच्छ्रितेन दर्शितः। {**१३**}

ननु मानुषव्यापारे नायकस्य तत्सचिवादेर्वा भवन्त्येता(भवन्त्वेता?) अवस्थाः, प्रतिनायके प्येवं तत्र परमसदुपायापेक्षया। यत्र तु दैवायत्तं फलं वर्ण्यते तत्र कथं न च वर्ण्य पुरुषकारमात्राभिमानिनां दैवमवजानानां चार्वाकादिमतमुपेयुषां, स दैवबहुमानव्युत्पत्तये हि पुरुषकारो प्यफलः, तदभावो पि सफलः प्रदर्शनीयः, अत एव **दरिद्रचारुदत्तादिरूप**काणि तद्विषयाणि। तस्माद्दैवायत्तत्वे कथमेतदवस्थाप चकम्, तत्परिहर्तुमाह **सर्वस्यैव ही**ति दैवादागच्छतो पीत्यर्थः। तत्रापि हि यद्यपि नायको न यतते (प्रवर्तते?) तथापि यत्र फलं भवति तत्रावश्यमवस्थादिभिर्भाव्यम्। स एव च परं फलेन तदानीमर्थीभवति 'यमर्थमधिकृत्य प्रवर्तत' इति हि प्रयोजनलक्षणं वदन्ति। तथा हि सेवाद्यशेषोपायप्रारम्भं विनानन्दसंपादनहृदय एव, अपरथा परतः प्राप्तमपि फलं नाङ्गीकुर्यात्, अनङ्गीकरणे पि वास्य (चास्य?) फलार्थित्वमेवाधिकफलान्तर––सन्तोषमनु प्रसिद्ध्यादिफलान्तराभिसन्धानादिति युक्तमुक्तं मुनिना सर्वस्यैव प चावस्था इति। {**१४**}

नन्वासां तावत् स्वरूपभेदः कालभेदश्च कालभिन्नानां चैककालत्वाभावात् 'संसाध्ये फलयोगे तु व्यापारः कारणस्य' इति (१६–७) यदुक्तं तत् कथम्, किं च फलयोगे साध्ये तत्रावस्था कारणस्येति प चमीहावस्था फलयोग एव, न तु सा काचिदन्येत्याशङ्क्याह **आसां स्वभावभिन्नाना**मिति स्वभावभेदेन कालभेदो प्युपलक्ष्यते, स्वभावभेदे दिक्काले दण्डचक्रादिभिरेकफलसंपादना, तेन कालभिन्नानामपि, आसां परस्परमन्योन्यं संगत्या नान्तरीयकत्वेन यदागमनं तदवलम्ब्य यो विन्यासो यत्फलहेतुस्तत आद्यन्तापकर्षणं निश्चितोत्तरोत्तरकार्याणां कारणकारणानामपि हेतुत्वानपायादिति भावः। यच्चोक्तं फलयोगे कथं फलयोगान्तरमिति तत्राप्याह **एकभावेन फलहेतु**रिति। एकभावः संबन्धः। तेनायं भावः– फलस्योत्पत्त्यवस्था एका नायकेन सह संबद्धा, द्वितीया येयं संसाध्ये फलयोग इत्यत्र निर्दिष्टा, पूर्वा त्ववस्था मध्यत्रयेण युज्यमाना योग्यफलोत्पत्तिदर्शना प चम्यवस्थेत्यर्थः। एवमवस्थाप चकं प्रदर्श्य तदनुयायित्वेनेतिवत्तस्याधिकारिकत्वं समर्थयितुमाह **इतिवत्तं समाख्यात**मिति। यद्यस्मात्तत् कर्तव्यं कार्यं वस्त्वारम्भादि फलान्तं च तदिति तस्मात्तदवस्थानुयायित्वेनाधिकृतत्वाधिकारिकमुच्यते। **चरस्तु**शब्दस्यार्थे, यथा तु तदितिवत्तशब्दवाच्यं भवेत् तथा प्राक् सम्यगाख्यातमितिशब्दार्थमिति निरूपणेन 'प चभिः सन्धिभिस्तस्य विभागः' इत्यनेनैतच्च तद्गतवक्तव्यान्तरोपक्षेपाय पुनरभिहितम्। {**१५-१६**}

ननु किं सर्वत्र प चैव सन्धय इत्याह **पूर्णसन्धि** चेति। विकल्पः सर्वत्रेति कश्चिदाशङ्कते तं प्रत्याह **नियमादि**ति। उत्सर्गेणेति केचित्। **उपाध्याया**स्त्वाहुः– सर्वत्रेतिवत्तं प चसन्ध्येव, न हि कश्चिदपि व्यापारो प्रारम्भाद्यवस्थाप चकं विना सिद्ध्येत् न शक्यमौनीकृत्यं वा। उक्तं च–

सर्वस्यैव हि कार्यस्य प्रारब्धस्य फलार्थिभिः।
एतास्त्वनुक्रमेणैव प चावस्था भवन्ति हि।। इति (**१६-१४**)

अवस्थाप चकानुयायिना सन्धिप चकेनापि भाव्यमेव, तेन सर्वं नियमात्प चसन्धि, हीनसन्धित्वं तु तत्र कारणादपूर्णाङ्गत्वलक्षणादुच्यते, अत एव पूर्णसन्ध्यपि व्यपदिश्यते इत्यपिशब्देन चोक्तं '**हीनसन्ध्यापि वा पुनः**' इति। ' डिमः समवकारश्च चतुस्सन्धी' इति वक्ष्यते, तत्रावमर्शस्य लोपः। 'व्यायोगेहामगौ चापि सदा कार्यौ त्रिसन्धिकौ' इत्यत्र गर्भविमर्शयोर्लोपः। 'द्विसन्धि तु प्रहसनं वीथ्यङ्को भाण एव च' तत्र प्रतिमुखगर्भावमर्शानां लोपः, त्रिशब्देन (द्वितीय**त्रि**चतुर्थानामित्यत्र) ततीयो लक्ष्यते। तत्रोपक्रमोपसंहारौ तावत् सर्वत्रावश्यंभाविनौ। तत्र तु ये प्रेक्षापूर्वकारिणो विततं बहुफलं कर्तव्यमारभन्ते तेषां प चैव सन्धयः। आर्तिसहिष्णुत्वेन शंक्यमानविरुद्धप्रत्ययस्यापाकरणे– ''द्वौ प्रतिषेधौ विधिं द्रढयतः'' इति न्यायात् सुदढो हि भवत्येषां फलयोगः। डिमादिनायकास्त्वत्युद्धतप्रायत्वान्नातीव विनिपातमाशङ्कन्ते। व्यायोगादिनायका अपि तारतम्येन फलयोगाङ्गीभावान्नाद्रियन्ते। प्रहसनादिनायकास्त्वधर्मप्रायत्वात्तदितिवत्तस्य चर्वितशरीरत्वादुपक्रमोपसंहारमात्रे विश्राम्यन्तीत्यपूर्णा अवमर्शादयः। {**१७-१८**}

एवं प चभिरितीतिवत्तशब्दे यस्य **ही**तिशब्दो व्याख्यातः, सो नेन निर्वाहितार्थः, प्रासङ्गिके तु क इतिशब्दस्यार्थ इति दर्शयति **प्रासङ्गिक** इति। नियमो य उक्तो नियमात्पूर्णसन्धि स्यादित्यादि स तत्र न भवेत्, विभीषणप्रतिष्ठापनविषये रामस्य चेदौत्सुक्यबन्धादि योज्येत तर्हि तदेव यत्नसंपाद्यं भवेत्। परामशति **यद्धत्त**मिति तत्राधिकारिके यदविरुद्धमत्र प्रासङ्गिके सम्भवि वत्तं प्रारम्भेष्वन्यतमं च तदेव प्रासङ्गिके योजनार्हमिति। {१६}

ननूक्तं **'औत्सुक्यमात्रबन्धस्तु यद्बीजस्य'** (१६.६) इत्यादि तत्र चोपायतत्सहकारिवर्गप्रतिबन्धत्वं तद्विध्वंसनं चोपक्षिप्तं तत्र तत्स्वरूपं न ज्ञातमित्युपायसामग्रीस्वरूपं दर्शयितुमाह **इतिवत्ते यथावस्था** इति, इतिवत्तविषये यथा येन प्रकारेणाधिकारिकस्य खण्डन लक्षणेन प चावस्था उक्ताः तेनैव प्रकारेणार्थप्रकृतयो पि प चैव पठ्यन्ते। तदनभिधाने उपायादिस्वरूपापरिज्ञानात् प्रारम्भाद्यवस्थानां परमार्थतो संवेदने आधिकारिकत्वमविदितं स्यात्। यत्रार्थः फलं तस्य प्रकृतय उपायाः फलहेतव इत्यर्थः। तत्र जडचेतनतया द्विधाकरणं, जडश्च मुख्यकारणभूतः, गूढतरो वा, आद्यं बीजं द्वितीयं कार्यं करणीयं प्रयोक्तव्यमित्यर्थे। चेतनो पि द्विधा मुख्य उपकरणभूतश्च, अन्त्यो पि द्विधा स्वार्थसिद्धिसहिततया परार्थसिद्ध्या युक्तः शुद्धयापि च, तत्राद्यो बिन्दुः द्वितीयः पताका ततीयः प्रकरी। तदेतैः प चभिरुपायैः पूर्णफलं निष्पाद्यते। अत एवाह **ज्ञात्वा योज्या यथाविधि** इति तासामौद्देशिकोक्तिवदुपनिबन्धक्रमनियम इत्यर्थः। अन्ये त्वाहुः– अर्थस्य समस्तरूपकवाच्यस्य प्रकृतयः प्रकरणान्यवयवार्थखण्डा इत्यर्थप्रकृतयः एतच्च व्याख्यानं नातीव प्रकृतं पोषयति। सन्ध्यादीनामपि चार्थप्रकृतित्वमत्र व्याख्याने स्यात्, इतिवत्तमेव च समुदायरूपम्। अर्थ इतिवत्ते प्रकृतय इति वक्तव्ये र्थग्रहणमतिरिक्तं स्यात्, इत्यवस्थाभिश्च तुल्यतावर्णनं वर्णनमात्रं स्यादिति किमनेन। {२०-२१}

तदेतत्प चकमुद्देशक्रमेण लक्षयति **स्वल्पमात्र**मिति। यद्वस्तु– सागरिकान्तःपुरनिवासेन (वसन्तोत्सव) समये गम्भीरप्रयोजनसंवेदनाभावात् स्वल्प मात्रकिंचित्करप्रायं शंक्यते संवादेनोत्सष्टं प्रक्षिप्तं यथावश्यं फलान्तं यतो बहुभिः प्रकारैर्विसर्पत्येव, सर्वथा प्रसरति यत्तत् सिद्धिस्तत्फलमपि यदि निरुध्य फलत्वेन प्रवर्तते प्रथमप्रक्षेपेणैव देशकालौचित्यापेक्षैस्तद्बीजवन्न्यस्यारघट्टपरिवर्तन्यायेन बहुतरोपायपरम्परोपरि कार्यमेव यस्यापेक्ष्यं तद्बीजम्। यद्यस्मात्परितः समन्तात्कीर्तितं प्रसिद्धम्। तच्च क्वचिदुपायमात्रं क्वचित्फलमात्रं क्वचिद्द्वयं फलं च क्वचिदुपादानं क्वचिद्धेयव्यसननिवर्तनं क्वचिदुभयमिति। तत्रापि क्वचिन्नायकोद्देशेन क्वचित्प्रतिनायकाश्रयेणेत्यादिभेदैर्बहुधा भिद्यते। तत्र चक्रवर्तिपुत्रलाभो मुनिजनाशीर्वचनद्वारेण फलस्वभावस्यैवा**भिज्ञानशाकुन्तले।**

फलमपि च भविष्यदुपायाविनाभावाद् बीजमित्युच्यते। एवमन्यत्रापि यथायथमुदाहार्यम्। आनन्त्याद् ग्रन्थगौरवभयाच्च न प्रतिदिशं लिखितम्। {२२}

अथ बिन्दुं लक्षयति **प्रयोजनानां विच्छेद** इति। प्रयुज्यते फलं यैरुपायानुष्ठानैः तेषामितिवत्तवशादवश्यकर्तव्यतादिभिर्विच्छेदे पि सति यदनुसन्धानात्मकं प्रधाननायकगतं सन्धिद्रव्यज्ञानं बिन्दुः, ज्ञानविचारणं फललाभोपायत्वात्। यावदविच्छेदः प्रत्यनुसन्धानेन (न) कृतस्तावन्न किंचिदपि कार्यं निर्वहति।

ननु बीजं तावत् फलान्तमास्ते, बिन्दोस्तु कथं स्थितिरित्याह **यावतसमाप्ति**रिति। यावत्स्वस्य बध्यमानस्य फलस्य सम्यगाप्तिस्तावत्। एतदुक्तं भवति– सकलोपायप्रतिजागरणनिमित्तं ह्यनुसन्धानं यावद्धि मुख्यनायकेन प्रत्यनुसन्धानेन (न) क्रियते तावद् जडाजडरूपः सर्वो प्युपायधर्मो नुपायकल्प एव। तथा हि– **तापसवत्सराजे** वासवदत्ताप्रेमानुसन्धानं राजमुखेन प्रत्यङ्कं दर्शितम्– ''तद्वक्त्रेन्दुविलोकनेन दिवसो नीतः प्रदोषस्तथा'' इति यावत् षष्ठे ङ्के–

त्वत्संप्राप्तिविलोभितेन सचिवैः प्राणा मया धारिताः
तन्मत्वा त्यजतः शरीरकमिदं नैवास्ति निःस्नेहता।
आसन्नो वसरस्तवानुगमने जाता रतिः किं त्वयं
खेदो यच्छतधागतं न हृदयं तस्मिन् क्षणे दारुणे।। (६.३)

तत्र प्रधानसिद्धिरायत्तसिद्धिरुभयसिद्धिः, प्रधानसिद्धावयं बिन्दुः, आयत्तसिद्धिस्तु राज्यप्राप्तिलक्षणा। तस्याममात्यवर्गकृतमेवानुसन्धानं बिन्दुः। उभयसिद्धौ तूभयकृतः येन यत्प्राधान्येनाभिसंहितं स एव तदनुसंधत्ते। इत्येवं प्रधानानुसन्धानचेतनव्यापारः कारणानुग्राही स्वयं च परमकारणस्वभावस्तैलबिन्दुवत् सर्वव्यापकात्वादपि बिन्दुः। बीजं च मुखसन्धेरेव प्रभत्यात्मानमुन्मेषयति बिन्दुस्तदनन्तरमिति विशेषो नयोः, द्वे अपि तु समस्तेतिवत्तव्यापके। {२३}

यद्धत्तं तु परार्थ स्यादिति। यस्य संबन्धि वत्तं संविदनुसन्धानं परस्य प्रयोजनसंपत्तये भवदपि स्वप्रयोजनं संपादयति। अत एवाह **प्रधानवच्च कल्प्येते**ति। सचेतनानुसन्धाना पताकासिद्धिः प्रधानस्योपकारिणी। एवं सुग्रीवविभीषणप्रभतिरपि रामादिनोपक्रियमाणो रामादेरात्मनश्चोपकाराय प्रभवमानो प्रसिद्धिप्राशस्त्ये संपादयती। एवमौचित्यानौचित्यज्ञानोपयोगिन्यानयात्र पताकावदुपयोगित्वादयं पताकेति चिरन्तनाः। {२४}

फलं प्रकल्प्यते यस्या इति यतश्च तत् परार्थमेव केवलं सर्वमनुतिष्ठति सा प्रकरी। यथा **कृत्यारावणे** कुलपतिः, **वेणीसंहारे** भगवान्वासुदेवः। प्रकर्षेण स्वार्थानपेक्षया करोतीति। इक् सार्वधातुभ्यः संविदापेक्षया च, स्त्रीलिङ्गत्वे कृदिकारादिति ङीष्। फलमिति फलतीति कृत्योपायानुष्ठानमुच्यते। {२५}

यदाधिकारिकमिति प्राज्ञैः प्रधाननायकपताकानायकप्रकरीनायकैश्चेतनरूपैः, यद्वस्तु फलरूपं प्रयुज्यते संपाद्यते संपाद्यत्वेनानुसन्धीयते तत्फलप्रयोजनो यः संपूर्णतादायी पूर्वपरिगहीतस्य प्रधानस्य बीजाख्योपायस्य फलम्, आरभत इत्यारम्भशब्दवाच्यो

द्रव्यक्रियागुणप्रभतिः सर्वो र्थः (यस्य) सहकारी (तत्) कार्यमित्युच्यते, चेतनैः कार्यते फलमिति व्युत्पत्त्या। **सम्यगि**ति प्रभुमन्त्रोत्साहशक्तित्रयसंपन्नैरित्यर्थः। तेन जनपदकोशदुर्गादिकव्यापारवैचित्र्यं सामाद्युपायवर्ग इत्येवत्सर्व कार्ये न्तर्भवति। तत्र परं प्रथमपरिगहीतः प्रधानभूतो भ्युपायो बीजत्वेनोक्तः। {२६}

ननु प्रारम्भादिवदासामर्थप्रकृतीनां किं सर्वत्र सर्वासां सम्भवस्तथार्थप्रकृतिसन्धवस्थाभिः सह किं यथासख्यं नियमस्तथा किं स्वात्मन्यासां कर्तक्रम इति शङ्कात्रयमपाकर्तुमाह **एतेषा**मिति प चकवर्गत्रयं परामश्यते एकैकस्य वर्गस्यैकशेषेण। तदयमर्थः– न सर्वत्र प्रारम्भादिवत् सर्वा अर्थप्रकृतयो पि। अपि तु यस्य नायकस्य येनार्थप्रकृतिविशेषेण प्रयोजनसंपत्तिरधिका तदेव प्रधानम्, अन्यत्तु भवदपि गुणभूतमसत्कल्पम्, यथा स्वपराक्रमबाहुमानशालिनां पताकाप्रकर्यौ अविवक्षिते एव। बीजबिन्दुकार्याणि तु सर्वत्रानपायीनि। तत्रापि तु गुणप्रधानभावः तथा सन्ध्यवस्थार्थप्रकृतीनां **यस्य येनो**चितः संबन्धस्तत्**प्रधानं** नाटकादिकार्यमिति द्वितीयापि निरस्ता। **यतश्च गुण** उपकारो झटिति वाच्यते तदेवार्थप्रकृतिरूपं प चानामन्यतमं प्रधानत्वेन बाहुल्येन निबन्धनीयम्, अन्यद् गुणभावेन संबन्धस्तत्प्रधानं प्रधानसिद्धावायत्तसिद्धौ च निबद्धमानायां यो यत्रांशे प्यधिकोपकारी स तत्र प्रधानीकर्तव्यः। यथा वासवदत्तालाभे (**तापसवत्सराजे**) बिन्दुः प्रधानं, कौशाम्बीराज्यलाभे तु प्रकरी पताका च प्रधाना, अमात्यस्य राज्यसिद्धौ स्वार्थसिद्धिरिति पताकात्वं केचिदाहुः। एवं सुसङ्गतासांकृत्यायनी बीजधर्मादिषु वाच्यम्। अपरे तु– प्रथमतरमेव नायकस्य तावद्रूपत्वान्नैव प्रमाणं पथङ्नायकत्वं सुग्रीवादयस्तु पथग्भूता एव, सांप्रतिके कार्ये केवलमाश्रिता इति एवंप्रमाणमेव पताकादिरूपत्वम्। तेषां मते **तापसवत्सराजे** उभयत्रापि बिन्दुरेव प्रधानं, प चानामप्यर्थप्रकृतीनामन्यतमस्य द्वयोस्तिसणां चतसणां सर्वासां वा प्राधान्यं यथास्वं विभजनीयम्। पताकावत्तस्य प्रधानवदतिदेशात् प च सन्धीत्यासां भवेत् पथग्गणना। अस्त्वित्यसौ परार्थत्वादेव। अत एव च कुतः सन्धिः सूच्यते वाभ्यूह्यते वा निबध्यते वा। **यथा मायापुष्पके**

वाली यथा विनिहतः प्रथितप्रभावो
दग्धा यथैककपिना प्रसभं च लङ्का।
तीर्णो यथा जलनिधिर्गिरिसेतुना च
मन्ये तथा विलसितं चपलस्य धातुः।।

पताकायां हि पूर्णवर्णने पताकान्तरं स्यादित्यनवस्था। तद्युक्तमुक्तमनुसन्धित्वान्न पथग्गणनमस्येति।

तथा **लोल्लटाद्यास्तु** मन्यन्ते परार्थे साधयितव्ये पताकानायकस्येतिवत्तभागा अनुसन्धयः। यथा **कृत्यारावणे**-

धन्यास्ते ते कृतिनः श्लाघ्या तेषां च जन्मनो वत्तिः।
यैरुज्झितात्मकार्यैर्येषामर्थाः प्रसाध्यन्ते।।

इति मुखानुसन्धिः ''वाली यथे''ति प्रतिमुखस्यानुसन्धिः, शक्तिहते लक्ष्मणे ओषध्यानयने गर्भस्य, अङ्गददौत्ये मन्दोदर्याक्षेपे वमर्शस्य, ''आ! अशक्त, अनार्ये तिष्ठ तिष्ठ, अतिरथस्त्वं सा न'' इति निर्वहणस्य, इति। एतत्तु भवति सर्वस्यैव हि प चावस्था भवन्तीत्युक्तम्। किं त्वस्यानुसन्धित्वाभिधाने प्रयोजनं न पश्यामः। {२७-२८}

स्वफलसिद्धये यतमानस्य तत्र तत्रावश्यं पथग्गणनाशङ्केति, तत्प्रशमनप्रयोजनम्, अस्मत्पक्षे कस्मिंस्तर्हि प्रधानसन्धौ तस्यानुयायित्वमिति दर्शयितुमाह **आगर्भादाविमर्शाद्वे**ति प्रतिमुखे गर्भे यदि वा यमर्थ व्याप्य निवर्तते पताकेतिवत्तं तावत्येव पताकानायकस्य स्वफलसिद्धिरूपनिबन्धनीया, सिद्धफलस्त्वसौ प्रधानफल एव व्याप्रियमाण आसीनो पि भूतपूर्वगत्या पताकाशब्दवाच्यो न मुख्यत्वेन। अत्राह **कस्माद्यस्मादि**ति। कस्मादस्याभिप्रायः, प्रधानवच्च कल्प्येतेत्युक्तत्वात्। निर्वाहादपि किं तद्भवति, अत्रोत्तरं **यस्मादि**ति निर्वहणपर्यन्ते तत्फले क्रियमाणे तुल्यकालयोगरुपकार्योपकारकत्वाभावात् तेन प्रधानोपकारो न भवेत्। अभिविधावाङ्। ये तु मर्यादायां तं व्याचक्षते ते न सम्यगमंसत – विनिपातप्रतीकारेः प्रधानविमर्शसन्धौ प्रत्युतोपयोगः पताकायाः, यत्र कृतघ्नता दष्टा तन्नोच्यते कृतज्ञस्तु प्राप्तफलो विनिपातान् प्रतिकुर्यादेवेति। तत्र पताकानायको यथास्वार्थे प्रवर्तते **परार्थं** च (संपद्यते), भत्यस्यान्यस्य वा जडस्य वा स्थितिः– स्वार्थे पि सति परार्थे संपद्यते। तत्पताकास्थानकं, पताका सदशं तत्र जडस्य स्वार्थपरार्थप्रवत्तौ तावदभिसन्धानाभावात् अभिसन्धाानवतः सुग्रीवादेः पताकानायकाद्भेदः, अजडस्यापि स्वार्थे यद्यप्यभिसन्धानमस्ति तत्रापि परार्थे नास्तीति विशेषः, प्रधानवच्च कल्प्येतेति पताकालक्षणे भिधानाद् बहुतरेतिवत्ते व्यापकता नायकस्य, अस्य तु परिमितेतिवत्तव्यापकत्वमित्यपि विशेषः। {२६}

तस्य पताकास्थानकस्य वक्ष्यमाणभेदैर्भेदवत्त्वात् सामान्यलक्षणं तावदाह **यत्रार्थे चिन्तिते न्यस्मि**न्निति। अर्थः प्रयोजनं, उपायश्च, कर्मकरणव्युत्पत्त्या, अन्यस्मिन्नुपाये प्रयोजने वा चिन्तिते अन्यः उपायान्तरप्रयोजनान्तरलक्षणः प्रकर्षेण युज्यते तत्पताकास्थानकम्, पताकाधारत्वादुपचारादिवत्तमपि पताकास्थानकम्। **उपाध्यायास्त्वाहुः**– पताकायाः स्थानमितिवत्तता, तत्र चार्थः क्रियमाणो पि पूर्वपदार्थमुपसंक्रामति, राजवाहन इवामुद्धुरकन्धरस्तिष्टतीति यथा, तेन पताकायाः स्थानकमितिवत्तमेवोच्यते। तत्र वर्ण्यमानं तु जडाजडरूपं पताकासदशमित्यर्थादुक्तं भवति। स चान्यो र्थस्तल्लिङ्गस्तन्मुखमर्थं लिङ्गयति विचित्रयतीति।

ननु किं तत्र पताकासादश्यमित्याह **आगन्तुकेन भावेने**ति। भावनं भावः कारणत्वम्, तच्च द्विविधं स्वरूपकृतं सहकारिकृतं च। सहकारिकृतमागन्तुकमुच्यते। तेन सहकारित्वसामान्यात् तत्समर्थाचरणलक्षणात् पताकासादश्यमिति यावत्। अन्याभिसन्धाने न्यसिद्धिश्वेत् भूषणभूतापि कैश्चिद्दूषणत्वेन गहीता, तैरर्थशब्दः उपायवाच्योपाश्रितः। **तल्लिङ्ग** इति कारणत्वधर्माभावप्रवत्तिनिमित्त उपायः। उदाहरणं

सामान्यलक्षणस्य विशेषलक्षणव्याख्याने शक्ययोजनमिति तत्रैव दर्शयिष्यामः। तद्भेदान् क्रमेण लक्षयति **सहसैवार्थसंपत्ति**रिति। यत्रोपकारकमपेक्ष्य गुणवती उत्कृष्टा अर्थस्य फलस्य सहसैवाचिन्तितोपनतत्वेन भवति संपत्तिः तत् प्रथममिति साध्यफलयोगात्प्रधानं पताकास्थानम्। यथा **रत्नावल्यां** सागरिकां पाशावलम्बनप्रवत्तायां वासवदत्तेयमिति मन्यमानो यदा राजा पाशं मु चति तदा तदुक्त्या सागरिकां प्रत्यभिज्ञाय ''हा कथं प्रिया मे सागरिका, अलमलमतिमात्र''मित्यादि। अत्रान्यप्रयोजनं चिन्तितं तद्वैचित्र्यकारि च प्रयोजनान्तरं संपन्नम्। तत्र च दैवयोगः तथाभूतदेशकालयोगो नायकः स्वात्मैवान्याभिसन्धिबलात् कल्पितभेदः, सागरिकैव वा मरणमेवोचितमित्यन्याभि सन्धानेन वदतीति पताकानायकसदशत्वं भजते। अन्यस्मिन्नुपाये चिन्तिते सहसोपायान्तरप्राप्तिः यथा **नागानन्दे** जीमूतवाहनस्य शङ्खचूडादप्राप्तवध्यपटस्य क चुकिना वासोयुगलार्पणम्।

अन्ये तु 'चतुष्पताकापरममिति भावसन्धिचतुष्टयाभिप्रायेण मन्यमानाः प्रथमद्वितीयादिशब्दान् मुखादिसन्धिविषयप्रयोगाभिप्रायेण व्याचक्षते। अत्र च युक्तिर्न लक्ष्यते, न वा चमत्कारं भजतीत्यसदेव। एतत्तुल्यतया गणनभूतेन्द्रियैः सह पताकाप चकगणन–––मप्यापादयेदिति च वददि्भश्चिरन्तनैरेवायमुपहासपात्रीकृतः पक्ष इत्यास्ताम्। {३०-३१}

वचः सातिशयं श्लिष्टमिति। काव्यस्य प्रकृतस्य वर्णनीयस्य यो बन्धः, अतिशयोक्त्यादिना योजनं तन्निमित्तवशाद्यद्वचनं सातिशयं श्लिष्टमप्रकृतं प्रत्युचितं जातं तद्वचनं तदर्थो वा तदुच्चारयिता वा यादच्छिकं वा प्रकृतोपयोगित्वेन सहकारित्वेन गच्छद् (गच्छन्?) द्वितीयं पताकास्थानमभिसन्धानापेक्षया। यथा **रामाभ्युदये** ततीये ङ्के सीतां प्रति सुग्रीवस्य संदेशोक्तिः–

बहुनात्र किमुक्तेन पारे पि जलधेः स्थिताम्।
अचिरादेव देवि त्वामाहरिष्यति राघवः।।

अत्रान्यप्रयोजनेनातिशक्त्याशयेन प्रयुक्ते पि वचसि पारे पीत्यादि प्रकृतोपयोगातिशयात्पताकास्थानकम्। {३२}

अर्थोपक्षेपणं यत्रेति। लीनमस्फुटरूपं उपक्षिप्यमाणमर्थजातं, श्लिष्टेन संबन्धयोग्येनाभिप्रायान्तरप्रयुक्तेनापि प्रत्युत्तरेणोपेतं सद्यत्र, सविनयं विशेषेण नयनेन विशेषनिश्चयप्राप्त्या सहितं संपद्यते तत् ततीयं पताकास्थानकम्। यथा **मुद्राराक्षसे** चाणक्यः – ''अपि नाम राक्षसो दुरात्मा गह्येत'' एवमस्फुटे र्थे उपक्षिप्ते, (प्रविश्य) सिद्धार्थकः – ''अय्य गहिदो'' इत्येतत्प्रत्युत्तरं सन्देशाशयेन प्रयुक्तमौचित्याद्विशेषनिश्चयं करोति। तथा च पुनश्चाणक्यः – (सहर्षमात्मगतं) ''हन्त गहीतो दुरात्मा **राक्षसः**'' इति। इदं च प्रकृतसाध्योपयोगाङ्गित्वात् पताकास्थानीयमिति वीथ्यङ्गाद् गण्डादस्य भेदः – ''ऊरुयुग्मं च भग्नं'' तद्धि प्रत्युत दुर्योधननाशादाशयश्च दुष्टः। कस्तस्योपयोगः, पाण्डवानुसारेण तु भवतु। इदं पताकास्थानकं भिन्नविषयत्वं कृतं ह्येतद्रूपं न क्षतिमावहति। {३३}

द्वयर्थो वचनविन्यास इति यो वचनविन्यासः (काव्यरूपं) कथारूपं वा सालङ्कारत्वसंपत्त्याशयेन, शोभनः प्रसादयुक्तः श्लेषवशात्, **द्वयर्थ** इति अनेकार्थसंप्रयुक्तः तादशः सन्न्युपन्यासे वस्त्वन्तरोपक्षेपे सुष्ठु युक्तः संपद्यते, तच्चतुर्थम्। यथा ''प्रीत्युत्कर्षकृतो दशामुदयनस्येन्दोरिवोद्वीक्षते'' (**रत्नावली** अ१–२३) इत्यत्र हि काव्यरूपताशयेन श्लेषः प्रयुक्तः प्रधानवस्त्वन्तरं सागरिकागतमुत्क्षिपति – 'अयं सो राआ उदयणो जस्स अहं तादेण दिण्णा – अयं स राजा उदयनो तातेन दत्ता'' (**रत्ना** अ१) इति। ''उद्दामोत्कलिकां'' इति तु नोदाहरणं, द्वयर्थताप्रतिपत्तावपि हि नात्रार्थेन सहकारिता कुत्रचिदाचरिता। तस्मादेतद्वीथ्यङ्गस्य व्याहारस्यैवोदाहरणं युक्तम्। {**३४-३५**}

एषामुत्कर्षं दर्शयितुमाह **चतुष्पताकापरम**मिति। पताकाशब्देन समनन्तरं पताकास्थानकमुक्तं तैश्चतुर्भिः कृतैः परममुत्कृष्टं **नाटके** नाट्यविषये **कार्य**मिष्यते तस्मात्तथाकर्तव्यमित्यर्थः।

पताकानायकेन (स्थानकेन?) हि यल्लेशतः कर्तव्यं तदेकेन क्रियते चतुष्टयेन वा। केचिदित्याहुः चतुर्षु सन्धिषु चत्वारः पताकानायकाः, तेषां यथाक्रमं सूचकानि पताकास्थानकानि, प्रथमं मुखसन्धौ यावच्चतुर्थमवमर्शसन्धाविति– तच्चासत्, पताकाया इव प्रकरीकार्यबिन्दुबीजानामपि सूचकान्तराणि तदानीं वक्तव्यानि स्युः चत्वारश्च नियमेन पताकानायका भवेयुः आगर्भादिति च पक्षे **चतुष्पताकापरम**मित्यसङ्गतं स्यात्, मुख्यनायके चेतिवत्तसूचकं न लक्षणतः (लक्षणं?) कथ्यते पताकानायके तु कथ्यत इत्यधरोत्तरमाश्रितं स्यात्, न च मुख्यसंधावाद्यं द्वितीयं प्रतिमुखसन्धावित्यादिक्रमो न्यायं लक्ष्ये वा साक्ष्यमाक्षिपति – इत्यलमनेना।

एवमितिवत्तं व्याख्यातं, तस्य च भेदद्वयं निरूपितं, प्रसङ्गादाधिकारिकत्वसिद्धये अनुवत्तिस्थानभूता अवस्थाः प च दर्शिता अर्थप्रकृतयश्च, तत्प्रसङ्गादेव पताकास्थानानि। अधुना त्वितिशब्दार्थं प्रयुक्तं **प चभिः सन्धिभिर्युक्त**मिति। तत्र प्रतिज्ञां करोति **तांश्च वक्ष्यामी**ति। अथ निर्णिनीषुरुद्देशं तावदाह **मुखं प्रतिमुखं चैवे**ति। समुच्चयपदैः प चानां सर्वत्रावश्यंभावित्वं द्योतितम्। नियमवाचिभिः क्रमनियमः। नाटक इत्यभिनेयरूपके इत्यर्थः। महावाक्यार्थरूपस्य रूपकार्थस्य प चाशां अवस्थाभेदेन कल्प्यन्ते। तत्र मुखस्य (मुख्यस्य?) स्वतन्त्रस्येतिवत्ते समस्तप्रयोजनस्यात एव नायकस्य स्वमुखेन परद्वारेण वा या प्रारम्भावस्था प्रथमा व्याख्याता तदुपयोगी यावानर्थराशिः स मुखसन्धिः। तस्यार्थराशेरवान्तरभागान्युपक्षेपाद्यानि सन्ध्यङ्गानि। एवमन्येषु सन्धिषु वाच्यम्। तेनार्थावयवा सन्धीयमानाः परस्परमङ्गैश्च सन्धय इति समाख्या निरुक्ताः। तदेषां सामान्यलक्षणम्। तत्रैषां क्रमेण विशेषलक्षणमाह **यत्र बीजसमुत्पत्ति**रिति। प्रागारम्भभावित्वान्मुखमिव मुखं, यावत् क्रियावत्यर्थभागराशौ बीजस्य मुखोपायस्य सम्यगुत्पत्तिः शरीरेण प्रारम्भात्मना अनुगता भवति, नानाभूतो र्थवशात् प्रसङ्गायातो रससंभवो यः स्यात् (यस्याम्?)। एतदुक्तं – प्रारम्भोपयोगी यावानर्थराशिः प्रसक्तानुप्रसक्त्या

विचित्रास्वाद आपतितः तावान् मुखसन्धिः, तदभिधायी च रूपकैकदेशः। यथा **रत्नावल्यां** प्रथमो ङ्कः, तथा हि, अमात्यस्य वीरो, वत्सराजस्य श्रङ्गाराद्भुतौ ततः श्रङ्गार इति इयानयं सागरिकाया राजदर्शने मात्यप्रारम्भविषयीकृते र्थराशिरुपयोगीति मुखसन्धिः। एवं प्रतिसन्धि वक्तव्यम्। {**३६-३६**}

बीजस्योद्घाटनं यत्रेति। कार्यतया दष्टं कारणतया नष्टमिति **केचित्**, उपादेये दष्टं हेये नष्टमित्यन्ये, नायकवत्ते दष्टं प्रतिनायकेतिवत्ते नष्टमि**त्यपरे**। न चैतत्सम जसम्, एकविषयमन्तरेण सन्धानायोगात्, नाशस्यापि च हेयादिविषयस्य प्रारम्भवशेन दष्टतयैव संग्रहसंपत्तेः। तस्मादयमत्रार्थः– बीजस्योद्घाटनं तावत् फलानुगुणो दशाविशेषः तद् दष्टमपि विरोधिसंनिधेर्नष्टमिव, पांसुना पिहितस्येव बीजस्याङ्कुररूपमुद्घाटनम्। यथा **वेणीसंहारे** क चुकिवचनम्–

आशस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुने–
स्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः।
प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो
बालस्यायमरातिलूनधनुषः प्रीतो भिमन्योर्वधात्।। (अ २–२)

अत्र पाण्डवाभ्युदयस्य मुखोपक्षिप्तस्योद्घाटनं भीष्मवधाद् दष्टमभिमन्युवधान्नष्टमिति वेदितव्यमिति **केचित्**। तदा चार्थो न संगमितः स्यात्। दष्टतैव प्रतिमुख उपयोगिनी नष्टता त्ववमर्श एवेति केचिदुत्तरोत्तरविकासतारतम्यं दष्टनष्टत्वमाहुः। पूर्वावस्था हि दष्टाप्युत्तरदष्टविकासापेक्षया नष्टा। एवं संमष्टोपमविकास उत्तरापेक्षयेति मन्यन्ते, अत्रापीवार्थो न संगच्छत एव।

तस्मादयमत्रार्थः– दष्टं नष्टमिव कृत्वा तावन्मुखे न्यस्तं भूमाविव बीजं, अमात्येन सागरिकाचेष्टितं वसन्तोत्सवकामदेवपूजादिना तिरोहितं नष्टमिव सागरिकाचेष्टितस्य हि बीजस्येव तदाच्छादकामप्युत्सवादिरूपं भूमिरिव भूमिवत् प्रत्युत कार्यजननशक्त्युद्बोधकम्। तस्य दष्टनष्टतुल्यं कृत्वान्यस्तस्य, अत एव कुङ्कुमबीजस्य यदुद्घाटनं तत्कल्पं, यत्रोद्घाटनं **सर्वत्रैव** कथाभागसमूहे तत्प्रतिमुखं, प्रतिराभिमुख्ये मुख्यस्या(मुखस्य)भिमुख्येन यतो त्र वत्तिः। पराङ्मुखता हि दष्टनष्टकल्पनानिदर्शनम्। **रत्नावल्यां** – परप्पेसत्तणदूसिदं वि मे सरीरं एदस्स दंसणेण अज्ज मे बहुमदं संपण्णं (परपेष्यत्वदूषितमपि मे शरीरमेतस्य दर्शनेनाद्य मे बहुमतं सम्पन्नम्) इत्यादि सागरिकोक्तेरनङ्गाङ्कात् (प्रथमाङ्कात्) सुसङ्गतारचितराजतत्समागमपर्यन्तं काव्यं द्वितीयाङ्कगतं प्रतिमुखसन्धिः। उद्घाटितत्वाद् बीजस्य स्तोकमात्रं तु शङ्कुकादिभिरुदाहृतं यत्तदेकदेशलक्षणमिति द्रष्टव्यम्। {**४०**}

उद्भेद इति। **तस्ये**ति उत्पत्त्युद्घाटनदशाद्वयाविष्टस्य बीजस्य यत्रोद्भेदः फलजननाभिमुख्यत्वं स गर्भः। उद्भेदमेवं विवणोति **प्राप्ति**रित्यादिना। प्राप्तिर्नायकविषया, अप्राप्तिः प्रतिनायकचरिते पुनश्चान्वेषणमित्युभयसाधारणम्। **अन्ये** तु वीररौद्रविषय

एवैतस्यार्थस्य भावादव्यापित्वादेवमाहुः। प्राप्तिः, अप्राप्तिरन्वेषणमित्येवं भूताभिरवस्थाभिः पुनः पुनर्भवन्तीभिर्युक्तो गर्भसन्धिः, प्राप्तिसम्भवाख्ययावस्थया युक्तत्वेन फलस्य गर्भीभावात्। तथा हि **रत्नावल्यां** द्वितीये ङ्के सुसङ्गता – अदक्खिणा दाणि तुमं, जा एव्वं भट्टिणा हत्थेण गहीदा वि कोवं ण मुंचेसि (अदक्षिणा इदानीं त्वां या एवं भर्त्रा हस्तेन गहीतापि कोपं न मु चसि) इत्यादौ प्राप्तिः। पुनर्वासवदत्ताप्रवेशे प्राप्तिस्ततीये ङ्के। ''तद्वत्तान्वेषणाय गतश्चिरयति वसन्तकः'' इत्यन्वेषणम्। विदूषकः– ''ही ही भोः कोसंबीरज्जलंभेणावि ण तारिसो पिअवअस्सस्स परितोसो जारिसो मम सआसादो पिअवअणं सुणिअ भविस्सदिं'' इत्यादौ प्राप्तिः। पुनः ''इह तदप्यस्त्येव बिम्बाधरे'' इति, विदूषकस्य– ''भो वयस्य, किं अवरं'' इत्यत्र वासवदत्ताप्रत्यभिज्ञानादप्राप्तिः। पुनः सागरिकायाः सङ्केतस्थानागमने अन्वेषणम्। पुनर्लतापाशकरणे प्राप्तिरित्येवं गर्भः। अप्राप्त्यंशश्चात्रावश्यंभावी, अन्यथा हि सम्भावनात्मा प्राप्तिसम्भवः कथं निश्चय एव हि स्यात्। अवमर्शे त्वप्राप्तेरेव प्रधानता प्राप्त्यंशस्य च न्यूनतेति विशेषः। {**४१**}

गर्भनिर्भिन्नबीजार्थ इति। **केचिद्वि**मर्श इति पठन्ति, **अन्ये** वमर्श इति। तत्र सन्देहात्मको विमर्शः। ननु पूर्वः सम्भावनाप्रत्ययः, ततः संशय इति नेदमुचितम्, संशयनिर्णयान्तरालवर्तिनं हि तर्कं तार्किकाः प्राहुः। किं च विमर्शसन्धिर्नियतफलप्राप्त्यवस्थया व्याप्तः, तच्च नियतत्वं सन्देहश्चेति किमेतत्। अत्राहुः– तर्कान्तरमपि हेत्वन्तरवशाद् बाधच्छलरूपतापराकरणे संशयो भवेत्, किं न भवति। इहापि च निमित्तबलात्कुतश्चित्संभावितमपि फलं यदा बलवता प्रत्यूह्यते कारणानि च बलवन्ति भवन्ति तदा जनकविघातयोस्तुल्यबलत्वात् कथं न सन्देहः। तुल्यबलविरोधविधीयमानवैधुर्यव्याधूननसन्धीयमानस्फारफलावलोकनायां च पुरुषकारः सुतरामुद्धुरकन्धरीभवतीति तर्कान्तरमत्र संशयः ततो निर्णय इत्येतदेवोचिततरम्। तथा हि– पुरुषकारशालिन एव श्लाघ्यन्ते, अद्भुतमद्भुतं प्राणसन्देहादप्यनेनात्मा समुत्तारितो यत्र संभावनाविनाभवति, यत एवान्यप्रयत्नतो विधुरप्रयत्नतो य उपनिपातः, तत एव पुरुषकारोद्यतः पुमानपि विजिगीषागर्भत्वेन प्रोद्यमं भजतीति तदाशयेन नियता फलप्राप्तिरुच्यते। श्रेयांसि बहुविघ्नानीति पश्यन् तदत्र मया विघ्नापसारणं कर्तव्यमिति साभिमानः स्वमुद्योगसूत्रं सहस्रगुणीकुरुते, तथा हि सागरिकाबन्धने पि महामात्यप्रयुक्तमैन्द्रजालिकवत्तं सुनिपुणमुपनिबद्धं तावत्।

अन्ये त्ववमर्शो विघ्न इति विदन्ति। बीजशब्देन बीजफलम्। अर्थशब्देन निवत्तिरुच्यते। तेन गर्भनिर्भिन्नप्रदर्शितमुखं यद्बीजफलं तस्य निवत्तिः पुनस्तत्रैव संपादनं (निष्प्रत्यूहप्राणतया फलप्रसूतिः?) स इति तच्छब्देन यत्रेत्याक्षिप्तम्। सा च निवत्तिः क्रोधेन च निमित्तेन लोभेन वा व्यसनेन शापादिना वा। अपिशब्दाद् विघ्ननिमित्तान्तराणां प्रतिपदमशक्यनिर्देशानां सङ्ग्रहः, स च देव्या वासवदत्तया सागरिकायाः कारानिक्षेपात्प्रभति येयं तुरीये ङ्के राज्ञ उक्तिः–

कण्ठाश्लेषं समासाद्य तस्याः प्रभ्रष्टयानया।

तुल्यावस्था सखीवेयं तनुराश्वास्यते मम।।

अत्र विघ्ने वासवदत्ताक्रोधो निमित्तम्। लोभस्तु निमित्तं, यथा **तापसवत्सराजे**– ''त्वत्संप्राप्तिविलोभितेन सचिवैः प्राणा मया धारिताः'' (६–३) इति। त**दपरे** न सहन्ते– न ह्यत्र वासवदत्ताप्राप्तिलोभः प्रकृते फले विघ्नकारीति, इदं तदोदहरणं– तत्रैव परिणीतायामपि **पद्मावत्यां वासवदत्ता**मलभमानस्य राज्ञो मरणाध्यवसायो मुमूर्षोः, तदलाभे मन्त्रिणां सुतरां राज्यप्राप्तिदीर्घलोभो निमित्तमिति।

शापव्यसनं त्वमर्षनिमित्तमिति **अभिज्ञानशाकुन्तले** दर्शितम्। एवमन्यदुत्प्रेक्ष्यम्। तथा हि– सपत्न्या विद्याप्रभावो निमित्तमवमर्शे, क्वचिद्दैवं, क्वचित्समयः– यथा **विक्रमोर्वश्यां** पुत्रवदनावलोकनादूर्वश्याः स्वर्गगमनाध्यवसाये।

अन्ये त्वावत्तिविमर्शशब्दं कल्पयन्त इत्थं व्याचक्षते– गर्भान्निर्भिन्नो बीजा**र्थ**फलं यस्मिन्, विमर्शादकारणत्वाद् विमर्शरूपे कथावयवे स विमर्शो नामेति। अत्र व्याख्याने मुख्यमस्य सन्धेर्यद्रूपं विघ्नकारणसंपातात्मकत्वं नाम तदस्पष्टमेव स्यात्।

अन्ये तु लाभयोग्यत्वं, नाशावस्था, अन्वेषणावस्था च यथारुचि गर्भे निबन्धनीया, तत्र यदा लाभात्मिका प्राप्त्यवस्था प्रतिमुखेनैव निबध्यते तदान्ये द्वे गर्भे सन्धौ, यदाप्यवमर्शे नाशावस्था तदा गर्भे न्वेषणमेव, गर्भे यदा नाशान्वेषणे तदा चावमर्शे विचारो निबन्धनीयः। कथं मया प्राप्तप्रायमप्यपहारितं, किमत्र विगुणोपायानुष्ठानं मया कृतं, उत प्राप्तियोग्यमेवैतन्न भवतीति, यदा**होद्भटः** यासावन्वेषणभूमिरवमष्टिरवमर्श इति, तच्चेदं व्याख्यानं लक्ष्यविरुद्धं युक्त्या च पूर्वोदितप्रारम्भाद्यवस्थाप चकगतक्रमनियमसमर्थन––प्रस्तावोक्तया विरुद्धमित्यास्ताम्।

''अहमनेन विफलायां क्रियायां विलोभ्य प्रवर्तित इति यत्र कर्ता विमशति स विलोभनकृत इति, क्रोधव्यसनादेस्तु व्यापद्यमाने फलव्यापत्तिविषयो यः कर्तुर्विचारः स क्रोधव्यसनजे विमर्श इत्येवं विमर्शनस्वभाव एव विमर्शः, कार्यविनिपातस्तूत्तरनिर्वहणसन्धिनिबध्यमानाद्भुतरसपरिपोषकत्वेन निबध्यते'' इति **श्रीशङ्कुकः।** तन्मते विचारस्य सर्वसन्ध्यनुपायत्वात् पथग्विमर्शशब्देनाभिधानं स्यात्।

व्यापत्तिविषयो विचार इति **केचित्**। पुनरप्यस्य सरणिरेव, सा च न व्याख्यानेन क्रमेण दर्शिता। विलाभनकृतोदाहरणं तु न व्यापत्तिविमर्श इति सर्वं त्वसम जसं यथारुचि परिकल्पितमित्यलमनेन। {४२}

समानयनमिति। मुखाद्यानां चतुर्णां सन्धीनां ये र्थाः प्रारम्भाद्या तेषां सह बीजिभिः बीजविकारैः क्रमेणावस्थाचतुष्टयेन भवद्भिः उत्पत्त्युद्घाटनोद्भेदगर्भनिर्भेदलक्षणैः वर्तमानानां नानाविधैः सुखदुःखात्मकैः (रति)हासशोकक्रोधादिभिर्भावैरुत्तराणां चमत्कारास्पदत्वे जातोत्कर्षाणां यत्समानयनं, यस्मिन्नर्थराशौ समानीयन्ते फलनिष्पत्तौ योज्यन्ते तन्निर्वहणं फलायोगावस्थया व्याप्तम्। अत्र **केचिद**मून् सर्वान् सन्धीनवस्थाप चकनिर्वहणे पथग्वत्त्या योज्यमानानिच्छन्ति।

अन्ये तु सन्धौ सन्ध्यन्तरानुप्रवेशमिच्छन्तो पि प्रागवस्थाया एकोत्तरावस्थापरिणामात्मकत्वे कारणं न पश्यन्त्यपि तु (ताः) कार्यीभवन्तीति सांख्यदर्शनच्छायाश्रयेणैकावस्थायाः फलसंगमनसंबन्धोपकरणभावप्राप्तं तदेकभावानाम–––वस्थान्तराणां फलसंगमनमुचितमेवेति मन्यन्ते।

अन्ये तु मुखसन्धौ ये अवलम्ब्यमानतया आद्याः प्रधानभूता अर्थाः उपायास्ते महौजसः फलसंपत्तौ साधकाः तेषां फलसंगत्या समानयनमिति व्याचक्षते। ''महौजसां फलोपसंगतानां च'' इति पाठेन– यदा च सुखप्राप्तेः फलवत्त्वं तदा रतिहासादिबाहुल्यं प्रारम्भादीनां, दुःखहानेस्तु फलत्वे क्रोधशोकादिदुःखात्मकभावबाहुल्यं, स्वोचितव्यभिचारिसहितं द्रष्टव्यम्। उदाहरणं **रत्नावल्यामै**न्द्रजालिकप्रवेशात्प्रभत्यासमाप्तेः। एषामवस्था सन्ध्यादीनां नायकतदमात्यतत्परिवारनायिकादिमुखेनापि नियोजनं न त्वेकमुखेनैवेति नियम इत्युक्तं पूर्वमेव। {४३}

एतेषां विनियोगं विभजति **एते त्वि**त्यादिना ''मुखनिर्वहणे तत्र **कर्तव्ये कविभिः सदा**'' इत्यन्तेन। एतच्च पूर्वमेव निर्णीतार्थं 'एकलोपे चतुर्थ'स्येत्यादि (१६–१८) व्याख्यानावसरे। {४४}

कस्मात्तौ (डिमसमवकारौ) चतुःसन्धी इत्याह **न तयोरि**त्यादिना। तुर्हेतौ, यतस्तयोरवमर्शं निबद्धुमशक्यमिति। एवमुत्तरत्रापि। हेतुग्रन्थान्तरत्वेनेदं योज्यम्, न तु लोपस्थानित्वेन, तस्य ''एकलोपे (चतुर्थस्य)'' (१६/१८) इत्यादिना पूर्वमेवोक्तत्वात्। {४५}

ननु सन्धिप चकात्मक इतिवत्तशरीराराम्भे कथं दशरूपकादिभेद इत्याशंक्याह **एवं ही**ति। हि यस्मात्, एवमुक्तेन विनियोगप्रकारेण सन्धयो भवन्ति ततो दशरूपभेद इति **केचिदा**शङ्कापूर्वकं व्याचक्षते, तच्चासत्, लक्ष्यभेदादेव दशरूपकभेदस्य दर्शितत्वात्। अवश्यं चैतत्, अन्यथा डिमसमवकारयोश्चतुःसन्धित्वाविशेषात् कथं भेदः स्यात्, नाटकादीनां वा, तस्मादुपसंहारग्रन्थो यमिति हीति। अङ्गानां कल्पं कल्पनाप्रकारो वा तेनैवांप्रायमन्यदपीतिवत्तोपयोगि भवति।

अङ्गानां सामान्यस्वरूपं प्रयोजनद्वारेण दर्शयितुं प्रथमेन स्वरूपं द्वाभ्यां प्रयोजनमेकेन द्वयं प्रकाशयन्नाह श्लोकषट्कं ''**सन्धीनां सम्बन्धीनि यानि वत्तानी**''त्यादि ''**शोभामेति न संशयः**'' इत्यन्तम्।

अर्थभागराशिः सन्धिरित्युक्तं, तत्र सन्धीनां संबन्धनीयानि **वत्तानि** संविधानखण्डानि। **अनुपूर्वश** इति मुख्यप्रयोजनसंपादनबलोपनतेन क्रमेण, न तु लक्षणनिरूपणप्रसङ्गपरिकल्पितेन, **प्रदेशेष्वा**दिमध्यान्तभागेषु वर्तनेनाङ्गानि, कुत इत्याह स्वस्याङ्गिनः सन्धेर्या संपत्तिर्निष्पत्तिः तत्र गुणवत्त्वे शेषभावे यतो युक्तान्युचितानि सन्धिसंपादकत्वादङ्गानीत्यर्थः।

अन्ये त्वाहुः– स्वसंपदो बीजोत्पत्त्युद्घाटनादिका गुणाश्च शब्दार्थवैचित्र्याणि, स्वसंपदां वा गुणाः तैरेव युक्तानीति। {४६-५०}

इष्टस्येत्यादिना प्रयोजनमाह। अभीष्टस्य प्रयोजनस्य रसास्वादकृतो **रचना** विस्तारणा। **वत्तान्तस्यानुपक्षयः** क्रमेण स्फुटत्वादयः शलाकाकल्पत्वाभावः एतत्प्रयोजनं सर्वसाधारणम्। प्रयोगस्येतिवत्तस्य स्वयं परस्परस्यापि रागप्राप्तिः र जनायोग्यत्वलाभः व्युत्पत्त्यस्थायोगात्, यदि वा पौनरुक्त्याद्याभासाद् ये गुह्याः संछादनीया अर्थाः तेषां संछादनम् {५१}। पुनः पुनः श्रुतमपि यदभिख्यानं इतिवत्तं तत एव नाश्चर्यकारि तदपि अङ्गयोजनायामपूर्वतामिव दधदद्भुततामेति, तदाह **आश्चर्यव**दिति। यच्च व्युत्पत्तौ सातिशयोपयोगि तत एव प्रकाश्यं तस्य प्रकाशनं विस्तारणम्, आद्यन्तु प्रयोजनं चमत्कारकृतं स्मतिदष्टमपि प्रत्यक्षविशेषसिद्धमेव, न तु सन्ध्योपासनादिवददष्टं, नापि पूर्वरङ्गाङ्गवदुभयरूपमित्यर्थः। **शास्त्र** इति नाट्यात्मके वेद इत्यर्थः। एषां प्रयोजनानामङ्गलक्षणेषूदाहरणं वर्णयिष्यामः। अत एव दष्टान्तेन द्रढयति। {५२}। अङ्गकर्तव्यसंपादनं **प्रयोगक्षम**मिति। ततः प्रयोजनस्यासंपत्तेर्दष्टस्य वा प्रत्युतासंभावनात् {५३}। एतद् व्यतिरेकद्वारेण स्फुटयति **उदात्तमपी**ति लक्षणगुणालङ्कृतियुक्तमित्यर्थः। प्रयोगस्येति अपादानमपि संबन्धित्वेन (षष्ठी), वक्षस्य पर्णं पततीति यथात्र। तस्य प्रयोगस्य तस्य काव्यस्य यतो हीनत्वं यदयोग्यत्वं यस्मात्, सतां परोपकारप्रवत्तानां कविनटानां साधुभूतानां वा सामाजिकानां मनो न र जयतीति संभाव्यते। अन्वयद्वारेणोपसंहरति **यदपि** इति। **हीनार्थ**मिति स्वल्पमपि प्रयोजनं प्रहसनानिदर्शितकथं चाधीत्यादि कथाख्यायिकादिकं प्रयोगः प्रयुक्तिः तत्राङ्गं प्रयोजकं र जनातिशयो व्युत्पत्त्यतिशयश्च तदुभयम्, तत्र काव्ये दीप्तं स्फुटमित्यर्थः। {५४-५६}

अथाङ्गानामुद्देशमाह **उपपेक्षः परिकर** इत्यादिना **एतान्यङ्गानि सन्धिषु** (६७) इत्यन्तेन। मुखे द्वादश, प्रतिमुखे गर्भे च त्रयोदश, अवमर्शे द्वादश, निर्वहणे चतुर्दशेति मिलित्वा चतुःषष्टिः।

केचिन्मन्यते– इह उपक्रम उपसंहारो मध्यमिति प्रत्यवस्थं स्थानभेदत्रयं, तत्र प्रत्येकं सूक्ष्मेणारम्भावस्थाप चकेन भाव्यमिति प च दश्यो दशाः क्रमभाविन्यः, तत्राद्यास्तावद्दशानामङ्गत्वेन वर्ण्यन्ते। अङ्गिबुद्ध्युदयात्। तत्रेति चतुर्दश निर्वहणे फलयोगबलात् सर्वा एवोपपाद्यन्ते। अन्यत्र तु मुखादौ काश्चिल्लीनीक्रियन्ते, न द्वादशादिभेदानि तत्राङ्गानीति। तदेतदसत्। एवं हि वक्ष्यमाणेषु तेनैव क्रमेण भाव्यम्। न चासावस्ति प्रयोजनशङ्काषट्कं ततश्चानुपपन्नं स्यात्, अनुपक्षय इत्येकमेव हि प्रयोजनं भवेत्। बीजकरणे पि च नियमनिदानानुपपत्तौ द्वयोर्द्वादश द्वयोस्त्रयोदशेति कुतस्त्यो विभाग इत्यास्तामदः। {५७-६८}

पुनरेषामिति। पुनश्शब्दो विशेषद्योतकः, लक्षण एवायं क्रमो न निबन्धन इति यावत्। तेन **यदुद्भट**प्रभतयो ङ्गानां सन्धौ क्रमे च नियममाहुस्तद्युक्त्यागमविरुद्धमेव। तथा हि– 'संप्रधारणमर्थानां युक्तिरित्यभिधीयते' इति यन्मुखसन्धौ प चममङ्गं वक्ष्यति तत्सर्वेषु सन्धिषु तावन्निबन्धनयोग्यं, न च तथा निवेश्य बध्यमानमदष्टकृतं विदध्यात्। न च लक्ष्येन

दश्यते। **वेणीसंहारे** हि ततीये ङ्के गर्भसन्धौ दुर्योधनकर्णयोर्महति संप्रधारणे **द्रोणवधे** वत्ते–

तेजस्वी रिपुहतबन्धदुःखपारं
बाहुभ्यां तरति धतायुधप्लवाभ्याम्।
आचार्यः सुतनिधनं निशम्य संख्ये
किं शस्त्रग्रहसमये विशस्त्र आसीत्।।

इत्यादि यावत्–

दत्त्वाभयं सो तिरथो हन्यमानं **किरीटिना**।
सिन्धुराजमुपेक्षेत नैवं कथमन्यथा।। इति।

न चात्र प्रीतिव्युत्पत्त्योः क्षतिः काचित्। यत्तु सन्धिनैयत्येनाभिधानं तत्र सन्धाववश्यंभावित्वख्यापनार्थं युक्तिर्मुखे भवत्येव। सन्ध्यन्त**राला**नि तु नेत्थमिति पथक् तानि वर्णयिष्यन्ते। कानिचित्त्वङ्गानि स्वरूपबलादेव नियमभाि ज, यथोपक्षेपो मुखसन्धावेव प्रथममेव च। न ह्यनुपक्षिप्ते वस्तुनि किि चदमि शक्यक्रियम्। यत्तूच्यते 'चतुःषष्ट्यङ्गसंयुत' (**१६.१३६**)मिति तेन संभवमात्रमेषामुक्तं, न तु नियमः। यथासन्धि तु कर्तव्या (**१६.१०४**) इति वचनं प्रत्युत सन्ध्यौचित्येनैषां निबन्धनमभिदधदस्मदभिहितनीति––पथोपदेश्येव, योग्यतार्थवत्तिना हि यथाशब्देनायमव्ययीभावः।

यत्तूक्तं शरीराङ्गनियमदर्शनात् कथमेतदिति, तत्रापि दष्टान्ताद् व्यवस्थापि तु न संभवतः स चास्तीत्युक्तं, शाखादयश्च वक्षावयवा मध्ये पि ब्रध्ने प्यूर्ध्वे पि भवन्ति, न च शरीर पादपादिवदुपेक्षपादिभिरवयवविकल्पः सन्धिरारभ्यते, यच्च प्रतिसन्ध्यभिधानं तद्बाहुल्येन तथा दर्शनात्। तथा हि उपक्षिप्ते र्थे विस्तारिते निश्चितगुणादभिलषिते संभावनीयमुपायादिविषयं संप्रधारणमित्युपक्षेपपरिकरपरिन्यासविलोभनहेतुत्वादन्यान्यभिधाय युक्तिरक्ता, न तु तत्रैव सद्भावात्। आनन्तर्यनियमश्च मुनेरनभिमतो लक्ष्यते। अन्यथा सन्ध्यन्तरालानि सामादीनि मदान्तान्येकविंशतिः, लास्याङ्गानि गेयपदादीनि दश यानि वक्ष्यन्ते, तेषां कुत्र निवेशः स्यात्। सन्धिप चकमयं हि रूपकं क्रमनियतं, तदङ्गसंहारभावितश्च सन्धिरिति, न च क्रमेणानेनैव तानि प्रयोज्यानीति वचनमस्ति। सदपि वा न्यायापेतमन्यथा योज्येत। न चोद्देशक्रममनूच्यते निबन्धं, लक्षणालङ्कार––गुणवीथ्यङ्गसन्ध्यतराणि लास्याङ्गवत्तितदङ्गान्यपि तु साधर्म्यदष्टान्तः। तदेतत्प्रत्येकं लक्षणे स्फुटीभविष्यतीत्यास्तां तावत्।

१. **उपक्षेपः**- तत्र प्रस्तावना न तावद्रूपकाङ्गं नटवत्तव्याप्ततयेतिवत्तानन्तु प्रवेशात्। **इति** तदनन्तरं पूर्वं, **काव्यार्थ** इति वत्तशरीरलक्षणो भिधेयः प्रधानरसलक्षणं च प्रयोजनसंक्षेपेणोपक्षिप्ये। यथा **वेणीसंहारे** भीमः–

लाक्षागहानलविषान्नगहप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहत्य।

आकृष्य पाण्डववधूपरिधानकेशान्
स्वस्था भवन्तु कुरुराजसुताः सभत्याः।। (१.६) इति {**६६**}

२. **परिकरः**- तत ईषद् विस्तार्यते (परिकरः) यथा भीमः–

प्रवद्धं यद्वैरं मम खलु शिशोरेव कुरुभि–
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम्।
जरासन्धस्योरस्तलमिव विरूढं पुनरपि
क्रुधा भीमः सन्धिं विघटयति यूयं घटयत।। (**वेणी**.१–१०)

३. **परिन्यासः**- ततो पि निश्चयापत्तिरूपतया परितो हृदये सो र्थोन्यस्यते (परिन्यासः)। यथा–

च चद्भुजाभ्रमितचण्डगदाभिघात–
संचूर्णितोरुयुगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणि–
रुत्तंसयिष्यति कचांस्तव देवि भीमः।। (१–२१) इत्यादि। {**७०**}

४. **विलोभनम्**- ततस्तदेव गुणवदिति श्लाघ्यते, श्लाघैव विलोभनहेतुत्वा**द्विलोभन**म्। यथा – द्रौपदी– अणुगिह्णन्तु मए एदं वअणं देवदाओ (अनुगह्णन्तु मे एतद्वचनं देवताः) इत्यादि। यथा वा **विक्रमोर्वश्यां**–

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथं नु विषयव्यावत्तकौतूहलो
निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः।। (१.८) इत्यादि।

तदेतदुपक्षेपाद्यङ्गचतुष्कं प्रायशो मुखसन्धौ भवति। उक्तेनैव (क्रमेण) न पौर्वापर्येण भवति। आनन्तर्यनियमस्तु नास्ति सन्ध्यन्तराणां सामादीनां मध्ये नुप्रवेशात्। तदेतदाह **मुनिः काव्यार्थस्य समुत्पत्ति**रित्यादिना **विलोभनमिति स्मत**मित्यन्तेन तत्र वत्तान्ते नोपक्षयः सर्वेषां प्रयोजनमित्युक्तम्। परिकरस्य प्रयोजनमिष्टार्थस्य रचनापि।

५. **युक्ति**र्यथा– 'सहदेवः– आर्य, किं महाराजसन्देशो यं आर्येणाव्युत्पन्न एव गहीतः' इत्यतः प्रभति यावद्भीमवचनम्–

युष्मान् ह्रेपयते क्रोधाल्लोके शत्रुकुलक्षयः।
न लज्जयति दाराणां सभायां केशकर्षणम्।। (१–१७) इति।

अस्याः प्रयोजनं प्रकाश्यप्रकाशनमपि। {**७१**}

६. **प्राप्तिः- सुखार्थस्याभिगमनं प्राप्ति**रिति। सुखयतीति सुखं तादशस्य वस्तुनः। यथा **(वेण्याम्)**- ''एष खलु भगवान् वासुदेवः पाण्डवपक्षपातामर्षितेन सुयोधनेन संयमितुमारब्धः'' इत्यादि ''कुमारमविलम्बितं द्रष्टुमिच्छामी''ति। ''अयं ह्यर्थो भीमस्य चेतः सुखय''तीति सन्धेर्विघटनात् (प्राप्तिः)।

७. **समाधनम्- बीजार्थस्योपगमनमिति।** यस्मिन् बीजं तदिदानीं प्रधाननायकानुगतत्वेन सम्यगाहितं भवतीति (समाधानम्)। ''**यौधिष्ठिर**'' मित्यनेन समाधानं दर्शितम्। {**७२**}

८. **विधानम्- सुखदुःखकृतो यो र्थस्तद्विधान**मिति। व्यामिश्रतया सुखदुःखे अभिधीयते यत्रेति, (विधानम्)। यथा–

भीमः– तत्पा चालि गच्छामो वयमिदानीं कुरुकुलक्षयाय।

द्रौपदी– णाह जं असुरसमराहिमुहस्स हरिणो मङ्गलं तं तुंहाण होदु– (नाथ, यदसुरसमराभिमुखस्य हरेर्मङ्गलं तत्तव भवतु) इत्यादि (अ १) तथा– ''मा अनवेक्खिदसरीरा संचरह, अप्पमत्तसंचारिणिज्जाइं रिपुबलाइं– (मा अनपेक्षितशरीराः संचरथ, अप्रमत्तसंचरणीयानि रिपुबलानि)'' इति। अत्र द्रौपद्याः प्रहर्षो भयं च मिश्रतया विहितमिति विचित्रत्वाद् रसवत्ता भवति। तेनेष्टस्यार्थस्य रचना, तथा निगूह्यस्य नायिकाचित्तनिस्त्रिंशभावस्य निगूहनं प्रयोजनम्। एवमन्यत्रापि प्रयोजनमुत्प्रेक्ष्यम्। युक्तिवच्चेदमन्यत्रापि संभवत्येवेत्येवमन्यत्राप्यूह्यम्।

९. **परिभावना**– कुतूहलेति कौतुकेन जिज्ञासातिशयेन व्यामिश्रो य आवेगः सा परिभावना किमेतदिति। यथा– संग्रामं संधिविघटनादाशंसमाना द्रौपदी तूर्यशब्दं श्रुत्वाह– ''णाह किं दाणिं एसो पळअंतजळहरत्थणिदमंसळो खणे खणे समरदुन्दुभी ताडीअदि– (नाथ किमिदानीमेष प्रलयान्तजलधरस्तनितमांसलो क्षणे क्षणे समरदुन्दुभिस्ताड्यते)'' इति {**७३**}

१०. **उद्भेदः- बीजार्थस्य प्ररोह** इति। यथा– **द्रौपदी**– हा णाह पुणो वि तुए अहं समस्ससइदव्वा (हा नाथ, पुनरपि त्वयाहं समाश्वसयितव्या)

भीमः– भूयः परिभवक्लान्तिलज्जाबन्धुरिताननम्।

अनिश्शेषितकौरव्यं न पश्यसि वकोदरम्।। (१.२६) इति।

न चेदमुद्घाटनं येन प्रतिमुखं भवेत्, अपि तु शत्रुक्षयारम्भ बीजस्योद्घाटनेन विनापि प्ररोहमात्रमवस्थानमानुगुण्यात् भूमिसंश्लेष इव।

११. **करणम्- प्रकृतार्थसमारम्भः करण**मिति। यथा–

सहदेवः– गच्छामो वयमिदानीं गुरुजनानुज्ञाता विक्रमानुरूपमाचरितुम्, इत्यादि (**वेणी**–१)। {**७४**}

१२. **भेदः- संघातभेदनार्थो यः स भेद** इति। पात्रसंघातस्य यन्निप्रयोजनोपक्षेपेण निष्क्रमणसिद्धये भेदनं विकिरणमिव स भेदः। सर्वत्राङ्के न्तर्भावी वस्तूपायात्मा भेदः, स सन्ध्यन्तरैकविंशतो वक्ष्यते। अस्योदाहरणं– (**वेणी**॰१–२७भीमवाक्यम्) ''अन्योन्यास्फालभिन्न'' इत्यादि यावत् ''पाण्डुपुत्राः'' इति। {**७५**}

अथ प्रतिमुखोद्दिष्टानामङ्गानामुद्देशक्रमेण लक्षणमाह

१३. **विलासः- समीहा रतिभोगार्थ विलास** इति। रतिलक्षणस्य भावस्य हेतुभूतो यो भोगो विषयः प्रमदा पुरुषो वा तदर्था या समीहा स विलासः। कामफलेषु रूपकेषु प्रतिमुख एव ह्यास्थावत्त्वेन रतिरूपेण भाव्यम्। यथा**भिज्ञानशाकुन्तले**–

तापसः– कस्येदमुशीरानुलेपनमित्यादि। तथा राजा–

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाश्वासि।

अकृतार्थे पि मनसिजे रतिमुभयप्रार्थना कुरुते।। (२.१) इत्यादि।

यस्तु **वेणीसंहारे** भानुमत्या सह दुर्योधनस्य दर्शितो विलासः, स नायकस्य तादशे वसरे त्यनुचित इति चिरन्तनैरेवोक्तम्। यथा **सहृदयालोककारः**-

सन्धिसन्ध्यङ्गघटनं रसबन्धव्यपेक्षया।

न तु केवलशास्त्रार्थस्थितिसंपादनेच्छया।। (**ध्वन्यालोक**३.१२)

एतच्च विवरण एवास्माभिर्वितत्य दर्शितम्।

इह च रतिग्रहणं पुमर्थोमयोगिरसगतस्थायिभावोपलक्षणं तेन वीरप्रधानेषु रूपकेषु उत्साहविषया सम्यगीहा चेष्टाविलास इति मन्तव्यम्।

युक्तचैतन्य एव हि रसो मुख उपक्षिप्तः। तस्यैव स्वयं प्रतिमुखस्वोचितारम्भसंभावितः कर्तव्यः। लस श्लेषणे पि हि पठ्यते।

१४. **परिसर्पः- दष्टनष्टानुसरणं परिसर्प** इति। यथा क चुकी– ''आशस्त्रग्रहणादकुण्ठपरशोः'' (**वेणी**॰२/२) इत्यादि। दष्टनष्टप्रायो हि कार्यान्तरव्यासङ्गात्। कुरुकुलक्षयो भीष्मवधेन अस्थानपरितोषसूचितेन च दुर्योधनस्यायुक्तचेष्टितत्वेनानुसत इति प्रकृतस्यार्थस्य परिसर्पणात् प्रसरणात् परिसर्पः। यथा **चाभिज्ञानशाकुन्तले** भवितव्यमत्र तया। तथा हि–

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात्पश्चात्।

द्वारे स्य पाण्डुसिकते पदपङ्क्तिर्दश्यते हि नवा।। (३–७) इति। {**७६**}

१५. **विधूतम्- कृतस्यानुनयस्येति**। आदौ प्रथमतः, कृतस्यानुनयस्य सामवचसो नङ्गीकरणं विधूतं, पश्चात् पुनरङ्गीकरणमिति आदिशब्दात् यथा– तत्रैव– शकुन्तला– अइ किं अंतेउरविरहपय्युस्सुएण राएसिणा अवरुद्धेण– इत्यादि।

१६. **तापनम्- अपायदर्शनं यत्तु तापन**मिति। यथा **रत्नावल्याम्**–

दुल्लहजणाणुराओ लज्जागरुई परवस्सो अप्पा।

पिअसहि विसमं पेम्पं मरणं सरणं णवरमेक्कम्।। (**रत्नावली** २–१) {**७७**}

१७. **नर्म**– क्रीडार्थं विहितं यत्तु हास्यं नर्मेति। यथा (**रत्नावल्यां** द्वितीये ङ्के) विदूषकः– भो मा पांडिच्चगव्वं उव्वह, अहं एदाए मुहादो सणिअ वक्खाणइस्सं– (भो मा पाण्डित्यगर्वमुद्वह। अहं एतस्या मुखात् श्रुत्वा व्याख्यास्यामि) इत्यादि।

१८. **नर्मद्युतिः- दोषप्रच्छादनार्थं तु हास्यं नर्मद्युति**रिति। दोषो येनोक्तेन प्रच्छादयितुमिष्यते तस्यापि हास्यजननत्वेन नर्म च सुतरां द्योतितं भवतीति नर्मद्युतिः। यथा च (**रत्नावल्यां** द्वितीये ङ्के विदूषकः)– चउव्वेई विअ बम्हणो रियाओ पढिउं पवुत्ता। (चतुर्वेदी ब्राह्मण इव ऋचः पठितुं प्रवत्ता।) इत्यभिहिते

राजा– नावधारितं मया

ततो विदूषकः दुल्लहजणाणुराओ

इति पठति। अत्र हि मौर्ख्यदोषं छादयितुं यद्विदूषकेणोच्यते तद्राज्ञो हास्यजननमिति नर्मैव द्योतितं भवति। तथा हि राजा– महाब्राह्मण को न्य एवमचामभिज्ञः– इति। {७८}

१९. **प्रगयणम्- उत्तरोत्तरवाक्यं तु भवेत्प्रगयण**मिति। (यथा **रत्नावल्यां** द्वितीये ङ्के) विदूषकः– किं णु खु दाणिं गाधेयम् (किं नु खलु इदानीं गाथेयम्)।

राजा– कयापि श्लाघ्यनवयौवनया प्रियतममनासादयन्त्या जीवितनिरपेक्षयेदमुक्तम्। विदूषकः भो किं एदे हिं (वक्कणभणिदेहिं) (भोः किमेतैः वक्रभणितैः।) इत्यादि। प्रगयणमिति रूढिशब्दः।

अन्ये तु प्रजाशब्दात् विचिकित्सायन शता क्विना व्युत्पत्तिं कल्पयन्ति। प्रागयणमित्यन्ये पठन्ति– प्रागिति पूर्ववचनं ततो यनं प्राप्तिं यस्योत्तरवचनस्येति।

२०. **निरोधः- या तु व्यसनसंप्राप्तिः स निरोध** इति। (यथा **रत्नावल्यां** द्वितीये ङ्के) राजा ''उच्चैर्हसता त्वयेयं त्रासिता'' (इति), व्यसनमत्र खेदमात्रमभीष्टोपरोधान्निरोधः। {७९}

२१. **पर्युपासनम्- क्रुद्धस्यानुनयो यस्त्वि**ति। यथा– (तत्रैव) विदूषकः– भो मा कुप्प एसा खु कदलीघरं एव्व गद इत्यादि। राजा अनुनीतः सन्नाह–

दुर्वारां कुसुमशरव्यथां वहन्त्या
कामिन्या यदभिहितं पुरः सखीनाम्।
तद्भूयः शुकशिशुसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति।। (**रत्नावली** २/७) इत्यादि।

२२. **पुष्पम्- विशेषवचनं यत्तु पुष्प**मिति। यथा (तत्रैव विदूषकः)– एसो को वि चित्तफळहओ (एष को पि चित्रफलकः) –इत्यादि विदूषकोक्तेः प्रभति यावत् ''परिच्युतस्तं कुचकुम्भमध्यात्'' (**रत्नावली** २/१५) इत्यादि। यथा हि प्रेमविकासि पुष्पं भवत्येवमत्रापि राज्ञ उत्तरोत्तरानुरागविशेषसूचकं वचो विकासमस्यानुरागस्य दर्शयति। तथा हि सुसङ्गता– सहि गरुआणुरागविक्खित्तहिअओ असंबद्धं भट्टा मंतेदुं पवुत्तो (सखि गुर्वनुरागविक्षिप्तहृदयो संबद्धं भर्ता मन्त्रितुं प्रवत्तः) इत्यादि। {८०}

२३. **वज्रम्- प्रत्यक्षरूक्षं यद्वाक्यं वज्र**मिति। यथा (तत्रैव)– ''कथमिहस्थो हं भवत्या ज्ञात'' इति राजन्युक्तवति सुसङ्गता– ण केवलं तुमं, चित्तफलहेण। ता जाव

गदुअ देवीए णिवेदेमि। (न केवलं त्वं, चित्रफलकेण। तद्यावद्गत्वा देव्यै निवेदयामि।)

२४. **उपन्यासः- उपपत्तिकृतो यो र्थ उपन्यास** इति। यथा (तत्रैव) विदूषकः (ससाध्वसं) अदिमुहरा खु एसागब्भदासी (अतिमुखरा खल्वेषा गर्भदासी)। अत्र मौखर्यात्मिकोपपत्तिरुपन्यस्ता। {८१}

२५. **वर्णसंहारः- चातुर्वर्ण्योपगमनं वर्णसंहार** इति। चातुर्वर्ण्यशब्देन पात्राण्युपलक्ष्यन्ते। तेन यत्र पात्राणि पथक् स्थितान्यपि ढौक्यन्ते स वर्णसंहारः। **उपाध्यायास्त्वाहुः**– इह वीरप्रधाने तावन्नायकप्रतिनायकौ तत्सचिवौ च प्रधानत्वेन वर्ण्यन्त इति वर्णाः, कामप्रधाने पि नायको नायिका तत्सचिवौ चेति। तथा हि **रत्नावल्यां** (द्वितीये ङ्के) सुसङ्गताया वचनात्– ''अदो मे अअं गरुओ पसाओ (अतो ममायं गुरुः प्रसादः)'' इत्यारभ्य, **राजा**– क्वासौ। सुसङ्गता– हत्थे गेण्हिअ सहिं पसाएहि णं (हस्ते गहीत्वा सखीं प्रसादयैनाम्)– इत्यादि। अत्र चतुर्णामेकीभावे रागप्राप्तिः इष्टस्य रचना, प्रकाश्ये प्रकाशनमित्यपि प्रयोजनानि। यत्तु ब्राह्मणादिवर्णचतुष्टयमेलनमिति तदफलत्वादनादत्यमेव।

अथ गर्भाङ्गान्युद्देशक्रमेण लक्षयति।

२६. **अभूताहरणम्- कपटापाश्रयं वाक्यमभूताहरण**मिति। यथा वासवदत्तया चित्रफलके दष्टे **विदूषक**वचनं– अप्पा किल दुक्खेण आलिहीअदि त्ति मम वअणं पिअवयस्सेण विण्णाणं दंसिअं (आत्मा किल दुःखेनालिख्यत इति मम वचनं श्रुत्वा प्रियवयस्येन विज्ञानं दर्शितम्)– इत्यादि। {८२}

२७. **मार्गः- तत्त्वार्थवचनं मार्ग** इति। (तत्रैव) ''भट्टिणि कदा वि घुणक्खरं वि संभाविअदि (भर्त्रि कदापि घुणाक्षरमपि संभाव्यते)'' इति का चनमालयोक्ते वासवदत्ता अपवार्य परमार्थोचितं वचनमाह – अइ उज्जुए वसन्दओ खु एसो (अयि ऋजुके वसन्तकः खल्वसौ)– इत्यादि मार्गवच्च प्रसिद्धत्वात् परमार्थे मार्ग इति व्यपदेशः।

२८. **रूपम्- चित्रार्थसमवाये तु वितर्को रूप**मिति। यथा (**रत्नावल्यां** द्वितीये ङ्के) राजा– ''प्रसीदेति ब्रूयामिदमसति कोपे न घटते।'' इत्यादि विचित्रार्थानां समवाये संभावने सर्वविषय एव विरुद्धस्तर्कः, इदं नोचितमिदं नोचितमिति प्रतियुक्तिपर्यन्तः। युक्तिस्तु नियतप्रतिपत्तिपर्यन्तेति विशेषः, रूपमिति चानियता आकृतिरुच्यते। तत्राविशेषप्रतिपत्तिः इहापि तथोपचाराद् व्यपदेशः। {८३}

२९. **उदाहरणम्- यत्सातिशयवद्वाक्यं तदुदाहरण**मिति। लोकप्रसिद्धवस्त्वपेक्षया यत् सातिशयमुच्यते उत्कर्षमाहरतीत्युदाहरणम्। यथा (तत्रैव ततीये ङ्के)–

मनः प्रकृत्यैव चलं दुर्लक्ष्यं च तथापि मे।
कामेनैतत्कथं विद्धं समं सर्वैः शिलीमुखैः।। (**रत्नावली** ३/२) इति।

तथा च

बाणाः प च मनोभवस्य नियतास्तेषामसंख्यो जनः
प्रायो स्मद्विध एव लक्ष्य इति यल्लोके प्रसिद्धिं गतम्।
दष्टं तत्त्वयि विप्रतीपमधुना यस्मादसंख्यैरयं
विद्धः कामिजनः शरैरशरणो नीतस्त्वया प चताम्।। (**रत्नावली** ३/३) इत्यादि।

३०. **क्रमः- भावतत्त्वोपलब्धिस्तु क्रम** इति। भावस्य भाव्यमानस्य वस्तुनो भावनातिशये सति, ऊहप्रतिभाभावनादिबलात् या परमार्थोपलब्धिः सा क्रमः। बुद्धिर्हि तत्र क्रमते न प्रतिहन्यते। यथा (तत्रैव)–

ह्रिया सर्वस्यासौ हरति विदितास्मीति वदनं
द्वयोर्दष्ट्वालापं कलयति कथामात्मविषयाम्।
सखीषु स्मेरासु प्रकटयति वैलक्ष्यमधिकं
प्रिया प्रायेणास्ते हृदयनिहितातङ्कविधुरम्।। (**रत्नावली** ३/४) इत्यादि। {८४}

३१. **संग्रहः- सामदानादिसंपन्नः सङ्ग्रह** इति। साम्ना सङ्केतादिवार्ताः श्रुत्वा (राज्ञा विदूषकाय) कटकस्य दानम्। एवमन्यदपि।

३२. **अनुमानम्- रूपानुरूपगमन**मिति। रूप्यमानेन प्रत्यक्षाद्युपलभ्यमानेन रूपस्य व्यापकस्याविनाभाविनो गमनं ज्ञानमनुमानं निश्चयात्मकत्वा दूहरूपाया युक्तेरन्यत्वात्। यथा–

पालीयं चम्पकानां नियतमयमसौ सुन्दरः सिन्दुवारः
सान्द्रा वीथी तथेयं बकुलविटपिनां पाटला पङ्क्तिरेषा।
आघ्रायाघ्राय गन्धं विविधमधिगतैः पादपैरेवमस्मिन्
व्यक्तिं पन्थाः प्रयाति द्विगुणतरतमोनिह्नतो प्येष चिह्नैः।। (**रत्नावली**३/८)

अत्र, 'आघ्रायाघ्राय गन्धं विविधमधिगतैः पादपैरेवमस्मिन्' इति गन्धानीति कुसुमानि तेभ्यः पादपाः, तेभ्यो पि मार्गाभिव्यक्तिरिति **राज्ञा विदूषक**स्योक्तेः। {८५}

३३. **प्रार्थना- रतिहर्षोत्सवानां तु प्रार्थना प्रार्थनेति।** एतत साध्यफलोचितभावलक्षणं, तत्र साध्यफले यः प्राधान्येन समुचितो भावस्तद्विषया या प्रकर्षेणार्थना सा प्रार्थनाख्यमङ्गम्। यथा (तत्रैव)– संकेतस्थः प्रतिपालयन् राजा–

तीव्रः स्मरसन्तापो न तथादौ बाधते यथासन्ने।
तपति प्रावषि नितरामभ्यर्णजलागमो दिवसः।। (**रत्नावली** ३/१०) इति।

३४. **आक्षिप्तिः- गर्भस्योद्भेदनाक्षिप्ति**रिति। हृदयान्तःस्थितं (तस्य) पुनः प्रतिष्ठापितस्यापि यत् कुतश्चिन्निमित्तादुद्भेदनमनपह्नवनीया स्फुटतापत्तिः सा आक्षिप्तिः, अभिप्रायस्य हि तत्राक्षेपो बहिः कर्षणं। वासवदत्तायामेव सागरिकेति

राज्ञा विदूषकेण च परिगहीतायां तदुक्तिषु ''सागरिके, शीतांशुर्मुखमुत्पले तव दशौ'' (**रत्नावली** ३/११) इत्यादिषु। {८६}

३५. **तोटकम्- संरम्भवचनं चैव तोटक**मिति। आवेगगर्भं यद्वचनं तत्तोटकम्। स चावेगो हर्षात् क्रोधात्, अन्यतो पि वा। भिनत्ति यतो हृदयं ततस्तोटकम्। यथा (तत्रैव) विदूषकः– अज्ज वि दाव से देवीए णिच्चरुठ्ठाए वासवदत्ताए वअणेहि कडुइदा कण्णा सुहावीअदु (अद्यापि तावत्तस्या देव्या नित्यरुष्टाया वासवदत्ताया वचनैः कटूकृते कर्णे सुखय) इत्यादि।

३६. **अधिबलम्- कपटेनातिसन्धानमधिबल**मिति। परस्परव चनप्रवत्तयोर्यस्यैवाधिकं (कर्म) सहायबुद्ध्यादीनवलम्बयति स एव तमतिसन्धातुं व चयितुं समर्थ इति तदिदं कर्माधिबलम्। यथा– **सागरिका**वेषं धारयन्ती वासवदत्ता विदूषकबुद्धिदौर्बल्याद्राजानमतिसंधत्ते 'किं पद्मस्य रूचिं न हन्ति (**रत्नावली**३/१३) इत्यादि श्लोकान्तमधिबलम्। {८७}

३७. **उद्वेगः- भयं नपारिदस्यूत्थमुद्वेग** इति। अरिशब्दान्नायिकादि। यथा (तत्रैव) राजा– कथं देवी वासवदत्ता, वयस्य किमेतत्। विदूषकः– णं अम्हाणं जीविअसंसओ (ननु अस्माकं जीवितसंशयः)– इत्यादि।

३८. **विद्रवः- शङ्का भयत्रासकृतो विद्रव** इति। भयत्रासकारिणो वस्तुनो या शङ्का यदाशङ्कनं स विद्रवः, विद्रवति विलीयते हृदयं येनेति। यथा (तत्रैव)–

प्रिया मु चत्यद्य ध्रुवमसहना जीवितमसौ
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति।। (**रत्नावली**३/१५उत्तरार्ध)

इति।

अन्ये तु शङ्काभयत्रासैः कृतो यः स विद्रव इति। तत्र च विशेष्यपदमन्वेष्यम्, समुदाय एव विशेष्य इति **श्रीशङ्कुकः**, उदाहरति च **कृत्यारावणे** षष्ठे ङ्के गर्भसन्धौ, (नेपथ्ये) (मन्दोदरी)– अय्यउत्त परित्ताआहि परित्ताआहि (हा आर्यपुत्र परित्रायस्व परित्रायस्व) प्रतीहारी। (श्रुत्वा आत्मगतं)– अंहो भट्टिणी विअ आक्कंददि।) (अंहो भर्त्रीवाक्रन्दति) (प्रकाशं) भट्टा भवदो अन्तेउरे महंदो कलकलो सुणीअदि। (भर्तः भवतो न्तःपुरे महान् कलकलः श्रूयते)

राजा– ज्ञायतां किमेतदिति।

अत्र रावणस्याशङ्का प्रतिहार्यास्त्रासभये। {८८}

अथावमर्शसन्धावङ्गानां लक्षणमाह–

३९. **अपवादः- दोषप्रख्यापनं यत्तु सो पवाद** इति। यथा (तत्रैव) सागरिकोक्तेरनन्तरं राजा– अयि मिथ्यावादिनी खल्वसि–

श्वासोत्कम्पिनि कम्पितं स्तनयुगं मौने प्रियं भाषितं
वक्त्रे स्याः कुटिलीकृतभ्रुणि रुषा यातं मया पादयोः।

इत्थं नः सहजाभिजात्यजनिता सेवैव देव्याः परं
प्रेमाबद्धविवर्धिताधिकरसा प्रीतिस्तु या सा त्वयि।। (**रत्नावली**३/१८) इति

अत्र देवीगुणानां सातिशयकोपनत्वेनापवदनं कृतम्।

४०. **संफेटः- रोषग्रथितवाक्यं तु संफेट इति। केचित्तु** स्फोट अनादर इति धातुं मनस्कृत्य संस्फोट इति पठन्ति। यथा (तत्रैव)– वासवदत्ता (सरोषं सहसोपसत्य) अय्यउत्त, जुत्तं.....सरिसं (आर्यपुत्र, युक्तं, सदशम्)..... इत्यादि। {**८६**}

४१. **द्रव- गुरुव्यतिक्रमो यस्तु स द्रव** इति। यथा (तत्रैव)– भर्तसंनिधाने पि विदूषकस्य सागरिकायाश्च **वासवदत्तया** बन्धनम्। यथा वा– **तापसवत्सराजे** षष्ठे ङ्के वासवदत्ताया यौगन्धरायणवचनातिक्रमेण मरणाध्यवसायः। द्रवणं चलनं मार्गादिति **द्रवः**।

४२. **शक्तिः- विरोधिप्रशमः शक्ति**रिति। विरोधिनः कुपितस्य प्रशमः प्रसादनं शक्तिः बुद्धिविभवादिशक्तिकार्यत्वात्। यथा (तत्रैव)–

सव्याजैः शपथैः प्रियेण वचसा चित्तानुवत्त्या भशं
वैलक्ष्येण परेण पादपतनैर्वाक्यैः सखीनां मुहुः।
प्रत्यापत्तिमुपागता मम तथा देवी रुदत्या तथा
प्रक्षाल्यैव तथैव बाष्पसलिलैः कोपो पनीतः स्वयम्।। (**रत्नावली**४/१)

इत्यादि। {**६०**}

४३. **व्यवसायः- व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतु**संभव इति। प्रतिज्ञातस्याङ्गीकृतस्यार्थस्य हेतवो ये तेषां संभवः प्राप्तिर्व्यवसायः। यथा (तत्रैव)– ऐन्द्रजालिकप्रवेशादितो यावत् ''एक्को उण खेल ओ अवस्सं पेक्खितादव्वो'' इति तावत् **यौगन्धरायणेन** यत्कर्तुमङ्गीकृतं तस्यैव हेतोः (तस्य) प्राप्तिः।

४४. **प्रसङ्ग- प्रसङ्गश्चापि(श्चैव?) विज्ञेयो गुरूणां परिकीर्तन**मिति। यथा (तत्रैव) वासवदत्ता– उज्जयणीदो आअदोत्ति अत्थि मे तस्सि इन्दआळिए पक्खवादो (उज्जयिन्या आगत इति अस्ति मे तस्मिन्निन्द्रजालिके पक्षपातः)– इत्यादि। अत्र हि बन्धुकुलादागमो स्य बहुमानकारणम्। {**६१**}

४५. **द्युतिः- वाक्यमाधर्षसंयुक्तं द्युतिरिति।** आधर्षो न्यक्कारः तेन संयुक्तम्। यथा विदूषकः– हा दासीए उत्त इन्दआलअि (आः दास्याः पुत्र इन्द्रजालिक), इत्यादि।

४६. **खेदः- मनश्चेष्टाविनिष्पन्नः श्रमः खेद** इति मानसः का**यीय**श्चेत्युभयो पि यावत्। आद्यो यथा– सिंहलेश्वरस्य कुशलप्रश्ने यथा वसुभूतिर्निःश्वस्य ''देव न जाने किं कथयामि'' इत्यत आरभ्य रत्नावल्याः समुद्रपतनाकर्णनोदित**वासवदत्ता**विलाप–
–पर्यन्तम्। शारीरस्तु खेदः (**विक्रमोर्वश्याम्**) पुरूरवा ''अहो श्रान्तो स्मि यावदस्या गिरिनद्यास्तीर'' इत्यादि।

यद्यपि श्रमोद्वेगवितर्कलज्जाप्रभतयो व्यभिचारिवर्गे पूर्वमुक्तास्तथाप्येते सत्यवसरे वश्यप्रयोज्याः प्रागुक्तप्रयोजनार्थसिद्धये, ते पथक्प्रयोजनत्वात् सन्ध्यङ्गत्वेनोक्ता मन्तव्याः। {६२}

४७. **प्रतिषेधः- ईप्सितार्थप्रतीघातः प्रतिषेधः** इति। यथा **रत्नावली**वत्तान्तवर्णने ईप्सितार्थे बाभ्रव्येण प्रस्तुते तस्य प्रतीघातो न्तःपुरदाहेन।

४८. **निरोधनम्- कार्यात्ययोपगमनं निरोधन**मिति। यथा राजा– ''कथमन्तःपुरे ग्निः। हा हा धिक्कष्टं दग्धा देवी वासवदत्ता'' इत्यादि यावत् सागरिकोत्सादनपर्यन्तम्। अत्र हि कार्ये वासवदत्ता सागरिकां प्रति विस्रम्भस्यात्ययो विनाशः उपगतः प्राप्तः। {६३}

४९. **आदानम्- बीजकार्योपगमनमादान**मिति बीजफलस्य– समीपताभवनमित्यर्थः। यथा सागरिका राजानं दष्ट्वा (स्वगतं) 'अय्यउत्त' इत्यादि, अत्र हि बन्धुकुलादागमो यावद्राज्ञ उक्तिः–

व्यक्तं लग्नो पि भवतीं न धक्ष्यति हुताशनः।
यतः सन्तापमेवायं स्पर्शस्ते हरति प्रिये।। (**रत्नावली** ४/१८) इत्यन्तम्।

५०. **छादनम्- अपमानकृतं वाक्यं छादन**मिति। **वाक्य**मिति तदर्थो लक्ष्यते। करोति बहुमाने वर्तते, तेन दुष्टो प्यर्थो पमानेन बहुमतीकृतः। तदपमानकलङ्कापवारणाच्छादनमिति। यथा सागरिका– दिठ्ठिआ पज्जलिदो भअवं हुदासणो, अज्ज करअस्सदि मे सअलदुक्खावसाणं (दिष्ट्या प्रज्वलितो भगवान् हुताशनः। अद्य करिष्यति मे सकलदुःखावसानम्।) इति। {६४}

५१. **प्ररोचना- प्ररोचना च विज्ञेया संहारार्थप्रदर्शिनी** इति। संहियमाणस्य निर्वाह्यमाणस्यार्थस्य दर्शिका प्रकर्षेण रोचत इति प्ररोचना। यथा–

क्वासौ ज्वलन् हुतवहस्तदवस्थमेत–
दन्तःपुरं कथमवन्तिनपात्मजेयम्।
वाभ्रव्य एष वसुभूतिरयं वयस्यः
स्वप्नो मतिभ्रममिति

युक्तिरित्यन्ये इदमङ्गं व्यवहरन्ति। अत्रोद्देशक्रमत्यागे(न) यत्केषाचिदङ्गानां लक्षणं तत्क्रमानियमसूचनार्थः (र्थम्?)। अनेन पाठविपर्यासेन यत्कैश्चिदुद्देशस्यान्यथापठनं तद्ग्रन्थकाराशयापरिज्ञानकृतम्। **केचिद**त्रान्यतममङ्ग नाधीयते, द्वादशाङ्गमेवैवं सन्धिमाह। **अन्ये** तु त्रयोदशाङ्गत्वे प्यस्य निर्वहणसन्धावपि प्रशस्तेरितिवत्तान्तर्भूतत्वेन गणनमन्याय्यमिति त्रयोदशाङ्गत्वात् चतुःषष्टिसंख्यां समर्थयन्ते। {६५-६६}

अथ निर्वहणसन्धावुद्देशक्रमेणाङ्गानि लक्षयितुं प्रक्रमते

५२. **सन्धिः- मुखबीजोपगमनं सन्धि**रिति। यथा वसुभूतिः बाभ्रव्य, सदशीयं राजपुत्र्याः –इत्यादि मुखे यदुक्तं तदिह निकटीभूतं सन्धानं सन्धिः। {६७}

५३. **निरोधः- कार्यस्यान्वेषणं युक्त्या निरोध** इति यथा वसुभूतिः– कुत इयं कन्यकेत्यादि।

५४. **ग्रथनम्- उपक्षेपस्तु कार्याणां ग्रथनमिति** यथा (यौगन्धरायणः– देव क्षम्यतां यन्मया निवेद्य कृतम्– इत्यादि। अत्र रत्नावलीलाभरूपकार्यस्योपक्षेपाद् ग्रथनम्।) {६८}

५५. **निर्णयः- अनुभूतार्थकथनं निर्णय** इति। प्रमाणसिद्धस्य वस्तुनः कथनमित्यर्थः। यथा **रत्नावल्यां** चतुर्थे ङ्के वसुभूतिः– अपि रत्नावली, ननु त्वमीदशीमवस्थां प्राप्तासि।

सागरिका– (सप्रत्यभिज्ञं) तुमं पि किं अमच्चवसुभूदी

वसु– स एवाहं मन्दभाग्यः इति–

प्रभति यावद् विदूषकवाक्यं ''सविहवो होदु'' इति।

५६. **परिभाषणम्- परिवादकृतं यत् तत् परिभाषणमिति।**

यथा सागरिका– किदावराहा खु अहं देवीए ता ण सक्कुणोमि मुहं दंसेदुं (कृतापराधा खल्वहं देव्या, तत् न शक्नोमि मुखं दर्शयितुम्) (वासवदत्ता अपवार्य)– अय्यउत्त लज्जामि खु अहं इमिणा णिसंसत्तणेण ता अवणेहि से बन्धणं। (आर्यपुत्र, लज्जे खल्वहमनेन नशंसत्वेन, तदपनयास्या बन्धनम्।)

एतदुभयोरप्यन्योन्यापराधोद्घट्टनं वचनम्। यौगन्धरायणो पि प्रविश्यैव स्वमेवापराधं उद्घट्टयति। यथा–

देव्या मद्वचनाद्यदाभ्युपगतः पत्युर्वियोगस्तदा

सा चाप्यन्यकलत्रसंघटनया दुःखं मया प्रापिता। इत्यादि। {६६}

५७. **द्युतिः- लब्धस्यार्थस्य शमनं द्युतिरिति।** सामर्थ्यात्प्रशमनीयस्य क्रोधादेरर्थस्य प्राप्तस्यापि यत्प्रशमनं सा द्युतिः। यथा (तत्रैव)– ''देव श्रूयतामिदम्। सिंहलेश्वरदुहिता सिद्धैरादिष्टा'' इत्यादि यावद्देव्या उक्तिः– ''अय्य अमच्च फुडं एव्व किं ण भणसि पडिवादेहि से रअणावलिं ति। (आर्य अमात्य, स्फुटमेव किं न भणसि प्रतिपादय तस्य रत्नावलीमिति।)।

५८. **आनन्दः- समागमस्तथार्थानामानन्द** इति। अर्थितस्य तथेति प्रकारशतैः प्रार्थितस्य सम्यगपुर्वियोगवद्यदागमनं तदानन्तहेतुत्वादानन्दः। यथा (तत्रैव) राजा– को देव्याः प्रसादं न बहुमन्यते– इत्यादि। {१००}

५९. **समयः- दुःखस्यापमगो यस्तु समय** इति। अपगमनमपगमः। यथा– अय्यउत्त दूरे खु एदाए णादिउलं ता तह अणुचिट्ठ जहाबन्धुजणं ण सुमरेदि (वासवदत्ता– आर्यपुत्र, दूरे खलु अस्या ज्ञातिकुलं, तत्तथानुतिष्ठ यथा बन्धुजनं न स्मरति)

६०. **प्रसादः- शुश्रूषाद्युपसंपन्नः प्रसाद** इति। यथा वासवदत्ता– ''एत्तिअं दाव मम बहिणिआणुरूपं होदु इति स्वैराभरणैरलङ्करोतीति। (एतावता तावन्मे भगिन्यनुरूपं भवतु)।

केचिद् द्युतेरनन्तरमिदमङ्गं पठन्ति। {**१०१**}

६१. **उपगूहनम्- अद्भुतस्य तु संप्राप्तिरुपगूहन**मिति। यथा विदूषकः– ही ही भो कहं कहं संपुण्णमणोरहा संवुत्त म्ह (इत्युत्थाय नत्यति) (ही ही भोः कथं संपूर्णमनोरथाः संवत्ताः स्मः)।

६२. **भाषणम्- सामदानादिसंपन्नं भाषण**मिति। यद्यपि गर्भे पि संग्रहाख्यमिदमङ्गमुक्तं तथाप्यत्र स्थाने वश्यं प्रयोक्तव्यतां ख्यापयितुं पुनरुपादानं शब्दान्तरेण च। यथा वसुभूतिः– देवि स्थाने देवीशब्दमुद्वहसि– इति साम दानं तु यथा भगवती जीमूतवाहनस्य वरं ददाति– ''त्वां विद्याधरचक्रवर्तिनमहं प्रीत्या करोमि क्षणात्'' इत्यादि।

अन्ये मन्यन्ते– आदिशब्देन भेददण्डादेरुपायान्तरस्य संग्राह्यत्वं, तस्य त्वेह स्थाने स्पष्टेन पथानौचित्याम्, न गर्भसन्ध्युक्तसामाद्युपायानुवदनमात्रमत्र यत्क्रियते इत्थमिदं प्राप्तमित्येवं प्रायं तदिदं भाषणाख्यमङ्गमिति। {**१०२**}

६३. **पूर्ववाक्यं- पूर्ववाक्यं यथोक्तार्थप्रकाशन**मिति। यथा बाभ्रव्यः– इदानीं सफलपरिश्रमो स्मि संपन्न– इति।

६४. **काव्यसंहारः- वरप्रदानसंप्राप्तिः काव्यसंहार** इति। यथा यौगन्धरायणः– देव तदुच्यता किं ते भूयः प्रियमुपहरामीत्यादि यावत्, ''यातो विक्रमबाहुरात्मसमतां'' इत्यादि। {**१०३**}

६५. **प्रशस्तिः- नपदेशप्रशान्तिश्च प्रशस्ति**रिति। (यथा **रत्नावल्यां**)–

उर्वीमुद्दामसस्यां जनयतु विसजन् वासवो वष्टिमिष्टां
इष्टैस्नैविष्टपानां विदधतु विधिवत्प्रीणणं विप्रमुख्याः।
आकल्पान्तं क्रियायाः (च कुर्यात्?) क्रमसमुपचितं संगमं सज्जनानां
निर्विश्लेषावकाशं पिशुनजनवचोवर्जनाद्वजूलेपः।। (४/२२) इति।

यथासन्धि त्विति यो यस्मिन् सन्धौ योग्यतां इत्यर्थः। योग्यतां च कविरेव जानाति, न च मुक्तककविः, किन्तु प्रबन्धयोजनासमर्थः। तदाह **कविभि**रित्यादि। {**१०४**}

ननु कवेः कीदशं तत्प्रबन्धनिर्माणकौशलमित्याह **रसभावमपेक्ष्यति,** तदपेक्षा च कौशलमित्यर्थः। रस एव हि प्रीत्या व्युत्पत्तिप्रदं नाट्यात्मकं शास्त्रमित्युक्तम्। ततश्च यथा यद्यस्योपयोगि तदरोचकं रुचितदधिशर्करापयःप्रभतिरसान्तरमध्ययोजितं –तद्द्वारेणान्तःप्रविष्टं सत् पुष्टिं व्याधिनिवत्तिं च विधत्ते, तथैव पुमर्थोपायो हृदयमनुप्रवेष्टुमसमर्थ सुन्दरतरोचितरससङ्क्तमणया प्राप्तान्तःप्रवेशो विनेयजनस्य संपाद्ये वस्तुनि कल्पपादपकल्पनायै कल्पते। रससंक्रान्तिश्च विभावादिरूपतयैव नान्यथेत्युक्तं

षष्ठे। **एतानीति**। एतान्यङ्गानि लिखितानि विवक्षितरसाभावादिसंपूरणभाजि भवन्ति यानि त्वेकरसावहितमनसो यत्रान्तरनिरपेक्षतयैवाहमहमिकया समुचितभावेन बन्धशय्यामनुवर्तन्ते। इतिवत्ताविच्छो पि रसस्यैव पोषकः, अन्यथा विच्छेदे स्थाय्यादेस्त्रुटितत्वात् क्व रसवार्ता। तेन रसस्यैवायं विभावादिपरिकरो यदङ्गचक्रमिति। तथा हि ''लाक्षागहानले''त्युपक्षेपो वीररौद्रयोर्विभावांशपूरकः, ''प्रवद्धं यद्वैर''मिति क्रोधस्य वीरे व्यभिचारिणो रौद्रे स्थायिनः स्वरूपप्रत्युज्जीवकः परिकरः, ''च चद्भुज'' इति च परिन्यासो नुभावांशं पुष्णाति, अणुगेण्हंतु एदं ववसिदं देवदाओ'' (द्रौपदी– अनुगह्णन्त्वेद्वयवसितं देवताः) (**वेण्यां** १. २१–२२) इत्यादि विलोभनम्। मनोनिर्वत्यौत्सुक्यहर्षमतिस्मतिप्रभतिव्यभिचारीभावसन्धान––धुर्यम् एवमन्यदपि योज्यम्।

ननु सन्धिपरतन्त्रैरङ्गैर्भवितव्यम्, तद्रसपारतन्त्र्यमेषां कुतस्त्यम्, उच्यते– सन्धयो ह्यवस्थापरतन्त्राः प्रारम्भाभिधानदशाविशेषोपयोगिकथाखण्डलकं मुखसन्धिरित्युक्तम्, एवमन्यत्र। अवस्था अप्यन्यकृतिविशेषमनूच्यन्ते। नन्वतः किम्, इदमतो भवतीत्याह– रसभावापेक्षया तु कार्य स्थितं तस्यापेक्षया अवस्थानं ज्ञात्वेति, कार्यमपि रसप्रवाहजननपर्यन्तत्वेन कृतार्थं संपद्यते इति यावत्।

संमिश्राणीति सन्ध्यन्तरोक्तं सन्ध्यन्तरे पीत्यर्थः। यथा युक्तिर्मुखे प्युक्ता गर्भे प्युपनिबद्धा वितर्कव्यभिचार्यंशपोषकभावेन **वेणीसंहारे**, यथोदाहृतं प्राक् (३.२७) ''तेजस्वी रिपुहतबन्धुदुःखभार''मित्यादि। **द्वित्रीति** द्वित्वत्रित्वयोगेनेत्यर्थः। तेनैकमपि सन्ध्यङ्गं तत्रैव सन्धौ द्विस्त्रिर्वा कर्तव्यम्। यथा **रत्नावल्यां** प्रतिमुखे विलासः सागरिकायां राज्ञि वा सकृदुपनिबद्धः प्रधानं श्रङ्गारं समुद्दीपयति। **वेणीसंहारे** संफेटविद्रवौ पुनः प्रदर्शितौ वीररौद्रोद्दीपनौ भवतः। अतिशयेन तु पौनःपुन्ये वैरस्यं स्यादिति द्वित्रिग्रहणम्। तथा द्वयोर्योगो द्वाभ्यामङ्गाभ्यां संपाद्यं तदेकेनैव चेद्घटते तत्किमपरेण। एवं त्रियोगः। द्वियोगो यथा **प्रतिमानिरुद्धे** भीमसूनोर्वसुनागस्य कृतौ– उपक्षेपानन्तरमेवं परिकरः, आद्येनैव कृते परिन्यासदर्शनम्। एवं त्रियोगः, यथा भेज्जलविरचिते **राधाविप्रलम्भे** रासकाङ्गे उपक्षेपेणैवहि ''लिअलीस्सा'' इत्यादि परिकरपरिन्यासकार्यगुरुभूते पालिते एकोद्देशेन(?) विलोभननिरूपणम्। एवं चतुरङ्गो यावत् सन्धिर्भवतीति। {**१०५**}

अथ सन्ध्यन्तराणि दर्शयितुमाह **एतेषामेव चाङ्गाना**मित्यादि। तत्र **केचिदा**हुः– अन्तरं छिद्रं सन्धिरिति। तदङ्गमात्रं– तात्स्थ्याच्च तत्स्थानीयं तेन सन्ध्यङ्गच्छिद्रवर्तित्वात् सन्ध्यन्तराणि, अत एव चाङ्गानां संबद्धानि। ननु किं श्लेषमात्रेण, नेत्याह, किं त्वर्थस्य प्रयोजनस्य योगेन, अत एव सन्ध्यङ्गानां विशेषकाः तदर्थविशेषसंबद्धं हि तदङ्गं भवति (इति)।

अन्ये मन्यन्ते– य एवोपक्षेपाद्या सामान्येनोक्ताः, तेषामेवैते विशेषा अवान्तरभेदाः। उपक्षेपो हि सामादिविशेषभिन्नः, तथा हि ''लाक्षागहानल'' (**वेणी** –१) इति क्रोधात्मोपक्षेपः **रामाभ्युदये** भयात्मोपक्षेपः **प्रतिमानिरुद्धे** स्वप्नरूपः **उदात्तराघवे** हेत्ववधारणात्मा।

एवमन्यदनुसरणीयम् (इति)। एते च विभावानुभावव्यभिचारिरूपा एव। न तु तदतिरिक्तं जगति किंचिदस्ति प्रयोगे। प्रयोगोज्ज्वलकम्। तत्रोपयोगाय तूपलक्षणत्वेनैकविंशतिरित्युक्तं कवेर्मार्गं प्रदर्शयितुम्। {१०६-१०८}

तत्र सामादयो वीरे उज्ज्वलत्वहेतवः, वधो रौद्रे, प्रत्युत्पन्नमतित्वं मतिलक्षणं व्यभिचारिरूपं, सर्वत्र गोत्रस्खलनमीर्ष्याविप्रलम्भे, साहसं (शृङ्गारवीरादौ), चापलं हास्यादौ। एवमन्यत्र। **ओज** इति तेजः, सामान्याभिनये (अध्याये) लक्षयिष्यते– ''अधिक्षेपावमानादेः'' (२२–४१) इत्यत्र संवरणमवहित्थं, चित्रं विस्मयः शिल्पविशेषश्च। एते सर्वेषु नाटकादिरूपकेषु सुलभाः स्वयं च सुज्ञाना इति तदुदाहणिपरिवर्तनेन ग्रन्थो न विस्तारितः।

एवमितिवत्तनिरूपणनान्तरीयकत्वेन सन्धयः सन्ध्यङ्गानि सन्ध्यन्तराणि चात्मभूतरसोपयोगीन्यपि प्राधान्येनेतिवत्तात्मकं शरीरांशमभिनिविशमानानि, तत एव वत्तिचतुष्कसाधारणे निदर्शितानि। अधुना तु यस्याः प्रसादेन शास्त्रेतिहासादिभ्यो भ्युद्धरकन्धरीभूतं सर्वजनाहरणीयतास्पदं नाट्यं, यामुद्दिश्य प्रथमे ध्याये ''कैशिकीमपि योजय यच्च तस्याः क्षमं द्रव्यं'' इत्यादि बहुतरमुक्तं, तदाविर्भावकानि, अत एवात्मभूतरसभावभागाभिनिवेशशालीन्येव लास्याङ्गान्यपि कविप्रयोक्तभिरभिनेतव्यकाव्य––विषये सर्वथैव योज्यानीति दर्शयितुमाह **अन्यान्यपि लास्यविधावङ्गानी**त्यादि। **नाटक**मित्यभिनेयमात्रम्। इतःपरमध्यायान्तमुक्तेभ्यो भिन्नानि लास्यविधौ यान्यङ्गानि वक्ष्यन्त तानि नाटकोपयोगीन्यपि भवन्ति।

नन्वेवमङ्गानामभेदादङ्गिनो पि लास्यस्य नाटके को भेद इत्याशङ्का शमयति (**अस्मा**दिति)। अस्मान्नाटकादनुकाराभिनेयलक्षणात् विनिस्मतानि बहिर्भूतानि, एकपात्रहार्याणि। **भाण** इवेति **इव**शब्देन नाटकमाह, भाणे नाट्यरूपता समस्ति, न तु लास्ये कथंचिदपि तस्य नाट्यरूपवैलक्षण्यात्। तच्चोपपादितं वितत्य तुर्ये ध्याये। {१०६-११८}

ननु कानि लास्याङ्गानि नाट्ये वक्ष्यन्त इत्याह **गेयपद**मित्यादि **दशविधं ह्येतदङ्गनिर्देशलक्षण**मित्यन्तम्। एतस्य अङ्गनिर्देशस्याङ्गोद्देशस्य दशविधं, यद्विशेषलक्षणं (तत्) तालाध्याये (अ ३१) लास्यनिरूपणावसरे वक्ष्यते, तथा चोपसंहरिष्यति ''एतेषां लास्यविधौ विज्ञेयं लक्षण''मिति (अ १६)। तत्रैव हि संपूर्णमङ्गानां रूपं, इह तर्हि कथमुपयोग इति नाट्योपयोगितां गमयितुं **आसनेषूपविष्टैर्य** इत्यादिग्रन्थः। तेनेदं तात्पर्यम्– यानि लास्याङ्गानि वक्ष्यन्ते तेभ्यः कश्चिद्वैचित्र्यांशो लोकापरिदष्टो पि र जनावैचित्र्याय कविप्रयोक्तभिर्नाट्ये निबन्धनीयः।

अन्ये तु व्याचक्षन्ते– तथाविधलास्याङ्गयोजनैवात्र क्रियते, तथा हि गेयपदे निदर्शनं दर्शयन्ति ''ततः प्रविशति वीणां वादयन्ती मलयवती चेटी च। मलयवती 'उत्फुल्लकमलकेसर' इत्यादि गायति'' (**नागानन्द** १–१३) इति। तच्चेदमसत्। अत्र

ह्यन्यव्यापारवद् देवतापरितोषः, किंचिद्गेयं जप्यसहस्रतुल्यं तन्मिश्रं जप्यं कोटिफलसाधनमित्यादिपुराणवाक्यबलात्, कर्तव्यत्वेनाभिसंहितो मलयवत्याः। ''सा च प्रयोज्ये''ति न लास्यार्थो त्र किंचित्, न लास्याङ्गतापि। यत्रापि, ततः प्रविशतो गायन्त्यौ चेट्यौ, ''कुसुमाउपिअदूअओ'' (**रत्नावली** १.१३) इत्यादि। तत्रापि परिभ्रमणादिवदेव लौकिकवत्तं वसन्तोत्सवप्रमोदाभ्युदयावसरकृतम्। प्रयोजने चेद्यावत् क्रियते तत्र यद्यप्यनुकार्यस्य तथापि नाट्याङ्गत्वे पथगनुपदेश्यतापत्तिः, यथा (यदा) ह्यश्वमेधयागाद्यनुकारः कर्तव्यस्तदोपयुज्यते यज्ञाङ्गज्ञानमिति यज्ञाङ्गान्युपदेश्यानि भवेयुः। न हि तादग्वस्तुमात्रमप्यस्ति यन्नाट्ये नोपयुज्यते च। तस्माल्लास्ये यान्यङ्गानि तत उपजीव्ये लौकिक एवांशो र जनोपयोगी लास्याङ्गत्वेन मुनेरिह विवक्षितः। अन्यथा ''आसनेषूपविष्टैर्य''दित्यादि किमिहोक्त्या, ''एतेषां लक्षणं व्याख्यास्ये'' इत्येतदिहैव तु नैवोक्तमित्येतद् विश्रङ्खलं स्यात्, ''ततश्च परिधानक''मित्यादि (३१–३५०) (यत्पूर्वरङ्गविधौ –अ ३१– लास्याङ्गलक्षणमुक्तं तदप्यत्राभिनेयभागे प्रयोक्तव्यं स्यात्।) {**११६-१२०**}

ततो यावानंशो नाट्योपयोगी तं दर्शयितुमाह **आसनेषूपविष्टैर्यदि**ति। यच्छब्दो निपातो यस्मिन्नित्यत्रार्थे, तेन यत्र काव्ये प्रयोगे वा **शुष्क**मित्यनुकरणीयतया शून्यं **गायनै**रिति न तु पात्रैः, **आसनोपविष्टै**रिति स्वस्थैः, न तु नेपथ्ये गीयत इत्यादिवत्, कविप्रयोगायातमावेशविशेषं जम्भद्भिर्गीयते यत्। **तन्त्रीभाण्डान्वित**मिति सर्वातोद्ययुतं, न तु भाव्यासीनपाठ्यवत्तद्विहीनं तद्गेयस्य पदं स्थानमिति कृत्वा गेयपदम्, तेन ध्रुवागानप चकमन्तरालापस्वररहितं यत्र प्रयोगयोग्यं भवति स काव्यप्रयोगो गेयपदमित्युक्तं भवति, यत्र हि प्रयोगे तत्तत्राभिनिविष्टं सामाजिकर जकं भवतीति यावानंशो सौ लास्याङ्गादिहोपजीवितः।

यत्तु गायनैः पात्रैः शुष्कमित्यर्थात् छेकाश्रितं गेयं निर्गीतमपि वा, एतत् त्र्यश्रं चतुरश्रं वेत्येवंभूतं गीयमानं गेयानि पदानि यत्र गेयपदमिति व्याचक्षते, तत्सर्वमेवापास्तम्। {**१२१-१२२**}

अथ स्थितप्राप्ति यल्लास्याङ्गं भविष्यति तदुपजीवितुमाह **प्राकृतं यद्वियुक्ता त्वि**ति। लास्येपि तावद् देवतानरपतिर जनप्रधानं पाठ्यमस्ति। तच्चित्तग्रहणं हि तत्र तेनैव मध्ये वैचित्र्याय पाठ्येनापि क्रियते, तत्र स्थिते च पठत्यासीनेवेति पाठ्यगतं तदलौकिकं र जनाङ्गं चित्रत्वं तस्मादङ्गादुपजीव्यते। तथा हि– यद्वियुक्ता आतप्तापि सती प्राकृतभाषालक्षणयुक्तंतथात्तरसमिति रसोपयोगि स्थायिस्वरसग्रहपूर्वकं पठेत्। एतदलौकिकं सल्लास्याङ्गादुपजीव्यमानं स्थितपाठ्यम्। एतच्चावेशोपलक्षणं तेन क्रोधाविष्टो पि संस्कृतेन पठतीत्याद्यपि मन्तव्यम्।

अन्ये तु बहुचारीयुतेन च चत्पुटेनोत्तरेण यत् स्थितपाठ्यमिति लक्षणं कुर्वन्ति, उदाहरन्ति, **रत्नावल्यां** द्वितीये ङ्के राजा– ''उद्दामोत्कलिका''मित्यादीति, तत्पूर्वमेव

निरस्तम्। न च पाठ्ये चावसरो त्र तालस्त्र्यश्रश्चतुरश्रो वा, यथा तु लास्याङ्गत्वे। तत्सर्वं तालाध्याय एव वक्ष्यामः। {**१२३-१२४**}

अथासीनपाठ्यादुपजीवनीयमंशमाह **आसीनमास्यते यत्रे**ति। अत्यन्तशोकावेशे ––भिनयादिशून्यत्वेन यत्र आस्ते सों श उपर जकगुणश्चतुर्विधातोद्यवर्जितो ति––सुकुमारकाकलीप्रायप्रमदागीतमात्रावशेषो यश्चित्तग्राही (स लौकिकः) लौकिकादपि च तत्र हि साम्यमात्रार्थस्य तस्याश्रयमाणा च स्थितिः, तदासीनन्नमाङ्गं, आसीनपाठ्यादुपजीवितेनासनांशेन योगतश्च सर्वत्र करुणादौ र जनोपयोगि। तदाह **चिन्ताशोकसमन्वित**मिति। अधःशय (नध्यानाधोमुखाद्यनुभावयुतम्। **सर्वे**ति ध्यानविलापादिचिन्ताशोकानुभावेषु तत्तादेरप्रयोज्यतया तद्राहित्यमुक्तम्) निःशब्दमिति भावः। तदनु अप्रसारितगात्रमित्यभिनयशून्यमित्यर्थः। सुप्रसारितगात्रमित्यन्ये पठन्ति, तत्रापि (सौष्ठवाङ्गप्रदर्शनपथग्यत्नराहित्येन) स्रस्तगात्रतयाभिनयशून्यतैव। {**१२५**}

पुष्पगण्डिकाख्यलास्याङ्गादुपजीव्यांशमाह **वत्तानीति।** गान इति) ततेन मध्ये सुषिरेण मध्ये वनद्धेन मिश्रणाकृतो विचित्रभावः पात्राणां सुकुमारप्रयोगो भिनेये पि र जक एव यद्यप्यलौकिकं यद्वैचित्र्यम्। मालासादश्यात्पुष्पगण्डिका गाननत्तगीतगतवैचित्र्ययोगात् (स्त्रीलिङ्गविवक्षया च स्त्रीपात्राणां पुष्पगण्डिकोक्ता। **पुंसामि**ति) सा च चेष्टाश्रयशब्दाभ्यां पर्यायेण योज्या।

अथ प्रच्छेदकाङ्गकृतं वैचित्र्यं योजयितुमाह (**प्रच्छेदक** इति लास्यविधाने (अ ३१) वक्ष्यते ''ज्योत्स्नायां मदिरायां वा सलिले दर्पणे पि वा)। छायां संदश्य कान्तस्य प्रहष्याथ विभूषित''मिति (३१–३४६) प्रच्छेदकस्य लक्षण (मुक्तम्)। तत्र जलक्रीडायां जले प्रसाधने दर्पणे पानगोष्ठ्यां पान) ईषत्प्रतिफलिततत्तदाकृतिदर्शने सति कान्तायाः प्रहर्ष इति त्रिधा प्रच्छेदं प्रतिफलनमिति पर्यायात् (काव्येषु कविभिः प्रतिबिम्बदर्शनजातहर्षस्य स्त्रीणां प्रणयकोपप्रसादनसामर्थ्यं वर्णितम्।) यथा–

पणमह पणयप्पकुविअगोरीचलणग्गलग्गपडिबिंबं।
दससु णहदप्पणेसुं अ एआरह णुहरं रुद्दं।।
पनमथ पनय–पकुप्पित–गोलीचलनग्ग–पतिबिंबं
तससु नख–तप्पनेसुं एकातस तनुथलं रुद्दं (लुद्दं)।

इत्यादि। तत्र च त्रिविधे पि ज्योत्स्नैवोपयोगिनी,....पानलीलापि स्वाधीनभर्तकोचितसंभोगविशेषोपलम्भेन। एतदुक्तं भवति– लोकवत्ते तावन्न सर्वदा संपूर्णचन्द्रोदयो भवति प्रयोगे तु संभावनागर्भतया रसोपयोगी तथाविधः कालविशेषो गहीतव्यः। तथा च **रत्नावल्यां** भूयसा चन्द्रोदयो वर्णितः, ''संप्रत्येष सरोरुहद्युतिमुष'' (१–२३) इति, ''उदयतटान्तरित''मिति (१–२४), ''वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गत'' (३–१३) इति। एवं रसोपयोग्यलौकिककालविशेषग्रहणं प्रच्छेदकादुपजीवितम्। **यदाहुरुपाध्यायपादाः-**

यद्यत्रास्ति न तत्रास्य कविर्वर्णनमर्हति।
यत्रासंभवि तत्रास्य तद्वर्ण्यं सौमनस्यदम्।।
देशो द्रिदन्तरो द्यौर्वा तडित्कुण्डमण्डिता।
नदी कृष्णा थवा न स्यात् किं कदाचन कुत्रचित्।। इत्यादि। {१२६-१२६}

अथ त्रिमूढलक्षणादुपयोगिनं भागं निरूपयितुमाह **अनिष्ठुरश्लक्ष्णपद**मित्यादि। त्रिमूढके तावल्लस्याङ्गे नायकस्य व्यलीकवशादेकस्या द्वेष्यतो भिनवायाः प्रथमप्रणयबद्धलज्जादिनेति मोहस्त्रयाणाम्। तत्र नायकस्यावश्यमनिष्ठुराण्येवोदयन—विषयाणीव वचांसि भवन्ति। तत इह वचसि रसोपयोगी गुणालङ्कारांशः स्वीकर्तव्यः। न हि लोके यदते माधुर्यौजःप्रभतिगुणगणो स्ति सर्वो ह्येवमाविष्टो यत् किंचिद्वदति तत्काव्यमेव स्यात्। छायामात्रेण त्वंशतः स एवापूर्णत्वादनुपयोग्येव। तस्मादलौकिकमेवैतद्वैचित्र्यं रसोपयोगे सर्वं तद्गुणग्रामकृतम्। **समवत्ते**रित्यनेन वत्तकृतवैचित्र्यं, **पुरुषभावाढ्य**मित्यनेन पात्रकृतमपि हेलाभावादि, एवं विशेषकृतं वैचित्र्यं यत्र नाट्ये सौन्दर्यमस्तीति दर्शयन् गुणानामेवान्वयव्यतिरेकाभ्यां तत्र प्रभावं दर्शयति। {१३०}

अथ सैन्धवकादुपजीव्यमंशं स्वीकर्तुमाह **पात्रं विभ्रष्टसंकेत**मिति

''सैन्धवीमाश्रितं भाषां ज्ञेयं तत्सैन्धवं बुधैः।
रूपवाद्यादिसंयुक्तं''

इति च लास्याङ्गविधाने (३१—३५६) वक्ष्यते। तत्र यदा नान्यप्राकृतादिभाषोमकरणत्वेन सैन्धवीप्राया आश्रीयते तद्रसोपयोगिर जनादिः तदा, अलौकिको यमर्थो र जनोपयोगी लास्याङ्गात् स्वीकृतो भवति। तथा हि श्रङ्गाररसे सातिशयोपयोगिनी प्राकृतभाषेति सट्टकः **कर्पूरम जर्या**ख्यो **राजशेखरेण** तन्मय एव निबद्धः, **भेज्जलेन** राधाविप्रलम्भाख्यो रासकाङ्कः सैन्धवभाषाबाहुल्येन, **चन्द्रकेण** स्वानि रूपकाणि वीररौद्राधिकोपयोगीनि संस्कृतभाषयैव। अत एव च तत्तद्रसोपयोगतारतम्यादेवैकतमस्यातो न्यस्यात्र प्राधान्यं कल्प्यते।

तदेतदाह **पात्र**मित्यादिना। जातावेकवचनम्। तेन यत्र पात्राणि **प्राकृतैर्वचनैर्युक्ता**नि, अत एव विभ्रष्टः संकेतविशेषः रसोचितः काक्वध्याये कथितपूर्वः, स एष भ्रष्टात्मा भ्रंशं नीतः संकेतो यत्र, सुष्ठु व्यक्तिर्यतो रसस्य तेनैव **करणेन** वीणावाद्यादिक्रिययान्वितं पात्रं **सैन्धवक**मिति विषयतद्वतोरभेदोपचारात्। तेन दशरूपकस्य यद् भाषाकृतं वैचित्र्यं **कोहलादि**भिरुक्तं तदिह **मुनिना** सैन्धवाङ्गनिरूपणे स्वीकृतमेव।

करुणान्वितमिति त्वपपाठः। एवं 'पाठ्यविहीनं सैन्धवक'मिति, यथा **रत्नावल्यां** विदूषको नत्यतीति प्रियाप्रतिनिधिप्रभ्रंश, इति **मुनिमतो**पेक्षयैव लक्षणमुदाहरणं कृतं न चोक्तं युक्त्या तेन किंचिदित्यसदेव। {१३१-१३२}

द्विमूढकाद् वैचित्र्यांशं स्वीकरोति **मुखप्रतिमुखमि**त्यादिना। यत्र काव्ये लास्यगीताश्रये द्वयोर्नायकस्य नायिकायाश्च नायिकयोरेव त्रिगूढक इव मोहो व्यावर्ण्यते तत्र, तालनिरूपणायामेकस्तालश्चतुर्भिः पादैर्युक्तः सन्नावर्तत इति वक्ष्यते।

मुखप्रतिमुखोपेतं तथा चाचपुटाश्रयम्।

यथाक्षरैः सन्निपातैस्तथा द्वादशभिर्युतम्।। (३१.३६०/३६१) इति

तस्मादङ्गाङ्गपरिक्रमे यदेव तालानुसरणं चतुर्षु च मुखेषु गतिपरिसमापनं लोके गत्यादावपरिदष्टमपि नटसामाजिकवर्गसविधत्वापादनेन साम्यांशस्यानन्दस्वभावतया रसांशेतराङ्गत्वादतिशयेन रसोपयोगीति तत् स्वीकृतम्।

मुखं यदग्रे सामाजिकाः प्रतिमुखं ततो न्या दिशो लास्याङ्गं नेतुम्, मुखप्रतिमुखे गीतकाङ्गत्वेन चतुरश्रं कृत्वा क्रान्तदिक्चतुष्टयैः पदैः क्रमणं यत्रेति। किमेवं सति भवतीत्याह वैचित्र्यार्थ वैचित्र्यमत्र प्रयोजनमिति। तेनापि किमिति चेत्तत आह (**श्लिष्टभावे**ति) श्लिष्टभावेन सर्वसाम्यलक्षणेन चित्तवत्तिसंघट्टेन रसानामुपेतमुपगतं स्फुटत्वं येनेति।

गीतकाङ्गाभ्यां मुखप्रतिमुखाभ्यामङ्गसौष्ठवेन रसभावैर्नायिकाद्वयरचनया च युतमिति **श्रीशङ्कुक**ाद्याः, तच्च प्रागेव परीक्षितम्।

मुखप्रतिमुखौ सन्धी इत्येतदपि न समीचीनम्, अनुपयोगादस्यार्थस्ये–
–त्यु**पाध्याय**मतमेवानवद्यमावेदितपूर्वं ग्राह्यम्। {**१३३**}

अथोत्तमोत्तमकमङ्गं नाट्य उपयोजयितुमाह **उत्तमोत्तमकं विद्यादनेकररससंश्रयमि**त्यादि। ''उत्तमोत्तमके नर्कुटं संप्रयोजयेत्'' इत्यादिना ''हेलाहावविभूषित''मित्यन्तेन लास्याङ्गं लक्षयिष्यते (३६–३६२–३६४)। तत्र च चित्तवत्तिपरिपोषो हेलाहावादिचेष्टालङ्कारमुखेन यः स्थितः सो त्रालौकिकः सन्नुपजीव्यते। न हि भगवदवतारस्य **रामस्य** कुलकलत्रमनुपेक्ष्यं, पराभवखलीकारश्च न सोढव्यः, क्षत्रियेण च लोककण्टकाभ्युद्धरणं कर्तव्यमिति यच्छास्त्रार्थपरिपालनं मुक्त्वा, **रावण**हृत**सीता**समानयनाद्युचितं निमित्तं, परमार्थतो न तु यथा प्रतिरूपं ''मुहुर्व्याधतास्तादश''मित्यादि वर्ण्यते तथास्य ततीयत्रेतावतीर्णस्य (रामस्य) संभाव्यते। **रामायणे** पि **मुनि**ना तथा वर्णितमिति चेत् किमतो वेदे पि हि तथा वर्ण्यतां, न वयमतो बिभीमः। स हि भागः काव्यं यश्च रसाभिनिष्यन्दी वर्ण्य इत्युक्तमसकृत्। ततश्चान्यतरर जनोपक्रमविनेयहृदयसंवादिवैचित्र्यांशो सौ नाट्ये लास्याङ्गप्रसादोपनत एव।

उत्तमानि तावल्लास्याङ्गानि, तेभ्यो पीदमुत्तमं, सर्वं हि रसपर्यायीति दर्शितं प्राक्। ततः संज्ञायां कन्।

अनेकस्यासाधारणस्य रसस्य संश्रयो स्मिन्निति, स्थायिनां बहुत्वनूतनत्वाद् घटनाविचित्रत्वमुक्तम्। श्लोके च बध्यत इति श्लोकबन्धः, (बन्धानां) विधास्तैः विविधैः

(चित्रैः) परमार्थभूतैः क्वचित्कदाचित्संभवमात्रतया वर्णितैर्युक्तम्, यथा (**विक्रमोर्वश्यां**)– ''आ दुरात्मन् रक्षः, क्व नु खलु मे प्रियतमामादाय गच्छसि। (विभाव्य) नवजलधरः सन्नद्धो यं'' इत्यादि पुरूरवस उक्तिश्चानुरागेणैव व्याख्यातेति किं पुनरुक्त्या।

हेलाहावैर्विशेषण दीप्ततागमनरूपेण भूषितमिति सात्त्विकाद्यनुभाववर्गस्य सर्वस्यादीप्ततोपलक्षिता–

तत्राक्षिभ्रूविकाराढ्यः शङ्गाराकारसंयुतः।
सग्रीवारेचको ज्ञेयो भावस्थितसमुत्थितः।
स एव हावः सा हेला ललिताभिनयात्मिका। (तुलना– २२.१०,११)

इति हेलाहावयोर्लक्षणम्। {**१३४**}

अथान्त्यमङ्गं नाट्योपयोगि कर्तुमाह– **कोपप्रसादजनित**मित्यादि। प्रथमार्धेन भाविलक्षणमेकदेशद्वारेणानूपद्यते। द्वितीयेन तत आकृष्य वैचित्र्यभागो नाट्योपयोगी कथ्यते। तदयमर्थः– कोपप्रसादजनितं साधिक्षेपपदाश्रयं चेत्यादिरूपं यदुक्तं प्रत्युक्तं तथास्यगाने (अ–३१) वक्ष्यते, नाट्ये एवमिति समनन्तरमेवं वक्ष्यमाणेन पथा स्यात्, तमाह **चित्रेति**। चित्रं यद्गीतं ध्रुवागानकाव्यं तस्य यो र्थस्तेन संयोजनं यस्मिन्नाट्यांशे उक्तप्रयुक्ते हि (वैचित्र्यं) लास्याङ्गात् स्वीकृतम्। यथा ''बाले नाथ विमु च मानिनि रूपम्'' इत्यादौ भिन्नानां वाच्यखण्डलकानां समन्वयो रसावेशमहिम्नैव, न तु श्रुतिलिङ्गादिप्रमाण षट्कमत्रावकाशं लभते ''क्वाकार्य शशलक्ष्मणः क्व च कुलं'' इत्यादावियमेव वार्ता। एवं ''णळिनीदळणीसहमुत्तदेहिआ। अइदुल्लाहपडिबंधाणुराइआ। (नलिनीदलनिस्सहमुक्तदेहा। अतिदुर्लभप्रतिबन्धानुरागा)।।''

इत्यादेर्द्विपदिकागीतार्थस्याभिनये काव्यार्थस्य च ''हिअअ समास्सस'' (**शाकु.**), इत्यादेः सावेशकृत एवाभिनयार्थसमावेशो लोकापरिदष्ट उपर जनाय सातिशयमुपयोगी रसावेशवैवश्यप्रसादादित्युक्तप्रत्युक्ताल्लास्याङ्गादुपजीवितः।

यद्यपि ''स्थाने ध्रुवस्वभिनयो यः क्रियते'' (२२.४६) इति नाट्यनिरूपणायां वक्ष्यते तथापि कविना तादक्काव्यं कार्यं प्रयोक्त्रा च तादग्गीतं कर्तव्यमिति शिक्षणाय कुतश्चेदमङ्गमुपजीवितमिति शङ्काशमनाय रूपकाङ्गत्वेनेहास्याभिधानं, सामान्याभिनये त्वभिनेयत्वेनास्य निरूपणं भविष्यति ''षडात्मकस्तु शारीरः'' (२२.४३) इत्यत्र। कोपप्रसादजनितत्वमित्यनेन चित्तवत्त्यावेशस्थानमस्याङ्गस्य निवेशविषय इत्युक्तम्। यत उक्तप्रत्युक्तनिर्वचनमहिम्ना चाकाशभाषितात्मकमप्यलौकिकरूपं स्वीकुर्वता तत्सहचरस्वगतजनान्तिकापवारितकाद्युपलक्षितम्। न च सर्वथा तन्नाट्ये लोके क्वचित् संभवात् नाट्ये पि गीयमानस्यान्यान्यश्रोतुः काकतालीयवशात् स्वचित्तवत्त्यार्थसंवादो भवति। यथा **हर्षचरिते** भगवत्याः सरस्वत्याः ''तरलयसि दशं समुत्सुका''मित्यपरवक्त्रं श्रण्वन्त्याः। तत्सर्व हि लोके यथा स्यात्ततर्हि प्रत्यक्षकल्पं कथमिव तत्र प्रतीतिरिति नाट्यरूपतैव भ्रंशेत।

अन्ये तु चित्रपदं भाविकं चेत्यङ्गद्वयमाहुः पठन्ति च–

यत्र प्रियाकृतिं दष्ट्वा विनोदयति मानसम्।
मदनानलतप्ताङ्गी तच्चित्रपदमुच्यते।।
दष्ट्वा स्वप्ने प्रियं यत्र मदनानलतापिता।
करोति विविधान् भावांस्तद्वै भाविकमुच्यते।। इति।

तच्चेदमसत्, "**लास्ये दशविधं" (१६-१२०)** इत्यत्रत्येन ग्रन्थेन, "**दशाङ्गं लास्य**"मिति च तालाध्याये **(३१)** पठिष्यमाणेन विरोधात्, न चास्योपयोगः कश्चित्। तथा ह्यलौकिककैशिक्युपयोगि रसांशे सर्वथोपकारि यद्वैचित्र्यं तल्लास्याङ्गद्वारेणाह, स्वकार्यं तच्च सर्वं दशभिरेव संगहीतम्। तथा हि– प्रधाने चित्तवत्त्यंशे वा वैचित्र्यं विभावाद्यंशे वा उपर जकभावो वा। तत्र चित्तवत्त्यंशे वैचित्र्यमुत्तमोत्तमकात्। विभावांशगतं तु वैचित्र्यं सैन्धवकात्, काक्वाद्यंशे स्थितपाठ्यात्, लक्षणगुणाद्यंशे त्रिमूढकात्, वत्तांशे पुष्पगण्डिकात् आहार्ये उपर जकगीतातोद्ययोजने च, सात्त्विके आसीनपाठ्यादपि उपर जकभावे पि शब्दाद् ध्रुवागानभागे सर्वातोद्ययोगे च गेयपदात्, गीतार्थस्य पात्रैः काव्यार्थाभिनये उक्तप्रत्युक्तात्, वाचिकस्य स्वरतालानुसरणे द्विमूढकात्, तत एवाङ्गिकवैचित्र्यमपि। व्यभिचार्यंशे तु वैचित्र्यमुत्तमोत्तमकादेव। तदतो तिरिक्तो नास्त्येवांश इति दशैवाङ्गानि। वाग्भागस्तनुत्वेनोपर जकभागः। स्वरसात्मनि हि तद्वैचित्र्यांशः प्रत्युत रसे सातिशयोपभोग इति शब्दतो **मुनेर**नुकारः। रसात्मा नाट्यमिति चाभिप्रेतमिति लक्ष्यते। अलौकिकवैचित्र्यसारो हि रसः। तथा चोक्तं **भट्टतोतेन**–

लक्षणालङ्कृतिगुणा दोषाः शब्दप्रवत्तयः।
वत्तिसन्ध्यङ्गसंरम्भः संभारो यः कवेः किल।
अन्योन्यस्यानुकूल्येन संभूयैव समुत्थितैः।
झटित्येव रसा यत्र व्यज्यन्ते ह्लादिभिर्गुणाः (णैः?)।।
वत्तैः सरलबन्धैर्यत् स्निग्धैश्चूर्णपदैरपि।
अक्लिष्टह्वद्यघटनं भाषया सुप्रसिद्धया।।
यच्चेदक्काव्यमात्रं तद्रसभावानुभावकम्।
सामान्याभिनये प्रोक्तं वाच्याभिनयसंज्ञया (अ २२)
एवंप्रकारं यत्किंचिद्वस्तुजातं (कथ चन)।
अनूनाधिकसामग्रीपरिणामोन्मिषद्रसम्।।
रसपोषाय तज्जाते नाट्यस्वयं स्वरो (स्वयंवरे?)।
प्रतिभायाः प्रगल्भायाः सर्वमो (मु?)डुप एष सः।।

इति संभावनाप्राणनाया हि यल्लोके संभाव्यते परम् अथ (परमार्थं तत्?)। वस्तुतो लोकोत्तरत्वेनैव संभारेण युक्ता कविवाणी झटित्येव रसमयी भवति असाधारणताप्राणत्वादिति तत्र तात्पर्यम्। {**१३५-१३७**}

ननु लास्याङ्गेभ्यो यो भागमुपजीवति स तावदिहोक्तः, तेषां तु स्वरूपं वक्तव्यमित्याशंक्याह **एतेषां लास्यावि**धावि॥ एतद् दशरूपकलक्षणं कवीनां सुखग्रहणाय राशीकर्तुमाह **प चसन्धी**त्यादि। नाटकमित्यभिनेयकाव्यमात्रम्। तत्र प चसन्धीत्यादि संभवमात्रे मन्तव्यम्। **महान्तो रसाः** पुरुषार्थोपयोगिनः यत्र। **महान् भोगो** र जनाप्रधानो रसो यत्र, आभोग इत्**यन्ये**। **उदात्तवचनान्वित**मिति गुणान् श्लेषप्रसादादीन् स्वीकुरुते। **सुश्लिष्टसन्धिसंयोग**मिति सन्ध्यन्तराणि (च), **सुप्रयोग**मिति लास्याङ्गानि, **सुखाश्रय**मिति छन्दोवत्तवैचित्र्यं, मदुशब्दैरभिधानं वर्णना विवक्षितस्यार्थस्य यत्रेति माधुर्यप्रसादार्थव्यक्तिगुणानां प्रकर्षणं सूचयति। एवं नाटकं कुर्यात्। यश्च नाटकं कुर्यात् स एव कविः। किं तेनेत्याह **अवस्था** यात्विति नानापुरुषेण स चार एको भावानुप्रवेशो रसात्मना यस्याः सा तादशी यतो नाटके विधीयते संपाद्यते रसरूपतां नीयत इत्यर्थः। उक्तं चैतद्वितत्य। {**१३८-१४२**}

ननु सर्वाः चात्र किमवस्थाः सन्ति इत्याशङ्क्य प्रथमाध्यायोक्तमेव श्लोकद्वयं पठति **न तद्ज्ञान(१.११६)मिति, यो यं स्वभावो लोकस्य** (१.११६) इति। एतच्च तत्रैव व्याख्यातमिति किं पुनरुक्तेन। पूर्ववत्तानुचरितं कथं नाटकशब्दस्यार्थं इत्याह **यस्मातस्वभावं संत्यज्येति** नट नताविति नमनं स्वभावत्यागेन प्रह्वीभावलक्षणं, ये त्**वन्ये** नट नत्ताविति पठन्ति तन्मते पीह नमनं, नटशब्दो जनिदाच्युसूत्रेण (उणादि ४–११५) व्युत्पादितो गहीतव्य इति दर्शयति साङ्गोपाङ्गा ये पदक्रमा गतिवैचित्र्याणि। एतच्च समस्तं नाट्याङ्गोपलक्षणं प्रयुज्यत इति नटैर्ज्ञायते चेति सामाजिकैस्तेनोभयोरपि नमनमुक्तमिति संभावनाकृतमौचित्यम्। मदुशब्देति यदुक्तं तस्य प्रयोजनमाह **भविष्यति** त्रेतायुगापेक्षया द्वापरे कलौ वेत्यर्थः। **सुखार्थ**मित्यर्थव्यक्तिः स्वीकृता। एतदुपसंहरन्नन्यदासूत्रयन्नध्यायमध्यायान्तरेण सङ्गमयति **दशरूपविधानं** चेति शिवम्। {**१४३-१५४**}

द्विजवर**तोत**निरूपितसन्ध्यध्यायार्थतत्त्वघटनेयम्।
अभिनवगुप्तेन कृता शिवचरणाम्भोजमधुपेन।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यामेकोनविंशः सन्ध्यध्यायः समाप्तः।।

श्रीः

नाट्यशास्त्रम्

विंशो ध्यायः

(वत्तिविकल्पनम्)

निश्शेषशब्दव्यवहारवत्तिवैचित्र्यमभ्येति यतः प्रतिष्ठाम्।
श्रोत्रात्मकं तत्परमेश्वरस्य वन्देतमां रूपमरूपधाम्नः।।

वत्तिभेदात्काव्यभेदा भवन्तीत्युक्तं **दशरूपका**रम्भे (१८–५)। तत्र वत्तयो न ज्ञाता इति तदवधारणार्थमाह **समुत्थानं त्विति।**

यद्यपि कायवाङ्मनसां चेष्टा एव सह वैचित्र्येण वत्तयः ताश्च समस्तजीवलोकव्यापिन्यो निदंप्रथमतावत्ताः प्रवाहेन वहन्ति, तथापि विशिष्टेन हृदयावेशेन युक्ता वत्तयो नाट्योपकारिण्यः। आवेशश्च तारतम्यलक्षणो द्विधा लौकिको न्यश्च। तत्र लौकिक आवेशः सुखदुःखतारतम्यकृतो न रसागमास्वाद्यो ह्यसावित्युक्तं रसाध्याये (अ ६)। अलौकिकस्त्वनावेशो प्यावेशमयः कवेरिव सामाजिकस्येव। क्वाप्यवसरे हृदयसंवादसरसस्यैव यो भासते स एव साधारणे चमत्कारगोचर व्यापारविशेषो रसस्योपकारिणीभवति। तादशश्च प्रथमतः कृतयुगारम्भे भगवतो वासुदेवस्यैव। तस्य हि स्वफलसिद्धये न किंचित् कर्तव्यमस्ति लोकानुग्रहं मुक्त्वा। यथा हि ''न मे पार्थास्ति कर्तव्यं (गीता ३–२२)'' इति तेन साधारणस्य भावेन प्रविष्टानावेशे प्यावेशमयो, भगवानेव प्रथमतो नान्यः, पूर्वसर्गगामिनो व्यापारस्य प्रलयमहारजनीप्रस्तावेन भ्रष्टसंसारत्वात्। अत एवाह–

एकार्णवं जगत्कृत्वा भगवानच्युतो यदा।
शेते स्म नागपर्यङ्के लोकान् संक्षिप्य मायया।। इति। {१-२}

त्रेतायुगे च नान्यं प्रपत्स्यति। यद्यपि चादिकविर्वाल्मीकिरिति प्रवादस्तथापि प्रलयानन्तरं कृतयुगे भाविनि सन्ध्यवसरप्रतिबन्धदर्पदलनजनितविघ्नापसरणपुरस्सरसष्टिसम्पत्तौ चिरेण वाल्मीकिमुनेः प्रादुर्भावो भविष्यतीति साधारण्याशयेनैव च भगवानेव वत्तीनां स्रष्टोक्तः न तौ तु मधुकैटभौ, तयोरावेशेन लौकिकेन व्याप्तत्वात्, उद्रिक्ततमतमस्सन्तानितस्वांतत्वेनाविद्या––मयत्वात्। विद्यावकाशवशविकसितहृदयकमलपरिमलरूपत्वाच्च, आनन्दसारस्य रसोपयोगिनो व्यापारानावेशस्य भगवत्येव सम्भावनं न तु दैत्ययोः। अत एवाह **किमिदं**

भारतीवत्तिर्भगवन् वाग्भिरेव प्रवर्तते इति भगवतेत्यनेन ह्युक्तं, भगवानेन हि वत्तीनां प्रवर्तयिता नटवदनावेशदर्शनात्, न तु मधुकैटभौ (तयोः) लौकिके चैव स्यादिति। **द्रुहिणो भिहतमना वाक्यमब्र**वीदित्यनेन प्रेक्षकत्वं ब्रह्मणः प्रदर्शयन् सामाजिकहृदये विश्रान्तिप्राधान्यं वत्तीनामाह। तन्निष्ठत्वाद्रसचर्वणाया वाक्यग्रहणेन कार्यद्वारको वत्तीनां नाट्योपयोग इति सूचयति **वाग्भिरेवे**ति। वाचिकप्राधान्ये भारतीवत्तिः। भारतीशब्देन हि वागुच्यत इति कार्यहेतोरित्युक्तं तत्कार्यं दर्शयति **वदता**मिति कवीनामिति यावत्। {३-६}। **शुद्धैरिति** स्वोत्प्रेक्षितवैचित्र्यशून्यैः। अङ्गानां हारान्नयतामिति भशं युद्धमार्गे विशारदाविति संबन्धः। भूमिसंयोगेन संस्थान उद्घटि(ट्टि!)तसङ्कुचितादिरूपं येषां, पदन्यासानां न्यस्यमानानां पदानाम् {१०}। **अतिभार** इत्यक्षरसाम्यादपि निर्वचनं दर्शयन् नटव्यापारयोगे पि आन्तरविकल्पात्मकाभिः (वाग्भिः) संजल्पबाहुल्ये भारत्येव वत्तिरिति दर्शयति {११}। **सत्त्वा**धिकैरिति मनोव्यापाराधिक्ये सात्त्वतीवत्तिरित्याह सत् सत्त्वरूपं विद्यते येषां तत्त्वं तेषामयमिति। सत्त्वं च तत्र परिच्छिद्रान्वेषणोपायमप्रतिता(?) न वैचित्र्योत्प्रेक्षणप्रकाशलाघवात्मकं, अत एवाह **विचित्रै**रिति। स्वोत्प्रेक्षितेन हि वैचित्र्येण विना कथं युद्धविशारदौ जय्यौ स्याताम्, द्वयोर्ह्येकागमानुसन्धानेन युध्यमानयोः सम्बुद्धिकयोः कस्य जयः कस्य पराजयो वा भवेदिति, शिखापाशं पट्टबन्धम्, तुर्हेतौ श्रङ्गारस्थानलक्ष्मीसम्भोगादिस्मरणात्, लीलया विलासेन अन्वयः शिखापाशमयेन आबध्योदासीनो वर्तत इति। चारीभिः प्रायेण निश्शङ्कं प्रवर्तमानौ दैत्यौ सुखं निपात्येते मय्येव परिश्रमापनयनं सम्पद्यत इति {१२-१४}। **देव** इति लोकवदनाविष्टः। **यां यामि**ति वीप्सया सर्वैव क्रिया वत्तिचतुष्टयव्याप्तेत्याह। न हि वाङ्मनश्चेष्टातो तिरिक्तकर्मास्ति। न च क्रियाशून्यः कश्चिदप्यंशो स्ति। मूर्छामोहमरणादावपि सूक्ष्मप्राणपरिस्पन्दाद्यनुमेय—सचितपरिस्पन्दसम्भावना। मतस्तु ताम्रपाषाणप्रख्यो न तस्य वत्तिकथनेन किंचित्स्वपरम्, अन्यस्य शोकादिविभावनां प्रतिपाद्यमानः काव्याङ्गतामेति स च तदानीं करुणादिरसाक्रान्तः काव्ये व्यावर्णनीयो भवति। रसभावपर्यवसितो हि सर्वः कार्य (काव्य?) संदर्भः रसभावाश्च चेतनेष्वेव, तेषु च न व्यापारत्रयशून्यः कश्चिदपि काव्यांशो स्ति। तेन प च वत्तयो द्वे वत्ती इत्यादयो संविदितभरताभिप्रायपण्डितसहृदयम्मन्यपरिकल्पितमद्भावाः प्रवादा निरस्ता भवन्ति। एतच्च पूर्वमेवास्माभिः प्रदर्शितम्।

जप्यैरिति भक्त्यावेशमात्रवत्तिं च दर्शयन् कवेर्मुख्यं रसाधिष्ठत्वमेव रूपं विस्तारणात्मकवर्णनाप्राधान्यं चेति दर्शयति {१५-१६}। **(विषमैः)** शस्त्रागममार्गात्मनागम्यप्रकारैः (अद्भु)तैरपि, तथा **स्फुटै**रपि सर्वलक्षणप्रसिद्धैरपि चित्रैः स्वार्थोत्प्रेक्षितवैचित्र्यवद्भिः **सललितै**रिति लोचनागोचरवर्तित्वेनातिभ्रम्यैरित्यर्थः {१७}। **अय**मिति भवदुपज्ञातवैचित्र्यबंहित इत्यर्थः। **नियुद्धसमयचक्र** इति **समय**ग्रहणेन वैचित्र्ययोगे पि शस्त्रागमापरित्यागमाह। क्रमः परिक्रमणं क्रमो वा शत्रुविक्रमणयोगे गतागतस्य निभतं शस्त्रादिशून्यं युद्धं नियुद्धं मल्लयुद्धं, तद्गतमपि यदेतद्रूपं तदुत्प्रेक्ष्य

वैचित्र्ययोगात्सर्वेषु शस्त्रास्त्रयुद्धेष्वप्युपयोगि भविष्यति। **विमोक्ष**ग्रहणात् क्षेप्तव्यकुन्तचक्रादिविषयत्वमेव केचिदाहुः। {**१८**}
तच्चासत्, क्षिपेः, पातमात्रपर्यवसायिनः खड्गादियुद्धेष्वप्यप्रतिहतार्थयुक्तत्वात्। न्यायशब्दनिर्वचनमाङ्गिकाभिनयनिरूपणायां कृतं स्मारयति **न्यायाश्रितै**रिति एतच्च तत्रैव व्याख्यातम्। {**१६**}

एव वत्तीनामुत्पत्तिर्व्याख्याता। आसामेव नाट्यं प्रत्यवतारणं कर्तुमाह **चरितैर्यस्ये**ति भगवद्विश्चचरितैर्गर्भाधेयभूतैः उपलक्षितं यत् पूर्वं ब्रह्मणा **जप्यं** स्तोत्रकाव्यरूपं कृतं, तादशं भावादिचेष्टाप्रधानं, तादश्येव वत्तिः। ऋषिभिः ब्रह्मपुत्रैः पाठ्यादिभिः सम्यग्युक्ता **कृता** अनुसता। तद्यथा पाठ्यप्रधाना भारती, अभिनयप्रधाना सात्त्वती, अनुभावाद्यावेश(स)मयरसप्रधानारभटी, गीतावाद्योपर जकप्रधाना कैशिकीति। अत एव वक्ष्यति **ऋग्वेदाद्भारती**त्यादि नाट्यवेदोत्पत्तौ प्रथमाध्याये व्याख्याता या सा। द्रुहिणाज्ञा कैशिकीमपि योजय (१–४२) इत्यादिका या तया। काव्यस्य क्रिया काव्यरूपतापादनं, तदेव हेतुः, ततः। प्रकर्षेण क्षिप्ता येनाभिनेयानभिनेयकाव्यवैलक्षण्यमित्यर्थः।

ननु भगवता वासुदेवेनाप्यंशावतारूपत्वात्संभाव्य.....व्ययोदयमूर्तिना कुत इमा वत्तय आनीता इत्याशङ्क्याह **ऋग्वेदा**दित्यादि। छन्दोमयश्च परमेश्वरो नान्यत इति भावः। {**२०-२५**}

अथासां परस्परसङ्कीर्णतया लक्ष्ये (बहुरूपतां) वहन्तीनां यत्र यत्प्राधान्येनान्यतमरूपावभासनं तत्प्रदर्शयितुमुत्तरो ग्रन्थः। (वाङ्मनःकायचेष्टांशेषु) ह्येको पि कश्चिच्चेष्टांशो स्ति। कायचेष्टा अपि हि मानसीभिः सूक्ष्माभिश्चवाचिकीभिश्चेष्टाभिर्व्याव्यन्त एव। ''न सो स्ति प्रत्ययो लोके यः शब्दानुगमादते'' (वाक्यपदीयं १–१२४) इति न्यायात्, मानस्यपि वाचिक्यपि चेष्टा अवश्यं सूक्ष्मं काल(य?) परिस्पन्दमन्दप्राणव्यापाररूपं नाभि(ति?) वर्तते। तदुक्तम्–

अर्थक्रियासु वाक् सर्वान् समीहयति देहिनः।
तदुत्क्रान्तौ विसंज्ञो यं दश्यते काष्ठकुड्यवत्।। (सङ्ग्रहः)

न च रसोपयोगिलालित्यभागशून्यः को पि नाट्ये परिस्पन्द इत्यन्योन्यं संवलिता वत्तयः केवलं क्वचित्किं चिदधिकमिति प्राधान्येन व्यपदेशः परिवर्तते।

तत्र भारत्याः प्राधान्यं दर्शयति **या वाक्प्रधाने**ति। **स्त्रीवर्जिते**ति कैशिकीप्राधान्यावकाशं गमयति। **संस्कृते**ति वचसा प्राकृतपाठ्यलालित्यात् कैशिकीमवश्यमाक्षपेदिति सूचयति। **भरतै**रिति नटैः स्वतो वंशकरं नामधेयं येषां (तैः), भरतसंतानत्वात्तद्धितेभरताः {**२६**}। **भेदा** इति अस्यामित्यर्थो त्र न तु प्रकाराः, त्रैलोक्य व्यापिन्या हि भारत्याः कश्चिदंशः प्ररोचनारूपः, एवामुखस्वभाव इत्यादि। अत एवाह **अङ्गत्व**मिति अंशत्वं प्राप्ता इत्यर्थः, अन्यथा यदि रूपकस्याङ्गत्वं प्राप्ता इत्युच्यते तदा वीथी प्रहसनं च रूपकभेदः, न तु रूपकस्याङ्गम्। तथा नाट्यस्याङ्गत्वं प्राप्तं (प्राप्ता?) नाट्यमिति समुदायः। यदि वा

एकैकमपि काव्यं दशरूपमित्युक्तं प्राक्। **पूर्वरङ्ग** इति तद्विषये, **प्ररोचना** पूर्वमुक्ता तत्र च कृते या प्ररोचना सा भारत्यंश इत्यर्थः। {२७-२८}

नटीत्यादिना आमुखं लक्षयति। **वा** शब्देन व्यस्तानां नटीप्रभतीनां सूत्रधारेण सङ्घातमाह। **अपि**शब्देनात्मना समस्तानां, द्वितीयो **वा** शब्दः समस्तव्यस्ततां विकल्पयति। **एव**शब्दः सूत्रधारस्यावश्यंभावं दर्शयति। **चित्रै**रिति भाविरूपकार्थानुकूलविषयानुसारिभिः, स्वं कार्यं नटव्यापारं, वीथ्यङ्गैरिति श्लिष्टवक्रोक्तिप्रत्युक्तिप्रायैरित्यर्थः, यथा ''पीताम्बरगुरुशक्त्या हरत्युषां प्रसभमनिरुद्धः'' इत्यादि। **अन्यथे**ति स्पष्टोक्तिप्रत्युक्तिभिः, यथा **नागानन्दे** ''नाटयितव्ये किमित्यकारणमेव रुद्यते'' इत्यादि। **आमुख**मिति मुखसन्धेर्निवर्तते यतः, आङ्मर्यादायाम्, यदि वात्रामुखं प्रारम्भमीषन्मुखं वा प्रस्ताव्यते नयेति (प्रस्तावना) बाहुलकेन तच्छीलसंज्ञयोरिति–.....निकारो न भवति। तत्र कदाचित्कार्याभिमुखं नीयते पूर्वरङ्गविधिः तदभिमुखं वा कार्यारम्भः तन्नीयते, सा द्विधेति (५–१८०) पूर्वरङ्गाध्याये दर्शितमस्माभिः। एवं च यदा स्थापको पि सूत्रधारतुल्यगुणाकारो रामादिवदेव प्रयुज्यते तदेदं कविकृतमामुखं भवति।

अन्ये त्वाहुः– पूर्वरङ्गाध्याये पि या प्रस्तावनोक्ता सापि भारतीभेद एवेति, किं द्वैविध्याभिधानप्रयासेन। यत्तु ''क्रुद्धो भीम इत एवाभिवर्तते तन्न युक्तमस्य पुरतो वस्थातुं'' इत्यादि, तत्तदीयसत्त्वावेशादेवास्य प्रकाशनाय सामाजिकानां साक्षात्कारकल्पाध्यवसायसम्पत्त्यर्थं सूत्रधारेणोच्यते, शिशुसन्त्रासाय कयाचिदाकृत्या कश्चिदत्रस्यन्नपि त्रासंरम्भगर्भमाह ''अयमागतो राक्षसः'' इति, यथोक्तं भावाध्याये (७) ''सत्त्वशुद्धा मूर्तव्याः'' इति, एतच्च तत्रैव निर्णीतम्। तस्यामुखस्य प चाङ्गानि भेदा इत्यर्थः। {२९-३३}

ननु एवं सति प चानां युगपत्प्रयोगे प्रस्तावना प्रयुक्ता स्यात्, न चैतन्मुनेरभिमतम्। तथा हि वक्ष्यति–

एषामन्यतमं श्लिष्टं योजयित्वार्थयुक्तिभिः।
पात्रग्रन्थैरसम्बाधं प्रकुर्यादामुखं ततः।। (२०–३८प्रथमार्धः, ३९प्रथमार्धः)

इत्युद्देशे। यद्यपि पश्चादवलगितमुक्तं तथा तयोस्तुल्यं, लक्षणस्य पूर्वोक्तत्वमित्याशयेनाह **उद्घात्यकावलगितयोर्लक्षणं कथित**मिति वीथ्यङ्गव्याख्याने, यद्यपि च प्रस्तावनायामन्यान्यपि वीथ्यङ्गानि भवन्ति, आमुखसामान्यलक्षणे प्युक्तं वीथ्यङ्गैरिति, तथाप्युद्घात्यकमवलगितं च भाविकाव्यार्थप्रस्तावनेति बालरङ्गं (प्रस्तावने प्रबलमङ्गं?), तथा तयोर्लक्षणम्–

पदानि त्वगतार्थानि ये नराः पुनरादरात्।
योजयन्ति पदैरन्यैस्तदुद्घात्यकमुच्यते।। (१८–११५)
यत्रान्यस्मिन् समावेश्य कार्यमन्यत्प्रसाध्यते।
तच्चावलगितम्।। इति (१८–११६)। {३४}

वाक्यमिति, यथा– (**रत्नावल्यां**) ''द्वीपादन्यस्मात्'' (१.६) इति। वाक्यार्थं यथा **प्रतिमानिरुद्धे**- ''पीताम्बरगुरुशक्त्या हरत्युषां'' इति। केवलमत्र वीथ्यङ्गनिबद्धम्। **कथा** काव्यार्थरूपा, ऊर्ध्वमेव हन्यते गम्यते तत्रेति कथोद्घातः। {**३५**}

प्रयोग इति प्रस्तावनात्मके, **प्रयोग**मिति नाट्यात्मकं भावितम्। एकस्तुशब्दो भेदान्तरेभ्यो व्यतिरेकमाह, द्वितीयो वधारणे। सूत्रधार एव यत्र प्रयोगे समुद्गककवाटयुगलवद्योजयति स प्रयोगद्वयश्लेषणात्प्रयोगातिशयः। यथा **विक्रमोर्वश्याम्**– अथ कुररीणामिवाकाशे शब्दः श्रूयते। आः ज्ञातम्–

ऊरुद्भवा नरसखस्य मुनेः सुरस्त्री
कैलासनाथमुपनत्य निवर्तमाना।
बन्दीकृता विबुधवैरिभिरर्धमार्गे
क्रन्दत्यतः करुणमप्सरसां गणो यम्।। (१.३) इति। {**३६**}

यदा **कालप्रवत्तिं** कांचिदवलम्ब्य यथा सूत्रधारेण किंचिद्वस्तु वर्ण्यते तदा(प्र)श्रयेण च पात्रस्य प्रवेशः तत्कालप्रवत्त्या स्वार्थोक्तत्वात् प्रवत्तकम्, यथा ''अस्यां शरदिसत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः।'' (वेणी./१.६प्रथमार्धः) इत्यादि **पात्रग्रन्थैरसम्बाध**मिति यत्र न भूयांसि पात्राणि अल्पपात्रे पि ग्रन्थबहुलत्वं तथारूपमामुखं कुर्यात्। **विविधाश्रय**मिति बहुभेदमित्यर्थः। **पूर्वमुक्त**मिति **दशरूपका**ध्याये। {**३७-४०**}

यद्यपि अभेदव्यतिरेकेणापि भारती(तो?) (न्यायो) न दश्यते तथापि **न्यायेनेति** तत्प्रकारचतुष्कं निरूपितम् (१०–७२)। **सात्त्वतो गुणः** मानसो व्यापारः। सत्सत्त्वं प्रकाशः तद्विद्यते यत्र तत्सत्त्वं मनः, तस्मिन् भवः। {**४१**}

सत्त्वोत्थानस्य सत्त्वाधारस्य, **वचनं** येषु **प्रकरणेषु** काव्यखण्डेषु, तेषु वागङ्गाभिनययुक्ता सती, सत्त्वस्य सात्त्विकाभिनय**स्याधिकारे** आधिक्यक्रियया सात्त्वतीवत्तिर्युक्ता भवतीति सम्बन्धः। {**४२**}

श्रङ्गारे विषयनिमग्नं मनः, करुणे कान्दिशीकं, निर्वेदे मूढमिति तद्व्यापारो भवन्नपि क्रोधविस्मयोत्साहेष्विव न सातिशयं परिस्फुरतीति दर्शयति **वीराद्भुतरौद्ररसेति**। आधर्षणं वाचा न्यक्कारः। उत्थापयति यो मानसः परिस्पन्दः स तावदुत्थापकः तत्सूचको व्यापारक्रम उपचारः तथोक्तः। तथा **वेणीसंहारे** भीमः– भो भोः श्रण्वन्तु भवन्तः–

स्पष्टा (कृष्टा)येनशिरोरुहेषु पशुना पा चालराजात्मजा
येनास्याः परिधानमप्यहृतं राज्ञां कुरूणां पुरः।
यस्योरःस्थलशोणितासवमहं पातुं प्रतिज्ञातवान्
सो यं मद्भुजप जरे निपतितः संरक्ष्यताः कौरवाः।। (३.४७) इति।

परिवर्तको यथा– तत्रैव भीमः– सहदेव गच्छ त्वं गुरुमनुवर्तस्व। अहमप्यस्त्रागारं प्रविश्यायुधसहायो भवामि।

सहदेवः– आर्य, नेदमायुधगारम्, पा चाल्याश्चतुश्शालमिदम्।

भीमः– किं नामेदं (इत्यादि यावत्) अथवा मन्त्रयितव्यैव मया पा चाली। इति

अस्त्रागारप्रवेशपरित्यागेन पा चालीदर्शनात्मककार्यान्तरसम्पादको मानसो व्यापारः परिवर्तयति कार्यमिति, परिवर्तकवचनं तूपचारारूढम्। एवमुत्तरत्रापि।

सह(आ)धर्षणेन यद्वाक्यं (साधर्षं) तद्विरहितं निराधर्षं, तेन खलीकारकाद्वचनादन्यतो पि वा सत्, अनन्तरमधिक्षेपं वचनमभिभावकं मानसं कर्म तत्सल्लापकशब्दवाच्यम्। यथा–

अश्वत्थामा हत इति पथासूनुना स्पष्टमुक्त्वा

स्वैरं शेषे गज इति किल व्याहृतं सत्यवाचा। (वेणी. ३–११) इत्यत्र सत्यवाचेति। {४३-४६}

(**सङ्घातभेदजनन** इति) सङ्घातस्य भेदं जनयति यो युधि स सङ्घात्यकः, सम्यक्घात्यः शत्रुवर्गो येन, सङ्घातविषयाद्वा सङ्घात्यकः, सङ्घातभेदश्च परेण सामाद्युपायबलेन वा क्रियते। यथा भीमो युधिष्ठिरेण साम्ना भेदितः, अतः शिखण्डिनं पुरस्कृत्य योद्धव्यश्च। दैवात्संपद्यते, यथा द्रोणेनोक्तं सुते हते शस्त्रं त्यक्ष्यामीति। आत्मदोषे वा स्वकटक लक्षणेन, यथा कर्णेन सह कलहायमानो श्वत्थामा शस्त्रत्यागं करोतीति। अत्र च सत्त्वाधिक्यमपराध्यति ''कथं नामाहमेवंभूत'' इति (वेण्यां ततीये ङ्के ते)। {५०-५१}

अथेत्यन्तरम्। **अतःपरमि**त्येतेभ्यो लक्षणेभ्यः पथग्भूतमित्यर्थः। श्लक्ष्णः सुकुमारः श्लिष्यति हृदय इति कृत्वा। नैपथ्यविशेषो वस्त्रमाल्यादिः तेन चित्रा, बहु विपुलं गीतं नत्तं च यस्याम्, कामोपभोगो रतिः ततः प्रभवो यः स श्रङ्गारस्तद्बहुल उपचारो व्यवहारो यस्यां सा तथोक्ता। (कैशिक्याश्चत्वार्यङ्गानि नर्माख्यं नर्मोपपदानि च तत्र नर्मणः श्रङ्गारस्थापकत्वं) हासप्रधानता च तदेति सामान्यलक्षणम्। तत्र हास ईर्ष्या वा सूचयितुं परं वोपालब्धुं परहृदयं वाक्षेप्तुमिति त्रिधा (आत्मेति) आत्मनः परकीयस्य चित्तस्योपक्षेप आत्मसमीपकरणम्। उदाहरणम्– वासवदत्ता (फलकमुद्दिश्य सहासं) एसा वि अवरा तरस समीवे जाआ लिहिदा। एदं वि अय्यवसंतअस्स विण्णाणं।।

द्वितीयस्योदाहरणं– ''शीतांशुर्मुख'' (**रत्नावली** ३.११)मित्यादि श्रुतवती वासवदत्ता यदा राज्ञोच्यते, ''प्रिये वासवदत्ते'' इति तद्वचसोपालम्भं सा सहासमाह– ''अय्यउत्त मा एव्वं भण'' इत्यादि।

ततीयस्य सुसङ्गता (विहस्य) ''जादिसो तुए कामदेवो आलिहिदो मए वि तारिसी रई आलिहिदा। ता असंभाविणी, कहेदि दाव वुत्तंत्तं।'' {५२-५८}

एवं त्रिभेदं नर्माख्यमाख्याय नर्मस्फु जं प्रकाशयितुमाह **नवसङ्गमेति** नवसङ्गममात्र एव सम्भोगो यत्र। कथं तस्य सङ्गमस्य सम्भोगत्वमित्याह **रतिसमुदायेति।** रतेरन्योन्यास्थाबन्धरूपायाः समुदयः स्फुटत्वं, यस्तादशेन वेषेण वाक्येन वा योगो यत्र। अवसाने च भयं पूर्वनायिकाकृतम्। यथा **रत्नावल्या**मुदयनस्य सागरिकायाश्च नर्मणः स्फु जो विघ्न इत्यर्थः। {५६}

विविधाः भावाः भयहासहर्षत्रासरोषाद्याः **लवैर्लवैरि**त्यत एव भयादीनामंशेन भावात् स्थायित्वानुपगमात् भयानकहास्यरौद्रादिरसतापत्तिर्न सम्भवति। शङ्गारस्तु पूर्व एव ''जस्स किदे तुमं एत्थ एव्व चिट्ठदि'' इति सुसङ्गतोक्तौ हासलवः, न हास्यो रसः।

''सहि कस्स किदे अहं एत्थ आअदा'' इत्यत्र सागरिकोक्तौ (रौद्र)लवो न तु रौद्रः। एवमन्यत्र। नर्मण इति तदुपलक्षितस्य शङ्गारस्य स्फोटो वैचित्र्यं चमत्कारोल्लासकृतस्फुटत्वं यत्रेति। {६०}

शङ्गारोपयोगिभिर्विज्ञानाद्यैः **प्रच्छन्नं** यत्र नायक आस्ते नवसमागमसिद्धये स नर्मगर्भः। नर्मोपयोगिनो विज्ञानाद्या गर्भीकृता इव प्रच्छन्नतया यत्रेति, यथा प्रच्छन्नरूपो नायकः सङ्केतस्थानं गच्छति। {६१-६२}

(उद्धतेति) दीप्तरसा रौद्रादयः उद्धताः। **(आरभटेति)** आरभटानां ये गुणाः क्रोधावेगाद्यास्ते **प्रायेण** बाहुल्येन यत्र, बहुभिः कपटैः यद्व चनं तेनोपेता। कपटत्रयं च समवकारलक्षणे (१८–७१) व्याख्यातम्। यत एवास्यां कपटयोगो त एव दम्भप्राधान्यमसत्यवचनसम्भवश्च। (**संक्षिप्त**केति) संज्ञया क्षिप्तानि वस्तूनि विषयो स्येति संक्षिप्तकः तानि वस्तूनि दर्शयति **(अन्वर्थेति)**। अर्थेन प्रयोजनेनानुगताः शिल्पयुक्ताः कुशलशिल्पिविरचिताः अर्था यत्रेति। अत्रैव दिशं दर्शयति **(बहुपुस्तेति)**। बहु विपुलं, पुस्तस्योत्थानं प्रकटत्वं विचित्रं च नेपथ्यं खङ्गचर्मवर्मादि यत्र पुस्तयोगे। यथा मायाशिरोनिक्षेपे **रामाभ्युदये** चित्रं नेपथ्यम्, यथा (वा)श्वत्थम्नः **(वेण्याम्)**।

भयातिशयेन हर्षातिशयेन च क्षिप्रमेव प्रवेशनिर्गमौ यत्र पात्राणां, तथा, विद्रवो वाक्यादिकृतो विनिपातो वस्कन्दः ताभ्यां कृतं सम्भ्रमाचरणं आवेगप्रधाना चेष्टा यत्र, सो वपातः, अवपतन्त्यस्मिन् पात्राणीति, यथा **कृत्यारावणे** षष्ठे ङ्के ''प्रविश्य खङ्गहस्तः सप्रहारः पुरुष'' इत्यतः प्रभति यावदसौ निष्क्रान्तः। {६३-६६}

(वस्तूत्थापनमिति) वस्तूनां बहूना(मर्थाना)मुत्थापनं प्रसङ्गातनिबन्धनं यत्र **कार्ये** तत्तथोक्तम्। कानि वस्तूनीत्याह **सर्वरसेति**। रसशब्देन स्थायिनो व्यभिचारिणश्च तेषां संक्षेपेण कृतं करणं यत्र, विद्रवैरग्न्याद्युपप्लवैः सह, तैर्विहीनम् (च) यथा, तत्रैव **(कृत्यारावणे)** अङ्गदादभिद्रूयमाणाया मन्दोदर्या भयं, अङ्गदस्योत्साहः रावणं दष्ट्वा तस्यैव हि ''एतेनापि सुरा जिता'' इत्यादि वदतो हासः, रावणस्यातिक्रोधः, ''यस्तातेन निगह्य बालक इव प्रक्षिप्य कक्षान्तरे'' इति वदतो ङ्गदस्य जुगुप्साहासविस्मयरसा, विध्वंसनं नाटयतीत्यत्र रावणस्य शोकः –इत्येवं विद्रवाश्रयं वस्तूत्थापनम्। तद्विपरीतं तु तत्रैव **(कृत्यारावणे)** द्वितीये ङ्के ''नेपथ्ये कलकलः'' इत्यतः प्रभति यावत्सीतां प्रति रावणस्योक्तिः– ''आ लोकपालानाक्रन्दसि'' इत्यादि।

भाविनो वस्तुनः समुत्थापनादपीदं तथोक्तम्। तथा च तत्रैव (**कृत्यारावणे** द्वितीये ङ्के) ऋषीणामुक्तिः–

दुरात्मन्, नेयं सीता स्वनाशाय कृत्येयं ह्रियते त्वया। इति।

सम्फेटस्योदाहरणं जटायुयुद्धादि सर्वम् (**कृत्यारावणे**)। {७०-७२}

अथासां वत्तीनां संक्षिप्य स्वरूपमाह **हास्यश्रङ्गारबहुला कैशिकीति सात्त्वती चापि विज्ञेया वीराद्भुताशमाश्रया।** इति। अत्र शमशब्दः शान्तरसपरिग्रह इति तद्वादिनो मन्यन्ते। **समाश्रयेत्य**न्ये पठन्ति अस्याध्यायस्याभिनयशेषभूततां स्यापपन्नध्यायार्थमुपसंहरति भाविनश्चार्थमासूत्रयति **वत्यन्त एष** इति। वत्तिरभिनयस्य दशरूपकात्मा विषयो पि **अन्त** इत्यभिनयस्य वत्तयो न्तरमेकदेश आहार्य इति शरीरव्यतिरिक्तं बाह्यमित्यर्थः। नटस्य हि सत्त्वात्मा वागभिनयो व्याहरणीय एव साक्षात्प्रयत्नकृतत्वात्। अत एव तुशब्देन ततो व्यतिरेकमाहार्यमेव विशिनष्टि। नेपथ्यकृतं त्वाहार्यं वक्ष्यामीति भूयः कृतं विस्तार्येति शिवम्। {७३-७६}

नसिंहगुप्तयतिनेत्थमत्र वत्तिस्वरूपं प्रकटं व्यधायि।
यस्य त्रिनेत्रेण हृदन्तरात्मवत्तिस्वरूपं प्रकटं व्यधायि।।

इति श्रीमहामाहेश्वराचार्याभिनवगुप्ताचार्याविरचितायां
भारतीयनाट्यवेदवत्तावभिनवभारत्यां विंशो वत्त्यध्यायः समाप्तिमगमत्

श्रीः

नाट्यशास्त्रम्

एकविंशो ध्यायः

(आहार्याभिनयः)

यस्य सङ्कल्पमात्रेण विश्वमाहार्यमद्भुतम्।
तं मानसमहामूर्तिं वन्दे गिरिसुतामपि।।

आहार्यस्य सर्वपश्चादभिधानं वागाद्यभिनयेभ्यो स्य बहिरङ्गत्वादित्यानुपूर्व्यमिति केचित्। तच्चासत्, आवेदितपूर्वमाहार्यस्य प्राधान्यादेव त्वद्य सर्वानुग्राहकत्वं सर्वोपजीव्यताख्यापनाय पश्चादभिधानम्। तदेव**ानुपूर्वश** इत्यनेनोक्तम्। तथा चाह **यस्मात् प्रयोगः सर्वो य**मिति वागङ्गसत्वात्मक इति {१}।

अत्रैवोपपत्तिमाह **नानावस्था** इत्यादि। नानाभूता या अवस्था रतिशोकाद्या नानाश्रयभूताश्च याः प्रकृतयो धीरोदात्तादय उत्तमाधमप्रभतयश्च ताः पूर्व यत्नतो नैपथ्येन साधिताः प्रकाशिताः पश्चादङ्गादिर्विभागं अनुभावविषयविभागं नामोपपत्तिं देशकालादिविभागं चार्पयद्भिः स्फुटतमतामानीयन्ते। तेन समस्ताभिनयप्रयोगचित्रस्य भित्तिस्थानीयमाहार्यम्। तथा च समस्ताभिनयव्युपरमे पि नैपथ्यविशेषदर्शनाद्विशेषो वसीयत एव।

यत्त्ववस्थान्तरयोगे भिनयान्तरवदाहार्यं न परिवर्तते तेन प्रत्युत तथाभूतस्येयमवस्था प्राप्तेति स्थायिसूत्रानुस्मतिसंपादनप्रावण्याद्रसं प्रत्यन्तरङ्गत्वमाहार्यस्यावेद्यते, तथा चाश्वत्थाम्नो युद्धवीररससम्पदोपेतस्यायं शोक आयात इति तथा येन यदि युद्धोचितोज्ज्वलधर्मपरिग्रहाद्यपासनं क्रियेतेत्यलं बहुना।

ज्ञेयो लोके। नैपथ्यस्य (विधिः अलङ्कारः) स इहाहार्याभिनयः, नाट्यस्य तु शुभमिति सिद्धिम्। (सन्धिमः) सन्धानं सन्धा तथा निर्वत्तः, सदलादिरूपं क्रियते (इति) सन्धिमः। व्याजः सूत्रस्याकर्षादिरूपः क्षेपस्तेन निर्वत्तो **व्याजिमः**। उपरि जतुसिक्थकादिना वेष्टस्तेन निर्वत्तो **वेष्टिमः**। भावप्रत्ययान्तन्निर्वत्तार्थे इमपं स्मरन्ति (४–४.१० का) {२-६}। **किलिञ्जं** भूर्जवेणुदलादि। **रूपं क्रियत** इति रूपतां नीयत इति यावत्। **यन्त्रेणेति** सूत्रादिप्रयोगेण सन्धिमादयः प्रकाराः। क्वोपयुज्यन्त इत्याह **शैले**त्यादि {७-६}।

समायोग इति योजना; स चाङ्गेषु शिरोहस्तादिषु उपाङ्गेषु च ललाटाङ्गुल्यादिषु निर्मितः। **वेष्टिमं** तणवेष्टनया निर्मितं बहुमालावेष्टनकृतं वा। **वितत**मित्यावेष्टितान्योन्याश्लिष्टमालासमूहात्मकं वस्त्रधारणभयेनाम्भितं वा। **सङ्घात्यं** वत्तं वा आस्यच्छिद्रान्तःप्रक्षिप्तसूत्रं बहुपुष्पगुच्छोम्भितं वा। **ग्रन्थिमं** ग्रन्थिभिरुम्भितं वा। **प्रालम्बित**मिति जालादिपर्यन्तव्याप्तिकम्। आवेध्यादीनि स्वयमेव व्याचष्टे **आवेध्यं कुण्डला**दीत्यादिना। विविधाश्रया इति लतासंख्यादिभेदेन बहुभेदा इत्यर्थः। चूडामणिः शिरोमध्ये। मकुटो ललाटोर्ध्वे। **कुण्डल**मधरपाल्याम्। **मोचकं** कर्णशष्कुल्या मध्यच्छिद्रे कृतम्, **कीला** ऊर्ध्वच्छिद्रे उत्तरकर्णिकेति प्रसिद्धा हर्षकमिति समुद्गकं सर्पादिरूपतया प्रसिद्धम्। **सूत्रक**मिति गुच्छग्रीवासूत्रादितया प्रसिद्धम्। **वेतिके**ति सूक्ष्मकटकरूपा अङ्गुलिमुद्रा पक्षिपद्माकारेणोपेता {१०-१७}।

रुचक इति करगोलके विततः तत ऊर्ध्वे **चूलिकेति** प्रसिद्धो निकु चको ग्रबाहुस्थानेएतन्मणिबन्धविभूषणम्, **केयूरः** कूर्परस्योर्ध्वतः, तयोरूर्ध्वे त्वङ्गदे। **त्रिसरः** मुक्तालतात्रयेण। तलकं नाभेरधः, तस्याप्यधः **सूत्रकम्। पुरुषनिर्योगः** औचित्यमस्य। आभरणाश्रयः आभरणविधिरित्यर्थः।

ननु सर्वः पुरुषो नेन भूष्यत इत्याशङ्क्याह **देवानां पार्थिवानां चेति।** शिखाव्यालः नागः ग्रन्थिभिरुपनिबद्धो मध्ये कर्णिकास्थानीयः, तस्यैव दलसन्धानतया चित्ररचनानि वर्तुलानि पत्राणि पिण्डीपत्राणि। **चूडामणिः** शिरोमध्ये, मकरपत्रं (मकरिका), ततो

ललाटान्त**मुक्ताजालिका** तोरणं जालिकादिरूपेण प्रसिद्धा। सर्पस्यैव वा शिरस एकमेव सुवर्णमुक्तामणिचित्रितम्। खेला (डोला?) प्रायं शीर्षतः जोलकं भूषणं **शिखिपत्रं** मयूरपिच्छाकारो विचित्रवर्णमणिरचितः कर्णावतंसकः। **कर्णिके**त्यादिना विकल्पतः कर्णाभरणान्यपि तु स्थानान्तरभेदात्समुच्चयेनेत्याहुः {१८-२६}।

विलासः। तेनायमर्थः– एवम्भूतेन दन्ताधररागवैचित्र्ये सति, **सविभ्रान्तनिरीक्षितं** यत् स्मितं तद्भवेदतीवह्रद्यं (विलासः) संपाद्यत इति तावत्। **तलक**मिति कवाटद्वययोजितम् {२७-३६}।

यष्टिरिति लता। नूपुरो जान्वधः। किङ्कणीका घण्टिकालग्ने(ग्ना?)। रत्नजालकं (प्रपदा)च्छादकम् {३७-३६}। **सघोषे** सशब्दे **कटके**। (अङ्गुष्ठ) **तिलका** इति विचित्ररचनाकृताः। **आकेशा**दिति शिखापाशः शिखाव्याल इत्यतःप्रभतीत्यर्थः। **आनखादि**ति अलक्तकरागपर्यन्तमिति यावत्। **आगम** इत्युपादानकारणमिति यावत्। **प्रमाण**मिति अङ्गुल्यादिपरिमाण (संमितत्वम्। रूपनिर्वर्णन)मिति शुक्लादि निर्वर्तनं (यथास्वभावम्)। विश्वकर्मणा प्रोच्यते यादङ्निर्दिष्टं तादक्कार्यमित्यर्थः। **सुबुद्धये**ति लोकप्रसिद्धापीत्यर्थः {४०-५०}।

पत्तनं देशः। शुद्धामिति शुक्लवर्णकम्। **रक्त**मिति कुसुम्भनील्याद्यन्यतमोपरक्तम्। **विचित्र**मिति बहुवर्णम्। विभक्तिः विभागः {५१-५२}।

तासामिति (श्लो ५६) नागयोषिताम्।

(सालककुन्तलमिति) अलकाः स्थाने कुन्तलाः कुंचिताः केशा यत्र तत्तथोक्तम्। **नीलप्रायं** वस्त्रमित्याभीरीणामेव {६७-६६}।

ह्रदयं व्याप्नोति ह्रद्यत एवेति **वेषः** केशरचनादिः। आ समन्तात् भ्रियते पोष्यते कान्तिर्येन तदाभरणं शिखाव्यालादि। क्षुरकर्म अलकादियोजना। **परिच्छदः** विचित्रवस्त्रयोगः। एतद्वेषादि प्रलम्भेन {७२}।

देशो वन्त्यादि, **अवस्था** रतिशोकाद्याः। **तत्रे**ति पुरुषेष्वेव। अङ्गनानां रूपपरिवर्तनसंपादनात्मकवर्णवर्तना कर्तव्या न स्त्रीपात्रेष्विति यावत्। **संयोगजा** इति वर्णद्वयश्लेषेणोत्थापिताः, उपवर्णास्तु बहुवर्णमिश्रणेनेत्यर्थः {७३-८३}।

बलस्थ इत्यभिभवनकारी, ततो न्यो वर्णो द्विगुण इति, अस्यापवादमाह **नीलवर्णादते** इति। तत्र तु यो भागविधिस्तं दर्शयति **नीलस्यैक** इति **वर्णके** नीलस्य भाग इत्यर्थः। वर्तनाशब्दं पर्यायैर्व्याचष्टे **वर्तनाच्छादन**मिति। **प्रकृतिस्थित**मिति देवमानुषादिस्वभावविभागेनावस्थितमित्यर्थः। वर्तनस्य प्रयोजनमाह **यथा जन्तुः स्वभावं** स्वमिति। **जन्तु**रिति जीवात्मेत्यर्थः स च शुद्धनिर्मलानन्तचिदानन्दप्रकाशः स्वातन्त्र्यरूपं स्वमनपायिनमपि स्वभावं परित्यज्यान्यद् व्यतिरिक्तमपि दैहिकं देहभवं शरीरकरणोचितं तत्स्वभावं भजते, यतो देहान्तरं तद्देहविशेष उपसमीपे आ समन्तात् श्रितः अतिनैकट्येन तदात्मवत्त्या प्रतिपन्न इत्यर्थः {८४-८६}।

एतदुक्तं भवति– यथा परमात्मा स्वचैतन्यप्रकाशमत्यजन्नपि देहक चुकोचितचित्तवत्तिरूषितमिव स्वरूपमादर्शयति, तथा नटो पि आत्मावष्टम्भमत्यजन्नेव स्थाने लयतालाद्यनुसरणाद्यायोगाद् देहस्थानीयेन वर्तनादिवेषपरिवर्तने(न) तदुचितस्वभावालिङ्गितमिव स्वात्मानं सामाजिकान् प्रति दर्शयति, प्रेक्षकपक्षे न नटाभिमानस्तत्र हि रामाभिमान इति दर्शयति। एतदाशयेनैवास्माभिस्तत्र तत्र प्रतीतिरेव व्याख्याता रसाध्यायादौ।

सजीवमाहार्यभेदं व्याचष्टे देवदानवगन्धर्वेत्यादिना, शैलप्रासादादीनि निर्जीवत्वे प्रस्तुतत्वेन परिगणितान्यपि अवस्थाविशेषेषु नाट्यधर्मेण सजीवत्वे पीत्याह **शैले**त्यादिना, अथवा कारणोपेता इत्यादिना च {८७-६४}।

अङ्गरचनानि विभजति **वर्णाना**मिति गौरादीनाम्।

नगाः पर्वताः। जलमाकाशमिति तदधिष्ठात्री देवतेह विविक्षिताः। **जम्बुद्वीपस्य** वर्ष इति भारते। **ते चापी**ति उत्तरकुरवः {६५-१०३}।

पितरस्तु समा नरा इति तुः स्वार्थे पितरो नराश्च तुल्या इत्यर्थः। **कुकर्मिण** इति कुत्सितं निन्दितं कर्म येषाम्। **आयस्तं** शरीरक्लेशबहुलं कर्म येषामित्यर्थः। कुजातयो धीवरडोम्बाद्याः बदरप्रभावत्त्वे प्यपवादमाह तपः स्थिता असिता इति। अनेन तु ऋषीणामपि तपोनिरतानामसितत्वमित्यपौनरुक्त्यम् {१०४-१०७}।

व्यापकं लक्षणमाह **कारणव्यपदेशेनेति**। कारणं यथा क्लेशबहुला क्रिया कृष्णत्वे। **आत्मच्छये**ति कविबुद्धयनुसारेणेत्यर्थः।

तत्रेति भारते। **शुद्ध**मिति क्षुरेण, सर्वथा चासितं, **श्यामं** पूर्वं क्षुरकर्म योजितमपीदानीं निवारितं तद्योजनाङ्कम्। **विचित्र**मिति क्षुरकर्त्रिकाकर्मणोत्पादनकर्मणा च रचितविचित्रसंनिवेशम्। **रोम**शमिति यथोत्पन्नम्। **लिङ्गि**नामपि ब्रह्मचारिवानप्रस्थादीनाम्।

''**मध्यस्था ये च पुरुषा ये च दीक्षां समाश्रिताः**''

इत्यर्धं–

''शुद्धं तु लिङ्गिनां कार्यं तथामात्यपुरोधसाम्''{११६}

इत्यर्धस्यानन्तरं योज्यम्, लेखकदोषात्तु स्थानान्तरे दश्यते। **मध्यस्थ** इति नोत्तमानामधमानामित्यर्थः। **यौवनोन्मादिन** इति अमात्यपुरोधसो पीति भावः {११८}।

शुद्ध इति शुक्लवस्त्रादिः प्रायः। **प्रायत्निका** इति प्रयत्ने भवा विनीता इत्यर्थः {१२४}।

चीरमिति अविता स्थूला च वक्षत्वक्, वल्कलं तु तद्विपरीतम्, यथा भूर्जपत्रत्वक्, मगादेश्चर्म।

(**नक्षत्रे**ति) {१३६} नक्षत्रोत्पातप्रशमनार्थं यन्मङ्गलं, एतच्च नैमित्तिकस्य श्राद्धदेवार्चनदेरप्युपलश्रणम्। प्रकृतिरूपं शिरः प्रतिशिरः

(**वेष्टने**ति) {१४६} वेष्टनार्थमाबद्धं पट्टमुष्णीष्प्रायं येषु। त्रिखण्डाश्चूलिकाः (त्रिशिखण्डम्)।

(**काकपद**मिति) {**१५५**} काकपक्षवद्यत्र केशविच्छेदः।

प्रहरणोपेता इति युद्धोपयोगिन इत्यर्थः। तथा च नागास्त्रे दत्ते सर्पाकृतिः प्रदर्शनाया, एवं नसिंहास्त्रे तदाकृतिरित्यादि। (आयुधानां प्रमाणं) दर्शयति (**भिण्डि**रिति। व्रजं..... चतुस्तालम्)। **चक्र**मिति खड्गादियुद्धे पवारणम् {**१६४-१७२**}।

यद्यस्येति। यस्य शास्त्रस्य यद्विषयीभूतं पुरुषस्य वा तदनुसारेण तस्यवस्तुनो **लक्षणमूह्य**मिति। ऊह्यशब्दे भेदमाह, परिपूर्णलक्षणमूपजीव्यम्, (यथा) खड्गलक्षणे प्युपजीव्यमाने लोहादिनिर्मितत्वमप्यूह्यते। तच्च तस्मान्नाट्योपयोगरूपमूहापोहाभ्यां कर्तव्यमिति। **लक्षणानी**ति (**लक्षणै**रिति?) **विश्वकर्म**मते बहुभेदं महेन्द्रध्वजस्य लक्षणमुक्तमित्यर्थः। न हीनश्चेति अन्यवेणुसंघर्षे पूर्णो वयवतः स नेष्यत इत्यर्थः {**१७३-१७४**}।

पुष्यवेणुं व्याचष्टे **भवेद्वेणुर्दीर्घपर्वे**ति लक्षणेन लेखा **शीर्षविभागा** इति यत्र द्विशिरास्त्रिशरा इत्यादि दश्यते, यत्र वा निजशिर एवाच्छाय शिरो न्तरं प्रदर्श्यते। प्रतिपादप्रतिहस्तादेष एव कल्पः। बिल्वस्य मध्यमज्जा **सि**रश्च वक्षत्वगादिः। कथं सा कर्तव्येत्याह **स्विन्नेने**ति भस्मना तुषचूर्णेन वा सुसमाहिता छादितच्छिद्रेत्यर्थः। न स्थूलामिति गुरुत्वभयात्। **नानता**मिति पेलवात्, छेद्यमित्यवयवच्छिद्रोत्पादनार्थम् {**१८०-१८६**}।

अवटुरिति कर्णशष्कुली {**१६४**}।

महात्मनेति विश्वकर्मणा {**२००**}। **विभाव** इति भावनामात्रमित्यर्थः {**२०३**}।

लघुकर्माणीति येषु क्रियमाणेषु लाघवेन क्रिया संपद्येत {**२०५**}।

तालीयैरिति तालपत्रैः {**२०८**}। **भाण्डै**रिति अलाबुदलखड्गादिभिः {**२१०**}।

मधूच्छिष्टं सित्थकम् {**२१२**}

सुधामकोक्ता **विद्या** हस्तलाघवादि माया चक्षुर्बन्धादिका। एनमध्यायमुपसंहर(न्नभिनये वक्तव्यशेषमा) सूत्रयति **आहार्याभिनयो ह्येष** इति शिवम् {**२२७**}।

आहार्याभिनयाध्याये वत्तिरेषा यथाक्रमम्।
कृता**भिनवगुप्तेन** ग्रन्थिस्थानेषु तत्त्वतः।।

इति श्रीमहामाहेश्वराभिनवगुप्ताचार्यविरचितायां
नाट्यवेदविवतावाभिनवभारत्यामाहार्याभिनयाध्याय एकविंशः।

श्रीः

नाट्यशास्त्रम्

द्वाविंशो ध्यायः

(सामान्याभिनयः)

भेदेनात्माभिमुखतां नयन्तं भेदकारणम्।
सामान्याभिनयाकारगर्वमूर्तिं शिवं नुमः।।

इहान्यदित्युपर जकं च अभिनयं चान्याभिनयं समं च तदिति तत्र भवः सामान्याभिनय इति परमार्थः। **कोहल**मतानुसारिभिर्वद्धैः सामान्याभिनयस्तु षोढा भण्यते। तथा हि **कोहलः**–

शिष्टं कामं मिश्रं वक्रं संभूतमेकयुक्तत्वम्।
सामान्याभिनये यत् षोढा विदुरेतदेव बुधाः।। इति।

तत्र सामान्यमिति साधारणमुच्यते तेन सर्वेष्वभिनयेषु यद्रूपमवशिष्टं पूर्वं नोक्तमवश्यं वक्तव्यं च कविनटशिक्षार्थं तद्येनाध्यायेनाभिधीयते स सामान्याभिनयः, सो भिनयेषु सामान्यभूतः साधारणभूतो भिनयविषयत्वात् स्ववाच्याभिमुख्यनयनाद्वाभिनय इति व्युत्पत्त्या। तथा हि सात्त्विकस्य हावभावहेलादिना विशेषः पूर्वमनुक्तो भिधीयते। विषयश्चैवं '**षडात्मकः शारीरः**' (२२-४३) इत्यादिना '**आलापश्च प्रलापश्च**' (२२-५२) इत्यादिनाङ्गिकवाचिकयोः।

ननु 'अङ्गाद्यभिनयस्यैव यो विशेषः' (२५–१) इत्यतः चित्राभिनयात् को स्य विशेषः, उच्यते– तत्र वागङ्गसत्त्वव्यामिश्रत्वेन चित्रता। इह तु प्रत्येकनियतस्यानुक्तस्य विशेषान्तरस्याभिधानमिति। तथा हि तत्र चित्रशब्दं पठिष्यति 'अनुक्त उच्यते चित्रः' इति (२५–१) तथा (चेह तु) सामान्याभिनयः कामोपचारः, स हि सकलप्राणिवर्गसाधारण आभिमुख्यं नयति च सर्वं जन्तुवर्गमिति वागङ्गसत्त्वलक्षणेन सकलेन सामान्यात्मना चाभिनयेन अभिनीयत इति। तत्कामोपचारः स्त्रीपुरुषस्वभावः तदवस्थाभेदेनहाभिनीयत इति सामान्याभिनयो यमध्यायः। अत एवैतदध्यायशेषभूतकामोपचारप्रतिपादकमेवाध्यायं वैशिकोपचाराख्यं मन्तव्यम्। तथा सामान्यमिति समानानां कर्म सामान्यं च तदभिनयनं च। तत्तेनैकमेवाभिनयं गमयितुं यथासम्भवं बहूनामभिनयानां याभिनयक्रिया एकं तदेवाभिनयक्रियारूपं कर्म समानानां सताम्।

नन्वेवमेकत्राभिनये किं बहुभिरभिनयैः। तत्र केचिदाहुः– स्वोपस्थानेषु साध्येषूपस्कारांशो व्यापार इति। तच्चासत्, नहि नाटकादौ सूत्रेष्विवोपस्कारो युक्तः। स ह्यत्र प्रत्युत दोषाय, यथाह– ''काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्' इत्यादिना। प्रविस्पष्टपराकरणं तत्र निमित्तं स्पष्टार्थेन वाक्यमात्रेण तत्सिद्धेः।

तत्रोक्तं **श्रीशङ्कुकादिभिः**– इह लोकानुसारिनाट्यात् लोके सुखदुःखाद्यावेशविवशो वक्ता, तत एव स्तम्भस्वेदादिभिर्बहितं अवधानबन्धो पि गुणक्रियादिस्वरूपसाहचर्याभ्याससंस्कृतः(तं?) शब्दप्रयोगः(गं?) तदुपचिताङ्गोपाङ्गविकार––संकीर्णमेव कुर्वाणो दश्यते– इति।

१) यत्र त्वसत्ययो वक्तव्यं तदस्य निरुक्तमष्टमे ध्याये–

विभावयति यस्माद्धि नानार्थार्थप्रयोगतः।

शाखाङ्गोपाङ्गसंयुक्तं तस्मादभिनयः स्मतः।। तुलना– **ना.शा.** ८.८

इत्येवमन्तं श्लोकं व्याचक्षाणैः। (न तथा) सामान्यस्य समानीकृतसकलाङ्गोपाङ्गकर्मणा सतो भिनयनं येनालातचक्रप्रतिमता प्रयोगस्य जायते। यथोक्तं 'प्रयोगश्चास्य कीदश' इति, यद्वक्ष्यते

शिरोहस्तकटीवक्षोजङ्घोरुकरणेषु तु।

समः कर्मविभागो यः सामान्याभिनयस्तु सः। (अ २२.७३) इति

२)सामान्य इत्यनेनाशेषाभिनयविशेषा आङ्गिकादिगता उपलक्षिताः तत्कृतो भिनयः। यद्वक्ष्यति–

कृत्वा साचीकृतां दष्टिं शिरः पार्श्वे नतं तथा।

तर्जनीं कर्णदेशे च बुधः शब्दं विनिर्दिशेत्।। इति (२२.८२)

३)अत्र हि दष्टिविशेषः शिरोविशेषो हस्तविशेषश्च संभूयैकमभिनयं प्रत्येको भिनयः संपद्यते।

४)एकैकेन तु शब्दाभिनयस्य कापि मात्रा निष्पद्येत, एवमेव ततीयपक्षादस्य विशेषः। तत्र हि एकैकस्याप्यभिनयने स्य (संभूतत्वेन) सामर्थ्यम्।

५)तथा विघ्नसंभावना विहीनसकलसाधारणस्पष्टभावसाक्षात्कारकल्पाध्यवसायसंपत्तये सर्वेषां प्रयोग इत्युक्तम्।

६)तथाभिनय इति तद्विशेषो यत्र उत्यते, स च साधारणरूपः सामान्याभिनयः। तथा हि– प्रकटाक्षप्रेक्षणाद्यं यं यत्नं कुशलं प्रयोक्ता गह्णाति तेनैव तदुचितशिरःकर्मान्तमस्य संपाद्यम् –इति षोढा गुरुभिर्निदर्शितः।

वयं तु (न) मन्महे– रसभावाध्याययोर्वागङ्गसत्त्वजास्त(त्त)द्रसभावेषु दर्शितास्ते कथं प्रयोज्या इत्ययमध्यायः। यथा हि किराटगहाद् गन्धद्रव्याण्यानीय गान्धिकेन समानीक्रियते अस्येयान् भाग इदं पूर्वमिति, एवमत्राध्याये भिनयाः। तत्र श्रङ्गारस्य प्राधान्यात् तत्रैवाभिनयानां भागयोगेन पौर्वापर्ययुक्त्या च समीकरणं सत्त्वातिरिक्त इति। तेन

सामान्यानां कर्म समानीकरणं भावनप्रायमभिनयविषयं स्वयं चाभिनयरूपं सामान्याभिनयं श्रङ्गारमुखेन चान्यदुपनेयमिति। तदेतत्सर्वं हृदये कृत्वा मुनिराह **सामान्याभिनयो नाम ज्ञेय** (२२.१प्रथमार्ध) इति। नाम्नैव ज्ञातुं शक्यो न्वर्थत्वादस्येति भावः। तत्तु व्याख्यातम्।

नन्वेवं तत्र न किञ्चिदवशिष्यते वक्तव्यमित्याशङ्क्यावत्याह सामान्याभिनयो नाम ज्ञेय (२२.१.प्रथमार्ध) इति। नामशब्दः प्रसिद्धिद्योतकः। तदयमर्थः— यद्यपि ज्ञेयः (स्थिर)विषये सामान्याभिनयः प्रसिद्धो पि वाक्यार्थबलात्, तथापि यो वागङ्गसत्त्वेभ्यो जातः तद्विषयः सामान्याभिनयो व्याख्यातः। **तत्रे**ति विषये तन्निरूपणायामस्माकं प्रयासः कार्य एव। आहार्यो हि यद्यप्यभिनयान्तरेभ्यो न्यूनस्तथापि तस्य सिद्धस्वरूपत्वान्नात्रोपादानम्। आङ्गिकादिक्रियाणां हि पूर्वापरीभूतरूपतया सम्भावनीयवि(शेष)भावनादेकीकारात्मा सामान्याभिनयो यत्नसंपाद्य एव। आहार्यस्य तु तन्मध्ये स्थिरत्वेनावस्थानाद्यत्न सिद्ध एवासौ। अत एवाहार्ये पि भविष्यति सामान्याभिनयचिन्ता। न तु सर्वथैवास्य तत्र त्यागः। तथा हि ''**वागाङ्गालङ्कारैः''** (**२२-१४**) इति लीलायां, ''**माल्याच्छादनविलेपनभूषनाणां**'' (तुलनाः**२२-१६**) इति विच्छित्तौ, ''**वागङ्गाहार्यसत्त्ववेगेन''** (**२२-१७**) इति विभ्रमे, तस्य सातिशयनिरूपणं भविष्यति।

अन्ये त्वाहुः— आन्तरभावानपेक्ष एवाहार्यो दण्डकमण्डल्वक्षसूत्रादिर्व्रतविशेषादिमात्रं गमयति, न तु भावं कञ्चित्। उज्ज्वलो हि वेशो न रतिं गमयति नापि मलिनः शुचम्। तदभावे पि हि ते भवत एव। औचित्यमात्रं ह्येतद्रतावुज्ज्वलो वेषः शुचि मलिन इति। ये त्वेते गुणद्रव्यादिबाह्याभिनयाः सुखदुःखादिभावनिश्चयाश्च ते चित्तवत्तीनां बाह्यार्थानां च कार्यकारणभावस्य नियतव्यक्तिवाद् भावापेक्षा इति। वागङ्गसत्त्वाभिनया अन्योन्यं सहचर्यमाणाः, नत्वेवं तेष्वाहार्य इत्यस्यानुपादानक्रिया। एतच्च न मुनेर्मतमित्यावेदितमस्माभिरुपाङ्गाभिनयाहार्याभिनयाध्याययो (८,२२)रित्यास्ताम्।

नन्वेवं त्रितयनिष्ठो यद्यपि यत्नस्तथाप्यभिहितत्वेन किमिह वक्तव्यमित्याह **नाट्यं सत्त्व** इति। तुशब्दः सत्त्वशब्दानन्तरं द्रष्टव्यः। सात्त्विके त्वभिनये नाट्यं प्रतिष्ठितम्। रसमयं हि नाट्यं रसे चान्तरङ्ग सात्त्विकस्तस्मात् स एवाभ्यर्हित इति तद्गतमेव वक्तव्यं पूर्वमभिधेयमित्याशयमशेषचिरन्तना आक्षेपपूर्वकं समादधति— त्रिषूद्दिष्टेषु वक्तव्यं वागङ्गसत्त्वेषु नाट्यं प्रतिष्ठितमिति सो यमाक्षेपः। प्रतिसमाधानं तु यदि वागङ्गजमेव स्यात् प्रयत्नं विनापि सिद्धः स्यात्, वागङ्गसत्त्वजो सौ सत्त्वे च नाट्यं प्रतिष्ठितम्, सत्त्वं च मनस्समाधानजम्। तस्माद्भूयसा प्रयत्नेन विना (न) सिद्ध्यतीति। एतत्तु चोद्यसममेवोत्तरं सत्त्वस्य हि प्रयत्नाधिक्यमुपयोगीति वागङ्गयोरुपादानमलमेवेति— अलमनेन {**१**}।

ननु को त्र हेतुः सत्त्वे नाट्यं प्रतिष्ठितमित्याशङ्क्या **सत्त्वातिरिक्तो भिनय** इति। सत्त्वमिति सात्त्विको भिनयः, तेन वागङ्गा(सत्त्वा)भिनययोर्यत्रैकत्रैवाभिनये क्रमेण युगपद्वा प्रयुज्यते तत्र परे (रं?) सात्त्विकस्या(न्य)द्वयापेक्षयाधिक्यं भवति। तत्प्रशस्यतमाभिनयक्रिया

(ज्येष्ठा) भवति। सुष्ठु सम्यगभिमुखीभावं सौष्ठवं नीतो भवति रसपर्यन्तत्वात्प्रीतेरिति भावः।

अथ सात्त्विको न्यतुल्य एव, तदभिनयनं प्रशस्यं संपद्यते परमिति यावत्। यदि त्वितरापेक्षया सात्त्विको न्यूनस्तर्हि अभिनयक्रिया स्वरूपेणापूर्णा संपद्यत इत्यर्थः। सात्त्विकाभावे ह्यभिनयक्रियानामापि नोन्मीलति। अभिनयनं हि चित्तवत्तिसाधारणतापत्तिप्राणसाक्षात्कारकल्पाध्यवसायसंपादनमिति, अत एवोक्तं सत्त्वे नाट्यं प्रतिष्ठितमिति।

अव्यक्तरूपमित्यादिकं प्रबन्धं **श्रीशङ्कुकादय** इत्थं नयन्ति– कस्मात् पुनः सत्त्वं प्रयत्नातिशयमपेक्षते। उच्यते– रामाद्यनुकार्यगतं भावसंश्रयं तद्भावनाप्रकर्षजं रोमा चादिसंपादकं यदान्तरं नाट्यस्य सत्त्वं तदव्यक्तं अस्फुटं केवलं रोमा चादिभिर्गमकत्वाद्गुणभूतैर्विज्ञेयं, अन्यथा हि सुखाद्यभावे कृत एषामुद्भव इत्यहेतुकं स्यात्। तत्र सत्त्वं भावस्य स्थाने प्रसङ्गतो यो मुख्यो रसस्तेनोपेतं, रसेनानुकार्ये च प्रकृष्टेन यत्नेन ज्ञेयं सुखादि तस्य ये रोमा चादयः कार्यास्तत्तत्साध्यभावे यतः सत्त्वात्प्रवर्त्यन्ते तन्मयः प्रयोगः कथं प्रकृष्टयत्नमन्तरेण सिद्ध्येदिति तात्पर्यम्। न केवलं (प्रकृत) रोमा चादावभिनये संपाद्ये नटस्य सत्त्वमुपयुज्यते यावदङ्गनानां ये लङ्कारास्तेष्वपि। तथा हि तावत् कटककेयूरादिभ्यो प्यभि विकारानयने भिनयं (?) रूपलावण्यादिवत् स्तनकेशादिवच्च युवतिरियमिति प्रतीयते, न त्वभिनेयं तेषां किंचिदस्ति केवलमलङ्कारत्वमेषाम्। न च प्रयोगाभिनिविष्टत्वाद्युवतेरपि प्रयोज्यास्ते प्रयोक्तुं शक्या मनस्समाधानमन्तरेण। तत्र मनसो देहवत्तित्वात् समाधानं सत्त्वमुपचारादेहात्मकम्। देहे हि मनस्समाधातव्यम्, तत ईषद्विकारो भावः स एव प्रौढतायां तदतिशये च हावो हेला च। तथा च भावः तत्र कटकादाविव हेम्नः स्थितः। तत्र तु मदनानपेक्षी विकारो भावः येनाकामयमा नापि तरुणी कामयमानेव लक्ष्यते, तस्यैव तु मदनापेक्षत्वेन प्रौढतायां हेलात्वमेव, यौवने क्रमादुपचीयमाने स्वात्मेन्द्रियमनःस्वास्थ्ये हावः हेला शरीरविकारः धात्वादिवैषम्यात्तु तदवसादे प्रविलय इति हेलातो भावयुक्तो भावतै (हावतै?) वेति नानपेक्षितहेत्वन्तरा यौवनकृताः शरीरविकारा अपि प्राधान्येन वक्त्रगात्रगता गुणा इव भावा इव नाभिनयाः। किं त्वीषद्भिद्यमानैर्वागाद्यभिनयैर्मुखरागेण च संभवत्तया प्रतीता अप्रतीता अलङ्कारा उच्यन्ते। तदेतदुक्तमव्यक्तरूपमित्यादिना समाख्याता बुधैर्हेला ललिताभिनयात्मिका (**२२-११**) इत्यन्तेन। एतेभ्यस्त्वङ्गजेभ्यो न्ये शीलकृता इति स्वाभाविका दश लीलाद्याः सत्त्वबलेनैव प्रयोज्याः। अन्ये तु निसर्गजत्वेनायत्नजाः सप्त शोभाद्या उक्ताः (**२२-३३**)। तत्रैते शोभाद्याः स्त्रीगताः पुरुषगताश्चान्ये। सर्वे चैते अतत्स्वभावेनापि नटेन सत्त्वबलात्प्रयोक्तव्या इति बहुप्रद(र्शनविलसितं) व्याख्यानं न ग्रन्थज्ञेभ्यो रोचते।

तथा हि– किमिदमनुकार्यं(र्यगतं?) कवेः शिक्षार्थमुपादिश्यते, तथानुकर्तगतं नटस्य (वा)। प्रथमस्तावद्यदि पक्षस्तदव्यक्त रूपं सत्त्वमिति सत्त्वस्य कथं प्रयोक्तरि स्थितिः, सत्त्वाद्भावः समुत्थित इति ह्युक्तम्। नटे च सत्त्वं, अनुकार्ये च भाव इति किं केन संगच्छते। स्वनुकार्ये च प्रस्तुते प्रागल्भ्यमाधुर्ये परत्र (पात्र?) गते उच्येते इति किमेतच्च, प्रतिलव (विलय?) क्रमेण भावहावहेलनां परस्परकार्यकरत्वं प्रथमं तावद्व्याख्यातम्, तदप्यसत्। न हि प्रतिसंहारे कारणता कार्यस्य व्यपदिश्यते। न हि पथिव्यादिभूतानि प्रविलयतन्मात्राणां कारणानि, तानि चाहंकारस्य, सो पि च बुद्धेः, सा च प्रकृतेः, प्रकारो वा तदहङ्करणमिति व्यवहारः। प्रति (संहार इव) प्रकृतेः कार्यदशायामपि संभवान्न पूर्वः प्रादुर्भावः तत्कथं कार्यता तदहंकारादेः कारणत्वमेतदिति चेत् समानमेतदिहापि। यदि हि भावो हावतां प्राप्तः सो पि हेलात्वं च ततो हेला विलीयते। आख्यास्था दोषात् तदा हावः स्थित एव, न हेलया **हेला परं** कार्यकारणभावव्यवहारस्यावकाशः। किं चैते देहविकाराः प्रयत्नेन निर्वर्त्या इति (साक्षिण इति) यदुच्यते तस्मिन्नाट्यस्य संसारे नाम तदस्ति यत्प्रयत्नेन निर्वर्त्या इति सात्त्विकाद्वैतम्। किं च विभावानुभावव्यभिचारिव्यतिरिक्तमपि यद्यत्रोपयोगि संभवति तद्वथैव प्रतिज्ञातं तत्संयोगाद्रसनिष्पत्तिरिति, गीतातोद्यरङ्गादिबलेनेदं व्यवस्थितं सामान्याभिनय इत्यभिधानात् अनभिनयवत्त्वे चास्य सत्त्वनिर्वर्त्यस्यापि को नाट्ये उपयोगः कथं च सामान्याभिनयेनेत्यपरामष्टाभिधानम्। एतत्सर्वं मुनिमताननुप्रविष्टैः परं श्रद्धीयते नामेत्यास्तां तावत् {२}।

प्रकृतव्याख्यानमुच्यते– इहोक्तं सत्त्वे नाट्यं प्रतिष्ठितं तेन सात्त्विकभावानुनयो वक्तव्यः तस्य च किंचिदुक्तमिति दर्शयति **अव्यक्तरूपं सत्त्वं हि विज्ञेय**मिति। इह चित्तवत्तिरेव संवेदनभूमौ संक्रान्ता देहमपि व्याप्नोति। सैव च सत्त्वमित्युच्यते। तत्र चाव्यक्तं संवित्प्राणभूमिद्वयानिपतितं यत्सत्त्वं तद्भावाध्यायसंश्रयत्वेनैव विज्ञेयम्। तस्य च ये गुणा देहपर्यन्तां प्राप्ता धर्मरोमा चादयः ते पि तत्रैवोक्ताः किंचित्। यथास्थानमिति यस्य रसस्य यत् स्थानं, तद्यथा श्रङ्गारस्य (उत्तमौ) स्त्रीपुंसौ, रौद्रस्य रक्षोदानवादिः, भयानकस्याधमप्रकृतिः, तदनतिक्रमेण रसेषूपेतं सम्बद्धं तत्सत्त्वम्। भावशब्देनात्र भावाध्यायः (उक्तः)।

एतदुक्तं भवति– चित्तवत्तिरूपं यत्सत्त्वं तद्भूकायसंक्रान्तप्राणदेहधर्मतावशाद् भवदपि भावाध्याये रसाध्याये च वितत्य निरूपितमिति पुनः किं तदभिधानेन {३}।

किं तस्य भूसत्त्वस्य रूपं वक्तव्यमित्याह **अलङ्कारास्तु नाट्यज्ञै**रित्यादि। अयमभिप्रायः– संवेदनरूपात्प्रसतं यत्सत्त्वं तद्विचारितम्। अन्यत्तु देहधर्मत्वेनैव स्थितं सात्त्विकं, यतः सात्त्विकेष्वेवोत्तमेषु दश्यते, तत्र स्त्रीणामुत्तमत्वं श्रङ्गाररसपर्यन्तमेव, पुरुषाणां तु वीररसविश्रान्तम्। शान्तस्तु प्रधानत्वेन न प्रयोगार्ह इत्युक्तप्रायः। स्त्रीगतेन श्रङ्गारेण पुरुषनिष्ठेन वीरेण च सार्वलौकिकः पुमर्थो व्याप्तः। न च सत्त्वमयमुत्तमस्त्रीरूपं विमुच्यान्यत्रामी चेष्टालङ्कारा विनिवेशं लभन्ते (न) सात्त्विकास्तावद्राजसतामस

शरीरेष्वसंभवात्। चण्डालीनामपि रूपलावण्यसंपदो दश्यन्ते, न तु चेष्टालङ्काराः तासामपि भवन्त उत्तमतामेव सूचयन्ति स्ववर्गापेक्षया वा संपद्भ्रंशादिना। एतदुक्तं **भट्टतोतेन**– न चालङ्कृतीनामत्र लक्षणं महदाश्रयमिति– ते च दष्टाः सन्तः उत्तमेयं श्रङ्गारसमुचितेति विभावादिसुविवेकविहीनं व्यभिचारिरूपदशान्तरसंस्पर्शशून्यं विशेषविरहितमेव सामान्यरूपं श्रङ्गारमभिनयति(न्ति?), सामान्याभिनया न तु लावण्यादिवदनभिनेया एव(वं?) शरीरविकारा अनुभावा एव तेन विभावानुभावव्यभिचारिसंयोगादित्येवमेवैतत्। एवं पुरुषगता अपि शोभादय उत्साहप्रकृतिरयमित्येतावन्मात्रं गमयन्तः सामान्याभिनया एव। किं च यत्किंचिदङ्गनानां श्रङ्गारोचितं चेष्टितमभिनीयते तत्रैव चेष्टालङ्कारा अवश्यमभिनेया इति सामान्यवत्सर्वावस्थानुयायित्वेनाभिनीयत इति (च) सामान्याभिनया एव प्रधानपुरुषस्य शोभादयः, तथैते वागङ्गसत्त्वाहार्याणि स्वभेदसहितानि यथासंभवं संभूयाभिप्रविष्टानि यथा किलिकिञ्चिते विच्छित्तौ विभ्रमे चेति सामान्याभिनया वागङ्गाहार्ययोगे पि च सत्त्वप्रधानतया सात्त्विका इत्युक्ताः।

एवं तैरेव सामान्याभिनयैः प्रधानप्रमदापुरुषद्वारेण विश्वमेव व्याप्तम्। ते चात्राध्याये वक्तव्याः, तदाह– **अलङ्कारा**स्त्विति तुर्व्यतिरेके, अन्ये भावाध्याय एवोक्ता, एते तु वक्तव्याः ते तु तत्र नोक्ताः। यत एते केवलमलङ्कारा देहमात्रनिष्ठाः न तु चित्तवत्तिरूपाः। **भावसंश्रया** इति रतिभावमात्रमभिनयन्तीत्यर्थः। ते हि यौवने उद्रिक्ता दश्यन्ते बाल्ये त्वनुद्भिन्ना वार्धके तिरोभूताः। यदाह–

यावन्त एते तरुणीजनस्य भावाः समं कुट्टमितादयो पि।
रात्रावदश्यानिव तान्घटादीन्कामप्रदीपः प्रकटीकरोति।। इति।

वक्त्रगात्रजा इति देहविकारमात्ररूपा एव परं न हि यथा बाष्पादीनामन्तःप्राणभुवि कण्ठरोधादिरूपं लक्ष्यते, तथा चेष्टालङ्काराणां गात्राणि (वक्षोनितम्बादीनि), वक्त्रं प्राधान्यात् पुनरुपात्तम्। तत्र देहविकाराः केचन क्रियात्मका अपि ते च प्राग्जन्माभ्यस्तरतिभावमात्रेण सत्त्वाद्बुद्धेन देहमात्रे सति भवन्ति, त एवाङ्गजा उच्यन्ते, तथा भावो हावो हेला च। अन्ये त्वद्यतनजन्मसमुचितविशिष्टविभावानुप्रवेशस्फुटीभवद्रतिभावानुविद्धे देहे परिस्फुरन्ति। ते स्वाभाविकाः स्वस्माद्रतिभावाद् हृदयगोचरीभूताद् भवन्तीति। तथा कस्याश्चित् कश्चिदेव स्वभावबलाद् भवति, अन्यस्या अन्यः, कस्याश्चित् द्वौ तत्र इत्यादि, अतो पि स्वाभाविकाः {४}।

भावहावहेलास्तु सर्वा एव सर्वास्वेव सत्त्वाधिकासूत्तमाङ्गनासु भवन्ति। तथा शोभादयः सप्त। एवमङ्गजाः स्वाभाविकाश्च क्रियाजन्मानः (क्रियात्मनः?), अन्ये तु गुणस्वभावाः शोभादयः ते चायत्नजाः। यत्नजाताः क्रियात्मका उच्यन्ते, (इच्छातो) यत्नस्ततो देहक्रियेति हि पदार्थविदः। ततो न्ये यत्नजाताः। तदेतदाह– **आदौ त्रयो ङ्गजा** इति।

तेषामलङ्काराणां मध्ये। **आदा**विति प्राच्यवासनानुविद्धदेहमात्रप्रभवित्वात् पूर्वमेव भवन्तीति यावत्। भावोपबंहिता इत्युभयशेषः। स्वाभाविका अयत्नजा स्वरतिभावेन प्राणिता भवन्ति। (अनुमति) **पुन**रिति सत्त्वानां, पुस्तचित्रालेख्यलिखितानामेव नैते भवन्ति। तत्र त्रयाणां तावदुपक्षेपकर्त पीठबन्धमाह **देहात्मकं भवेत्सत्त्व**मिति। शरीरस्वभावं तावत्सत्त्वं संभाव्यते उत्तमशरीरतां प्राप्तमित्यर्थः। ततो भावः ततो पि हावः तस्मादपि हेला। एवं तीव्रतरसत्त्वे देह एव। यदा तु तथाविद्धं सत्त्वं न भवति तदा प्राक्तनरतिवासनोत्थं अत्र सहकार्यन्तरपेक्षणीयं वर्तत इति दर्शयति–

हेला हावश्च भावश्च परस्परसमुत्थिताः।
सत्त्वभेदे भवन्त्येते शरीरे प्रकृतिस्थिताः।। इति

एक**श्च**शब्दो पिशब्दार्थे, अपरः समुच्चये। प्रत्येकं हि समुच्चये द्योत्ये ततीयो पि च पठितव्यः स्यात्। तदयमर्थः– प्र(कृ)तिस्थिता देहस्वभावमात्रापेक्षा अप्येते परस्परसमुत्थिता भवन्ति। तथा हि– कुमारीशरीरे प्रौढतमकुमार्यन्तरगतहेलावलोकने सति हावोद्भवो भावश्चेदुल्लासितपूर्वः, अन्यथा हि भावस्यैवोद्भवः। एवं हावे पि दष्टे भावो हेला वा। यदा तु हावावस्थोद्भिन्ना पूर्वं परत्र तु हेला दश्यते तदा हेलातो पि हेला। एवं हावाद्भावो भावाद्भाव इति च वाच्यम्। एवं परकीयभावादिश्रवणात् तथाविधेयाभिधेयरमणीयकाव्याकर्णनादेरपि हेलादीनां प्रबोधो भवतीति मन्तव्यम्। एतदन्योन्यसमुत्थितत्वम्।

ननु यद्येते प्रकृतिस्थितास्तत एवाङ्गजास्तत्किमन्यापेक्षणेनेत्याह (वागङ्गेत्यादिना)। वागङ्गमुखरागेणेत्यादिपाठः परं भावाध्यायश्लोको नास्य तुल्यो र्थस्त्वन्य एव, न तु श्रीशङ्कुकेनार्थं(र्धं?) एकार्थं मन्तव्यम्। एवं चित्तवत्तिलक्षणं देहधर्मस्येति सर्वसंमतम्। तस्मादयमर्थः– वागङ्गमुखरागैः सत्त्वेन च लक्षितो भावः वागङ्गसत्त्वविशेष एव बालिकाया भाव इत्युच्यत इत्यर्थः। किमपि विशेषो नेत्याह। किं त्वन्तर्गतं वासनात्मतया वर्तमानं रत्याख्यं भावं भावयन्सूचयन् किं सर्वस्य नेत्याह कवेः सूक्ष्मसूक्ष्मानपि यो र्थान् पश्यति तस्य सहृदयस्येत्यर्थः।

एतदुक्तं भवति– उत्तमाधमरूपे कुमारीद्वितये व्यवहरति (एकायाः) वाक् स्पन्दते चक्षुरादिव्यापारः क्रीडनकावहारखेदजनितमुखवैवर्ण्यं बाष्पादि च पश्यतःहृदयस्य भवति तावद्विशेषोल्लासिनी अभिनयजनितेवानुमातरूपा अपि तु विशेषाध्यवसायिनी मतिः, महतीयं काचिन्नायिका भविष्यतीति। तथाविधं यद्वागादेरान्तररतिवासनासद्भावसमुपनतं किंचिद्विशिष्टरूपत्वं स देहविकारविशेषो भावः। चशब्द एक इवशब्दार्थे, अभिनयतुल्यो वागादिभिर्लक्षितो भाव इत्यर्थः {५-६}।

तत्रेति तत्पुरुष एव (उत्तमाङ्गना) पात्रलक्षणेन चोद्भूतारकचिबुकग्रीवादेः सातिशयो विकाररूपो धर्मः, अत एव शङ्गारोचितमाकारं सहृदयासहृदयसर्वजनहृदयं सूचयतीति। हावः– एष हि स्वचित्तवत्तिं परत्र जुह्वतीं ददतीं तां कुमारीं हावयति। **स्थितसमुत्थित**

इति स्थितः स्वयं समुत्थितः स्वेत्यु(स्वतः?)द्भिद्योद्भिद्य विश्राम्यन् हावः, स तु प्रसरणैकधर्मकः तथा हि हेला स्यात्, अत एवायं सुकुमारपरिकरसब्रह्मचारीति दर्शितम्। हावावस्थायां यत्स्वयं रतेः प्रबोधनं न मन्यते केवलं तत्संस्कारबलात्तथाविकारान् करोति। यैर्दष्टा तथा कल्पयति। यदा तु रतिवासनाप्रबोधात्तां प्रबुद्धां रतिमभिमन्यते केवलं समुचितविभावोपग्रहविरहान्निर्विषयता स्फुटीभावं न प्रतिपद्यते तदा तज्जनितो देहविकारविशेषो हेला। 'हिल भावकारण' इति (धातुपाठे) पठ्यते। हावस्य (भावस्य) सम्बन्धिनी क्रिया प्रसरता वेगवाहित्वमित्यर्थः। वेगेन गच्छन् हेलतीत्युच्यते लोके। तदाह **श्रङ्गारेति**। श्रङ्गाररसो रतिः ततो हृदये स्थिता या हेला संभवतीत्यर्थः। तथा श्रङ्गारस्य रस(स्य?) मानतायां यादक्साधारणमिव रूपं तस्य संभवः संभावना या स्यात् सामाजिकश्रङ्गाररसास्वादसदशरूपैव संभावना चमत्कारमात्रप्राणा। तथा हि तस्या यावद्विषयार्जनं किंचिदवभाति विभावविशेषापरिस्फुरणादिति वरसुन्दर(रूपोत्कीर्ण)ग्रावकल्पशैशवदशोत्तीर्णतारुण्योन्मीलना अत एव ललिता चेष्टा अभिनयरूपतामिव अस्यां विकारावेशातिशयवशात् न प्रतिलभते। क्रमेणोदाहरणान्येषाम्—

उत्तालालकभ जनानि कबरीभारो थ शिक्षारसो
दन्तानां परिकर्म नीविनहनं भ्रूलास्ययोग्याग्रहः।
तिर्यग्लोचनवल्गितानि वचसां छेकोक्तिसंक्रान्तयः
स्त्रीणां म्लायति शैशवे प्रतिकलं को प्येष केलीक्रमः।। (**विद्ध**१)

स्मितं किंचिन्मुग्धं तरलमधुरो दष्टिविभवः
परिस्पन्दो वाचामभिनयविलासोक्तिसरसः।
गताना(गतीना)मारम्भः किसलयितलीलापरिकरः
स्पशन्त्यास्तारुण्यं किमिव हि न रम्यं मगदशः।। (**सुभाषितावलौ** श्लो. २२३६)

कुरङ्गीवाङ्गानि स्तिमितयति गीतध्वनिषु यत्
सखीं कान्तोदन्तं श्रुतमपि पुनः प्रश्नयति यत्।
अनिद्रं यच्चान्तः स्वपिति तदहो वेद्म्यभिनवां
प्रवत्तो स्याः सेक्तुं हृदि मनसिजः प्रेमलतिकाम्।।

अत्र हि भावन्तर्गतरतिप्रबोधमात्रमुक्तम्। न त्वभिलाषः श्रङ्गार इति मन्तव्यम्। तत्परं ब्राह्मणस्योपनयनमिव भविष्यत्समस्तपुरुषार्थसद्मपीठबन्धत्वेन योषितां परमो ह्युत्सवः लोकोत्तरो लङ्कारः सातिशयमानन्दस्थानं परं पवित्रमित्युप श्रूयते। यद्यपि चैते पुरुषस्यापि भवन्ति तथापि योषितां त एवालङ्कारा इति तद्गतत्वेनैव वर्णिताः। पुंसस्तूत्साहवत्तान्त एव परो लङ्कारः' तथा च सर्वेष्वेव नायकभेदेषु धीरत्वमेव विशेषणतयोक्तम्। तदाच्छादितास्तु श्रङ्गारादयो धीरललित इत्यादौ {**१०-११**}।

एवं त्रीनङ्गजान् व्याख्याय स्वाभाविकान्दशोद्दिशति **लीला विलास** इत्यादिना। विशिष्टाविभावलाभे रतौ सविशेषत्वेन स्फुटीभूतायां तदुपबंहणकृता देहविकारा लीलादयः **शाक्याचार्यराहुलकादि**भिर्यन्मतं विशेषसौक्ष्म्यादनुपलक्ष्य हेलाहावादीन् लीलादिमध्य एव पठद्भिश्चेष्टैवालङ्काराभूतेति, एतावन्मात्रे विश्रम्य सामान्येन चेष्टा अलङ्कार इति, तदयुक्तम् {**१२-१३**}।

अत्रैषां दशानां क्रमेण लक्षणान्याह **वागङ्गालङ्कारैरिति**। प्रियतमगतैः प्रीत्या तं प्रति बहुमानातिशयेन स्वात्मनि योजितैः मधुरैः सुकुमारैः न तु तदीयैरेवोद्धतैः मधुरैरपि विशिष्टैः न तु कल्पितत्वेनाभिमानैः अत एवानुकृतिनोद्धट्टकरूपेणाविकृतं(तः?) बहुमानः स्वात्मनि तत्स्वामीकरणेन। एते च दश प्राप्तसंभोगत्वे च भवन्ति। शोभादयस्तु सप्त भाविनः प्राप्तसंभोगतायामेवं एतान् लीलादीन् कवयो लोकवाचो त्र कीदशा साङ्कर्येण प्रयुज्यते। यथा– ''गतेषु लीलाञ्चितविभ्रमेषु'' (**कुमा** १–३३) इति। 'तत्रोपचारो न्चर्थत्वं लौकिकी प्रसिद्धिर्वा प्रमाणीकर्तव्या। तन्त्रज्ञैरेवं पठितव्यम्– ''गतेषु लीलाञ्चितसुन्दरेषु'' इति, तदसदिति **भट्टेन्दुराजशिष्याः**, यतो ये लीलाविभ्रमप्रभतयो भविष्यन्त्यस्तदुचिततया तदानीं शिक्ष्यत इव। व्याहृत्य नीयते स हि (अभिनय) प्रयोगकालो लीलादेरिति विनयस्य तु राजहंसकर्तत्वमुत्प्रेक्ष्यते {**१४**}।

स्थानासनेति स्थानमूर्ध्वता, आसनमुपविष्टता।

स्थानकादावप्रयत्नशिक्षितमपि श्रङ्गारबलादुपनीय तद्रूपं विलासः, श्लिष्ट इत्यनुल्बणम्। यथा–

बाले डअंणस्सु विम्मण्णआसणु(?) इत्यादौ {**१५**}।

स्वल्पो पि परामित्यल्पतयैव परां शोभां जनयति सौभाग्यगर्वमहिमा ह्यसौ। यथा–

कच उपरब्भउ सस्सर इसिणिअत्थ(?) इत्यादौ।

यत्तु ''सरसिजमनुविद्धं शैवलेनापि रम्यं (**शाकुन्तल**.१/२०) इत्युदाहृतं तदसत्। न ह्यत्रानादरन्यासः सौभाग्यगर्वकृतः, अपि तु तपस्विसमुचितवेषपरिग्रहणप्रायमित्यलम् {**१६**}।

विविधानामिति योगो भेदः तेन वागादिभेदेन बहुभेदानां च बहुनां च (अर्थानां) यो न्यथा निवेशः पूर्ववत्सौभाग्यगर्वकृतः (स) विभ्रमः, तद्यथा, वचने न्यथावक्तव्ये न्यथाभाषणम्, हस्तेनादातव्ये पादेनादानम्, रशनायाः कण्ठे न्यासः इत्यादि। मद्येन कृतो रागः प्रियतमं प्रत्येव बहुमानो हर्षः। सौभाग्यगर्वो यथा–

चिरिअ बन्धिअ निच्चिप्पटणिच्चिअ बद्धजम्म अदेसि सहि।

सोहग्गमत्थि एर्के चिअरिअ किप्पिण (वेण) णाहिणेवउ(?)।। {**१७**}

स्मितरुदितहसितेति सङ्करेण संकीर्णतया हर्षाद्वर्वाद्यत्संकरणम्। यथा–

मह.....तिमळळमकळति हळहळन्ति सप्पदिओ

(व) ल्लवच्चर इव इ अणेकत्ति (?) इत्यादौ।

अत्र हि गर्वश्रमदुःखस्मितरुदितहसितानि देशीपदैः क्रमेणोक्तानि {**१८**}।

इष्टजनस्येति कथने दर्शने वा कान्तस्य यदुत्पद्यते योषितो लीलादि तद्भावभावनवशान्मदनाङ्गमर्द(मर्दन)पर्यन्ताङ्गमोटनान्मोट्टायितम्। यथाह–

सिइऊणथणसक्कियहत्थऊरू– इत्यादौ। {१६}

केशस्तनाधरग्रहणादिति प्रियतमेनेति शेषः। यथा–

देशिखणंमि णअथणहि अइआपडि अपुणहे तिहिं अज्ज–

णहरग्गस उकि किं दुरपसमहणाहलहबंधाहिं। इत्यादौ {२०}।

इष्टानामिति वस्त्रालङ्कारादीनामिति अनादरकृत इति तद्विषय एव यो नादरकृतस्तद्बहुलम् (बिब्बोकम्?) यथा–

चन्दघसि नामकोप्पेस स तु किं दु आविळं उइआ को चण्ड। इत्यादौ {२१}।।

हस्तपादाङ्गविन्यास इति। कर्तव्यवशादायात एव हस्तादिकर्मणि यद्वैचित्र्यं स विलासः। ललिते तु बाह्यव्यापारयोग एव न किंचिदस्तिनादातव्यबुद्धिः, अथ च सुकुमारकरव्यापारणं न दुष्टस्य (द्रष्टव्यं?) किंचित् अथ च तारादिकर्मेति विशेषः। यथा–

कि अर्णि लोपळळविअरुपकिसरि इचच्चा ए स बहुमजत्ति..... भराबहुखिसिदुपुणाखिळळविळूण अ अणळळहिखणु अ।। इत्यादि {२२}।

अन्ये तु 'लड विलास' इति (धातु)पाठं प्रमाणयन्तो विलासमेव सातिशयं ललितसंज्ञं मन्यन्ते {२३}।

वाक्यानां प्रीतियुक्तानामिति। **प्राप्ता**मित्यवसरलाभेन कथने योग्यानामित्यर्थः **स्वभावत** इति मौग्ध्याद्बाल्यादन्यचित्तत्वाद्वा।

व्याजादिति। व्याजिदिभिर्मौग्ध्यादिभिः प्रख्यापनातिशयेनेत्यर्थः। तत्प्रख्यापनमपि कासांचित् स्वभाव एव। यथा कविभिस्तु.....ळिळळिकरन्ति अ इच्छहि पुणच्छ मरणुकरन्ति अ– इत्यादौ {२४-२५}।

अथ**ायत्नजा** इति। **शोभाकान्तिरि**त्यादि। एषां क्रमेण लक्षणानि। **रूपयौवनलावण्यै**रिति। तान्येव रूपादीनि पुरुषेणोपभुज्यमानानि छायान्तरं श्रयन्ति। सा च्छाया मन्दमध्यतीव्रत्वं क्रमेण संभोगपरिशीलनादाश्रयति शोभां कान्तिं दीप्तिं चेत्यर्थः। **आ** समन्तात् **पूर्णो मन्मथ** इति कामोपभोगो हेतुर्यस्याः सा इत्यर्थः। अन्यस्तु (अ)पूर्णमन्मथेति व्याचक्षाणः कान्तिदीप्तिशोभानां क्रमेण सातिशयत्वमाह। तच्चोपक्रमविरुद्धमित्यु**पाध्यायाः** {२६-२८}।

दीप्तेष्विति क्रोधादिषु। चशब्द इवार्थे ललितेषु रतिक्रीडादिषु यथा मासण्यं चेष्टायास्तथा दीप्तेष्वपि यत्तन्माधुर्यम् {२६}।

सर्वार्थेष्विव रूपयौवनादिषु वर्गत्वाच्चेयं क्रिया रूपेभ्यः पथगेव धीरता पठिता। **प्रयोग** इति कामकलादौ चातुःषष्टिक इत्यर्थः। यथाहुः–

अन्यदा भूषणं पुंसः शमो (क्षमा) लज्जेव योषितः।

पराक्रमः परिभवे प्रागल्भ्यं (वैयात्यं) सुरतेष्विव।। (शिशुपाल २.४४) इति। {३०}

यत्त्वनुकर्तविषयमेतदित्यन्यैर्व्याख्यातं तत्पूर्वमेव दूषितम्। सर्वास्वमर्षेर्ष्याक्रोधाद्यवस्थास्वपि यत्परुषवचना**द्यनु**दीरणं तदौदार्यम्। चित्तवत्तिस्वभावा अपि केचिदेते विभावजन्यत्वाभावाद् भाववर्गे न पठिताः रसान् प्रति भावकत्वाभावाच्च (इत्याहुः)। तच्चैतदयुक्तम्। शोभाकान्तिदीप्तयः ता बाह्यरूपलावण्यगता एव विशेषाः आवेगचापलत्रासामर्षा भावा एव। माधुर्याद्या न चित्तवत्तिस्वभावा इति क एषु भावत्वाशङ्कावकाशः इत्यभावो पि भावान्तरतया तद्विशेषणतया प्रतिभासगोचर इति अतो भावरूपतैवेति चेदस्तु नामैवम्। तथाप्यलङ्कारत्वात् सामान्याभिनयरूपत्वात्, बाह्यशरीरनिष्ठतापर्यवसानात्, श्रङ्गारैकमात्रविषयत्वाच्च, अशेषरसविषयत्वात्, व्याभिचारिवर्गात् पथत्तवेनैषामभिधानम्।

(न च) एतावत एवैत इत्यत्र नियमो विवक्षितः। तेन मौग्ध्यमदभावविकृतपरिपतनादीनामपि **शाक्याचार्यराहुलादिभिर**भिधानं विरुद्ध– –मित्यलं बहुना {३१}।

अथैषां सामान्याभिनयत्वमुपपादयितुमाह **सुकुमारे भवन्त्येत** इति। **ललितात्मके प्रयोगे** प्रयुज्यमाने श्रङ्गारे यः सुकुमारो न्योन्योपसंभोगविप्रलम्भादि भेदः। तत्र सर्वत्रैते न भवन्ति। न ह्येतच्छून्यमङ्गानां चेष्टितं प्रयोगार्हम्। यो पि तत्र श्रङ्गारे ईर्ष्यामर्षदीप्तिप्रकारस्तत्रापि विलासं ललितं च वर्जयित्वा अवश्यमन्येषां क्रमयौगपद्यादिना संभव इति श्रङ्गारभेदेषु साधारणभूतो यो भिनयस्तेन सामान्याभिनयतास्य युक्तेति तात्पर्यम् {३२}।

अथ पुरुषगतानुद्दिश्य लक्षयति **शोभा विलास** इत्यादि। **यतः** शरीरविकाराद् दाक्ष्यादि गम्यते सा शोभेति संबन्धः। गोवषभः उत्तमाः गौः {३३-३५}।

महत्स्वपि विकारेष्विति युद्धनियुद्धव्यायामादिष्वभ्यासकृतं, करणानां करचरणादिक्रियाणां श्लिष्टत्वं अनुल्बणत्वं यत्र शरीरविकारो स माधुर्यम्। नटगतमेतदिति त्वसत् प्रक्रमविरोधात्, प्रयोक्तगुणानां च प्रकृत्यध्याये भूमिकाविकल्पाध्याये च (अ ३५,३६) वक्ष्यमाणत्वात् {३६}।

धर्मादायो यस्य फलं स तैः संयुक्त इत्युक्तम्। **शुभाशुभसमुत्थिता**दिति। शुभसंकल्पजा अशुभसङ्कल्पजाश्च। अशुभादपि हि सङ्कल्पो स्थिरान्निवर्तते। यथैलश्चातुर्वर्ण्यस्य सर्वस्वहारादर्थफलाद्याशयात् {३७}।

अन्ये तु वीरस्यैतदनुचितमिति मत्वान्यथा व्याचक्षते शुभाशुभयोः समुत्थित इति। तेन यच्छास्त्रोक्तमुचितं चारभ्यते। तत्र क्रियमाणे (शुभं) सुलभतयार्थलाभः, अशुभं क्षयव्ययादिरूपकमस्तु तथापि तद्विषयाध्यवसायादविचलनं स्थैर्यं देहविकाररूपमेव।

आक्रियते चित्तवत्तिरेभिरित्याकारः, मुखरागदष्टिविकारादयः। तेष्वपि चासत्सु कारणसामग्र्यव्यभिचरितफलेति हर्षादिसंभवे पि यत्कृतस्तत्कृतमुखरागाद्यभावः स एव निस्तिमितदेहस्वभावो गाम्भीर्यम् {३८}।

परजनविषयं दानादि चेष्टाविकाररूपमेववौदार्यम्। **स्व**ग्रहणन्तु लोकोक्तिमनादररूपरूपान्तु भयं नोदाहार्य(नौदार्य)मेव स्फुटयति। **अभ्युपपत्तिः** परित्राणाद्यर्थिनो ङ्गीकरणम्। **परेणे**ति शत्रुणा, न तु गुरुणा मित्रादिना वा। **प्राणात्यये पी**ति न तु नीत्यनुवर्तनेन कथंचित् देशकालाद्यनुवर्तनेन सहनपूर्वकं निर्यातनम्। तथा च ममैव३३०७ोकः–

मूर्ध्ना कंचन पार्थिवं धतवता च्छिद्रैः प्रविश्यान्तरं
स्वं रूपं विनिगूह्य तापमतुलं दत्त्वा चिराद् भ्रंशितः।
यश्चङ्कुर्जडरूपतापरिचितो नीत्येव ब्रह्मने त्वया
तन्मन्ये त्र कथासु तिष्ठति परं निर्वन्ध्यतेजस्विता।। इति। {३६-४१}

सात्त्विकः पूर्वमुक्त इत्यर्धस्यास्य केचिच्छङ्काशमनं प्रयोजनमाहुः– एवं हि शंक्यते सात्त्विकप्रसङ्गेन कस्माद्रोमा चादयो नोक्ता इति; तद्वारणार्थमाह **पूर्व**मिति भावाध्याय एव ते निरूपिता– इति। अयं च नार्षः, यतः सत्त्वे नाट्यं प्रतिष्ठितं, अतो वागङ्गसत्त्व इत्यत्र पश्चान्निर्दिष्टः सात्त्विकः सामान्याभिनयो यस्मात् **पूर्व**मिति आदौ प्रोक्तः ततो हेतोर्यद्विलोमक्रमेण **अनुपूर्वशः** आनुपूर्व्यं क्रमप्राप्तं तेन क्रमेण शरीरं सामान्याभिनयं वक्ष्यते। सत्त्वानन्तरं हि विपरीतवत्त्या आङ्गिकस्यानन्तर्यं वागङ्गसत्त्व इति। (**शारीर**मित्यादि) अत्र **च**शब्दो यस्मादर्थे, **अपि**शब्दस्तत इत्यत्रार्थे। तत्रोद्देशमाह– **षडात्मकस्त्वि**ति।

यः पूर्वं शारीरो भिनयो बहुना प्रकारवैचित्र्येणोक्तः तस्यावान्तरसामान्याभिनयरूपा हि षड् भवन्तीति, स एव षडात्मकतया वान्तरजातियोगात् सात्त्विकवाचिकाभिनयैश्च संभूय क्रमतां प्राप्तैश्च व्यामिश्रतायां सामान्याभिनयः संपाद्यत इति तुशब्दस्यार्थः। (**वाक्य**मिति) वाक्यसहचरितः शारीरो भिनयो वाक्यम्। न हि शरीराभिनयमध्ये च निर्वर्तकानि गणितानीति चिरन्तनाः।

शारीरस्वर (**ना.शा.**२६.१७) इति यद्वयव्यवहाराद्वा भावश्च शरीरत्वेन प्रसिद्धे वाक्यमेवाभिनयान्तरनिरपेक्षमिति, सद्वत्तभाषागुणः स्फुटतमां स्वार्थप्रतीतिं यदा विधत्ते तत एव रसभावानुभावके तदा तदेव वाक्याभिनय इति तु काव्यकौतुकग्रन्थः। अत्र तु पाठ्यरूपः सामान्याभिनयः कथमिति चिन्त्यम्। शरीरानुप्रवेशादिति चेत् त्वरितानपेक्ष (तदितरानपेक्ष?) एव। न चाभिनयशून्याभिनेयकाव्ये वाक्यं किंचिद्भवति। न चाभिनेये वाक्याभिनयव्यवहार इत्**युपाध्यायेना**यमेकीयो भिप्रायो दर्शितः न त्वस्यायं स्वपक्ष इति भ्रमितव्यम्।

तत्र वाक्याभिनयस्य लक्षणमाह–

नानारसार्थयुक्तैर्वत्तनिबन्धैः कृतः स चूर्णपदैः।
प्राकृतसंस्कृतपाठो वाक्याभिनेयो बुधैर्ज्ञेयः।। (**२२.४४**) इति।

नानारसविशेषो वाक्यार्थः तेन युक्तानि वाक्यानि यानि तानि च वत्तरचितानि चूर्णपदात्मकानि वा पुनरपि संस्कृतानि वा प्राकृतानि वा तैर्युक्तः सहचरितः शारीरो वाक्येन सहैव प्रयुज्यमानः शारीरो वाक्याभिनय इति यावत्। प्राकृतः संस्कृतश्च पाठो स्मिन्निति बहुव्रीहिः स चायं वाक्याभिनयश्चतुर्धा संस्कृतप्राकृतयोर्गद्यपद्यभेदात्।

अत्र **केचिदाहुः** यो र्थः सदैव हृदये वर्तते अत एव विमर्शानुबन्धनादिनिरपेक्ष एव स सततं स्फुरति। यथा भीमसेनस्य कुरुकुलविषयः क्रोधातिशयः तद्विषये वाक्ये ''च चद्भुजभ्रमित'' (**वेणी** १.२१) इत्यादौ पाठसमकालं यो भ्रुकुट्यादिमयः शारीरो भिनय इति। एतच्चासत्। सूचायां विमर्शपूर्वकवस्तुविषयामपि प्रवत्तायां यद्वाक्यं बध्यते तत्सहचरितो पि शारीरः किमित न वाक्याभिनयः तथापि चतुर्विधवाक्याभिनययोगात् सूचादीनां बहुभेदत्वं वक्ष्याम इत्यास्तां तावत्।

वाक्यार्थो वाक्यं वा सत्त्वाङ्गैः सूच्यते यदा पूर्वम्।
पश्चाद्वाक्याभिनयः सूचेत्यभिसंज्ञिता सा तु।। (**२२.४५**) इति।

यदा तु निपातः यदित्यत्रार्थे इह वर्तते। तेन यैः सात्त्विकाङ्गिकैः भाविवक्तव्यं सूच्यते, येषामन्तरो भिनयः प्रवर्तत एव सूचाभिनयः। ''आत्मबुद्ध्या समर्थ्यार्था''निति हि न्यायो वा प्रसरेत्। तत्रोत्तमानां बाहुल्येनाभिसंधानविचारपूर्वकं एवमिति चिरतरो सावभिसन्धिकालः तत्राविष्टस्यैवेहोपयोग इति– विचार्यमाणं तथाभूतवस्तुविशेषावेशजनितेन शरीरविकारेणावश्यं भवितव्यं सममेव सूचाभिनयः। तत्र च द्वयी गतिर्विद्यते, स्थितेनैवाभिसन्धानेन यादक्क्र आक्षिप्तस्तादशैव क्रमेण परतः शब्दोच्चारणम्। यथा 'राज्ये निर्जितशत्रु योग्यसचिवन्यस्तः समस्तो भरः' (**रत्ना** १.६) इत्यादौ। तत्र हि पूर्वपूर्वावान्तरवाक्यांशाभिधेयभागप्रभावित एवोत्तरोत्तरावान्तरवाक्यार्थ इति यादगभिसन्धानक्रमस्तादगेव तत्र क्रमः। यत्र त्वन्यथाभिसन्धानमन्यथा च क्रमस्तत्र निर्विभागभेदकं सन्धानीयवाक्यार्थसंधानम्। यथा **मायापुष्पके** सुग्रीवस्य–

दुर्गं भूमिरमात्यभत्यसुहृदो दाराः शरीरं धनं
मानो वैरिविमर्दसौख्यममरप्रख्येन सख्येन किम् (सख्योन्नतिः?)।
यस्मात्सर्वमिदं प्रियाविरहितैस्तस्मादशक्ता (विहरिणस्तस्याद्य शक्ता?) वयं
न स्वेच्छासुलभैः पथो पि घटने शैलाश्मखण्डैरपि।।

अत्र हि शरीरं दारा भूमिर्धनं भत्या दुर्गं वैरिविमर्दसुखं रामस्य मित्रमिति प्रसिद्धिरित्यभिसन्धानक्रम उचितो, निकट(पद) परामर्शक्रमेण प्रकरणा(र्थवशादिदं लब्धं) दूरं प्रसत्य क्रमेण यद्वा इदं तावदास्तां, इदमपि तत इति न्यायेनान्तः प्रवेशः, तथापि रामस्य मित्रमिति प्रसिद्धिरित्यादिना विलोमक्रमेण भाव्यम्। तत्र प्रथमे पक्षे वाक्यं सूच्यत इत्युक्तम्, क्रमो हि वाक्यमिति तद्विदो मन्यन्ते। 'एको नववच.....शब्दः क्रमो युध्यतः सुहृद्भि'(?)रित्यादौ। द्वितीयपक्षे तूक्तं वाक्यार्थः सूच्यत इति।

अन्यस्त्वाह– यदा स्वयमेव विमश्यते तदा वाक्यार्थः सूचितः, यदा तु परवचनमाकर्ण्यते, यथा 'भो वयस्स पेक्ख' (**रत्ना**) इत्यादावनुद्यानवर्णनं पूर्यते तदा तदुक्तो र्थः सूच्यते तस्य पश्चाद्वचनाभिनयो भविष्यति 'वयस्य सम्यगुपलक्षित'मित्यादि, तत्र सूच्याभिनये वाक्यं सूच्यत इति। तच्चासत्– परवाक्यापेक्षया हि तत्र निवर्त्यङ्कुराभिनयः भाविवाक्यापेक्षया तु ततो न्यैव सूचा। अनभिनेय एवाभिनयनलक्ष्यं प्रत्यपरिचयो यमपराध्यति। किंचिद्वाक्यार्थग्रहणेन किमयमर्थो न स्वीकर्तुं शक्यो येन पुनर्वाक्यशब्दोपादानं स्यात्, तस्मात्परोदीरितवाक्यार्थ एव ह्यसौ सूचितो न तु वाक्यमित्यास्ताम्।

तदिदमुक्तपूर्वं गद्यपद्येतरचतुःप्रकारवाक्यं तदर्थसूचने भेदादष्टधा सूचाभिनयनादनुषोडशधा युक्तम्। परवाक्यस्य न भिन्नाङ्गतेत्यधुनैवोपपादितम्।

हृदयस्थो निर्वचनैरङ्गाभिनयः कृतो निपुणसाध्यः।
सूचैवोत्पत्तिकृतो विज्ञेयस्त्वङ्कुराभिनयः।। इति

अन्यपरे पि वाक्ये यद्गर्भीभूतं हृदयस्थं वस्तु तन्निष्ठो यो भिनयो ङ्गविकारैर्वचनशून्यैः सम्पादितः सूचातुल्यः सो ङ्कुरो नाम शारीरः। यथा सागरिका– जाव अहं पि कुसुमाइं अवचाइअ कामदेवं पूअइस्सं– इत्यभिधायैतद्वाक्ये गर्भीभूतं कुसुमापचयमङ्गविकारैर्दर्शयति। यच्चायमङ्कुरो निपुणैरेव प्रयोक्तृभिः सामाजिकैश्च साध्यः आपाद्यः चेतसा ध्यात उत्पत्त्या स्वबुद्धिकल्पनयापचितः। यद्यपि कविवाक्यान्येवात्रोपजीव्यानि, तथापि यादक् कुसुमापचयकर्म सागरिकायाः सौभाग्यसौन्दर्यप्रेमसाध्वसादिगर्भं न तादशं तापसस्य तदुभयविलक्षणं 'यः.....वेद्या(?)' इत्येवमादि तत्सर्वं वचनेभ्य एवाकृष्यते तथा विस्पष्टेन च तथा वचनतो लभ्यमेतत्। अपि तु पर्यालोचनातिशयगम्यमिति निपुणसाध्यमित्युक्तम्।

अन्ये तु सूचाया उत्पत्तिभागेन तुल्यो ङ्कुरस्तस्याः प्राग्भावे वचनशून्यत्वादिति। इदं त्वनुक्तसमासं (नं?) निर्वचनशब्देनोक्तत्वादर्थस्य।

यत्तु शिरोमुखजङ्घोरुपाणिपादैर्यथाक्रमं क्रियते।
शाखादर्शनमार्गः शाखाभिनयः स विज्ञेयः।। (**२२.४७**) इति।

समस्तेन शाखाव्यापारेण वर्तनाप्रधानतया प्रयुक्तः शाखाभिनयः शिरोमुखजङ्घोरु चेत्यादिना कृतैकवद्भावेन द्वन्द्वपदसमूहेन पुनः (श्लोक) द्वन्द्वेन, **नाट्यायित**मित्यादि **स्थान** इत्यादि च।

पूर्वप्रविष्टस्य पात्रस्यापरपात्रं प्रविश्य तद्रूपमुदीक्षमाणस्य प्रवेशो पि तद्ध्रुवागानतत्सूचापरिक्रमणादिकाले न किंचिन्नाट्यमस्तीति तत्कालेपूर्वपात्रेण ये समुचिता उपचाराः क्रियन्ते नाट्यायितमित्याद्यार्यायास्तात्पर्यम्। पूर्वप्रविष्टेन पात्रेण सह सङ्गमं विधाय पश्चात्प्रविष्टस्य पात्रस्य पूर्वप्रविष्टपात्रपरिक्रमणादिकाले स्थानेकेनैवासीनस्य तूष्णीं स्थितौ प्राप्तायामभिनयः तदपि नाट्यायितमित्यपरार्यायास्तात्पर्यमिति **श्रीशङ्कुकाद्याः**।

तच्चायुक्तम्। अन्योन्यसङ्गमावधि यत्पात्रस्य चेष्टितं तदपरोदितवाक्यार्थसूचनोचितत्वं वा निर्वचनकादौचित्यमात्रादेवोपनतं वा, पूर्वत्र पक्षे निवत्त्यङ्कुरः उत्तरत्राङ्कुरः इत्युभयं न नाट्यायितम्।

तथा हि प्रयोगकुशला एवंविधे विषये धर्मी– लिखति इति, प्रति पालयन्नास्ते (इति), यथा पुष्पावचयं नाट्यति। नाट्यस्य सन्धानरूपत्वं च वाक्यं सूचादीनामपि संभवेत्येव। न वा नाट्येन नाट्यं सन्धीयत इति नाट्यायितवाचोयुक्तिरपि कथम्। तस्मादित्थमेतद् व्याख्यातव्यम्– इह यदा स्वप्नो प्येकघनो दश्यते तन्मध्यत एव च किं दश्यमानं परस्य स्वप्न एव जाग्रद्रूपतामापादिते स्वप्नो यं मया दष्ट इति वर्ण्यते, तदा जाग्रदपेक्षया स्वप्नव्यवहारः, न तत्र पारमार्थिक इत्यौपचारिकं तदपेक्षं तस्य स्वप्नोत्वमिति तस्य स्वप्नायितव्यवहारो दष्टः। एवमिहापि नाट्य एकघनस्वभावे हि स्थिते तत्रैवासत्यनाट्यानुप्रवेशान्नाट्यापात्रेषु सामाजिकीभूतेषु तदपेक्षया यदन्यं नाट्यं तस्य नाट्यरूपत्वं पारमार्थिकमिति नाट्यायितमुच्यते। तच्च द्विविधं नाट्यरूपकनिष्ठमेव वा कार्यान्तरनिष्ठं वा। तस्य क्रमेण लक्षणमार्याद्वितयेनोच्यते। नाट्ये यत्प्रवेशकैर्नाट्यान्तरगतैरिव पात्रैः अत एव ततः प्रविशतीत्युक्तैः सङ्गमः क्रियते तन्नाट्यायितम्। कीदशैरभिनयद्वारेण यत्सूचनं तयोपचारैः परमार्थतयोपचर्यमाणैः। ननूभयमपि नाट्यं कस्मान्न भवति नत्वेकघनतेत्याशङ्क्याह **काल**प्रकर्षलक्षणाद्धेतोरन्योन्यभिन्नकालत्वात् कथं तत्रैकघनता युक्तेति भावः। **याव**दिति भूयस्तरं प्रबन्धं व्याप्नोतुं परिमितं वा सर्वं नाट्यायितमित्यर्थः। तथा यावदिति स्वप्ने स्वप्नान्तरं तत्राप्यन्यत् स्वप्नान्तरमित्यादिन्यायेन वा भवत्वेक (घन) स्वप्नामियवत्त्या वा सर्वथायिततन्नाटयायितम्। तत्रास्य बहुतरव्यापिनो बहुगर्भस्वप्नायिततुल्यस्य नाट्यायितस्योदाहरणं महाकवि**सुबन्धु**निबद्धो **वासवदत्तानाट्यधारा**ख्यः समस्त एव प्रयोगः। तत्र हि बिन्दुसारः प्रयोज्यवस्तुक उदयनचरिते सामाजिकीकृतः, असावप्युदयनो वासवदत्ताचेष्टिते। एष चार्थः– स्वस्मिन् सूत्ररूपके दष्टे सुज्ञानो भवति। अतिवैतत्यभयात्तु न प्रदर्शितः। एकस्तु प्रदेश उदाह्रियते तत्र ह्युदयने सामाजिकीकृते सूत्रधारप्रयोगः– ''तव सुचरितैरेष जयति'' इति, तत **उदयनः** 'कुतो मम सुचरिता'नीति सास्त्रं विलपति–

एह्यम्ब किं कटकपिङ्गलपालकैस्तैर्भक्तो हम**प्युदयनः** सुतलालनीयाः।
यौगन्धरायण ममानय राजपुत्रीं हा हर्षरक्षित गतस्त्वमपप्रभावः।।

तत्रैव बिन्दुसारः सामाजिकीभूतः परमार्थतामभिमन्यमानो ''धन्या खलु (ईदशैर्भक्तस्य) प्रलापैः इत्युच्छ्वसति। प्रतीहारी आत्मगतं– ''अअणिदपरमत्थकळणेहिं पिच्छइ खु देवो'' इत्यादि।

परिमितव्यापिनो निर्गर्भस्य नाट्यायितस्योदाहरणं यथा **बालरामायणे** गर्भाङ्के सीतास्वयंवरे।

एवं तावन्नाट्यरूपकनिष्ठं नाट्यायितं व्याख्यातम्। कार्यान्तरनिष्ठं तूच्यते। इह यदाभ्यन्तररसाविष्टता भवति तदा ध्रुवयोगाभिनयः स्वतुल्यतामापाद्यमानः परस्परमिलिताकारकतां काकतालीयेनोपनिपातात् (संभाव्यते)। यथा–

नळिनीदळए णीसहसुकदेहिं आतथा मुच्चइ।
पळइ विअब्भइ विज्जइ हंसी णळिणीवणे वि णत्थिज्जइ।।

इत्यादौ। तत्र हि प्रयोक्तुरेवमभिसन्धिध्रुवामभिनयेन दर्शयामीति। किं तु प्रासादिक्यध्रुवायां गीयमानायां, ''यत्र काव्येन (वाक्येन?) नोक्तं स्यात् तत्तु गीतं प्रसाधयेत्'' (अ ३२) इति वचनात् ध्रुवार्थस्तत्रोचित आघातः, प्रयोगो हि बहुविधां मदनावस्थां नाटयतीति। एवं भूतो ङ्कुरस्वभावः पौर्वापर्यपर्यालोचनवशात् तथाभूत एवोपनिपतित इति, अप्रयुज्यमानापि (ध्रुवा) काकतालीयेन प्रयोगमुपांशुरूपा नाट्यमपि नाट्यमिव शासत इति तथाविधनाट्यायितत्वापादकः शारीराभिनयो नाट्यायितमिति दर्शयति **स्थाने ध्रुवास्वभिनयो यः क्रियत** इति। **भावै**र्व्यभिचारिभिः **रसैः** स्वस्थायिभिः ये संप्रयुक्ता आविष्टाः तत्संपादनैकमनसः प्रयोक्तारस्तैर्यो **ध्रुवास्वि**ति ध्रुवार्थविषयो भिनयः– क्रियते। कथं, **स्थाने** प्रसङ्गे सति काकतालीयवशादित्यर्थः। यो भिनयः शारीरो नाट्यायितम्। ननु किं प्रतिपदमभिनयता, नेत्याह **हर्षादिभि**रिति तत्सूचकैरङ्गोपाङ्गसत्त्वैरित्यर्थः। **तदपीति** न केवलं पूर्वं यावदिपमपीति।

यत्रान्योक्तं वाक्यं सूचाभिनेय योजयेदन्यः।
तत्संबन्धार्थकथं भवेन्निवत्त्यङ्कुरः सो थ।। {२२.५०}

अन्योक्तं वाक्यं कथमन्यसूचाभिनये चित्तवत्तिसूचकेनाङ्गोपाङ्गसत्त्वक्रमेण दर्शयेदित्याशङ्क्य हेतुमाह **तत्संबन्धकथ**मिति बीजादेर्निवत्तिं यथाङ्कुरः सूचयति, एवं निवत्ते वाक्ये (तदङ्कुर) यति निवत्त्यङ्कुर उक्तः। तथा हि विदूषकेण **वत्सराजे** ''अवि सुहयदि दे लोअणाणं'' इति पष्टे सागरिका– ''सच्चं जीविदमरणाणं अन्तरं वट्टामि'' इति, ततो राजा– ''सुखयतीति किमुच्यते। कृच्छ्रेणोरुयुगं व्यतीत्य सुचिरं'' (**रत्नावली** २/१०) इत्यादि पठति। तस्मिन् क्रमेणाकर्ण्यमाने सागरिकाया यथाभूत (संशयोत्कण्ठारागोदयजनितो) व्यभिचारिसत्त्वयोजितः सत्त्वाङ्गोपाङ्गपरिस्पन्दो दश्यमानो निवत्त्यङ्कुरः। (निवत्त्यङ्कुरो) नाट्यायितं च वासवदत्तानाट्याधारे प्रतिपदं दश्यते। एतेषां च सर्वाभिनयैः सम्भूय वत्तित्वात् सर्वत्र चाभिनेये प्रायशः सद्भावात् सामान्याभिनयत्वं तदर्थमेव च वितत्यैतत्स्वरूपाभिधानम्, यत्पूर्वमुक्तम्–

अस्य शाखा न नत्तं च तथैवाङ्कुर एव च।
त्रिविधं वस्त्वभिनयः.....।

इति तेन सहास्य यथा न विरोधस्तथैवोपपादितमुपाङ्गाभिनय इति तत एवावधार्यम्। किं पुनरुक्ताभिधानेन।

एवमाङ्गिकं सामान्याभिनयमुपपाद्य वाचकमुपपादयति **एतेषां तु भवेन्मार्ग** इति विषय इत्यर्थः। वाक्यभावे यद्यप्यात्मापि शरीरो निर्विषय एव तेन य**देके** शाखाङ्कुरनाट्यायितानां च वाक्यविरहितत्वं मन्यमाना एतेषामिति सर्वेषामित्यादि वाक्यसूचानिवत्त्यङ्कुरमात्रविषयत्वेनैव संकोचयन्ति, ते न तत्त्वज्ञाः, सर्वो प्यभिनयो वाक्योपजीवनमन्तरेण नियमहेत्वभावादसम जसतामभ्येति। केवलं तत्कालिकातत्कालिकादिमात्रेण वाक्यं भिद्यतां नाम। एतच्चोपाङ्गाभिनये वितत्योपपादितम्।

काव्यवस्तुष्विति दशरूपकभेदेषु द्वादशरूपो भिनयात्मको वाचिकाभिनयस्य भाव इत्यर्थः। द्वादशप्रकारानुद्दिशति आलापश्चेत्यादिना तानेव क्रमेण लक्षयति आभाषणं त्वित्यादिना। युष्मदर्थविषयमुपदेशादिशून्यं यद्वचनं तदालाप इत्यर्थः। ''विभ्राजसे मकरकेतनमर्चयन्ती'' (**रत्ना** १), यथा वा ''जयतु भवान्,'' इत्यादि। अनर्थकं वचो यत्तु स प्रलाप इति परस्परसम्बद्धं मौख्र्यादिवशादित्यर्थः। यथा **दरिद्ररचारुदत्ते शकारः**– ''शुणामि मल्लगन्धं, अन्धआलपूलिदाए उण णासि आए शुवित्तं पेक्खामि भूषणशद्दे। (श्रणोमि माल्यगन्धम्। अन्धकारपूरितया पुनर्नासिकया न सुव्यक्तं पश्यामि भूषणशब्दम्।) (**मच्छकटिक** अङ्क?) **करुणप्रभवो यस्तु स विलाप** इति। करुणग्रहणं दुःखोपलक्षणम्, तेन विप्रलम्भो पि गह्यते। तत्र करुणरससंबन्धं वचनं, (दुःखे) यथा– क्कासि प्रयच्छ मे प्रतिवचनम्, विप्रलम्भे यथा – बाणाः प चमनोभवस्य (**रत्ना** ३.३) इत्यादि। एतत्प्रधानादेव कामावस्थाविशेषो विलापः (तासु षष्ठ्यवस्था) इति वक्ष्यते। **बहुशो भिहितं वाक्यमनुलाप** इति। अनुवादार्थं तदेव पुनरुच्यमानमित्यर्थः। यथा– ''द्वीपादन्यस्मादपि'' (**रत्ना १.६**) इति सूत्रधारेणोक्ते नेपथ्ये यौगन्धरायणः– एवमेतत्, दीपादन्यस्मादपीत्यनुवदति। **उक्तिप्रत्युक्तिसंयुक्तः संलाप** इति। यद्विधान्युदाहरणानि (?)। **पूर्वोक्तस्यान्यथा वादो प्यपलाप** इति। यथा **कृत्यारावणे** गौतमीरूपच्छन्ना रामाक्रन्दितं लक्ष्मणे श्रावयितुकामा शूर्पणखा पूर्वमाह– ''अवि सुदं ते'' (अपि श्रुतं त्वया)। ततः **सीता** (ससंभ्रमम्)– ''अये किंति'' (अये किमिति)। ततः सा– ''आ व चिते, सत्यं **गौतमी**मेव मामियं सीता जानात्वित्येवं ह्याह, ''णं मए णक्क हण्णिदं, (?) अवि सुदं ते'' (इति)। **तदिदं वचनं ब्रूहीत्येष सन्देश** इति। उदाहरणेन लक्षणमुन्नेयम्। ततः परमुखेनान्यस्य स्ववचो र्पणं सन्देश इति। अतिदेशस्त्योक्तं युक्तं मयोक्तमिति सिद्धेनासिद्धस्य तुल्यतापादनमतिदेश इत्यर्थः। अत्रोपदेशातिदेशयोरुपमानस्य च साहित्यविषये तार्किकमीमांसकविषये विशेषप्रतिपादनं यत् टीकाकारैः कृतं तत्सुकुमारमनोमोहनं वथा भ्रमणिकामात्रं प्रकृतानुपयोगादिहोपेक्ष्यमेव। स एवैषो हं ब्रवीमीति निर्देश इति लक्षणम्। **व्याजान्तरेण कथनं** व्यपदेश इति व्याजविशेषेणेत्यर्थः। यथा **मुद्राराक्षसे** क्षपणेकस्य राक्षसज्दूषणार्थं तावन्नगरान्निर्वासनं तत्र च चाणक्येन व्याजेन वचनं कृतम्– ''अयं पापीयान् (जीवसिद्धिः) राक्षसप्रयुक्तविषकन्यया पर्वतेश्वरं घातितवान् ततो निर्वास्यते'' इति। **इदं कुरु गहाणेति**

ह्युपदेश इति नियोग इत्यर्थः। **अन्यार्थकथनमपदेश** इति स्वयं विवक्षितस्यान्य एव वक्तीत्यन्यकथनमित्यर्थः। यथा भीमं प्रति सहदेवः– एवं गुरुणा सन्दिष्टं सुयोधनस्येति (**वेणी**.१)। उपसंहरति **एते मार्गास्त्विति सर्वेषु** षट्स्वपि शारीरेष्वित्यर्थः। तथा अभिनीयन्त इत्यभिनया नाटकादिकाव्यविशेषाः तेषु, यतः सामान्येन भवन्त्यत एवैते सामान्याभिनया इति तात्पर्यम् {**५१-६०**}।

अथात्रैव भेदान्तराण्याह आत्मस्थश्च परस्थश्चेत्यादि। अत्रोदाहरणदिशमाह अहं करोमीत्यादि।

इदानीं विषयभेदकृतमात्मस्थस्यापि पारोक्ष्यं दर्शयति **हस्तमन्तरतः कृत्वे**त्यादि {**७०**}। स्वगतजनान्तिकापवारितकेषु वक्तुरात्मस्थं पात्रान्तराणां चाप्रत्यक्षं नाट्यधर्मीवशादित्यात्मस्थमपि तत्परोक्षम्। लोकधर्म्याप्यात्मस्थं परोक्षम्। यथा– ''सुप्तो मत्तो न्वहं किल विललाप'' इति। यदाहोत्तमविषये पि चित्तव्याक्षेपादिभ्यो (लिट् भवतीति। अन्य) भेदानां कार्येण (सम्भव)माह–

परेषामात्मनश्चैव कालस्य च विशेषणात्।
सप्तप्रकारस्यास्यैव भेदा ज्ञेया अनेकधा।।
एते प्रयोगा विज्ञेया मार्गाभिनययोजिताः।
एतेष्विह विनिष्पन्नो विविधो भिनयो भवेत्।।

इह तावद्वाक्यं द्वादशधाभिन्नं तत्राप्यात्मस्थपरस्थयोः प्रत्यक्षत्वपरोक्षत्वाभ्यां चतुर्विधत्वं चतुर्णां कालत्रयेण गुणने द्वादशभेदाः। भूतभविष्यतोरपि प्रत्यक्षत्वं योगिप्रत्यक्षादिदशा न भवति। एवं द्वादशानां तावद्भिर्गुणने चतुश्चत्वारिंशदधिकं शतम्। संस्कृतेतरभेदेन त्रिविधत्वं यदुक्तं तेन गुणने द्विप चाशदधिकानि नवशतानीति (!) वाक्याभिनयस्य भेदाः। सूचाया वाक्यतदर्थभेदाद् द्वैगुण्यम्। तेन एकोनविंशतिशतानि चतुरधिकानि सूचाभेदाः। वाक्यतुल्या एवाङ्कुरभेदाः सूचाभेदैर्गुणनीयास्तैः, पुनः शाखाभेदास्तैरपि द्विविधनाट्यायितभेदस्तावद्भिर्निवर्त्यङ्कुरभेदा इति कोटिशतान्यनेकानि भवन्ति। न तु यथा **श्रीशङ्कुके**नोक्तं चत्वारिंशत्सहस्राणीत्यादि।

एवं विशिष्टः सामान्येनाभिनीयमानः संभूयाभिनयैर्युक्तः सर्वाभिनयेषु सामान्यभूत इत्येवं यः सामान्याभिनय अस्या एकीभावनिबन्धनभूताया अलातचक्र (मण्डल) संनिभत्वसम्पादिकाया सामान्याभिनयक्रियायाः प्राधान्यप्रदर्शनार्थमाह **अनुद्धतमसंभ्रान्त**मित्यादि {**७५**}। अनाविद्धशब्देनाङ्गिकविषयं सामान्यं दर्शयति। एतदभावं दुष्टत्वमिति दर्शयन् व्यतिरेकक्रमेणापि सामान्याभिनयस्यावश्योपादेयतामाह **एतदेव विपर्यस्त**मित्यादिना {**७७**}। आभ्यन्तरमिति (स्वयमेव विवणोति) **लक्षणाभ्यन्तरत्वादिति** {**७८**}। ननु वागङ्गाभिनयोपेत इति लक्षणं तस्य बाह्यो प्यस्तीत्याशङ्क्याह **अनेन लक्ष्यते यस्मा**दिति {**७६**} सामान्याभिनयरूपमेव लक्षणमिति तात्पर्यम्। (**संप्रयोजनमिति**) नाट्यविषयाः प्रत्येकं तावत् क्रिया एकीभावं नेयाः,

एकीभावगतश्च क्रियासमूहो प्येकीभावं नेय इत्येतत्। **कर्मप्रयोग**शब्दाभ्यां **नाट्य** इति सप्तम्या कथयति– अनेन विना स्फुटं नाट्यरूपत्वमेव साक्षात्काराध्यवसायरूपं रसानुप्राणितं तन्न संपद्यत इति। व्युत्पत्तिदूरीभावं त्वनधीयानां, **भट्टपुत्रा**दौ तदभावात्तदाह अनाचार्योषिता ये चेत्यादिना।

अथ संभूयाभिनयरूपत्वमेव सामान्याभिनयमाह **शब्दं स्पर्शं चेत्यादि** {८१}। इन्द्रियशब्दस्येन्द्रियार्थशब्देन स्पर्शादिविशेषणस्यासंभवम्, स्वविषयग्रहणावेशः स्वकरणग्राह्यतावेशश्च सर्वेषामिन्द्रियाणां विषयाणां च प्रदर्श्यते, अत एवैष सामान्याभिनयनेये र्थद्वये भिनयस्य साधारण्यम्। **भावै**रिति क्रियाविशेषैरित्यर्थः। तानाह **कृत्वा साचीकृतां दष्टिमि**त्यादि {८२}। अनेनादरवशात्समस्तो भरः श्रोत्रदेशमनुयाति, यथोक्तं–

तथाहि शेषेन्द्रियवत्तिरासां
सर्वात्मना चक्षुरिव प्रविष्टा।। (**रघु** ७.१२) इति

चकाराच्छ्रोत्रमपि शब्दग्रहणाविष्टमनेनाभिनीतं भवतीत्याह। एवमुत्तरत्र।

एतदुपसंहरति प चानामिन्द्रियार्थानामित्यादि। **इन्द्रियार्थाः समनस** {८७} इति यथाशब्दादिग्रहणक्रियाभिः शब्दः श्रोत्रे प्रतीयते, तन्मनो पि तदधिष्ठातक्रमेणाधिष्ठानं कुर्वदित्यतो पि सामान्याभिनयः। तदुक्तम्– युगपद् ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति। **मनसस्त्रिविधो भाव** {८८} इति **वैशेषिका**दिदशि मनस्संयोगजो य आत्मन इच्छाद्वेषमाध्यस्थ्यलक्षणो भावः स मनस इत्युक्तः।

कापिलदशि तु **विन्ध्यवासिनो** मनस एव, **ईश्वरकृष्णा**दिमते मनःशब्देनात्र बुद्धिः **प्रह्लादनेन गात्रस्ये**त्यादिकं विषयग्रहणक्रियास्वभीष्टविषये निदर्शयितव्यम् {८६}। अतो पि चास्य सामान्याभिनयत्वं द्रष्टव्यम्।

एतदेव स्फुटयति **दष्टे (इष्टे?) शब्द** {९०} इत्यादिना। सुमुखत्वं प्रसादादियुक्तं वदनमित्यर्थः। विकर्षणानि सङ्कोचनानि च। बहुवचनेन मध्ये ग्रहणसिद्धये विकासासंभिन्न इति दर्शयति।

अथात्रैव पूर्वोक्तप्रकारसंभवं दर्शयति **तेनेद**मित्यादि। कृतं कर्तव्यमिति वाक्यशेषे भूतता भविष्यत्ता च। आत्मनि सुखादयो र्थाः समवायिन इति सर्व एव ते आत्मस्थाः स्युः, रूपादीनां चान्यत्र समवायात् सदैव परस्थता स्यादित्याशङ्क्या **आत्मानुभावी यो र्थः स्या**दिति {९४}। परशब्दसन्निधानादात्मशब्दो त्राहंभावास्पदे प्रत्यगात्मनि वर्तते। तमात्मानमनुभावयति यदार्थः स आत्मस्थः। रूपादयो पि चैवं भवन्तीति कथं नात्मस्थाः परसुखादयश्च नैवमिति कथमात्मस्थाः।

अथ कामोपचारस्य सामान्याभिनयत्वमुपपादयति **प्रायेण सर्वभावानामि**ति। **काम**ादिति इच्छातः। यद्यप्यनिच्छोः किञ्चिद्भवति तदपि प्राक्तनं च कर्माधिपत्यात्। कर्मस्थापूर्वकमिति प्रायग्रहणं व्याप्त्यर्थः कामादेव निष्पत्तिरित्यर्थः।

ननु को यं कामो नामेत्याह **स चेच्छे**ति {६५}। न चेच्छामात्रादेव कार्यविनिष्पत्तिरित्याह गुणेन कार्यप्रयत्नादिना कार्यव्यापारादिसहितेन सम्पन्नः सहकृतः सर्वकार्यकारी। नन्वेकैव चेदिच्छा कथमनेकं कार्यं प्रसूयत इत्याशङ्क्श्या **बहुधा परिकल्पितः** भूयस्यः इच्छा इति यावन्तमुदाहरति **धर्मकाम** {६६} इत्यादि। **धर्मः** कामः अर्थो मोक्षे च। तत्र कामो नामेच्छा सा च सुखे तत्साधने वा भवति। तत्र धर्मार्थयोः स्वयं सुखरूपत्वं नास्ति सुखसाधानतापि च। साक्षाद्धर्मेण ह्यप्सरोनन्तादि (गतादि?) सुखसाधनमुपार्ज्यते। एवमर्थे पि मन्तव्यम्। मोक्षो यद्यप्यबहिस्साधनाधीनपरमान्दविश्रान्तिलक्षणः सुखात्मैव, तथापि दुर्लभ इति न तत्र संमोहितं लोकस्य ह्रदयम्। स्त्रीपुरुषयोस्तु संयोगः साक्षादेव सुखसाधनमिति तस्यैवेच्छाविषयतेति निरुपपदेन कामशब्देन स एव वाच्यः। तेन च सर्वो र्थो नुरज्यते, यदाह– स्त्रीति नामापि संह्लादीति (**कामन्दक** ४–५२) इति। तथापि तत्स्पष्टे लोकोत्तरे(रो?) प्यर्थो लोकस्य ह्रदयसंवादादयत्नेनैव ह्रदयंगमत्वमभ्युपगच्छति। यथा–

मोहदुर्दिननिशाभिसारिका मानिनी समदना मदोद्धता।

धीरियं प्रणयस्तस्त(स्त्व?)दुन्मुखी खण्डितां रमण मास्म तां कृथाः।। इति

अनेनैवाशयेन रहस्यो प्यर्थो मया रहस्येषु (मुख्ययैव वत्त्या) निबद्धः कैशिक्या ह्येतदर्थमेवादरेण विनिवेशः प्रतिपादितः। अत एह्यस.....।

कामोपचारस्य सामान्याभिनयत्वं बहुतरलक्ष्यव्यापकत्वात् तदेव दर्शयति **यः स्त्रीपुरुषसंयोग** {६८} इति। इच्छामात्रमपि तत्र सुखे (चोपकारकृत)मित्यत इच्छालक्षणं संभोगं करोतीत्याह। उपचारो न्योन्यह्रदयग्रहणोचितैर्व्यापारैः परिपूर्णः। इह चोक्त (उत्तम) प्रकृतिर्यदि भवति तद्रसाध्यायोक्तदशा श्रङ्गार इत्युच्यते। एतमेवार्थमुपोद्बलयति **भूयिष्ठमेव लोको यं सुखमिच्छति सर्वदा** {६६} इति। **भूयिष्ठ**मिति प्राप्तादधिकमिति यावत्। अत एव परमानन्दलाभमन्तरेण न कुत्रचित् संतुष्यति लोकः। **सर्वदेति** दुःखाभावमपि सुखार्थमेवेच्छति, सर्वदुःखनिवत्तिं हि कामयते सुखेन यथेच्छश्नीयात्, यथाभीष्टं च रमणीमुपभु जीयादिति। हारमपि त्यजति मदुशीतलसमीरस्पर्शजनितसुख––सिद्ध्यर्थमेव। अत एव शून्यरहस्यविदः **कणादसुगता**दिसंमतमिमं मोक्षं न रोचयन्ते प्रेक्षावतां तत्राप्रवत्तिप्रसङ्गादिति दर्शितमित्यलं बहुना।

उपचारकृतमित्युक्तम्, तत्रोपचारज्ञानाय स्त्रीणामाशयं दर्शयति, आशयग्रहणपूर्वकत्वादुचितस्योपचारस्य **नानाशीलाः** (इति)। शीलं सत्त्वं चैतन्यं बुद्धिपूर्वकं स्वभावो हेवाक इति पर्यायाः। **देवदानवे**त्यादिना तानि शीलान्युद्दिश्य यथोद्देशं लक्षयति। **आदि**ग्रहणेनान्यदपि शीलमस्तीत्याह {१००-१०१}।

समरतेति {१०३} नातिमद्धी नातिखरेत्यर्थः। **स्वङ्गीति** {१०६} सुखसन्निवेशान्यङ्गानि यस्या इत्यर्थः।

व्यावतं {११२} विस्तीर्णमास्यमन्तर्मुखं यस्याम्। निष्कुटे गहारामे चरतीति (निष्कुटचारिणी) तच्छीलेति। **कुत्सिताचारे**ति {११५} औपरिष्टकादिप्रिया। (**बुद्धिमतीति**) अशेषाविस्मरणं बुद्धिः प्रतिभा {११६}। **प्रसह्येति** {१२२} कामुकमभियुज्येत्यर्थः। **निवास** इति सौधादिः {१२६}। (**रतियुद्धकरी**ति) रतौ युद्धमिव। (**नखेति**) नखदशनप्रकारादि करोति स्वयं च तदात्मनि बहुमन्यते {१३१}। (**संक्षिप्तपाणीति**) संक्षिप्तं परिमितम् {१३६}। शीलज्ञानस्योपयोगमाह **विज्ञाय च यथासत्त्वमुपसेवेतेति** {१४५}। सत्त्वानुसारेण सेवायाः प्रयोजनमाह **उपचारो यथासत्त्व**मिति। एवं च सतीत्येतदेव व्यतिरेकेणाह **महानप्यन्यथेति**। महानीति पूर्णः। **अन्यथे**ति अयथासत्त्वम् {१४६}।

पुरुषार्थान्तरे कस्मादित्यव्युत्पत्तिर्न कृतेति वेदप्रामाण्यादि दर्शयति **धर्मार्थं ही**त्यादि {१४८}। अस्येदानीं सामान्याभिनयस्य प्रकृत उपयोगं दर्शयति **कामोपभोगो द्विविध** {१४६} इति। (**नाट्यधर्म** इति) नाट्योपाये इतिवत्त इत्यर्थः। अभ्यन्तरमन्तःपुरं तत्र भवः (आभ्यन्तरः)। **नाटक** इति नाटिकायां चेत्यर्थः {१५०}। **अनुपूर्वश** इति {१५१} (वक्ष्यमाणग्रन्थे मुनिना) स्त्रीणां त्रैविध्यम्, राजोपचारे नायिकायाः कामोपपत्तिः, इङ्गितं इष्टवेदनम्, कामावस्थाः, विप्रलम्भोपचारः, दूतीप्रेषणम्, सन्देशः, रत्युपायचिन्ता, (कन्यामित्रम्), प्रच्छन्नकामितम्, अन्तःपुरभोगः, (नि)वासकः इत्यादिना क्रमेणेत्यर्थः। राज्ञामाभ्यन्तर एव नाटके भोगः, न तु राज्ञामेवेति। वेशो गणिकानां स्थानं तत्र भवाः वेश्याः। (**कृतशौचे**ति) {१५३} कृतं शौचं शुद्धशीलत्वमेकान्तावरुद्धत्वेन यस्याः सा च वेश्या पुनर्भवा। **कन्येति** गणिका कुमार्यपीत्यर्थः। **न हि राजोपचारे तु बाह्यस्त्रीभोग** इत्यस्यापवादमाह दिव्यवेश्येत्यादि {१५४}। यथा पुरूवसः उर्वश्या।

कामोपचार इति प्रस्तुतस्तत्र कामस्य कथमुत्पत्तिरित्याह **श्रवणा**दिति सर्वत्र शेषः {१५८}। सीतायाः श्रवणाद्रावणस्य शकुन्तलादर्शनाद् दुष्यन्तस्य।

रूपं चित्रादि प्रतिकृतिः, ततो **वत्सेशस्य** दष्टे प्याकारे कामो नुत्पद्यमानो ङ्गलीलालक्षणाद्विचेष्टितादुपजायते, नष्टरागप्रत्यानयनं वा ततो भवति, यथा **विशाखदेवस्य** निबद्धे **भिसारिकाबन्धितके** (**वञ्चितके**) वत्सेशस्य पद्मावतीभट्टशबरीवेषाद्याचरणरूपाल्लीलाचेष्टितात् कामावत्तिराख्याता। एवं मधुरे प्यालापे मन्तव्यम्। माधुर्यमर्थद्वारेण स्वरूपतः। **च**कारेणान्यदपि निमित्तं दर्शयति। यथा **तापसवत्सराजचरिते** पद्मावतीं प्रति कामोत्पत्तिर्वत्सेश्वरस्य निमित्तमत्यन्तानुवत्तिर्नाम। तथा चाह–

मयि मनः प्रणिधाय धता जटा
न गणितः स्वजनो न नवं वयः।
अनुगमैरिति मामनुरागिणी
व्यवसितादपनेतुमिवेच्छति।। इति (४–८)

कामभावः कामाख्यश्चित्तवत्तिः, तत्कृता**नीङ्गितानि** शरीरविकारा इत्यर्थः {१६६},

अप्राप्तसुरतोत्सवेति {१६६} प्राप्तसंभोगत्वे तु नैते विकाराः प्रादुर्भवन्ति। यदा तु काम उदितस्तदादेः प्राप्तसंभोगता कामावस्थानामुदय एव तथा च प्राप्तसंभोगतायामपि विप्रलम्भे कुसुमदक्षादिमहिमानं प्राप्ते कामिजनसंभोगे भवन्त्येवैता अवस्थाः। तथा च **भट्टतोतेनो**क्तम्–

कामावस्था न शङ्गारः क्वचिदासां तदङ्गता। इति

पूर्वप्राप्तसंभोगतायामपि शङ्गाराङ्गतेति यावत्। अप्राप्तसंभोगित्वे पि हि सागरिकावत्सराजयोर्दर्शितः शङ्गारो रसाध्याये।

अभिलाषात्मकः कामः क्रमादीदशीर्दशाः प्रतिपद्यत इत्याह **प्रथमे त्वभिलाष** इत्यादि {१७०}। अत्र व्यभिचारिण एव (**केचित्**) कामावस्था लक्षणान्तरयोगादिह पुरस्ताः। **व्यवसायादिति** {१७३} काम्यजनज्ञानं **तत्संकल्पपूर्वकेच्छा** तत उद्रिक्तत्वमस्येति **समागमोपायस्य** तद्विषयस्य चिन्ता विषयस्य द्वितीयावस्थात्मनः कृतं करणं यतो वक्ष्यति हि केनोपायेन संप्राप्यत इति चिन्तनीयाद्यवस्थासहचरितं कार्यं, वाग्व्यापाराद्युचितः शब्दश्चान्यसाहचर्यादित्याह **निर्याति विशति** चेत्यादि {१७४}। मदनस्याकार अपाक्रियते येन दष्ट्यादिविशेषेण **दर्शनपथ** इति तं यत्र पश्येत तेन वा दश्येतेत्यर्थः। दूतीनिवेदितैर्भावैः मनोरथैरित्युपलक्षणं स्वकल्पितैरपीत्यर्थः **आकेकर**मिति {१७६} विचलमविचलं **विप्रेक्षितम्।**

विहस्तेति अशक्ता {१७८}। **दूत्या अविरह** इति समासः {१८०}। **उद्वेगाख्यं स्थान**मवस्था {१८१}। **उद्वेगाभिनयो** निर्वेदे दर्शितः {१८२}। रुदितानिःश्वसितादिः पूर्वावस्थाया उत्तरावस्थान्तरीभवतीति दर्शयति उद्विग्ना सती विलापिनी भवतीति। **सर्वावस्थागता**पीति {१८५} गुरुजनसन्निधावपीति, अनेनोन्मादत्वं स्फुटयति। **विहारकाल** इति {१८६} क्रीडोचितेषु कालेषु रोदितीत्यर्थः। **नाट्य**मिति न तु पटशकलवक्रशरावाद्यत्रोन्मादोक्तमिति भावः। इयत्युन्मादपर्यन्ते प्राप्ते चित्तवत्तिभवे कामे शरीरमप्यन्यथाभवतीत्याह **सवैर्निराकृतैः पश्चाद्व्याधि**रिति {१८७}। निराकृतैः विफलीभूतैः। मुह्यतीत्यत्र हेतुः, यतो हृदयं नावतिष्ठति। **हा कष्ट**मिति एतद्व्यतिरेकेण **तूष्णीका** एतदेव भाष्यत इति यावत् {१८६}। **प्रतीकारैरि**ति समागमोपायैरित्यर्थः {१६१}। **नैधनं** मरणम् {१६२}। **नानारूपाणी**ति अवस्था इत्यर्थः {१६३}।

पुरुषस्य सुलभोपायत्वान्मध्य एव समागमः शक्यक्रियः, न तु योषितामित्याशयेन कामावस्थाः स्त्रीषूपदिष्टाः, पुरुषेष्वतिदिष्टाः।

स्रजो भूषणगन्धांश्चेत्यादिना यदुक्तं तद्यथायोगमवस्थातुं योज्यम् {१६८}। प्रच्छन्नकामितं नायिकान्तरेभ्यः सन्धियमाणमित्यर्थः।

ननु राज्ञां किमशक्यं येन दूतीप्रेषणादिप्रयासमनुभवन्तीत्याह न दुर्लभाः पार्थिवानामित्यादि। आज्ञाकृता गुणा उपायाः उप प्रलम्भादुदाहरणात् अय इत्यर्थः। राज्ञां ये उपाया इति सम्बन्धषष्ठी तेन बलार्थे भिमतनिषेधः। **दाक्षिण्या**दित्युभयविषयम् {२०४}, पूर्वनायिकासु च दाक्षिण्यं, अभिलषणीयप्रमदाकृतं च दाक्षिण्यम्, तस्या राजविषयं

प्रेमेत्यर्थः। कुतः प्रच्छन्नत्वमित्याह **बहुमानेने**ति कर्मषष्ठी। **देव्यो** हि प्राप्ताभिषेका अवश्यं राज्ञा बहुत्वेनोत्कृष्टत्वेन माननीयाः {**२०५**}। **अनेकधे**ति विवाहितावरुद्धेत्यादिनेत्यर्थः {**२०६**}। **वामाभिनिवेशित्व**मिति {**२०७**} ''सुलभावमानी हि मदन'' इति तद्विदः। तथा ह्यभिलष्यमाणं वस्तु प्राप्तं चेत् को भिलाषः। तेन प्राप्तं प्राप्तमपहारितमिव, गतं गतं प्राप्तमिवेत्येवं परम्पराक्रमेण वर्धिष्णुरयं कामः परमां प्रीतिं तनोति। न ह्यत्रकण्डूयायामिव निवत्तिः साध्या, अपि तु भोगात्मकं सुखमिति रतिहेतुत्वाद् रतिः काम इत्यर्थः।

अथ स्पष्टकामितमाह **राज्ञामन्तःपुरजने (दिवा)संभोग** इति {**२०८**}। संभोगः परस्परावलोकनप्रणयकलहसङ्गीतकादि। यथोक्तम्– ''तद्वक्त्रेन्दुविलोकनेन दिवसो नीतः'' इति। अन्तःपुरजनो त्र ऊढा, पुनर्भूः, अवरुद्धगणिका, कन्यकाप्रेष्याविषयं तु प्रच्छन्नकामितमुक्तम्।

प्रभूतान्तरपूर्वस्य वासकवत्तान्तमाह–

परिपाट्यां फलार्थे वा नवे प्रसव एव वा।

दुःखे चैव प्रमोदे च षडेते वासकाः स्मताः। (ना.शा. २२.२०६) इति

परिपाटिर्यथाकल्पितानुपूर्वी अस्या एकेन दिनेन वारः, अस्या द्वाभ्यामित्यादि। तदपवादमाह **फलार्थ** इति ऋतावित्ति यावत्। **नव** इति नवत्वे प्रसवे वत्ते चिरविरहखिन्नां सुखयितुं **दुःखे** तदीयबन्धुव्यापत्त्या दुःखिता आश्वासनीयेति। **प्रमोद** इति तदीयपुत्रोत्सवादौ 'उत्सवो हि माननीय' इत्युक्तम् {**२०६**}। वासयति तत्र स्थाने रात्रिमिति वासः। रात्र्युचितः कामोपचारः फलार्थ इत्यस्य हेतोः सर्वापवादकत्वं दर्शयितुं धर्मवत्तिना राज्ञा परिपाट्या द्वेष्या दुर्भगा अपि सेव्या इति निरूपयितुमाह–

उचिते वासके स्त्रीणामतुकाले पि वा नपैः।

द्वेष्याणामथवेष्टानां कार्यं (चैवोपसर्पणम्)।। इति {**२२.२१०**}

आवर्तकालो हि भूयानपि फलतः परमिति भवति (परिमितीभवति?)। यथोक्तम्–

ऋतुः षोडश तत्राद्याश्चतस्रो दशमात्मराः

त्रयोदशी च निन्द्याः स्युरयुग्माः कन्यकोद्भवाः

षष्ठ्यष्टमी च दशमी द्वाभ्यां वर्णैश्च साधिका

युग्मा पुत्राय रात्रिः स्यात् ।। इति।

तत्रापि नक्षत्रविशेषपरिवर्जनम्। पुत्रश्च राज्ञां मुख्यफलम्, यथाह 'प्रजायै गहमेधिनाम्' (रघु १.७) इति। अत्र तु वद्धपशुव्यो (पशवो?) वदन्ति–

मासपसूअं (छम्मा) मासगब्भिणी एक्कदिअहजरिअं च रंगुत्तिण्णं च पिअं पुत्तअ कामंतओ हो हि ।।जी. एस.।।५६ (मासप्रसूतां षण्मासगर्भिणीमेकदिवसज्वरितां च। रङ्गोत्तीर्णा च प्रियां पुत्रक कामायमानो भव।।) (इति यत्तन्निषिद्धं स्मतौ वैद्यके च।)

वासकभावाभावितान्नायिकाभेदान्दर्शयति **अत्र (तत्र?) वासकज्जेति।** एताः क्रमेण लक्षयति **उचिते वासक** इत्यादिना। उचितः पूर्वोक्तेन नयेनायातः। **लालसा** साभिलाषा

(अभिलाषा?) स्वाभिलाषा। **आमोद**गुणो हर्षः सौभाग्याभिमानश्च {२१५}। **व्यासङ्गा**दित्यन्यनारीविषयादित्यर्थः {२१७}। (प्र)रूढाः प्रलम्बीभूता अलकाः, **केशान्तश्च** कबरीभारः। प्ररूढ एकवेणीभूते यस्याः। अन्ये त्वकृतकर्मतया केशान्ते ललाटे रोम्णामुद्भेदमुत्प्ररूढं वर्णयन्ति। मदो मद्यकृतः, चकाराद् द्वयं वदन्मदनस्यैव प्राधान्यमाह। अभिसरः सहायः तस्य व्यापारेण प्रियतममतिक्रामति, ''तत्करोति तदाचष्टे तेनातिक्रामति धातुरूपं'' चेति स्पष्ट (स टेः?) इत्यस्य वद्धिः। कुप्यन्ती प्रशान्तेत्यादयस्तु नायिकाभेदे नेहोक्ताः, तेषां वासकाभावनिवत्तत्वाभावात्। **नाट्काश्रया** इति नाट्यविषया इत्यर्थः {२२१}।

तत्र विप्रलम्भजीवितं श्रङ्गारेण वासकाभावभावितनायिकाभेदाश्रयं प्रथमं दर्शयति **चिन्तानिःश्वासखेदेने**त्यादिना {२२२}। सामान्यभूते सकलहृदयसंवादिनि मदनोपचारे चायमभिनय इत्यपि सामान्याभिनयः। **भावानेता**निति {२२४} पठितानुभावव्यभिचारिसमुचिता ये भावा व्यभिचारिस्थायिरूपा(णामि)हापठितमप्यनुभावजातं प्रदर्शयति यावत्। वासकसज्जा अभिसारिका च स्वावसरे स्वाधीनभर्तकयैव तुल्ये इति पथङ्नोक्ते।

अथाभिसारणस्वरूपमाह **वेश्याया** इत्यादि। **भावविशेषै**रिति वस्तुविशेषैरित्यर्थः {२२६}। संलापो दूत्या संख्या सहोक्तिप्रत्युक्तिः। (**अलङ्कारेणे**ति) अलङ्कारशब्दो नूपुरादि (वि)शिष्टः (तत्) {२३१}।

ननु राज्ञां वेश्यादिसंभोगो निह्नवकारापायसङ्कुलत्वात् किमिहानेन दर्शितेनेन्याशङ्क्याह **सर्वावस्थानुभाव्यं** हि कार्यं नाटकमिति नाट्य इति यावत् {२३२}। सर्वावस्था अनुभाव्या प्रत्यक्षमाणत्वं नेया, यत्र प्रकरणादौ वेश्यासंभोगो प्यस्तीत्युक्तं **दशरूपके** (अध्या–१८) यदि तर्हि सर्वतः प्रकारो नाटके प्रदर्शयस्तदा वासके यदा प्रकटप्रकार उक्तः।

एवं व्याजप्रकारो पि वाच्य इत्याशयेनाह **नवकामप्रवत्ताया** इति {२३३}। नवे पुरुषसम्भोगे या प्रवत्ता प्रथमसमागमनीया वेश्या पुनर्भूर्गान्धर्वविवाह्या कन्या वा तस्याः समागमे चिकीर्षिते, सव्याजैः उपायैः वासको व्याजश्च यथा तथैव प्रकटं नाङ्गीकरोति, नायिकान्तरेभ्यश्च झटिति भीरुर्नायको भवति। अवरुद्धापि खण्डिता कलहान्तरिता वा वासकमनङ्गीकुर्वती व्याजतो ङ्गीकार्यते। तत्र नायिकाहृदयग्रहणोचितविदग्धतानिमित्तं नायकस्योपचारमाह **नानालङ्कारे**त्यादि {२३४}।

ननु प्राप्ता चेत् प्रमदा तर्हि निवत्तकामः, तत् को यमुपचारप्रतिभर इत्याशङ्क्याह **न तथा भवती**ति। मदनः कामभवः इति काम एव। मदि हर्षग्लपनयोरिति पठति, तेन समागमे द्विगुणीभवति कामः, ततश्चोपचारे यत्र उचित इत्याह **विलासभावे**ति {२३६}। विलासः स्त्रीणां च व्याख्यातः '**स्थानसनगमनाना**'मिति, (**२२.१५**) (स्त्रियाः), '**धीरसंचारिणी दष्टिः** (**२२-३५**) इति (पुरुषस्य) च। तत्प्रधानाभावाः चेष्टितानि। **इङ्गितं** प्रेमसूचका व्यापाराः व्याख्याताः '**काम्येनाङ्गविकारेणे**'त्यादि, '**चकिता** भवेत्' इत्यन्तेन (**२२-१६४-१६८?**)

वाक्यलीलेति अङ्गसाध्यदिषूक्ता। माधुर्यं ''**सर्वावस्थाविशेषे**''ष्विति (२२-२६) नणां च, ''**अभ्यासात् करणानां**'' (२२-३६) इति। एषां विस्तारगुणेन कविवर्णनाकृतेनोपपन्न एतस्मादुपचारत्सम्यगुद्भवो यस्य। **चूर्णः** पटवासः {२३८}। **वासो** वस्त्रम्। **नात्यर्थ**मिति खेदावहत्वात् {२३६}। रात्रावदश्यत्वात्तु दरिद्राणां दीपशून्यं वासगहं दष्टवतां हेतुत्वेन स्वनवत्त्वं, **चे**ति हेतौ यतः प्रशस्तेन सुरतलीलोपयोगिना शब्देन युक्तम्। **नाम्बरग्रहणं रङ्गे** इत्यादिना प्रसङ्गतो निषेधमाह {२४०}। वासोपचारसिद्धये तु रङ्गे प्येतदुपचारोपयोगि कर्तव्यमिति हि कोप संभावनयेति नाम्बरग्रहणमिति सामान्योक्तावपि प्रकारादुत्तमाया मध्यमायाश्चेति गम्यते। अधमायाश्च भवत्येतदङ्गे पि। एवं निषेधमधमासु पुनर्विधिमुक्त्वा प्रकृतमुपचारमेवाभिसन्धत्ते **भूषणग्रहणमि**त्यादि {२४३}। उक्तपूर्वे त्रोपचारे आदरं दर्शयति **विधिवद्वासकं कुर्यादि**ति वासकोचितमुपचारमित्यर्थः।

ननु समाप्त उपचारे यदि प्रियो नागतः किं कुर्यादित्याह **प्रतीक्षमाणे**ति {२४५}। नालिकाशब्दमादिशेदिति इयांश्च कालो गतः किमित्यादि न प्राप्तः स्यादिति, ततो प्यनागते यं विधिरित्याह **श्रुत्वा तु नालिकशब्द**मिति {२४६}। **तैस्तैर्विचारणोपाये**रिति यदुक्तं तत्रोदाहरणम् {२५०}। अनागतोपायानाह **गुरुकार्येणे**त्यादि {२५१}। अनुभाववर्गस्त्वसूयाखेदार्थचिन्तादिव्यभिचारिसंभवो यथायोगं योज्यः। **उत्पातः** सहसा शुभसूचको महाभूतपरिस्पन्दः स च परस्थः {२५२}। स्फुरितं चलनं स्पन्दितमेतदिति त्वेते स्वदेहस्थे इति भेदेनोक्ते। **नेत्र**मित्यादि **सव्यं** वाममिति मन्तव्यम् तथा बाहू **अन्यथाभाव** इति दक्षिणस्फुरणे। **प्रत्युद्गच्छे**दिति नायिकेति प्रथमया योज्यम् {२५८}।

एवमितया वासकसज्जया वागङ्गसत्त्वव्यामिश्रः सामान्याभिनयः प्रियसंप्राप्त्यवधिदर्शितः। अथ खण्डितादीनां संदर्श्यते **यदि स्यादपराद्ध**स्त्विति **तैस्तै**रिति मानावहित्थवस्त्रभङ्गाभिष्यन्दादिभिः {२६०}। अन्यथाभाषणे कोपादुचिते तदपवादमाह **विस्रम्भे**त्यादि कस्मिंश्चित् कार्ये निरूप्ये विस्रम्भसात्मिका कार्या {२६२}, शरीरापाटवादि पश्यतो वार्ताप्रश्नादौ स्नेहः, तद्वशाद्यो नुरागो लक्षितः, कृतापराधः सत्यतो न वेति सन्देहः, प्रणयःप्रार्थना, अपत्याद्यभ्युदयः परितोषः कलास्थित्यादि (कलाशिल्पादि?) निकृतिपक्षेण स्पर्धा संघर्षः, पक्षस्य सखीजनादेर्यदा कार्यः प्रियेण सम्पाद्यः पश्यति तदा सखीकार्यविवादविषयाद्दाक्षिण्यम्, इन्द्रजालादिकृते विस्मयः धर्मार्थकामोपयोगिनि व्रतगहकृत्यकौमुदीहर्षोत्सवादाववश्यं कर्तव्ये चाप्रियं प्रति स्मरणाकर्तव्या, तेन वा स्मरणम्, उपालम्भद्वारेण किमयं वदेदिति परीक्षणम्, यथा नायको त्यादरात् किंचित्पच्छति तत्कुतूहलम्, सर्वो यदा हसति तदा हास्यम्, अग्न्याद्युत्पातः संभ्रमः, वसु(बन्धुः?) वियोगादि व्यसनम्, एव एतेएवनाभाषणे सर्वथैव निस्नेहता स्यात्। **क्रोधकृत** इति युगपदित्यर्थः {२६४}।

अपराद्ध इत्युक्तं तत्रापराधं दर्शयितुमुपक्रमं करोति **यत्र स्ने** इति {२६५}। योनयो हतवश्चत्वारः– वैमनस्यं, व्यलीकं, विप्रियं, मन्युरिति, तान् क्रमेण लक्षयति **निद्राखेदालसगतिमि**त्यादिना (सुरते) गतया निद्रया {२६७}। (**असूयितेति**) यदसूयितेनावेक्षणं तेन {२६८}। (बहुधेति) यतो नायिकातो वार्यते तस्यामेव **दश्यत** इति सम्बन्धः {२६६}। (संघर्षेति) सम्यक् कृतो घर्षः संघर्षः। (**उक्त्वैव**मित्यादि) प्रतिज्ञातस्यापरिपालनं विप्रियम् {२७१}। दूतलेखादिमुखेन यानि प्रसादनार्थं प्रतिवचनानि तेषां भेदः दूषणमनङ्गीकरणम्। (**वलये**त्यादि) मन्युना तत्क्षण एव तनुत्वं गात्रे भवतीति वलयानां परिवर्तनं, वाससो **रशनायाश्**चोत्क्षेप इति {२७४}।

केचित्सहृदयास्त्वाहुः– मन्युना सखीजनमध्य एवास्याबहुमानलक्षणा भवत्यप्रतिपत्तिरिति तत्कृतानि च वलयस्य परिवर्तनं योज(लोच?)भ्रमणादिकं, रशनोत्क्षेपणं यन्त्रोत्क्षेपणं चेति। **मध्याङ्गुल्यङ्गुष्ठाग्रविच्यवा**दिति तत्स्थं मूलं व्यापारं स्मारयति {२७७}। (**कटीति**) कटीपार्श्वगतस्य हस्तस्य विवर्तमानाया **अ जले**र्हस्तस्य पताकाभ्यां तु **संश्लेषादि**त्यस्य विश्लेषणम् {२७८}, अवहित्थेन गाम्भीर्येण यद्वीक्षणं, तेन चायतं स्थानकमाक्षिप्तम्। तत्र हि तस्य विनियोग उक्तः (१२–१६४)। निरपेक्षभावता संभवतीत्याह गच्छेत्युक्त्वेति। विनिवत्तिप्राधान्यमुत्तरं येनासौ विलम्बते। **अपराध**मिति, अल्पे पराधे मूर्धनि मध्ये हस्ततले **भूषित**वस्त्रे {२८२}। **व्याज** इति व्रतोपवासो द्य मया प्रस्तुत इत्यादि {२८८}।

ननु वस्त्रापहारशयनादि रङ्गे निषिद्धमिति (किं)तेनोक्तेन, सत्यं लास्यदाने (स्थाने?) तु तस्योपयोगः। इह तु कामोपचारप्रसङ्गादित्युक्तं, तदाह **एतद्गीतविधानेने**ति, न च नाट्ये स्य सर्वात्मनानुपयोगः तथाहि यथा भाणकादौ {२६२}। **आकाशपुरुष** इति (प्रविष्टपात्रेण) भावितः प्रधानो प्रविष्टः पुरुषो भवति तदा इदमिदं मया दश्यत इति ब्रूयात् {२६३}। एवं परस्थं वा यदा व्याख्यायते न च प्रत्यक्षत्वेनैतदुपयुज्यत इति दर्शयति **यदन्तःपुरसंबन्ध**मिति {२६४}।

नन्वेवं सर्वममत्र प्राप्तमिति ननूत्पलचेटादौ दश्यते शयनमित्याशङ्क्याह **यद्वा शयीते**ति नात्र शयननिषेधस्तात्पर्यम्, अपि तु चुम्बनादिनिषेध इति भावः {२६६}। **पितापुत्रे**त्यादि {२६६}। ततश्च रसो भज्येत, स हि साधारणान्योन्यानुप्रवेशप्राण इति प्रत्यर्पि (प्रतिपदं?) वदामः। एतत्सामान्याभिनयमध्ये वाचिको प्यभिनयो स्तीत्याशयेनाह **प्रियेषु वचना**नीति {३०२}।

नारीप्सितैरिति न तु स्वोचितैरिति यावत् {३०६}। (रतिप्रीतीति) रतौ सत्यां या प्रीतिः परितोषः, रतौ क्रोधो पि हि भवति परितोषश्च सुतादावुभयमप्युपात्तम्। **सहसे**त्यप्रसाद्य {३१८}। **अन्ये पीति** उदाहरणमेतदित्यर्थः।

पूर्वोक्तमेवोपसंहरति **एष गीतविधान** इति श्रङ्गारे रसे **आकाशपुरुषादौ** {३२०-३३१}।

एवमिति प्रीत्या कोपेन वा, यदा **वाच्य**वचनं स्यात् **तत्राप्येष** एव वचन**क्रमः। पुरुषसंबन्धमिति** प्रत्यक्षपुरुषयुक्तमित्यर्थः। दिव्यवेश्याङ्गनाभिस्तु राज्ञां भवति संभोग इति

तत्र सामान्याभिनयमाह नित्यमेवेत्यादि। अत्र श्लोकद्वये यद्यपीत्यध्याहारेण **ये भावा** इत्यत्र च तथापीत्यध्याहारेण सङ्गतिः कार्या {३२६}।

विप्रलम्भो हि जीविते भिमान इति भावः। **समुन्माद्य** इत्यत्र हेतुमाह **उन्मादनादि**ति एतच्च **विक्रमोर्वश्यां** स्फुटमेव दश्यतां इति शिवम् {३३१}।

सामान्याभिनयः सो यं ग्रन्थिस्थानेषु सङ्गतः।
कृतो **भिनवगुप्तेन** शिवस्मरणशालिना।।

इति महामाहेश्वराभिनवगुप्तविरचितायां नाट्यवेदवत्तावभिनवभारत्यां सामान्याभिनयो द्वाविंशः।।

श्रीः

नाट्यशास्त्रम्

त्रयोविंशो ध्यायः

(वैशिकः)

पुंसामशक्तापि तदेकभावमादर्शयन्ती बहुभावपूर्णा।
वेश्यामतिर्निवतिधाम यत्स्था तस्मै नमस्तात्परमेश्वराय।।

सामान्याभिनयशेष एव वैशिक इत्युपसंहृतं वत्तपूर्वे ध्याये– बाह्यमप्युपचारं तु प्रवक्ष्याम्यथ वैशिके– इति, वैशिको वक्तव्य इति सङ्गतिः। तदुपक्रममाणो.....माद्येन तावन्निरुक्तमाह **विशेषये**दितिं विशेषणं जानाति, तेनातिकामयतीति च धात्वर्थो लक्षणमिति हि तद्विदो वैशेषिका (वैशिका?) (वैशिकः) वेश्याकामुकः स च सर्वान् कामान् विशेषयत्सतिवैदग्ध्यात्। अथ व्याकरणोचितमस्य निर्वचनमाह **वेशोपचारे साधु**र्वेति {१}। वेशो वेश्या उपचारस्तत्र भव इत्यर्थः। भवार्थमेव विभजति साधुरित्यनेन। तस्मादसौ कलासुं विशेषज्ञ इत्याह **यो हि सर्वकलोपेत** इति {२}।

आहार्याः शास्त्रज्ञतादयः। **सहजा** रूपलावण्यादयः {३}। **गम्यासु चाप्यविस्रम्भीति** सहसैव नाभियुक्तः, अपि तु स्फुटभावमन्वेष्यति {७}। **भवेत् चित्राभिधायीति**

वक्रोक्तिकुशलः। **तस्येति** वैशिकस्य। **कथिनी** बहत्कथादिलम्भ (न)कथनाकर्णनकुशला। **लिङ्गिनी** चित्रकरी। **प्रातिवेश्या** निकटावसथस्था {८}। **पाषण्डिनी** व्रतिनी। **रङ्गोपजीविनी** रजकस्त्री चारणस्त्री। **प्रोत्साहने कुशले**त्यादीनि सर्वासां विशेषणानि {१०}। उतः सह प्रोत्साहः प्रोत्साहनमिति द्वौ णिचौ। प्रोत्साहयति नायिका तु नायकस्तया प्रोत्साहयति संमुखीकारयतीत्यर्थः।

तस्या व्यापारान्तरमाह– **यथोक्तेति** संमुखीकरणं सन्देशार्पणं काम्यया भावपरीक्षणं चेति द्वितयमनया कार्यमित्यर्थः। **जडः** करणीयं न शक्नोति कर्तुं प्रत्युत्पन्नमतिसाध्यानि कृत्यानीत्याह {१२}। रूपेणार्थेन वा युक्तः स्वार्थतामाहरेत्। आतुरो हि दश्यमान एव जुगुप्सां जनयति, स च रतेर्निरपेक्ष इत्यातुरो न कामदूतः। नानादर्शितकारणं कृत्वा प्रोत्साहनमित्युक्तं तानि कारणान्याह **कुलभोगे**त्यादि {१३}। **उत्सव** इति स्वगह एव रात्रिचारप्रधानो य उत्सवः {१५}। प्रथमसङ्गम इति गान्धर्वविवाहे वेश्यापुनर्भूसङ्गमे चेत्यर्थः।

(**स्वभावे**ति) स्वभावे भावे सुरते ये तिशया नखरदनसहिष्णुतादयस्तैरुप– –लक्षिता अनुरक्तेति संबन्धः {१८}। **मित्राणि शत्रुजन**मिति नायकस्येति शेषः {२०}। पश्चात्संवेशनं पूर्वमभ्युत्थानं च। तेन विना किमत्र सुखमिति दर्शयति **उत्सवे व्यसन** इति नायकतस्य {२२}। **अनिष्टां कथां ब्रूते** इति पर्वतादपि (पूर्वकृतामिति?) {२४}। हृदयं गह्यते यैरुपायैः अस्या इति रक्ताया **व्यापारचेष्टित**मिति तदीय हृदयग्रहणव्यापारतात्पर्यत्वं कामतन्त्रे चेष्टितम् {२७}। अर्थस्य प्रदर्शनमिदं ममास्तीति। उपन्यासः (उपादानं?) अर्थस्य, दास्यामीति। **उपन्यासः** अन्यमुखेन काचिदनुरक्तस्याङ्गनास्तीति कथनम्। (**व्याधिते**ति) विचित्रा आधयो यस्य तस्य भावः। ततो हेतोरसेवनम्। विचित्राभिप्रायदर्शनव्याजेन तन्निकटादपसर्पणम् इति यावत् (**व्याजात्परित्याग** इति) {२८}। एषो न्यत्र रागीत्यन्यमुखेनाभिधानं भावोपक्षेपः। रक्ताया अप्येतानि विरागकारणानीत्याह **दारिद्र्यादि**त्यादिभ्यः {२६}, अपत्यमरणादेः, अश्राव्यत्वं यद्वचनं पारुष्यं ततो यत एवं तेनास्यापि रागं रक्षेदिति **भावग्राहीणी**ति। **प्राप्यत** इति सेव्यत इति यावत्। **पुरुषै**रिति कुशलैरिति भावः {३१}।

अस्याः कथं तुष्टिरित्याह **लुब्धा**मित्यादि। **पण्डिता**मिति कलाविदाम्। **लडहत्वेन** प्रागल्भ्येन {३२}।

नीचसेवाभिरिति पादस्पर्शनादिभिः। **शिल्पदर्शनै**रिति विस्मयहेतुभिरित्यर्थः {३४}। प्रतिपदमशक्यो भेदसंग्रह इत्याशयेनाह **सर्वासामेवेति** उत्तममध्यमाधमानां प्रत्येकमिति यावत् {३५}।

(**सर्वासा**मिति) प्रथमं यौवनं यावद्विंशति {४२}। एवं त्रिंशच्चत्वारिंशत्प चाशदिति विभागः। **अन्ये** तु षोडशप चविंशतिप चत्रिंशत्प चचत्वारिंशदिति विभागमाहुः।

एषूपचारभेदमाह **नात्यर्थ**मिति क्लेशः दशनादिकृत्यं नातीव सहते {४८}। **रतिगुणाढ्या** कामतन्त्रप्रयोगप्रगल्भेत्यर्थः {५०}। **अविरहित**मिति भावैस्त्रिभिरपि {५१}।

उपचारार्थं पुरुषभेदो ज्ञेय इत्याशयेनाह **चतुरोत्तमावि**त्यादि। **प च** क्रमेण लक्षयति **समदुःख** इति {५३-५४}। **अज्ञातेप्सितहृदय** इति गम्भीर इत्यर्थः। **ज्येष्ठ** इति यावत् {५५}। नन्वन्यदीयं कार्यवशात्संक्रामेदित्याह **स्नेहे**ति अन्यदीयेन स्नेहेन प्रेम्णा परावत्तः तद्विषयो भावो भिप्रायो यस्याः {५६}।

ननु किमनेन स्त्रीणां भावज्ञानेनेत्याह **नानाशीला** इति। अर्थनमर्थः अभिप्रायः गूढाभिप्रायं हृदयमासाम्। **यथासत्त्व**मिति यथाशयम् {६३}। भावाभाविति अनुरागविरागौ **नारीणां विषये** बन्धनं स्वीकारः तं प्रतीति तस्मिन्साध्ये सामादयः उपेक्षान्ताः प चोपाया इत्यर्थः {६५}। तान् क्रमेण व्याचष्टे **तवा**स्मीत्यादि। **आत्मन उपक्षेपो** निजभावप्रदर्शनम् {६६}, **काले** दिवसे **दातव्य**मिति नियमे न सति निमित्तविशेषकृतेन प्रमोदव्यसनादिनिबन्धनेन दानेन वर्तयतीत्यर्थः {६७}। तस्या यो न्यः प्रियः तस्य दोषास्तथा दश्यन्ते यथा तया सत्यत्वेन प्रतीयेरन्निति भेदः तदाह **सोपायमिति** {६८}। चतुर्णामुपायानां स्वं स्वं विषयमाह **मध्यमस्था**मिति। कि ंचित् स्निह्यन्तीमित्यर्थः। **आनयेत्** स्वीकुर्यात्। **प्रतिपादये**दिति आत्मनि संमुखीभावं गमयेत् {६६}। **दुष्टाचार** इति देशात्पलायनं पुरुषान्तरगह एव वास इत्यादिके। तत्रापि च स्त्रीषु निरपेक्षः स्यादिति **मदुताडनबन्धनै**रिति {७०}। उपेक्षाया विषयमाह **सामादीना**मिति दण्डेनापि हि तत्साम्मुख्यं त्यजति या तस्याः कि ंचिदुपेक्षेत बुद्धिमानित्युक्तम् {७२}। किं संबुध्यत इत्याह **मुखरागेणे**त्यादि {७३}। वेश्याचित्तं तु दुर्लक्षमिति प्रयत्नपरीक्ष्यमित्याशयेनाह **अर्थहेतोस्त्विति।** किं सर्वासां वेश्यानामयं विधिः नेत्याह **मुक्त्वा दिव्यनपस्त्रिय** इति {७४}। ननु वचने वेश्याहृदयमुपलक्षेतेत्याह **द्वेष्ये तु प्रिय इत्याहुरिति। तुर**प्यर्थे {७५}।

ननु किमस्वकार्यहृदया एव ताः, नेत्याह **उपचारबलत्वादिति** अर्थकाममयादित्यर्थः मध्ये वा नो सेवया (?)। ननु यद्येवंभूताः कथं ताः काम्यन्ते जनैरित्याशङ्क्यावत्त्यैतदेवाह **उपचारबलत्वाच्चे**ति। यतो हृदयग्रहणोचितमुपचारं निन्दती मध्ये च विप्रलम्भयन्ती तस्मात् काम उत्सुको भवति। कामाभिनिवेशी स इत्युक्तम्। **काष्ठादग्नि**रिति प्रत्युत दुश्चिकित्स इत्यर्थः {७८}।

वैशिकपुरुषाधिकारे प्रवत्तमध्यायं प्रकृते उपयोजयति **योषिता**मिति। **नाटक** इति दिव्यवेश्यानां तत्र भावात् पताकानायकादिगतत्वेन चेति शिवम् {७६}।

अध्यायो वैशिकः सो यं त्रयोविंशतिपूरणः
कृतो भिनवगुप्तेन भद्रग्रन्थिपदक्रमः।।

इति श्रीमहामाहेश्वराचार्याभिनवगुप्तविरचितायां नाट्यवेदवत्तवभिनवभारत्यां
वैशिकस्त्रयोविंशो ध्यायः।।

श्रीः

नाट्यशास्त्रम्

चतुर्विंशो ध्यायः

(पुंस्त्र्युपचारः)

त्रिधा विकल्पनं यस्यां पुमान् यत्रोपचर्यते।
तां वन्दे प्रकृतिं शम्भोः शक्तित्रयविजम्भणात्।।

इह कामोपचारः पूर्वं दर्शितः कामश्च स्त्रीपुरुषहेतुक इत्युक्तम्। स्त्रीणां च पुंसां च यद्यपि विचित्राः स्वभावास्तथापि ते प्रतिपदमशक्यकलना इति प्रकृतित्रयेण त सर्वे शक्यसंग्रहा इति प्रकृतित्रयं वक्तव्यम्। तथा चाह **समासत** इति कामोपचारश्च श्रङ्गारपर्यवसायी नायकविशेष एवेति नायकभेदा वक्तव्याः। तस्य च नायकस्यान्तःपुरो बहिर्वा किन्नामधेयः कियान्वा परिवार इति सर्वं कविना ज्ञातव्यं नटेन च। तदेवं प्रकृतिनायकपरिवारभेदानभिधाय को यमध्यायो स्याभिचारमारभ्यते प्रकृत्यादिभेदोपचारो हि स्त्रीणां नपुंसकस्य (काम) विरहत्वादुपचारः स्नेहव्यवहार इत्यध्यायसङ्गतिः। तत्र प्रकृतिव्यवहारं तावदाह **समासतस्त्विति**। तुर्व्यतिरेके– पूर्वं विस्तरेण स्वभावो दर्शितो धुना तु संक्षेपत इति {१}।

(लोकोपचारेति) {४}। लोकोपचारो व्यवहार(स्तस्मिन् च तु) पत्यवकाशम्। कृतमुपकारं ये विस्मरन्त्यकृतज्ञास्तें मान्यामान्ययोरविशेषज्ञा इति समासः।

पुनश्चेति पूर्वं यद्यप्युक्ता तथापीत्यर्थः {८}। तत्र हि कामोपचाराभिप्रायेण प्रकृतित्रैविध्यं व्याख्यातम्। इह तु सर्वव्यवहारविषयमिति विशेषो दश्यते। (तत्र तु) विषयभेदादुत्तमादित्वं (सत्त्वसमुद्भवत्वात्) रस्याः स्निग्धा इत्यादय आहाराः सात्त्विकस्य प्रिया इत्युच्यन्ते। तत्र हि सत्त्वमाहारविषयमेव सहधूमाभ्यवहारादिति। कृतकटुकाहारव्रतो मुनिर्न सात्त्विक इति नापि चोरो(?) घतगुड(प)योन्नभोजी सात्त्विक इति। **वचने दक्षा सती गुरूणां** विषये **सलज्जा** {६}। **नात्युत्कृष्टै**रतिश्रेष्ठताहीनैः, अनिखिलैः असमग्रैः {११}। **सङ्कीर्ण** इति। कश्चिन्मिश्रप्रकृतिः कश्चिदधमप्रकृतिरेव। **प्रेष्याश्च संकीर्णा** इति स्वामिचित्तानुरोधात् {१३}। विटो प्येवं शकारो प्य(नुभूत) विभवत्वादुत्तममध्यम चेष्टितमाचरति सङ्कीर्णः। परमार्थस्तु प्रेष्यविटशकारा अधमा एव।

प्रकृतिभेदमभिधाय नायकभेदमाह **अत्र चत्वार** इति {१६}। सुरतविषये सन्धिं विग्रहेण विग्रहं वा सन्धिना दूषयतीति विदूषकः। विप्रलम्भं तु विनोददानेन दूषयन्ति विस्मारयन्तीति विदूषकाः।

यथाक्रममिति क्रमिकमौचित्यमत्र यथोचितं योजना, तद्यथा लिङ्गी ऋषिः देवानाम्, **द्विजो** वीरः सेनापतेः राजजीवी राज्ञः, शिष्यो ब्राह्मणस्य {२०}। तेषां व्यापारमाह विप्रलम्भसुहृद इति विदूषकः।

नन्वेकपुरुषसंभव इतिवत्ते को नायक इत्याह **व्यसनी**ति {२१}। प्राप्य दुःखं वेति। पूर्वमेव न व्यसनपतितो व्यसनी वा अयमपि तु सुखी भूत्वा दुःखं प्राप्तः)। नन्वेतल्लक्षणमा**त्रेति**वत्ते नेकस्यापि रामचरित इव सुग्रीवविभीषणयोरपीत्याह **यत्रानेकस्येति** {२२}। एवं नायकभेदं निरूप्य नायिकाभेदमाह **दिव्या** चेति {२३}। अथ परिवारभेदमाह **राजोपचार**मित्यादि {२६}। महादेवीप्रभत्यायुक्तिकान्तः सप्तदशकः स्त्रीगणः, नपुंसकादिवर्गो ष्टादश। अत एव वक्ष्यति एतदष्टादशविधं प्रोक्तमन्तःपुरमिति, तद्विषयः परिवार इत्यर्थः। **महादेवीत्येकत्वं** विवक्षितम् {३०}। महादेवीनां क्रमेण लक्षणान्याह **अत्र मूर्धाभिषिक्तेत्यादि** {३३}। **सर्वेषां मूर्धनि** प्रधानस्था**नेत्य**भिषिक्ता। वयसि मध्यमे तिष्ठतीति मध्यस्था। **(अन्तःपुरेति)** अन्तःपुरिके बाह्ये च वर्गे अन्तःपुराय हितं कौशल्यसंपादनम् {३५}। **देव्य** इति {३७}। महादेवी तु शङ्गारोचिता नातीव भवति साभिमुख्यमभिप्रयातीत्याशयेन **वासवदत्तादिषु** कवयो देवी वाचोयुक्त्या व्यवहरन्ति। (**स्वगुणै**रिति समानं) लम्भिता गुणैर्योजिता (कलाशीलव)योभिः {३६}। **कर्कशा** सौभाग्यगर्वेण {४०}।

अथेत्यपि चेत्यर्थः {५०}। **यामकिन्यः** प्रतिदहरं जाग्रति याः {५६}।

विशेषणमिति विशेषमन्याभ्यः, आयुक्तिकानां वक्ष्यामीत्यर्थः {६५}। **आकाम्य** इति परस्य कामयितुमनर्हा अशक्याश्च कामिता हि। सर्वे शंसन्ति **आयोजनेष्वि**ति।

अथ बाह्यपरिवारमाह **राजेति** {७४}। युवराजो त्र राजशब्देनोक्तः। (अमात्य इति) अमेति सहार्थे सहभवाः सहचारिणो मात्या इत्येको र्थः। **अनुरागवानि**ति प्रजासुः प्रजास्वयत्नानुरक्ताः {७६}, अनुरागेहि सार्वगुण्यमिति **कौटल्यः**, अव्यसनिभिः स्त्रीमद्यमगयाक्षादावसक्ताः। **(अर्थशास्त्रस्येति)** अर्थशास्त्रस्ययो र्थ एकवाक्यतात्पर्यादिना तज्जानाति {८३}। **परैरहार्या** इति अभेद्याः। **ज्ञानं** अर्थशास्त्रस्य, (तस्य) विधौ (ज्ञानं) विज्ञानं तदधिष्ठानकौशलं लक्ष्यलक्षणज्ञा इति यावत्। (**प्राड्विवाक** इति) पच्छति विवादपदे निर्णयमिति प्रायो विवदितारस्तेषां विवेक उच्यते यैस्तैः प्राड्विवाकः, पच्छेः क्विबचीति क्विपि दीर्घे प्राडिति रूपम् {८६}। विपूर्वस्य ब्रूतेर्घञि विवाक इति। नयो त्रार्थशास्त्रं नयहेतुत्वात्। एवं विनयो त्र धर्मशास्त्रम्। कुमाराणां राजपुत्राणां रक्षार्थमधिकृताः।

एतच्चैषां संक्षेपेण स्वरूपमुक्तं वितत्य तु तत्प्रधानेभ्य एव शास्त्रेभ्यो वधारयेदिति दर्शयति **बहस्पतिमता**दिति **बार्हस्पत्यादे**रभिलक्षयेदिति संबन्धः {८८}।

ननु कियन्तः प्राड्विवाका इत्याह **सभ्यानां** चेति। तन्मतादेव जानीयादित्यर्थः। प्रजानां मात्स्यन्यायाद्रक्षितुं राज्ञो धिकारः, मात्स्यो न्यायश्च विवादनिर्णयेन रक्ष्यते। तत्र च

प्राड्विवाका एव प्रधानम्। तथा च प्राड्विवाको राजस्थानीय इति लोके प्रसिद्धम्। प्रधाने च व्यपदेशं कुर्वन्नुपसंहरति **इत्येष वो मया प्रोक्तः प्राड्विवा विनिर्णय** इति {८६}। राजोपयोगीति बाह्याभ्यन्तरपरिवारनिर्णय इति यावत्।

अध्यायान्तरमासूत्रयति **अत ऊर्ध्व**मिति। पुनः पुनरयमभिप्रायो यद्यपि सामान्याभिनये चित्राभिनयो स्ति तथापि रसस्वभावविशेषो दर्शितः। शृङ्गारतद्व्यभिचार्यादीनां हि प्राधान्यं पूर्वमेव दर्शितम्। चित्राभिनये तु रसाद्युपयोगिबाह्यवस्तुविषयमेवाभिनयानां भावनारूपं मिश्रीकरणात्मकं समानीकरणमुच्यते। तेन चित्राभिनयः सामान्याभिनयविशेषभूत एवेति शिवम्।।

चतुर्विंशो ध्यायः किञ्चित्कृतविवेचनः।
मया**भिनवगुप्तेन** शिवदास्यैकशालिना।।

इति श्रीमहामाहेश्वराचार्याभिनवगुप्तविरचितायां नाट्यवेदवत्तावभिनवभारत्यां स्त्रीपुंसोपचारो ध्यायश्चतुर्विंशः।।

श्रीः

नाट्यशास्त्रम्

प चविंशो ध्यायः

(चित्राभिनयः)

वागङ्गसत्त्वचेष्टाचित्राभिनयप्रयोगरचनचणः।
संसारनाट्यनायकपुरुषाकारः शिवो जयति।।

सामान्याभिनयस्य **चित्राभिनयः** शेष इत्युक्तम्। केवलसामान्याध्याये रसात्मकप्रधानं पदार्थविशेषमभिनयानां समानीकरणम्। इह तु तदुपयोगी विभावादिविषम्। किं चैक एवाभिनयः पूर्वं यो निरूपितः स एव कार्यान्तरालाभे तद्विरुद्धमर्थमभिनयतीति चित्र **उच्यते**। तद्वैग्ध्यमध्याये निरूप्यत इति सङ्गतिः। तदेदाह **अङ्गाद्यभिनयस्यैवे**ति। अङ्गमिति करणाङ्गहारास्तेषामभिनयत्वं नोक्तम्। तर्हि वक्ष्यते–

शिखिसारसहंसाद्या स्थला ये च स्वभावतः।

रेचकैरङ्गहारैश्च तेषामभिनयो.....(भवेत्)।। (ना.शा. २५.६८,६९ इत्यादि)। **आदि**ग्रहणे विभावादि विभावो पि विभावस्याभिनय इति वक्ष्यतें अभिनीयते नेनेत्**यभिनयः**। तस्य च **विशेषः** उत्तमोत्तमेत्यादिना वक्ष्यते। अभिनीयत इति चाभिनयः। यो ह्यन्येनाभिनय उक्तः स इहाभिनयान्तरस्याप्यभिनयत्वेनोक्तो यथा ''अलपद्मकपीडाभिः सर्वार्थग्रहण'' (२५. १३ द्वितीयार्ध)मिति। अङ्गाभिनयस्येति समाहारे वत्तिस्तस्य विशेषो य उच्यत इति संबन्धः। **क्वचिदि**ति। न सर्वत्र {**१**}।

अत्राभेदतः अस्मात्क्वचिदनुक्तो सौ विशेषः क्वचित्तूक्त एव ''स्वस्तिकविच्युतिकरणा'(६–२२)दित्यादि। य एवासावधिको विशेषः तदेव चित्रमभिनयम्। यतः संपादयति तत उपचारात्। चित्राभिनयस्तत्र तत्र प्रभातादयः सर्वलोकसाधारणा इति तद्विषयस्याभिनयस्य सहकारियोगेन चित्रत्वं दर्शयितुमाह उत्तानौ तु करौ कृत्वेति। ''स्वस्तिकविच्युतिकरणाद्दिशो घनाः खं वनं समुद्राश्च ऋतवो महीतलोच्चं विस्तीर्ण चाभिनेयं स्या''(६.१३६)दित्युक्तम्। संयुक्तहस्ते स्वस्तिके। अत्रोत्तानत्वं पार्श्वस्थता शिरसो उद्वाहनं दष्टेरूर्ध्वता इत्यादिर्विशेष उच्यते। एवमुत्तरत्र योज्यम्। **नानादष्टी**ति {**४**}। कदाचिद्विस्मिता क्वचिच्च विहीनेत्यादिक्रमेण ऊर्ध्वं स्वविरुद्धमधस्स्थं त्वित्थमभिनेयमित्याह **अधोनिरीक्षणेने**ति {**५**}। स्वस्थमित्युक्तं गगने च मगाङ्कादयः पदार्थास्ते कथमभिनेया इत्याह **स्पर्शस्य ग्रहणेनैवे**ति {**६**}।

''किंचिदाकुंचिते नेत्रे कृत्वा भ्रूक्षेपमेव च।
तथांसगण्डयोः स्पर्शादिति।।'' (२२–८३) उलूकवदंसना यस्योर्ध्वं विधूननम्। **रज** इति धूलिः {**७**}**।** **उदयसस्त**मयोः पूर्वमश्चिमयोः पर्वतयोः गतं सूर्यं स्मयो भिनयो र्थो भिनयत्वेन प्रयोजनं येषामिति विस्मयाभिनयैर्निदर्शयेदिति यावत् {**८**}। सर्वग्राहकं लक्षणमाह **यानि सौम्यार्थयुक्तानी**ति {**९**}। सौम्यं येषां प्रयोजनं एतदेव स्फुटयति सुखप्रधानस्य भावस्य कृतं संपत्तिर्येभ्यः सुखप्रधानो भावः सोम इव सौम्यसुखायेत्वाद्यः। **विकुण्ठनैः** सङ्कोचनैः {**१०**}**।** **गम्भीरोदात्तसंयुक्तानि**ति भावप्रधानो निर्देशः {**११**}। तेन यद्विषयं गाम्भीर्यमुदायुक्तत्वं च। आदावत्र शाखाविस्तरः गन्धर्व इत्यात्मनिर्देशादिगम्भीरोदात्तप्रसंगाद्राजोचितहारा–भिनय.....**पवीतदेशस्थलमरालमिति** {**१२**}। आद्या धनुर्नताकुंचितो ङ्गुष्ठकः शेषभिन्नोर्ध्वंवलिता ह्यन्तराले भारो देहस्य भूषणमपहारो वक्षसः पुनरपि तमेव गत्या सर्वग्रहणं तथैव लोकस्येति कर्मोक्तं सूचीमुखस्य तादशः परितो भ्रमणेन गमनविशेषमाह। **भ्रमणेन प्रदेशिन्याः दष्टेः सर्वार्थे** भिनये भिनयान्तरमप्याह **अलपद्मकपीडादि**रिति {**१३**}। **अलपद्मक**शब्देन तदङ्गुल्यः पीडा करतलेन तासां संयोगः, तत्र च बहुत्वं विवक्षितं तेनायमर्थः ''आवर्तिन्यः करतल'' (६–६१) इति यः अलपल्लव उक्तस्तस्य क्रमेण कनीयः स्यादिति काङ्गुलीति हस्ततलेन संयोजयेदिति। सर्वार्थाभिनयः। एतच्च रूपमलपद्यस्य प्राङ्नोक्तम्। अथ यदा कात्स्न्र्येन सर्वशब्दः प्रवर्तते। तद्यथा सर्वः शब्द इत्यादौ तदा विशेषसहकारिणमाह '**श्रव्यं**

श्रवणयोगेन' (**२५.१४**) इति ''कृत्वा साचीकृत्वा तां दष्टिं शिरःपार्श्वानत (२२.८२)''मित्याश्रवणयोगः तत्सहितशब्दविषयः सर्वाभिनयः विद्युदादिविषये ये भिनया उक्ताः। तद्यथा ''सूची विरलाङ्गुली विद्युति चक्रं च तटिल्लता'' (६.६६?) इत्युक्तत्वात्। तेषां विशेषमाह **त्रस्तेति** {**१५**}। वस्तुत्रासाभिनयो ङ्गानामक्ष्णोश्च निमेषः संकोच इति। विद्युदादिव्यङ्ग्यमप्यभिनयमाह **उद्वेष्टितपरावत्ताविति**। **परावत्तौ समन्तादुद्वेष्टितौ** क्रमात् मुक्तकनीयस्याङ्गुलिगुणावित्येवं प्राग्भावे मुष्टिः पश्चाद्भागे तु पराङ्मुखो रालोभ इति। तत्रासादितुः स्थितमेवात्र **जिह्यदष्टेनेति** {**१६**}। जिह्यया दष्ट्या ''लाम्बिता कुंचितपुटा शनैस्तिर्यङ्निरीक्षणैः निगूढा गूढतरा च जिह्मा दष्टि'' (८–७३)रिति ''सिंहव्याघ्रेष्वभिनय'' (६–१२१) इत्यूर्णनाभस्य कर्मोक्तम्। तत्र विशेषमाह कृत्वा **स्वस्तिकसंस्थानाविति। पद्मकोशावि**त्यत्रोत्तराभावे चोक्ते एतत्प्रकृतत्वात् ''पद्मकोशस्य हस्ताङ्गुल्यः कुंचिता'' इत्यूर्णनाभः {**१०**}**।** अन्ये पद्मकोशस्यैव तमनुक्तं कर्मेत्याहुः। त्रिपताकस्यानुक्तं कर्म दर्शयति– **स्वस्तिकौ त्रिपताकौ च गुरूणां पादवन्दन** इति। खटकामुखस्य कर्मोक्तं– ''मन्थानशरापकर्षणपुष्पाचयप्रतोदकार्याणीति'' (तुलना ६–६३)। तत्र प्रतोदकृत्ये विशेषमाह **खटकस्वस्तिकौ चापि प्रतोदग्रहण** इति {**१६**}।।

अथ सर्वव्यवहारोपयोगिसंख्याभिनयं प्रदर्शयन्नुक्तपूर्वाणामेव हस्तानामनुक्तं कर्म दर्शयति। एतदुक्तं भवति ''सूचीमुखप्रदेशिन्या त्रिपताकाङ्गुलिकागुलाङ्गुलिविधौ ऊर्ध्वलताष्टकाङ्गुलिचतुष्केण मुकुलहस्तविकासतया चैकादितया प चता संख्या, षडादिका तु द्वाभ्यां यथा मुकुले सूच्यास्येन षट् यावन्मुकुले यौ दशपर्यन्ता गणना यावतीति दशपर्यन्ता गणना यावत् ततः परन्तु बहुत्वाभ्झिनय एवेत्याह दशा'' इत्यादि। दशभिराख्या येषां ते त्र विंशत्यादयः विंशेति हि विंशति तस्मादत्र पताकाभ्यामभिनय इत्याह **दशाख्ये**ति। आख्याशब्दो वधिवाचं आख्यति प्रतते भावा यावतीति। दशपर्यन्ता गणना यावतीति दशपर्यन्ता गणना यावर्ततः परा सा संक्षेपेणाभिनेया बहुत्वमात्रेण **वाक्यार्थ**शब्दो त्र संक्षिप्तमुपलक्षयति। पदार्था हि तत्र संक्षिप्यन्ते। एतच्च **परोक्षाभिनये** {**२०-२२**}। प्रत्यक्षे त्वेकैकस्य निर्देशेनैव गणनेति यावत्। आयतदण्डग्रहणमिति (६–६२)। खटकामुखस्य सामान्येन कर्मोक्तम्। तद्विशेष्यं दर्शयितुमाह **छत्रध्वजस्पताकाश**चेति। दण्डधारणे एव तत्प्रकारमन्तर्भूतमित्यर्थः। **च**कारेणाभिनयान्तरमप्यत्र सूचयति। **अथ**शब्दे च {**२३**}। तद्यथा शिरस उपर्यधोमुखः पताकछत्रे प चाङ्गुळयूर्ध्वध्वजे सूचीमख्याङ्गुलिपताकायां मुष्टिशिखरकपित्थमगशीर्षकाद्या यथायोगं प्रहरणेषु योगध्याने स्तोक इति (६–११४) क्वचिद्विस्मिता अपूर्वशालिसंपद्दर्शनात् क्वचित् ''ग्लानाभीष्टादर्शना''दित्यादि दष्टिभेदादि चाद्यो व्यसनसंभवस्तस्मिन्निमित्ता यावस्थान्तरप्राप्तिः ततो हेतोरिति संबन्धः। **रूक्षस्येति** {**३२**}। उद्वेजनस्य प्रावड्वर्षारात्रस्य यथा प्रथमे भागे वर्षितुं प्रावड्मेघा यत्रेति। निर्घातः आकाशस्फोटः शब्दो गर्जितादन्य एव चिह्नमिति पुष्पपुष्पादिशेषषड्विशेष इति। तत्कालोचितो वस्त्वाभरणप्रसाधानादिः

यस्मिन्निति वक्तव्ये संबन्धमात्रापेक्षया षष्टी कर्मेति क्वचिद्रूपानुसरणमित्यादिरूपं यथा क्वचिदातपः क्वचिच्चन्द्रोद्योतः। भावानां विभावैरभिनयो यथा क्रोधस्य परस्थस्य सूचीमुखाङ्गुल्यादिपरः सन्निर्दिश्यते तद्द्वारेण क्रोधः। अनेन च सहाध्याये यदुक्तं तत्राभिप्रायविशेषो दर्शितः। तत्र ह्युक्तं ''रिपुर्देशे तथैव क्रोध'' (अध्या.२२) इति। एवं स्नेहाख्यपद्यरूपकेण हंसपक्षेणानुभावानां भावसिद्ध्या प्रवर्तितमभिनयं कुर्यादिति संबन्धः। ....णो भिनयः शोकोचितेन मुखविकूणनादिना। ननु विभावः कथमभिनय इत्याशङ्क्याह **विभावेनाहृतं कार्य**मिति {४१}। विभावः करणत्वाद्गमक इति यावत्। विभावेन हि कार्यमाहृतम्। सामग्री हि कार्यं व्यभिचरन्ती गमयत्येव।

ननु भावः कथमनुभावस्य गमक इत्याह **अनुभावेने**ति। अनुभावानन्तरे साहचर्यानुभवात् गमकमित्येतदमुत्र तत्त्वम्। यदुक्तं भावसिद्धिप्रवर्तितमनुभावानामभिनयं कुर्यादिति। अथ विस्मरणशीलान् प्रति श्रङ्गग्राहिकया भावविभावानुभावस्वरूपं दर्शयति आत्मानुभवनं भाव इत्यादि। आत्मविश्रान्तं यदनुभवनं तत्रार्थः आत्मानुभाव्यते येन न च तादगर्थस्तदस्तीति प्रकर्षो गम्यते। तेन यल्लब्धसत्तार्थकं चेत् तदवश्यमनुभूयते सुखादिरूपम्। तदेव भाव इत्युक्तं भवति।

यत्तु व्यतिरिक्तवस्तुज्ञानं तत्सर्वं सुखादिजनकत्वाद्विभावः। तदाह **विभावः परदर्शन**मिति {४१}। तदुदाहरति गुरुर्मित्रमित्यादि। गुरुदर्शने सति विनयग्रहणे आदावुत्साह एव मित्रादेर्यथोचितं हर्षादनुभावत्वं योज्यम्। मित्रं कार्यवशात् समानख्यातियोगत्वात् सखा सहपांसुक्रीडनापरिचितः **आवेद्यत** इत्यनेन दर्शनविषयस्यैव भावतेति दर्शयति {४२}। प्राप्त इत्यनेन चित्तवत्तिजन्मनि गुर्वादेरन्वयव्यतिरेकौ सूचयन् कारणमाह। **यत्त्वस्ये**ति गुर्वादेः संभ्रमेण यदुत्थानं प्रत्युद्गमनं बहुवचनाद्यततं(?) सूचकौ यथोचितं भावे संग्रहालिङ्गनादिवचनेनेत्यर्थः {४३}। उदाहरणमात्रमेतदिति दर्शयति **एवमन्येष्वपीति** {४४}। रसेषु श्रङ्गारादिष्विति भावः एकेन वा ग्रहेणानुभावः सूचितः। द्वितीयो विकल्पार्थः अपिशब्देन स्थायिव्यभिचारिरूपतां समुच्चिनोति। अर्थवशादिति प्रयोजनवशात्।

ननु नियमेनायमस्याश्चित्तवत्तौ विभाव इति शक्यं वक्तुम्। प्रयोजनान्तरयोगे तस्यैवान्यत्र विभावत्वदर्शनात्। न केवलं प्रत्यक्षेण दश्य एवानुभवश्चित्तवत्तिं गमयति। यावत्प्रमाणान्तरेण शब्दादिनाप्यविदित इति दर्शयितुमाह यस्त्वपि प्रतिसन्देश इति। एतच्चानुमानस्याप्युप लक्षणम्। सन्तमसे हि गद्गदगुरुसज्जनवचनानुमेयात्। बाष्पादपि हि भवति शोकावगमः। एतदुपसंहरति एवमित्यादि। पुरुषैः प्रमदाभिर्वेत्युक्तं तत्रानावेश्यादेषां(?) स्थानमावेदयति। गतिं च दर्शयति स्वभावाभिनय इत्यादिना। शेषाणीति। स्थानान्तराण्यपीति यावत्। यदुक्तम्–

धैर्यलीलाङ्गसंपन्नं कृत्वा पुरुषचेष्टितम्।
प्रयोक्तभिः प्रयोक्तव्यं स्त्रीणां चेष्टितमन्यथा (२५.४६)।।

मार्दवलीलाप्रधानैरङ्गविक्षेपैरिति तत्र तथा सिद्धत्वं हेतुमाह करपादाङ्गस चार इति। तुर्हेतौ। **आलिङ्गनेन गात्राणामिति** {५२}। स्वात्मीयानामेवान्योन्यमासे.....णेत्यर्थः। क्रोधस्त्वभिनयेदिति व्यभिचरितः प्राप्तिमिति मन्तव्यम्। रसेषु हि सामान्याभिनयःश्रङ्गारद्वारेण दर्शितः। अत्र तु व्यभिचारिषु दर्श्यते। दुःखमिति शोकः भूम्यां हस्ताभ्यां च ये घाता हस्तताधाडनानि तथाभूतैर्हस्ताभ्यां घातास्तैराकाशस्येति शून्यो प्यवलम्बन(?) प्रवत्तेत्यर्थः। विलग्नं कलासंकथितानि चलिताभ्यामिति मन्थरं चरं चरन्तीत्यारेचितकैरङ्गहारैरिति तुर्याध्यायनिरूपितैर्गतिप्रचारैरिति तदुचितैरेव शिरोग्रीवादिकर्मभिः भयाद्वेगौ स्त्रीनीचानां राक्षसादिदर्शने विस्मयस्तूत्तमानाम्। अत्र च भावादिगता अनुभावाः.....दिशब्दैरुक्ता भावैः.....यथा गदतो रुद्रस्य रौद्राभिनयस्य चेष्टितानि यथा रुद्रस्य संचिह्नानि यथास्य त्रिशूलं परिमण्डलत्वेन सम्यग् ज्ञातं यस्येति प्रकरणादत्र पताक एव विशेषो मन्तव्यः। **अङ्गाद्यै**रिति। **आदि**ग्रहणाददष्टिसात्त्विकपरिग्रहः। **सदशै**रिति डोलाहस्तादिरूपैः। **विलोलनै**रिति च चलैरितिभावः {८३}। अथ वाचिकप्रसङ्गाचित्राभिनयं वक्तुं प्रतिजानीते **आकाशवचनानी**त्यादि {८५}। दूरस्थेन रङ्गमप्रविष्टेनैव पात्रेण सहाभाषणमत एवाह अशरीरं यन्नि**वेदनमि**ति {८६}। परोक्तेन प्रविष्टपात्रसंबन्धिन्यान्तर्हितं व्यवहितम्। नन्वप्रविष्टस्य संबन्धिवचनं केनोदीर्यत इत्याशङ्क्याह **तत्रोत्तरकृतै**रिति उत्तरत्वेन यानि कृतानि वाक्यानि ''मैवं ब्रवीषि'' इति तैः **प्रयोजये**दिति प्राक् प्रविष्टस्यैव पात्रस्य कर्तत्वं परोक्तवचनमनुभाषणच्छायाप्रविष्ट एवं ब्रूयादिति तात्पर्यम् {८७}।

निगूढभावो निगूढनं सर्वेषां यन्निगूह्यते एक एव श्रणुयादिति तदपवारितं जनान्तिकं एकान्तिकत्वं चैकस्यैव निगूह्यत इति विशेषः {८६}।

अन्ये त्वाहुः। उभयमित्ये**तज्जनान्तिक**मेव {६१}। यावतो हि जनस्य तद्वक्तव्यं तावतो न्तिके सामीप्ये तदुच्यते। अवतारितकं तु तदुच्यते यत्र तूहात्परमुद्दिश्य(?) नोच्यते। अथ च परः श्रणोत्वित्ययमेवाशयो वचने तदपवारितकं तेन निगूढेन भावेनाशयेन संयुक्तमव्यभिचारेणेत्युक्तपूर्वं कालादिसर्वमत्रानुसरेदिति यावत्। न खल्विति। न तत्र हस्ताभिनय इत्यर्थः। **सुप्ताभिहितैरि**त्युक्तं तानि लक्षणतः कथयति **मन्दस्वरसंचारैरि**त्यादि {६५-६६}। पूर्वानुस्मरणेन कृतं प्रयुक्तं प्रशिथिलानि स्वस्थानतो भ्रंशमानानि गुरूणि स्वकर्माण्यचतुराणि यानि जिह्वाग्रोपाग्रमध्यमूलानि तेषां संबन्धीनि यान्यक्षराणि तथा ते चलद्घण्टावदनुकरणं प्रधानं यद्वाक्यं तत्र यो गद्गदस्वरभेदः ततो ये जातास्तारमन्द्रादयः उदात्तानुदात्तादयश्च तैरुपलक्षितां मरणकाले काकुं कुर्यादिति संबन्धः। **कलस्वन**मिति मधुरस्वरम् {६६}।

एवमाकाशभाषितमात्मगतमपवारितं जनान्तिकं कर्णोक्तं स्वप्नायितोक्तमरणमूर्च्छामदभाषितं वद्धबालोक्तमिति वचनगतं चित्राभिनयमुक्त्वारणप्रसङ्गेन तद्गतमपि कथयितुमाह **नानाभावोपगत**मिति {१००}। विषं पीतमनेनेति **विषपीतः** {१०२}।

तत्रैतस्य दष्टकस्याप्युपलक्षणम्। विषस्य वेगाक्रमणेन धातुषु रसादिष्वोजः पर्यन्तेषु स चरणं **प्रथमे वेगे** यत्कृशत्वमत्राभिनयः कार्य इति संबन्धः {**१०३**}**। चलति कामिला** छर्दिः प्रारम्भ इवान्तरो दाहं(?) वायुद्रेकः(?) अंसयोः कपोलाभ्यां स्पर्शसंबन्धादित्यर्थः। **शिरसो** भङ्गो ग्रीवासन्धिविच्युतिस्ततः {**१०६**}। पुनरुक्तं न तेष्विति दोषायेति शेषः। तदुदाहरति **साध्वहो** इत्यादि {**११२**}। तत्र शब्दपुनरुक्तं साधुसाध्वित्यादि। अर्थपुनरुक्तमहो साधु भद्रं चेत्यादि। **प्रत्यङ्गहीन**मित्यादि {**११३**}। प्रहसनप्रधानतया यथा प्रत्यङ्गेन केनचित्संस्कारांशेनाहीनं कार्यम्। अत एव विकृतत्वाद्धासप्रधानं तत्राप्यभिनयो प्यलाक्षणिको हासायैव यथातथापि।

अथ सर्वानुग्राहकं सामान्यलक्षणमाह भावो य **उत्तमानामि**त्यादि {**११४**}**। रागं गच्छतीति** {**११५**}। सर्वस्य र जकं भवतीति यावत्। सामान्याभिनयशेषत्वं तदुक्तार्थात्तन्मुखेनोपसंहारदिशा चित्राभिनयस्य दर्शयति **एते भिनयविशेषा** इति। **सत्त्वभावसंयुक्ता** इत्यनेन सत्त्वातिरिक्तो भिनय इत्यादि स्मरति {**११६**}**। नानाविधै**रित्यभिनयानां समानीकरणं चित्रत्वं च दर्शितम् {**११७**}। क्रमात्क्रमं श्रमवशादुपचितत्वपरित्यागः प्रयत्नेन परिरक्ष्य इत्येतत्तात्पर्येण श्लोकं पठति **या यस्य लीला नियता गति** (**२५.११८**)**श्चेति। विमुक्तसत्त्वो** त्यक्तावष्टम्भं **प्रतिनिर्वत** इति निर्वत्या निर्वत्तिर्वक्ष्यते इति। वत्तो विषयाज्जनादेर्निवर्तते। तेन रङ्गाद्यावन्निर्वतो निष्क्रान्तः स्यादित्यर्थः। किमेतावानभिनयप्रकारः नेत्याह **अन्ये तु लौकिका** इति {**११६**}। ननु किमत्र लोकः प्रमाणमित्याशंङ्क्याह **लोको वेदस्थाध्यात्म**मिति {**१२०**}। लोकसिद्धानि प्रत्यक्षानुमानागमप्रमाणानि लोकशद्वेनोच्यन्ते। **वेद** इति तु यथास्वं नियतरूपो लोकप्रसिद्धो प्यागमो यथा न्यायेषु धनुर्वेदः स्वरतालादौ गान्धर्ववेद इत्यादि। **अध्यात्मं** स्वसंवेदवेदाध्यात्माभ्यां प्रमिता ये पदार्थाः तेषु **नाट्यं** प्रतीतमित्यत्र हेतुमाह **वेदाध्यात्मोपपन्नं त्वि**ति। **तु**र्हेतों **समन्वित**मिति भावे। एतदुक्तं शब्दसमन्वयो व्याकरणाभिधानेनागमेन सिद्धः। छन्दस्समन्यस्तु स्वसंवेदनेन। श्रव्यता हि तद्विदा स्वसंवित्सिद्धावत्तेषु प्रगीतानामिव रागभाषादीन् नीयते। एतच्चागमस्य वेदनयोः प्रमोपलक्षणमात्रम्। अथ लोकं प्रमाणयितुमाह **यल्लोकसिद्ध**मिति। यल्लोके सिद्धं तत्सिद्धं न तत्कस्यचिदसिद्धमिति यावत्। न हि लोकप्रसिद्धमपह्नोति कश्चित्समर्थः। सुविप्रतिपन्नस्यापि तदपह्नवे काष्ठपाषाणतापत्तिप्रसङ्गात्। **तथे**ति। तत एव प्रकाराद्धेर्तो**र्लोकात्मकं** लोकानुकीर्तनरूपं नाट्यमित्युक्तम् {**१२१**}।

ननु लोकेन च यत्प्रत्ययं तदागमेनैव प्रमितम्। तत्किं पुनर्लोकेनोक्तेनेत्याशङ्क्याह **न (च) शक्यं लोकस्य (श्लो.१२२)** इति। शीलः स्वभावः। प्रकृतमुपसंहरति **तस्माल्लोकप्रमाणं हि विज्ञेय**मिति {**१२३**}**। एतान् विधानी**ति {**१२४**}। सामान्याभिनयात् प्रभत्येतदध्यायपर्यन्त ये कर्तव्यतारूपाभिनयानां विधय उक्ताः तान् सम्यग् विज्ञायेति वदन्

कोहलादिशास्त्रलक्ष्याप्रवासिद्धमपि चित्राभिनयं सूचयति। ततश्चोदाहरणार्थान् दर्शयामो माभूत्सम्प्रदायप्रवाहविच्छेद इति।

मुख्याभ्याशे हंसपक्षात्स्कन्दो वा शक्तिदर्शनात्।
संमुखौ खटकौ पार्श्वद्वये शाङ्र्गनिरूपणम्।।
लीलालोकितसंदंशयुग्मेन कुसुमायुधम्।
रुद्रवद्रूपयेद्दुर्गां चतुरेण सरस्वतीम्।।
.....खटकेन तथा श्रियम्।
गौरीं च दंष्ट्रया देवीं वाराहीमिति मातरः।।
प्रदर्शयेत्तत्तदुचितब्राह्म्यादिगतलक्षणैः।
सूचीहस्ताङ्गुलिकाद्रिनन्दिनीस्यान्नयोन्नता।।
तत्प्रोत्तानाधोमुखेन त्रिपताकामुखेन तु।
गङ्गा तथैव चतुरेणान्या सर्पशिरोद्वयम्।।
उपर्युपरि डोलं स–ले तिर्यग्विलोलितः।
अरालत्रिपताकौ च पताकद्वयकम्पनम्।।
अब्धि.....पुष्पपुटास्त्रिपताकौ तपस्विनाम्।
प्रसतोर्ध्वपराचीनौ शिखरौ बाह्यदन्तरे।।
कूर्परोर्ध्वस्थितेनापि त्रिपताकेन योषितः।
पार्श्वे र्धकटकेन स्याल्लोकपालास्सलक्ष्मभिः।।
स्तब्धकायौ मुक्तहस्तौ जिनं विद्याधरान् प्रजाः।
अग्निना वाथ रक्षांसि नष्टं या सूचिकामुखात्।।
विद्यात्तु त्रिपताकाभ्याम्मूर्ध्निराजप्लवङ्गमान्।
पताकाभ्यामथो सर्पशिरोभ्यां स्वस्तिकस्थितेः।।
धर्मं सितादिभिश्चाहीनतवो मणयः पुनः।
....काङ्गुलेन रिपुर्न्नाथ ग्रन्थतर्जनिके ङ्गना।।
कूर्पराकुचितां कम्प्रपताकाभ्यां च सारसः।
प्रसारितं च बाहुभ्यां वश्चिकस्थलपक्षिषु।।
श्रङ्ग्यां च मध्यमाङ्गुष्ठपताकामस्तकोपरि।
उत्क्षेपादचितस्यांघ्रिं नतोन्नतकरद्वयात्।।
गरुडं चतुराभ्यां तु कण्डमूलोभयादधः।
पताककूर्परे कु च्य चालीढो क्रोधरूपणे।।
मुखान्तिके तर्जनीं तु विश्लिष्टां वाक्यरूपणे।
चूडायां मूर्ध्न्युपाङ्गेषु स्त्रीविषादे तथोद्वहम्।।
वक्षः पार्श्वान्नूर्ध्वतः खं पताकस्वस्तिकेन तु।

तथा प्रभातहस्ताभ्यामावेगोद्वर्तिताङ्गुलिः।।
पराङ्मुखाभ्यां रात्रिर्वा पताकस्वस्तिकादिभिः।
मुखाच्छादात्खलत्यादौ शलभाधूलिधूम्रकः।।
पताकेनोरसि सुहृदरालेन सुतादयः।
अभिमूर्ध्नाथ तद्युग्मं कुब्जवामनबालकाः।।
पताका मूर्ध्नि खण्डः स्यादथ स्वस्तिकविच्युते।
निधिमाकुंचिते वामकूर्परे भूधरादिषु।।
उत्तानं च शिरस्तेषां भेदास्तु न निरीक्षणात्।
वामकस्त्रिपताकः स्यात् कण्ठमूलो परो परः।।
करिणीं गण्डविचलच्चतुराभ्यां मदश्रिताम्।
पद्मोर्णनाभमुकुलैः स्वस्तिकैर्वश्चिकेन तु।।
सिंहगोमायुशरभा यथास्वं दष्टिभेदतः।
ललाटे सर्पशिरसा खड्गिं श्रवणमूलतः।।
खड्गिकास्त्री तथान्यच्च शिखरं स्यात्प्रसारितम्।
मुष्टिमल्लस्य शल्यश्च खटकेन हृदन्तरे।।
संदंशेन मतिर्नाभेरुद्यता वक्षसि स्थितिः।
पल्लवेन स्वमूर्धानं स्पशता खेचरानतिः।।
पराङ्मुखपताकाभ्यां मुखे स्वस्तिकविच्युते।
कवाटाभ्यां करिघटान्मीक्षं(?) च करयुग्मतः।।
मगशीर्षे कनिष्ठायां निर्देशश्चतुरेण वा।
चलः सूच्या स्वयुगलं हयसैन्ये दशान्वितम्।।
शूलपाण्यादिशब्देषु केचिद्वर्तिपदाश्रितम्।
कुब्जन्त्वभिनयन्त्यन्ये विशेष्ये न्यद्वयाश्रितम्।।
अव्याहतायां वाक्यार्थप्रतीतौ स्यात्पदेष्वथ।
स्नानं मूर्ध्नि पताकाभ्यां शकटे न्योन्यसंमुखौ।।
कूर्पराकुंचितौ कार्यौ त्रिपताककरेण तु।
अयस्कारादिनिर्देशे खटकः करिविद्रवे।।
गणेशे मुकुलास्यो थ विक्षेपात्स्युर्मरीचयः।
शिरसः पाश्वयोः———त्रिपताकद्वये जटा।।
उपर्युपरि युक्ताभ्यां शिखराभ्यां महेश्वरी।
ब्रीह्मादिचतुरेण स्यान्मुष्टिना वाथलेखकाः।।
खटकेन तथामूकाश्शून्योत्तानोपनो(?) क्रमात्।
अधस्खलितयोगेन चतुरेणापमीलनात्।।

शिखरे वामके धस्तः पताकस्थेन दक्षिणे।
सङ्गतौ खटकौ सूर्ये सारथौ पष्टपूर्वगौ।।
प्रमाणौ मानपरिमाः सूची संदष्ट्यरालकैः।
एलाक्रीडा धनुर्योगात् पुलिन्दाभिनयो मतः।।
यामाद्यौ खटकारालौ समपादः कपीलिनि।
स्वबाहूर्ध्वे तु खटकौ पार्श्वक्षेपश्च पादगः।।
महाभैरवनाथस्य खटकावंसजानुगौ।
अनूर्ध्वकर्मणः पादः कर्मान्तं यदुदीरितम्।।
तस्य स्वबुद्धया घटनं चित्राभिनयनं विदुः।
तस्योदाहरणं किंचिदिदमूहाविवद्धये।।
मयाभिनवगुप्तेन दर्शितं धीमतः प्रति।
यथालिखितवस्तूनां प्रतिपत्संस्थितान् प्रति।
अपि वाचस्पतेर्वाणी कुण्ठा किमुत मादशाम्।।

एवं प्रमाणत्रयेणाभिनयात् विज्ञाय यो रङ्गे सभायां प्रयुङ्क्ते स नाट्ये तत्त्वतो भिनयान् प्रयुङ्क्ते च समान लभत इति योज्यम्। अभिनयशेषभूतो यमितिकर्तव्यतारूपः परस्परसंमीलनात्मा प्रयोगस्तेन च विना न काचित् सिद्धिरित्युपसंहारव्याजेनैवमिति श्लोकेनांगीशब्दस्वीकृतसात्त्विकेन दर्शयन् सामान्याभिनयनायकान् सर्वान् दर्शयति सिद्धमिति शिवम्।।

विचित्राभिनयाध्यायः सो यं व्याकृतसारकः।
कृतो भिनवगुप्तेन शिवानुग्रहशालिना।।

इति श्रीमहामाहेश्वराचार्याभिनवगुप्तविरचितायां नाट्यवेदवत्तावभिनवभारत्यां चित्राभिनयः
प चविंशो ध्यायः समाप्तः

श्रीः

नाट्यशास्त्रम्

षड्विंशो ध्यायः

(प्रकृतिविकल्पः)

यस्मिन् सति प्रकृतिभूमिविकल्प एष
स्त्रेधास्य याति हृदयादरणीयभावः।
रागः स यस्य महिमा महनीयधाम्नि
भूयात्स नित्यमपि तत्र च रागवन्तः।।

समानीकरणलक्षणः सामान्ये भिनयः प्रस्तुतः। तत्र यथाभिधेयानामन्योन्यं समानीकरणमुपदेश्य तथाभिनेतुरभिनेयस्य च। एवं सो भिनेयद्वारेणाभिनयो भिनेत्रा समानीकृतो भवति। तदेतदिति। अभिनेत्रभिनेययोः समानीकरणं सामान्याभिनयरूपमनेन प्रकृत्यध्यायो भिधीयते। तदर्थसूचनायैव सङ्गतिप्रदर्शनाभिप्रायो वत्ताध्यायपरिसमाप्तौ यः प्रयुङ्क्तः इति प्रयोक्तेति प्रयोगज्ञेति च निरूपितम्। स एव हि प्रयोगं जानाति यः प्रयोज्यप्रयोजकस्वरूपवित्। तत्र कृतिः प्रयोज्यानुकरणीयो अनुकीर्तनीय इति पर्यायाः। तत्र प्रयोक्ता प्रयोज्यसदशो वा भवति विसदशो वा उभयात्मको वा। तत्र सदशो नुरूपः उभयात्मरूपानुरूपः स्वलक्षणं तेना तदेतौ तवैव(?) सादश्यं लक्षितम्। आनुरूप्यं सादश्यात्। तदुभययोगाद्रूपानुरूपा यद्यपि कथंचित् सर्वत्रैव त्रैविध्यं संभवति। तथाप्युद्रिक्ता सकललोकसंवादिनी अस्मादशबुद्धिर्यथा पुरुषस्य प्रयोक्तुः पुरुषेण प्रयोज्येन योषितो योषिता तत्र सदशव्यवहारः। स्त्रिया पुरुषस्य तु वै सादश्यम्। सा सिंहवदनदशवदनादिर्यस्तु प्रयोज्यैरन्यसादश्यमेव। तदपि प्रकृतित्रैविध्यं दर्शयितुमाह **अनुरूपे**त्यादि। **पात्राणा**मिति। धीयते रसो यत इत्यनेन नटबुद्धितिरोधानं सूचयन्नटबुद्धेरप्यपायतामाह। प्रकर्षेण क्रियते साक्षात्कारकल्पनानुव्यवसायगोचरत्वमीयत इति **प्रकृतिः**। सेयं त्रिप्रकारप्रकृतिप्रविभागेन भाविना सती नाट्यं भशं द्योतयेदिति ज्ञानस्य प्रयोजनमुक्तम्। कुतः सामान्यं द्योतयेदिति विशेषणद्वारेण हेतुमाह स्वभावेति। प्रयोज्यस्वभावो हि नाट्यकर्तव्याः। तत्र सुकुमारस्वभावे पुंसि प्रयोज्ये लालित्यसौकुमार्ये स्त्रीजनस्यायत्नसिद्धे इति स एव तत्र योक्तः युक्तो रूपानुरूपाणि वा सा तस्य प्रकृतिः, उद्धते तु प्रयोज्ये पुमानेव प्रयोक्ता युक्तः सानुरूपा प्रकृतिरूपायां तु प्रकृतौ कथंचित् यत्नेन संपाद्यमनुकीर्तनमिति तत्र सावधानेन प्रतियोक्त्रा भाव्यम् {१}

नन्वनुरूपैव प्रकृतिर्युक्तेत्याशङ्क्याह **नाने**ति {२}। नानाप्रकाराभिरवस्थाभिः विलासलालित्यौद्धत्यादिभिर्धर्म्यैः क्रियाभिश्च सुकुमारोद्धतात्मिकाभिरुद्यानगमन—
—युद्धसन्नाहनादिभिरुपेता तस्मान्नानारूपैव प्रकृतिर्युक्ता। तस्याः प्रकृतेः पर्यायेण स्वरूपं स्पष्टयति **भूमिके**ति। भूमिखष्टम्भस्थानं। यथा च ध्यानपटगते दशभुजप चवक्त्रादिरूप एव भगवति सदाशिवे धिषणानिवेशः क्रियते न तु तत्र तद्देशत्वतत्कालत्वे आदर्तव्यम्। नापि तत्सिन्दूरहरितालादिकृतं तद्द्रव्यं केवलमवष्टम्भस्थानम्। तदेवं

रामादयो वष्टंभस्थानमात्रम्। एतच्च रसाध्यायादौ वितत्य निरूपितम्। तेन भूमिरिव **भूमिका** {२}। इवार्थे अण्। अरूपायाः प्रकृतेरसंभाव्यत्वात्। तत्संपाद्यत्वाच्च पूर्वं स्वरूपमाह **बहुबाहु** इत्यादि। **विकृताननाः** तेष्वप्रावरणादयः पशुवक्त्रा यथा गोमुखाः अश्वमुखाः सिंहवक्त्राः श्वापदवक्त्राः यथा सिंहवक्राः खराष्ट्रेत्यादिना सर्ववपुषा तत्तद्रूपान् कार्या इति {३}। आवश्यकेनेति शेषः। अत्र हेतुमाह स्वाभाविकेनेति। अनुकीर्तनीयस्य यः स्वभावः तदुचितेन रूपेणेति यावत्। **आत्मरूप**मिति {५}। नटरूपमपिशब्दात्। मत्काष्टादिनिर्मितबाहुवक्त्रादिरपि। अवष्टम्भयोगस्य प्राधान्यं दर्शयितुमेकविंशत्यध्यायोक्तं हेतुं स्मारयति यथा जीव (**जीवत् स्वभाव**) (**श्लो.७**) मिति। परं भावं रामादिकं वेषादिभिः समाचरेदिति संबन्धः। सो स्मीत्यनेन स्वात्मावष्टंभस्यात्याज्यतामाह। अन्यथा लयाद्यनुसरणमशक्यम्। अथ ''रूपानुरूपिणी प्रकृतिः क्व'' इत्याशङ्क्याह **सुकुमारप्रयोग** इति **राज्ञा**मित्युपलक्षणम् **आमोदो** विभावपरिपूर्णता। **तन्नारीष्वि**तिं प्रयोक्त्रीषु प्रयोज्यतयात्र शङ्क्या विषयत्वेन विवक्षितः। **प्रयोजये**दिति। नाट्याचार्यः {६}।

नन्वेवमनुरूपा पुरुषविषये प्रकृतिः किं नास्तीत्याशङ्क्याह **युद्धोद्धता विद्धकृता** {१०}विति। प्रयोगा इति शेषः। युद्धोद्धतैराविद्धैश्च कृताः व्याप्ताः अत एव संरम्भप्रधाना आरभटादयः। स्त्रीपुरुषभूमिकेत्यस्यार्थस्य व्यापकत्वमाह अनुद्भट (**श्लो १६**)मिति। अनुरूपां प्रकृतिं लक्षयितुमाह स्त्रिया हीति। प्रयोकत्र्यानुरूपाननुरूपां लक्षयति पुरुषस्त्रीगतमिति। यत्र पुरुषत्वमालम्ब्य स्त्री वर्तते यथा सांकृत्यायिनी। न तु सर्वत्रेत्यर्थः। स्त्रीपुरुषं प्रयुक्तमित्येतत् सर्वत्र युक्तमिति दर्शयति **छन्दत** इति {**१५**}। **स्थाविरबालिशावि**ति। संबन्धिशब्दाः संबन्ध्यन्तरमाक्षिपन्तीति स्थविरोः युवभूमिकायां युवा च वद्धभूमिकायां न योज्यः। बालिशो त्र विरूपः स विरूपभूमावायोज्यः। एतच्चोपलक्षणम्। यत्र यत्प्रयोजनो न श्लिष्यति न स तत्र योज्य इत्यर्थः। **पाठ्यप्रयोग** इति {**१६**}। संस्कृतपाठ्यप्रधाने सुकुमारप्राकृतपाठ्यप्रधाने। **गीत** इति गीतप्रधाने प्रयोग इत्यर्थः। अत्र हेतुमाह प्रायः **प्रकृति**रिति। **बलवन्त** (**श्लो १७**) इति। रङ्गपूरणोचितगम्भीरस्वरा। ननु पुमांसो पि भावयन्त्येव तत्कथमुक्तं स्त्रीणां गेयं प्रकृतिरित्याशङ्क्या **यद्यपि पुरुष** (**श्लो १७**) इति।

ननु विपर्ययो पि दष्ट इत्याशङ्क्या **तावलङ्कारा** (**श्लो१६**)**वि**ति। कदाचित्कापीति यावत्। तत्र स्त्रीपुरुषप्रयोगमनुकरोतीत्ययमेव प्रचुरः प्रकार इति दर्शयति। **प्रायेण** (**श्लो१६**) इति। पुरुषस्वभावेन प्रयोज्येनोपलक्षितो यं स्त्रीभिः कृताः प्रयोज्याः। अत्रानुवादं दर्शयति रम्भोर्वशीप्रभतिष्विति। अत्र हेतुमाह उपदेष्टव्यमिति। उपदेष्टुं शक्यमित्यर्थः। स्वयमिति पुरुषैः न्यासो त्र प्रयोगः।

ननु पुमानपि भावबुद्धिमाश्रित्याशङ्क्य हेत्वन्तरमाह यस्मादिति। पुरुषसंबन्धिबलितं च यद्वस्तु तदतीवह्रद्यं प्रतिभाति। तदाह **सो लङ्कार** (**श्लो२४**) इति। यदुक्तमनुद्भट इत्यादिना युद्धोद्धता इत्यादिना प्रयोगद्वैविध्यं तद्रूपकभेदेन विभजंस्तद्रूपके सप्रयोग उचित

इति दर्शयति नाटकमित्यादिना। शौर्यवीर्यसमन्विता इत्यनेन श्लोकसप्तकेन प्रायः प्रकृतिः स्त्रीणां गेयं नणां तु पाठ्यविधिरित्युक्तम्। तत्रायत्नसिद्धे र्थे को नाट्याचार्यप्रवर्तितस्य गुणनिकाभ्यासव्यापार इत्याशङ्क्याह **संगीतपरिक्लेश** इति {३३}। मधुरत्वं स्वाभाविक कर्कशत्वं सविघ्नत्वं कलाभ्यासकृतः। अथ नाट्याभ्यासप्रोत्साहनार्थमाह प्रमदा **नाट्यविलासै**रिति {३४}।

न स्वयं भूमिकान्यासो बुधैः कार्यस्तु नाटके इत्युक्तम्। तत्र नाट्याचार्यः किं बुद्ध्यते येन बुधा इति संशये स इत्याह **गीतं नत्त**मित्यादि। स्वरज्ञो ग्रहारक्रियापि चतुर्विधातोद्यकुशलस्तालज्ञः लोकोपकारविच्चेत्यर्थः। **प्रस्तारो** त्र तालः। गमने क्रियाङ्कस्य कीदशी गतिरित्यनेनोपचारकौशलं तद्वक्ष्यते। एतैर्विना नाट्याचार्यनामापि न लभत इत्यर्थः। ऊहादायस्तत्पष्ठे भवन्तस्तदुत्कृष्टं कुर्वन्तीति ते गुणा इति विभागेनोक्ता। ऊहो नुक्तस्य कल्पनमपोहो अनुक्तस्य अनुसरणमिति पूर्वोन्मेषरूपा प्रतिभा स्मतिरुपदिष्टस्याविस्फुरणं मेधाः उपदिष्टस्य झटिति ग्रहणं शिष्यनिष्पादनं शिष्याशयौचित्यान्नोपदेश्यत्वं गुणप्रख्यानोद्यमः प्रगल्भते इत्यर्थः {३५}। **राग** इति {३७}। प्रयोजनानभिसन्धिना तत्र कलायाश्चासंघर्षाभ्यधिकं प्रतिपत्तिः स्पर्धा। एतदुपसंहरन्नध्यायान्तरमासूत्रयति **एव**मिति। **अत ऊर्ध्व**मिति चेति। सिद्धेद्वैविध्ये प्यवान्तरभेदेन बहुत्वमिति **सिद्धीनामि**त्युक्तमिति शिवम् {३८}।।

प्रकृतिविकल्पाध्याये विषमपदालोचनं समारचितम्।
अभिनवगुप्तेन मया विषमविलोचनपदाब्जभङ्गेण।।

इति श्रीमहामाहेश्वराचार्याभिनवगुप्तेन विरचितायां
भारतीयनाट्यवेदवत्तवभिनवभारत्यां प्रकृतिविकल्पाध्यायः षड्विंशः।।

श्रीः

नाट्यशास्त्रम्

सप्तविंशो ध्यायः

(सिद्धिव्य जकः)

सत्त्वमित्यमलरङ्गमण्डले दैवमानुषविभेदभेदिता।

सिद्धिमानयति यः स्वविद्यया तं नमामि गिरिजार्धधारिणम्।।

इह यो यथाभिनये यस्मिन् योक्तव्यः सिद्धिमिच्छतेति सर्वमभिनयानां तावत्सिद्धिपर्यन्तमुक्तम्। अभिनयप्रक्रमेणैवोपाङ्गाभिनयाध्याये सप्तमे। तथाभिनयसमानीकरणात्मकमेलनिकासंपादनात्मकसामान्याभिनयस्यापि सिद्धिफलत्वमेव दर्शितम्। चित्राभिनयाध्यायान्ते ''एवमेते ह्यभिनया वाङ्नैपथ्याङ्गसंभवाः। प्रयोगज्ञेन कर्त्तव्या नाटके सिद्धिमिच्छतेति'' श्लोकेन तत एव ''रसा भावा'' (**ना.शा.** ६/१०) इत्यत्र सिद्धिरुद्दिष्टा तत्र केयं सिद्धिर्नामेति भवितव्यमधुना जिज्ञासया तदभिप्रायेणानन्तरवत्तावध्यायपर्यन्ते दर्शितः।।

अत ऊर्ध्वं प्रवक्ष्यामि सिद्धीनामपि लक्षणम्।। इति। तत्र सिद्धिर्नामासाध्यप्रयोजनसंपत्तिः। सा च नटानां सामाजिकानां च। तत्र कतरा वक्तव्येत्याशङ्क्याह–

सिद्धीनां तु प्रवक्ष्यामि लक्षणं नाटकाश्रयमिति।

तुर्व्यतिरेके। यद्यपि सामाजिकाश्रयं नाटकाश्रयं च सिद्धीनां लक्षणं वक्तव्यं तथापि नटाश्रयमेव वक्ष्यामि। नेतरदिति। नाटको त्र नटः नटतीति अपि हि व्युत्पत्तिः। कस्मात्पुनरितरं नोच्यत इत्याशङ्क्याह–

यस्मात्प्रयोगः सर्वो यं सिद्ध्यर्थं संप्रदर्शितः (२७.१)।। इति।

सामाजिकानां सिद्ध्यर्थो यः प्रयोगः स इति विशेषणभागे विश्रान्तिः। दण्डीप्रेषादस्याह लोहितोष्णीषाः प्रचरन्तीति। यथा विधिविवक्तेः तेनामयर्थः। यथा सिद्ध्या प्रयोगः सप्रयोजनः सामाजिकगतया तदुद्देशेनैव नाट्योत्पत्तौ न वेदव्यवहारो यं संश्राव्यः शूद्रजातिष्वित्यादेशेषु प्रयोगदर्शित्वात् सा सिद्धिः पूर्वं दर्शितैव। तदुपयोगेनान्तरीयकतया य परा सिद्धिः। अनेनाध्यायेन दर्श्यते। एतदुक्तं भवति। सामाजिकानां तावदभिसंहितफलाप्तिलक्षणा सिद्धिः। व्रीह्यादिष्वधिगच्छन्तीत्यादौ तत्र स्थाने निरूपितपूर्वैव। सा च मानुषेण सामाजिकेनाभिसंहितत्वान्**मानुषी**त्युच्यते {२}। तत्रापि तया न संहितो सौ यथा निर्विषयस्वकपरमानन्दाविर्भावस्वरूपापत्तिवर्गब्रह्मचारिणी गीतादेर्विषयस्य नाट्यान्तरोपर जकतया निमग्नस्य विषयसमत्वान्नटादेः निहुतत्वाद्रामादेस्तुच्छत्वाद्देशकालनिर्यन्त्रणतया एव विषयत्वापादनात्तस्याश्चात्र असंभवस्योपादानात् सो प्ययं सिद्ध्यंशो दैवशान्त्याः समस्तरसप्रकृतितां–

''स्वं स्वं निमित्तमासाद्य शान्तादुत्पद्यते रसः'' इति वदतामुचित एव स्पष्टतयानुरोधो रहस्यार्थस्यान्यपरत्वाच्च शास्त्रस्य। तदुक्तं भट्टनायकेन–

प्रधाने सिद्धिभागे स्य प्रयोगाङ्गत्वमागताः।
गेयादयस्तथैवैते त्रैधैनं (?) ह्युपयोगिनः।।
सोपानपदपङ्क्तया च सा मोक्षस्पशात्मिका।
सा तु **मोक्ता** यतो गुह्यमषयो न्यपदे कथम्।।

शास्त्रे प्रकटयेयुर्हि तालमानकृते यथा।। इति।

यस्तु प्रस्फुटो दैवसिद्धचंशः पुरुषार्थव्युत्पत्तिलक्षणः सो पि ''धर्मो धर्मप्रवत्तानां कामं (कामो?) कामोपसेविना'' (**ना.शा.** १.१०६)मित्यादिना प्रदर्शित एवेति सामाजिकाश्रया सिद्धिर्न वक्तव्या। लक्षणतस्तदाह **सम्यक् प्रकर्षेण प्रकटित** इति। नटस्य तु या सम्यक् प्रयोगनिष्पत्तिलक्षणा सिद्धिः सा प्रयोगसिद्धिरुपयोगिनी प्रयोगनिष्पत्त्या हि विना नाट्यतयैव नेति कुतः सा भवेत् (?) प्रयोगनिष्पत्तिश्च सामान्याभिनयस्यैव सम्यक्त्वापत्तिः। परमार्थस्तु परकीयप्रोत्साहनतारतम्योदितप्रकृतिभानप्रत्ययबलेन वा स्वतः प्रतिभानमाहात्म्येन वा तत्र पूर्वा मनुष्यनिष्पादितत्वान्मानुषीत्युच्यते। दश्यते पि प्रोत्साहनबलेना (बलेन?) प्रबोधो हनूमत एव सागरलंघने। तत्र प्रोत्साहनं वाचिकम्। प चधा सा त्वहो कष्टमित्येकं स्थानं शारीरं प चधेति दशधा। अन्ये तु विभागमाहुः। तथा हि प्रोत्साहनं वचसा वा सात्त्विकदर्शनेन वा शरीरव्यापारेण वा। वचनं सप्तधा। तद्यथा मध्यमारूपतत्प्ररोहात्मकं सामान्यवैखर्यात्मकं तत् प्ररोहात्मकं विशेषशब्दात्मकं वैखरीस्वभावम्। आवेशोचितविशेषवैखरीरूपं तत्प्रबन्धं विच्छेदं च। तदाह। स्मितं ह्यन्तः स जल्परूपां मध्यमां सूचयति। संविदो हि **हासविकासानुरूपः** सुन्दरस्पन्दो यदाहं वत्रहणं (?) स्मितेनेति। सात्त्विकं तु पुलकादिरूपमेकं चैव। शरीरविकारो पि द्विधा। अनभिसन्धिपूर्वक एव यथा झटिति ह्युत्थानः। अभिसन्धानकृतो वा यथा चेलादिप्रक्षेपं चेलाद्यभावे चोर्ध्वागुलिकरणादिभिस्तेनेयं दशविधा मानुषी सिद्धिः तत्र तत्र प्रयोगौचित्यात्सभेदेन प्रवर्तते। यदाह हास्यं स्मितेनेत्यादि। स्वप्रतिभानतारतम्यकृता तु सिद्धिर्द्विविधा। कदाचित्तु प्रतिभवन्त्यपि स्वप्नयोगादतीव मन्दीभवति। तत्संभाव्यमानमध्यात्मिकाधिदैविकानां शरीरादिगता व्याधिरूपप्रक्षोभबाह्यभूतजनितकलकलशब्दादिभूकम्पवातवर्षादीनां विघ्नानां दैवापरपर्यायादष्टप्रेरितं न पुरुषव्यापारोपनतादपसारणाद्वा भवति। यत्रेदमाह **न शब्दो यत्र न क्षोभ** इत्यादि {**१७**}। मूलत एव विघ्नानामसंभवाद्वा यदाशयेनाह **यो भावातिशयोपेतेति** {**१६**}।

तदेतदाहुर्यन्**मुनि**राह सिद्धिस्तु द्विविधा ज्ञेयेति। अत एवास्या रसः प्रत्यङ्गत्वान्नाट्याङ्गमध्ये रसा वा इत्यत्र गुणाङ्गयुक्तं सामाजिकाश्रिता तु फलमाहुः।

यत्तु **भट्टनायकेनो**क्तं ''सिद्धेरपि नटादेरङ्गत्वं व्रजन्त्यास्तत्पक्षे यमिति'' तेन नाट्याङ्गता समर्थितफल च पुरुषार्थत्वादिति केवलं **जैमिनिर**नुसत इत्यलमनेन। **वाङ्मनो ङ्गसमुद्भवेति** सर्वाभिनयैकीकारसंपत्तिरपीत्यर्थः मनोरूपत्वात्।

अन्ये तु वाङ्मनो ङ्गसमुद्भवा दशाङ्गा मानुषीति संबन्धयन्ति। तदन्ये प्यभिनयविषयैवेति दर्शितं **नानासत्त्वाश्रयकृता** वाङ्मयस्थ शरीरजेति। **विदूषकच्छेदकृत**मिति। च्छेदो त्र वचनभङ्गी प्रकम्पितस्कन्धना.....श्रयोच्छाटनं च कृत्वा तत्साध्यं प्रोत्साहने बंहितव्यमिति संबन्धः। अथानेन साभ्युत्थानैरिति नवमो भेदो

व्याख्यातः। **प्रकम्पितांसशीर्षमित्य**नेन वचनाङ्गुलिक्षेपात् दशमो पि भवेदस्पष्टो मन्तव्यः सास्रमिति वदन्नेवं सूचयति।

यद्यपि भेदान्तरमप्यत्रानुप्रविष्टं तथापि बाहुल्यादभ्युत्थानेन व्यपदेश इति। एवं भेदात्क्रियते। **द्वेषः** सहजैवा**प्रीतिर्मात्सर्य** तु कार्यार्थमेकद्रव्याभिलाषात्। **पिपीलिकानिक्षेपः** सुकुमारप्रकृतेः स्त्रीपात्रप्रायस्य त्रासनोत्पातेन सिद्धिविघातः ''औत्पातिकाश्च घाताः पशुवेगोन्मत्तलिङ्गकृता'' इति। अशंकितं पशोः सिंहादेर्वेषं कृत्वा सुकुमारं प्रयोक्तारं भीषयति सामाजिकं वा। एवं मात्सर्यादुन्मत्तलिङ्गमपि कश्चित्करोति हासानयनेन प्रकृतप्रयोगविप्रसंवादनायेति (विसंवादनाय (?) इति) वैलक्षण्ये लक्षणविस्मरणमन्यभूमिकोचितसत्त्वस्वीकारो पि विभूमिकस्तूष्णीकता। अन्येन पठनीयमन्यः पठती**त्यन्यवचनं काव्य**मिति बहुव्रीहिः {२६}। **आर्तनाद** {२६} इति। इतःप्रभति परद्वेषप्रयुक्ताः सिद्धिविघाताः। आर्तत्वं हि छद्मना प्रदर्श्य नादं सिद्धिविघातकं करोति। एवं व्याधिदर्शनेन **मकुटाभरण-निपात** {२७} इति नेपथ्यभ्रंशः। अन्यः **पुष्करावाहितदोषा** इत्यनेनेदमाह न केवलमभिनयानामेव समानीकरणं सामान्याभिनयानां यावदातोद्यगीतयोरप्यन्योन्यमभिनयैश्च समं मीलनं सो पि सामान्याभिनयः। **अन्यदि**ति। गीतादि। तच्चाभिनयाश्चेति द्वन्द्वः। **समशब्देन** कर्मधारयः तत्र **भवः** प्रयोग इति।

नन्वजितादिभिः को दोषो जायते इत्याह। भावस्य प्रयोगस्यानुभावादिरूपस्य दूषणानि तेषु सत्सु तदववस्थावचनात् तत्र सर्वात्मने रसादिदोषाः। प्रथमे ध्याये त्राह–

त्रासं स जनयन्ति स्म शेषा विघ्नास्तु नत्यताम्। (**ना.शा.** १.७६)

इति तत्र स एव सिद्धिविघाते प्रधानत्मत्वेनोक्तः। **विस्वरमजाततात** {२६}मित्येव स्पष्टीकृतं **वर्ण** {२६} इत्यादिना। एतत्स्वरूपं च वितत्य गेयाधिकारे निरूपयिष्याम इतीह नोक्तम्। एवंविधं **स्वरगतं** कर्तहन्या**द्विहन्ति प्रयोगं** नाशयन्तीत्यर्थः। एवं पुष्करगतं कर्तनियोन्यं (नियोज्यं?) विधिप्रयोगं हन्तीत्यकाव्यकृतघातस्य स्थानानि निमित्तानीत्यर्थः। **काव्यजाता**मिति सप्तमी। **प्रकृतिव्यसनेति**। प्रकृतकृतमनौ चित्यमिति यावत्।

तदुक्तम्–

अनौचित्यादते नान्यद्रसभङ्गस्य कारणम्। (**ध्वन्यालोक** ३.१४**वत्तौ**) इति।

शेषोदकनालिकया {३४} काल उपलक्ष्यते। तस्य शेषत्वमन्यकालव्याप्तियोग्यता तेन यत्र काले यदनुचितं तत्र तन्निबन्धनम्। यथा प्रभाते सङ्गीतकदर्शनादि राज्ञः। चकारादेशादौचित्यमपि। तेन देशकालस्वभावकृतं यदनौचित्यं कार्ये तत्सर्वमेव सिद्धिविघातकमिति। **उत्तमव्यतिक्रियामीति। स्थानविशेषै** {३८} रिति। स्थानविशेषैरिति निमित्तैरित्यर्थः। **यूपाग्निचयन** {३८} इति। तच्छिद्दनात् नटो दुर्लभश्च तत्र यथात्वं सर्वजनेन सुज्ञातं न च लोकवत्तोपयोगिनीति भावः। **सर्वगत** {४०} इति। सर्वत्र प्रयोग एकदेशज इत्यंशे बहुदिनजा.....वरुद्धत्यसौ सिद्धिविघातकः। **अव्यक्त** {४०} इति। प्रयोगान्ते स्य प्रयोगान्तरेण संबन्धो रङ्गे कार्य इत्यर्थः। **एकदिवसजात** {४०} इति।

एकप्रयोगो लक्षणं प्रत्यपर इत्यन्वेति। **जर्जरमोक्षस्यान्त** {४०} इति पूर्वरङ्गप्रयोगो पि परीक्ष्य इति दर्शयति। नाट्यविधौ यथावदुक्तं ज्ञातुं प्रयोगस्य चोपपादनं कर्तुमशक्तो पि व्यग्रमनस्कत्वात् देशवेषाद्यनौचित्येन यो यं प्रयोगं कुर्यात्तस्य सर्वस्य घाताः। नन्वज्ञस्यैवेत्यार्याद्वयस्य योजना दोषप्रत्यर्थं न **ग्राह्या** {४७} इत्युक्ते प्रयोक्तुरवलेपो वतरेदित्याशयेनाह **न च नाद** (२/४८)**स्त्विति। तज्ज्ञै**रित्युक्तम्। तान् वशीकर्तुमाह **अतः ऊर्ध्वं प्रवक्ष्यामि प्राश्निकानां** {४६} त्विति। प्रश्ने भवा मध्यस्थत्वेनाभिनयचतुष्कगीतातोद्ये चेति। **षडङ्ग** {५१} **त्वान्नाटयं सन्तोष** इत्यादिना विमलाशयत्वेन सहृदयत्वमेषां परमो गुण इति दर्शयिति **कार्य** {५६} मिति। तेन सह विचार्यमित्यर्थः। शीलमेव दर्शयति। **तुष्यन्ति तरुणाः काम** {५८} इत्यादिना। (यो स्मिन्) प्रविशे {६२} न्नरः साधारणीभावमेवं सूचयति तत्समीपे भवेदिति यावत्। एवं वस्तुमात्रविचारे विधिरुक्तः प्रयोक्तृतिणां परस्परकलहहेतुविधिर्वक्तव्यः। स च कदाचिल्लक्ष्यमात्रविषयो भवति। कदाचिल्लक्षणविषयो पि पूर्वमधिकृत्याह।

संघर्षे {६४} **त्विति। उपचार** इति। राजोचित इति भावः। द्वितीयमधिकृत्याह **शास्त्रज्ञाना** {६६} **त्विति। भर्तनियोगा** {७०} दिति। लेखको लिखति गणकः पिण्डयति। द्वयोरपि यथैकस्य न घातः तेनायमस्याधिकारसिद्धिः। स चेत्याह **सिद्ध्यतिशयात्पताका** {७७}। यदि तु न कुत्रचिदतिशयः। तदा कथमित्याह। **इति** शब्दो ध्याहार्यः। तत्तद्रसप्रधानं नाट्यं तत्र तत्र कालेषु रसः संभवतीत्यभिप्रायेणाह **देशकाला** {६७} विति। नेपथ्ये पाठः यत्कर्तुं जानाति **तेन योग** इति **पात्रसंपाद्ये** न्तर्भावो स्य। पात्रं हि रसप्रविष्टमेव। **यदा समुदिता** इति सामान्याभिनयत्वमाह। अध्यायप चकेन हि तदेवोक्तम्। नाट्योत्पत्तिरिव पूर्वरङ्गान्तेनेत्युक्तम्। वक्ष्यति च अलङ्कार इति शोभापूर्णतयाश्चतुरित्यर्थः।

वक्तव्यशेषं सूचयति **अत ऊर्ध्व** {१०४} मित्यादि शिवम्।।

नसिंहगुप्तापरनामधेयविद्यावदातः सुखलाभिधानः।
यं देहविद्याभिरयूयुजत्सः प्रयोगसिद्धिं कृतवान् महार्थाम्।।

इति श्रीकाश्मीरमहामाहेश्वराचार्याभिनवगुप्ताचार्यविरचितायां अभिनवभारत्यां नाट्यवेदवत्तौ सिद्ध्यध्यायः सप्तविंशः।।

श्रीः

नाट्यशास्त्रम्

अष्टाविंशो ध्यायः

(गेयाधिकारः)

मध्यमस्वरमुशन्ति यद्वशान्नादषट्कमुदितं श्रुतिक्रमात्।
सो पि यद्विलसितं कलात्मकं तं नमामि शिशिरांशुमण्डनम्।।

आतोद्यानां विकल्पनमित्युक्तं पूर्वाध्यायसमाप्तौ, तेन सङ्गतिं कर्तुं षष्ठाध्यायपठितमपि श्लोकं पुनः पठति– ततं चैवेत्यादि। ननूद्देशे (६–१०) ''सिद्धिः स्वरास्तथातोद्यं गानं रङ्गं च सङ्ग्रहः'' इत्युक्तम्। ततं च (ततांशो) नटानां रामादिविशेषरूपतया शङ्क्यमानानां तन्मयीभावप्रत्यूहभूताशयनिवारणाय 'नाथो वनं विशति' इत्यादिना, तालांशो पि प्रयोगं सूत्रकल्पतया समीकुर्वन् स्वरं लयं च स्वप्रेक्षकहृदयं तत्रैवानुस्यूतं तिरोदधत्साम्यं च रागनिबन्धनं विदध्रदसं प्रति परममङ्गलम्। तत्र स्वरांशे ततसुषिरयोरुपयोगः। तौ हि स्वरस्य परमार्थं रक्तिलक्षणम् वितरतः। गातृणां हि वाक्यारुष्यादिदोषशतोपहतानां स्वरस्तन्त्रीवेणुस्वरेण सुस्वरतां नीयते, स्वभावत एव तन्माधुर्यात्। वाङ्माधुर्यं यावद्धीनं तदाहार्यं मधुरं माधुर्यमभ्यासावाहरेयुः। ततानुबद्धत्वात्स्वरस्य न न्यूनाधिकभावाशङ्का काचित्, तत्र मूर्च्छितायां वीणायामशिक्षितेनाप्यभिहनेन स्वरत्त्वोपलम्भः। नत्वेवं वंश इति ततातोद्यस्यैव प्राधान्यम्। अत एव वीणा शारीरिकी चैवाचार्यैर्निर्दिष्टा ''दारवी गात्रवीणा च'' इति। तथा च प्रतिबिम्बं वीणेति व्यवहारः इहापि पूर्व वैणा एव स्वरा उद्दिश्यन्ते द्वयधिष्ठानाः स्वरा वैणाः शारीराश्चेति। गान्धर्वे पि (हि?) प्रयोक्तुः फलमिति तदनुसारेण शारीरप्राधान्यं फले दर्शितम् गाने तु श्रोतफलरक्तिप्रधानतेति गानस्य (गान्धर्व) उपकरणीकृतो मुनिना। तालभागे तु घनावनद्धशेर्निवेशपदांशे ध्रुवाध्यायस्योपयोपयोगः। न चैतद्गान्धर्वसाराभिष्यन्दत्वमनेन निर्मितम्। सामभ्यो गीतमिति हि पारम्पर्येण सामवेदोद्भूतं न ब्रह्मगीतप्रभवत्वाद्गीतस्य सामकरणत्वमुक्तम्। तेन प्रथमं जात्यादिलक्षणं निरूपितम्। अतस्ताद्योस्यैव प्रथममभिधानं, स्वराणामिति तत्रैव स्वरलाभ इत्युक्तम्। तेषां तु पथगुद्देशे प्रयोजनमन्तरायोपसंग्रहो नाम काक्वध्याय एषां पूर्वमुदितानामेव। किंच।

.....द्रूपमित्यातोद्यस्यैव स्वरूपं वाच्यमिति न कदाचिदसंगतिः लक्षणान्वितमिति तदन्यस्य निरासादनुचितस्यापि वाद्यान्तरस्य तस्माल्लक्षण न कृतमित्याह। यस्मादिदमेवं विज्ञेयं– एतन्मध्य एव सर्वमन्तर्भवति, तदेतङ्गत्वं किंचिद्याति, किंचित्पुनरन्यस्मिन् सति तदुपयोगि। तथाहि पाटादिपुष्करवाद्यस्यैवाङ्गादन्यत्र डोम्बीश्चाटुकादीनां नास्ति। अन्यन्नाट्योपयोगि मार्जनामार्गानुयातः स्वरवर्णसंबोधेनात्यन्तव्य जकत्वायोगाज्ज्वालापट्ट–
––फलकवादादपे.....वमार्ज्यमयः सर्वं हि चतुर्विधस्येहैवोक्तस्य किंचिदंशमनुसरेदेतत्प्रकृत्येभ्यो वेति मन्तव्यः।।१।।

चातुर्विध्यं पूर्वोक्तमेव स्मारयति ततं तन्त्रीकृतमित्यादि। तन्त्रीणां (कृतं ततम्) चार्मबन्धत्वादवनद्धम्। मूर्तिकाठिन्येन घनं तदनुसारेण रसभावोपयोगि विशिष्टवर्णद्वारेण च नोपयुज्यत इति साम्यमात्रोपयोगित्वात्ताल इत्युक्तम्। धनं सुषिरमिति पाठे आतोद्यापेक्षं नपुंसकं, विशेषापेक्षया तल्लिङ्गेन केचित्पठन्ति।

सुषिरस्य स्वरात्मकत्वे पि तदनन्तरं तस्यानभिधानमितिचेन्न, वीणाया एव स्वरभागे प्राधान्यात् धातुवाद्यशेषशुष्कप्रकृतिकत्वाच्चावनद्धस्य तन्मानोपकारित्वाच्च घनस्य, वीणेव सुषिरस्य तत एवानुप्रवेशः। ततस्तु वंशः तत्र चतुर्विधातोद्यमुपर जकम्। उपर जनीयाश्चाभिनय इति तयोरेकसन्निवेशात्मकः समूहः कर्तव्यः। तत्र चतुर्विधमप्यातोद्यं स्वरतालप्राधान्याद्द्विविधं कृतं ततमनवद्ध चेति सुषिरघनयोः क्रमेण तदङ्गत्वात्। अभिनयेन च पात्रवर्ग आक्षिप्त इति त्रयः समूहाः कुतपशब्दवाच्याः। कुतं शब्दं पाति, कुतं च रङ्गं तपत्युज्ज्वलयति (वा)।।२।।

तदेतदाह– **प्रयोगस्त्रिविधो ह्येषा**मिति। एषां चतुर्णामातोद्यानां नाटकाश्रयो नाटकगतपात्रवर्गसहितस्त्रिप्रकारः प्रकर्षेण योगः समूहीभावः, यतः स्वयं द्वौ समूहौ नाट्योपयोगी पात्रवर्गात्मा च ततीयः। तदाह– **नाट्यकृतो पर** इति। यद्यपि तननावहननसौषिर्यनिबद्धत्वेन संकीर्णत्वादि। तथाप्येकोपयोगकृतान्यपदेशः। तननेन हि स्वरप्राधान्यं, तच्च न पुष्करादवहननेन वर्णानुस्वारः सम(न)तन्त्र्यादौ। एवमन्यत्रापि वाच्यम्। तत्र तताभिधानः कुतपः क्रियतां समूह इत्याह– ततः **कुतपविन्यास** इत्यादि। परिग्रहो गायकस्य (भार्या)। तद्यथा गायकः कांस्यतालिकाहस्ताद्विप ची अपूर्णतन्त्रीका कोणवादनीया वीणात्वेकविंशतितन्त्रीका। चकारादन्यासां वीणानां संग्रहः।

तथैव चेति अपसुषिरपरिग्रहः। अथावनद्धराशिमाह– **मार्दङ्गिक** इत्यादि मदङ्गानीति पुष्कराणि, पणवो न्तस्तन्त्रीको हुहुङ्कारः। दर्दुरो महाघटाकारः। तथैव चेति वचनात्मर्दलकरटादिसंग्रहः। कांस्यतालिकास्तु गीतवाद्योः साम्यापादनार्थाः, तत्कुतप एव युक्ताः।।३-५।।

अथ नाट्यकुतपमाह– **उत्तमाधममध्यमाभि**रिति। उत्तमादिप्रयोक्तव्योचितः पात्रसमूह इत्यर्थः। पूर्वतो विशेषः, तताावनद्धयोः कुतपयोर्नियतदेशता पुष्कराध्याये वक्ष्यते नाट्यकुतपस्य तु प्रयोगे माभूदव्यद्या (दव्य) बधिरिति सन्निधिमात्रमुपयोगि न तु देशनियमः। तदाह **नानादेशे**ति प्रत्युपयोगो नेन कथित इत्यपरे।।६।।

नन्वेते त्रयः समूहाः किं परस्परमनपेक्षा एव, नेत्याह– एवं गानं च वाद्यं चेति। त्रयो प्येते समूहा एकीभावं नेया इति यावत्, न पुनरेको गायको मार्दङ्गिक उत्तमपात्रमित्यादिना पुरुषा एव दर्शिताः।

ननु गानादीन्याशङ्क्याह **विविधा आश्रया** यस्येति। नहि प्रयोक्त्रनपेक्षित्वं गानादीनां वदति। उक्तं च.....यत्नमिति संपाद्यमिति यावत्। तस्मादत्र यत्न इत्येतदेवाहं यस्माद्द्विविधाश्रयं भिन्नेन्द्रियग्राह्यत्रिविधक्रियारूपं, तस्माद्यत्नेनास्यैकता तत्संपाद्या,

येनैकबुद्धिविषयता सामाजिकस्य गच्छेत्। अलाततेजःकणो हि न वस्तुतो युगपदनेकदेशसम्बन्धी, लाघवयत्नेन तु तथातथा साम्यमापादितम्। एवं प्रयोगो पि तथापि नैकक्रियात्मा साम्यापादनाय.....

त्नेन तु तथा सम्पादित इत्येतदाह– **अलातचक्रप्रतिम**मिति।

ननु सामान्याभिनये ध्याये एतदुक्तं, सत्यं, तत्त्वभिनयविषयं, इदं तु गीतवाद्यनाट्यातां परस्परस्य विषयम्। ननु कस्मात्त्रयो राशयः कृताः इत्याशङ्कमानेन नैवापसारयति एवं गानं चेति नाट्यं तावदुपर जनीयम्। सामान्याभिनये भिनयबलादेकत्वं नीत एको राशिरिति। नात्र विवादः। स्वरगतिराशिश्चान्योन्यसंमिलितो लातचक्रवत्कायः। विविधाश्रयो पि वीणावंशगात्रगतो पि वाद्यविधिरेकीभावं नेय इति त्रयाणामप्यथ ग्रासीकरणमिति मुक्तम्।

नन्वेवं राशित्रये स्मिन्नेकीभूते प्रयोगसम्यक्त्वापतितलक्षणासिद्धिर्भवति, तथा च गीतवाद्यदोषा अपि सिद्धिविघातका उक्ताः। ततश्च सिद्धिस्वरूपं गेयाधिकारस्य पश्चाद्वक्तव्यम्। अत एव हि गीतवाद्यनाट्यकृतासिद्धिरित्युक्तेति किं प्रधानं किमङ्गमिति भागे संशय्यते। पूर्वमेव तु सिद्धिनिरूपणे एतावता प्रयोगत्वमिति परिज्ञातम्। तस्योपर जनीयतोक्ता भवति, मध्यावस्थितेन च सिद्धिनिरूपणे आकाङ्क्षवदुपर जकवर्गो पि स्पष्ट एव भवति।

अन्ये तु मन्यन्ते– गीतातोद्यविहीनादपि प्रयोगात्पठ्यमानादपि दशरूपकाद् भवति सिद्धिरित्यनेन सूचितमिति। तत्तु न सम्यगिव, तावती ह्मपरिपूर्णता नाट्यस्य, परिपूर्णं च सर्वानुग्राहि नाट्यस्वरूपमभिधित्सितं मुनेः। तत्र च गीतवाद्ययोरेव प्राधान्यमित्यवोचाम।

किं चैवं सति सिद्ध्यध्याये गीतवाद्यवैषम्यादि किमर्थमुच्यते, प्राक्तन एव समाधानमार्गो युक्तः। उपर जकोपकृतस्य नाट्यस्य नाट्यतेति भेद्यत्वात्तत्पश्चादुपात्तम्। गानं त्वादौ तच्छेषभूतं तु मध्ये वाद्यमिति क्रम् नाट्यानुसारेण त्र्यश्रचतुरश्रविनिर्णयः, अपि तु गानानुसारेणेति गानमुपर जकमपि सन्नाट्यं व्यवस्थापयदेवोपर जयतीति युक्त एष एव रङ्ग इति टीकाकारः। तदेतन्न विदामः। नहि नाट्यमनाश्रित्य किंचिदपि प्रवर्तते। गानस्यापि नाट्यानुसारेणोपयोगादिति गत्यध्यायदिशैव त्र्यश्रादिव्यवस्था भेदादित्यास्ताम्।।७।।

तत्र ततातोद्यस्वरूपं प्रधानवदभिधातुं पीठबन्धं करोति यत्तु तन्त्रीकृतं प्रोक्तमिति। विप ची वीणादिभेदानां नातोतद्येति टीकाकारः। तदयुक्तम्। सामान्येन तन्त्रीकृतत्वेन सर्वसंग्रहे तदनुक्तसमत्वादस्यार्थस्य तस्मादेवमित्यस्मत्सम्प्रदायः। नानातोद्यनिरूपणसमाश्रयं यस्य, तानि हि तद्गतं रूपमुपकारतया आश्रयन्ते, तेन तदेव प्रधानं तच्चगान्धर्वमिति। गान्धर्वो मितिमानं वर्तनमन्तर्भावो यस्य गान्धर्वे तदन्तर्लीनमिति यावत्। क्रम इत्याह स्वरतालपदलक्षणं हि तद्गान्धर्वम्, एवं भूतक्रममेव स्वराद्यात्मम्। एवं ततमध्य एव गायको

गणितः सपरिग्रहः। इह चैतदर्थमेव तन्त्रीकृतमित्युक्तं तन्त्रीप्रधानमित्यर्थः। गान्धर्वशास्त्रं च प्रमाणमस्येति गान्धर्वमिति।।८।।

सामभ्यो गीतमिति कथितं सामानि चात्र कारणकरणानि। गान्धर्वं हि सामभ्यस्तस्माद्भवं गानं न तुल्ये स्वराद्यात्मकत्वे गानं गान्धर्वे न्तर्भूतमिति का भाषा। विपर्ययो पि कस्मान्न भवति, तादात्म्यमेव वा कथं न स्यादित्याशङ्कां शमयितुमाह अत्यर्थमिष्टं **देवाना**मिति। अनेनादित्वं सूचितम्। देवा हि कथमिष्टं विजह्युः। तथेति तेन देवतापरितोषद्वारेण प्रीतिं ददातीत्यदष्टफलत्वं दर्शितम्।

यस्मात् यद्रूपाच्च देवानामीश्वराणामिन्द्रियमनस्संवेदनप्रभतीनां, आतोद्यमानत्वेन व्यवहारेण गच्छतानेनेति देववाद्यानां, अत्यर्थमर्थातिक्रमेण बाह्यशब्दादिविषयोल्लंघनेन..... मिष्टमिच्छायजनं च परसंवित्संगतिलाभलक्षणमुपलक्षणम्, तथा तेन प्रकारेण प्रतीतेरपवर्गोचितानन्दस्वभावविशेषेणावर्जितमित्यपवर्गफलत्वं दर्शितम्। तथातिक्रान्तं धनादिनिरपेक्षं चेदं देवानां यजनं यथा पुराणयोगादिभ्यो धिका प्रीतिर्गान्धर्वाच्छंकरस्येति। **गन्धर्वाणा**मिति प्रयोक्त्रुपलक्षणं, तेन ह्यत्यन्तं संवित्प्रवेशलाभेन तु गातुः फलयोगो गन्धत्वात्। तदाह–

''सकृत्प्रत्युक्तापि हि नन्दयन्ती यथाविधि ब्रह्महणं पुनाति'' प्रयोक्तगतमत्र मुख्यं फलम्।

ननु गान इव मुख्यतया श्रोतनिष्ठं तेन गन्धर्वाणां प्रीतिवर्धनमिति सम्बन्धः। तथापि च श्रूयमाणं प्रीतिवर्धनमित्येवमनादित्वाद्दष्टादष्टफलत्वाच्च प्रधानं गान्धर्वं गन्धर्वाणां प्रयोज्यमिति व्युत्पत्त्या, एवं देवानामिष्टं प्रीतिकृद्गन्धर्वाणां गान्धर्वमिति सम्बन्धः। तस्माच्च प्रीतिमेव विशेषेण वर्धयति यत्तद्गानमित्यध्याहारः। गानं हि केवलं प्रीतिकार्ये वर्तते। तेन तादात्म्यं तावद्युक्तम्। नवमहाफलस्यानादेः स्वतः फले कल्पिते तदन्तर्भाव इति विपर्ययो पि निरस्तः। स चायं गान्धर्वविवेको ध्रुवाध्याये नत्ते स्माभिर्दर्शयिष्यते। इह इव तु दर्शितो वाचोयुक्त्यनभिज्ञानमधुनैव हि संमोहे हेतुः स्यादिति।

अत्यर्थमिष्टं देवानामित्यनेन मां वाचं धारयतीति गान्धर्वं, गन्धर्वाणामिवमिति च। यथाह विशाखिलाचार्यः– ''पुरा स्वर्ग प्रनष्टां (वाचं) देवेभ्यः'' इति तन्निदर्शनेनैव दर्शितम्। प्रीतिवर्धनमिति च नारदीयनिर्वचनं सूचितम्। ''गेति गेयं विदुः धेति धातुः प्रवादजमिति, वाक्यस्य संज्ञेति, रेफस्तु वाद्यस्योपलक्षणं काकुप्रवादनमिति वा'' तदेवं निर्वाचनात्पर्यायेण श्लोक इति टीकाकारः। अत्र तु न करोतु व्याख्यात एव। तस्मादुपाध्यायैरिदमुक्तं– नन्विदं गान्धर्वं कुत उद्भूतं गानस्य च सामहेतुकत्वात्कथं पूर्वमुक्तम्। किं च गानस्यैवोपयोगाल्लक्षणं वक्तव्यं न तु गान्धर्वस्येति शङ्कां शमयितुमाह– **अस्य योनिर्भवेद्गान**मित्यादि। अस्य गान्धर्वस्य। **गान**मिति सामयोनिगीतिषु समाख्या। **वीणेति** महाव्रतोपयोगिनी औदुम्बरी; वंश इति नारदादिगुरुसंतानानुयायीति गान्धर्वस्य प्रभवः। किं च, गानवीणावंशादयो यं तत्कुतप भेदो वक्तव्यत्वेनोपक्रान्तः, स एवास्य गान्धर्वस्य

योनिर्हेतुः, इहाभिधास्यमानत्व इति शेषः। तत्कुतपोपयोगित्वादिह गान्धर्वमिधास्यत इति यावत्। ब्रह्मगीते लोकप्रवाहसिद्धं प्रगीत गातगेयमेव प्रसूतिहेतुरिति श्लोकार्थस्य तात्पर्यमित्यन्ये। टीकाकृत्तु गानं प्रधानं तदुपकारकौ वीणावंशाविति। गुणप्रधानतानिर्णयो स्य तात्पर्यं व्याख्यानाद्रथन्तरं गायत्रीमन्त्र गायन्तीत्येतत्समर्थने तु यो महान् संरम्भः टीकाकारेण कृतः स प्रकृतोपयोगवैकल्यादनेकार्थत्वेन गायतेः उपचाराश्रयेण सुसमर्थत्वात्सिकताचर्वणप्रायः। न रथन्तरमिति यदि यदा निरूपाणि तदा स्वरसंनिवेशेन..... ...नयतीत्ययमर्थः। अथ गीतिरेव तदा सामान्यविशेषभावः स्वरानिति स्वाधारभूतपदव्यवच्छेदकं वचनम् ''स्वे प्रतिष्ठं गगन''मितिवत्। मन्दस्य नलत्वे पि तत्प्रमितं स्वरवाचकत्वं तद्गीत्याधारे निष्ठित्वं चेति तत्राप्यदोषः। न चानेन प्रकृतं किंचिदुक्तमित्यलम्।।**६-१०**।।

ननु यदुक्तं गान्धर्वं कथं तस्य गानादाबुपयोग इत्याह एतेषां चेति। चो प्यर्थे। तथेति पूर्वारब्धात्सम्पध्यते। तेन हि गान्धर्वप्रकारेणैषां भावादीनां स्वरसमुत्थितं स्वरविषयमेव विधिं वक्ष्ये न त्वन्यम्।।**१०**।।

ननु को न्योस्तीत्याशङ्क्याह– **गान्धर्वं त्रिविधं विद्या**दिति। त्रिभ्यः स्वरादिभ्यो विधा विधानं यस्य। आश्रितवाची विधाशब्द इति चिरन्तनाः। न चैवं, तथा च विशाखिलाचार्यः ''स्वरपदतालसमवाये तु गान्धर्वम्'' इति। आत्मग्रहणेनैषां मिश्रीभावः। पदं स्यात्कारणमवधानं सूचयति। एतदेवयुक्तं, नहि स्वतालपदतुल्यतया, इदं भागानिविष्टमवधानं भाति, येन समूहमध्ये गण्येत। इति कर्तव्योपयोगि हि तत्तत्र मिश्रीभावः प्रधानगुणभावे नैव भवति। तत्र पूर्वनिपातादेव प्राधान्यं सूचयति। तेन स्वराः प्रधानं, तालोनामात्मा तत्साम्येनोपकारकः, ''तल प्रतिष्ठाकरणे'' इति ताल एवैतदाह। ततो पि दूरं पदं पदशब्देनैव तस्याधारतालाभः। तदुक्तं दत्तिलाचार्येण– ''पदस्थः स्वरसंघातस्तालेन सुमितः'' (१–३) इति तेन पदताला यादशा गान्धर्वेण तादशा गाने स्वरत एव तु भूयसा ततोपयोगीति तात्पर्यम्। अवधानं योगरूपं तच्चात्र नोपयोगि। परिवर्तकेष्ववनद्धे– पूर्वरङ्गे, तत्र हि देवतापरितोषादेव सिद्धिः। तदेतदुक्तं–

गीतिज्ञो यदि योगेन नाप्नोति परमं पदम्।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते।। इति केचित्।

तस्यार्थस्य अशब्दत्वादवधानाद्विना कुत्रापि सिद्धेरयोगात्। लक्षणं चतुःश्रुत्यादिस्वरूपम् कर्मेति योजनात्मिका क्रिया ग्रहांशादिरूपतया, यतो जात्यादि योगोद्भूवस्तत्र, तत्कुतपस्य सात्मकत्वे पि रङ्गभागस्य गानवत्तान्तत्वं यद्वीणाशरीरवशानामारोहणमवरोहणं च। प्राणाभिहननेनैव हि तीव्रातीव्रेण शरीर इव वंशे पि स्वरनिष्पत्तिः। वीणायान्तु आदर्शे वामदक्षिणविपर्यासवत्तारमन्द्रविपर्यास इत्याशनेयाह– द्व्यधिष्ठानाः स्वरा वैणाः शारीराश्चेति। वैणानां प्राधान्यात्पूर्वमुद्देशः। दर्शितं च तद्विधानमिति संपादनम्। लक्षणेन गान्धर्वलक्षणेनानुगतम्।।**११-१२**।।

तत्र वैणानां स्वराणां प्रकारानुद्दिशति स्वरा ग्रामावित्यादि। संक्षिप्यावबमो यतः इति समवाय उद्देशः। स च स्वरगतः, स्वरविषय आत्मा यस्य व्यस्तसमस्ताविरूपं हि स्वराणामेवेष्टमुद्दिष्टम्। दारुणो पत्यं वीणा वाग्रूपा भगवतीति दारवी। तेन तत्र न..... प्रत्ययः। ''दारुणो ह्यसौ जाता वाक् एत.....स्म। गां प्रनष्टा''मित्यादिना विशाखिलाचार्यः प्रादीदशत्। तदाधारत्वाच्च काष्ठमयो पि सन्निवेशे वीणेत्युच्यते। एवं शरीरे वीणा वाग्रूपा हि सरस्वती वीणा शब्देनोच्यते। **मूर्च्छना**.....शारीर्यां दारव्यां च तुल्या मूर्च्छना। **तानं** तु शारीर्यां सम्भवदपि न प्रयोगार्हमसुखावहत्वात्। अभ्यासार्थं च तत्प्रयोगे ष्वन्यूनाधिकवैणस्वरवशेनैव तत्सिद्धेः। अत एव शारीरस्वरप्रयोगाशक्तो पि हृदयापरिग्रहीतः स्वरविशेषः शक्नोति वैणस्वरान् प्रयोक्तुम्। **वत्तय**श्च धातूनाम्। शुष्कस्य वानुग्राहक आधारः, धातुशुष्कप्रयोगस्य वीणायामेव सुखावहः। ततो (धातुभिः शारीरस्वर) उपजीव्यते। (तत्तु) **अलङ्कारजात**मिति वक्ष्यते। श्रुतयश्च वीणायामेवोपयोगिन्यः, सारणायास्तन्त्र्युत्कर्षणस्य तन्मूलत्वाच्च। तथा च वीणैरुपस्रुतिः.....संख्यालाभे प्रमाणत्वेन वक्ष्यते। अत एव वीणेवीनं समस्तस्य स्वरगतस्य प्रकारस्याभ्यासे प्रयोगे चोपयोगिनस्तत्र संक्रान्तस्य चारुत्वास्त्वतः शब्दात्मकं पदमपि। तत्स्थमित्यभिप्रायेण।।**१३-१५**।।

एवं विशिष्टः स्वरतालेन मेय इत्याशयेन च पदगतमुद्दिशति। तालगतं प्रथक्कृत्य **व्य चनानी**त्यादि। व्य जनानि– अज्झल्रूपाणि उपादेयत्वेनात्र ज्ञेयानि। पदजातेन स्वरप्रयोगो व्यवसीयेताक्षरधर्मत्वात्स्वरस्य।

अन्ये त्वाहुः– व्य जनानीति द्योतकानि निपाता गह्यन्ते झण्टुमित्यादि। अकारादयस्तु पाणिकासुरक्तगान्धार्यादिजातिषु च दश्यमानाः **स्वराः** अचः वर्णाः अज्झल्समुदायाः, **सन्धयः** संहिताकार्याणि। **विभक्तयः** सुप्तिङः, **उपसर्गा**श्च प्रादयः निपातः.....हेयाः परुषप्रायाः। अन्ये तूपादेयविभागेन ज्ञेयाः, **अलङ्कारा** उपमावेसरादयः। **अनिबद्ध**मिति गद्यं पथगर्थं वा तद्विपरीतं **निबद्धम्**। एतच्च स्मतं वाचिकाभिनय एवास्य व्य जनादिभेदस्योक्तत्वादिति भावः। यद्यनुक्तं कुलं वा स्मरत्वं वा विभाव इत्यादि च तद्यथावसरं वक्ष्यते। ध्रुवस्त्विवत्यादिना तालगतमुद्दिश्य **गान्धर्वसंग्रहो ह्येष** इत्यन्तेनोद्देशत्रयमेकविषयीकरोति अत्र च प्रकरणशब्देन मद्रकाद्युक्तविस्तरमिति लक्षणपरीक्षात्मकम्। निबोधतेत्यनेनोहापोहकौशलशालिनी बुद्धिरत्र भवतामुपयुज्यत इति दर्शयन्नुद्देशक्रमो लक्षणादौ मया नादत इति। तथाहि– ग्रामानन्तरं श्रुतिः, स्थानान्तरं साधारणे जातिं च लक्षयिष्यति न चैष उद्देशस्तवोद्देशो नामापि नानुसतः। उद्देशे तु प्रयोजनं न लक्षणावकाशवितरणम्। अत्रापि तु व्युत्पत्त्या अन्यासां सुखेन विधिसाधारणमात्रमिति तेन स्वरादीनामुद्देशक्रमेणातन्त्रत्वं यद्व्याख्यातं टीकाकारेण तन्मन्दफलत्वं शक्यं दूषणमश्लिष्टं च। तथापि स्वरेषु सत्सु ग्रामौ तदाश्रया मूर्च्छना ताना इति युक्तम्। यत्तु स्थानानां तदन्तरमभिधाने कारणं निरूपितम्। न स्थानं स्वरस्य स्वरापोहकारी किन्तु तारादि संज्ञामात्रे....यदि तत्र स्थाने निष्पत्त्या तथा संज्ञा। तर्हि

तारमन्द्रमध्यमव्यतिरिक्तस्वरूपाभावात् स्वरूपोकारत्वमेव कथितं स्यान्नवेति निबन्धने कृतं स्यात्। शुष्कानन्तरं साधारणमुद्दिष्टं, शुष्क.....र्तित्वख्यापनायेत्यपि न कि ित्। न हि काकल्यन्तरयोः शुष्क एव प्रयोगो ल्पनिषादगान्धारादिजातिषु तद्विनियोगात्। जातिसाधारणं तु जातीनां किंचिदैकाग्र्यं मन्यन्ते। सदशं रूपमित्यस्यापि कः शुष्के वसरः। श्रुत्यपेक्षिणः स्वराः तत्किमकाण्डे ता उद्दिष्टा इति चोदयित्वा यत्प्रयुक्तं शारीरापेक्षयैव तु न दारव्यां ते स्वरा इति तदसंगतप्रायम्। एतावता हि दारव्यां नास्ति श्रुत्युपयोग इत्युक्तम्। तत्किं ताभिरुद्दिष्टाभिः ग्रामविभागाय ता इति चेतत्सविध एवोद्देश्या इत्यलम्। तन्नात्र क्रमसमर्थनेन प्रयसितव्यः।।**१६-२०**।।

तत्र स्वरान्वक्तुमाह– **तत्र स्वरा** इति। तेषूद्दिष्टेषु मध्ये स्वरा उच्यन्त इति शेषः। न..... ..वोपतापयोः स्वर आक्षेप इत्यनयोः स्वरशब्दः, तेन शब्दस्वभावां चित्तवत्तिमध्यस्थता रूपस्वास्थावस्थापरित्याजनेनोपतापयन्तो हृद्यतातिशयवशात् स्वतामाक्षिपन्तः स्वविषये अभिधानं कुरुतः स्वरा इत्युक्तः। वर्णसाम्यादपि निरुक्तिमाहुः। स्वतं स्वेष्वेव जातिरागभाषाभेदेषु राजन्त इव स्वराः। अथ स्वरैर्नियतामानन्तर्यं द्योतयति ऋषभ इति। एतदन्तरमेव शब्दस्तु निकटगान्धारः.....अन्तराभिधानभेदान्तरसम्भवादत्र भेदो नास्त्येव ऋषभ इति दर्शयति। काकल्यन्तरस्वरवशात्तु कथंचिद्भवतीति च शब्दश्चैवश्च, धैवतश्चैवेत्यत्रापि निपातौ योज्यौ। एतच्च स्वरसाधारणमिति तदभिधानावसरे तन्निदर्शयिष्यामः। तत्रानन्तरालश्रुतिषु नियतसंख्याकासु ईषद्यो वायुना स्पर्शस्तन्महिम्ना यः स्वरः श्रुतिस्थाने स्निग्धत्वरक्तत्वलक्षणो धर्मः तस्याश्रयभूतायाः श्रुतेरुपर जकः स एव स्वर इति केचित्। षड्जश्रुतिरेवेत्यपरे, समूह इत्येके। वयं तु श्रुतेस्थानाभिघातप्रभवशब्दप्रभावितो नुरणनात्मा स्निग्धमधुरः शब्द एव स्वर इति वक्ष्यामः। अत्र नारदाद्या नामनिवर्चनमकार्षुः–

नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः।
षड्भ्यस्तज्जायते यस्मात्तस्मात् षड्ज'' इत्यादि (१–५७)

तदनुपयोगान्मुनिना न स्वीकृतम्। वीणायां च तथा भावाभावो पि षड्जादिदर्शनात्। यत्तु केचित्प्रतिसमादधते– वीणायाः प्रतिबिम्बित्वात्तत्र समानेन्द्रिग्राह्यो यः शारीरस्वरसमूहस्तमेव प्रतिबिम्बमिति केयं भाषा, न हि दर्पणसंक्रान्तप्रतिबिम्बशरीरप्रतिच्छन्दकसदशी वीणा वीणेत्युपालम्भः। न च मुकुरवद्देहस्य प्रतिबिम्बनस्थानं, न हि स्वरस्य वीणायां स्वरेणैकेन्द्रिग्राह्यत्वायोगात्। नभसीव च तत्र प्रतिश्रुत्यात्मनः शब्दप्रतिबिम्बसंक्रमणात्। न च वीणास्वरे शारीरस्वरं प्रतिबिम्बमर्पयतीति दष्टम्, द्वयोः स्वरयोरनुपलम्भात्। शरीरस्वराभावे पि वैणस्वरप्रवत्तेः शारीरस्वरः वैणस्वरप्रतिबिम्बमित्यसदेव पथक्प्रयत्ननिष्पाद्यम्। एवं हि नियमितपीडितं त्र्यङ्गुलिसमभिघातोत्थितशब्दानन्तरसंभवाद्रणनात्मा स्वरः। तत्र न च तत्र नासादिकारणषट्कमस्तीत्युक्ते प्रतिबिम्बत्वोत्तरीकरणमसदेव, केवलमौत्तराधर्यविपर्यासात्।

स्वगतशरीरस्वरानुसारेण च सारणोपयोगिन उत्कर्षाकर्षणसंभवात् प्रतिबिम्बत्वमुक्तम्। सप्त इति वचसा काकल्यन्तरस्वरौ पथक्स्वराविति दर्शयति। सप्त स्वरा इति च संभववशादिति च वक्ष्यामः। अन्ये तु 'तत्सवितुर्वरेण्यं' इति सप्तवर्णा 'नि ग रि ध म प स' स्वरैर्ब्रह्मणा पूर्वमुदीरिता इति साप्तस्वर्ये भिप्रायमाचक्षते। निर्णेष्यामश्चैतत्।

अत्र केचित् चोद्यं प्रति समादध्युः– श्रुतिक्रमाभिव्यङ्ग्याः स्वरा इति श्रुतय एवादौ वाच्या इति चोद्यम्, तत्रोत्तरं– भवेदेवं, यदि ध्वनिनादसंज्ञिताः श्रुतय एव नियतश्रुत्यन्तरत्वेन गह्यमाणा स्वरा (इति)। न ह्येवं, श्रुतयो ह्युच्चनीयतया अपि स्वराश्रया एव प्रतीयन्ते। यथा भट्टमातगुप्तः–

(जायते) सहजेनैव समस्तः श्रुतिविस्तरः।
स्वराधिष्ठानतो याति श्रोत्रपीयूषसारताम्।। इति।।

श्रुतेरेव च स्वरत्वे चतुर्थस्वरूपोपलक्षितो यः षड्जग्रामे प चमः स मध्यमग्रामे यदि ततीयः श्रुतिरूपस्तथा स प चमस्वर इति कथं, न हि ततीयं चतुर्थमेकमेव ग्रामद्वयस्य, धैवतस्यायमेव न्यायः काकल्यन्तरयोश्च निषादगान्धारतस कथम्।

पुष्पसाधारणे काले कोकिलो वक्ति प चमम्। (नारदीयशिक्षा १–५–४) इति एतच्च कथं भवेत्। (नासाकण्ठा) दौ नियता श्रुतिरूपा अभावात्। भावे हि सर्वे स्वराः स्युः। श्रुतिक्रमापेक्षिणि च स्वराणामात्मलाभे न्योन्याश्रयं कस्यचिदवधिभूतस्य प्रागसिद्धेः तस्मात् ग्रामविभागार्थमेव श्रुतिकीर्तनं तद्गतसंवाद्यादि वि(वेचनं) कथं तद्गतेषु रागेषु नैव स्वराणां नियतोर्ध्वादिकमनया शरीरसाम्यं भवतीति दर्शयितुमिति श्रुतयः स्वरेभ्यो नन्तरमुक्ताः। एतदाश्रयेणैव विशाखिलाचार्यो ग्रामानन्तरं श्रुतीरुद्दिशति स्म। ता हि परं यो.....अत एव सामवेदे ग्रामविभागाभावात्तदुपयोगिन्यां नारदीयशिक्षायां तदभिधानमौत्तराधर्यमात्रमेव तूक्तम् (–) यः सामगानां (नार १–५–१) इत्यादिना।

दीप्तायताद्याश्च प चश्रुतयः पथक्स्वरादीनां प्रयुक्तिविशेषसाध्वा उक्ताः। अन्ये त्वाहुः– श्रुतेरेव स्वरत्वाभावात् श्रुतिक्रमाभिव्यङ्ग्याः स्वभावेन पूर्वं उद्देश्या भवेयुरिति। अत्रोच्यते– यदि श्रुतिशब्देन समीरणसंयोगी स्थानविशेषो विवक्षितो, ''व्यस्तानि तानि षट्षष्टिं विद्यात्'' इति नीत्या तत्सर्वमेत....नमेव। कश्चित् स्थानं स्वरं मन्यते। न चास्य रूक्षता वा स्निग्धता वा धर्मः समीरणः तदभिधातयोरेष एव न्यायः अथ श्रुतिभिरिति न स्थानविशेषसमीरणसंयोगी प्रभवो विवक्षितः, तद्गतश्च रक्तताख्यो धर्मः स्वर इति। तदा तत्रापि प चमधैवतानुपपत्तिरिति समानम्। न हि तुर्यस्थानसंयोगोद्भूतस्य ध्वनेर्यो धर्मः स ततीयस्थानसंयोगोद्भूतस्य धर्मिवदेव, तद्धर्माणां नैयत्यात्। नह्यन्यधर्मो न्यस्य धर्मः। एतेन काकल्यन्तरौ व्याख्यातौ। कोकिलो वक्ति प चममित्यादि चात्र सुतरामनुपपन्नम्।

ननु तथाभूतस्थानाभावे तत्स्थानप्रभवस्य शब्दस्य यो धर्मः स भवितुमर्हति धर्मिणो सद्भावो हि तत्र कारणाभावात्। तुच्छं चैतत् उज्जोता अभिघातजाच्छब्दादनन्तरं यो नुरणनलक्षणो न्यः शब्द उपजायते स तावन्निसर्गस्निग्धमधुराकारः। तर्हि रज्ज्वा

तन्त्र्यामाहतायां पाषाणे कांस्ये वा हते तद्भावाभावौ स्फुटं लक्ष्येते। तदेवायमसौ समुदायापेक्षः स्वरांशो नाम प्रयोगात्समुदायापेक्षादपर एव। ततश्च य एवानुरणनात्मा चतुर्थस्थानसंयोगोद्भवेन शब्देन जनितः स एव ततीयस्थानोद्भूतेनापि जनयिष्यते। केवलमु चजनितत्वाढुच्चत्वं तस्यैव लक्ष्यते। मन्द्रषड्जो मध्यतालषड्जस्येव। एवं तदेवानुरणनं कोकिलादिशब्देन जनितेन तन्त्र्यङ्गुलीसंयोगमल्लककोटिघातादिप्रभवेनापि शब्देन जन्यत इति युक्तम्।

ननु कारणभेदाज्जातेन शब्देन कथं तज्जातीयो नुरणनशब्दः क्रियते। भैवं, कारणे नियामादर्शनाद्वा अयःस्फटिकारणिविद्युदादिकारणभेदसंजातो पि ह्यग्निर्धूममेकजातीयं जनयति। वीजकन्दोदितकदलीद्वयादौ वा कारणभेदेष्वप्येककार्यतादष्टा। वश्चिकादौ च। तत्राप्यस्ति सूक्ष्मो भेदः, धूमत्वंतु, तदेवेहाप्स्यतु। लक्ष्यते च वीणास्वरो यं मल्लकस्वरो यमिति, षड्जत्वेनत्वभेदः। अत एवैषां गातणामभिधातशब्दानानुरणनं जनयति। तेन शब्दं सममपि कुर्वाणा अपरिपूर्णा इत्युच्यन्ते। घातशब्दस्यानुरणनशब्देन तीव्रत्वाभ्यधिके तिरिक्तता, साम्ये साम्यं वैपरीत्ये वैपरीत्यम्। यस्य च षष्टिस्थानसमीरणाभिघातप्रभवा अपि शब्दा अनुस्वारस्वरूपं स्वरात्मकं शब्दं जनयेदेवं परिपूर्णोत्कृष्टशारीरकमूत्ततारतम्ये तु निकष्टता। अनेन च कारणभेदोद्घोषेणेतरेतराश्रयमपि प्रत्युक्तम्।

यदि स्वरेषु श्रुतयः सर्वथैवोपकारिण्यः ग्रामयोर्विभागो पि कल्पनीयत्वात् ग्रामयोगितयैव ग्रामोपयोगित्वात्पश्चादभिधानम्। न तु ध्वनिक्रमनिरपेक्ष एव शरीरे प्रयत्नः, प्रगीतस्य परं क्रमो लक्ष्यते, आशुभावितत्वात्। स तु नास्ति, अप्रगीते क्रमस्य संवेदनात् तथा ह्यप्रगीते षड्जं निर्वि.....। एषा जनमधिकं वा....ति। आरोहवरोहेति तावत् स्वरज्ञः शिक्षयति। अभ्यासकालगतं तन्त्र्युत्कर्षापकर्षाणि वादिसंवादिविद्यावत्स्वरजननसमर्थशब्दविशेषोत्पत्ति—स्थानलाभो स्य भवति। (ततः) एवं ''उत्कर्षापकर्षणस्थानभेदेन श्रोत्रगोचराभिलक्षणीयो विशेष उपजायते। तावती श्रुतिरेका परमाण्वनुस्थाने ख्यापितापि तस्या लक्षणीयत्वात् दत्तिलाचार्यो पि ध्वनिशब्देनानुस्थानमेवाभ्यधात्।

''षड्जत्वेन गहीतोयः षड्जग्रामे ध्वनिः'' (१—२२) इति।

श्रुतिनिदर्शनं तु वीणायां स्फुटम्। तदपि षड्जग्राममध्यमग्रामयोः क्रमोपक्रमप चमस्वरेणेत्याशयेन पश्चाच्छ्रुतयो निर्दिष्टाः। तत्र प्रयत्नवशात्कस्मिंश्चिदभिहते स्थाने जाते भिघातजाच्छब्दान्तरे नुस्वानात्मनि स्वरे तदध्यवहितस्थानाभिघातो यदि स्यात्संकीर्ये (या) ताम्। पूर्वापरे स्वरे स्थानगतो यथा तत्र संकीर्णभावस्तथा स्वरगतो पि तद्विभागलाभार्थं मध्ये वर्जनीयस्थानभागो न्यत्र स्वर इति द्विश्रुतिकस्य सम्पत्तिः। स्थानद्वयेन व्यवधौ त्रिश्रुतिकस्य, त्रयेण चतुःश्रुतिकस्य, ततः परं चतुरादिव्यवधाने तिप्रयत्नवशाद्द्वैस्वर्यमिति प चर्श्रुतिकादेरसंभवः। तत एव श्रुतिद्वयोत्कर्षो द्विश्रुतिकयोरेव गन्योरुक्तः। एकश्रुत्युत्कर्षस्तु नोक्तः, स्थानसांकर्येण

स्वरसांकर्यप्रसङ्गादिति ह्युक्तम्। चतुःश्रुतिस्त्रिश्रुतिर्द्विश्रुतिरिति क्रमेणानर्थश्रुतिरेव। ततो पि चतुःश्रुतिस्त्रिश्रुतिरिति षड्जप्रधानत्वात् षड्जग्रामः सरिगमपधनि, मपधन्यादिमध्यमग्रामः। चतुश्रुतिस्त्रिश्रुतिर्द्विश्रुतिरिति। तथाहि– एकस्मिन्नेवोरसि ऊर्ध्वाधरतया सप्तस्वराः, तथा हि चतुःश्रुतिकात्पूर्णादाद्यात्, तद्रुतरूपादेकैकं निष्कास प्रक्रमेण पुनश्च प्रकृतिभूतपूर्वरूपस्पर्शेश्चत्वारः सरिगमाः। तथैव स्थाने ऊर्ध्वस्पर्शे पधनिसाः, केवलं षड्जनेन द्वितीयं स्थानं स्पश्यत एव। मन्द्रस्पर्शवतः स्थानं स्वराणाम्। एवं कण्ठस्थाने शिरसि च। तेषु सर्वथा तादूप्यसंक्रमणत्त्वंशादिव्यपदेश एव, तत्स्थानगतानां तु सादश्यपरत एव संवादत्वं वक्ष्यते। तेन परमार्थतः त्रय एव स्वराःसरिगाः, पधनयः। मध्यमस्तु ध्रुवकस्थानीयो मध्यमत्वादेव। चतुःश्रुतिरुदात्तः उच्चत्वात्। द्विश्रुतिरनुदात्तः, नीचैस्त्वात्। त्रिश्रुतिः स्वरितः मध्यवर्तितया समाहारत्वात्। तथा हि– स्वरित एव कम्पितत्वं व्यवहरन्ति श्रोत्रियाः। इहाप्यलङ्कारेषु त्रिश्रुतेः कम्पनं वक्ष्यते। तस्योर्ध्वाधः स्वरस्य स्पर्शने पि स्वरताक्षमत्वाच्चतुःश्रुतेर्हि नोर्ध्वमस्ति, द्विःश्रुतेर्नाधरमिति कं पथं कम्पः।।**२१**।।

अथ सार्वप्रयोगसाधारणं स्वराणां योजनां ज्ञातुं चातुर्विध्यं दर्शयितुमुपक्रमते चतुर्विधत्वमेतेषामित्यादि। एवकारेण वा न्यायतोदितस्य स्थितिप्रयोग इत्याह। चशब्देन संवादिनस्तत्स्पष्टे संभवमाह। **एव**शब्देन संवादिनो हि नियतः संभवः। **अथ**शब्दे नानन्तर्यद्योतकेन संवादिनो वादिनश्चानुपलपनम्। **विवादी चे**ति चकारेण विवादिनं प्रत्यवज्ञा, **अनुवांद्यपी**त्यापिशब्देनानुवादिनः संवादिधर्मोपजीवनम्। अत एवास्य सर्वाश्चादुपादनम् तथाहि– अनुवादिवादिसंवाद्यनुपलपनं सहते, न च भूयस्तरो स्य प्रयोग इति।।**२२**।।

ननु प्रयोगात्मरागा धर्मा ग्रहादयश्च अल्पत्वादयः,.....अन्ते तद्गहप्रसङ्ग भेदो पि वक्तव्यः। स्यादेतत्। ग्रहन्यासापन्यासास्तावद्वादिनैव प्रायेणगहीताः। तद्गहाद**न्यास्सन्यासापन्यासाः** इति हि शुद्धासु वक्ष्यामः। षाडवौडुवितात्पत्वानिविवा (द्यनुवादिभिन्ना) नि, बहुत्वं संवादिना, तारमन्द्रस्य न्यासापेक्ष इति। इदं चासत्। शुद्धासु जातिषु भवेदेवं, अन्यत्र तदभावात्कथमनेन संग्रहः। अनुवादी सर्वत्रावधिरित्यवश्यं वक्तव्यः। तर्हिग्रहः सुतरां वाच्यः, तेन विना हि न को पि (रागव्यापा)रः प्रवर्तते। उच्यते– उत्तमे तत्साधारणयोजनोपयोगीदमुच्यते। एतावतैव च जातिवर्गे भाषाद्युन्मीलनं भवति ग्रहापन्यासादि वैचित्र्यमन्तरेणापि। तथा हि कुत्रचित्स्वरे भूयस्तूच्चार्यमाणे संवादिनि च तदनुवर्तिनि च तदनुचयना (वदन?) शालिनि चानुवादिनि च किंचित्प्रयोगभाजि विवादिनि कृतस्वरूपमासीदेति रागस्याभिव्यक्तिः। यथा ''साधपा पसपा सनिरिपा सनिसास माससं पापासा धानिनिरीनिनीसारि'' इत्यत्र षड्जवादिनि (गान्धार) निषादयोः संवादिनि, मध्यमादावनुवादिनि, अभिव्यक्तो मालवकैशिकः। एतदेव हि (प्रयोग) सर्वस्वम्, ग्रहादियोजनं तु वैशिष्ट्यावहं, गान्धर्वे तु विशिष्टादष्टसिद्धये। एतच्च वक्ष्यामः।

तत्र वादिनं लक्षयति **यो यदांशस्तदा वादीति। यदे**ति यत्र प्रयोगात्मनि काले वदते स एव स्फुटत्वेन भासमानः शब्दा.....वादिनं बाहुल्येनोच्चारणमस्यास्तीति च वदति च तारमन्द्रादिव्यवस्थादीनिति च लक्षणं त्वत्रैव सूचितम्। **अन्ये**त्वंश इति पर्यायमाहुः। अपरे मत्सिद्धये ''यो यदांशं स्पशती'' ति पठन्ति। तच्चासत्। –अंश एव हि वादीति **दत्तिलाद्याः** (१–१८)। न चांशलक्षणं पथगुपयोगीति तत्रैव वक्ष्यते। अ.....भवाप्रधानान्निर्देशः।

संवादिलक्षणमाह **नवकत्रयोदशकमन्तर**मिति। एतच्च स्वराभिधानम्। अन्येत्वाहुः– प्रल्पा (ष्टौ) नवेति नवका अष्टका उच्यन्ते। स एष त्रयोदशका द्वादश। एतावत्यः श्रुतय (स्तयो) रन्तरं ययोस्तौ **संवादिना**विति। उपाध्यायास्त्वाहुः– **अन्तर**मिति स्वरूपं नान्तरालं तेन नवश्रुतिकं यस्य स्वरूपं स्वरस्य, यस्य च त्रयोदशश्रुतिकत्वं स्वरूपं, तौ स्वरौ परस्परसंवादिनौ। सव...यथा द्वाविंशतिः षड्जो नन्तरश्रुतित्रयेणान्तरश्रुत्या तथेहोच्यते। एवं नवश्रुतिस्त्रयोदशश्रुतिश्च।

नन्वेवं चतुश्रुतेरधिको प्यस्ति। किं बहुना, षड्जान्निषादः प्रयुज्यमानो ष्टादशश्रुतिकः स्यात्। मैवं, तावतीनां श्रुतिलाभे.....तत्स्पर्शिपवनाभिहननजनितनादांशोपयोगः। ततः स्वरे तत्कृतश्च श्रुतिसंख्यानियमः। अत एव निरन्तरध्वन्यंशश्रवणै विरूपस्वरश्रवणम्। तत एव तिस्रः श्रुतयः ऋषभ इत्यादि वक्ष्यते, न तु ततीया श्रुतिरिति। तत्र **विशाखिलाचार्य**प्रभतिभिः, 'स्वसंवेद्ये परमे श्रुतिधाम्नि समवधानं जपवद्दीयमानं विशिष्टादष्टाय प्रयोक्तुर्भवति'' इति दर्शितम्। तदुक्तं भट्टतोतेन ''श्रुतिः स्वरः स्वसंवेद्या'' इति, गाने श्रोतणां सर्वत्रापि स्वरूपावभासः। तदाह ''श्रूयमाणास्तु गह्यन्ते गम्भीरा इव'' इति। न चावयवैः स्वरः, नापि संचयः यौगपद्याभावात्। क्रमिकत्वेपि हि नैरन्तर्यात्, नाशुभविकृताद्यौगपद्याभिमानः, क्रमिकश्रुतिजनितसंस्कारविशेषे चान्ये श्रुतिस्थाने स्वरसमुदाय इत्यास्तां तावत्। प्रकृतं ब्रूमः।

इहोल्लङ्घनीयस्वीकरणीयश्रुत्यपेक्षया नवत्रयोदशश्रुति च स्वररूपमुक्तम्। अन्योन्यस्येति वचनं तावद्यस्य संवादिनौ मा भूतामिति समानश्रुतिकत्वेन संवदनात्संवादिनौ। वीणायां च षड्जादिस्थाने ङ्गुल्यन्तरपीडनपूर्वकमभिहन्यमाने तत्सम्पाद्यमिति व्यवहारः, संवादिनः तत एव न जातुचिल्लोपः कार्यः। अन्वर्थसंज्ञा (याः सवरयोरेव न श्रुत्योः परस्परसंवादित्वं) यथा मध्यमनिषादयोर्न संवादित्वं सत्यपि त्रयोदशनवान्तरत्वे अत एव षड्जमध्यमायां (जातौ) मध्यमें शे न षाडवस्य निषादलोपकृनस्यापवादः। मध्यमग्रामे च न ऋषभधैवतयोः, तेन कैशिक्यां धैवतें शे ऋषभकृतस्य न षाडवस्यापवादः। ननु च संज्ञात एव लब्धिरूपेति लक्षणेन, मैवं, एवं हि षड्ज (मध्यम) ग्रामयोरन्यत्र समयोः संवादिता स्यात्, सधयोश्च, साधारणप्रयोगे च निसयोः, गमयोरित्यपि न दोषः। तस्मादुभयसंवादित्वे प्रयोजकम्। अमुमेवाभिप्रायं प्रकाशयितुं स्वकण्ठेनोदाहरणोपन्यासं करोति यथेत्यादि। सम, सप, ऋध, गनि, षड्जग्रामे। अन्यत्र तु ऋधप इत्यपास्य ऋष ननु परिगणनं चेत्किम्। यथेति वचनस्य सिद्धिसादश्येनोदाहरणान्तरसङ्ग्रहाय स्यात्। स चेह नास्ति। तत्राहुः–

उभयमनेन क्रियते, येन प्रकारेणायं संवादिक्रमो न लुप्यते स यत्नो गान्धर्वे कर्तव्यः। तेन काकल्यन्तरप्रयोगे पि षड्जादीनां न श्रुत्यपहारः कार्यः। अत एवाल्पत्वम्। यत्र निगयोस्तत्र साधारणप्रयोगः, षड्जमध्यमान्तर्गमनमिव हि तयोः, तदा गाने तु साधारणवशात् संचारः श्रुतानां कैश्चिदेव चेत्संवाद्यस्ति ततः संवाद्यनुपलपनमंशेन स्वधर्मोपलब्ध इति संवाद्यन्तरं लुप्यतां नाम। तथा च षड्जादिव्यपदेशः, षड्जे प्यंशे प चमलोपकृतमौडुविकं भजत एव। तस्मान्न षड्जमध्यमौ.....सामिति बिन्दुप्रयोगे च समं वदनं निषादतन्त्र्यामस्यास्तीति तयोनपि (वि)संवादित्वमेवेति। यथेत्युदाहरणप्रदर्शनार्थमङ्गे तु परिगणनमिति। एतदेव युक्तमित्यभियुक्ताः। श्रुतिसंचरणवशाल्लब्धे पि चित्रसंवादो दश्यते, यतः.....।।**२३**।।

अथ विवादिनो लक्षयति **विवादिनस्तु त** इति। अन्तर्हितस्वरूपतो गनिद्विश्रुति श्रुतिरूपं तेन द्विःश्रुति (: गान्धा)रो निषादश्च स्वरान्तराणां विवादिनौ सर्वेषामेव तथा बहुवचनम्। स्वरान्तराण्यपेक्ष्य विवादित्वाभिधानं धर्मभेदात्। **ऋषभगान्धारौ धैवतनिषादाविति** चतुर्विधयोरुपादानं नैकट्यात्। अन्ये तूदाहरणत्वलाभाद्यथापेक्षयैव श्रुत्योर्विवादित्वमाहुः। तच्चासत्। सर्वस्वरस्य विवादिनः सतो भाव्यं सपक्षविपक्षमध्यस्थैः। तथापि षड्जें शे तस्य मपौ संवादिनौ, ऋधावनुवादिनौ, ऋषभे धमनिगाः पमसाः गान्धारे निः(वादी)त्येतु, नास्ति विवादी, निषादस्य संवादित्वात्, प चास्यानुवादिनः। एवमन्यदनुसर्तव्यम्।

यत्र वादी स्वामी, अमात्य इवेतरो नुयायी संवादी, अरिवद्विवादीत्वल्पः, अनुसारिपरिजन इव योगवादी चेति विभागः। अनुवादिनं लक्षयति **वादिसंवादी**त्यादि। स्पष्टम्। अथैषां नामभिर्वचसां निर्वचनान्याह **वदनाद्वादी**त्यादि।

ननु वीणायां तावत्सरिधेति श्रतिक्रवविरामाच्च संवाद्यादिविभागस्य च वीणायामनितो पि दश्यत इत्याशङ्क्याह– **एतेषामि**त्यादि। एतच्च संवाद्यादीनां स्वराणामिति। यथा संवादित्वाभिमतयोरपि षड्जमध्यमयोः समत्वमधिकत्वं वा त्रयोदशकनवकान्तरापेक्षया विवादिनश्च यदुपयोगिन्यन्तरं तदपेक्षयैव विवादकत्वं, अनुवादित्वमपि ऊनाधिकत्वे पि घटते। तथा हि ऋषभे शे न्यूनश्रुतिः षड्स्यानुवादी स्यात्। गान्धारश्चाधिकश्रुतिर्विवादितां जह्यात्। संवाद्यादीनां च षड्जमूलत्वे वादित्वमप्यसम जसं भवेत्। संवाद्यादिषु प्रभुत्वमेव हि वादित्वम्। एममूनाधिकत्वे नामुना विघटितं चे.....तत्कारणदोषे कृशा तन्त्रीस्वरितभरिताप्युत्कर्षमपकर्ष वा याति, आर्द्रत्वशोषत्वादिदोषात् उपवादतन्त्रौबन्धनस्थानं तदपि शिथिलतादिदोषाणां सारणानामतः? दण्डो पि नमनोन्नमनस्वभावः तथैवेन्द्रियं वागिन्द्रियं च तादशमेव तच्चोपलक्षणं सारिकाङ्गुल्यादीनामपि दोषेण तथोपलभ्यात्।

एवं स्वरा उक्ताः। तत्र स्वरमात्रं कुत्रचिद् दष्टादष्टयोरुपयोग्यपि तु तत्समूह एव तु प्रयो(ग उपयोगी। तत्स्वराणां समूहो ग्राम) इत्युच्यते। स एव च द्विविधः प चमभेदादिति दर्शयितुमाह– **अथ द्वौ ग्रामा**विति गान्धारग्रामं निरस्यति। मध्यमस्यनाशित्वमिति तावत् प्रधानं नियतं च, तत्संवादित्वं षड्जस्येति सो पि प्रधानः। प चमस्तु न मध्यमस्य संवादी

कदाचित्तुल्यश्रुतिकत्वा.....क्तमेव। **दत्तिलाचार्य**स्तु मूर्च्छनानां षड्जस्वरप्राधान्येन च प्रथमादिव्यपदेशलाभात् षड्जमध्यमयोर्व्यपदेशहेतुत्वमाह–

स्वरौ यावतिथौ स्यातां ग्रामयोः षड्जमध्यमौ।
मूर्च्छना तावतिथ्येव तद्ग्रामावत एव तौ।। इति

एतत्तु फल्गुप्रायं प्रथमादिव्यपदेशस्य कुत्रचिदप्यनुपयोगादागममात्रसारत्वात्प्राधान्यम्, गणनादित्वाच्च प्राधान्यदितरेतराश्रयापत्तेः।

अत्राश्रिता इति ग्रामस्वरूपलाभहेतव इत्यर्थः।

ननु स्थानभेदेन षट्षष्टिः तत्कथं द्वाविंशतिरित्याह– **स्वरमण्डलस्य** स्वरसमूहस्य सप्तकस्य द्वाविंशत्येव सिद्धिः। तत एव स्थानान्तरे स्वरमण्डलत्वमिति चक्रमुच्यते। तच्च परिमण्डलं **(आ)ङ्गिरसकाश्यपादि**भिर्मुनिभिदर्शितम्। श्रुतिश्च नाम श्रोत्रगम्यं वैलक्षण्यं यावता शब्देनोत्पद्यते। ननु कालांशः श्रुतिः चतुःश्रुतिकस्यापि बिन्द्वाद्यलङ्कारादौ मितकालावस्थानाद् द्विश्रुतिकस्यापि स्थायिवर्णप्रयोगे नल्पकालत्वादेशः स्यात्, घण्टाशङ्खादि श्रुतेश्च चिरकालत्वात्। एतन्न शब्दावयवो न श्रुतिरित्युक्तमेव।

ननु यद्युभयत्रापि द्वाविंशतिः श्रुतयः तर्हि को विभाग इत्याशङ्क्याह– **तिस्रो द्वे** चेत्यादि। **विधि**रिति श्रुतिविभागः इत्यर्थः।।**२४**।।

अत्र विनियोगेन स्वरान्विनियोक्तुमाह– **चतुःश्रुतिः स्यात् षड्ज** इत्यादि **स्मत** इत्यन्तेन।।**२५**।।

नामधेयानां विभाग आप्तप्रसिद्ध्येति दर्शयति। **धैवतो मत** इति नास्य कदाचन षड्जग्रामे लोप इति यावत्।

तत्र गान्धर्वे श्रुतावेवान्त्ययां स्वरस्फुटतां दायिन्यामवधातव्य इति **विशाखिलाचार्य**प्रभतय ऊचुः। ''श्रुतयः स्वरान्तरगता'' इति, ''सप्ताश्रयतया स्वगता'' इति, ''अन्तरगतास्त्वन्या'' इति गाने तु श्रोत्रसुखावहो नेन विभागेन प्रयोजनम्। तदाह **मातगुप्तः**–

हीयमाने स्वरे श्रोतुः स्वसंवेद्यो णुशः क्रमः।
श्रूयमाणः पुनर्नाद एक एवाद्य रञ्जितः।। इति।।

तेन गाने प्रधानतयेह विवक्षिते चतुश्श्रुतिरिति साधारण्युक्तिः कृतायां तु गान्धर्वपक्षमपि स्वीकुर्वते। तिस्रश्चतस्रः श्रुतयः आश्रयान्तराद्वोभयात्मकतया यस्येति।।**२६**।।

अथ मध्यमग्राममाह– **मध्यमग्रामेत्वि**ति। चतुश्श्रुतौ प चमे षड्जस्यैव द्वावमात्यकल्पौ मध्यमप चमौ संवादिनौ भवत इति। मध्यमस्यापि संवादिनो पि संविदिव व्यपदेशहेतुता। प चमे तु श्रुतिन्यूने मध्यमस्याप्येकः संवादी षड्जस्यामिति तत्र नैव व्यपदेशो मध्यमग्राम नियमेन इति न किं चतुश्श्रुतिकेनानेकेन तावत् प्रधानेन भवितव्यम्। पूर्णत्वात् तच्च स्वरद्वयमेव प चमस्य चतुश्श्रुतिकत्वविरमाद्वावेवग्रामौ। तत्र मध्यमा ततीयस्यामपि श्रुतौ तथाविधानुरणनव्य जनात्मकनादनिष्पत्तिः यथाविध षड्जग्रामे चतुर्थ्यां माभूत्।

केवलसंस्थाननीचत्वान्नीचा। तल्लक्ष्यते। तत एव श्रुत्यपमान एवासौ प चमो भवति। श्रुतेर्हि कम्पो भवतीत्युक्तम्। तथा चाहुः–

वेदश्रुतिः पक्कपित्थकल्पः कृशप्रवातोन्मुखतां प्रपन्नः।
यतिश्रुतिः कम्प इवैष भाति यद्वा श्रुतिः स्वाद्भुतरागनिष्ठः।।२।।

तत एवाल्पनिषादगान्धार.....ति.....काकल्यन्तरयोः प्रयोगः। त्रिश्रुतेश्च कम्पितकुहरितरेचितयोगः। निगयोश्च विवादित्वं रक्त्यन्तरानुवत्तेः। एवं श्रुत्यप्रकृष्टः प चम इति मध्यमग्रामस्य लक्षणम्। स च प चमः प्रधानः न तु मध्यमग्रामे कदाचिदपि लोप्यत इत्यर्थः। अन्ये तु ग्रामयोर्धैवतप चमावलोप्याविति। एतदाश्रयत्वान्मध्यमगतेरित्यत्राह।

अथ केयं श्रुतिर्नामेत्याशङ्क्याह– **एवं श्रुत्युत्कर्षापकर्षाच्चेति**। मार्दवं तन्त्र्याः शिथिलीकरणं विपरीतत्वमायतत्वं क्रियत इत्याह। श्रुतेः शब्दस्य श्रोत्रग्राह्यस्य उत्कीर्षस्तीव्रता अपकर्षो मन्दता, तद्धेतुत्वान्मार्दवायते तु द्वे अपि तथोक्ते। एवं तीव्रमन्दत्वहेतुभ्यां मार्दवायतत्वाभ्यां यदन्तरं यो विशेषावबोधः प्रमाणं निश्चायकं यस्याः सा श्रुतिः। प्राक्तनस्य ध्वनेर्वैलक्षण्य यावता हीनेनाधिकेन या तीव्रमन्दात्मना रूपेण लक्ष्यते सा श्रुतिरिति यावत्। यद्यपि परमाणुतो प्युत्कर्षापकर्षो वा भवेद् ध्वनेर्विशेषस्तथापि नासौ गहीतुं पार्यते। अत एव यत्रोत्कर्षापकर्षो न कौचिद् ध्वनीनां ग्राह्येते तत्रैका श्रुतिरिति, यदाह **परमाचार्यः** ''एकश्रुतिदूरात्सम्बुद्धौ'' इति।

नन्वताबूवीणादौ तथाभूतानां श्रुतीनां विशेषलेशानामनैयत्यं दश्यते। ततः किं नियतश्रुतिविभाग उक्तः। न तु वीणायामसौ निश्चीयते (इति)। तन्न, तत्राप्यसौ नियत एव, अनैयत्यग्रहणं तु मिथ्या। यत्तु दण्डविभागस्य दूरादूरत्वविभागविप्लव इति चेयं नैयत्यालक्ष्यते, तत्रापि वामनो नन्तपुरुषविभागविशेषोपलक्षणलक्षणीया श्रुति.....नैवास्तु को विरोधः अतएव लक्षणीयस्यैव विशेषस्य श्रुतिरूपतामिति ग्रहणं विशेषणमुपात्तमुत्कर्षशब्देन, प्रकरणाच्चापकर्षस्यापि लभ्यत इति। वीणाद्वये स्थिते एकस्यां वीणायां तन्त्र्यामुत्कृष्टायां स्वरस्योत्कर्ष (र्षो) परस्याः स्थितवीणातन्त्रीस्वरस्यापकर्षो लक्ष्यते। तस्मिंश्च लक्ष्यमाणे पकर्षे द्वितीयवीणास्वरस्योत्कर्षो लक्षणीयो भवति। आयतत्वादुत्कर्षापकर्षो लक्ष्यौ भवतः। एवं मार्दवादपि वीणाद्वयायत्तमेवेदमुत्कर्षापकर्षत्वं दर्शयितुं यथासङ्ख्यं शङ्कां निराकर्तुं मार्दवायतत्वाद्वेत्युक्तम्। अन्यथोत्कर्षायतत्वमार्दवाभ्यामिति ब्रूयात्। **प्रमाणेति** वदन्न न कालकला श्रुतिर्नापि नादांशो न चायुर्न स्थानं न करणमिति दर्शयति। तेन वक्ष्यमाणोच्चनीचविभागो ध्वनिरेका श्रुतिरिति तात्पर्यम्। एवमेकस्याः श्रुतेः स्वरूपमभिधाय श्रुतिसंख्यास्वरूपं यथालक्षणीयं यथा भवति तथा दर्शयितुमुपक्रमते **निदर्शनं त्वासा**मिति। आसामिति बह्वीनां, **निदर्शनमिति** निश्चततया दश्यन्ते येनोपायेन तन्निदर्शनम्। यथा हि– प्रथमदर्शनेन रक्तयोर्जात्याजात्ययोरेव चोत्कर्षापकर्षवतोर्विशेषो गहीत एव। किं तु परस्परविशेषदिदक्षावधानप्रयत्नबलात्तद्विलोक्य द्वितीयस्य विलोकनं पुनः प्रथमस्य पुनर्द्वितीयस्येत्येनानुसन्धानबलेन निश्चितस्तद्विशेषप्रत्ययो जायते यो सावभ्यधिक इति

भण्यते। प्रकृते पि तन्त्रीद्वये उत्कर्षापकर्षवति (कस्मिंश्)चिदाकृते यः शब्दः प्रतीयते, तस्य परस्परविवेकायावधारयिष्णोर्दोलागमनवद्यत्पुनः पुनराकर्षणं तत्कृतो नुसन्धानबलेन.....परमः प्रत्ययः स्फुटं तद्गतविशेषग्राही जायेत। तन्निदर्शनमित्युक्तम्। तत्र प्रथमा (सारणा) साधुकारं ध्रुवकवीणां साधयति, द्वितीया श्रुतेरियत्तां, ततीया श्रुतिचतुष्कं बोधयति, चतुर्थीं श्रुतिषट्कं, प चमी द्वादशकमिति सारणप चकमिति तात्पर्यम्। ग्रन्थस्तु व्याख्यायते। प्रमाणं आनाहपरिणाहौ, तन्त्रीणां तुल्यत्वं सङ्ख्यया स्थौल्यादिना चेति केचित्। अतश्चतुर्दण्डशब्दः पुनरुक्तः। तस्मादयं विग्रहः। तुल्यप्रमाणतन्त्र्युपपादनदण्डमूर्च्छना ययोर्वीणयोरिति। मूर्च्छनायां च प्रमाणसङ्ख्यैव मन्तव्या दण्डतन्व्यादिसाम्यं स्वरस्वरूपं न भिनत्ति केनाप्यंशेन तेन तथा कर्तव्यम्, येन द्वये पि एकविंशद्भासेते। स्वराणां कस्यचिदपि वैलक्षण्यं यस्य प्रतिभासनात्तत्रैका ध्रुवकस्यानीया अचलसारणा वीणायामपरस्यां प चमतन्त्री श्रुतिमात्रं शिथिलीकार्या। तदा मध्यमग्रामो जायते। अनन्तरं मध्यमादीनां सर्वस्वराणां श्रुतिमेकां पातयेत्, येन षड्ग्राम एव भवति। एवं ध्रुवकवीणायां चलवीणायां वा स्वरेषु भण्यमानेषु श्रुतिरधिका न्यूना च प्रत्यक्षेणानुसन्धानबलाल्लक्षणीया भवति। तदाह प चमश्रुतिरपकृष्टा भवति सर्वस्वरेभ्य इति शेषः। सा च प्रत्यक्षगम्या गुणवतीतिभावः। यद्यपि परमाणुमात्रे पि स्थानान्तरे योगिप्राय (समाधि) समाधिगम्य ध्वनिवैलक्षण्यं भवति, तथापि यद्वैलक्षण्यं श्रुतिशब्दवाच्यमिति दर्शयन् श्रुतिसङ्ख्यापरिज्ञानार्थं श्रुतिचतुष्टयोपलब्धं दर्शयति। पुनरपि च तद्वदेवापकर्षेदिति चलवीणायां प चमोपक्रमं सर्वस्व (राणा)मेकां श्रुतिं पातयेत् येषु चलवीणागतौ गान्धारनिषादौ ध्रुववीणागताभ्यां धैवतर्षभाभ्यां समस्थानतयापकर्षत्वं गच्छतः यतो ध्रुवकवीणायां द्वाभ्यां श्रुतिभ्यां सर्वे स्वरा अधिकाः। एवं धैवतवैलक्ष्येण गान्धारनिषादयोरन्यवीणागतधैवतर्षभसाम्यं जायते। तदेव श्रुतिरित्युक्तं भवति। अत एव श्रुत्यादिकव्यवहारो पि लक्ष्यो यो दश्यते न स निर्मूलः। तथाहि तावन्न्यूनाधिकत्वे.....रे विनाशो भवतीति विशिष्टप्रत्युपयोगाच्छ्रुतिरिति कथ्यते। पूर्वादिषु नैवमिति। एवं श्रुतेश्च स्वरूपं ज्ञातम्। गान्धारनिषादगं प्रत्येकं यच्छ्रुतिद्वयं तच्च धैवतर्षभमिश्रीभावाभिज्ञानेन स्फुटमेवोपलब्धमिति तच्छ्रुतयः प्रत्यक्षीभूता भवन्ति। पुनरपि चलवीणायां श्रुतिर्यदापकृष्यते सर्वस्वरेभ्यस्तदा च वीणागतौ धैवतर्षभौ ध्रुववीणागताभ्यां प चमषड्जाभ्यां यथाक्रमं साम्यं गच्छतः। यतो ध्रुववीणायां स्वरास्तिस्रः श्रुतिभिरधिकाः। एवं स्वरद्वये प्रत्येकं श्रुतित्रयं स्फुटीकृतमिति षट् श्रुतय उपलब्धाः। त्रयो ध्रुववीणायां सर्वस्वरेभ्यः श्रुतिमवकर्षणेन तद्गताः प चममध्यमषड्जा ध्रुववीणागतैर्यथाक्रमं मध्यमगान्धारनिषादैः स्थानसाम्यं मिलन्ति। यतस्तस्या वीणायाः सर्वे स्वराश्चतसभिः श्रुतिभिरधिकाः। एवं स्वरत्रये प्रत्येकं चतस्रः श्रुतयः स्फुटीकृता इति द्वादश श्रुतय उपलब्धा भवन्ति। तेन चतस्रः षट् द्वादशेति द्वाविंशतेः उपलभ्यो जातः। ऋषभ (धैवता)भ्यां च गनी द्विश्रुत्यधिकाविति श्रुतिद्वयपातने वश्यं तयोस्त (त्र) प्रवेशः। रिधौ च सपाभ्यां द्विश्रुत्यधिकौ, धमपाश्च

निगमेभ्यः चतुश्रुत्यधिका इति तावतीकानांश्रुतीनां.....परिवर्तिनि स्वरे प्रवेशयेत्। स तु द्विश्रुत्यधिकत्वादित्यादयस्त्रयो हेतवः प्रवेशनीय स्वरविशेषादपि व्याख्यात एव। तदाह– **एनमेतेन श्रुतिनिदर्शनेने**ति। त.....स्यादित्येव द्विश्रुतिः। एवं श्रुतेः स्वरूपमुपलब्धम्। अत्र द्वे द्वयोरिति ताः श्रुतिषु त्रिषु। एवं ध्रुववीणाश्रुतेरियत्तात्र (स्फुटीकृता) भवति। द्विश्रुतिभिस्त्रिश्रुतिचतुश्रुतिस्वरस्वरूपं च श्रुतेरियत्ता (निर्धारणा) स्फुटीकरणार्थं प्रस्तारादेव दश्यते। तत्र दण्डप्रस्तारेण केचिद्दर्शयन्ति द्वाविंशता रेखाणाम्। अन्ये तु मण्डलप्रस्तारमाहुः। तिर्यगूर्ध्व च प चषड्रेखा इत्येकादशोभयतो द्वाविंशतिः।

एवं ग्रामद्वयं तदुपयोगि च श्रुति सद्भावे स्वराणां श्रुतिनियमप्रामाण्यमभिधाय क्रमप्राप्तां मूर्च्छनामाह– **अथेति सम्यगि**ति क्रमानतिक्रमेणोर्ध्वं यच्छ्रूयमाणमवरोहणं तदुपलक्षितस्वरसप्तकस्वरूपवहो मूर्च्छना। मूर्च्छना हि समुच्छ्राये पठ्यते। अत एवोपसंहारे स्वराः क्रमयुक्ता इति विशेषयिष्यति। अक्रमत्वे मूर्च्छनात्वं मा भूदिति। तथा हि षड्जादारोहणं निषादान्तं, धैवतात्प चमान्तं, प चमान्मध्यमान्तं मध्यमाद्गान्धारान्तं, गान्धारादषभान्तमषभात् षड्जान्तं, षड्जश्च द्वितीयसप्तकान्तर तारस्पष्टो भवति।

नन्वेवं सप्त मूर्च्छनाः, सत्यम्, प चमस्य श्रुत्युपकर्षे सप्ताद्याः, तदाह **द्वैग्रामिक्य** इति। प चमे चापकृष्टे संवाद्यनुवादिव्यवस्था लोप्या लोप्या स्वरव्यवस्था चान्यैव सम्पाद्यत इति भूयानेव भेदो जायते। तत्र मध्यमाद्गान्तं, गादषभान्तं, ऋषभात्सान्तं सान्निषादान्तं, निषादाद्धान्तं, धात्पान्तं, पान्नान्तमिति सप्त। तत्र नामनिर्देशो वैदिककर्माङ्गमिति दर्शितम्। तथा हि श्रूयते, ''उत्तरमन्द्रया स्वत्वं संहृतास्तिस्रो गाधा गायेत्'' ताः पत्यो वां पाटालिकाभिरुपगायन्ति'' इत्यादित इति। षड्जग्राम इति।।२७-२८।।

मध्यमग्रामे सप्त। तत्र प्रत्येकं मूर्छनायाश्चत्वारो भेदाः। षड्जादिपूर्णाः सप्त स्वराः, षट् स्वराः षाडवः, षट् अवन्ति ये प्रयोगं ते स्वराः षाडवाः। तेषु भवः प्रयोगः षाडवः। तत्प्रयोगात् प चस्वरा आडुविकाः, उडवो नक्षत्राणि, वान्ति गच्छन्त्यस्मिन्निति उडुवमाकाशं, तेन प चसंख्या, तैः सप्त लक्ष्यन्ते। प चमं महाभूतं हि तत्र सा संख्या स जाता। येषां कृते ओडुविताः स्वराः, तेषु भवत्प्रयोगः औडुवितः। तद्योगान्मूर्च्छना तथा। यदि वा तन्नवकस्येयं संख्या औडुवी सा येषां संजाता मध्यस्थीयः प चम आकाश उडुव इत्यपि प्रयुज्यते, तथा च प्रयोक्ष्यते। कदाचिच्चौडुवे एता इति स्वरलोपे चैकदेशविवतत्वे प्यनन्यतया भासना सैवासो मूर्च्छना। अल्पनिषादगान्धारप्रयोगे तु काकल्यन्तरस्वरयोगात्साधारणकृत एत वै कारिकाद्वयेन संग्रहीतुमाह–

क्रमयुक्ताः स्वराः सप्त मूर्छनेति समाहिताः।
षट्प चस्वरकास्तानः षाडवाडुविकाश्रयाः।। इत्यादि

सप्तेति पूर्णा इत्यर्थः। **क्रमयुक्ता** इति क्रमेणारोहणं तथैव स्वराणामवरोहणेन च पुनरप्याहरणमिति क्रमः। तेन युक्ताः सम्यगाहिताः। तन्यते विचित्रीक्रियते प्रयोगविस्तरो यैस्ते **ताना** इति। मूर्छतिता? परिविशिष्टं नामैवं भेदत्रयं संगह्य तुरीयभेदमाह–

साधारणकृताश्चेति। एवकारेण विकृतत्वे प्यनन्ततामाह। चकार उत्तरत्र संबध्यते। तल्लक्षयति **काकलासमलंकृता। अन्तरस्वरसंयुक्ता** इति चकार एतदनन्तरं द्रष्टव्यः। उपसंहरति **मूर्च्छना ग्रामयोरिति।।३३।।**

अत्र वैणिकस्योपदेशार्थमाह– द्विविधैकमूर्च्छनायाः षड्जग्रामिक्या द्विविधाया मध्यमग्रामिक्यो द्वितीयेन प्रकारेण युक्ताया यथासिद्धिर्भवति तथोच्यते। विविधेनोत्कर्षेणापकर्षेण भाजा एकस्वरेण मूर्च्छनानां विचित्राणां सिद्धिः। तत्र षड्ग्रामे मूर्च्छना यावतिथी जाता तावतिथ्यैव मध्यमग्राममूर्च्छना यथा संपद्यते तथा दर्शयति तत् षड्जग्रामे पि श्रुत्युत्कर्षाद्धैवतीगान्धार इति गान्धारतन्त्र्यां द्विश्श्रुत्युत्कर्षपर्यन्तश्चेत्पीडनम्। अतस्तदेतदेव सर्वं संपन्नम्। स हि तदा चतुःश्रुतिको मध्यमग्रामिको धैवतो भवति। पमधनिस सराणि? समगस्वराः सम्पद्यन्ते। मध्यमो द्विश्श्रुतिको जातश्चेन्निषादो सौ प चम एव ऋषभस्त्रिश्रुतिकत्वात्। गान्धारे संपन्नः स ऋषभः। सस्वरा? मपसनिसरिसरूपत्वं याति? अत्र हेतुमाह– **तुल्यश्रुत्यन्तर**त्वादिति। **संज्ञान्यत्वमि**त्यनेन प्रयत्नान्तरमत्र न किंचिदितिदर्शयति। संज्ञान्तर स्वरे ग्रामे मूर्च्छनायाश्च तुल्यश्रुत्यन्तरत्वं स्पष्टयति **अन्तरनिदर्शनमपीति।। अपि** शब्दाद्वक्तव्यमपि सदित्यर्थः। **श्रुतिनिदर्शन**मिति। द्वे वीणे इत्यत्रैव मूर्च्छनानां पूर्णावस्थोक्ता।। तानावस्थामाह–

तत्र मूर्च्छिताश्रिता इति। मूर्च्छनामाश्रिता यस्तासामेव ते वस्थाविशेषाः। तत्र सरिनिप इत्थेषामन्यतमेन हीनाः षट् (स्वर) मूर्च्छनाः सप्त चतुर्भिगुणत्वे अष्टाविंशतिस्तानाः। सरिगइत्येतेषामन्यतमेन हीना मध्यमूर्च्छना एकविंशतिस्ताना इत्येकान्नप चाशत् षाडवाः। औडुविकास्तु षड्ग्रामे एकविंशतिः अन्यत्र तु चतुर्दशेति प चत्रिंशत्। उभयतश्चतुरशीतिः वीणायां यदा तानक्रिया तदालोप्य स्वरतन्त्रीत्वं क्रियते यदि तावत्कौशलं न स्पश्यते यदि वा शिथिलीकरणे समस्वरसाम्यं पीडनेन चोत्तरस्वरसाम्यं नीयते। तदाह द्वि (वि) विधेति तानार्थक्रिया उपाय इत्यर्थः। अपरस्य ऋषभापेक्षया षड्जस्य विप्रकर्षः। पीडनमषभतापादनम्। तस्यैव निषादापेक्षयोत्तरमन्द्राया निषादतापादनं तदत्र यो बलवान् प्रयोगे भवति तत्र अवलोप्योन्तर्भावः स हि धष्टतामेवं व्रजेत्।

ननु त्रिषु स्थानेषु सप्तस्वरा इत्युक्तं काकुविधाने। (तत्र कतमं स्वरसप्तकमवलम्ब्य) मूर्च्छना कार्येति ये संशेरते तान्प्रत्याह मध्यमस्वरेण त्विति जातावेकवचनम्, मध्यैरेव स्वैरित्यर्थः। वैणग्रहणं शरीरे अप्रगीतस्यापि स्थानलाभार्थम्। अन्ये तु वीणायां..... प्यसंभवात् बन्वस्यैव च स्वरे संभाव्यमाने दोषे मूर्च्छति नोपयोगीति मन्यमाना वैणवेनेति पठन्ति। **कार्य** इति करणांशो भवतीत्यर्थः। **अनाशितान्मध्यमगते**रिति स्वरसप्तकस्येति विशेषः। **निग्रहो** मन्द्रक्रिया तारक्रिया प(र्यग्रह) इति केचित्तेन मन्द्रतारक्रिये वक्ष्येते। मध्यमापेक्षया शक्यक्रिया नान्यथेत्युक्तं भवति। निश्शेषेण ग्रहः सर्वस्थानप्राप्तिः। परितः समन्तादग्रहः सर्वस्थानानामप्राप्तिः तेन पूर्णशारीरकस्येतरस्य वा मध्यमसप्तलाभस्तदस्तीत्येव मन्ये चतुर्थस्वर एव कण्ठ्यो मध्यमात्रेत्यपरे। अपूर्णस्वरायां

वीणायामवश्यंभावी मध्यमसप्तकः। किं च यदा षड्जलोपेन तानक्रिया षड्जग्रामे कृता तथा कथं मूर्च्छना संख्याज्ञानमित्याशङ्क्याह– **मध्यमस्वरेणे**ति। निग्रहो स्पर्शे पर्यग्रहे वा? प्रवेशे सत्यपि मध्यमस्वरो यतः अविनाशी अतस्तदपेक्षया ज्ञायते। कुतः स्थानात् षड्जे लुप्त इति मध्यद्विचतुर्थेन षड्जेन भवितव्यमिति न तानलाभः। तदाह दत्तिलः–

एवं कृते पि तानत्वे गणयित्वा विनाशिनम्।
विद्वानेतावतिथ्येषा मूर्च्छनेत्यवधारयेत्।। (१–३७)

ननु प्रथमायां सप्तम्यां च मूर्च्छनायां षड्जे लुप्ते रिगमपधनिरूपं भवतीति दुर्ज्ञातो विशेषः। सत्यं, लेख्यभेदो नास्ति। एषु न पुनरस्त्वेव तथा हि– यदि तावत्सरिगमपधनि इति मूर्च्छनानन्तरं निसरिगमपधानीति मूर्च्छना निषादेन पूर्वकेणैव क्रियते, नतु सप्तकानन्तरं गतस्य स्वरस्यानुप्रवेशः। तदात्वे षड्जलोपे प्रथमासप्तम्योर्न भेदः। न च तदा दत्तिलाचार्यकथितं क्रमरूपत्वं निर्वाहकम्। तानत्वापत्तेश्च मूर्च्छनासु भूयसी स्यात्। यदा तु सरिगमपधनीति प्रयुज्य द्वितीयमूर्च्छना षड्जाधरवर्तिना मन्द्रसप्तकगतेन निषादेनारभ्यते निसरिगमपध इति पुनर्निषादाधोवर्तिना धैवतेन, ततस्तदधरेण प चमेण यावदषभेण, तदा मन्द्रसप्तके क्रमेणाक्रम्यमाणे मध्यसप्तके वापचीयमाने मन्द्रगतेषु षड्जर्षभादिषु निषादान्तेषु श्रुतेषु सप्तमी लुप्तमूर्च्छनेति ज्ञायते। मध्यगतेषु तु षट्सु प्रथमं तारसप्तकेन मूर्च्छनायां क्रमेण.....म.....वरोहतः यदाप्येवमेव क्रमः सगरिमपनि इति प्रयुज्य षड्जाधःस्थान एव निषादो धैवतः प चमी मध्यमो गान्धार ऋषभ इति क्रमः। तदा यद्यपि सप्तकान्तरस्पर्शो नास्ति तथा षड्जस्य स्थिरस्थाने तदुपरिगतस्थानादेवर्षभे प्रयुक्ते रिगमपधनीति श्रुते प्रथममूर्च्छना लुप्तषड्जे.....ति सुज्ञातमेव। यदा तु षड्जस्थानमषभेण क्रान्तं तदाधरवर्तिनः षड्जस्य सम्भावनैव नास्ति। रिगमपधनीति श्रुते जानात्येव तारषड्जेनात्र भवितव्यम्। स च न श्रूयत इति सप्तमीयं मूर्च्छना लुप्तषड्जेति। अत्र च पक्षद्वये पि क्रमरूपतासिद्धस्थानप्राप्तिश्च स्फुटैव। निग्रहश्च मध्यमग्रामे प चमस्य श्रुतिहानेः। एवं प चमेन ऋषभ इत्यस्य पर्यग्रहणं, असंवादित्वाद्यस्मिन् स पर्यग्रहः षड्जग्रामस्तत्रोभयत्रापि न मध्यमो विनाशी। मध्यमाद्गतेः प्राप्तिरस्य प चमस्य, तस्य निग्रहे मध्यमग्रामे नाशः। तथा पर्यग्रहे मध्यमग्रामे अनाशः षड्ग्रामे नातिन्यूनो नात्युच्चमध्यमागतिस्त्रिश्रुतिस्तस्माद्विनाशः।

ननु ऋषभस्याप्यनाशित्वं स्यादित्याशङ्क्याह– **निग्रहे** निषादस्य ग्रहणे कर्तव्ये यस्त्रि श्रुतिः स धैवत इति यावत्। तदुक्तं **दत्तिलाचार्येण**–

प चमं मध्यमग्रामे षड्जग्रामे तु धैवतम्।
अनाशिनं विजानीयात्सर्वत्रैव तु मध्यमम्।। (१–२०)

ननु रि इति व्य जनं कथं स्वरस्यानुकारः। ननु सकारादयो पि किंरूपाः। ननु *षभशब्दस्य* नायमाद्यः तर्हि षड्जशब्दस्य सकारो न प्रथम इति। सङ्केतमात्रं हि तत्। रिऋइत्युभयथाप्यदोषः।

अन्ये तु दत्तिलादिमतं मुनेर्नेष्टं, मध्यम एवालोप्योस्य मध्यम इत्याचक्षते। ननु च मूर्च्छनास्तावत् जाज्जतिग्रहभाषान्न प्रयोगोपयोगिन्यः, तानाश्च कुतप हि षड्जमध्यमा षड्ग्रामे जातिः, तस्या षाडवो गान्धारेण। न च षड्जग्राम तानेषु गान्धारो गणितः, सरिनिपानामेव लोप उक्तत्वात्। तानेषु च परिगणितेषु प चमस्य मध्यमग्रामे न्यत्र धैवतस्योभयत्रमस्यालोपित्वं पुनः किमर्थम्? कूटतानाश्च ये प्रदर्शिताः पूर्व प चसहस्राणि त्रयस्त्रिंशच्चेति, तथैतेषां प्रस्तारो नष्टोद्दिष्टे संख्या चेति वितत्याचार्यैः कथिताः। तत्र नष्टोद्दिष्टसंख्यापरिज्ञानयोरवगमे करणमुपदर्शितम्। तस्य च लक्षणं यथा ''अन्त्यस्यैकान्त्याद्भेदसंख्याम्'' इति। शङ्करोक्तकरणास्तु साधारणा इति टीकाकारैर्दर्शिताः।

अथ नष्टोद्दिष्टज्ञानार्थश्लोकाः पूर्वमुद्दिष्टम्।

मूलक्रमान्तस्थानं यत्पूर्वेण तदपेक्षया।
क्रान्तं यावतिथेनैव लोष्टं तावतिथं त्यजेत्।।
अधास्थानं तदङ्कस्थान्मौलैरङ्कैः परिस्थितः।
पुनर्निर्दिष्ट एतस्य पूर्वान्त्या– तथा वदेत्।।
एवमुद्दिष्टतो ज्ञेय संख्या नष्टक्रमः पुनः।
ज्ञायते संख्यया तत्र मौलैकाङ्कोपरिस्थया।।
एककोष्टक एवाधःस्थाने यावतिथस्ततः।
तस्य तावतिथेनैव पूर्वेणाक्रान्तिमादिशेत्।।
अनेककोष्टके त्वर्थे संख्यायाः प्रतिबोधकः।

ते चेह न दर्शिता इति सर्व गर्भीकृत्य मुनिः साधारणं वचनमाह– **प्रयोक्तुः श्रोतसुखार्थं च मूर्च्छनातानानानात्व**मिति। यत्तावदुक्तं मूर्च्छना तानानां कुत्रोपयोग इति तत्रेदमुक्तं मूर्च्छनार्थं न तानरूपं, यदुक्तं प्रयोक्तणां सुखार्थं, यतस्ते श्रोतार आगमार्थविद इत्यर्थः। एतदुक्तं भवति– मूर्च्छनानां यद्यपीहागमे नास्त्युमयोगः, तथापि दष्टसामक्रियायां वा स्फुट एवोपयोगः। तथा हि दर्शितं, ''उत्तरमन्द्रया तिस्रो गाथाः'' इति तानानां, ''अग्निष्टोमीयमाद्यं स्याद् द्वितीयं वाजपेयिकं'' इत्यादिनामनिरूपणद्वारेणैव वायुपुराणादौ यज्ञोपयोगी सामऋग्गाथोपयोगः प्रदर्शितः। अग्निष्टोमिकसामेन शिवं स्तुत्वा तत्फलमिति च प्रयोक्तुरदष्टं श्रूयते। तथा ''सदस्यमग्निष्टोमसाम श्रण्वतः पातकैर्मुच्यते लोकान् जयति'' इति,

दक्षप्रोक्तं पठेद्यश्च श्रणुयाच्छुद्धषड्जया।
प्रत्यहं सन्ध्ययोस्तौ तु रुद्रलोकं गमिष्यतः।।

इति च प्रयोक्तणां चादष्टद्वारेण सुखोत्पादकं प्रत्युपयोगो दर्शितः ऋग्गाथा सामोपयोगादेव नारदीयशिक्षायां पुराणादौ च तानपर्यन्तमेव स्वरमण्डलं दर्शितम्, मूर्च्छनानां च यन्नानात्वं तदुपनियमद्वारेण दर्शितं तच्छ्रोतसुखलक्षणं अर्थं प्रयोजनं कर्मभूतं

प्रयोक्तयुक्ते तच्छीलम्। एतदुक्तं भवति– यद्यपि जातिषु षाडवौडुविका नियता एव गणितास्तथा च रागभाषावैचित्र्यं श्रोत्रसुखजनकमुन्मूलयितुं स्वातन्त्र्येण स्वरलोपो मध्यमवर्जः प्रदर्शितः।

यच्चोक्तं कूटतानाः किमिति नोक्ता इति। तत्र कूटत्वं तावन्न किंचित्प्रयोक्तसुखार्थत्वं तेषामपि समानम्। केवलं परिगणितचतुरशीतिन्यायेन, नियते कर्मणि विशिष्टदेवतापरिपोषणाय। एवं मा भूदुपयोगः सामान्यात्मना तु दष्टोपयोगो स्त्येव। यच्चोक्तं गणना न कृतेति तत्रानन्त्यात्का गणना। यदाह–

'**अनन्ता वाङ्मयस्याहो गेयमध्ये च चित्रतां इति** (माघ–II–३) (पूर्णस्वराणां षाडवौडुविकादीनां) अन्योन्यमेलने द्वात्रिंशेत्यादिक्रियमाणे वाचस्पतेरप्यशक्यं परिगणनम्। स्यादेतत्– तेन किं प्रयोजनमिति। तन्न, यतस्तदपि सम्यक्प्रयोक्तरि सति श्रोतणां तु सुखजनकमेव। युक्तं चैतदिति दर्शयति **मूर्च्छना तानप्रयोजनमपीति**। मूर्च्छना तानानां ऋग्गाथासामभ्य आनीय यदि प्रकर्षेण योजनं स्थानानां विशेषरक्तिदायिनां प्राप्त्यर्थं..... हितषड्जस्थान स चरणं स्वातन्त्र्यलाभे तदुदीर्यमाणे स्वरप्रयोगः श्रोतणां सुष्ठुतमं र जको भवति। प्रयोक्तणां च स्वयं श्रण्वतां सुखं जायते। श्रुतित्वलाभद्वारेण.....पुष्प.....स्वसम्यङ् निर्वाहो ग्रामरगभाषादौ। पूर्णत्वे संपूर्णक्रमाक्रमयुक्तमूर्च्छनाप्रयोगे झटिति रागप्राप्तिः, अपूर्णत्वे तु रागतानप्रयोगे वर्जनम्। प्रत्येकं ग्रामरागादौ सर्वेषां मूर्च्छनादीनां बहुधा प्रयोग इति मूर्च्छनानानात्वं युक्तम्। न हि इयत्ता काचिदिति स्थितम्।

स्थानप्राप्त्यर्थमित्युक्तं, तत्र किमिदं स्थानं नामेत्याशङ्क्याह– **स्थानं त्विति**। पूर्वमुक्तं **पूर्वोक्तं** विस्पष्टम्। यत्रिविधत्वेनोक्तं काकुविधानेन तच्च षट्षष्टिभेदः, संक्षेपतस्त्रिधा सद्वर्णाङ्गालङ्कारयोगः प्रयोक्ष्यते।

एवं मूर्च्छना तानानां स्वस्थानं व्याख्याय साधारणकृतं नाम चतुर्थ तद्भेदं व्याख्यातुमुपक्रमते **साधारणमि**त्यादि। अन्तरे भवः अन्तरः स्वस्थानच्युतपरस्थानसंक्रान्तः स चासौ स्वरक्तत्वं न तु विस्वरं, तस्य भावः साधारणमिति। भावप्रधानो निर्देशः साधारण्यमिति यावत्। तथा अन्तरे भवं जातिविभागसाधारणत्वात्स्वरा यत्र प्रयोगे तद्भावो जातिसाधारणः स्वस्य सामान्यलक्षणम्। **कस्मादिति** किमत्र लौकिके नुगमो अस्ति तेनेति प्रश्नः अस्तीत्याह द्वयोरन्तर इत्यादि। छायायामुपविष्टस्य शीतं भवतीति वसन्तस्य पूर्णत्वं, आतपे स्वेद इति शिशिरस्य स्वरूपात्प्रच्यवनम्। एतदेवाह **न च नागत** इति। अनागमनमात्र व्यावत्तिर्न तु पूर्णतेत्यर्थः। निश्शेष इत्यनेन नष्टः न वा संपूर्ण इत्यर्थयोः स मध्यवर्तीकालः साधारणः, तद्वद्द्वयोः स्वरयोः मध्यवर्ती सस्वरसाधारणः।।**३४**।।

एतमेव विभागं दर्शयति द्वे इति। तेन तानश्रुतिसाधारणं यदेके प्राहुस्तन्नसोढं भवति। निषादस्य षड्जग्रामे षाडवौडुवितत्वेन लोपः, गान्धारस्य त्वौडुवित्वेन, विपर्ययौ मध्यमग्रामे। तद्विशेषनाश्रयणे लोप्यत्वमात्रात्। यदि तानसाधारणं तन्न, किंचिदेतेनोक्तं स्यात्।

श्रुतिसाधारणं न किञ्चिन्निषादगान्धारव्यतिरेकेण हि नान्यपरो लोपदशायाः श्रुत्युत्कर्षं भजते।

प्रथमं व्याचष्टे **तत्र साधारण**मिति। एतौ क्रमेण लक्षयति **श्रुत्युत्कृष्टो निषाद** इति। तत्र संज्ञावग्रहणे भेदमाह– व्यवहारार्थमिमे भिन्ने संज्ञे परमार्थतस्तु द्वयोरपि तीव्रतरत्वात्काकलीत्वम् यद्वक्ष्यति ''**कलत्वाच्च काकली संज्ञा**'' **(ज्ञ)** इति। द्वयोरपि चान्तरस्वरत्वम्, यदुक्तं– ''**साधारणं नामान्तरस्वरता**'' इति। द्वितीयं लक्षयति **जातिसाधारणमेकांशानामविशेषा**दिति। एकों शो यासां जातीनां तासां यो विशेषहीनः प्रयोगः स वाद्यंशानुलपनलक्षणान्तरमार्गरूपस्तुल्यः। कमवलम्ब्य जातिसाधारणं स्थितं नत्वेवं तस्मिन् भागो जात्योरभेद एवैको साधारणेत्याशङ्क्याह **जातीनां तु समवायात्प्रत्यंशलक्षणसंज्ञानमिति**। ग्रहन्यासादिदशकस्य यः समवायस्ततो हेतोर्जातीनामंशे विचित्रे पि लक्षणमसाधारणं शक्यं ज्ञातुम्, यदाह **न्यासान्तरभागौ तु विशेषकाविति**। **तु**र्व्यतिरेकमाह, तेन नाभेद इति भावः। ग्रहादिभागानां लक्षणपरिज्ञानं जातिसाधारणमिति केचिदेव प्रघट्टके व्याचक्षते **स्वरसाधारणद्विविध**मित्यादिना। काकल्यन्तरयोर्ग्रामद्वये प्रयोगमनुजानाति, निषादगान्धारालपत्वदशायां नामान्तरं च विधत्ते। स्वरद्वयं षड्जग्रामे, षड्जसाधारणं, अन्यत्र मध्यमसाधारणमिति। तच्चेवं फल्गुप्रायं लक्ष्यते, मूर्च्छना हि स्वरसाधारणकृता भवतीत्युक्ते किमनेनाभ्यधिकमुक्तं भवति। अन्ये तु ग्रामद्वये व्यवस्थां प्रदर्शयितुमिदं, तथा हि, षड्जग्रामे षाडवकरत्वेन निषादः काकली, औडुविते गान्धारो न्तरस्वर इति षड्जसाधारणं मध्यमग्रामे विपर्ययेणेति प्राहुः। तदनेनापि किञ्चिदाशयितं भवति। यच्चेदमुच्यते यस्य कैशिकमिति तद्यदि काकल्यन्तरयोस्तथापि निषादगान्धारगतस्य ग्रामभेदे षाडवौडुवितप्रकारस्य तदुचितप्रकारस्य तदुभयथापि षड्जकैशिक्यां पूर्णस्वरायां कैशिक्यां च ऋषभधैवतलोपोपजातषाडवौडुवितायां न दश्यते। शुद्धभिन्नगौडमालवषड्जकैशिकानामपि कैशिकीजातिसम्भवमुद्देशा.....भ्यां समयाश्च **काश्यपमुनि**प्रभतिभिश्च दर्शितम्। तस्मादित्थमेतदित्यस्मत्परमगुरव उत्पलदेवपादा मन्यन्ते इह तावत्तिस्रो द्वे चतस्र इत्यादिना स्वस्थानस्वरूपमुक्तं तच्चरा.....त्वात्पारमार्थिकं प्राकृतरूपमुच्यते। षड्जश्चतुश्श्रुतिक इत्यादौ यावन्निषादो द्विश्रुतिरिति यथा संपूर्णावयवं प्राणिनां रूपं तेषामेव त्वन्यथा रूपद्वये पि शुद्धं रूपं छिन्नपुच्छमिव शुनो द्विपुच्छत्वं वा तत्र गान्धारनिषादयोर्विवादित्वात्तदुपक्रमे च विकृतिरुक्ता च, तद्विकृत्या च षड्जमध्यमावपि विकृतौ, प चमस्य त्रिश्रुतिकाभिधाने दर्शितैव विकृतिः। तद्द्वारेण धैवतस्यापि ऋषभस्य तु विकृतिर्वक्तव्या। एतदेव दर्शयति **स्वरसाधारणं द्विविधं द्वैग्रामिक्य**मिति। यदेतत्काकल्यन्तरलक्षणं द्वयोरपि ग्रामयोः स्वरसाधारणमुक्तं तद्द्विविधम्। अत्र पच्छति– कस्मात्। अयं भावः। यदि तत्काकल्यन्तरभेदाद् द्विविधता स तर्हि पूर्वमेवोक्तमिति, किं पुररुक्त्या। अथान्यतः प्रकारा द्विविधता स तर्हि वक्तव्य इति, इतरो पि तं प्रकारमाह **स्वरसाधारणमत्र स्वरविशेष इति कृत्वा षड्जसाधारणमुच्यते** इति। यदा निषादः

श्रुतिमेकामुत्कृष्यते ऋषभश्च, तदा निषादस्त्रिश्रुतिः, षड्जो द्विश्रुतिः, ऋषभस्तु चतुश्श्रुतिरिति, तदा षड्जसाधारणौ द्वाभ्यां निषादर्षभाभ्यामुपजीवितो यतः सम्पन्नः ततः षड्जसाधारणम्।

गान्धारो यदैकां श्रुतिमुत्कृष्यते प चमश्च मध्यमग्रामिको मध्यमश्रुतिमेकां गह्णाति धैवतस्तु चतुश्र्श्रुतिक एव मध्यमग्रामतायां हानिः, तदा मध्यमस्योपजीव्यत्वान्मध्यमसाधारणम्।

ननु निषादगान्धारयोर्द्विश्रुत्युत्कर्षणे साधारणमुक्तं कथमधुनैकश्रुत्युत्कर्ष इत्याशङ्क्याह **साधारणमस्येति**। स्वरस्वयः(?) प्राक्तनरूपाद्विशेषो वैलक्षण्यात्मा स एव स्वरसाधारणतायां प्रयोगः। अनेन चैतत्सूचयति सर्वेषां स्वराणामुच्चनीचत्ववैचित्र्यकृतोक्तिविशेषात्केवलं गान्धर्वे नियमं (म) दष्टसिद्धयै एकश्रुतित्वं स्वराणां दर्शितम्, वैचित्र्यन्तरं तु रागभाषादौ लक्ष्ये दश्यत एव। तथा च **वद्धकाश्यपः**–

काकल्यन्तरयोगेन चतुस्त्रिद्व्येकतःश्रुतीन्।
स्वरान्सर्वान्प्रयु जीत रागभाषासु सर्वथा।।
स्वराः षड्जादयः सप्त तथा चोत्कृष्टप चमः।
अथ धैवततश्चान्यः काकल्यन्तरसंज्ञकौ।।
षड्जमध्यमगान्धाराश्चत्वार इति सर्वथा।
जातिष्वेते प्रयोक्तव्याः स्वराः प चदशैव तु।।

अस्य लक्ष्ये संभवं दर्शयितुं संज्ञा करोति **अस्य तु प्रयोगस्य सौक्ष्म्यादिति**। तुस्त्ववधारणे, अस्यैव षड्जमध्यम साधारणस्येत्यर्थः। सौक्ष्म्यवैचित्र्यनिपुणसाध्यता च। कैशिकमिति सुकुमारह्रद्यप्रयोगात्मिका हि कैशिकी सा विद्यते यत्रेत्याकारः। कशेर्वा कैशिकम्। पाताग्रसौक्ष्म्याद्वेति पथक्प्रयासो यं तज्ञ षड्जगान्धार्याश्च षड्जकैशिकी जातेति। मध्यमग्रामांशो प्यस्या उपजीव्यय इति चतुःश्रुतिकधैतं प्रतिपद्यते। दौर्बल्याच्च ऋषभधैवताभ्यां चतुश्श्रुतिकाभ्यां भवितव्यं यथाकल्पं निषादगान्धाराभ्याम् (।) वक्ष्यति हि–

दौर्बल्यं चात्रकर्तव्यं धैवतस्यर्षभस्य च। इति (२८–) स्वयं चैष षड्जग्रामेणेति प चमेन चतुःश्रुतिकेन भवितुं युक्तमिति। कैशिकप्रयोगे षड्जसाधारणगमनायोगात् षड्जकैशिकीकैशिक्यपि स्वयंमध्यमग्रामागा, तेनात्र चतुश्रुतिर्धैवतः, ऋषभो पि चतुश्श्रुतिः, दौर्बल्यं ऋषभस्यात्रेनि वक्ष्यते, लोप्यत्वं चर्षभधैवतयोरिति चतुश्श्रुनिकनया भाव्यम्। धैवत्याषभीवर्जाश्च सर्वजातयो साधारणमिति षड्जग्रामानुप्रवेशच्चतुश्श्रुतिकत्ववशात्प चमेन भवितव्यमिति कैशिकापरपर्यायं षड्जमध्यमसाधारणं तस्थानमप्यस्ति, तद्गतातिदेशात्तु कैश्किाभिन्नकैशिकादिग्रामरागेष्विति सर्वं सुस्थम्। एतदेव **मतङ्गाचार्या**दिभिर्ग्रामसाधारण––मित्युक्तम्।

श्रुतिसाधारणं तु सर्वस्वराणामनियतश्रुतिकत्वम्। ननु विषादस्य काकलीति कस्मान्नाम, आह **कलत्वा**च्चेति च चकार ईषदर्थे नैको सादेशः (?) ईषत्कलस्तीव्रभावो स्मिन्निति

काकली इति, यदि वा **गौरादित्यादीकारः** काकलीसंज्ञे इति पाठे निषाद एव षड्जत्वं नाप्राप्तः छिन्न पुच्छ एव श्वेब। अत एव विकृतत्वेन प्राधान्याभावादनंशः। ननु सप्तभ्यो माभूत्, अन्यो निषादस्तु विकृतो सौ न षड्ज इति। किमत्र कारणम्। आह– **आप्तोपदेशाच्चे**ति। चकारो हेत्वन्तरमतिकारं द्योतयति। पूर्वं हि निषादधीप्ररूढायां तद्भुद्धिर्जातेतिप्राथभ्यात्तेनैव व्यपदेशः। अत्र दष्टान्तमाह लवणरस एव तीव्रः क्षार इति कथ्यते चाणक्यादिभिस्तु मधुररसं, मध्यमादषभगतौ चान्तरास्य प्रयोगादान्तरस्वरत्वम्।

अथात्र साधारणे उक्ते शेषं कारिकावल्यामाह– **भवति चात्रेति**। साधारणे अन्तरस्वराद्य आरोही मध्यमस्तं संश्रित्य तत ऋषभं जिगमिषुणा यदि आन्तरस्वरः प्रयुज्यते तदासौ सम्यक्छ्रुतौ योगो भवति। सदाल्पकार्यस्तु विषय एव तस्य विनियोगः। **तावरोही**ति तस्यादाविति शेषः। तेनान्तरस्वरे प्रयुक्ते न नयावरोही ऋषभः, स मे.....न योज्य इति। अन्तरस्वरेण संयोगो यस्य मध्यमस्य तादग्यदाप्रयुक्तस्तदा आरोहणमेवकार्यम्। मध्यमादन्तरस्वरं प्रयुज्य मध्यम अन्यत्र वा आरोहणमेव कार्यम्।।**३५**।।

नन्वारोहणं कदाचिन्नावरोहीति यदुक्तं तदेवद्रढयति **क्रियमाणो वरोहीस्यादिति। अल्पोबहुभिरिति।.....**विपुलो वा विस्तरकालस्थिति त्रादर इत्यर्थः। **जाती**त्यदष्टं; रागमिति रात्रिद (रात्रिर्द)ष्टफलं; **श्रुती**ति प्रत्युपकारवैरस्यं नयत इति नाशयतीत्यर्थः। **अन्त**रस्वरशब्देन चात्र काकल्यपि संगहीत इति कृतो प्ययमेव क्रमः।।**३६**।।

षड्जं काकलीं प्रयुज्य तमेवस्वरान्तरं वारोहे.....किमित्युक्तम्। तत्प्रसङ्गादाह– **जातीरिदानी**मिति। जायते शुद्धभिन्नगौडरागसाधारणभाषाविभाषात्मकं रीतिसप्तकं दष्ट सिद्धिर्भावरसोपर जनं च यतस्ततो जातयः। **ब्रह्मणेति** आप्तागममस्यानन्यथाभावमाह। **वर्तयिष्यामि** हृदये वर्तमानाः प्रविशन्ति लक्षणक्रमेण ग्रहांशतारमन्द्रषाडवौडुविकादि विभागोक्तेन प्रकाशयिष्यामीत्यर्थः। षड्जग्रामगतं श्रुतिविभागं सम्पद्यते चोपजीवतीति तदाश्रयाः। एवं मध्यमग्रामाश्रया अपि स्थिताः। तिस्रः स्वरगता एव। तासु हि निषादगान्धारयोः षाडवौडुवितकरत्वमिति पूर्वावस्थायां वक्रावपि तौ दुर्बलत्वाद्विकृतौ काकल्यन्तरात्मानौ भवतः। तेन स्वरसाधारणस्यायतितत्वादत्रापि प्रयोगः।।**३७-४४**।।

तथाहि (शुद्ध षड्जा) यां काकली प्रयोगो दश्यते (इति) निदर्श्य अनंशत्वे दौर्बल्यात्तत्रासां कों शः साधारणविषय इत्याह **आमामंशा** इति। **यथास्वमिति** षड्जमध्यमसप्तांशाः तत्र निषादगान्धारयोस्तावदंशयोः नास्ति साधारणं समपेषु सातिशयस्तत्प्रयोगः, मध्यमाया अप्येष विधिः, स हि द्विश्रुतिवर्जं प चांशांशाः। प चम्यास्तु ऋषभप चमावंशौ आद्ये.... वितं येन प चम एवास्यां काकल्यन्तरयोगप्रसंगादस्यामन्यदाह **दुर्बलतरस्यव्यत्यासे** दुर्बलत्वगात्रं कर्तव्यम्। तेन षाडवकारिणो गान्धारस्य स्थाने दुर्बलेनान्तरस्वरेण यत्र भाव्यं तत्रासौदुर्बलतरः कर्तव्यः। औडुवितकारिनिषादस्थाने दुर्बलतरकाकलीसङ्गो दुर्बलः काकली कर्तव्यः इति।।**४५**।।

अथासां जातीनां विभागमाह **स्वरजातय** इति स्वरनाम्न्य इत्यर्थः। तासां ग्रामविभागमाह **तत्र शुद्धाः षड्जे**त्यादि। शुद्धानां लक्षणमाह **ता** इति। **अन्यूनस्वराः** पूर्णस्वराः यो (?) नामकारी स्वरांशादिरूपो (?) यासाम्। चकारः समुच्चये। विकृतानां नैतल्लक्षणमित्याह **विकृते लक्ष्यन्ते एभ्य** इति। पूर्णग्रहोपन्यासेभ्यः। तदाह **न्यासवर्ज**मिति। **विकृतसंज्ञा** इति विकारे सम्यक्ज्ञानं विशेषतो यासां, तेन षाडव–विकृता, ग्रहविकृता, अंकविकृता, ग्रहांशोपन्यासविकृता इति विभागः।

नन्वेवं (ग्रहाय) न्यासभागे शुद्धेतरविभागः कथमित्याह **न्यासविधवपी**ति। तासां जातीनां मध्ये पि याः शुद्धास्तासु नामकरी यो न्यासः नियमेन मन्द्रो भवति, विकृतासु त्वनियमः। न्यासान्तरमार्गलक्षणेन.....छायायिना रूपेण विकृत्वे पि तद्रूपाविभासः।

नन्वेवं सप्तानां विभाग उक्तः अष्टादश चोद्दिष्टा इत्याशंक्याह **तत्रेति**। एवं सप्तसु स्थितास्वित्यर्थः। तासां संसर्गादित्याह **विकृता** इति न तु शुद्धा इत्यर्थः। एकादशेति कर्मपदम्।

एतदेव संक्षेप्तुमार्यामाह–

शुद्धा विकृताश्चैव हि समवायाज्जातयस्तु जायन्ते इति। निर्हेतौ समवायात् श्रुतिस्वरग्रहादिसमूहाद्यतो जायते ततो जातय इति निर्वचनम्। शुद्धा विकृताश्चेति विभागः। एवकारेण शुद्धानामेव हि विकृतत्वम्। न तु जात्यन्तरत्वमुक्तम्। **पुनरवे**ति शुद्धाभिर्विकृताः कृताः, ताभिस्त्वेकादशेति पुनः शब्दो व्यतिरेकार्थः। एकादशैव नाधिकाः। तुर्व्यतिरेके, तासु परव्यतिरिक्तानाम वाच्याः, न तु शुद्धाः भूतविकृतवत्कारणनामधेया एव। **अथेति** समुच्चये कारणानामानुगमांशेन समुच्चितिः। तथाहि– षड्जमध्यमयोश्च संसर्गजातिः षड्जमध्यमेत्युक्तम्। अन्यास्तु भवन्तु जातय इति अंशरागविभाषादेशीमार्गादिषु प्रधानभूतान्तरमार्गन्यासाद्यनुगमबलेनानुगतप्रत्ययकारित्वादष्टादशमार्गन्यासानीत्यर्थः।
अंशग्रहादिशतयोजनाया जायन्त इति जातय इत्यन्ये। जातेरसंप्रति आम्य इति वा सकलस्य रागादेर्जन्महेतुर्जातिरिति टीकाकारः।।**४६**।।

ननु कया विकृतया का जातिरित्याशङ्काप्रसंगादन्यदप्यभिधास्यन् प्रतिज्ञां करोति **तासां यन्निर्वत्तेति** तयोः निर्वत्तयोर्निर्वत्ता तस्यामियं निर्वत्तेति प चमीसमासः कर्मधारयश्च। तत्रैकशेषावत्त्यादिभिः यां निर्वत्तेत्यन्यप.....तत्र यत इत्यध्याहारः। स्वरेषु ग्रहापन्यासादिषु **यथावदि**ति यत्प्रकाररूपमर्हति तद्वक्ष्यामि। एवमंशेषु स्वरग्रहणेन लब्ध्या अंशाः प्रधानात्पथुगुक्ताः। हानिषु च षाडवौडुविकात्मसु यथावदिति तत्प्रकाररूपं तत्क्रमेणेत्युद्देशमप्यनादत्य, इहेति जातिनिर्णये वक्ष्यामि।।**४७**।।

तत्र निर्वत्तोस्तावदाह **षाड्जीमध्यमाभ्या**मित्यादि **धैवत्यार्षभवर्जाभिः कैशिकी**त्यन्तेन। आदौ तिस्रः षड्जग्रामे, एतच्च षड्जपूर्वपदत्वादेव लब्धम्। ग्रहादिसंसर्गे पिग्रामयोरसाङ्कर्यम्। ग्रामसाधारणस्य कैशिकस्रू तत्र बाहुल्येन प्रयोगः। स्पष्टमन्यत्।

एतदुपसंहरति **अपरस्परनिष्पन्ना** इति संसर्गजा अन्योन्यं जनिताः। नन्वेवं षड्जमध्यमायां पथक्ज्ञाप्यते लक्षणमित्याह **पथग्लक्षणेति**। ननु किं तेनेत्याह स्वरा ये ग्रहादि विभागस्तत्र नेयास्ते यत आश्रीयते लक्षणबलेन द्वैग्रामिक्यमिति तिस्रः षड्जग्रामे अष्टावन्यत इत्यर्थः। यदि वा द्वैग्रामिकजात्युद्भवत्वात् तथेति, यदि वा संसर्गजात्य एव स्वराश्रयास्तु स्वरनाम्न्यः पथग्लक्षणं शुद्धापेक्षया जात्यत्वं संसर्गजापेक्षया च जनकत्वं भजन्ते।।**४८**।।

अथ हानिप्रकारं पूर्णषाडवौडुविकविभागं विवक्षुः पूर्णाः तन्नियमं तावदाह चतस्र इति। तत्र पूर्णाश्चतस्र आह **मध्यमोदीच्यवे**त्यादि। तत्र षाडवा आह षाड्जीत्यादिना। तद्व्यतिरिक्ताः शिष्यन्ते दशैव तान् प चस्वरा इति दर्शयति **ज्ञेयाः प चस्वरादशेति।।४६-५१।।**

प चस्वराणां विभागामाह **निषादिन्यार्षभी** चेत्यादि। **षड्जाश्रिता** इति षड्जग्राममाश्रिताः।।**५२-५३**।।

एवं मध्यमग्रामं अथ तदेव रूपताय निराकांक्षं करोति। **यास्ताः सप्तस्वरा** इत्यादि। याः सप्तस्वरा मध्यमोदीच्यवाद्याश्चतस्रस्ता ज्ञेयास्तथैव नियमेनेति शेषः। तेन तासां न जातु हीनस्वरता। यास्तु षड्जाद्याश्चतस्रस्ताः षाडवे चकारात् पूर्णत्वे ना(औ)डुविकाः कदाचिदौडुवे प चात्मके तत्प्रयोगे या दशोक्तासाः (?) कदाचित् षाडवे, चकारात्पूर्णत्वे पि। **मता** इति पाठे न छन्दोभङ्गः इति।।**५४**।।

पूर्णानां षाडवानां च ग्रामभेदेन स्वरूपमाह **षड्जग्रामेत्विति**। **गान्धारयोगत** इति गान्धारस्य योगमंशत्वेन प्राधान्यमवलम्ब्य षाड्जी षड्जस्वरत्वेनोक्तापि सती पूर्णैव विज्ञेया। निषादो ह्यासां षाडवकृत्। स च गान्धारांशे तत्संवादित्वादलोप्य एव। चो प्यर्थे, एवकारः पूर्णशब्दानन्तरम्। कार्मारव्याद्यास्तिस्रो मध्यमग्रामे पूर्णस्वरा एव, गान्धारोदीच्यवाद्यास्तु तिस्रः षाडवा, औडुविकाः कदाचित्।।**५५-५६**।।

अंशविकल्पनमिति। अंशस्वरा विकल्प्यन्ते येन। आस्यां जातावयम्। अंशाः षा(ष)डवरोहिता इति मीलनग्रन्थेन विचार्यते। तं वक्ष्यामः। **अङ्गविकल्पनमिति** पाठे अङ्गस्य षाडवौडविकरूपस्य विकल्पनं कथनम्। अस्मिन्नंशे तन्नास्तीति। **सप्तम** इति। निषादे गान्धारे चांशे तद्वति (?) षट् स्वरा नेष्यन्त इत्यर्थः। अत्र हेतुः– संवादिनो लोपाभावान्निषदेन न स्यात् षाडवः। स च गान्धारस्य संवादी। गान्धार्यादीनां तिसणामषभेण षाडवत्वमुक्तम्। स च मध्यमग्रामे प चमस्य संवादीति। तत्रांशे षाडवाभावे धैवतें शे षड्जोदीच्यवायां न षाडवः। ऋषभेण हि तत्। स च धैवतस्य संवादी षड्जग्रामे। एकीकृत्योपसंहरति **सप्तैता** इति। नि ग प प प ग ध इत्येतें शा। अषाडवाः क्रमेण षड्जमध्यमादिषु षड्जोदीच्यवाद्येषु। अथौडुवितशून्यानंशानाह– **गान्धारीरक्तगान्धार्योरित्यादि सप्तम** इति। निषादः। षड्जमध्यमाया यौ द्वावंशौ गान्धारनिषादौ तावन्नौडुविकौ। उपसंहरति **एवं तु द्वादशैवेति**। गान्धारीरक्तगान्धार्योरष्टौ

षड्जमध्यमायां द्वौ प चम्यां कैशिक्यां द्वाविति। अत्र क्वचिदंशसंवाद्यलोपो युक्तिर्लभ्यते। तदलाभे तु तथानिरूपणमेव हेतुः।।**५७-६३**।।

इयती असंख्या भवतीति षष्टितावदंशाः, तत्र चतसणां जातीनां नित्यपूर्णानां नवांशाः अषाडवा इति चतुःप चाशत्। तेभ्यो पि सप्त षाडवा.....सत इति सप्तचत्वारिंशत् षाडवाः चतस्रः पूर्णा एवेति चतुर्दशानामन्यानां मध्ये चतस्रो **नौडुविका** इति तासां सम्बन्धिनो द्वादशांशा वक्ष्यन्ते, शिष्टानां चत्वारिंशत्, ततो पि द्वादश औडुविकता(म)पवादयन्त इति त्रिंशदौडुविताः। एवं चत्वारिंशच्छतं विकृतानां संसर्गजानां च द्वैग्रामिकानां च जातीनां स्वरनामधेयानां सप्तांशकाः (षाड)वा इति सर्वतस्सप्तचत्वारिंशच्छतमंशकानामिति ग्रामद्वयमुच्यते। लोके तु यौ षड्जग्रामे मध्यमग्राम इति गीतयस्तेन तेन ग्रामौ म नामधेयसादश्यमात्रं तु तत् ''**जातिभिः श्रुतिभिश्चैव स्वरा ग्रामत्वमागताः**'' इति ह्युच्यते। ग्रामो नाम विशिष्टश्रुतिकस्वरसमूहो मूर्छनात्मा पूर्णापूर्वस्वभावस्वरगतग्रहांशादिविशेषमूह--रूपजातिसमूहश्च।

अथोच्यते। तत्तद्ग्रामोचितश्रुतिकस्वरपरिवारादिदर्शनात्तन्मुख्यात्मकत्वलौकिकयोर्ग्राम--रागयोरिति तद्भवेत्। यदि षड्जमध्यमप्रधानता क्रमेण लक्ष्येत श्रुतिविशेषस्य च नौडुवितत्वमित्यलमवान्तरेण। **तुर्हेतौ**। यतो द्वादश स्वरा वर्ज्या अत एव स्वरा आश्रीयमाणाः प्राधान्येनांशकाया आशुगान्धार्यादिषु भवन्ति तद नित्यमेव नौडुविता जातय इति सम्बन्धः।

इदानीं वैचित्र्यार्थं प्रयोगकरणनियममाह सर्वस्वराणामिति। जातिष्वति समुदायापेक्षया सर्वस्वराणामिति च। तथा हि कस्यांचिज्जातौ कस्यचिन्नाश उक्तः। यद्यपि च धैवतप चमौ षड्जमध्यमग्रामयोः क्रमेणालोप्यौ तथाप्यन्यग्रामे लोपित्वमस्त्येव तयोरिति मध्यमव्यतिरिक्ताः सर्वे स्वरा नाशिनः मध्यमस्य तु न क्वचिद्विनाशः। अन्ये तु धैवतप चमयोर्ग्रामविभागेन यदनाशित्वं **विशाखिलाचार्यादिभि**रुक्तं नानुमन्यन्ते मुनेर्मध्यम एवाविनाशी मत इत्याहुः।

श्रीमदुत्पलदेवास्त्वाहुः। जातिलक्षणे वक्ष्यमाणे मध्यमस्य लोपो न क्वचिद्वक्ष्यते। तन्मध्यमस्य नाशो न कर्तव्य इति किं प्रतिषेधेन। प्राप्तेरभावात्। सर्वस्वराणां नाश इत्यनेनापि न किंचित्कृतम्। नियमस्वरलोपस्य यथास्वं जातिषु वक्ष्यमाणत्वात्। तस्मादयमत्र भावः। यथा वैचित्र्यार्थरागयोर्ग्रामरागत्वं नीयन्ते तदा षडपि स्वराः षाडवौडुवितविधिना सर्वासु जातिषु स्वबुद्ध्या ग्रामविभागे क्रमाल्लोप्याः। न तु मध्यमः कदाचनेत्यत्र ग्रामरागवैचित्र्यमनेन सूचितम्। अत्र युक्तिः। **सर्वस्वराणा**मिति। सर्व एव मध्यमत्वादेव तुल्यस्थाननिविष्टः। स्वर इहोच्चावचस्वरव्यवस्थाहेतुः मध्यम एकं नाम द्वितीयमर्थरूपम्। **गान्धर्वकल्प** इति। गान्धर्वशास्त्रं ईषदसमाप्ते गान्धर्वे ग्रामरागरूप इति वानेन भाषादेशीमार्गादिषु मध्यमस्यापि विनाशित्वमभ्युपगतं भवति। **विहित** इति। मङ्गलत्वात्। तथा हि **मातगुप्तः**--

प्रथमं मध्यमादेव वाग्देवी सर्वदेहिनाम्।

मङ्गल्यार्थं तदंशः स्यादारम्भे चौक्षषाडवः।। इति।।

सामस्वपीति। तत्र ह्यसौ प्राथम्यान्नियतप्रयोगः। यदाह **नारदमुनिः**।

यः सामगानां प्रथमः स विशेन्मध्यमस्वरः। इति।

''**वेणोर्मध्यम**'' इत्यन्ये पठन्ति। अन्ये तु जातावेकवचनमिति मध्ये कण्ठस्थाने यत्स्वरसप्तकं तदविनाशि सर्वस्य तत्सम्भवात्। तारमन्द्रस्वरास्तु सर्वे पित्तश्लेष्माद्युपहतशिरोवक्षसाम्––सुलभप्रयोगा इति व्याचक्षते।।**६४-६५**।।

ननु जातिष्वित्युक्तम् तत्र केयं जातिर्नाम। उच्यते। स्वरा एव विशिष्टसंनिवेशभाजो रक्तिमदष्टाभ्युदयं च जनयन्तो जातिरित्युक्ताः। को सौ सन्निवेश इति चेदाह। **दशक जातिलक्षणमिति। ग्रहांशाविति।** द्वन्द्वेन प्रायों शस्यैव ग्रहत्वमुत्सष्टम्। **तारमन्द्रस्वरा**वित्यन्योन्यापेक्षा। **षाडवौडुविते** यत्र संभवस्तत्र लक्षणं न सर्वत्रेति दर्शयति। **तथेति**। ते तत्सम्भवप्रकारेणेत्यर्थः। अष्टकं तु सर्वत्राव्यभिचारि। तथा हि प्रथममध्यमान्यपि भावान्न विना कः सन्निवेश इति ग्रहापन्यासन्यासाः। गुणप्रधानभावेन रक्तिर्नोपपद्यत इति प्रधानभूतों शश्च तदमात्यकल्पश्च। तत्संवादी पर्यायांशो नियति बहुत्वमुपयोगि। तदीयं तच्चाल्पापेक्षमिति विभावादिलोप्यस्वरगतमल्पत्वगच्छति। मूर्छनानिर्देशोपदिष्टमध्यमसप्तक––स्वरमात्रे चैकरसे प्रयुज्यमाने रक्तेरभाव इति तारमन्द्रोपयोग इत्यष्टकं तावदव्यभिचारि। लोपभागिन्यां तु स्वरलोपो पि लक्षणं भवति।।**६६**।।

एवं मात्रैस्तु दशक निर्णीतेषु ग्रहस्य भावा संख्या। लक्षणमाह– **ग्रहास्त्विति। सर्वजातीनां** संबन्धिनो ग्रहाः। मिलित्वा अंशवद्भवन्तीति त्रिषष्टिरित्यर्थः। कश्चासौ ग्रहः। आह तस्यैव नामान्तरम्। कथमुच्यते यत्प्रवत्तं **भवेद् गेयमिति**। गह्यते जातिप्रयोगो यत इति ग्रहः। तेनांशस्यैव धर्मान्तरयोगान्नामान्तरम्। तदाह **ग्रहविकल्पित** इति। ग्रहधर्मेण एतद्विधतया कल्पितेन द्विस्वभावीकृतः। न त्वत एव प्राधान्याद् ग्रहत्वं लप्स्यते। तत्सामर्थ्यसिद्धो ग्रहः। किं स्वकण्ठेनोक्तमित्याशङ्क्यैतदेवाह **ग्रहविकल्पितः**। अंशो पि हि कदाचिद् ग्रहो न भवति। नन्दयन्त्यामिव प चमः। तस्या हि ग्रहो गान्धारः। तद्ग्रहस्य पथगभिधानं कर्तव्यमेव। न तु नैकमुदाहरणमित्यत्र न्यायः। शक्यं न ग्रामरागादावंशव्यतिरिक्तस्यापि ग्रहत्वाभ्यनुज्ञानं भूयस्तरलक्ष्य एकं पथग्ग्रहलक्षणे प्रयोजनम्। तथा हि मालवकैशिकेन यद्रूपकं गीयते न तत्सर्व नियमेन षड्ग्रहः। एवमन्यदपि वाच्यम्।।**६७**।।

अंशमाह **यस्मिन्भवति रागश्चेति**। यस्मिन् विद्यमाने रागो रक्तिर्जातिस्वरूपं च भवति शिरसीव पुरुषस्वरूपम्। एवं यमाश्रित्य स्थितः स्वरः प्रकर्षेण वर्तते। **यस्मादिति ल्यब्लोपे** प चमी। एतदुक्तं भवति। यस्य संवादी वानुवादी वा प्राधान्यं प्रति वाद्यते मन्द्रीव ग्रामविषये। तत एव विनाप्यंशत्वमंशः संवाद्यनुवादिनोरेव। ननु जातिर्विवादितः। तदर्थमेव तारावधिमवेक्ष्य च वक्ष्यमाणप चमादित्यादिना तारमन्द्रस्थितिः। यश्च समस्त(प)द्ये स्वस्वरापेक्षया बाहुल्येन भाति। यश्च स्वयमेव स्वसंवाद्यनुदादिरूपं व ग्रहादिप चकरूपं वा

करोति न तु कदाचिद्विवादिनम्। ग्रहादयो गोचरो नियन्तव्यो विषयो यस्य स तथा। यश्चान्या(न)पि स्वरान् स्वपराङ्गमुखवच्छारनेनानुर जयन्निवर्तते। सों शः प्रधानभागवत्वाद्दशलक्षण इति सर्व एते धर्मा मीलिताः सन्तो अंशत्वे प्रयोजकाः। अत एवादिलक्षणमंशलक्षणात्पथगेवोक्तम्।।**६८-६९**।।

अथ तारमाह– **प चस्वरपरा तारगतिरिति**। ननु यद्यंशस्वरादारोहक्रमेण तावदारोहणीयं यावत्तत्तत्प चमसंख्यस्य स्वरो न तु तत्परमिति नियमः। (एतन्न) तदा महान् लक्ष्यविरोधः। षड्ज्यां हि षड्जांशे प चमस्वरात्तमेवारोहणीयं स्यात्। दश्यते च लक्ष्ये षड्ज्यां.....न्न धाधा–निसनिधपानिधपा इति। आर्षभ्यां च धैवतान्तः स्यात्। दश्यते च निषादान्तं न धरिनिमगम इति। निषादवत्यां च प मान्तमारोहणं दश्यते पापारिगा इति। एवमन्यत्रापि विचार्यम्। तस्मान्नायं व्याख्याप्रकारः। किं तर्हि। श्रूयताम्। इह मध्यसप्तकेन तावन्मूर्छनादंशः कार्य इत्युक्तेरेवलब्धम्। तत्सप्तकनिविष्टाः स्वराः सर्व एव प्रयोज्या इति। सप्तकान्तरगतस्वरप्रयोगेषु कियद् दष्टादष्टाभ्युदयदायि भवतीति तारमन्द्रतामनादत्य शिरस्यौरस्यस्वरनिष्ठैव सा इह निरूप्यते।

ननु मध्यमसप्तके स्थिते इति तत्पष्ठे तारसप्तकनिर्विष्टाः किं सर्वे स्वराः प्रयोज्याः। सर्वत्र तेनेति निरूप्यते। तत्र यदा षड्जों शो भवति तदा तारसप्तक (कं) **रिगम(प)** इत्येतत्पर्यन्तं ग्राह्यं यदि शक्तिरस्ति। न तु ततः परं शक्तियोगे पि। ऊनग्रहणे तु न दोष इति परशब्देन दर्शितः। ऋषभें शे पुनर्धैवतान्ताः स्वरास्तारसप्तर्षभं ग्राह्या भवन्ति। गान्धारे त्वंशे निषादान्ताः सप्त। मध्यमप चमधैवतनिषादेषु निषादान्ता एव ते ग्राह्या इति प चस्वंशेषु समस्त एकस्तारसप्तकः संगहीतो भवति। मध्यमः पुनर्यदि शक्तिः चतुस्स्वरपरमारोहणम्। नन्दयन्त्यां तु परावधिक एव तारनिष्ठो भविष्यति ''**तारगत्या तु षड्जो पि कदाचिन्नातिवर्तते**'' एतच्च तत्रैव व्याख्यायते। तेन **आ चतुस्स्वरादिति**। यदन्यैर्नन्दयन्तीविषयं व्याख्यातं न तथा। अत्रैवार्थे कारिका **अंशात्तारगतिं विद्यादिति। इहेति।** मध्यमसप्तके मूर्छनाकारिणि स्थिते सति अंशस्वरमवलम्ब्य तारगतिं तारसप्तकगतस्वरपर्यन्तं वा आरोहः सर्वत्र स कर्तव्यो न ततः पर इत्यनेनोच्यते। तैः इहेतयंशद्वहणं **नेता च तारमन्द्राणामिति** पूर्वोक्तमंशलक्षणं (च) न पर्यालोचितं (न) शिरस्य (ऋषभगान्धारयोः) धैवतनिषादावप्रयोज्यौ तयो रक्त्यभावे स्वरतानुपपत्तेः शक्त्यभावं त्वप्रयोक्तरि इत्यसदेतत्।

यत्त्वन्यैर्व्याख्यातम्। अंशस्वरेण सह तावत्तारसप्तगताः प च चत्वारो वा स्वराः कार्याः। यथा षड्जेंशे सरिगमप ऋषभे रिगमपध गान्धारे गमपधनि मध्यमे गमपधनि एव प चमधैवतनिषादेषु। एत एवेति तल्लक्ष्येण (स्थाप्यते)। तथा हि। निषादवत्यां निषादें(शे) तारषड्जो दश्यत एवांशेन साधनेन इति। अलं बहुना उक्तैव च व्याख्या लक्षणसंग्राहिणीत्यादरणीयम्।

नातः परमिति। तारगते ऊनत्वे कामचारमाह– **इहेति**। जातिषु ग्रामरागादौ नायं नियम इति विभावः। **बुधैरिति**। लोप्यमिति स्मरं ये बुद्धयन्ते तैरपूर्णत्वे पि लोप्यस्वरविधौ गणनीय इत्याह। तथा च **विशाखिलाचार्यः। नाशिस्वरस्तारविधौ संख्यायते इति।** तारयति प्लावयति वेगेन वाचमिति तारः।।७०।।

अथ मन्द्रमाह। **त्रिधा मन्द्रगतिरिति।** मदीह मोदने नम्रत्वाल्ललितो मन्द्रः। यो सावंशस्वरो मध्यमे सप्तके तदन्तमेव मन्द्रसप्तकाद्ग्राह्यः न्यासस्वरान्तं वा तत्परो वेत्त्येकः परशब्दो लुप्तनिर्दिष्टः न्यासस्वरात् यः परस्तात् परा.....त्यर्थः। परग्रहणं ततः ऊनस्य ह्यनुज्ञा वा कामचारमाह। नन्वेवं षाड्ज्यां धैवतस्य मन्द्रस्य कथं प्रयोगः कथं न यावता षड्जान्तं तत्र मन्द्रसप्तकेन पूर्णेन वितत्य कामचारात्तु धैवतान्तो मन्द्रप्रयोगः। यो हि तद्ग्रहन्यासरूपषड्जेनासौ मन्द्रसप्तकात् अपि तु मध्यगता मध्यगतादेव सा.....मन्द्रो नियमात् इत्यत्र हि तारनिवत्तिपरं वचनं न हि षाड्ज्यां यत्र षड्जः स्थानत्रये श्रूयते इति। तत्रैव कारिकां पठन्ति। **मन्द्रस्त्वंशात्परो नास्तीति।** तथा हि निषादवत्यां निषाद एव मन्द्रो नासौ दश्यते अंशग्रहस्वरस्य मध्यगतत्वन्यासे तु सति द्वौ **मन्द्रौ** न्यास एव तत्परे वा। अत्रैवोदाहरणं तद्व्यस्थितविषया लक्ष्येति नियममाह गान्धारलक्षणे न्यासपरत्वादेव मन्द्रत्वं सिद्धम्। तत्किं पुनर्वचनेन। अस्ति च यद्वक्ष्यते। **लङ्घनं ह्यषभस्यापि तच्च मन्द्रगतं स्मतम्** इति। तद् ज्ञापयति किमेतद्गान्धर्ववचनमेवेदं पूर्वं सिद्धमित्यदोषः। तुरवधारणे अवस्थितावेवेत्यर्थः।।७१।।

अथ न्याससंख्यया लक्षणेन चाह– **न्यास एकविंशतिसंख्य** इति। षड्जमध्यमायां द्वे कैशिक्यास्त्रयः शिष्टानां षोडशेति। अस्यां जातिशरीरसमाप्तौ कर्तव्यतायां वा स्वरः सन्यासः (नि) तर्हि अस्यते प्रयोगे येनेति (न्यासः)।

अपन्यासमाह– **तद्वदिति** समाप्तौ तर्हि न्यासात् को स्य विशेषः। आह– **अङ्गमध्य** इति। अवान्तर समाप्ताविव्यर्थः। तथा च **दत्तिलाचार्यः। विदारी मध्यगतस्था** इति। तत्र षड्जग्रामे षड्जमध्यमायाः सप्तापन्यासाः। षड्जोदीच्यवायां द्वौ प चानां प्रत्येकं त्रय इति चतुर्विंशतिः। शेषास्तु मध्यमग्रामे। एतदेवापन्यासस्वरूपं वितानवत्तेनानुष्टुब्भेदेनाह। यथा–

न्यासो ङ्गसमाप्तौ स चैकविंशतिसंख्यस्तथां
षट्प चाशत्संख्योपन्यासो ङ्गमध्ये भवेत्।। इति ।।७२।।

अथानुद्दिष्टमप्यंशलक्षणापेक्षितं प्रसङ्गाल्लक्षयति **संन्यासविन्यासवप्यंशमध्य एवेति**। विदारीमध्य इत्यर्थः। अथानियतयोः का संख्येत्याह। **अनियतत्वाच्च बहुत्वमिति**। न्यासापन्यासांशवत्तयोः प्रतिजातिप्रयोगनियमो स्तीत्यर्थः। तत्र संन्यासमाह।

तत्र प्रथमविदारीमध्ये न्यासस्वरप्रयुक्तस्तु।
विवदनशीलं मुक्त्वा सन्न्यासः सो भिधातव्यः।।

अंशस्य विवादी यो न भवति स चेत्प्रथमवितार्यन्ते प्रयुक्तस्ततस्तदा संन्यासः समीपभूतो न्यास इति।

कृत्वा पदावसाने विन्यासात्क्वापि विन्यासः।
अंशस्य संवाद्यनुवादी वा कापि विदारीभावरूपस्य पदस्य पदान्ते विन्यस्यते तदा विन्यासः।॥**७३**।।

एवमसन्यासस्यैव प्रक्रान्तरूपं संन्यासविन्यासद्वयं लक्षयित्वा अंशकप्रस्तावे प्रकृतमल्पत्व विभागद्वारेण लक्षयति। **द्विविधमिति।** लङ्घनं स्पष्टैवाविश्रम्यैव तत्स्वरान्तरगमने तस्य स्वरस्य स्वप्रधानीकरणम्। यथा न रागे गान्धारी स्व.....विदा इति श्रान्ता..... वप्यनावत्तिरनभ्यासः यत्त्वावर्जनमेव लङ्घनमिति तदसत्। अल्पत्वभाषायां वा योगात् षाडबौडुवितविधेश्चाल्पत्वं पथङ् न तत् स्यात्। नन्दयन्त्यां च प चमांशो यावत्संवादिनः ऋषभस्य लङ्घनीयत्वं युक्तं न चास्य संवादिनो लोपो युक्तः। न चैवमित्यषाडवा संवाद्योडुवितस्यापत्तेः (लङ्घना)नभ्यायोर्विषं विभजति। **तत्र षाडवौडुवित कारणमिति।** लोप्यस्वरपूर्णावस्था या यदा प्रयुज्यते तदा तस्य बाहुल्येन लङ्घनम्। क्वचिदनभ्यासो पि। ये त्र तु स्वराः पर्यायांशा न भवन्ति यथा षाड्ज्यां निषादर्षभौ तौ यदा न्तरमार्गे प्रयुज्येते तदा नभ्यासः। तेषां क्वचिल्लङ्घनमपि गीते ग्रहसंवाद्यवस्थानं मुक्त्वा नी.....क्त योगेसिन्यासनिक (च) ये भवेत्। अन्तरमार्गणमित्यन्तरमार्गणस्य(र्गस्य) लक्षणम्। यथा– **जातीति**। क्वचिद्वा नंशो पि नाल्पः। तथा च कार्मारव्यां गान्धारस्य सर्वस्वरसङ्गत्या बहुत्वेनान्तरमार्गे प्रयोग इति वक्ष्यते

गान्धारस्य विशेषेण सर्वतो गमनं भवेत्। (भ. ना. २८–१३६)

इति। अथ बहुत्वमाह– **अल्पत्वं तद्वद्बहुत्व**मिति। लक्षयतीति शेषः। कथमित्याह– **बलवदबलवत्तो पि(र्तोर्वि)पर्याये**। अबलमल्पं तद्विपर्ययाद्बलवदिति बहुत्वाल्लक्षणं गम्यत एव। अत एवाहं

जातिस्वरैस्तु नित्यं जात्यल्पत्वं द्विधा चैत(द्)।।

इति। जातिगतमल्पत्वमिव तद्बहुन्वमपि द्विधा। तच्च जातिस्वरैः पर्यायांशैरसंवादिभिश्चोपलक्षितः(क्ष्यते)। तेनैषामलङ्घनम(भ्यास)श्चेति द्विधा बहुत्वमित्युक्तं भवति।॥**७४**।।

तथाल्पत्वबहुत्वयोरुपयोगं दर्शयन् प्रसङ्गादन्यदप्याह–

स चरांशे(श)बलस्थानामल्पत्वे दुर्बलासु च।
न्यासश्चान्तरमार्गश्च जातीनां व्यक्तिकारकः।।

इति स चारेण पर्यायेण यों शस्तद्विषयं तत्र तिष्ठन्तीनां (न्यासः) सान्तरमार्गः स्वरूपाभिव्य जको नान्यथेति वस्तुत्व(तस्त्व)स्योपयोगः। **अल्पत्व** इति। अल्पत्वविषयस्वरकृते लोप्यानंशस्वरविषये या दुर्बला हीनबला जातयस्तासु स्वरीभवति नान्यथेति। **अन्ये** त्वन्तरमार्गस्य सर्वत्र प्रधानस्याल्पत्वबहुत्वाभ्यां विना स्वरूपलाभ एव (न) भवतीति तात्पर्यं मन्यमाना अन्तरमार्गलक्षणत्वेन श्लोकं व्याचक्षते। कथम्। **चो** हेतौ। यस्मादन्तरमार्गो **जातीनां** व्यक्तिकृत् स चाल्पत्वबहुत्वजीवी तस्य हि लक्षणम्। **स चारेति**।

स चारे अनुवादिस्वरे अंशस्वरे च प्रधानभूते दलकल्पे स्थिते बलस्थानां सतां संवादिनां स्वराणां बलवत्तया ल्पत्व(त्वे दुर्बलासु).....स्वराणां दुर्बलप्राणकत्वे विलङ्घनेन न्यसन यः (करोति) सो न्तरमार्गस्तस्मादल्पत्वबहुत्वे वक्तव्य इति। **अन्ये** त्वत्रेयं जातिर्जातिदुर्बल इ(लास्वि)यं बलवतीति नीत्या न्यासान्तरमार्गाभ्यां ज्ञेयं बहुत्वप्रयोज्ये सति न्यासान्तरमार्गवशादिति श्लोकस्यार्थमाहुः।।**७५**।।

अथ षाडवं पूर्वमुक्तमपि दशकलक्षणाभिधानप्रसङ्गशय्यावैषम्यशान्तये पुनराह **षट्स्वरं षाडवमिति**। चतुर्दश जातिगताश्च (विधाः) तच्चतुर्दशजातिविधयः (चतुर्दशविधं) चतसणां नित्यं पूर्णत्वेन तदभावात्। **सप्तचत्वारिंशत्प्रकारमिति**। त्रिषष्ठेति (त्रिषष्टिरिति) पूर्णांशा न च पात्यन्ते। अपवादाश्च सप्त। तदाह। **जात्यंशप्रकारमिति**। जातौ यें शस्वरास्तेषु यः प्रकारो पवादविधिरुक्तस्तदतिक्रमेण। पूर्वाभिप्रायेणौडुवमाह। **प चस्वरमिति। दशविधमिति।** दशस्वेव हि जातिषु। तत्र **विंशत्प्रकारमिति**। त्रिषष्टेश्चतस्रो नित्यपूर्णा इति तदीया नवांशाः पात्यन्ते। चतस्रो नित्यषाडवा इति तदीया द्वादशेति। अनेन शिष्टा द्वाचत्वारिंशत्। अत्र हि द्वादशोपादानीया इति शिष्टास्त्रिंशत्। तदाह– **पूर्वोक्तं लक्षणं चास्येति।।७६।।**

अथैतद्व्यतिरिक्तं किंन (किञ्चन्) मार्गप्रसङ्गाध्द्रवा(स्व)स्तीति बदन् गान्धर्वे तदभावमाह।

षट्स्वरस्य प्रयोगो स्ति तथा प चस्वरस्य च।
चतुःस्वरप्रयोगो स्ति (पि)कृष्टासु द्वादशस्विह (ह्यवकृष्टध्रुवास्विह)।।

इति। तथेति समुच्चये च समुत्थितावधारणे। तेन षड्जा.....स्वरयोः पूर्णस्यैवास्ति प्रयोगः। **अस्ती**ति.....तामाचक्षमाणो गान्धर्वे तन्नियममाह– **इहेति**। यदिमं नाट्योपयोगि ध्रुवगानं तत्र **चतुःस्वरप्रयोगो पि**। अपिशब्दात् पूर्वो पि त्रिविधः। (कु)त्रेत्याह। **अवकृष्टासु** करुणोपयोगिनीषु गुरुप्रायासु **ध्रुवासु।।७७।।**

अथ ग्रहांशानां सङ्ख्यां निरूपयितुं प्रतिजाति विभागमाह। **द्वैग्रामिकीणां जातीनामित्यादि।।७८।।**

तत्र सङ्ख्यानुरोधाद् ग्रामविभागक्रममनादत्यैवैकांशस्यांशादियोगं सप्तांशपर्यन्तमाह– **मध्यमोदीच्यवायास्वित्यादि।** तत्र तिसणामेक एकों शः। तिसणां द्वे द्वे (द्वौ द्वौ)। तिसणां त्रयः। तिसणां चत्वारः। चतसणां प च। एकस्याः सप्त (षट्)। (एकस्याः) सप्तेति **(त्रि)षष्टिः**। त एव यो(स एवांशो) ग्रहः। नन्दयन्त्यामंशस्वर एव ग्रहयुक्तो निजलक्षणाद्गान्धारो लक्ष्यत इति विकल्पो मन्तव्यः। **मुनिना** ग्रहत्वमंशस्योक्तमिति तदेव मुख्यम्। अन्यत् संवादिविवाद्यादिर्यदा ग्रहः क्रियते तदा विकृतत्वमासाम्। तदाह– **विकृतः (ता) स्वरयोगात इति।** ग्रहविकारः सर्वासामेव जातीनामस्तीति **या(सर्वा)स्वत्र।।७६-६१।।**

अथास्य सप्तचत्वारिंशदधिकस्य जात्यंशविभागस्य यत्नपरेक्षणीयत्यमभिधातुं प्रधानमेव सङ्ख्याविभागं संक्षिप्याह। **सर्वासामेव जातीनां त्रिजातिस्तु गण इति।** गणः समूहः स च **सर्वासां जातीनां** मध्ये यास्तिस्रो जातयस्ताभि कर्तव्यः। ननु समूहः के

(कां)चिदेकस्या(देका)मुद्दिश्य क्रियते। इह तु समूहकरणे को र्थ इत्याशङ्क्याह– **ते च सप्त गणा ज्ञेया वर्धमानस्वरा इति। ते** एको जातिस्वरप्रयुक्तो गण एकस्वरांशो यावत् सप्त्स्वरांश इति। स हि करणे अंशसङ्ख्यो विभागप्रयोजनमित्युक्तं भवति। ननु यदि जातित्रयेण सप्तगणस्तर्ह्येकविंशतिर्जातयः स्युः। तच्च (ताश्च न) तथा। पूर्वं ह्युक्तं **जातयो ष्टादशेत्येवं ब्रह्मणाभिहितमिति** (भ. रा. २८–३६) तदेतदाशङ्क्यापवादं वक्तुं तत्त्रिकमुक्तम्।।६२।।

त्रिजातित्वोत्सर्गस्य विषयमाह–

एकस्वरो द्विस्वरश्च त्रिस्वरश्च चतुःस्वरः।

इति। एते चत्वारो गणस्त्रिजातय इत्यर्थः। एवं द्वादशजातयः। एकःस्वरों शो यत्र गणे। एवं यावच्चत्वारः स्वरा अंशा यत्रेति। अपवादं दर्शयितुमाह– **प चस्वरश्चतुर्धास्यादिति**। यत्र प चांशस्वराः स गणश्चतसभिस्त्रिभिर्नाति.....भिः.....(श्चतसभिर्जातिभिः)। तेन पूर्वाभिः सह षोडश जातयः। **एकधा** सप्तषट्स्वरैरेकैव जातिः। सप्तस्वरो गणः षट्स्वरश्च। एकस्या अपि जातेर्गणस्य व्यपदेशिवद्भावेन स्वरांशकभेदे निबन्धनमित्यष्टादशजातयः। त्रिषष्टिरंशाः। त एव ग्रहा इति।।६३।।

एतदुपसंहरति– **एतदुक्तं मयेति।**

पुनश्चैव प्रवक्ष्यामि न्यासापन्यासयोगतः।।

इति। अयं भावः। अंशग्रहाश्चोक्ता एवं न्यासापन्यासास्तथा ये न्ये योगा दशलक्षणेष्वन्तःपातिनो लक्षणभागाः षाडवौडुवितादयः पूर्वमनुक्तत्वात् कथ्यमानाः कथ्यमानत्वेनोपयोगे.....स्तस्तावत् प्रतिजाति वक्तव्याः। न्यासश्चो(श्चा)पन्यासाश्च योगश्चेति द्वन्द्वः। .....न्यतो(थो)द्दिश्य वक्तव्यतयोक्तमपि ग्रहांशविकल्पनं पुनर्वक्ष्यामि। तदभिधाने हि सुस्पष्टमन्यज्जा(ज्ज्ञा)तुं शक्यमिति भावः। अंशापेक्षो हि प्रायशो न्यलक्षणमप्यहारं(व्यवहारः)। एकस्थानं च जातिलक्षणं ज्ञातुं स्पष्टतरं भवति। अतिशयशेषा यदा तु त एवंविध.....लक्ष्यं प्रप चश्चेति। दष्टादष्टोपयोगी वायं जातिसन्धिः। अन्ये त्वंशग्रहमित्यादिनां लक्षणमित्यादिग्रन्थं तत्र पठन्ति।।६४।।

षाड्जीं लक्षयति। **प चांशांस्त्वि(त्वि)ति।** सगमपधा इत्यंशाः। गप इत्येतावपन्यासौ। सं(सो)न्यासः। निषादेन (हीना) षाडव(वी) इति। अन्योन्यमनयोः स चारः। (सगयोः) तथा सध इत्यनयोः। गान्धारो तिबहुलो पि वादित्वाद(त्र) प्राप्तः। (ऋषभस्य) तथात्वं विवदनान् मन्तव्यम्। ऋषभस्यानंशत्वं निषादस्य लोप्यत्वात्। पूर्णावस्थायां तु सं.....तं सिद्धमिति पुनर्न स्वकण्ठेनोक्तं **मुनिना**। अंशाश्च दशकाः। तद्यथा शुद्धा विकृताः प च पूर्णाश्चत्वारः षाडवाः। गान्धारें शे षाडवा एवापवादात् ते चांशका लुप्तकात् स्फुटं ज्ञायन्ते। तेन लालिता अत्र स्वरभागे जात्यंशकास्ता(न)पहास्य आसारितांशं निगदा(द)स्तुति स(सा)मिध्यसु (धेनीषु) स्पष्टं गान्धर्वफलं यद्यपि तथापि स्वरत एव क्वचन मुदि.....स्थेम दष्टः। यथोक्तम्– **सकृत् प्रयुक्ता पि हि नन्दयन्तीति**। तत्प्राधान्यप्रसिद्धय एव।

तालविशेषमनादत्य सामान्यतलेन चच्चत्पुटादिना लोके वार्तिकमार्गेण जातिगानं प्रसिद्धम्। तत्र तु यत् चच्चत्पुटादि न तद् विकल्पः। स्वरभागप्राधान्यात्। पहादि.....तत्र ब्रह्मप्रोक्तविसंस्कृतप्राकृतरूपाण्येव प्रसिद्धानि। गीतकादौ तालभागस्यैव प्राधान्यम्। यथोक्तम्

वर्धमानप्रयु(यो)क्तारो यास्यन्ति शिवकेतनम्।।

इति। तत् प्राश(स्त्यबोध)नाय। त्रोटिकागीतकादीनि जात्यंशकोद्भूतशुद्धभिन्नानि ग्रामरागक्रमेण प्रसिद्धानि। मुख्यतस्तु जात्यंशकैर्गीतिरागादिना तालः संस्कृतानि पदानि स्फुटमवधानमिति सम्मिलितगान्धर्वं तदर्थमेव। तदा तादश्येव गीतकवर्धमानादि पुरा विरम्यत इत्यलं वस्तुतः।।**६५-६७**।।

अथ (आर्षभीं लक्षयति) **आर्षभ्यामित्यादि**। ऋधनि अंशाः (नयों शाः)। ऋधनि अप(नयो प)न्यासाः। ऋषभो न्यासः। षड्जहीने षाडवः। षड्जप चमयोर्ही(र्हा)ने औडुवितत्वम्। सधौ रिगौ च सङ्गच्छेते। तत्र केचित् प चमस्य लङ्घनमाहुः। पूर्णवस्थायां षड्जगान्धारप चमा अल्पत्वं भजन्ते। औडुविते च गमयोरल्पता। दशांशकाः। मूर्च्छना प चमादिः। चच्चत्पुटस्तालः। प्रायशो नैष्क्रामिकीध्रुवायां विनियोगः।।**६८**।।

अथ धैवतीमाह– **धैवत्यामिति**। ऋषभधैवतावंशो। विकृतावस्थायां रिधमा अपन्यासाः। धैवतो न्यासः। पलोपे षाडवः। सपहानावितरत्। पूर्णदशायां च पस इत्या(सावित्या)रोहवर्णगतौ कार्यो। लोप्यत्वाल्लङ्घनं सिद्धमपि पुनः प्रकर्षलाभत्वमुक्तम्। अस्याः सप्तांशकाः। शुद्धविकृतौ पूर्णौ द्वे (द्वौ) षाडवौडुवितौ च।।**६९-१०३**।।

अथ **षड्जकैशिक्या** इति। सगद(पा) अंशाः अपन्यासास्तु सपनि(नयः)। न्यासो ग(गः)। नित्यपूर्णा चेयम्। मध्यमर्षभयोदौर्बल्यमंशत्वासिद्धं पुनराधिक्यार्थं ज्ञापयति। निधयोरत्र किंचिदाधिक्यमिति। अस्या शुद्धत्वं नास्तीति त्रय एवांशकाः पूर्णाः।।**१०४-१०५**।।

अथ **षड्जोदीच्यवा। षड्जश्चेत्यादि। सम**निधा अंशाः। धस(सा) अ(व)पन्यासा(सौ)। म(मो)न्यासः। अंशानामन्योन्यसङ्गतिः। रिलोपे षाडवः(म्)। ऋपलोप औडवम्। ऋषभः संवादी धैवतस्य षड्जग्रामे न लुप्यमाने यतः। सरिगा बलिनः। अन्य(षड्ज)स्यांशत्वात् सिद्धं बलित्वं पुनराधिक्यार्थमुक्तम्। ऋषभस्यात्यल्पत्वं प्राप्तं प्रतिषेद्धुं गान्धारस्य मन्द्रस्थाने बाहुल्यम्। अस्या एकादशांशकाः। पूर्णाश्चत्वारः। षाडवास्त्रयः। धैवतांशे तदप्यपवादात्। औडुविताश्चत्वारः। शुद्धस्तु नास्ति। तत्र कैशिके पूर्वं निर्वचनमुक्तम्। तद्योगाज्जातिः। कैशिकी। उदीच्यवन्या(वायां)त्वाहः। उदीच्याः प्रयोक्तारो बाहुल्येन सन्त्यस्यामित्युदीच्या। वान्ति गच्छन्तीति। उदीच्ये पि च दश्यते। गीतं च देशनामधेयैर्बाहुल्यादिभिरुचितत्वापेक्षया व्यपदिश्यत एव। टक्करागो मालवप चमो गौडी मालवी काम्भोजीत्यादि।।**१०६-१०९**।।

अथ **षड्जमध्यमा। सर्वेशाः षड्जमध्यायामिति**। सप्तांशा अपन्यासाश्च। समौ न्यासौ। निलोपे षाडवः। निगलोप्य(पे)न्यः। निरल्पतरो यदां न्य अंशाः। स चारे यथेष्टम्। अस्याः सप्तदशांशकाः। तत्र सप्त पूर्णाः। प च षाडवा औडुविताश्च। यो.....रिसयोस्तदपवादात्। एतदुपसंहरति। षड्जग्रामाश्रयाः सप्तेति।।**११०-११२**।।

अन्यदुपक्रमते। **अतः परमिति**। अत्र गान्धारी तावत्। **गान्धार्या** इति। समगपनि(नयों) अंशा(शाः)। सपावपन्यासौ। ग(गो)न्यासः। रिलोपे षाडवः। रिधलोपे न्यत्। प चमस्य ग्रामे ह्यलोप्यत्वम्। तयोर्लङ्घनं पूर्णावस्थायामषभाद्धैवतगमनम्। अन्येषां स्वराणां न्यासस्वरविषयों शस्वरविषयश्च स चारः। तदाह– **स्वरन्यासांशगोचर** इति। स्वराणां न्यसनस्वां(स्यां)शगोचर उक्त इत्येतदर्थमन्ये व्याचक्षते। एवं चैतदनुक्तसमः(मं) स्यात्। अस्यामेकां (स्यां त्रयोदशां)शकाः शुद्धा विकृताः। पूर्णाः प च। चत्वारः षाडवाः। प चमे तदपवादात्। औडुवितो गान्धार एवांशे न्यत्र तदपवादात्।।**११३-११५**।।

अथ रक्तगान्धारी। **लक्षणं रक्तगान्धार्या** इति। सगमपनि(नयः) प चांशाः। ऋलोपे षाडवम्। ऋधलोपे न्यत्। कस्तर्ह्यस्यास्ततो विशेषः। आह– **धैवतो बलवानत्र**। तस्य हि लोप्यत्वाद्दौर्बल्यं स्यात्। ऋषभं चोल्लङ्घ्य सगेत्यनयोरन्योन्यनैकट्यं मेलनं च। अपन्यासो मध्यमः। अस्या द्वादशांशकाः। पूर्णाः प च। चत्वारः षाडवाः। प चमे प्यवादः। त्रय औडुविताः। मध्यमषड्जयोस्तु तदपवादात्।।**११६-११७**।।

अथ गान्धारोदीच्यवा। **गान्धारोदीच्यवांशाविति**। द्वौ समावंशौ। ऋषभेण षाडवः। औडुवितस्याप्येव(म्)। षड्जोदीच्ये(च्यवाया)वान्याः (मन्यत्)। अस्यामन्तरमार्गः परस्परमशस्वरयोः स चारः। सध(धा) अ(व)पन्यासौ। षड्जेनांशो पि बहुतरः। ऋषभो लोप्यो पि पूर्णावस्थायामल्पः। मन्द्रस्थाने गान्धारस्य भूयस्त्वमिति सर्वमतिदेशात्। अस्याश्चत्वारों शाः। द्वौ पूर्णौ द्वौ षाडवौ।।**११८-११९**।।

अथ **मध्यमा। मध्यमाया भवन्त्यंशा** इति। सरिमपधा **अंशाः। अपन्यासास्त एव। न्यासो मः।** गलोपे षाडवः। गनिलोपे चापरम्। समयोः पर्यायांशत्वात् सिद्धं बहुत्वम्। पुनर्वचनात् प्रकृष्टं मन्तव्यम्। गान्धारस्य लोप्यत्वाल्लब्धमल्पत्वम्। पूर्णावस्थायामपि पश्चाल्लभ्यते। अस्या अष्टावंशकाः। शुद्धाः प च। विकृतास्तावन्त एव षाडवौडुविताः।।**१२०-१२२**।।

अथ **मध्यमोदीच्यवेति। अंशः (प चमः)**। नित्यपूर्णता। गान्धारोदीच्च (वा)वद् **विधिनि**र्देशा। अपन्यासौ सधौ। मध्यमगान्धारब(बा)हुल(ल्य)म्। न्यासो मः। अस्या एकों शकः पूर्णः।।**१२३**।।

अथ **प चमी। द्वावंशावथ प चम्यामिति।** रिपा**वंशौ।** ऋनी **अपन्यासौ।** पो **न्यासः।।१२४।।**

गलोपे षाडवं गनिलोपे औडुवमिति **मध्यमावत्त्विति** शेषः। षड्जमध्यमयोरंशत्वाद् गान्धारस्य लोप्यत्वात् सिद्धे ल्पत्वे ल्पतरार्थं वचनम्।।**१२५**।।

रिम(प) इत्यनयोरन्योन्यसंगतिः। पूर्णावस्थायां च निषादाद् गान्धारगमनम्। त च परिमितम्। तस्याः षडंशकाः शुद्धाः। द्वौ पूर्णौ द्वौ षाडवौ एक औडुवितम्(तः)। ऋषभें शे (धैवतस्या)पवदनात्।।**१२६**।।

अथ **गान्धारप चम्या** इति। अंशः पः। ऋपा**वपन्यासौ।** गो **न्यासः।** नित्यपूर्णता। धैवतगमनमषभादिति गान्धार्यां(र्याः) स चारः। उक्तं **मध्यमर्षभसङ्गतिर्निषादाद्गान्धार इति प चम्याम्।** असावुभयो प्यस्यां कार्यः। एक एवास्या अंशकः।।**१२७-१२८**।।

अथान्ध्री। प चमश्चेति। ऋगपनीत्यंशाः। त एवापन्थासाश्च। ग(गो) न्यासः। सलोपे षाडवः। औडुविताभावः। ऋग अ(इत्य)नयोः संगतिः। निषादधैवतयोश्च न्यासो गत्यनुपूर्वशः। यो यदांशः प्रधानभूनस्तेन तेन स्या(न्या)सा गमनं कार्यम्। तदुक्तम्। **अंशानुपूर्व्या न्यासगमनमिति**। अन्ये चाहुः। येनैव क्रमेणांशाः स्वराः पठितास्तेनैव क्रमेण ते कार्या यावदपन्यास्वर इति। अस्यामष्टावंशकाः। चत्वारः पूर्णाः षाडवाः।।**१२६-१३२**।।

अथ **नन्दयन्ती। नन्दयन्त्यां क्रमादि**ति। प(पो)न्यासो ग्रहश्चेति वक्ष्यते। अपन्यासः अ(सो मः)। प अं(पों)शः सोप्यपन्यासः पश्चादुक्तः। षड्जेन षाडवम्। लीप्यत्वाल्लङ्घ्यत्वं सिद्धम्। पुनर्वचनादल्पतरत्वमपीति।मन्तव्यम्। **नान्ध्रीस चरण**मिति। गान्धार्यार्षभीभ्यामान्ध्री प चम्यार्षभीगान्धारीभिर्नन्दयन्तीति संसर्गज प्रकरणे निरूपणं **जातिवयस्यकारणतुल्यत्वादान्ध्रीवत् संगतिः प्राप्तेति** वचनेन निपीड्यते। एतच्चारक्तातुल्यजातिकारणिकानां जातीनां सङ्गतिरतुल्यैव कर्तव्येति सूचयति। **ऋषभस्य लङ्घनं मन्द्रगत**स्येति धर्मिस्वरूपं धर्म उपचरित इ(मि)ति। मन्द्रगतं लङ्घनमित्युक्तम्। **तारगत्या षड्जो नातिवर्तते** नातिशय्यते। .....गत्या षड्जो नातिवर्तते नातिशय्यते। तत ऊर्ध्वकं न शिरस्यसप्तकस्वराः प्रष्टव्या इत्यर्थः। अन्ये त्वाचक्षते। षड्जेव(ड्ज एव) कदाचिन्नातिवर्तते नारोहं भजते तारं न किंचित् प्रष्टव्यमित्यर्थः। **कदाचिदिति**। वैकल्पिको यं तार इत्यर्थः। अस्यामेकः पूर्णांश एकः षाडव इति द्वौ।।**१३२-१३४**।।

अथ **कार्मारवी। कार्मारव्या** इतिं ऋपधनि(नयों) अंशा(शा) अपन्यासाश्च। पन्यासता। नित्यपूर्णता। **विशेषेणेति।** अन्ये त्वनंशा इहाभूयस्त्वभाजः। सर्वेभ्यो पि विशेषेण तु गान्धारस्य यथाशक्ति सङ्गतिः। यदाह **विशाखिलाचार्यः- बाहुल्यादनंशानां विशेषतः सर्वतो गान्धारगमनमिति**। अस्याश्चत्वारों शाः पूर्णा एव।।**१३५-१३६**।।

अथ कैशिकी। **कैशिक्यास्त्वि**ति। सगमपधनिअं(नयों)शा अपन्यासाश्च। गनी न्यासौ। पर्यायेण धैवतनिषादौ यदांशौ तदा प चमो न्यासः। **कदाचित्तु ऋषभो पीति**। लोपावस्थायां तन्ना(तु ना)सौ। तथा पूर्णतादशायां तु वा भवतीति। **दौर्बल्यमषभस्य।** यतः कदाचिल्लोप(प्य)त्त्वात्। ऋलोपे यथा षाडवम्। ऋधलोपे त्वन्यत्। बलिनौ चान्त्यप चमनिषादयोः पर्यायांशानन्यापेक्षं बलवत्तरत्वमिति यावत्। षड्जमध्यमायां च यथा चाह। धैवतस्वरांशायां यथेष्टं स चारस्तद्वदिह। षडंशा ह्येषेति। किंचिन्न्यूनस चारेयमिति।।।**१३७-१४०**।।

अथ जात्युद्भवग्रामरागादिसम्भावनासूचनार्थामार्यां केचित् पठन्ति।

मिश्रं गेयं यदि यत्तदर्थितज्ञेयमधिकबाहुल्यम्।
सङ्करभूषणसन्ततिवैचित्राण्यत्र र जनातिशयात्।।

इति। **मिश्रमि**ति। जात्यंशगतानि यानि दशरूपाणि लक्षणान्युक्तानि तत्सङ्कीर्णतया यन् **मिश्रम्। गेयं** ग्रामरागादिलक्षणम्। तद्यदि कस्यापि जात्यंशकस्य सम्बन्ध्यंशो न्यस्य न्यासो न्यदीयो पन्यास इत्यादि बहुतरवैचित्र्यम्। तदेवंभूतं यन्मिश्रगेय तदस्या जातेरर्थितमिति यन्नियम्यते **मतङ्गनन्दिकश्पयाष्टिकादिभि**स्तदधिकेन रूपबाहुल्येन। यथा (विहि)तं पानकमिदमिति न तु क्रममिश्रितम्। आह सङ्करो तिसङ्कीर्णतायां तस्यां भूषणसन्ततेर्वक्ष्यमाणह्य(स्या)लङ्कारवर्गस्य बहूनि विचित्राणि जायन्ते तानि कथमाद्रियन्त इति चोदना। **र जनातिशयादिति**। तत्र ह्यधिका रक्तिरिति। तेन गात्र वागादौ सातिशयो स्योपयोग इति भावः। तत्र **सङ्करे रूपबाहुल्याज्जातिनिर्देश** (दत्तिलम्–६६) इति **दत्तिलाचार्यो** प्याह। षड्जोदीच्यवतीसमाभिन्नषड्ज इत्युच्यते नन्दयन्ती भिन्नरूपबाहुल्येन। .....धैवतों शः। मध्यमो न्यासः। ऋषभप चमीनतेति। अत एव ग्रामरागाणां लक्षणं मुनिनोक्तम्। **कश्यपादयो** पि सम्प्रणेतारः प्रसिद्धास्त्विति छलयन्ति लोकान् सर्वथा र्थे नभिज्ञाताः। व्यावत्तिस्तावदस्त्वित्याशयेन तल्लक्षणं सङ्क्षिप्य पठामः क्रमेण।

षड्जा(षाड्जी)मध्यमयोर्मध्यमोदीच्यायाश्च सङ्करात्।
मान्तौ स्यातां (क्रमात्) षड्जमध्यमग्रामसंज्ञकौ।।
मांशान्तो मध्यमोद्भूतो रागः स्याच्छुद्धषाडवः।
यांशान्तो ल्पगनिर्मध्यमाप चम्योस्तु प चमः।।
सांशौ मान्तौ तयोश्चैको धैवतीषड्जमध्ययोः।
कार्यः कैशिकमध्यो न्यो जातः साधारितः स्मतः।
विगनिः कैशिकः पूर्णः सांशः पान्तश्च कैशिकी।
कार्मारव्यस्य हेतुः सा सप्तधा शुद्धगीतिका।।
षड्जोदीच्यादिभन्नषड्जो धांशो मान्तः परी(गतः)।
पांशो मान्तो भिन्नतागः प चमीमध्यमोद्भवः।।
सांशो मान्तो ल्पगनिको ज्ञेयः कैशिकमध्यमः।
षड्जमध्योद्भवो धांशः पान्तो सौ भिन्नप चमः।।
दुर्बलो रिश्च मन्द्राशौ प चमीमध्यमोद्गतः।
कार्मारवी षड्जमध्यासम्भूतो भिन्नकैशिकः।।
सांशः पान्त प चभेदभिन्नगीतिरि(र)यं मता(तः)।
धैवतीषड्जमध्योत्थो विपनिर्गौडप चमः।।
धांशो मान्तः सांशमान्तो निष्पः कैशिकमध्यमः।
धैवतीमध्यमोद्भूतः सांशः पान्तस्तु कैशिकः।।
कार्मारवीषड्जमध्याजात्योस्त्रेधा तु गौडजः।
सौवीरः षड्जमध्योत्थो टक्कः सांशान्तो बहुसङ्गतिः।।

सांशानः(न्तः) षड्जमध्योत्थः सौवीरो गनिवर्जितः।
यांशान्तो विगनिर्मध्यप चम्योर्मालवेसरः।
मांशान्तः षड्जमध्योत्थो गनिर्वेसरषाडवः।
धपमध्योद्भवा(वो)पांशो मान्तो (बोट्टः)।
हिन्दोलकश्च सांशान्तो रिधजात्यन्यसम्भवः।।
धांशान्तो त्पनिगष्टक्ककैशिको मधजातिभाक्।
कैशिक्युत्थो विधिः सांशन्यासो मालवकैशिकः।।
अष्टधा वेसरागीतिः.....।
.....।।
आर्षभ्युत्थ.....।
.....।।
पूर्णस्तु (पान्तो)धान्तो वा सांशो भम्माणप चमः।
मान्तो ल्पगनिकः षड्जमध्यमोत्थनिषादजः।।
सन्यंशो रूपसाधारो मान्तो गान्धारसम्भवः।
गान्धारप चमो गांशन्यासस्त्रिश्रुतिदुर्बलः।।
रंशो मान्तश्चार्षभीजो रेवगुप्तो विषड्जकः।
द्विश्रुत्यल्पो.....सांशः कैशिक्याः षड्जकैशिकः।।
सांशान्तः सधजातीजो निगो(गा)ल्पः(ल्पों)शकप चमः।
इतीयं नवधा गीतिः साधारण्याख्यया स्मतः(ता)।।
एषा विभाषा गीति तु ग्रामरागाश्रिते मते।
ध्रुवागानोपयोगाय तदेतद्गीतिसप्तकम्।।

एतत्सङ्ग्रहायेयमार्या कैश्चित् पठिता। अस्मत्पुस्तकेषु न तथा दश्यते। न च तया विना न सङ्गहीतमेतद्भवति जात्यंशके हि सर्वं स्वीकृतम्। तत्रापि चा(मा)र्जनोपयोगिनो वैचित्र्यह्य(स्या)भ्यनुज्ञानं मुनिनैव कृतम्। चतुःस्वरप्रयोगो पि अप(ह्यव)कृष्टध्रुवास्विह। (भ. ना. २८–७७) इति वदतोत्तरत्र चालङ्कारवैचित्र्यं विभजतेति।।

अध्यायार्थामुपसंहरन्नर्थान्तरं प्रस्तावयति। **एवमेता** इति। दष्ट(दश) लक्षणव्यभिचारिणी द्वेतु(चारिहेतु)सम्भवमात्रत इत्याशयेनाह– **बुधैरिति। यथा यस्मिन्निति।** यत्र रसे येनांशन्यासादिना प्रकारेण या इत्यर्थः। गदतो मे इत्यनादरे षष्ठी। तेन मद्वचनमेवात्र न केवलं प्रमाणम्। यावत् **काश्यपमुनिप्रभतिभि**रपि यन्निरूपितं तदपौति शिवम्।।**१४१**।।

शिशिरकरकलाशेखरचरणाम्भोजाश्रयाकलिततापः।
अभिनवगुप्तो गुप्तं जात्याध्यायं विचारितवान्।।

इति श्रीमहामाहेश्वराचार्याभिनवगुप्तविरचितायां नाट्यवेदवत्तावभिनवभारत्यां
जातिविकल्पाध्यायो ष्टाविंशः समाप्तः।।

श्रीः

नाट्यशास्त्रम्

एकोनत्रिंशो ध्यायः

जातिविनियोगकल्पं भूषणवैचित्र्यमपि हि जनयति या।
वन्दे तमभेदकरीं तां नियतिं शाङ्करीं शक्तिम्।।**१**।।

अस्य योनिर्भवेद्गानम्। (भा. ना. २८–१०) इति गानसमन्वयेनास्य गान्धर्वलक्षणस्यार्थस्यागतत्त्वाज्जात्यात्मको यो गान्धर्वभाग उक्तस्तस्य भागे केनांशेनोपयोग इत्यभिप्रायेणाध्यायान्ते पूर्वमुक्त **यथा यस्मिन् रसे योज्य (याश्च** भ. ना. २८–१४१) इति। गान्धर्वशेषतैव चार्थस्य मा सम्भावीत्येतदर्थमध्यायच्छेदः। तथा च वक्ष्यति। **एवमेता बुधैर्ज्ञेया जातयो नाट्यसंश्रयाः।** (भ. ना. २९–१३) इत्थं नाट्योपयोगिन्य इत्यर्थः। तत्र षड्जग्रामाश्रितास्तावद्रसेषु विनियोक्तुमाह। **षड्जोदीच्यवती चैवेति।** षड्जोदीच्यवत्या मध्यमेन यों शकः षड्जमध्यमायाः षण(ड्जो)मध्यमप चमाभ्यां ते त्रयों शकाः। **शङ्गारहास्ययोरित्येव मध्यमप चमबाहुल्यादिति** यथासम्भवं विनियोज्या।।**१**।।

षाड्ज्यां षड्जेन यों शक आर्षभ्यामषभेण तौ वीराद्भुतरौद्रेषु। तदाह– **स्वस्वरांशपरिग्रहादिति।** स्वो नाम स्वरस्तस्य यों शत्वेन परिग्रह इत्यर्थः।।**२**।।

निषादिन्या यो निषादांशक षड्जकैशिक्याश्च गान्धारांशकस्तौ करुणे।।**३**।।

धैवत्यां धैवतों शको बीभत्सभयानकयोः।।**४**।।

अथ मध्यमग्रामजातीनां विनियोगमाह– **गान्धारीरक्तगान्धार्याविति**। एतयोर्द्वयोरपि गान्धारनिषादांशकौ करुणे।।**५**।।

मध्यमाद्याः प च मध्यमप चमांशकाः शङ्गारे **हास्ये** च।।**६**।।

कर्मारव्यादयस्तिस्रो वीररौद्रयोः षड्जषंभांशकयोर्योगे। **कैशिकी** धैवतांशा बीभत्सभयानकयोः।।**७**।।

अत्र **टीकाकारः** शङ्कते। यो यं जात्यंशकानां विनियोग उक्तः स **कश्यपमुनिमतङ्गिादिभि**र्विरुध्यते। तथाहि तैरुक्तम्।

सम्भोगे चैव श्रङ्गारे प्रेङ्खोलितकमेव च।
कामभूतेषु सर्वेषु कुर्यान् मालवकैशिकम्।
भिन्नषड्जो मानदैन्ये चैकान्ताजीवितस्य च।।

इत्यादि। न च ते रसजातय एतेषु मतेषु। रसेषु विनियुक्ताः। येन विरोधः स्यात्।

अत्राहुः। कश्यपाद्यैस्तावन् मालकैशिकादीनां तत्तच्चित्तवत्या जीवनौचित्यं दष्ट्वा विनियोग उक्तः। न तस्यानध्यापकत्वादङ्गीकर्तव्यम्। **मुनिना** जात्यशंकविनियोग आधाराभिप्रायेणोक्तः। तथाहि– **यावन्तः परमार्थतः स्वरा** इति सप्तचत्वारिंशत् स्वराः। यदाहुः। **त्रिरूपविश्वरूपा** इति। (३+४४=४७) सङ्क्षेपेण ह्युदात्तादयस्त्रय एव स्वराः। विस्तरविवक्षायां तु जात्यंशक्ग्रामरागभाषादेशीमार्गवैचित्र्येणानन्ता एव स्वराः।

अन्ये हि षड्जः षाड्ज्यामन्यश्चार्षभ्यां समाने जीविभिः पाणिपादादियोगे यथा स एव चैत्राद(दि)यो(र्यो) श्वपतित्वं महामात्रत्वं सेनापत्यं मन्त्रित्वं पौरोहित्यमिति विचित्रधर्मयोगित्वमुद्वहंस्तत्परिवारमध्यान्निष्क्रान्दो प्येकैको विग्रहावस्थितेनाविभिन्नमेवाभिमानं बिभर्ति तद्वत् तत्तदंशकवैचित्र्ययोग्यंशस्वर एव केवलो रूपी विचित्राकारः। तथाहि। तुल्ये च श्रुति(त्ये)कत्वे न्यादशो मालवकैशिके षड्जो भाति। टक्करागे त्वन्यादशः। तथापि वेगस्वरसैन्धवभेदेन भिन्न एवावभाति च। कर्ण्यः षड्जध्वनिमात्र एव(क) श्रुतिष्टक्करागो यं सैन्धवो वेगस्वर इति मालवकैशिको वा गीयत इति। सो यं सकलकरणोपजीवनप्रतिस्वभावभेदस्य त्र्यंशकस्वर इह अंशे स्थायी तत्र तत्र रसे कर्तव्यो मालवकैशिकादावपि गीयमाने स्वरणानुदय एव। पश्चादिति(दपि) दष्टतदाधारमभि(मि)माना आधेयस्यापि वैचित्र्यसिद्धिरिति।

उपाध्यायास्त्वाहुः। एवम्भूतस्तावदाधाराधेयभावो लक्ष्ये न लक्ष्यते। न च तस्य वैचित्र्यकारित्वं कि िचदस्ति। नापि **मुनेः कश्यपादीनां** वचनमत्र कि िचदस्ति। न च नियमादष्टस्यायं विषयः। तस्मादयमभिप्रायो **मुनेः।** इह जात्यंशका एव परमार्थतः समस्तगीतसर्वस्वम्। तत्र हि रागभाषादयो प्यन्तर्भूताः। न चायं नियमः। एकेनेव जात्यंशकेन भवितव्यम्। अत्रैव रस इति। तथा ह्याह। **एकैव षड्जमध्यासर्वरसेषु जातिः।** सप्तांशा हि सेति। तत्र यथा मालवकैशिकविनियुक्ते षड्ज(ड्जे)श्च(च) र चनातिशयसिद्धये सैन्धविकाहर्षपुरिकादीनां भाषाणां गानमविरुद्धम्। तस्मात् तत्र तत्रांशके गीते सति तद्रक्त्यतिशयस्वा(स्या)वश्य(श्यं) मालवकैशिकादेर्गानं भविष्यति रक्त्यतिशययोगात्। अत एव ह्येते ग्रामरागा इत्युक्ताः। ग्रामो हि जातिसमूहस्तस्य सम्बन्धिनो रक्त्यतिशया इति।

एतदप्यपरे नानुमन्यन्ते। न हि षड्जोदीच्यवत्या मालवकैशिको हिन्दोलको हि रक्तत्वेन जातिजातः। (सा हि) भिन्नषड्जस्य कारणत्वेनोक्ता। भिन्नषड्जहेतुरपि जातिस्ताभ्यां रक्तिमति सम्पत्स्यते।

को विरोध इत्यपरे।

अन्ये मन्यन्ते। यथा स्थायिसूत्रस्य यदा व्यभिचारिभ्यः सकाशाद्रुदेको लक्ष्यते तदा रसदष्टीनां प्रयोग उक्तः। तद्वज्जात्यशकानां स चारिभावास्तु व्यभिचारिसम्पाते भावदष्टीनामिव ग्रामरागादीनामिति।

युक्त्यन्तरं त्विदं लक्ष्यते। किमनेन तन्त्रान्तरशीले(लने)न। **कश्यपादिभि**स्तावान् यो(वद्यो)विनियोग उक्तः सोप्यत्र। अयमपि **मुनि**विनियुक्तो स्तु। **परमतमप्रतिषिद्धमभिमत**मिति स्थित्या हि न्यायात्। वैकल्पिकत्वे को विरोधः। प्रत्युत **कोहलस्तद्वदिष्यतीति** (भ. ना. ३७–१८) सर्वमनुज्ञातमेव मुनिना। एतत्प्रसिद्धये तत्र तत्रोक्तं रक्त्यतिशययोगाच्च। लोके कोहलकश्यमादिमतमेव प्रसिद्धिमुपगतमित्यलं बहुना।।८।।

न चायमेव नियम इति दर्शयितुं समस्तलक्ष्योपसंग्राहकं च सामान्यलक्षणं वक्तुमाह।

यो यदा बलवान् यस्मिन् सर्वे(स्वरो) जातिसमाश्रयात्।
तत्प्रवक्तं रसे गानम्।। इति।।

यस्मिन्निति। ग्रामरागभाषादौ। तेनेदमुक्तं भवति। क्वचिद्विशेषविनियोगस्तावदुक्तो यथा मालवकौशिकादौ। तत्रापि सर्वांशकायोगे भाषाद्वारेण भावनेन नियम्यते। एतदुक्तिर्विशेषप्रधानो यम(व)लम्बनीयो यथा प चमप्रधानतया सैन्धव्या भाषया श्रङ्गारः सम्यगुद्दीपितो भवति मालवकैशिकेनेति।।६।।

एवं तावद्विनियोगे सति विनियोगशेषो यं ग्रन्थो यत्र तु नोक्तस्तत्र जात्यंशकस्वरपर्यालोचनया भ्यूहनीयो विनियोगः। तेन ककुभश्च करुणे यद्यपि निषादगान्धारप्रधानया भोगवर्धनिकया समुपरक्तो सौ सम्यक् करुणमभिव्यनक्ति। तदेतदाह– **मध्यमप चमभूयिष्ठमि**त्यादि। ये त्वेनमग्रग्रन्थजातिविनियोगस्य शेषत्वेन व्याचक्षते तैः पौनरुक्त्यं दुष्परिहरम्। तस्य प्रथमए(मे)वोक्तत्वात्।।**१०-११**।।

ननु एकैव **षड्जमध्या विज्ञेया खिलरसाश्रया जातिः**। इत्यार्या पुनरुक्तार्था। नैतदिदं ह्यनयोच्यते। जातिभिः सर्वं व्याप्तम्। जातयश्च सर्वाः षड्जमध्यमायाम्। तथाहि। षड्जग्राममध्यमग्रामयोर्ये(या)प्रधानभूते(ता)आद्यजातीनां या चेयद्भूतेति सर्वस्वरांशा तदेवास्यामंशाः। एतेन यावत् किंचिद्रक्तिसर्वस्वं संसारे स्ति तत्तत् षड्जमध्यमायां पिण्डीभूतमिति तदंशकेष्ववधातव्यम्। रक्तिलाभे **सर्वे स्वराश्च विहिताः प्रयोगविधाविति** विन्यासादिभावेन चेत्यर्थः। कि च ये केचित् प्रयोगस्य गेयस्य विधौ प्रकारभेदे गीतिसप्तके ते स्वरा(के स्वरा)स्ते स्यामेव जातौ विहिता एकीकृता इत्यर्थः।।**१२**।।

यदि नामास्यां जातावपि पिण्डीभूतः सर्वप्रयोगास्ततः प्रकृते किमित्याशङ्क्याह– **सर्वेष्वंशेषु रसा नियमविधानेन सम्प्रयोक्तव्या** इति। षड्जमध्यमयोः सम्बन्धिनो यें शकास्तेषु सर्वेषु रसा यथोचितं सम्यक् प्रयोक्तव्याः।

काकल्यन्तरविहिता विशेषयुक्ताश्च बलवन्तः।। इति।

स्वरविशेषः(च)षड्जमाश्रित्य बलवत्त्वम्। काकल्यन्तरयोरपि न प्रयोगमात्रमादरणीयमपि तु बलवत्त्वमेव। जातीनां नान्योपयोगं कथयन् रसादियोगो जातीनामनुद्दिष्ट एव किमिति कथित इत्याशङ्कां शमयति।

एवमेता बुधैर्ज्ञेया जातयो नाट्यसंश्रयाः।। इति।

इत्वमेता नाट्योपयोगिन्यो ध्रुवागानोपयोगदिशेत्यर्थः।।**१३**।।

तत्तल्लक्ष्यप्रबन्धगानोपयोगि कश्यपाद्युद्दिष्टं विनियोगजातं कथ्यते।

ध्रुवागानान्निजावेशे त्यक्ते निष्कलधीजुषाम्।
सामाजिकानां हृदये सङ्क्रामेत् प्रस्तुतो रसः।।१।।
तत्र शुद्धरसेनोक्ता भाषा रक्त्यंशसम्भवात्।
अतो नुल्बणचिद्वत्तौ सन्धिशेषे नियोज्यताम्।।२।।
मुखे तु मध्यमग्रामः षड्जः प्रतिमुखे स्मतः।
गान्धारो गर्भसन्धौ स्यादवमर्शे तु प चमः।।३।।
कैशिकः स्यान्निर्वहणे प्रशस्त्यन्ते तु मध्यमः।
षाडवः पूर्वरङ्गे स्याद्विष्णोर्ग्रामद्वयं विदुः।।४।।
गौर्यास्तु प चमं कुर्यात् साधारं स्कन्दसूर्ययोः।
मध्यमं कैशिकं विद्यात् साधारं च भयानके।।५।।
ललित(तादि)रियं शुद्धा गीतिः स्यान्नाट्यवत्तयोः।
दैन्यावमानभूयिष्ठे रसे षड्जो विधीयते।।६।।
कामिनीजनिते स्यापि भाषास्तद्व्यभिचारिषु।
शुद्धावहित्थे गोप्यत्वे दाक्षिणात्या सधैवते।।७।।
चिन्तायां कणिकौत्सुक्ये पौराली धूर्तजालिके।
वाङ्गाली खेदप्रणययोः सैन्धवी तापसाम्बरे।।८।।
कालिन्दी सम्मदे कुत्से पुखिन्द्यात्मप्रवासिनि।
त्रावणी शोकभूयिष्ठे षड्जाख्या तीतसम्मदे।।९।।
मालवी गुर्जरी चाथ चिन्ताप्रशमयोः क्रमात्।
मतिधत्यवहित्थेषु गीयते बाह्यषाडवा।।१०।।
कौसला कौशले कुर्याद्गान्धारी षड्जवर्जिते।
मदौ सौवीरललिते लालिते लवितासमे।।११।।
तुम्बुरावश्यकैशिक्यौ गा(क्योर्गा)न्धारललिता भवेत्।

कर्णाटी बन्धनिर्विण्णा(ण्णे) चित्रकर्मणि वा भवेत्।।१२।।
कालिङ्ग्यमर्धावेशे तु लिङ्गिनां कपटात्मनाम्।
मध्यमा स्मतिशङ्कासु निर्विण्णे पार्वती भवेत्।।१३।।
निषादिनी विमोहादौ भिन्नषड्जे गणस्त्वयम्।
स्थापकीये सभोत्साहे भिन्नप चम उच्यते।।१४।।
सम्भ्रमे नर्तरागस्य मले(दे) कैश्चिदथाद्भुते।
श्रमाद्यसूयामर्षेषु शुद्धभिन्नां(न्ना) नियु च(ज्य)ते।।१५।।
वराटी वर्षसंवेगविस्मयेषु विधीयते।
धतिस्मत्यवहित्थेषु भवेद्धैवतभूषिता।।१६।।
आलस्यदैन्यमोहेषु विशाला व्रीडिते पि च।
गर्वौत्सुक्यवितर्केषु दढमापरिगीयते।।१७।।
त्रासशङ्कासम्भ्रमेषु कौसल्या विनियुज्यतें
वाङ्गाल्यमर्षवेगेषु धतिस्मतिषु च स्मता।।१८।।
उत्तमे करुणे भावे सू(त)ये व्यभिचारिणि।
कार्यान्तरा (तुरोद्)भूते भाषा कामोद्भवा मता।।१९।।
छन्ने भिलाषे श्रङ्गारे वीरे धर्मात्मके तथा।
कृतकर्तव्यतायां च कर्तव्यो भिन्नकैशिकः।।२०।।
दढौचित्याद्भुतोत्साहे भिन्नकैशिकमध्यमः।
अनयोर्भिन्नयोर्बालाकैशिक्यो व्यभिचारिणी(णि)।।२१।।
सूक्ष्मवक्त्रा स्वरैर्जात्या श्रुत्या भिन्ना निरूपिता।
अतत्स्वभावो यो रौद्र उत्साहो धर्मवर्जितः।।२२।।
गौडप चममिच्छन्ति तत्रैके कश्यपादयः।
चिन्तादैन्यधतिश्रद्धामर्षादौ द्रामिडी स्मता।।२३।।
दुःखे दुरन्तेष्वभये पताकादेर्नियुज्यतें
गौडकैशिकमेकस्य भाषां तन्नामिकामपि।।२४।।
भयानके मध्यमः स्याद्भिन्ना चोत्साहयोगिनि।
नन्दयन्तीव तद्भाषा भवेत्तु व्यभिचारिषु।
गौडगीतिरियं प्रायो वेगस्वरविचित्र(त्रि)ता।।२५।।
टक्करागस्तु कर्तव्यो रसयोर्वीररौद्रयोः।
दीप्ते च हृदये स्यार्धं स्याद्गाढविषये पि सः।।२६।।
हर्षे वा प्यथ चिन्तायां त्रवणा त्रवणोद्भवा।
वैरञ्जिका हिता वन्ध्या छेवाडी रणकल्पने।।२७।।
मालवेसरिका कार्या समराङ्गणकल्पने।

गुर्जर्यमर्षावेगेषु सौराष्ट्री निष्ठुरात्मके।।२८।।
सैन्धवी परितोषे स्याद्वैरस्ये वेसरी मता।
प चमाख्या विहसिते रविचन्द्रा विषादिनि।।२९।।
अम्बाभे (ही)री मदोन्मादे ललिता दर्पविप्लवे।
कोलाहलिः कलकले मध्यमग्रामिका धतौ।।३०।।
शङ्कासूयाश्रमे भाषा गेया गान्धारप चभी।
धते(ता)वेता मतिस्मत्योः स्याद्दिवाकरवर्धिनी।।३१।
पौराली दीप्तभावेषु सादतौ(त्वते)तानतूलिका।
महानिर्वेदभावानां ।।३२।।
चिन्ताविषादनिर्वेदे शार्दूली शोकसंश्रया।
जये हर्षे वितर्के च मालवी परिगीयते।।३३।।
स्वाध्यायादिप्रसक्तेषु तद्भावस्थे च गीयते।
सौवीरी मतिधत्योस्तु सौवीरी वेगमध्यमा।।३४।।
साधारिता च हर्षे स्याद्गान्धारी शोकचिन्तयोः।
अभिलाषिकश्शङ्गारे मध्यस्थे हृदये थवा।।३५।।
संसार(वि)तथा(ता)वाथ गेयो मालवप चमः।
निर्वेदग्लानिशङ्कासु भ्रमे वा भेरिका भवेत्।।३६।।
आवेगशस्त्रसामर्षगवौग्र्ये भावनी मता।
पाङ्काली च मदोन्मादे सैन्धव्यौत्सुक्यनिद्रयोः।।३७।।
गुर्जरी धतिहर्षादावन्धाली मदवद्विषु।
कामावस्थां दाक्षिणात्या सर्वामुद्दीपयेत् किल।।३८।।
श्रान्तावहित्थमतिषु तर्के तानोद्भवा मता।
त्रवणी मदनावस्था शोकोत्कण्ठासु कथ्यते।।३९।।
नीचानां मदशङ्कौग्र्यगर्वालस्येषु कौशिकी।
करुणे दैन्यभूयिष्ठे आहुर्वेदवतीं बुधाः।।४०।।
पौराल्यध्वश्रमे हर्षे गर्वे त्व(त्वा)न्ध्रीं प्रचक्षते।
औग्र्ये क्रोधे च गान्धारी सङ्गमे च विभावनी।।४१।।
भिन्नकैशिकमध्यस्य स्थाने वेसरवाढ(ड)वः।
पुष्पमोक्षे चावहित्थवत्त्यादौ बाह्यषाढ(ड)वः।।४२।।
रवान्धा हास्ययोगे तु म(मा)ङ्गल्ये वोट्टरागतः।
मङ्गलाख्योत्सवे हर्षे रागशोभाविधायिनि।।४३।।
रतेः कामदशानां वा भिन्नत्वे टक्ककैशिकः।
भिन्नषड्जस्य वा स्थाने चिन्ताव्रीडासु मालवी।।४४।।

अन्ये तु कथयन्त्येनां चेटिकाशबरादिषु।
रोषे स्यात् कैशिकी बन्धे भये स्याद् द्रामिली शुचिः।।४५।।
विप्रलम्भे कामदशायोगे मालवकैशिकः।
शुद्धा स्याच्छुद्ध(गान्धारी)पौराली शोकगोचरे।।४६।।
हर्षे हर्षपुरी ख्याता चिन्तायामर्धवेसरी।
जुगुप्सायां तु पाङ्गाली सैन्धवी मोहगोचरे।।४७।।
नर्मस्फ जे(स्पन्दे) पि चाभीरी ख जनी गीयते शुचिः।
अमर्षे गुर्जरी रौद्रे कैशिकी च सुरार्चने।।४८।।
धतौ मतौ श्रमे पोता स्यात् सिन्धुवनिता भये।
शार्दूली यज्ञकर्मादौ धतिस्मतिमतिष्वपि।।४९।।
प्रेङ्खा सम्भोगश्रङ्गारे विदूषकपरिक्रमे।
आवेगे वेसरी दैन्यचिन्तयोश्चूतम जरी।।५०।।
औत्सुक्ये विश्रमे खेदे छेवाडीं सम्प्रयोजयेत्।
षड्जमध्यमिका हर्षधत्योर्मधुरिका तथा।।५१।।
शोके च हविचन्द्राख्या मदोन्मादेषु पि जरी।
व्रीडायां भिन्नवलिता चापले च विधीयते।।५२।।
कर्तव्या भिन्नपौराली हासासूयावितर्कगा।
द्राविडी स्यात् परिभ्रष्टे पार्वत्युसाहहर्षयोः।।५३।।
अष्टधा रागगीतिः स्याद्दोषाला(दा)वित्यजीविता।
शोके वेक्षे तु ककुभो धतौ काम्भोजिका मता।।५४।।
मध्यमग्रामिका गर्वे चिन्तालस्येषु माधुरी।
ख्यालवाहनिका चिन्ताश्रमस्त्रीवेषु गीयते।।५५।।
भोगवर्धनिका शोके दैन्ये निर्वेदचिन्तयोः।
निद्रीन्मादजडत्वेषु साकाङ्क्षे वलिता तथा।।५६।।
भिन्नप चमिकां कुर्यात् स्मतौ धत्यवहित्थयोः।
भोगवर्धनिकास्थाने मदे मा भीरिका भवेत्।।५७।।
विषादचिन्तानिर्वेददैन्यखेदप्रजागरे।
उरगन्ती च पौराल्या धीवराद्य(ह्य)वहित्थगा।।५८।।
प्राकृतेषु सचिन्तेषु गातव्या शकमिश्रिता।
उक्ते रहुविक(रहति च)स्थाने योज्यते किरणावली।।५९।।
रेचयन्ती बन्धुवदे(धे) विच्छदे प्रियाबान्धवे।
ललिता धैर्यगाम्भीर्ये हर्षे बाङ्गालकेसरी।।६०।।
नर्तरागमिहेच्छन्ति यत्र मालवकैशिकः।

ककुभो वा दैन्यचिन्तात्रस्यमोहेषु नर्तकी।।६१।।
वीराभासे तु हास्येन निर्वाहे शक इष्यते।
शङ्कावहित्थनिर्वेदश्रमे तद्वलिता स्मता।।६२।।
नारीलास्यदिदक्षायामाहुः प चमषाढ(ड)वम्।
अस्ये(स्य) भाषे(षा) रेवगुप्ता शकस्याथ स्वतन्त्रका।।६३।।
रागो हर्षमदोत्साहधतिस्मत्यादिगोचरः।
मार्गभ्रष्टे थ बीभत्से नीचे भम्माणप चमः।।६४।।
श्रमशङ्कावितर्केषु कार्या मध्यमभूषिता।
रूपताधारितष्टक्करागस्थाने स्वरूपतः।।६५।।
गान्धारप चमः सा च नीचस्याद्भुतहास्ययोः।
बीभत्से हास्यवीरोगे कर्तव्यः षड्जकैशिकः।।६६।।
चिन्तावितर्कयोः सा स्यात् स्त्रीणां मालवप चमा।
औत्सुक्ये प्रोषिते पत्वा शङ्कासूयासु भावनी।।६७।।
इति साधारगीतिः स्यात् सर्वगीतिविमिश्रणात्।
भूयस्त्वल्पत्वतो माव(वो)व्यभिचारिगतो भवेत्।।६८।।
गानं रसेषु यत्रोक्तं विषयस्यैकतास्थितिः।
ध्रुवादौ मध्यमग्रामषड्जौ षाडवप चमौ।।६९।।
गान्धारमध्ये कैशाख्या पगौ गान्धारप चमः।
सूर्ये सौवीरकश्चण्ड्याः कैशिकः प चमे पि ह।।७०।।
सर्व एव सुरारातौ भवेन् मालवकैशिकः।
सर्वे रागा महादेवे सम्यक् सन्तोषपोषकाः।।७१।।
गीती(तिः) साधारणगौडीये नाट्ये तु प्रहरद्वये।
भिन्ना न चरमे सैव पूर्वस्मिन् न तु जातुचित्।।७२।।
नाट्यादभावात्तानः स्यादमङ्गलतमो ह्यसौ।
चरमे रागगीतिः स्यान् नाट्ये न नियमः स्वयम्।।७३।।
प्रेङ्खोलितो वसन्ते स्यात् तथा मालवप चमा(मः)।
टक्करागो गौडककुभो भिन्नषड्जो थ कैशिकः।।७४।।
भिन्नप चमकश्चेति ग्रीष्माद्यतुषु संमता(ताः)।
इत्येष कश्यमाद्युक्तो विनियोगो निरूपितः।।७५।।

ननु शान्तरसे न केनचिदंशकेन गानमुक्तम्। विस्मरणशीलो सि। स्मर्यसे(ते)। उक्तं हि। न शान्तरसप्रधानता प्रयोगस्य भवति। सतो पि हि रसान्तरोपरक्त एव प्रयोगयोग्यो नान्यथेति।

एवं विनियोगजात्यंशकानभिधायाधुना वक्तव्यान्तरं वक्तुमुपक्रमते।

अत ऊर्ध्वं प्रवक्ष्यामि वर्णालङ्कारलक्षणम्। इति।

ननु वर्णादेर्जातिशरीरानुप्रवेशाज्जातिलक्षण एव निरूपणं युक्तं दश्यते। लब्धात्मलाभस्य हि विनियोगो युक्तः। दशलक्षणादपि वा पूर्वं विनियोगो वक्तव्यः। विनियुक्तस्य लक्षणमित्यपि दश्यते। षष्ठे तु तदभिधानमयुक्तमिव। उच्यते। जातिर्नाम स्वरसमूहमात्रम्। पदसम्बन्धीनस्तु वस्तुवर्णव्यवहारः। तदायत्ताश्चालङ्काराः। न चार्थविशेषाभिधायिना पदेन सम्बन्धो विनियोगमन्तरेण भवति।

नन्वेवं न्यासापन्यासावपि तत्रावाच्यौ। तयोर्हि समस्तविद्यासमाप्तिः। असाबवान्तरविदारी समाप्तिश्च स्थानम्। विदारी चावान्तरपदसमूहविच्छेदरूपा। यद्येवमत्स(ल्प)त्वमिदमुच्यते। ग्राहांशादयो पि पदापेक्षा एव। तर्हि गीयमानपदाभावे कश्चिदपि स्वतः स्वरोपयोगो स्ति गाने गान्धर्वे वा। **समवाये गान्धर्वमिति विशाखिलाचार्यः।** तस्मात् पदसम्बन्धः सर्वत्र प्रयोजकः। किं तु वर्णो नाम पदसम्बन्धमन्तरेण लक्षयितुमेव न शक्यते। तथाहि वक्ष्यते। **पदं लक्षणसंयुक्तमिति** (भ. ना. २६.१७)। ग्रहादयः स्वरारम्भबाहुल्यतरा वा हीनत्वसमाप्तिलक्षणाः। तथा च पदनिरपेक्षे प्यन्तरालापादावपि भवत्येव तैर्विना जात्यंशका रागस्वरूपमेव न किंचिदुन्मूलयन्ति। अलङ्कारस्तु परमार्थतः पदग्रामस्यैवालङ्कार्यत्वादंशकयोगाद्धि गीयमान एव सम्पद्यते। अर्थयोगादिव सार्थकं वत्तबन्धयोगादिव च श्रव्यं प्रसन्नादिप्रभत्यलङ्कारसम्बन्धात्तु तदेव गह्यतममित्यलङ्कृतं सम्पद्यते। उपमानप्रसादिकायोगादिवालङ्काराणां च (जीवभावः प्रसन्नादिभावे)नाश्रयो वर्ण इति पदाधीनस्वभावत्त्वादेषां विनियोगानन्तरमेव युक्तमभिधानम्।

टीकाकारास्त्वाहुः। आश्रयस्वरस्वरूपेण जातीनां गान उपयोगो न तु रक्तिसम्पादकत्वे। तत्तु ग्रामरागाणामेव। ते प्यन्यैरेवोक्ता इति न मयोच्यत(न्त) इति। मण्डपो दीपयोगी वास्तु.. ....वदित्यत्रार्थे ज्ञापकमिदम्। वाक्यानां पश्चादभिधानम्। एतच्च पूर्वमेव विचारितमित्यास्ताम्। एतच्च (वं च) क्रियाविस्तारवाची वर्णशब्दः। तथाभिनयक्रिया एवस्वरमात्रावस्थानेन वा आरोहणेन वा अवरोहणेन वा व्यामिश्रतया वा सम्पद्यत इति चत्वार एव वर्णाः। (तदधिका) न भवन्ति। तदाह। **आरोही** चेत्यादि **अलङ्कारास्तदाश्रया** इत्यन्तम्। सामान्यमेवाश्रयमित्युक्तं पूर्वमेव बुद्धावाश्रीयमाणत्वात्। एकस्वरेणैव गायामीति यावत् स्वरविशेषान् **स्रग्धरायां** गायामीत्यभिसन्धाय गायन् प्रयोक्ता लङ्कारान् प्रयुङ्क्ते तावत्। स्वरालङ्कारेषु यत् सामान्यं स **वर्णः**। तेनारोहणावरोहणावस्थानस चरणान्येव परमार्थतो वर्णः। तद्योगात्तु गीयमानं पदमपि **वर्णक** इत्युच्यते।।**१४**।।

तदभिप्रायेणैव **आरोहन्ति स्वरा यत्रेति लक्षणम्**। तुरवधारणे। आरोहन्त्येव न त्ववरोहन्ति। आरोहण एवावरोहणमिश्रीभाव एव गान्धारः स्यात्। एवमवरोहन्त्येवेति।।**१५**।।

समा इति तुल्यजातीयाः। तेन मन्द्रतारमध्यमरूपतया तस्यैव स्वरस्य प्रयोगः। स्थाय्येव वर्णः। विच्छिद्य विच्छिद्य पुनः प्रयोगः कर्तव्यो न तु दीर्घदीर्घेणाविच्छेदेन घण्टास्वनवदिति दर्शयितुं **स्वरा** इति बहुवचनप्रयोगः। स्वरा उपस्वरायचेति सर्वैकशेष इति केचित्। एतत्तु

गान्धारिण्ययुक्तस्वरक्ष्यमप्यारोहणावरोहस्थिरत्व(तद्)व्यतिरेकेण कथं प्रतियोज्यम्। अलङ्कारविशेषयोगेनाप्यलङ्कारगमनमेकस्वरायत्तमेव।।**१६**।।

नन्वारोहणावरोहाभ्यां तारमन्द्रस्वीकारस्तावद् दर्शितः। कण्ठयस्वस्वीकारस्तु कथमित्याशङ्क्याह।

शारीरस्वरसम्भूतास्त्रिस्थानगत(गुण) गोचराः।
चत्वारो लक्षणोपेता वर्णाः।। इति।

एतदनेनाह। नात्रारोहणं शिरस्यस्वरनिष्ठमेव लक्षितमवरोहणं वा वकृष्य(ष्ट)स्वरनिष्ठम्। कि चैकैके तस्यैकविषयतामाह। **त्रिस्थानेति**। त्रिषु ये गुणा गुण्यमाना उच्चार्यमाणानि स्थानानि वा गुणाश्रया येषामिति स्वरास्ते गोचरो विषयो येषाम्। न त्वारोहणावरोहणे एकतन्त्रिकायां वीणायां बहुतन्त्रिकायां वा विपर्यये वंशे च। अत एव न संवेद्यते मल्लकवीणादौ न च भवतः। तत्र वर्णसङ्करोपलम्भः। तत् कथमिदं लक्षणमित्याह। **शारीरस्वरसम्भूता** इति। शारीरस्वरेषु मुख्येष्वाश्रितेषु लक्षणमिदमुक्तम्। तत्सदशस्वरोपलम्भ एवान्यत्र वीणादाविति तत्रापि पर्यवस्यतीति न तु वीणादावलङ्कारभावः। अत एवोक्तम्।

शारीर्यां त्वस्फुटा ये तु दारव्यां ते व्यवस्थिताः।
दारव्यां चलिता ये तु शारीर्यां ते सुनिश्चलाः।। इति।।**१७**।।

नन्ववधिविशेषश्चेदारोहणादौ त.....कश्चित्तदा सर्वत्र सर्वं स्यात्। यथा रोहणे प्येकत्र स्वरे वस्थानमवश्यम्भावीति स्थायित्वसम्भवः। एवमन्यत्रापि वाच्यमिति स्वरसाङ्कर्यमित्याशङ्क्यावधिनियमार्थ वर्णशब्दस्य च निरुक्तख्यापनार्थमेकवद्ग्राह्यत्वे च निमित्तमाह।

एवं (पदं)लक्षणसंयुक्तं यदा वर्णो नुकर्षति।
तदा वर्णस्य निष्पत्तिर्ज्ञेया स्वरसमुद्भवा।।

इति। विविक्षितसंज्ञानिर्देशो लक्षणसंयुक्तवचनेन दीर्घे पि समासपदे भागशः पदनियममाश्रित्यावधिनियम इति दर्शयति। सकललोकप्रसिद्धमेव तदेवोपलक्षणं ग्राह्यमिति **लक्षणसंयुक्त**वचनेन सूचयन् **कृष्टादिष्विति** पदलक्षणं पराकरोति। **अनिट्टवन्तं (सुप्तिङन्तं) पदं विभक्त्यन्तं पदमिति** हि तत्र प्रसिद्धम्। तेन पदमेकं यदा यतो वर्णगीतिक्रिया नुकर्षति दीर्घकालं करोति तदा ततो वर्णस्तस्यैकस्य सङ्कीर्णस्य निष्पत्तिः। तेनानधिनियमादसङ्कीर्णत्वम्। यतश्च **पदं** कर्षति विस्तारयति ततो हेतो**र्वर्णस्येति** वर्णसंज्ञाया **निष्पत्ति**रिति निरुक्तम्।

यद्यपि चोच्चारितः प्रध्वंसितः स्वरो न स चयेन वर्तते येन तद्विषय एको यं वर्ण इति धीः स्यान्। तथाप्यथै(र्थै)कत्वादिना निमित्तेनैकधीरोपकं पदं यतो नुकर्षति तत एकपदनिष्ठत्वाद्धेतोरेकानुच्छ्वासनसामान्या एकादिनिष्पत्तिधीरनेकस्वरविषया पि न वि(रु)ध्यति(ते)। तदाह– **स्वरसमुद्भवा निष्पत्ति**रिति। स्वराः केवलास्तेभ्य उद्भूताः स(रिगादय इ)त्या(द्य) **वर्णस्य निष्पत्ति**रित्यर्थः। मा (प्रा)दीनां च निपातानां पदत्वमेव

स्वरलाभादिषु तु यद्वर्णतालङ्काराणां स्वरूपनिर्धारणं तत्पदगतदर्शनं संस्कृतस्वरकल्पानुकृतं श्वासविरामकृतविच्छेदा(र्पणादि) गतं चेति।।**१८**।।

एतदुपसंहरन्यदासूत्रयति। **एते वर्णा** इति। **तुः** समुच्चये। वि.....(यागादिषु) तानप्रयोगे वर्णाः सर्वे एवं भवन्ति। तदलङ्काराः सर्वे इति भावः। एतेषामेव भवन्ति। एवकारेण वर्णालङ्काराणामन्योन्यमव्यभिचारो दर्शितः। **सम्यङनिबोधतेति। स्वराणा**(वर्णाना)मुपयोगः कार्योलङ्कारवत् तेषामियत्ता नियमेनाभिधातुमशक्यत्वाद् वर्णोत्पत्यैव च तेषां परमार्थतः ख्यापनान् मया यथापि सर्वे न लक्षितास्थापि शास्त्रान्तरवक्ष्यमाणनिरुक्तपरस्यसों(स्यो)––पायेनैना चानीतेत्यर्थः।।**१६**।।

तान् वर्णविभागेन प्रदर्शनार्थमुद्दिशति।

प्रसन्नादिः प्रसन्नान्तः प्रसन्नाद्यन्त एव च।
प्रसन्नमध्यश्च तथा क्रमरेचित एव च।
प्रस्तारश्च प्रसादश्च सप्तैते स्थायिवर्णगाः।।

इति। **प्रसन्नत्वं** मन्द्रभावः। तत्र बिन्दुर्लोके भिज्ञानम्। तारत्वे **रेखोर्ध्वा** शिरोगता। सा सा इति। अत्रैव यदा षड्जस्यैवोपक्रमसङ्कराभ्यां प्राधान्यं मध्ये तु स्वरान्तरानुप्रवेशो भवन्नपि न स्थायिवर्णधियं बाधते तदालङ्कारान्तराणि। सम्प्रति संक्रमेणात्र तारगतेरसंक्रमो **रेचितः**। अयं प्रस्तारः प्रकृष्टशब्दस्तारता यत्रेति। **अयं मन्द्रश्रुत्या प्रसादयति प्रक्र(सा)मो(दो)** स्ति। अयं स्वराणां संख्यायां चाक्रमत्वे यद्यपि भेदजातं सम्भवति संक्रमसंसष्टादिवत्त्वे भेदानामसंख्येयता। अत एवालङ्काराणामनियम इत्युक्तम्।।**२०**।।

मन्द्रस्तथा प्रसन्नादि प्रेङ्खितो बिन्दुरेव च।
सन्निवत्तप्रवत्तश्च रेचितः कम्पितः समः।
कुहरश्चैव वेणुश्च रञ्जितो ह्यवलोकितः।
आवर्तितः(र्तकः) परावत्तः स चारिण्यश्चतुर्दश।।

(इत्यादि।) **मन्द्र** इति। मन्द्रो येषां यस्य मध्ये तेषां तस्य ग्रहणम्। **प्रसन्नादि**रिति आदिशब्दो(ब्द उ)पादानपदम्। **प्रेङ्खितो** तो(दो)लाबन्धवत्। तैले **बिन्दुः**। चिरकालमवस्थाने स्वरान्तरोपर जकस्तैलबिन्दुवत् प्रसरणात्। निवर्तनमवरोहः। **सम्यगि**ति दूरम्। अवरुह्य यदारोहणं तदा य(स) **निवत्तप्रवत्तः**। यद्यपि चैवं ते लङ्काराः पत्रर(यत्र वि)हितास्तत्त्वेन भाति(न्ति) तथापि प्रतीतस्य गीतसमयप्रविष्टस्याभिज्ञानदानार्थं लिखिताः। **रेचितकुम्पितकुहरास्तु** शिरोवक्षःकण्ठनिविष्टस्य त्रिःश्रुते स्वरस्य कम्परूपा इत्यभिज्ञानेनापि दर्शयितुमशक्या इति न विलिखिता इति। यत्रारोहणमे(मि)ववावरोहणं च समं स **समः**। काकल्या यद्गीतवद् गीतं मुक्तकण्ठं तत्र वेणु। **अन्ये** तु सौषिर्येण छिद्रोपलक्ष्यान् मध्ये यद्विचित्रं ह्रद्यं च विच्छेदरूपं तद्वेणुरित्याहुः। यथा(दा) जातिषु मध्ये द्विश्रुतिसूचितान्त इति लिख्यते (तदा) **रञ्जितः**। यदा स्वरान्तमुच्चारितमप्यूर्ध्वाधारस्वरतां नानुरक्तं प्रतीयते। तदा **वलोकितः**। यत्र विद.....तत्राप्यवलोक एव। आसमन्ताद्वर्तमानादावर्तकः।

अस्यैवालङ्कारान्तरप्रायोविच्छिन्नस्यापि पुनः प्रयोगे **परावत्तिः**। अत्र चालङ्कारचतुर्दशके विशेषो द्विरूपो वर्णानुगस्थित्यारोहणादवरोहणनियमाभावात्।।**२१-२२**।।

निष्कर्षो प्यु(भ्यु)च्चयश्चैव हसितो बिन्दुरेव च।
प्रेङ्खोलितस्तथाक्षिप्तो विशीर्णो घटितस्तथा।।
ह्रादमानः सम्प्रदानः सन्धिः प्रच्छादनस्तथा।
प्रसन्नादिः प्रसन्नान्त इत्यारोहे त्रयोदश।।

एकस्वरं प्रयुज्यैतदविच्छेदेनैव (स्वरान्तरै)रूर्ध्वगमनं **निष्कर्षः**। अभित ऊर्ध्वं चयनमभ्युच्चयः। सगमसा।.....(मन्द्रादेः प्रसन्नान्ता कला).....यदा भवति तदा **ह्रादमानः**। **सम्प्रदान** इति। दा(दो) अवखण्डने (पा॰ धातुपाठः–१२२३) **देङ्** रक्षणे (पा॰ धातुपाठः–१०३१) इत्युभयं (यो) रूपम्। तेन विच्छिद्य यदारोहस्यणैव परिपालनं तदा **सम्प्रदाना**लङ्कारः। एतावलेख्यौ। सन्धानात्। **सन्धिः**। तरिग (गमप, प).....ध(नि)। प्रविष्टमवच्छिन्नत्वं स्वरात्स्वराणां यत्र मध्यगतानां **प्रच्छादनम्**। सरिग। **प्रसन्न**शब्देनात्रारुरुक्षतः(न्तः) स्वरास्त्ववरोहिणः।।**२३-२४**।।

एकत्यागेनारोहणावरोहणाद् **विधूतः**। सस(ग)मरि(प ग रि)। ओ(आरो)हादिक्रमेण कम्पपूर्वो वरोहो विधूत इत्यन्ये। अधरस्वरे त्रिर्विश्रान्त्या **त्रिवर्णः**। स नि ध ध ध। एतद्विपर्यये**णोद्गीतः**। स नि नि नि ध ध ध। इति **वेणिः।।२५।।**

अथैषां प्रयोगविषयं नियमयितुं तत्र च हेतुनिरूपणद्वारेणालङ्कारालङ्कार्यभावं दर्शयितुमाह।

सप्तरूपगता ज्ञेया अलङ्कारा बुधैस्त्विमे
नैते साकं (सर्वे) ध्रुवास्विष्टाः श्रुति(श्रोत)वर्णप्रकर्षणात्।।

इति। सप्तरूपग्रहणं सकलगान्धर्वोपलक्षणम्। तेन गान्धर्वे गीतस्वरूपसम्प्रभेदरूपे आश्रयमात्रोपयुक्तेष्वर्थप्रतिपत्तिसम्पादनात्। तात्पर्यविरहगात्रसमुच्चारणमात्रफलेषु पाठेषु यथेष्टमलङ्काराः।

ननु वा(चा)र्थस्यैव हि तत्र प्राधान्यम्। वर्णे वा(चा)लङ्कारबलेन प्रकल्प्यमानार्थप्रतीतिविघटिते प्यतीतेष्वक्षरेष्वनुसन्धानसम्भावि। यतः श्रोतणां वर्णे **प्रकर्षणा**दिति च ध्रुवत्वं वर्णस्यालङ्कार्यतामाह। न च वर्णारवेन(ख्येन) स्वादित्युच्यते। तस्य सकलपदविश्रान्तस्य गानक्रियासम्पत्यै प्रस्तुतस्य वदनस्य चन्द्रोपमानेन। अत एव **गीतिरलङ्कारहीना** (भ॰ ना॰ २६–४५) इत्यत्र व्यतिरेकद्वारेण गीतेरेवालङ्कार्यता लक्ष्यते। गीवर्ण इति च पर्यायौ।

अत्र चोदयन्ति। **चत्वारो(रस्तु)ग(गु)णा युग्म** (भ॰ ना॰ ३१.१०६) इत्यादिना तालकलाविषये पदमात्रापरिमाणनियमस्य लक्ष्यमाणत्वान् **निमेषाः प चमात्रा स्यात्** (भ॰ ना॰ ३१.४) इति कलापरिमाणस्य कथमभिवर्णप्रकर्षणं शक्यम्।

अत्राहुः। वर्धमानासारितविषयो यं पदमात्रापरिणामनियमो न प्रगीतिकादौ तन्नियमाभावात्। अत एव **सप्तरूपगता** इत्युक्तम्। तत्र यथेष्टं वर्णप्रकर्षणमिति लक्ष्ये पि च जातिगीतादौ यथेष्टं प्रकर्षणमुपलब्धमेव।

अन्ये त्वाहुः। आसादितद्वारेण सर्वविषयं यत्पदमात्रापरिमाणनियमो तिवर्णप्रकर्षणं प्रत्यक्षमहमिकया लङ्कारपरम्परायोजनं तच्चेदमयुक्तमिव। न हि ध्रुवासु क्रियमाणं तदर्थप्रतीतिं विहन्ति। प्रत्युत सालङ्कारर जनायैव स्यात्।

बिन्दुरेककलो ज्ञेयः कम्पितं तु(तश्च) कलाद्वयम्। (भ. ना. २६.३८) इत्यादि यदुच्यते त.....रविषयं न.....तथा दश्यते इति प्राच्य एव परिहारो युक्तः।

एत इति सर्वसम्भवो निषिध्यते। एते **सर्वे** नेष्टाः। यथापि वर्णः प्रक्षेपः कर्षिणः कम्पितादयो नात्र वहन्ति तथा। **सर्व** इति। समष्टिरूपा इत्यर्थः। तत एकत्रैवाक्षरे बहवो लङ्काराः क्रियमाणा अतिप्रकर्षं कुर्वत इति नेष्टाः।।**२६**।।

ननु यम(द)तिप्रकर्षिणस्तत्किमिति ध्रुवासु नेष्टा इत्याह। **न हि वर्णप्रकर्षस्तु ध्रुवाणामिति**। के तस्याह। **श्येनो वाप्यथवा बिन्दुरिति। श्येन** इत्यनेन तन्त्रान्तरलक्षितेन व्यवहारेणालङ्काराणां सङ्ख्यानियमं प्रत्यानादरं दर्शयति। तत्र **श्येनलक्षणम्**।

श्येनश्चैकान्तरो जातः कलामात्रान्तरे स्थितः।
तस्मिंश्चैव स्वरे वद्धिं गहणात्येव विलक्षणम्।।

अन्ये तु वेणिवेणि(:)श्येन इत्याहुः। ननु बिन्दुश्येनावेव निषिद्धौ। नेत्याह। **ये चान्ये तु प्रकर्षिणः**। ते पि (न) ध्रुवाणां प्रयोक्तव्याः। **तु**रपिशब्दस्यार्थे।।**२७**।।

आरोहिणो वर्णस्य सम्बन्धिनः। **अपि**शब्दादवरोहिणो पि। ये **स्वरा** इत्यलङ्काराः। ते प्रयोक्तव्याः। यदि वा **रोहिणः स्वरा** इति सावरोहा। न तु विश्रान्त्या प्रकर्षिणः प्रयोक्तव्याः।

अन्ये त्वाहुः। **स्वरा** इत्यलङ्कारैकदेशाः प्रयोज्या ये नुज्ञाताः।

श्रीमदुत्पलदेवपादास्तथा मन्यन्ते। **आरोहिणः स्वरा** इत्यनेनातिप्रकर्षिणः स्वरूपमुक्तम्। प्रत्यक्षरमारोहो विद्यते येषां स्वराणां ते **आरोहिणः**। तेन प्रतिस्वरमक्षरं प्रत्यक्षरं स्वरमित्येवंरूपमतिकर्षणम्। यथा **कुसुमव(प)राध(ग)पु जपरि(पि) जरहंस(दर्श)नीया** इत्यत्र च चत्पुटभङ्गेन (दर्श)नीयेत्यस्मिन्नक्षरे नेकस्वर आरूढः कर्तव्य इति यावत्।।**२८**।।

अत्र हेतुमाह। **यस्मादर्थानुरूपा हि ध्रुवा कार्ये**ति। ननु क्रियतां नाम्। तथाभूता प्रवेशाक्षेपनिष्क्रामणप्रसादनान्तरवैचित्र्यान्तरयुक्ता कविना सूच्या। अतिप्रकर्षणवर्जनं तु किमर्थमित्याह। **अर्थदर्शिकेति**। अभितो दष्टार्थो गान्धर्व इवार्थबद्धो पि तु सामाजिकानां तत्प्रतीतिसिद्धये प्रकृतिभेदो विभावादिभ्यस्ततः साधारणीभूतस्तयावगतो रससम्पत्युपयोगी भवतीति यावत्।

नन्वेवमर्थमर्पणप्रधानत्वाद्येन केनचित् पदेनार्पणीयो र्थः। नेत्याह। **वर्णानां तु पुनः कार्यं कृषत्वमिति।** स्थाय्यादिशङ्कापरिहारार्थमाह। **पदसंश्रयमिति। कृशत्वमि**त्यस्थूलत्वं

बहुतरदर्शनसंयोगदर्शनहीनत्वमित्यर्थः। एतदुक्तं भवति। यथा हि गीतिरर्थार्पणमनवधारयन्ती कर्तव्या तथैव पदगतान्यक्षराण्यपि दुर्भणसंयोगादिहीनाङ्गान्यधिकानि कर्तव्यानि। तेनौचित्येन पदगीतिः कर्तव्येति। **टीकाकारै**स्तु श्लोकार्धस्यास्य प्रतिकर्षणत्वमस्य(त्वं) व्याख्यातं पुनरुक्तप्रायमित्यास्ताम्।।**२६**।।

ननु बिन्दुश्येनादयो लङ्काराः। तेषामियत्तालक्षणादि वक्तव्यमित्याशङ्क्याह।

ये त्र प्रयोगे गच्छन्ति तांश्च वर्णान् निबोधत।

इत्यादि। ये लङ्काराः स्वरा (ग्राम)मात्रारागस्वरूपोत्थापकाश्च त(ते)त्र पूर्वे (प्रयोगे) धातुवाद्यं वर्णाङ्गलक्षणादेव गम्यते। ये त्वन्ये गीतप्रयोगविषयास्**तान् निबोधतेति**। त्रिवर्णाश्रितत्वाद्वर्णा इति **टीकाकृद**भ्यधात्।

परमगुरश्री**मदुत्पलदेवपादा** मन्यन्ते। वर्णानां पदनिबन्धनत्वे तदाश्रितालङ्कारा गीतप्रयोगरहितकेवलस्वरालापमात्रगामिन इति शङ्कापदानमेव। तत्रालङ्कारताप्रतिभा––सस्तत्संस्कारजो न मुख्यः। वक्ष्यमाणा एव गीतिप्रयोगोपयोगिनो नान्ये इत्यत्र लक्ष्यदर्शनादिप्रमाणं पश्यामः। श्येनादयश्च लक्षयितव्याः। प्रयोगोपयोगान्न चाग्रतो लक्षित(ता) इति।

तस्मादेषो त्रार्थः। वर्णस्व(रूप)वर्णाङ्गैर्धातुवाद्यं चोभयमपि हि क्रियाविस्तारात्मकम्। जातावेकवचनम्। तदयमर्थः। ये स्थाय्यादयो वर्णा उक्ता यानि वर्णाङ्गानि धातुवाद्यादीनि वस्तूनि लक्ष्यन्ते तेभ्यः प्र(यो)ज्याः। अत्र ध्रुवाप्रयोगे ये गच्छन्त्युपयुज्यन्ते **तान् निबोधत** स्वयमूहध्वं वर्णलक्षणं तावत्। ऊहो व्याख्यातः। वर्णो त्र धातुवाद्यादिगतस्तत्रैव व्याख्यायते। ननु कुत्राप्यविवक्षितेनैव प्रवर्तत ऊह शक्तिरित्याशङ्काशमनायात्रेति। **चकारेण** लक्षणमपि कर्तव्यमिति सूचयति। अत एवोद्दिशति **प्रसन्नादिरित्यादि सर्ववर्णगा इत्यन्तेन**। न प्रत्येकं मन्तव्यमपि तु समुदायापेक्षमेतत्। तेन यथायोगं कश्चिदेकत्र वर्णे को पि द्वयोरित्यादि मन्तव्यम्।।**३०-३२**।।

स्थायिवर्णादते चैषां सम्प्रवक्ष्यामि लक्षणम्।

इति। **स्थायी**(ति)। यथारुचि श्येनादयः प्रयोज्या इति तात्पर्यम्। तत्रालङ्कारस्वरूपमेवमुक्तम्। **अस्माभिः** पूर्वग्रन्थेतु यदनुक्तं तद् व्याख्यायते। दीपनं तारता प्रसादो मन्द्रता। दीप्तिर्नाम श्रावकश्रोत(निष्ठो)विशेषो धर्म इत्यनुक्तसमं स्वरसाधारणम्। **सामवेदे च रामसासोमे** इति च यदुच्यते तदिहानुपयोगीत्यास्तामेतत्। दीपनप्रसङ्गात् **समः** पश्चादुद्दिष्टो प्यत्र लक्षितः। **सर्वसाम्यात् समो ज्ञेय** इति। दीपनस्य सर्वत्र साम्यादिति यावत्। समस्यैव विशेषो नुगीतिरिति स लक्ष्यते। **स्थितस्यै(स्त्वे)कस्वरे(रो) पि यत्(य इति)।**

आदिमध्यलघो यत्र स चोर्मिरिति संज्ञितः।
श्रुतयो न्या द्वितीयस्य मदुमध्यायताः स्मताः।
आयतत्वं भवेन्नीचे मदुत्वं तु विपर्यये।

स्वे स्वरे मध्यमत्वं च मदुमध्यमयोस्तथा।

श्रुतीनां निर्णयो ज्ञेयः।। इति।

विकल्पमनुस्वारं तमाहुः। गान्धारस्यैकाक्षरगतस्य नीचे ऋषभे परे आयता श्रुतिः कार्या। मध्यमे परे मद्वी। गान्धार एव तु परतो मध्या।।**३३-३७**।।

एवं प्रसङ्गा**दूर्मि** लक्षयित्वोद्देशानुसारेण **बिन्दु**माह। **बिन्दुरेककल** इति। **एककल** आयतो मदुर्वा विपर्यासेन वर्तुलीभाव एव बिन्दोर्लक्षणम्। आर्चिकस्वरलक्षणविषयतैककल इत्यनोक्ता। तदेव तु रूपं दीर्घस्वरनिष्ठं **कम्पितम्**। बिन्दुकम्पितोभयलक्षणोपजीवित्वात् **प्रेङ्खोलितं** लक्षयति। **गतागतप्रवत्तो य सः प्रेङ्खोलित** इति। बिन्दुकम्पितान्दोलनादित्यर्थः। मद्वायतगमनाभ्यासादित्येके।

ऊहसिद्धव्यापकं लक्षणोपयोगितावद्रूपं वक्तव्यमित्याशयेन तारमन्द्रतारतराणां लक्षणमाह। **यस्तु कण्ठे स तार** उरसि **मन्द्रोमूर्ध्नि तारतर** इति।।**३६**।।

एतत्त्रितययोजनेनान्ये प्यलङ्कारा ऊहितं शक्या उद्दिष्टा इत्याशयेनाह। **क्रमागतस्तु यस्तारः षष्ठः प चम वा। तारमन्द्रप्रसन्नस्त्विति।** न चायमप्युद्दिष्टो मन्तव्य इत्याह। **ज्ञेयो मन्द्रगतः स** चेति। मन्द्रशब्दनौद्दिष्टो यमिति यावत्। ऋषभस्तारषड्जस्ततो निषादस्ततः षड्जर्षभः प चमो वा गान्धारः। एवमन्ये।।**४०**।।

मन्द्रतारसमशब्देन तु य उद्दिष्टो **मन्तारप्रसन्न**स्तं लक्षयति।

लङ्घयित्वा परान् परात्तारगतिं गतः। इति।।**४१**।।

एतदलङ्कारद्वयेनान्दोलनात् त(स)न्निवत्तप्रवत्तस्य लक्षणमूहितं शक्यत इत्याशयेन तदुल्लङ्घ्य **प्रसादं** लक्षयति। **प्रसन्नान्तः स्वरो प्रसादः स त्विति।** आदौ स्वरस्य भर्त्सनरोधनदीपनवेदनकम्पनवलनलयननयनस्फुरणधर्मि मरणादि यथायोगं विधायन्ते दीप्तायतादिस्वरश्रुतिविशेष एव विश्रान्तेः प्रसादादपाङ्गं लक्षयति।

अपाङ्गिकस्तु विज्ञेयः स्वराणामथ स चरात्।

इति। यथा पाङ्गनिरीक्षणमन्यैर्न लक्ष्यते तद्वद् यद्भ्रमणवैचित्र्येण दुरवधारस्वरूपः **सो पाङ्गिकः**। तथाविधप्रयोगे न्तर्भावे यदा विश्रान्तिविभ्रममयादन्तरवीक्षितं लौकिक इति प्रसादापाङ्गाभ्यां समं जनित इति पथग् लक्षितः।।**४२**।।

एवमुद्दिष्टा लक्षिता अलङ्कारा ऊहसिद्धये। तत्र दीप्तायतादि मन्द्रतारादिकं वा कम्पादिस्थानभेदनिरोधनतोदनादिः कालदीर्घत्वादुद्दिष्टधर्मे अलङ्काराश्रितं त्त्वियदिति तत्र दीप्ताद्युक्तमन्यत्तु प्रदर्शयितुमाह।

रेचितः शिरसि ज्ञेयः कम्पितश्च कलात्रयम्।

कण्ठे निरुद्धपवनः कुहरो नाम जायते।

इति। ततश्चाति(श्च त्रि)श्रुतेरेव **कम्पितमि**च्छतः(न्तः) **कलात्रय**मिति श्रुतित्रयं व्याचक्षते। **अन्ये** तु चतुःश्रुतेरेव श्रुतित्रये कम्पनं कार्यमित्याहुः। इतरे तु सर्वस्वरविषयं कम्पनमिच्छन्ति। कलात्र न श्रुतिः। अपि तु कालकला। तत्र त्रित्वोपादानं परप्रकर्षसूचनाय

सामर्थ्याच्च। उरसि कम्पनात् कम्पितो लक्ष्यत इत्याह। (**कण्ठे निरुद्धपवन** इति।) एते च शरीरे प्राधान्येन लक्ष्यन्ते। धातुवाद्यं तु वीणयामित्याशयेन भेदेनाभिधानम्। वस्तुतस्तूभयत्रापि सर्वं तस्य योजनमिति लक्षणं निपुणमतीनां मत इत्य.....मयं भरतग्रन्थे तु स जात एवेति मन्तव्यम्। **टीकाकृद्भिस्तु सदाशिवमतादि**ग्रन्थान्तरालिखितं **त्रयस्त्रिंशदिमे प्रोक्ता अलङ्कारा** इत्यादि तन्न लिखितम्। ग्रन्थान्तरपरिवर्तनं अनिष्टप्रसङ्गात्। स्त्रीवायुप्रोक्तादि तु **स्वगुरुमतनारदमता (नारदीयशिक्षा)र्जुनमतादिषु श्रीसंहिता**..... न्योन्यदर्शनात् कियल्लिखनीयम्। न चापि किंचित्। तेन (न) किंचित् प्रयोजनम्। **वर्णेभ्यः सर्वेषु सिद्धि**रिति ह्युक्तं प्राक्। ये तु लक्ष्ये दश्यन्ते तल्लक्ष्म पठमानम् (पठ्यते)।

अवरोहारोहकृतो वेणुः प चकलः क्रमात्।

यथा– निधधनि रिससरिपसनिनिसा।

एकस्वरे धिरोहात् प्रस्तारो न्यथा प्रसादस्तु।

यथा– सगारिगागमपमधपनिगमा– **प्रस्तारः।**

सधनिधापसापधामरिगसा– **प्रसादः**।

तमनन्सरस्वरौ द्वौ (विचर)त्युद्वाहितस्तथा द्विकलः।

आरोहत्येककलो सौ।।

विधूतस्तु एकस्मिन् लघुवर्णे स्वरचा(द्व)यमिलिता(ते) लघुपरिमाणं प्रयुज्यते। तत्र च द्वयोः स्वरयोः शीघ्रकालोच्चारणेन सकलं पदं प्रयुज्यते। पुनस्तदुपरितनात् स्वरद्वये। एवमेवान्ये। कालकलाविधूतः स्वररूपविधूननात्।

दीर्घाक्षरमारोहे तदनन्तरस्वरं कलान्तरयोः।

कम्पौ प्रसन्नरूपौ (ज्ञेयः)पुनर्गात्रवर्णोयम्।।

ससरिसाससससंसारि– इत्येवं दीर्घमक्षरं पर्वगतं प्रयु जीत। इति गात्रवर्णः।।**४३**।।

एवमलङ्कारा व्याख्याताः। अथ तानुपसंहरन् यत्र तेषामुपयोगस्तां गीतिं सूचयति। **एवमेते** इति। **अथ गीति**रिति च। **वर्णसंश्रया** इति च वर्णानुक्रान्त्या गीतीनामन्तरेणैते लङ्काराः प्रतिपद(दं) जन्मनां(ना) न वक्तुं शक्या इति भावः। गीतिशब्देन स्वराणां पदानां च यः परस्परमाश्रयाश्रयिभावः सा पथग् गीतिः। ननु गीतिर्वर्णरूपैवेति पुनः कस्मादभिधानमित्याशङ्क्याह। **छन्दो क्षररसमन्विता** इति। पदाश्रया गीतिर्वर्ण इत्युक्तम्। पदं च प्रवत्तनिरुद्धच्छन्दोमयं गद्यरूपं चाक्षरात्मकम्। तत्र यथा सम्यग् ग(गी)तयो भवन्तीति गीतीनां (लक्षणं) तथा वक्ष्यामीति यावत्।।**४४**।।

अथालङ्काराणामुपयोगमाह।

शशिना रहितेव निशा विजलेव नदी लता विपुष्पेव।

अविभूषितेव च स्त्री गीतिरलङ्कारहीना स्यात्।।

इति। कश्चिदलङ्कारो वर्णमुज्ज्वलयति कश्चित् सूत्रयति कश्चित् स(सु)विकासयति कश्चिद् र जयतीति दष्टान्तचतुष्केण सूचिता(तम्)।।**४५**।।

गीतिरुद्दिशति **प्रथमा मागधी**त्यादिना। तत्र यतिकालविभागेन वर्णालङ्कारनियमेन लयगानक्रियाविशेषो गीतिरिति सामान्यलक्षणम्।।**४६**।।

तत्रासां क्रमेण विशेषलक्षणान्याह। **सन्नि(त्रिनि)वत्तिप्रगीता या गीतिः सा मागधीति। या पदानां निवत्ति**रावत्तिस्तया प्रकृष्टं विततं **गीतं** गानक्रिया यस्यां सा **गीतिः**। विशेषसामान्यभावेन पत्ति(वत्ति)पदार्थो स्य च विभागः। एतदुक्तम्। देवमिति पदं गीत्वा प्रथमकलां निर्वाह्य विलम्बितेन लयेन यदा द्वितीयां कलां मध्यमलयेन देवमिति (त्ये)तेन पदेन शर्वमिति शब्दसहितेन गायति ततो पि ततीयां कलां द्रुतलयेन देवं शर्वमिति पदद्वयेन च वन्दे शर्वमिति पदान्तरसहितेन निर्वाहयति तत एव देव इत्ययं शब्दः कलात्रयव्यापनात् त्रिनिवत्तिनिर्वाह एव। **एवं** शर्वमित्यादयो प्युत्तरोत्तरकलाव्यापिनस्तदा मागधीनि **गीतिः**। मगधेषु तथा गाननिर्वाहोपलम्भात्। यदाह। **विदर्भादिषु दष्टत्वात् समाख्या** इति। उदाहरणम्। समाससंसा मासं समं ससम समसरिरीति। **अर्धत** इति। परस्य सम्बन्ध्यर्धपदाद्यदावर्तस्तदा **र्धमागधीति**। न चात्र पादार्धप्रवत्तौ निवर्तनहेतुर्मन्तव्यः। यतः **सामवेदे** गीतप्रधाने आवत्तिष्वर्धो नाद्रियते। एवमादि तु **जातवेदसमि**ति (सामवेदसंहिता १.१.३.११) हि अत्र जाशब्दपर्यन्तमावत्तिपर्यन्तपरम्परया गीत्वा **तदेवसमि**ति गीयते। तत्र **जातवेदसमि**ति पदस्य षड्जनादार्धभङ्गो भवत्यपि। **अन्ये** तु **त्रिनिवत्तिप्रवत्ते**ति मागध्या लक्षणं पठन्तो र्धमागध्याः सपदावत्तिं व्याचक्षणा अर्ध भ जनमपि परिहरन्ति।।**४७**।।

एवं निवत्तिकृतौ द्वौ गीतिभेदावभिधाय निवत्तिहीनमपि गीतिद्वयं लक्षयितुमाह।

सम्भाविता च विज्ञेया गुर्वक्षरसमन्विता।
पथुलाख्या च विज्ञेया नित्यं लघ्वक्षरान्विता।।

इति च। **नित्य**शब्द आभीक्ष्ण्यवाची। उभयत्रापि सम्बन्धनीयस्तेन बाहुल्यतो यत्र गुरूणि। सम्भावितं सङ्क्षिप्तं पदानां भावानां यत्रेति। लघुप्रायत्वे तु **पथुला**। भूयस्त्वात् पदग्रामस्य।।**४८**।।

ननु कुत्र का गीतिः प्रयोज्येत्याशङ्क्याह।

एतास्तु गीतयो ज्ञेया ध्रुवायोगं विनैव हि।।

इति। ध्रुवाश्रयो योगस्तद्वर्जमेता **गीतयो गान्धर्व एव प्रयोज्या** न तु गान इति तात्पर्यम्। मागध्यर्धमागध्यौ सामनामध्रुवास्तु (सु) प्रयोजितौ(ते)। सम्भावितापथुले.... तेनापसारित्वेनैतद्ध्रुवासु हि करुणरौद्रादिम(रसा)नुसारेण गुरुलघ्वक्षरविनियोगो गीतिषु यथेष्टमेवेति विशेषः। अत एव **विनियोगवर्जमि**(भ. ना. २६–४६)त्युक्तम्। **हि**र्यस्मात् गीतय एव गदिता न त्वसां विषयविशेष उक्तः।।**४६**।।

अस्य गीत्यंशे भेदमाह। यदन्यैर्लक्षणं गीतीनामुक्तं तन् मह्यं न रुचितमिति तथा हि। **यदन्यैर्लक्षिताः।**

द्विगुरुर्द्विनिवत्ता च चित्रे गीतिस्तु मागधी।
लघुप्लुतगता चैव तदर्धे चार्धमागधी।। (बहद्देशी–मतङ्ग १७७)

सम्भाविता (पथुला च) यथाक्रमं चतसभिर्द्वादशभिश्च मात्राभिः प्रयोगादिति। अर्धमागधिर्द्वि (धी द्वि) कलचतुष्कलप्रयोगयोस्त्विति। एतच्च लक्षण(विरुद्धं न)स्फुटमेव व्याप्नुयात्। नान्यथैतदनुसारेणान्यत्रापि योजना तथापि मार्गोपयुक्तं भवति तद्गीतिवैचित्र्यमिति। यस्मात्त्वासां मार्गभेदाभिधानं तस्माद्युक्तं **सम्यगि**ति।

एवमलङ्कारप्रसङ्गेन **गीतय** उक्ताः। अलङ्कारानन्तरं च दारव्या कृता उदिष्टालङ्काराः सन्धातव्या इति धातुभ्यश्च दारव्या वा लक्ष्यमाणशोभातिशये अन्यो(न्ये) वैचित्र्योपजीवनेन शारीर्यामप्यलङ्काराः शक्ययोजना इत्यभिप्रायेणाह। **धातूंश्चैव निबोधये**ति। **च**कारेणालङ्कारत्वमप्येतेषां समुचिनोति। **एव**कारेण **विशाखिलाचार्य**प्रोक्तं सर्वथैव ध्रुवगानज्ञानवैकल्योपयोगान् **मया** नोक्तमिति सूचयति। दधत्यदष्टं विशिष्टं दष्टं रक्तिं च तरन्ति धारयन्ति च वीणावाद्यस्वरूपमिति **धातवः।** प्रहारविशेषजन्याः स्वराः। तत्समुदायो पि जन्यंशकल्पमानो धातुः। तत्रोद्देशमाह। **विस्तार** इत्यादि। वाद्यते नेनेति **वादित्र**मङ्गुलीकोणादि। तस्य तत् **करणं** प्रयत्नम् (ल्नः)। **तदाश्रयाः** प्रहारविशेषजन्या इति यावत्। अंशेन सामान्यलक्षणं धातूनामुक्तम्।।**५०**।।

तत्र हि विस्तारधातोश्चतुर्दशविधत्वं निरूपयिष्यते। भेदान्तर्गतभेदचतुष्टयं तावदवतारयन् साधर्म्यनिबन्धनमुद्दिशति। **सङ्घातजा(ज)श्चेति।।५१।।**

तत्र विस्तारजो नाम भेदो य उक्तस्तस्य भेदान्तरभावेन मितवक्तव्यतया प्रथमं विशेषलक्षणमाह।

विधयश्च स्मतास्तस्य पूर्वं विस्तार एव च।

इति। **च**कार स्ववत्तित्व**मेव**कारो न्वर्थतां सूचयति।

तदयमर्थः। **विस्तारो** नाम यो विस्तार एव। विस्तीर्णत्वमेवास्य लक्षणमित्यर्थः। एतदुक्तं भवति। अनेको पि स्वरप्रकरणे यथा पथगनुपलक्ष्यमाणविभागोविश्रान्तस्थानभूतपर्यन्तिक––स्वररूपं (पमेकी)कुर्वन्नन्तरीभवच्चित्रवचनान्तरेणैव विनिर्भासमानसूतत्व(स्वरत्व)विकीर्ण––स्तथासौ। अन्यत्र स एवं विस्तार उक्तः। तस्य च ये विधयो **भेदास्तेषु पूर्वमुक्ता** अलङ्कारनिरूपणावसरे विचित्रप्रकाराः सन्दर्शिता इति यावत्।

अन्ये तु मन्यन्ते पूर्वमुक्ताः स्वरास्त एव। तेषां **विधयो** भेदाः स्वरान्तरोपयोगादेकविस्तारवाच्या इति। **द्विकत्रिकावि**ति।।**५२**।।

(सङ्घातजस्तूत्तरभेदद्वयेन) चतुर्धा। अन्यस्त्रिकः सो ष्टधा। तदा वा पूर्व **चतुर्विध** इति द्विकत्रिकौ द्वे तुल्ये। किं कृतो वोत्तरभेद इत्याह।

करणानां विशेषेण विज्ञेयौ तौ पथक् पथक्।

इति। क्रियाविशेषादवान्तरभेदा इति यावत्।।**५३**।।

स च विशेषो हस्तस्ब(स्थ)तन्त्रीभेदादित्याशयैनाह। **अधश्चोर्ध्वं चे**ति। नात्र विकृतमौत्तराधर्यम्। किन्तु शरीरे यावदधरोत्तरजौ मन्द्रतारस्वरौ वीणायामधरोत्तरजौ। यथाह **दत्तिलः। वीणायां त्वधरोत्तर** (दत्तिलम्।६) इति। एवमधरोत्तरस्वरूपमभिधाय तत्कृतसङ्घातजस्य भेदचतुष्कं सूत्रयति **सङ्घातज** इति। **विधिभे(र्भे)व** इति। **एष** इति।।**५४**।।

आर्यया वक्ष्यमाणं तदाह।

द्विरुत्तरो द्विरधरस्त्वधर(रादि)श्चोत्तरावसानश्च।

ज्ञेयस्तथोत्तरादिः पुनरप्यधरावसानश्च।

पुनः शब्देनाभ्यावत्या प्रयोगे ह्रद्यता भवतीति सूचयति।।**५५**।। इति।

अथ समवायस्य भेदाष्टकमाह। **समवायजस्तथा स्या(दि**ति)। तथा वत्या यावद् द्विरधरश्च **विज्ञेयः**। स द्विरधरोत्तरो धराद्यः। अथेत्यानन्तर्यवाचिना सह समागमः। द्विरुत्तर उत्तरौ यत्रेति। **द्विरधरश्चान्त(रोथोत्त)रविरामश्च। उत्तरमुखोद्विरधरादिः**। द्विरुत्तरा प(द)शा द्विस्ठा व्युत्क्रमेणोत्तरावसाने तु यत्रेति प्राग्बहुव्रीहिः।

मध्योत्तरो द्विरधरः(रो) द्विरुत्तरो प्यधरमध्यश्च।

समवायौ विषयो रूढो नेकं इति त्रिकः समवाय उक्तः। द्विकस्तु सङ्घात इति।।**५६-५७**।।

अथानुबन्धमाह।

अनुबन्धस्तु ज्ञेयो व्याससमासाच्च नियतमेषां हि।

इति। **व्यासो** भेदानां मिश्रत्वेन प्रयोगः। तस्य पुनरपि सक्तं समूहनापीडनं **न(निय)त(तम्) एषामि**ति। स्वभेदपरभेदनिष्ठानामित्यर्थः। अनुबध्यते मिश्रीक्रियते भावो यत्रेत्यनुबन्धः। एवमुपसंहरति। एवं **चतुर्दशविधो विस्तारो धातु**रिति। एको **विस्तारः** सङ्घातश्चतुर्धा समवायोण्ष्टधा नुबन्धश्चैक एव। एवं विस्तीर्णभेदयोगादुदात्ततानह्रदयविस्तारणाच्च विस्तारधातुः।।**५८**।।

अथ करणधातुभेदान् प चोद्दिशति–

रिभितोच्चयनीरटि(रभि)तो(ता) ह्रादश्च(द्यस्तु) स्यात्तथा नुबन्धः (तथा नुबन्धः स्यात्)।। इति।।**५६**।।

एषां क्रमेण लक्षणमाह। **त्रिकप चसप्तनवकै**रिति। आदौ द्वौ प्रहारौ लघू ततीयो गुरुमिति **रिभितः**। प चम इत्यु**च्चः(च्चयः)**। सप्तन इति नीर(रि)**भितः**। नवमो गुरुरन्ये लघवः। **ह्राद्यो** लङ्घ्य इति। एतद्भेदानुबन्धनादनुबन्धः इति। प चधा क्रियाबाहुल्यात् **करणधातुः।।६०।।**

अथाविद्धधातुभेदान् प चाह।

क्षेपः प्लुतो तिपातो तिकीर्णम(र्णो)नुबन्धसंज्ञितश्चैव। इति।।**६१**।।

एषां लक्षणमाह–

द्वित्रै(स्त्रि)श्चतुष्कनवकैः प्रहारैः क्रमशः कृतैः।

इति। **क्रम(श)** इति। लघुरिति द्विकं लघुश्चतुर्लघुरित्येके। एवं यावन्नवकः। अन्ये तु क्रमशब्दलक्षणलक्षणालघुस चयरूपत्वमेव प्रहाराणां मन्यन्ते। लघुत्वप्रहारत्वादेव **भास(त)** आविद्धातुः।।**६२**।।

अथ व्य जनधातोः सप्त(तोर्दश)भेदानाह।

व्य जनधातौ(तोः) पुष्पं कर(ल)तर(ल)निष्कोटितं तथोन्मष्टम्।

रेफो नुवन्वसंज्ञो नुस्वनितं बिन्दुरवमष्टम्।। इति।।**६३**।।

एतान् क्रमेण लक्षयति। **कनिष्ठाङ्गुष्ठसंयुक्तं पुष्प**मिति। त्रि (अत्र) विशेषाभावेप्यङ्गुष्ठौ। तेन क्रममे(मेणै)वैकस्यां तन्त्र्यां प्रहारत्रयात् **पुष्पम्**। यथोक्तं **भट्टमातगुप्तेन**।

पुष्पं च जनयत्येको भूयः स्पर्शात् स्वरान्वितः।

इति। **अङ्गुष्ठाभ्यां समं तन्व्यौ** तु (न्त्र्योस्तु) नानास्थानस्वर(राः) तन्त्रीद्वयं (ये) पुगपज्जन्याः। अङ्गुष्ठद्वयेनेत्यर्थः।।**६४**।।

वामेन पीडनं कृत्वा दक्षिणेनाहतिस्तले।

वामेनाङ्गुष्ठेत तन्वीः पौडयित्वा **दक्षिणेन** हन्यादिति **तलम्। सव्याङ्गुष्ठप्रहारस्तु निष्कोटितम्।** ऊर्ध्वाधरहनेन कुटिलो यं प्रहार इति निर्वचनबलादित्युपाध्यायाः।।**६५**।।

प्रहारो वामतर्जन्या तु तनु **(दु)म(न्म)ष्टम्।** तन्त्र्यां तथा प्रहरणयोगादनाहतप्रायं मधुरतस्वरजनं तन्त्रीषु मार्जनामात्रमेव भवतीत्युन्मष्टम्। **सर्वाङ्गुलिसमाक्षेपादफः।** सर्वाभिनङ्गुलिभिरेकस्वरतादयः पर्यावेण विचित्रः। एकत्र विश्रान्निः। रेफविस्तारे नन्वे(त्वे)ते(रा इ)ति विशेषः।।**६६**।।

तलस्थाने धस्तन्त्रीणामनुस्वानितम्। तलनिष्पत्तौ सत्यां तदवच्छिन्ने वम(न) तस्त्रि (तन्त्री) प्रहारपरम्परे(रा) **नुस्वनितम्**। **गुर्वक्षरकृता तन्त्री विन्दुः। र्वक्षरो** विलम्बितकाल एकस्यामेव तन्त्र्यां प्रहार इत्यर्थः।।**६७**।।

कनिष्ठाङ्गुष्ठकाभ्यां तु दक्षिणाभ्यामधोमुखम्।

तन्त्रीषु त्रिप्रहारं चाप्यवमष्टम्। इति।

त्रिषु स्थानेष्वेकस्वरतन्त्रीत्रयं प्रत्येकं **कनिष्ठाङ्गुष्ठ**द्वयेनाधोगतं कृत्वा हन्यादित्**यवमष्टम्**।।**६८**।।

व्याससमासादेषानुबन्ध इति स्पष्टम्। ननु **सार्वधातुको ज्ञेय** इति किमनेन। प्रतिधातुनिरूप(ण)तो प्यनुबन्धः सम्यक्। स तु प्रातिपदिकधातुभेदमिश्रणात्मा दर्शितः। अनेन तुल्यः अ(ल्यो)न्यधातुगतान्य(न)पि भेदान् धात्वन्तरभेर्दर्मिश्रीकृत्य प्रयोज्या(ज्य) इति कथ्यते। सर्वेषु धातुषु भव इति (सार्वधातुकः)।।**६९**।।

उपसंहरति। **इत्येत** इति। **लक्षणान्विता** इति। शास्त्रोक्ततया दष्टोपयोगिनो पीत्यर्थः। अशास्त्रान्विता हि तन्त्रीवाद्यभेदाः कियन्तो गण्यन्ते ते पि चैतत्पद एवांशभूता अवगन्तव्याः।

तिसणां लक्ष्यमाणानां वत्तीनां सम्बन्धेन वत्तिगतं यत्किञ्चिद्वाद्यं वीणावाद्यादन्यद् विप चकालाबुवीणादि सरिकारावणहस्तादिगतं ततवाद्यादन्यदपि चावनद्धवाद्यजातं तद्येषु धातुषु भेदेषु विश्रान्तम्। एतत् प्रकृतिकं हि सर्ववाद्यानाम्। तच्च पुष्कराध्याये (अ.३४) वक्ष्यते। **धातव इति प्रोक्ता** एवं लक्षिता इति सम्बन्धः।॥७०॥

उक्तां वत्तिं निरूपयति। **तिस्रस्तु वत्तय** इति। वत्तिर्गुणप्रधानभावात्मा व्यवहार इति सामान्यलक्षणम्। ततवाद्यप्राधान्ये गीतगुणतेति **चित्रा** वत्तिः। गीतमुखे पेक्षताविरहितं हि वाद्यं यथाविधि वैचित्र्यचर्चितं क्रियते। एतद्विपर्ययस्तु **दक्षिणा वत्तिः**। गीतं हि विशिष्टं(ष्ट)स्थानीयं प्रधानं तदनुकूलश्चायं व्यवहारः। यत्र सममेव द्वयोर्व्यवहारस्तत्र साम्येन वर्तनाद् वत्तिर्नाम। वत्तिसंज्ञितशब्दस्यायमाशयः। वत्तिरिति सामान्ये विशेषे च प्रयुक्तो त्र। ब्राह्मणाख्या ब्राह्मण इति यथा। **गुण**शब्दो त्रोत्कर्षवाची न त्वप्रधानवाची तेन वाद्यस्य गीतस्य च **गुण** उत्कर्षो यत्र प्राधान्यमिति यावत्। तथा च **दत्तिलाचार्यः**।

दक्षिणावत्तिचित्राश्च वत्तयस्तास्वयं विधिः।
प्रधानं गीतमुभयं वाद्यं चेति यथाक्रमम्।। इति। (**दत्तिलम्**-४३)

अन्ये तु मन्यन्ते। द्रुतमध्यविलम्बितात्मकं यत्कालत्रयमानं तदेवानेन विशेषेणोक्तं वत्तित्रयम्। तच्च स्वरगतो(तमु)पदिष्टस्वरमनेन विशेषेणाहेति आवापादियोगो हि तालो मुख्यतया। तथाह। **आसारितोपर(व)हनमाद्यता** {(तेष्वादावासारणानि) भ. ना. ३१.१०३} **तालादि।** तत्र **मुख्यया ध्रुवादेरेव** नियमिता गानमिति च वक्ष्यते। **न चात्रापि सम्भव** इति च **तत एवे**ति च तालविधावुपदेक्ष्यमाणान् मार्गत्रयादिदं वि(भि)द्यत इत्यलमतिप्रसङ्गेन।॥७१॥

ननु कस्मादादौ **चत्वारो धातव** (भ.ना. २६.५०) इति निरूपिते तेषां चतुर्दश प चदशेति भेदा निरूपिताः। त(क)स्मान् मूलत एव चतुर्वि(स्त्रिं)शद्धातव इति नोक्तमित्याशङ्क्यावान्तरजातिविभागं तावद्भेदानुगतपरिहारान्तरं तेन दर्शयति **सर्वासामेवे**ति। सर्वासां वत्तीनां सम्बन्धिनः। ताः शुद्धाः। न तु सर्वे चतुर्वि(स्त्रिं)शदपि। **एवकारो** यथासङ्ख्यमसम्भाव्यमे(ए)व। तै**र्धातुभि**स्त्रयद्वय.....सम्भूय **ललिता** जायन्ते **संयुक्ताः** सम्बद्धा **भवन्ति। गुणवत्तरा** इति। व्य जनधातावप्याविद्धत्वं क्वचिदस्ति तथापि ललिताप्रधानमेव। अन्यत्राप्यन्यदिति यावत्। वीणावाद्ये सौकुमार्यं प्रधानमिति पश्चान्निश्शेषव्य जनधातुनिर्दिष्टापि ललिता जातिरिहादावुक्ता।॥७२॥

ननु कुत्र धातौ का जातिरिति वाच्यम्। कि चेकैकत्र धातुभेदे लालित्याद्यभिव्यक्तिरस्ति। तत् कथमिमा जातय इत्याशङ्क्याह।

एतेषां धातूनां समवायाज्जातयस्तु जायन्ते।
स्वात् स्वादुदात्तललितरिभितघनसंज्ञाश्चतस्रस्तु।।

इति। **एतेषां धातूनां** मध्ये तस्यां तस्यां जातौ यश्चोचितस्त(स्माद्) एतज्जा(ता जा)**यन्त** इति। अभिव्यज्यन्त इत्यर्थः। तत्र विस्तारधातावुदात्ता जातिरौचित्यात्। तत्र

ह्येकविस्तारादिप्रयोगे ईहादिबाहुल्यात् प्रयोगस्य चित्तवत्ति(:) सुभगीभवति। व्य जनधातौ ललिता सौकुमार्यात् प्रयोगस्य। अत एव च **श्रीहर्षेण**ाङ्गनासमुचितं वाद्यमित्याशयेन **व्यक्तिव्य(व्यै) जनधातुना दन(श)विघेनाज्ञ प्रलब्धात्म(मु)ना** (नागानन्दम् १.१४ प्रियदर्शिका ३.१०) इत्युक्तम्। आविद्धधातो **रिभिता** ल्ल(ल)घुप्रयोगाद् रिभो(फे)र्हि वर्णप्र(व्य)त्यय एतद्रूपम्। **रिभि(फि)श्च कत्थनयुद्ध (निन्दा)हिंसानादरेषु**(हिंसादानेषु) पठ्यते। (पा. धातुपाठः—१३०६) अनादरश्चा (आदानं) विश्रान्ति। युद्धादावपि च चातुर्योग एवोचितः। करणधातौ **घना**। लघुभिर्निरन्तरत्वात्। करणे लघूपक्रमत्वाद्गुरुविश्रान्तेश्चैकत्रानादरात्। यत्पुनरेतदुक्तमेकैकत्र भेदेन तज्जात्यभिव्यक्तिरिति तदेवमेतदाह **समवायादि**ति। बहुभिर्भेदैर्युक्तैः सा जातिर्व्य जनमिति यावद्भेदैरित्याशङ्क्याह। **स्वा**दिति। यावती भेदकलाप्रयुक्ते तथाविधाभिव्यक्तिरिति यावद् ग्रामरागाभिव्यक्तिरुत्क्षेपणत्वादभिव्यक्तिश्चैवमेव दष्टा बाह्यन्त एव ह्येष्वप्यन्त एव (बाह्यान्तरेष्वप्यन्यैव)। अस्यापि शतधापि पुनस्तथोपकारिण इत्यर्थः।

अन्ये त्वित्यं योजयन्ति। यस्मात्ता **जायन्त** इति प्रश्न उत्तरमिदं **समवायादि**ति। **अथे**त्याह नोदात्तादिकाया वार्ताया जायतश्चेति किं न वत्तयस्तेन धातवो धातुभेदस चयात् सा चित्तवत्तिर्जायत इति तावतो भेदकलापस्यैककरणदेकरूपतया परिगणनं जातिश्च। स्पष्टार्थो त्र व्याख्याने। कस्मात्ताश्चित्तवत्तयो जायन्त इत्यत्रैकैकैवोत्तरं जायत इति। यत इति रिभिते च चित्तवत्तिरपि भवतो(ति) विश्राम्यत्वात्। प्रविभागनियमे जातिभेदनिमित्तमभिधाय दक्षिणादिवत्तित्रये पि साधारणं वाद्यविधिं त्रिविधमाह। **त्रिविधं गीत** इति। विधाशब्दो विधिवाची। तथा चाह। **तत्त्वौघानुगताश्च वाद्यविधय** इति। **गीत** इति। गीतविषयो वाद्यस्य मेलनप्रकारः स विधिरिति सामान्यलक्षणस्य वत्तिः। स तु गुणप्रधानभाव इति भेदगुणत्वे पि हि तत्त्वादित्रयं प्रधानत्वे पि हि स्वातन्त्र्ये पि।।**७३-७६**।।

अथैषां विशेषलक्षणं क्रमेणोच्यते।

लयतालवर्णपदयतिगीत्यक्षरभावकं भवेत् तत्त्वम्।
गीतं तु यदनुगच्छत्यनुगतमिति तद्भावेद्वाद्यम्।।
आविद्धकरणबहुलं ह्युपर्युपरिपाणिकं द्रुतलयं च।
अनपेक्षितगीतार्थं वाद्यं त्वोघे विधातव्यम्।।

इति। **लया** द्रुतमध्यविलम्बिता वक्ष्यमाणलक्षणाः। तालश्च चत्पुटादिकृतः साम्यविशेषो वा श(म्या)तालादि(स)हितवीणया शक्यप्रयोगः। वर्णः स्थाय्यादिः। पर्व विरामरूपो विच्छेदः। **यतिः** स्रोतेगतादिः। **गीति**ग्रामविभागतः। जात्यंशविशेषोचितदशकभेदवैचित्र्यसम्भावितो(ता)वा **गीतिः। अक्षराणि** देवं शर्वमित्यादि(दीनि)। एतच्च समस्तं गीतं वीणायां शक्यप्रयोगः(गं) स्वरपदतालनिष्ठुर(निष्ठित) प्रप चं दर्शयति। **भू प्राप्तौ** (पा. धातुपाठः—१८४५)। अत्र तेन लयादिभेदं भावयते प्राप्नोति स्वीकरोति यद्वान्यत्तत्त्वं न स्वभावव्यतिरिक्तत्वात्। तेन तथाविधगीतेन सह समवायः सम्मेलना स **तत्त्वाख्यो** वाद्यविधिः। एवमन्यत्र मन्तव्यम्।

अनुगच्छति न सर्वं तद्रुपमनुहरत्यापि तु किञ्चिद्यथा विलम्बिते पि लसे नूनं प्रयोगं मध्ये करोति **देवमि**ति। वर्णद्वये गीयमाने त्रिचतुरान् प्रहारान् करोति। यत्र पुनः समवायात् प्रत्यक्षमेवमनुसरणं न भागशब्दः स **ओघः**। आविद्धं चतुरं कृत्वा प्रहारक्रियानेन(तेन) **बहुलम्। उपर्युपरी**ति समीप्ये। तेन निरन्तराः **पाणयो** धाता यत्र। गीतविदारीष्वप्यविच्छित्तिमिति यावत्। अत एवौघ इवौ**घः**। केचिदाविद्धकरणवदत्र धातू निर्दिष्टाविति मन्यन्ते। **अन्ते** तु निर्देशादेव पूर्वो वाद्यविधिर्व्य जनविस्तारधातुविध(ष)यो मन्यन्ते। तत्पक्षे न **व्यक्तिव्य(र्व्य) जनधातुने**त्युपक्रम(म्य)**वाद्यविधयः सम्यक् त्रयो दर्शिता** (नागानन्दम् १.१४ प्रियदर्शिका ३.१०) इत्यसमीचीनं स्यादिदम्। न तु वाद्यविधित्रयोपदेशेनादावपि केनचिद्विकारभेदेनावनद्धवाद्ये पि। अत इत्थमुद्दिष्टम्।।**७७ - ७८**।।

तन्निरूपयितुमुपक्रमते। **वक्ष्याम्यतः परमि**ति। **निर्गीतं** वहिर्गीतं शुष्कमिति **पूर्वरङ्गाध्याये** (भ.ना.अ.५ श्लो.३०–५७) निर्णीतमेव। तस्य विधानादिभेदस्तेषां सम्यगवगमो येन भवति त **समवायलक्षणं वक्ष्यामी**त्यर्थः।।**७६**।।

तत्रा**श्रावणमेव** लक्षयति। **विस्तारधातुविहितैरिति**। विस्ताराख्ये धातौ यानि विहितानि **शास्त्रकारेणे**ति। एकविस्तारादयश्चतुर्दश प्रभेदास्तैः **प्रविभागश** इति। एकैकं द्विरभ्यस्तैर्वारद्वयं प्रयुक्तैः। पुनर्भेदान्तरे पि तथैव द्विः प्रयुक्तो(क्तै)द्वि(र्द्वि)रावत्तैस्तस्यां च पुनरावत्तैः। **करणस्य** स्वगतायाः क्रियाया **अपचयाः** पूर्वयुक्तिमुज्झितभेदेनान्तर––निमज्जन(त)या तेषां तैरेवंविधैरुपलक्षिता स्यादा**श्रवणा** नामेति। **सन्निवत्तः(त्तैः)**। तद्यथा। एकविस्तारो द्विः प्रयुज्यते ततो वा द्विरधर इत्ययं भेदो द्विः। पुनरेकविस्तारो द्विरुत्तर इत्यत्र भेदे गुणनयापि लापितस्वरूपो द्विस्ततो द्विरत(धर) इत्ययं भेदो द्विः। ततो द्विरुत्तर इत्ययं भेदो द्विरधर इत्ययं भेदः। द्विरधर इत्यत्र भेदनिमग्नस्वभावो द्विरित्येवमेतदप्यनुसर्तव्यम्। **विशाखिल**मतानुसारिणस्तु(प्राहु)रंशस्य स्वरविस्तारणे स्या––पचयातालप्रभेदेषु तैर्वस्तु (त) एविस्तारान् मात्राभेदः कर्तव्यः। तस्यानेकस्वरकलानुपदेश्यमानत्वात्।।**८४**।।

एवं वीणावाद्यमुक्त्वैतद्गतं शुष्कध्रुवाकर्मप्रस्तारमाह। **गुरुणी त्वादावि**ति। गुरूणि शेषाणि भवन्ति। न च लघ्वक्षरम्। इदशमेव द्वितीयखण्डम्। ततः प चदशाक्षरे ततीयखण्डे त्रयो गुरवो न्ये लघवः। लक्षणरक्षणार्थं सार्थकपदोदाहरणानीह लिख्यन्ते। खण्डप्रस्तारकं लक्षणपूर्वकम्। तनौजयनौस(तननजयननसाः।।२।।) सनजनस(साः)। समस्तमात्रा (आ)श्रावणानुसार(रेण) इति त्रिखण्डा। (यथा)

शम्भुं प्रणमत मम किल मानसमाश्रावणा(ण)मिह कृतहृदये।
भद्रं वसति (पदकमलपूजन)योगादितिसुतनतमकुटे।
वरदं स हि शरणं भवति वनपद(म्)।। (इति)।।**८५-८६**।।

अत्र तालविशेषमाह। **त्रिःशम्योपरिपाणावि**ति। एवमेवेति। न सो पि त्रिरुपरिपाणौ च तेन शम्यात्रये आदौ वीणादिवाद्ये नुगतं गीतम्। **एककवानि**ति। एकया विदार्या इयद्वक्ष्ये। तालत्रयपयन्ते गीते विच्छेद एकः कर्तव्य इत्यर्थः।

अन्ये तु **एककवानि**ति न पठन्ति। **एवमेवार्थे(र्थ** इ)ति ते पठन्ति। तेषामाशये **उपरिपाण्य**भिधानादेव शम्यात्रयं विदारीविच्छेदो(द उ)पलब्ध एव। तेनादौ वीणावाद्यप्रयोगः शम्यावाद्यमतो पि वीणावाद्यं ततस्तालत्रयमिति तद्वक्ष्यते। लयस्योपरि यद्वाद्यं पाणिस्तस्योपरीति। ततो वाद्यस्य(द्येन) समं गीतिः। **द्वे शम्ये**। योजनावपाणौ तालोपरीति प्रयुक्तम्। **समे** चेति। प्रयुज्यमाने(न इ)ति। असमे च प्रयुज्यमाने **तालावप्येवमि**ति। द्वौ समपाणौ तेन शम्या तालद्वये च गीतवाद्ययोः सङ्ग्रहः।।८७।।

ततश्च **यौ शम्यातालौ** तत्र पूर्वं गीतं ततो वाद्यमित्य**वपाणिः**। उत्तरस्तथाः चैवेति। तेनैव रक्षणे(लक्षण)प्रकारेण **उत्तरः** प चपाणिः षट्कलः। **चच्चत्पुटः** षट्चतसभिः कलाभिरिति द्वाविंशतिकलाः। **द्विस्तत्र तथा चैवेति वचनात्** प चपाणौ च चच्चत्पुटे चार्धपाणिरेव। तेन सप्त विदार्यो त्र द्वयोरुपरिपाणिर्द्वयोः समपाणिस्तिः सष्ववपाणिः। वाचनिकश्चायं तालविशेष इति युग्मौजविभागापेक्षणं मनःखेदमात्रम्। **अन्ये तूत्तरस्तथा द्विकल** इति पठन्ति। ते ष्टाविंशतिकला(मा)श्रावणामाहुः। अपरे **चच्चःपुट**स्तथेति (भ.ना. २६–८८) वचनात् सो पि द्विकल एवेति व्याचक्षाणा द्वात्रिंशत्कलामिमां मन्यन्ते। द्वात्रिंशति(त्)कलत्वमेव सूचितं पूर्वापरविचारेण लक्ष्यते। तथा हि। **चत्वारस्तु गुणा युग्म** (भ.ना. अ.३१–१०६) इति वक्ष्यते। खण्डद्वयान्ते च मात्राद्वयं कलायां यद्वक्ष्यवि। **एककलापि मात्रे**ति। एवं खण्डद्वये ष्टादशकला। ततीये चतुर्दश। अन्त्ये गुरुर्द्वयोश्चतुष्कलयोः। वक्ष्यते हि। **निवत्तौ हि कला न्यूना यदा वस्तुवशाद्भवेत्। आकलापातमात्रेति।।** (भ.ना. ३१. २२८)।। स्पष्टः क्रमः।

अन्यैस्तु ध्रुवा त्रिखण्डा कृता तालस्त्रिखण्डः कृतः। तत्र प्रथमखण्डे उपरिपाणियोगाच्च तस्य कला पदशून्या शेषास्वष्टासु पदानि। द्वितीये वपाणियोगाद् द्वौ गुणौ तु ताले तु प्रवेशेन लभते(भ्येते) शेषः पदग्रामः षष्ठ(ट्सु)कलास्विति प चपाणिः। ततीये तु खण्डे चतस्रः कला इति पथगेव खण्डत्रये तालयोग इति। कतमदेतत्। अतन्त्रमिति न चोद्यम्। न ह्यत्र समुदायाश्रयं मानम्। अपि तु प्रतिखण्डभेदे च भवति गानवैचित्र्यमिति लक्ष्यते **ध्रुवाध्याये** (भ.ना. अ.३२)। **एकवस्तु ध्रुवा ज्ञेया** इत्युपक्रम्य **द्विवस्तु परिगीतिका** (भ.ना. अ. ३२.७) इत्यादि। चतुर्विंशतिकलात्मके र्धयोगादेकादशकलिकत्वात् सङ्कीर्णं मानं तच्च तालाध्याये (भ.ना. अ.३१) सङ्ग्रहीष्यते **कलाः प चे**त्यादिनेति (भ.ना. अ.३१.२४) व्याचक्षते तदसत्। तत्र योगे त्र विच्छेदाभावात् खण्डत्रयेणैवापथक् तालः। तदुपभङ्गचतुर्लघ्वादि यदिति मान....पि स्फुट एव। तदर्थमेव खण्डत्रयविभागो मुनिना कृतः। ताले पदेषु च प्रथमखण्डे च सङ्कीर्णः ताले तद्वक्ष्यते **कलाः प च तथा सप्तपुनर्नव च कीर्तिताः।। दशैकादश चैवेति** (भ.ना. अ.३१.२४) एवं च गीततालविषयः पदेषु यो गुणविभागो वक्ष्यते

तालाध्याये चत्वारश्च गुणा युग्म (भ.ना. ३१.६८) इत्यादिना सो पि नात्यन्तायेहापि न भवतीत्यलं बहुना। **इत्याश्र(श्रा)वणा।।८८।।**

अथारम्भः। आरम्भे तावद्गीतपदं प्रस्तारमाह। **दीर्घाण्यादावष्टावित्यादि**। नैधनं गुर्वित्यर्थः। **चत्वारि लघूनीति। निधनमिति।** गुरुं चान्ते गुणीकृतानि। यच्च द्विगुणं पुनर्गुरुद्वयम्। मौ त्नौ नौ स इति। म्भौ नौ भ्सौ इति। म्भौ नौ ग (इति)। आरम्भे ततीयखण्डः।

तं वन्दे नाथं त्वमारम्भ इह निधनविरहितमहसम्।
गौरीकान्त(न्तं) हुतवहरविशशिय (दक्)त्रितयमिदं(मम्)।
नेत्रं त्व(त्राघ्य)स्तं हृदि विदलितत(मस)म्।।

अत्रापि त्रिखण्डत्वमेव। गीततालयोर्दश कला आद्यखण्डद्वितीये षट्कलाः.....यये खण्डे..... मैथुनग्रहणादेकविंशतितमे गुरोर्विश्रान्तिकलाप्रयोगः पुनः.....शतितमे इति प च।।**८६-६०**।।

(अ)क्षरेषु द्वादश कलास्तासां तालविधिमाह। **तालश्त्रिकलश्चादौ**। ततीयस्यां कलायां तालमेकस्यां शम्या द्वितीयस्यां तालः। द्वितीयस्यां शम्या द्वितीयस्यां तालम्। अन्ये पि तालो पि ह्येकका(कला)त्मकः स्यादिति वदन्ति। ते शम्यानन्तरमेव तालमाहुः। ततीयस्यां सन्निपातं **शेर्षं तु विप्रा** इति परिपाट्या। द्विकलपादभागानुसारेण **युता(पुनः)पितापुत्रकश्चषट्पूर्व** (भ.ना. २६–६२) इति द्विकल एव प चपाणिः। चच्चत्पुटस्तथा द्विकल एव। के(ते)न तीरवताप्रशतादसतानि प्रतिसप्रसतिस इति **केचिद्** व्या(च)क्षते। अत्र क्रमादयः शब्दा पूरणार्थे वर्तयिताव्यास्तावन् न्यायो स्ति यत्र मध्यं च विकलोचितेन पूर्यन्ते(ते)

ननु **चच्चत्पुटश्चतुष्कलोचितेने**ति प्रमाणाभावः **षट्पितापुत्रगो(को) त्रद्विकल** (भ.ना. २६–६२) इति प्रकरणं प्रमाणमिति चेदन्योन्याश्रयः। द्विकलो द्विः **प चपाणि**रिति चारित्र **(च त्रि)कलं च (लश्च)सन्निपात** (भ.ना. २६–६२) इत्यतो नन्तरं **पितापुत्रकं च (कश्च) षट्पूर्व** (भ.ना. २६–६२) इति वचनप्रयोजनं तथा चासारितेषु च चत्पुटपरिवर्तस्य **शम्यादि(दी)द्वे(द्वौ) च प चपाणियुताविति** (भ.ना. ३२–६५) वक्ष्यति। द्वात्रिंशति(त्)कला––स्तद्भारतेयमदगणविभागास्तस्मात् **का(ता)लत्रि(स्त्रि)कल** (भ.ना. २६–६१) इत्यादौ **त्रिशम्योपरिपाणाविति** (भ.ना. २६–८७)। निरन्तरा ये च काला द्वादशिकपाताः तातासंतातातः संसंता(ता) संसंता। **तालो द्विकलकश्चे**ति (भ.ना. २६–६१) तु पाठे सन्नि(पात)द्वयम्। अत्र त्वन्ये तु तमेकेनैव सन्निपातेन भाव्यते(वयन्ते)।

ननु प्राची कल्पनेति चेदे**केनैव भाव्यमिति** वचनादते किमत्र प्रमाणम्। तथापि च तद्विकलत्वे चतुष्कलत्वपरिहारे वा प्रमाणमस्ति। एकेन सन्निपातेन भाव्यम्। प्राथमा(म्या)च्चतुः का(ष्का)रणभूतो द्विकल एव विधिरित्यपि यदुच्यते तत्रापि **चच्चपुटः प्रथम** इति तदीयचतुष्कलविध्याश्रयेण सर्वं युक्तमित्यलं बहुना।

सर्वथा श्रवणादिवद् द्वाविंशतिकल एवारम्भः। प्रथमखण्डे केवलं पातभेदः स च दर्शितः। द्वितीयखण्डे यथाक्षर(:)प चपाणिः। ततीये चच्चत्पुटो पि यथाक्षर एव। स ता ता ता स स ता ता। न च **शास्त्रान्तर**प्रामाण्यादपि द्विकलादिविभागाश्रयं(यत्वं) युक्तमेव। तादात्म्ययोगे त्र न स्यादारम्भश्च.....ति **विशाखिलाचार्यः।।६१-६२।।**

अस्य तु वीणावाद्यविधिः प्रदर्श्यते। **कार्यं त्रिपर्वविहितै**रित्यादिना **उद्वहन(नैरपध्व समव)रो** (हैः)। एकविस्तारसङ्घातसमवायात्मिकानि त्रीणि पर्वाणि। अस्य(त्रयो)भेदा यस्येति विस्तारधातुना विहिता ये आरोहावरोहास्ते पि च व्य जनाविद्धोरधावु(विद्धैरध उ)क्तैस्तलरिभिड(त)ह्रादभेदैर्मिश्रीभूतास्तथा करणधातुभेद एकविस्तारबहुलेनापचययुक्ता न्यग्भूता इव ते च द्विस्त्रिरावर्तमानाः पुनरित्वन्तरप्रयोगव्यवधाने प्यागताः ते च द्विरभ्यस्ताः प्रयुक्तास्तैरुपलक्षित **आरम्भः**। व्यवधानेनावत्तिनिवर्तनाभ्यामितीह वत्तिविशेषो मन्तव्यः। प्रसङ्गाल्लाघवेनावतरणं पूर्वमनुक्तमाह। **आरम्भ** इति। **अपि**शब्द इवशब्दस्यार्थे। आरम्भवदवतरणे प्यङ्गैस्त्रिपर्वयुक्तैर्विस्तारधातुभेदैर्वाद्यविधिः कर्तव्य इति यावत्।

नवस्य शुष्काक्षरैर्विधिस्तालविधिश्च कस्मान्नोक्तः। तत्रैके मन्यन्ते। चकारौ वधारणे। तेनास्य वाद्यविधिनैव प्रयोगः। तथापि **पुष्कराध्याये** (भ.ना. अ. ३४) (प्रत्याहाराया) सावतीर्णकोटी(टिः) तत्र वाद्यं सार्वमर्जितं सार्वभाण्डिकं सकलस्त्रीबालमूर्खादिर जनं प्रयोक्तव्यमिति। तदेवमवतरणं वाद्यप्रधानमेवेति तावन् मुनेः।

तत्रान्तरे तु तस्य रूपं सप्तरूपात्मकमुक्तम्। तदपि दश्यते।

चच्चत्पुटोत्तरैर्मिश्रा सुगत्यास्तु यथाक्षरौं
सुगधि...मुत्तरांशमुपाश्रिता।।
विकटोत्तरयुग्म(ग्मा)भ्यां रौद्री स्याद्विंशतिः कलाः।
प चदश्यास्तु कर्तव्या वार्तिके द्विकलेन च।।
चच्चत्पुटे चतुष्षष्टिव(र्व)र्तनेत्यर्ध.....।
उद्धट्टचच्चत्पुटयोः पा चाली सप्तका चतुः।।
दक्षिणे चोत्तरेण स्याच्चैव....।
शुष्कयोगो दक्षिणे त्र चतुष्कलः.....।।
युजाश्विनी दक्षिणेन ध्रुवासप्तकमित्यथ।
सूर्यादितो षडङ्गेयं षड्जग्रामादिसप्तकम्।

इति। एवमगस्त्यादिचतुष्केण गुरुलघुर(धवो)न्यक्रमेण यथाक्रमं ध्रुवासु गीतास्वपरिग्रहात्मा वतरणप्रयुक्तं भवति। अव्यवधानेन भवतीति **कीर्तिधराचार्येण** लिखितम्। प्रत्याहारो पि य**स्त्रिसाम स्यात् षट्कल** इति वक्ष्यते। तत्रैककलादिना गुरुस्त्रिकले(ल इ)ति प्राहणं साम। सा नि नि सा आ (सा) नि वि (नि) सा। चैककला चैककला द्विकला चतुष्कलना(लात्रा)पि पिण्डीकरणम्। अत्र क्रमेण चित्रवार्तिकदक्षिणानां द्रुतादीनां च विधिः प चकलाद्वयमाने सं सां स सां स सा नि सा नि ता ता स नि वि सं। एवं तिस्रः।

सौरउद्धटे(ट्टे)न चाचपुटो वि(द्धि)कलो थ चतुष्कलः। श श श नि स मा नि सा नि सं आ नि वि स आ नि वि स सं। एतदुक्तम्।

प्राह्णमेककलं साम द्विकलं वह्निजं तथा।
चान्द्रं तु द्विकलं शुष्कं पूर्वयोः सार्थकं पदम्।।

इति **कीर्तिधराचार्यः।** तदेतदपि **पुष्कराध्याये** (भ.ना. अ.३४) निरूपयिष्यते। तत्र त्रिपर्वाभिधानमेव ज्ञापयति **पूर्वरङ्गाध्यायं** (भ.ना. अ.५) **पुष्कराध्यायं** (भ.ना. अ.३४) चोपजीव्य पूर्वरङ्गरचना कार्या। आस्तां तावत्। नन्वारम्भः **पूर्वरङ्गाध्याये** (भ.ना.अ.) प्रथममुद्दिष्टः। इहत्वाश्रावणेति किमेतदुक्तम्। तत्रैव वैकल्पिकमनयोः प्राथम्यं समकालत्वाद् द्वयोः।।**६३-६४**।।

अथ प्रकृतं वक्त्रपाणिं लक्षयितुमाह। **गुरूणि प चेत्यादि। गुरुणी द्वे लघू (घुती)द्वे इति केचित्** पठन्ति। **अन्ये लघु त्वेकमि**ति। प्राच्यं तु युक्तं मन्यन्ते यतिशोभाकरत्वात्। म त न लघु गुरु नयनं गुरु। ननलं गुरु।

वक्त्रे गौर्या
स्म दादह (दान्दही) तु दुरितभरम्।।

तत्र र च च इत्यर्धे **चच्चत्पुटो द्विकल** (भ.ना. अ. ३१.१४२–१४५) इति वक्ष्यते। शेषः प चपाणिरेककलस्तस्यात्तेत्यपरिषत्तता।।**६६**।।

अथास्य वीणावाद्यविधिरुच्यते। **आविद्धकरणयुक्त** इति। आविद्धधातुना करणधातुना सर्वथेव च युतो **वक्त्रपाणौ वाद्यविधिः** स्यादिति सम्बन्धः। तत्र च द्वे अङ्गे वक्ष्येते। मुखं प्रतिमुखं चेति वर्णाङ्गावत्र। एकं विदार्यात्मकम्। अपरं षट्पदविदारीकम्। यद्ध तं तस्यावरोहित्वलक्षणो यं प्रवत्ताख्यो भेदो पि वक्ष्यते तं वा कुर्यात्। एवं तावदङ्गं स्यात्। **एककप्रवत्तौ(तो)** वेति पाठे व्याख्या। यदा **तर्ह्येकेनोपयोक्तव्य** इति पाठस्तदा विवक्ष्यमाणैकविधैकप्रवत्तमध्याद् द्वे एकमङ्गमस्मिन् प्रयोक्तव्यमिति व्याख्या।।**६७**।।

अथास्य तालविधिमाह। **मद्र(न्द्र)क** इति। कलाकालपरिच्छेदं येन तत्पादनं....शम्यादिना परी द्विकलापरिच्छेद्यं गीतस्यैकेन्द्रियग्राह्यतयावधारयति। चत्वार्यावापादिना परं प्रत्यस्य चक्षुर्ग्राह्यत्वात् स्वात्मन्यवधानकलातिशयेनाक्षरत्रयगणनाया इवादष्टमात्रमुपयोगः। तत एव कालत्वेन स्वस्यादेः स्वकलोपयोग इति न। नास्तीति कलात्वमपि न तु द्विकलमद्रकगतः। किमत्रन्या(त्रान्य)सप्ततालेनेत्याह। **अष्टकलान्वितमि**ति। अनु पश्चाद्भागमितं प्राप्तम्। तेन द्विकलमन्द्रकस्या....त मात्रा गतः। अत्र तालविधिः। श ता ता श ता (सम्)। **ध्रुवाया अन्ते चास्य ताल** इति दर्श्यते।।**६८**।।

तस्याधस्तादित्यष्टकलस्य मुखस्य पश्चात् **प चपाणि**चतुष्कं प्रतिमुखात्मकं कुर्यात्। **तस्य** पुनरप्यन्ये(न्यस्ये)त्यर्थः। न तदेव गीतं चतुरंशकं(रावत्तं) गेयमिति कथयति।

वक्त्रपाणेरयं तालो मुखप्रतिमुखाश्रयः।

इति। मुखमष्टकलं **शिष्टं प्रतिमुखम्**। एकदा ह्यत्र तालः केवलं परिवर्तनमात्रभेद इति भावः। **अन्ये** त्वष्टकलामात्रा त्रिरावत्या.....। अत्र तालस्ततावनद्धयोः स्ववाद्याक्षरसात्म्यमिति मन्यन्ते।।६६।।

अथ सङ्खोटनामाह। गुरुणीत्यादिना। नैधनमिति। गुर्वित्यर्थः। तेन सङ्खोटना त न न य ज न न न ग (स इति)। विधिभावातत्तु(वात्तु) द्विधा। ये तु....। यदि वा **मतान्तरे** प्रस्तारः सङ्खोटना म(तः)।।**१००-१०१**।।

अथ वीणावाद्यविधिः। **अधिदण्डमिति। वीणा**शब्देनेह तन्त्री। **अधि** समीपे। यथा बिन्दुर्वाद्यते तथा पीड्य दक्षिणतर्जन्या ङ्गु**ष्ठाभ्याम्। वादिनां संवादिनः(ना)** तेन च **सहाधिबलं** वादिनों शस्वरं च **खोटयेत्** चन्द्रचामेप्रये (बिन्दुं मेलयेत)। अनुवादिस्वरास्तत्र मेलनायां समवायिनो गुणभावेन निर्भासमानाः प्रयोज्याः। एतत्त्रयापेक्षया ये चापि वादिनस्ते ल्पका अल्पगानादितरस्वरापेक्षया ल्पा इव नातिपुनरुक्ताः। तन्मेलनान् मध्ये प्रयोक्तव्याः।।**१०२-१०३**।।

केन धातुभेदेनेत्याह। **विस्तारचित्रकरणैरिति विस्तार**धातुजा ये विचित्रा यथा तुल्यव्यामिश्रणया **करणा(ण)**भेदास्तैः। **द्विस्त्रिर्निवर्तितैश्चाभ्यस्तैः**। त्रिरावत्या(त्य)भ्यासयो—र्व्यवधानैर्वा प्रधानीकृतो विशेष इत्युक्तं प्राक्। **उपचययुक्तै**रन्यथा भेदविस्तारधातुमग्नैरिति यावत्।

अथास्यास्तालविधिमाह। **तालो स्या गदित** इति। **शीर्षवदिति** सिद्धे प च**पाणिग्रहणं** शीर्षगतं परिवर्तनं व्यावर्तयितुम्। मद्रकरोविन्दकोत्तरेषु हि शीर्षकं लक्ष्यते। तत्रेह विशेषाभिधाने विशेषकवत् सर्वमतिदिश्यते। **रोविन्दकशीर्षकमपि विशेषातिप्रवत्तत्वमि**ति वक्ष्यते। **प चपाणिने**त्येतावता सिद्धे **शीर्षकवदि**ति वचनं **द्विक**चतुष्कयोः प्रतिपत्यर्थम्।

यथाक्षरस्य कर्तव्यं मद्रकस्य तु शीर्षकम्।
चतुष्कलः प चपाणिर्द्विकले द्विकलस्ततः।
चतुष्कलस्तु कर्तव्यो मद्रके तु चतुष्कले।। (भ.ना. अ.२३८—२३६)

इति। **वक्ष्यत** इति। अन्यथा प्राथम्यादेककल एव प्रतीयते। तत्र च ये च **लय(या)ल्लयनवेदगा** इति ध्रुवामाहुस्तेषां द्विकलः। **अन्येषां** चतुष्कल इति।।**१०४**।।

परिघट्टनाध्रुवाविभागमाह। **दीर्घाण्यादावष्टावि**त्यादि। सो म न स सा न स र ला। **परिघट्टना** यथा।

सर्वेषां पाशानामेव(वा)घटनमवधटनपरमलहक(ति)रसि।
परिचितहृदय हतं(ता)निकृतनिर्ऋतिगु(ग)णकृतनुतित(ति)— **भगवन्।।१०५-१०६।।**

अथात्र वीणावाद्यविधिमाह। **वाद्यं चास्यमि**ति। अस्य त्विति। शुष्कभेदस्येति योज्यम्। **सोद्वहनमि**ति। आरोहप्रधानम्। **हस्तलान्घवादि**ति। तत्तद्धतिरूपपारुष्यं न भाति केवलमनाहतैः पदलक्षणमात्रं श्रूयत इति यावत्। तथा चाह।

व्य जनधातोरुत्थित(धातुसमुत्थ)मिति। तस्य च ललिता जातिरित्युक्तम्। **नाना**प्रकारा ये **करण**धातोर्भेदा उक्तास्तेषां यदाश्रयणं व्य जनभेदप्रधान्यापादनं एतेनोपेतम्।।**१०७**।।

सम्पिष्टकवच्चास्यातालः करणैस्तु धातुसंयुक्तैरिति **केचित्** पठन्ति। **सम्पक्केष्टकवच्चास्यास्ताल** इति यावत्। तथा चाह।

निष्क्राममादितः कृत्वा शम्यास्तिस्रः प्रयोजयेत्।
तालत्रयं ततश्चैव शम्यातालौ ततः परम्।।
शम्यातालौ ततः कार्यो सन्निपातो न्त्य एव च।
ओवेणके तु सप्ताङ्गे सम्पिष्टकमिदं मतम्।।
द्विः शम्यातालयोगेन द्वादशाङ्गे(पि चेष्यते)। (भ.ना.अ.३१श्लो.२८६–२६१।१)

इति तत्र शीर्षकवदिति प्रकरणाद् द्वादशकं सकलम्। एवं हि **सम्पिष्टकताल** इत्याचक्षतें **अन्ये तूभय**मिति द्वाविंशतिकलत्वं परिघट्टनाया आहुः। नी स स ता ता सं ता सं (१२) नि स स ता ता सं सा सा स ता सा सा ( ) अत्र च पक्षे वत्करणवाचकमित्युक्तं पूर्व**रङ्गाध्याये** (भ.ना. अ.५)। **सम्पक्वेष्टकस्य** लक्षणं वक्ष्यते।

तालादिस्त्र्यश्रभेदो न्यः सम्पक्वेष्टकसंज्ञितः।
गुरुप चाक्षराद्यन्तप्लुतमात्रासमन्वितः।। (भ. ना. अ.३१–२१)

अन्ये पठन्ति। **अन्ते चतुर्मात्राद्वयान्विता(तः)** इति। ता स ता स ता यदि वा सो स ता सो ता। **अन्ये** तु **द्वादशकलं चासावि**ति। विकलीकृत्य निष्क्रामप्रवेशयोर्योगेनात्र सम्पक्वेष्टकश्च योज्यते। ता प्र सं प्र ता प्र स ता प्र सा प्र नि सं। वत्करणं चात्र पक्षे न वाचकम्। यथाक्षरं विकलं मिश्रीकृत्य सम्पक्वेषकमष्टेच्छन्ति। ते चाष्टादशकलत्त्वमासामाहुः। एवं ह्यनुसतं भवतीति। गुरुलघुयोगादेवं **विहिताः** कार्यो बुधै**र्विधेय(र्नित्य)**मिति च ग्रन्थो वाचको भवति। **गुरु**शब्देन यथाक्षरं **लघु**शब्देन विकलद्विकलो **योग**शब्देन प्लुतः सङ्गहीतः। सम्पक्वेष्टकपक्षे तु **गुरुलघुयोगात्** ध्रुवागतवीणाप्रतिगतो वा मन्तव्यः।।**१०८**।।

अथ मार्गासारितं वक्तव्यम्। तस्य च चित्रपूर्वरङ्गपक्षे ताण्ववाद्युपयोगे पि सर्वत्र पक्षे तन्त्रीवाद्यप्राधान्यं

तन्त्रीभाण्डसमायोगात् मार्गासारितमिष्यते। (भ.ना. अ.५–२०)

इत्यन्तं प्रतिपादितम्। तदेव वक्तुं प्रथममस्य वीणावाद्यविधिमपि विधत्ते। **मार्गासारितवाद्य**मिति। व्य जनधातुवर्जं धातुत्रयमप्यत्र प्रयोज्यम्। व्य जनधातुभेदौ तु तालकलौ प्रयोज्यावित्याह। **सकलैः सतलैः करणै**रिति। उक्तैर्धातुभेदैरित्यर्थः। **अन्ये** तु करणधातुभेदा एवं कलतलाभ्यां मिश्रीणीया इत्याहुः। वीणावाद्यविधिमभिधाय तत्र प्रत्याहारभेदोपयोगि गुरुलघुवैचित्र्यसम्पादकध्रुवाभिधेयायोपक्रमते। अथ **गुरुस चयश्चाया**मिति। वक्ष्यति इति शेषः।।**१०६**।।

तमाह। **चत्वारि गुरूणि स्युरि**त्यादि। म्भौ नौ त्नौ सलग अशेषमार्गः। द्विधा यदि वा । एतच्च त्रिधा योज्यमेकलचच्चत्पुटे द्वौ प चपाणौ।

यक्षैर्या(यो)द्य स्तुतिपर इति हि र(हर)कृत्यार्थं विरचयसि शिवपुरान्। अर्वाध्मातत्रिभुवनभयकरहेतुत्रिपुरसदन(बि)दलना।
न्त(न्तः)पाशा(शांस्ते) वि(द)लयतु (हि) शिवमार्गं(र्गे)रणघटितनिजमनसः।।

अस्य तालविधिमाह। **बालासारितवदि**ति। कनिष्ठासारितस्य तालो वक्ष्यते।

चच्चत्पुटपरिवर्तः शम्यादि द्वौ च प चपाणिकृतौ। अन्ते च सन्निपातः।।

इति सप्तदशकलः सो त्रापि मन्तव्यः। स ता सं सा ता स ता स मा स तं सा स ता स ता साः।।**११०**।।

अथ लीलाकृतमुद्दिष्टं तल्लक्षणं वक्तव्यम्। ननु पूर्व**रङ्गाध्याये** (भ.ना. अ.५)– स्य नामापि नोक्तम्। तत्र वैकल्पिको मार्गासारितलीलाकृतयोः प्रयोगः आसारितमध्य एव चास्य सङ्ग्रह इति तस्य लक्षणमाह। **श्रवणमधुराणि लीलाकृतानीति अभिसतं परिसतं** चासरितभेद एव। आसारिततालयोगेनैव गीयमानं वार्तिकमार्गगतत्वाद् द्विगुणाक्षरं षड्जग्रामगीतजात्यशंकगीयमान**मभिसतम्।** तदेव ग्रामान्तरे **परिसतम्। अन्ये त्वभिसतम**पदान्तकं माषघातादितालरचितं सप्ताङ्गं त्र्यश्रम्। **परिसतं** तु (द्वि)युजमन्ये(न्य) प्रदानादिनवाङ्गमित्याहुः। **अन्तर**शब्देनात्र लयान्तरम्। तच्च कनिष्ठासारितापेक्षया द्विगुणपदलयमार्गवाद्याक्षरम्। तदीयशक्त्या तालादि। उक्तमेवोपक्रमं तल्लयद्वैगुण्येन मध्ये मध्ये गीयमानं भवति। **तैरभिसतान्त**रैर्बालासारितैर्यानि वाद्यानि **कृतानि**। लीलया सौकुमार्यधुर्यरूपया कृतानीति **लीलाकृतानि**। तथा तैरपसारितैः कृतानि प्रयुक्तानि गीयमानपदानि नियमस्य वा तालात्मकानि वस्तूनि।

चत्वारस्तु गणा युग्मे ओजे षट् परिकीर्तिताः।
द्वितीये प चपाणौ तु सार्धाः षट् परिकीर्तिताः।। (भ. ना. अ.३१–१०६)

इति। तथा।

चच्चत्पुटपरिवर्तः शम्यादि द्वौ च प चपाणिकृतौं
अन्ते च सन्निपातः।। (भ. ना. अ. ३१–६५)

इत्येवंरूपाणि तैः कृतानि **लीलाकृतानी**ति त्रीण्येतानि भवन्ति। इह चोद्देश एतानि पथग् गीतानि। उद्दिष्टं तत् कथमेतदित्याशङ्क्याह। **तान्यप्यर्थवशादिहे**ति। शुष्के पि प्रा(प्र)यो(ग)विधौ अपक्रान्ते अर्थमर्थ्यमवलम्य तान्यपि प्रयोज्यानि। **अपि**शब्दाज्ज्येष्ठाद्यपि। तेन द्विरेषां प्रयोग इत्युक्तं भवति। एवमासारितविधावित्यवगन्तव्यम्। तानि यद्यपि अर्थ.....व (अर्थवन्ति) पदानि तथापि बहुप्रयोगनिर्वहणकर्तव्यतासामर्थ्याकर्तव्यासारितविधावप्यमेव मार्गः। तत्र सतालानि चित्रवत्तौ कृतानीत्युद्देशान्तर(रं) निरूपितम्।

तत्र केचिद्वीणावाद्यप्रयोगस्तालशून्यो ध्रुवाप्रयोगस्तु सतालो वीणावाद्ये शम्यात्मकतालयोगे पि शम्यातालानि विध्ययोगादिति मन्यते। **अन्ये** तु

विशाखिलाचार्यमतानुसारतः सर्वथैव तालम(लाद)न्यत्र वीणावाद्यमाहुः। **अपरे** तु ध्रुवगानमेवोभयथा तालयोगाभ्यामत्रेच्छन्ति।।**१११**।।

अथासारितानां तन्त्रयुक्त्या ता(ल)गतावेक्षणया लक्षणया लक्षणमाह। **ज्येष्ठमध्यकनिष्ठानि तालविधानि** इति। वर्धमानात् त्रिविधैककककलादियोगा**दासारितानि**। नात्र लयान्तरस्य नामापि गहीतम्। वर्धमानान्तर्भावे हि तदिति **केचित्**।

उपाध्यायास्त्वाहुः। बहिर्भावे पि तात्कालिकापेक्ष(क्षा)भावे हि वर्धमानान्तर्गतरूपप्रतिज्ञा स्वतन्त्रे पि भवति। बहिगीते प्यस्ति लयान्तरस्य लीलाकृत एवानुप्रवेशात् त्रीण्येवात्र मन्तव्यानि न नु चत्वारि। यथा **कीर्तिधरो** भ्यधायत्(धात्)। प्रत्याहारादीनि यानि **प चमे ध्याये** न्तर्यवनिकान्तानीत्युक्तानि तत्प्रत्त्याहारावतरणयोः **पुष्कराध्याये** (भ.ना. अ.३४) लक्षणं भवति। शेषाणां त्विह लक्षणं कृतम्। एवमनन्तरं तु यानि बहिर्यवनिकाङ्गानि तेषामस्माभिः **प चमे ध्याय** यथास्वागमं स्वरूपं प्रदर्शितम्। यत् **कीर्तिधरेण नन्दिकेश्वरम**तागमित्वेन दर्शितं तदस्माभिः साक्षान्न दष्टम्। तत्प्रत्ययात्तु लिख्यते सङ्क्षेपतः।

तत्र मार्गासारितप्रयोगे नर्तकीचतुष्कं पटान्तर्हितं पुष्पपिण्ड्या पुष्पा जलिमादाय प्रविश्यष्टाभिः षोडशभिर्द्वादशभिवं(ङ्गहारैः) प्रतिक्षेपो(प)गीयमानस्थितलयेन तदर्थं भावयेत्। अवक्रष्टे तु पदे स्थितलयेन परिवर्त्यपूर्वरङ्गमध्ये पुष्पं त्यक्त्वा मध्यगतलयं परिवर्तद्वयमङ्गहारैः कुर्यात्।

तत्र प्रथमं प चकलमुपोहनं पुष्पपिण्ड्या सूचया भावयेत्। एतदेव तमङ्गहारैः कुर्यात्। ततः प्रथमस्त्वभिनयेत्। ततः सर्वा मिलित्वा तदेव देवताराधकं पिण्डीबन्धं कुर्युः। तच्चोपोहनमङ्गहारैर्नत्येयुः। ततो द्वितीया प्राग्वदुपोहनं प्रयुज्य द्वितीयवस्तुनश्चच्चत्पुटा––त्मकेनार्थमुपनयेत्। तदेव चास्य प्रतिक्षेपेना(णा)ङ्गहारं पर्यस्तकाख्यं कुर्यात्। ततः सर्वाः श्रङ्खलां कृत्वा पुनरुपोहनं कुर्युः। ततः आद्या प्रतिक्षेपं कृत्वा प्रथमवस्त्वर्थं पुनरभिनयेत्। द्वितीया चाङ्गहारं कुर्यात्। ततः प्रथमपिण्डस्योपोहनं कुर्युः। ततस्ततीया प्रविश्योपहारं कृत्वा ततीयवस्तुनः प चपाणेरर्थमभिनयेत्। आद्ये ङ्गहारौ कुर्याताम्। ततो लतापिण्डीस्थमुपोहनं कुर्युः। प्रथम(त)आद्यस्याभिनयं कृत्वा द्या पिण्डीबन्धं कुर्यात्। ततः सर्वा नार्य उपोहनं कुर्युः। पुनश्चतुर्थी यावत्तुर्यवस्तुनः प चपाणेरर्थमभिनयेत्। ततः सर्वा भेद्यकस्थास्ततीयोपोहनं रचयेयुः। पुनस्ततीया तदेव भावयेत्। ततो लतास्था द्वितीयोपोहनं सूचयेयुः। पुनर्द्वितीया द्वितीयस्यार्थमभिनयेत्। अन्याङ्गहारं कृत्वा श्रङ्खलयोपोहनं कुर्यात्। आद्या प्रतिज्ञेयार्थमभिनयेत्। अन्या अङ्गहारं कृत्वा विदध्युर्यदाचतुर्थवस्त्वन्तरम्। ततीयद्वितीयप्रथमवस्तूनि केवलैरेवाङ्गहारैः कुर्युः। तदेव हि पुनर्वस्त्वन्याश्रयेण। तेन प्रतिक्षेपान्ते ताद्या(:) पिण्डीबन्धं कृत्वा रङ्गपीठं परीत्य पुष्पपिण्ड्या पुष्पाणि कृत्वा पसरेयुः। एवमन्याश्चतस्रो द्वितीयमासारितं प्रयु जीरन्। एवं चतस्रश्चतस्रो यावच्चतस्रः। उक्तं हि। **एवं पदे पदे कार्यो विधि**रिति। पिण्डीबन्धकाले तु

द्वादशपुष्पमालाभिर्विकिरेयुः। तत्र षोडश सम्भूय शैवमन्यं वा पिण्डीबन्धं कृत्वा पुष्पवीथ्यां पुष्पं प्रतिक्षिप्य निष्क्रामये(मे)युः। अभावे त्वासादितचतुष्कं ता एव चतस्रस्तत्र प्रतिक्षेपार्थवद्भिः पदैर्दर्शितमुपोहनं चच्चपुटप चपाणिद्वयसन्निपाताश्चेति **तालाध्याये** (भ.ना. अ.३१) पदैः सह भविष्यति। एवमासारितक्रिया ततो वर्धमानं प्रयु जीरन्। एकप्रघट्टकेन चतुर्भिर्नयैः परिवर्तं प्रयुज्य पटे पकर्षिते पुष्पवीथ्यां चतसणां नर्तकीनां प्रवेशः। ततो ब्राह्मीपरिवर्तेन पुष्पा जलिं क्षिपेयुः। तत एका ब्राह्मीमभिनयेत्। ततः सर्वाः शिवपिण्ड्या आसीरन्। तद्यथा। एकस्या आलीढमर्धवन् मण्डलिवत् खटकामुखेन तत्पार्श्वगतयोर्वा षोडशकला(:) सम्भाविता(:) गीतको.....शम्यातालैश्चतुःषष्ट्या करणं तुर्या चाहुः। ..... समपदा तिष्ठेत्। ततो त्रस्था एव द्वितीयखण्डिकाङ्गेन सूचयेयुः। ततस्तुर्या चतुर्थमभिनयेत्। तिस्रो नर्तक्यः सशैलपिण्ड्या ततीयार्थं भावयेयुः। ततः सर्वास्ततीयामङ्गहारैः प्रयुज्य तया द्वितीयार्थं भावयित्वा नत्तेन प्रदर्श्य शङ्खलया प्रथमा (मां) सूचयित्वा ङ्गहारैस्तदर्थं प्रयुज्य शिवपिण्डीं कृत्वा परिक्रम्य पुनः प्राग्वदासारितानि प्रयु जीरन्। ततः पादान्तर्वर्धमानप्रतिक्षेपमतः पुष्पपिण्ड्यां प्रतिक्षेपस्य द्वितीयगानं प्रयुज्य पुष्पाणि क्षिप्त्वा ततीये तुरीये तद्गानेनान्त्येनोदन्त्यपुष्पपू.....स्या(:) कृत्वा पुष्पाणि क्षिपेयुः। तत एकान्तमुपोहनं नत्तेनोदन्त्यविशालार्थमभिनयेत्। ततः पिण्डीबन्धेन सङ्गतोपोहनं सर्वाः। ततो द्वितीया तदेव दश्येन स्यात् सङ्गतामभिनयेत्। ततः शङ्खलायाः सुनन्दोपोहनं कुर्यात्। ततस्ततीया तन्नूत्तेन प्रयुज्य सुनन्दार्थमभिनयेत्। ततो लताबन्धेन सुमुख्योपोहनं कुर्युः। तुर्या नत्तेन स्वसुमुख्यर्थमभिनयेत्। ततः सर्वाः पिण्डीबन्धं कृत्वा नत्तेन सर्वा एव पिण्डिकाबन्धं कृत्वा भेदकेन ततीयोपोहनं कृत्वा ततीया नत्तेनायोज्य लताया द्वितीयोपोहनं प्रयुज्या द्वितीया नर्तिका शङ्खलयान्त्योपोहनं सूचयित्वा द्यार्थमङ्गहारैः प्रयुज्येष्टदेवतापिण्डिकां कृत्वा परिक्रम्य रङ्गे पुष्पपिण्ड्या पुष्पाणि क्षिप्त्वा पटान्तारिता निष्क्रामेयुः। इति **वर्धमानप्रयोगो** यथोक्तमेकादिप्रथम..... खण्डिकातालं चा दूरत एव **तालाध्याये** (भ. ना. अ.३१) भविष्यतीति न लिखितम्।

तमो **गीतकविधिः।** तत्र च ध्रुवे प्रावेशिकीमादिकां च प्रयुज्याङ्गहारविधिः। ततो वाद्यचतुरस्रकम्। ततः पुष्पपिण्ड्या ध्रुवकस्यैकं गीतम्। द्वितीयततीययोरङ्गहारक्रमः। ततो वस्तुप्रयोगः। शीर्षकान्ते वन्दनेन नैष्क्रामिकीवस्तुनिबन्धेषु तद्वदङ्गहारेषु वा गीतेषु वा..... षोढा.....चाङ्किता प्रत्येकं चास्याः प्रावेशिकी आक्षिप्ता ध्रुवा नैष्क्रामिकीति चतुर्धा विधिः। तत्र नन्दिभद्रा चौक्षषाडवेन। पिण्डीकृता चौक्षप चमेन। भुसुण्डिनी चौक्षकौशिकेन। कपिलोद्भवा चौक्षप चमेन। दाक्षी चौक्षकेशिकमध्यमेन। पौष्पदन्ती चौक्षसाधारणेन। सर्वासामुपर जनं भिन्नवक्त्रेण। षड्भिर्नर्तकीभिरयं प्रयोगः कार्यः। तत्रार्धा..... वत्तपाठस्यान्तराले शुष्कवत्तं विद्युद्भ्रान्ता तिक्रान्तनिशुम्भितादिकरणैः कुर्यात्। ततः परिवर्तनी प्रावेशिका आक्षिप्तिका ध्रुवा अन्तरगीतमिति विधिः। दिग्देवतानामभिध्यायि च शार्दूलविक्रीडितादिवत्तशुद्धगीत्यादिगानम्। एवं नान्द्यामपि चित्रत्वे प्रावेशिक्यादि। एवं

रङ्गद्वये पि वैष्णवबालक्रीडादियोगेन तत्र च क्रमेण नर्तकीनां प्रवेशेन सिद्धिः। ईर्ष्याविरहशोकविस्मयादिविचित्रं काव्यं गीतं च नत्तताल.....चार्यामपि प्रावेशिक्यादिविधिः। तत्र....व्यसनेर्ष्याकोपादिकाव्यार्थगानं चौक्षसाधारणेन र जनं हिन्दोलकेन महाचार्यामुद्धतकैलासोद्धरणं.....विजनितरोषसत्वप्रकृतिरर्थे **रावणे** शक्तिरूपः। प्रावेशिक्यादि तु प्राग्देव। शुद्धा च गीतिरूपर जना पाटाक्षरात्म(त्मि)का आवापादियथोचितकालस्य मानेन चतुष्पदादिगीतक्रमात्मकेनोपर जनम्। तत्र च प्रावेशिक्यादिविधिः प्राग्वदेवेत्येव(वं) **नन्दिकेश्वर**मतानुसारेणायं चित्रपूर्वरङ्गविधिरिति न बद्धः।

अथ प्रकृतमनुसरामः। इह वीणावाद्यविधिः प्रस्तुतः। तत्प्रसङ्गेन पूर्वरङ्गाङ्गानि तत्प्रधानानि दर्शितानि। तत्रेह मुख्यैव वीणा। अङ्गास्तद्भेदास्तु प्रत्यङ्गानि। अन्यत्र च।

वक्रा कूर्मा ह्यलाबूश्च वीणाद्या त्रिविधा मति(ताः)।
विप ची वल्लकी मत्तकोकिलैन्द्री सरस्वती।।
गान्धर्वी ब्राह्मिका सप्त वक्र्यास्तन्त्र्यः(न्त्र्याः) कला नव।
एकद्वित्रिचतुरिति चतुर्धा दश वा कलाः।।
संवादिनी च तन्त्री च किन्नरी परिवादिनी।
वैशेषिका प चकलाश्चतुरस्त्य(स्त्र्य)श्रमङ्गले।।
पि जनो नकुलश्चेति द्विधा लाबूः प्रकीर्तिता।
एकया पि जनस्तन्त्र्या परो द्वाभ्यां सुमङ्गला।।
वितन्त्रीका विशोकेति चेश्वरी परिवादिनी।
सदाशिवागमाज्ज्ञेया यथागमनिदर्शनम्।।
शततन्त्री विशोकाख्या सप्ततन्त्रीश्वरा तथा।

इति। तत्र मत्तकोकिला प्रधानभूता। एकविंशतितन्त्रीकत्वेनान्यूनाधिकं त्रिस्थानगस्वर––सारणाजातिगीतिवीणाशरीरमुच्यते। तद्गतश्च धातुप्रयोग उक्तः। तदुपजीवकत्वेनापरा भवन्तीति तदेनद् दर्शयति।

एवमेतत् स्वरगतं ज्ञेयं वीणाशरीरग(ज)म्।
विप चीवाद्ययुक्तानि करणानि निबोधत।।

इति। **विप चीति** प्रत्यङ्गोपलक्षणम्। तेन विप च्यो वाद्यन्ते यान्युक्तरिभितादिकरणमुख्य––वीणावाद्योपर जकानि वादनवैचित्र्याणि तानि बुध(ध्य)ध्वमिति सम्बन्धः।।**११२**।।

नान्युद्दिशति। **रूप**मित्यादि।।**११३**।।

तारक्रमेण लक्षणमिति **वीणावाद्यद्विगुग(ण)मि**त्यादिना यदैकेन वीणाया गुरुः प्रयुज्यते तदैव प च(वैपि च)केन (विप च्यां) लघुद्वयं यदा लघुस्तदा द्रुतद्वयमित्येवं समवायवैचित्र्येण प्रायो **रूपमु**च्यते। तद्वदेव **अनु** पश्चाद् यद्यु(दु)च्यते तत्समकालं तदा(था) कृते सति तत्प्रतिबिम्बतया **प्रतिकृतमिति।।११४।।**

युगपत्कृत इति। प्रतिकृतसमकालः **प्रयोग** एवान्यत्वेन **प्रकारः प्रतिभेदः।** स च गुरुलघुकृतो न तु लेख्यादिस्वरप्रयोगप्रतिभेदनकृत इति तेन गानवैचित्री। यदा लघुद्वयं प्रयुङ्क्ते तदा स गुरुः। यदा वैणिको गुरुद्वयं तदा स प्लुतलघुरूप इत्यादिरूपे तु भ जनमुक्तम्। इयति विपर्यय इति विशेषः। तदेव पुनर्वैचित्र्यं वैपञ्चिको यदैकस्यामेव तन्त्र्यामंशसंवादिन्यां साल्पतादि करोति तदा (**प्रतिशुष्का।**) **प्रतिशुष्कपदस्यैषा वस्थे त्वन्ये।।११५।।**

यदा तु वैणिको क्षणे विदारीवशाच्छेदं करोति तदा छिद्रे वैपञ्चिको यदा **तद्रूपशेषम्**। विभक्तितल(य) एवमपि वैचित्रिकप्रयोगे हस्तचातुर्यादो(र्यतो तिद्रुतो वैपञ्चिकप्रयोगः स **ओघः।** एवं विप चीध्रुवास्वपि वक्तव्यम्। नियमो दष्टसिद्धय एव। गान्धर्वे विप च्येवोपरञ्जिका ध्रुवागाने त्वनियमः।।**११६**।।

विप चीवाद्यस्य प्राधान्यमाह। **कार्यं ध्रुवाविधाने प्रायेण हि कोणवादनमिति। केचिदा**हुः। पूर्वरङ्गतोत्थापनाध्रुवावुत्थानस्यातोद्यर जनार्थमिति वा। प्रवत्तिविभागार्थमाह। **तन्त्योजस्क(तच्चौघतुल्यक)रणमिति। वाद्यवत्तिविभागार्थमि**(भ. ना. ५—१६)त्यादिना कथितस्य प्रयोजनस्य द्वयोर्वीणयोरुत्तराधरस्थित्या सर्वा एव वीणा कोणवाद्येन वादयेदिति तदिदं न विद्मः कोणवाद्ये का स्थानप्राप्तिः। **कोणवाद्ये(द्या) विप ची स्यादिति** च वक्ष्यमाणत्वात् कथं सर्वासां कोणवाद्यतेति। तस्मादेवमेता इह ध्रुवविधाने वाद्योपर जनध्रुवागानमित्युच्यते(न्ते)। तत्राल्पेन बाहुल्येन वा कोणवादनं कर्तव्यम्। **प्रायो**ग्रहणाद् द्व्यङ्गुलिवादनमुभयवादनं च। वाद्ये हि त्रिप्रकारके सव्याङ्गुष्ठनीयस्योः स्थाने वादकं भवेदिति कोणो त्र प्रहारम(रो)ङ्गुल्यगुष्ठप्रहरणतया चतुष्प्रहरणं कोणाङ्गुलिप्रहरणं ध्रुवासु वाद्यं कुर्यात्। यदा तु करणं तु लीनं भवति तत्र लीनानामलङ्काराणां कोणवादनेन सम्यक् स्थानप्राप्तिः। मर्दनमोदनधारणकम्पनावर्तनादि कोणस्य भवतीति नियतिः। तथाभूतस्थानप्राप्त्यर्थं वीणावाद्यं तदा यत्रोचितमेकतन्त्र्यादिप्रान्तं तत्रायमेव नियमः कोणैकवाद्यप्रयोग इति।।**११७**।।

अथ त्रिप्रकारवाद्यविषयमाह।

सप्ततन्त्री भवेच्चित्रा विप ची तु भवेन् नव।
कोणवाद्या विप ची स्याच्चित्रा चाङ्गुलिवादना।।

इति। चकारेणोभयवादनमुभयोरुक्तम्। **अन्ये** तु चकार ए(मे)वार्थे वर्णयन्तः कोणं विप च्यामाङ्गुलीं च चित्रायां नियमयन्ति। **अन्ये** तु कोणाङ्गुलिवाद्या विप ची अङ्गुलीमात्रवाद्य चित्रेत्याहुः।।**११८**।।

एतदुपसंहरति। **ततवाद्येति। सर्वमिति।** गान्धर्व गानविषयमङ्गप्रत्यङ्गगतं चेति यावत्। भाविनो ध्यायस्यार्थमासूत्रयति। **वक्ष्याम्यतश्चेति। भूय**श्शब्दस्यायमाशयः शारीरेणैव वैणविधौ भणिते तु चिरप्रयोगो वैतावदुक्त एव तत्राभ्यधिकं तद्वक्ष्यते पूणीकरणायेति शिवम्।।**११९**।।

परमेश्वरचन्द्रचूडनित्यस्तुतचिन्तामणिलब्धिदप्रकाशः।
स्फुटमभिनवगुप्तनामधेयस्ततवाद्ये कृतवान् विचारमित्थम्।।

इति महामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदविवतावभिनवभारत्यां
ततातोद्यविधानमेकोनत्रिंशो ध्यायः।।

श्रीः

नाट्यशास्त्रम्

त्रिंशो ध्यायः

रागात्मकं स्थायिपदं नियच्छन्नच्छिन्नवंशस्वरलब्धसारः।
कालात्मको सौ परमश्वरस्य स्याद्विग्रहो स्मद्भवबन्धनाय।।

एवं प्राक्तनेनाध्यायेन प्रस्तुतनाट्यविषयगान्धर्वोपयोगप्रतिपादनपरतया जातिविनियोगो वर्णालङ्कारादिलक्षणं ततातोद्यस्वरूपं प्रसङ्गतः शुष्कस्वरूपं प्रतिपादितम्। तत्र तताद्नन्तरं यद्यप्यवनद्धस्यैवोद्देशो युक्तस्तातावनद्धयोर्गेयमानकक्षयोद्वहनहेतुत्वात्तथापि विनियोगे वैणानां स्वराणां वंश्यस्वभावमार्ग उपयोगं गच्छतीति तताानन्तरं सुषिरस्यैव लक्षणं युक्तमित्याह। **आतोद्यं सुषिरं नामे**ति। **नाम**शब्देनेदमाह। वंशातोद्यमिति पूर्वं भगवन्महेश्वराराधनसाधनं **मतङ्गमुनि**प्रभतिभिर्वेणुनिर्मितं ततो वंश इति प्रसिद्धम्। वस्तुतस्तु छिद्रात्मकसुषिराभिव्यक्तस्वरविशेषरूपतयैवास्योपयोग इति। खदिरादिनिर्मितो प्यसौ भवत्येव। तथा चोक्तम्।

वंशे सष्टा यदा पूर्वं वंशसंज्ञा तु वैणवी।
वंशास्तु खदिरा रौप्याः कांस्यजा वा सका चनाः।।

इति। अत एव सुषिरयोगात् प्राणसंयोगेनातोदनीयत्वा**दातोद्यं** वाद्यते। तोद्यते आतुद्यते हन्यते वाद्यते इति चतुर्णां वपुः। केवलमस्य तोदननिष्पन्नैः स्वरैस्ततसुषिरवोरुपकारित्वं वर्णानुसाम्ययोगेन त्ववनद्धघनयोः शरीरं तु संवदनशक्तिक्रोडीकृतं समुल्लसितशक्तिकर्तकमिति तत्तत्स्थानाभिधातजातस्वरद्वारलब्धोपयोगमपि तदातोद्यमुच्यते।

तदा तुदति अभिहन्ति वादयति चेत्यकृतककर्मशक्तिमुद्रितस्वातन्त्र्यमवभाति। **ज्ञेय**मिति। वीणातो विलक्षणतया। कक्ष्या च स्वरतत्त्वस्य नातो लाभात्।

टीकाकारैः पूर्वरङ्गे वंशस्य फूत्करणवैकल्यादसंस्कार्यता तत्र चेह चानुपयोग इति महता प्रयत्नेन पूर्वपक्षयित्वा पूर्वरङ्गे **कुतपस्य तु विन्यास** (भ. ना. अ. ५–१७) इत्यादौ वंशस्याप्यस्ति संस्कायत्वमित्युत्तरपक्षीचक्रे। तत् केवलं ग्रन्थभूयस्त्वकरणरसिकता––विजम्भितम्। **अस्मभ्यो** न खलु शुष्कवादेनाभिरुचितमित्यास्ताम्।

वंशगतमिति। वंशप्रकाररूपं (लोह)खदिरादेरपि संग्रहः। ननु **द्वयधिष्ठानाः स्वरा वैणाः शारीराश्चे**(भ. ना. अ.२८–१२)त्यत्र वंशानां नामपि तत् किं न श्रावितं वंशाभिधानेनेत्याह। बुधैरिति। यथाश्रुतमेव तदन्यनिरोधनपरं वचः। किं च शारीरस्वरवैपरीत्यं वैणानामिति तथाभिधानमेतच्च तत्र व्याख्यातम्। ननु यदि ज्ञेयं तर्ह्यस्योच्यतां लक्षणम्। आह। **वैण एव विधिस्तत्रेति। स्वरग्राम**ग्रहणमुपलक्षणार्थम्। यत् किंचिदुक्तं **प्राच्ये व्यायद्वये** तत्सर्व वंशे पि बोद्धव्यमित्यर्थः। तथाहि **मतङ्गमुनिना चत्वारो धातवो वंश** इत्यादिना धातुविनियोगो पि प्रदर्शित एव।

यत्त्वत्र **टीकाकृता** स्वगतपरगतत्वे धर्मस्यातिदेशस्य विकल्पलक्षणाभिधानलाघवोपयोगित्वमतिदेशस्याभ्यधायि तदेवमेव। **सर्वत्र ब्राह्मणवद्राजा द्रष्टव्य** इत्यादावप्यतिदेशस्वरूपनिर्वाह इवेहापूर्वतया मन्तव्यम्। यत्त्वतिदेशेन न सिध्यति तत्प्रातिस्विकम्।।१।।

अस्य लक्षणमाह। **द्विकत्रिकचतुष्कास्तु ज्ञेया वंशगता** इति। आननच्छिद्रेव्यायारेङ्ख गान्धारादि(दी)त्याशयेन स्वरोत्पादकस्वरूपमुक्तम्। **कम्प्यमानार्थमुक्ताश्च व्यक्तमुक्तास्त्वि**त्यनेन छिद्रोपरि दीयमानाङ्गुलिगतच्छिद्रनिवेशिताङ्गुलिना क्रियया तीव्रातीव्रमध्यरूपप्राणपूरणप्रभवो हि वंशे स्वरविभागः। तत्र गान्धारादितया मध्यमस्वरो न्त्यो भवति। तदपेक्षया गान्धारे द्वितीयम्(यत्वम्)। तत एव च सामसु गान्धारो द्वितीयो मध्यमो हि तत्र प्रथमः। आह च।

यः सामगानां प्रथमः स वेणोर्मध्यमः स्वरः।। (नारदीयशिक्षा १.५.१) इति।

यद्यपि च न षट्सु कृष्टादिषु भव इति क्रमो युक्तस्तथापि षड्जस्य चतुःश्रुतित्वान् मध्यमत्वेन प्रत्यभिज्ञानम्। नन्वत्र वंशे कः स्वरविभाग इत्येवमाशयेनाह। **द्विकत्रितचतुष्का** इति। स्वरस्वरूपोपयोगिषु छिद्रेष्वत्र स्वरशब्दः। तेन सर्वतो त्र नवच्छिद्राणि। वर्गशो भिधाने वायमाशयः। मुखि(ख)गतमन्त्यं च यच्छिद्रं तत्तावत् पूरकतया पूर्यतया च मुखमारुतप्रवेशप्रतिघातोपयोगीत्येव नालच्छिद्रं स्वरविभागाय नोपयुक्तम्। तत्सप्तकं तु स्वरविभागकृतम्। अत्रापि हि वर्गशो भिधानध्वन्यो भावः। वामहस्तेन त्रयः स्वराः। दक्षिणेन चत्वार इति। तथा चोक्तम्।

षड्जस्त्वनामिकाङ्गुल्यामषभो मध्यमाङ्गुलौ।
निरङ्गुल्यां च गान्धारो मध्यमः कम्पितो यथा।।

वामहस्ते त्रयो ह्येते चत्वारो दक्षिणे पुनः।
प चमो नामिकायां तु धैवतो मध्यमाङ्गुलौ।।
प्रदेशिन्यां निषादस्तु मध्यमः कम्पितो यथा।

प चमो नामिकायामिति वचनान् मध्यमस्वरे कनीयसीत्याह। **निरङ्गुलीति।** कनीयसी तर्जनी वा। स्थानं चाङ्गुलीनामुक्तम्। **कर्कन्धूफलबीजवदङ्गुलीनां निवेशनिमि**ति। अन्ये बहिरष्टमं कार्यं छिद्रादन्यादनन्तरमिति नवच्छिद्राणीच्छन्ति। तत्त्वेवं भवत च्छिद्राङ्गुलीयोजनम्। अङ्गुलीनां तु कः क्रियाभेद इत्याह।

कम्प्यमानार्थ(र्ध)मुक्ताश्च व्यक्तमुक्तास्तथैव च।

इति। नैव द्विकादिक्रमेण कम्प्यमानादियोगः। अपि तु तेनैव प्रकारेणार्धेन समत्वं येन तत्र **व्यक्तमुक्ता** इति पथगन्ते भिधानादन्ते चतुःश्रुतौ तावदयं विनियोगः। तदुक्तम्।

ये चतुःश्रुतयो प्येषां पूर्णा रन्ध्रात्तु ते स्वराः।

इति। ततो द्विश्रुतेरधस्तादर्धमुक्ताङ्गुलित्वमध्यवस्यन् पारिशेष्यात् त्रिश्रुतेः कम्प्यमानाङ्गुलियोगः। तदुक्तम्।

कम्प्यमानार्धमुक्ताश्च विज्ञेयास्ते त्रिकद्विकाः।

इति। एवं वंशस्य स्वरः प्रथमोत्पत्तिक्रमश्च स्वराणां दर्शितः। **यत्वन्येषां** तु साङ्गलादिक्रमेणाङ्गुलीनिहर्लासदिशा च ब्राह्मणक्षत्रियादिजातिविभागस्तदनुसारेण चोक्तप्रकृत्यादिविषयो नाट्योपयोगः कथितः स निस्वर इति हृदये गहीत्वा मुनिना दर्शितः।।२।।

नन्वेवं छिद्रेषु स्वराणां व्यवस्थितत्वमुक्तम्। दश्यते चैवैकत्र स्वरसप्तकोपलम्भः। तत्कथमित्येदाशङ्क्याह।

तत्रोपरि यथा ह्येकस्वरो वैणस्वरान्तरे।
प्राप्नोत्यन्यत्वमेवेह तथा वंशगतो पि हि।।

इति। शारीरे दारव्यां च यथैक एव स्वर आधारभूतः स्वरान्तरविषयमन्यत्वं प्राप्नोति **यथोक्तं द्विविधैव मूर्च्छनासिद्धि**रिति (भ.ना. २८–३४) **यथा स्वराणां सततं मध्यमस्वरा(मध्यमस्वरं) विदुर्बुधा** इति तथैव वंशगतस्वरो पि स्वरान्तरविषयमन्यत्वं प्राप्नोति। तथा च धैवतांशकृतो पि। गीयमाने पूर्णवाचः प्राहुः। **धैवताद्वा निषादाद्वा स्थायी. ...वांशिका** इति। पूर्णवाचस्तु षड्जर्षभगान्धाराः स्वराणामन्यतमात्। एतदाह। तत्र यथा वीणायां सार्यमाणायां प्रतिक्षणं मार्दवाय तत्त्वसम्पादनेन सैवान्या सम्पाद्यते। तेन तथावदिति दर्शयति। **तत्रोपरि(रीति)**। न सामानाधिकरण्यतया विभक्तिनिर्देशः। अन्यथा तस्योपरि तस्यां तेन तत्रैवोर्ध्वरूपतया धेयरूपतया वस्थिते स्वरे सतीत्यर्थः। एतदुक्तं भवति। प्रथममभ्यासकाले शूत्कारपूरणतया स्वरोत्पत्तिक्रमो य उक्तस्तत्रैव स्थिते सति स्वरान्तरस्यात्र वलनम्। **यथा** वचनादत्र विप च्यामिव श्रुतिक्रमलाभः प्रस्फुटः। **षड्जं वदन्ति(ति) मयूरा(र)** (नारदीयशिक्षा १.५.३) इत्यादिवत् स्वगमकमध्यमवच्छारीरवदेव वा

विशिष्टध्वनिस्वभावत्वात्। अत एव शारीरवद्वंश्यानामारोहणमवरोहणं चेति **विशाखिलाचार्यः।**

ननु यद्येवं दष्टं स्याद्वंशस्य पथगभिधानं शारीरे(प्येवमेव स्यात्तत्र स्वरैः) अन्यविधिः(धेः) स्वीकृतत्वादित्याशङ्क्याप्रकरत्वे(ङ्क्य प्रकारत्वे)नाह। **तत्रोपरी**ति। शारीरविषयादप्यस्योपरिभाव उत्तीर्णत्वादनन्तर्भाव इति यावत्। यथा च वाद्यरूपतया त्र लालित्यं नाम स्वाभाविको धर्मो न स त्व(नु)षक्तः शारीरके **भावाभावमार्द**वपारुष्ययोगात्। तथा हि वदन्ति। **वंशे गीतमि**ति। ततः शारीरतो प्यस्योत्कर्षो वीणातश्च। उभयं ह्यनेन पूरय(र्य)ते वंशेन गीतिं भावयतीति च व्यवहारः शारीरमारुतस्यान्तरबाह्यप्रयत्नाच्च व्यापारयोगात्। शारीरे तु गायत्येवेति व्यवहारः। आन्तरस्यैवात्र प्रयत्नस्य भावात्। वंशच्छिद्रपूरणप्रयत्नो हि बाह्ये सम्भवी। वीणायां तु वादयत्येवेति बाह्यस्यैव तन्त्रीहननकारिणः प्रयत्नस्य भावात्। इत्युभयविलक्षणमुभयधर्मानुगतं च वंशस्य रूपमित्यवश्यं वक्तव्यमिति तात्पर्यम्।।**३**।।

द्विकस्त्रिकश्चतुष्को वा श्रुतिसङ्ख्यो भवेत् स्वरः।
अनीरणात्तु शेषाणां स्वराणामपि सम्भवः।।

अस्यार्थं **टीकाकार**स्तावदाह। इह वंशस्य च्छिद्रपिधानं मुखवाय्वासंयोगादङ्गुलि––संयोगक्रियायाश्चेति यत्तावत् स्वरनिष्पत्तौ कारणम्। तथा चाहुः।

वांशी त्रिधा मूर्च्छना स्याद् द्विप्रयुक्ता हि सर्वतः।
तारमन्द्रादिका चान्या मुखमारुतमूर्च्छना।
ततीया करशाखात्मा(त्म)स्वरोत्पत्तिप्रदायिनी।।

इति। तत्रेयतापि स्वरजाताः प्रथमं न ग्रामविभागं भजन्ते। स हि च श्रुतिचर्चामपेक्षते। सा च प्रथमोत्पत्तौ नास्ति। अनेनैव क्रमेण यावता च गान्धार इति। एष चार्थ(ः) फल्गुप्रायः। न हीयता वीणायां श्रुतिचर्चा काचिद्दर्शिता भवति। मुखवलनगतिस्वरतादि तु प्रयत्नबलेन भवदपि न श्रुतिभेदमाधत्ते.....वीणादिष्वपि स किं न स्यात्। एतच्च श्रुतिनिरूपणप्रस्ताव एव वित**त्यास्मा**भिर्विवेचितमित्यास्ताम्।

तस्मात् प्राक्तनश्लोकोक्त एवार्थो नेन परिष्क्रियते। तत्र ह्युक्तं **तत्रोपरिस्वरान्तरे न्यत्वमेवे**ति। तच्च कथं क्रियतामितीदमारभ्यते। यः स्वरो **द्विक(श्)त्रिक्(श्)चतुष्को** वेति नियतः स्वरस्थापनया छिद्रविशेषः प्रसिद्ध इत्यर्थः। आधारतां वाशब्दो प्यर्थे। नयति व्युत्पादयति। तदयमर्थः। तत्राप्यन्यस्वच्छिद्रे शेषाणामेषामप्यर्धस्वराणामिव या श्रुतिसंख्या भवेत्। कथं सा भवेत्। आपूरणादानयनादीरण अनादररन्ध्रपूरणाच्च। तत्र नयनमुभयोस्तीव्रातीव्रतया। रणनं तु प्रपूरणेन शब्दोत्पादनम्। पूरणं वायोः शीघ्रस्थिरतोदेन वदनजात्। वाय्वनुसारसम्पादकतीव्राद्यापूरणादिशैघ्र्यादि––निषेधात् क्रियते। तत्रान्येषामपि स्वराणां तत्र नियतस्वरे पि छिद्रे स्ति सम्भवः। (तुकारेण द्विकत्रिकस्वराणामितरे प्येतत्पूर्यतया पूरणनिषेधः।) न चेयतैव स्वरसम्भव इत्याह।

अङ्गुलीवादनकृतं चेति। अत्र द्रष्टव्यः अङ्गुलीभिर्वादनं शब्दोत्पादनप्रकारः। सम्यगित्याह। **तच्च पे संनिबोधते**ति।।४।।

व्यक्तमुक्ताङ्गुलिस्तत्र स्वरो ज्ञेयश्चतुःश्रुतिः।
कम्प्यमानाङ्गुलिश्चैव त्रिश्रुतिः परिकीर्तितः।
द्विको र्धाङ्गुलिमुक्तः स्यादिति श्रुत्याश्रिताः स्वराः।।

इति। **स्वरा**णामनेन प्रागुक्त एव क्रम उक्तः। न च पुनरुक्तानां पूर्वनिष्पत्यभिप्रायेणाधारस्वरविषयत्वेन परमार्थतो स्यानि(स्त्यभि)धानम्। अधुना तु **तत्रोपरी**त्येत्प्रसङ्गायाततदुत्पतिस्वरविषयस्तत्र वीणायां यथा मूर्छनान्यत्वं तथा छिद्रेष्वङ्गुलिसारणाविशेषोत्कर्षेणेव छिद्रेष्वङ्गुलिवैचित्र्यात् स्वरसप्तकविभागो वर्णयिष्यते। अन्ये त्वङ्गुलिशब्देनात्रोर्ध्वमन्द्रमाहुः।।५।।

ननु कुत्रायं श्रुतिविभाग इत्याह। **एते तु मध्यमग्राम** इति। मध्यमस्वरस्तावत् प्रसिद्ध इति तदपेक्षया चतुस्त्रिद्विसंख्यासारेण मध्यमप चमधैवतनिषादानामेव सम्भवति। षड्जग्रामे तु न तारगत्या न मन्द्रगत्येति मध्यमादिश्रुतिसंख्याक्रमानुरोधाच्चादौ मध्यमग्राम उक्तः।

अथ षड्जग्रामे प्याह। **भूयः षड्जाश्रिताः** पुनरिति। **पुनः** शब्दः पूर्वस्माद्विशेषद्योतकः। **भूय** इत्यनेनेदमाह। मध्यमग्रामे यदुक्तं तद्यथा द्विश्रुतिर्गान्धार इति तत् षड्जग्रामे पि न सुसङ्गच्छत इति तामाह।

व्यक्तमुक्ताङ्गुलिकृताः षड्जमध्यमप चमाः।

चतुःश्रुतिरत्र प चम इति यावत्। षड्जमध्यमयोस्तु दष्टान्ततया विवक्षितसमकक्ष्यतया निर्दिष्टः(र्देशः)।।६।।

ऋषभो धैवतश्चापि कम्प्यमानाङ्गुलीकृतौ।

धैवतस्त्रिश्रुतिरित्यर्थः।

अर्धमुक्ताङ्गुलिश्चैव गान्धारो थ निषादवान्।

चकारेण मध्यमग्रामे पीत्थंभूतमनयोरित्याह। अत एव ग्रामोपेक्षया रूपान्तराभावादेव कात्स्न्र्येन। अथवा नोक्तगीतप चककात्स्न्र्यपरिग्रहात्। उक्तमन्यत्र।

मध्यमं पूरयेत्तत्र सप्ताङ्गुलिविधानतः।
प चस्वरगतिं कुर्यात् प चभेदविकल्पनात्।
कम्पितां चलितां मुक्तामर्धमुक्तां निपीडिताम्।
यत्र.....वंशमधरस्थं प्रकम्पयेत्।
कम्पिता या गतिः प्रोक्ता वर्णालङ्कारगामिनी।
अङ्गुल्याश्चलता यत्र स्वरसम्पादने यथा।
स चारिवर्णसंयुक्ता चलिता नाम सा स्मता।
स्वरमुक्तेन रन्ध्रेण मुक्ता नाम प्रवर्तते।
अर्धमुक्तेन चाप्यत्वा(स्या)अर्धमुक्तानुजायते।

सुषिरैः सर्वधानेकैः(पिहितैः सर्वै)रङ्गुलीभिः समन्ततः।
यदा पूरयते वंशं ज्ञेया सा तु निपीडिता।। इति।।७।।

अथ **स्वरसाधारणो**त्पत्तिं दर्शयति।

स्वरसाधारणश्चापि काकल्यन्तरसंज्ञया।
निषादगान्धारकृतौ षड्जमध्यमयोरपि।।

इह **स्वरसाधारण**.....आधेयरूपतया पथक्छिद्रता न संभवति केवलमाधारस्वररूपतया.... भवेत्। तत्र वीणायां पूर्ववत् स्थितसाधारणायां स्वरसाधारणे क्रियमाणे गान्धारनिष्पादनतन्त्र्योरेव द्विश्रुतिकतायामायतत्वेन पीडनं क्रियते न तु मध्यमषड्जतन्त्र्योः। शैथिल्यमुपयोगि। गान्धारनिषादोत्कर्षा ए(दे)व त(द)पेक्षस्योभया(यौ)। वंशे तु शरीरैरेव न पूर्वसिद्धा। कैश्चिन्न तन्त्रीष्विव स्वरा अपि तावतैव प्रयत्नेन निष्पाद्येत्यु(द्या इत्यु)त्कृष्ट गान्धारे निषादे हीयमाने वश्यं निकृष्टो मध्यमो यत्नेन निष्पद्यते। अन्यथा षड्विंशतिश्रुतयो भवेयुः। तेन व्यक्तमुक्ताङ्गुलिस्वरौ अर्धमुक्ताङ्गुलिश्च मध्यम इत्येवमन्तरस्वरो निष्पद्यते। एवं काकल्यामपि वाच्यम्। तदेतदाह। **निषादगान्धारकृतौ** विकारकरणे **षड्जमध्यमयोरपि** चेद्विकारस्तत् साधारणं सम्पद्यते। **च**शब्दो प्यर्थे। नत्वेके त्वेकस्मिन् स्वरेण विकरणयोर्द्वयोः किमर्थं विकृतिरित्याशङ्क्याह। न स्वरसाधारणत्वेन तस्यकाकल्यन्तरत्वमात्रस्वरद्वयस्य सम्यक् स्थितिर्यतो भवति द्वयोर्विकारः। एतदुक्तं भवति। एतदेव च स्वरसाधारणत्वं यदेतस्माद्रूपाद्ध ्वंसनं स्वरान्तररूपोपजीवनमिति।।८,।।

ननु समन्द्रमध्यतारविभागः कथम्। ननु च स्वराणां न ह्येकविंशतिरत्र वीणामिव स्वराः स्थानत्रयं च शरीरवदुपलभ्येतेत्याशङ्क्याह–

विपर्ययः सन्निकर्षे श्रुतिलक्षणसिद्धितः।
वैणकण्ठप्रदेशेन सिद्धा एकाश्रिताः स्वराः।।

इति। सम्भावितस्ताबद्वर्णे चाविद्धगतिभावो यावदभ्यासान्तर्गतो धार्यस्तावदन्तस्वरं जनयति। प्रथमं छिद्रकस्य संस्कारमात्रं जायते। न स्वरः। तत्र.....वस्थानेन यः स्वरो निष्पद्यते स तावन् मध्यमः। तदाह। सिद्धाः सन्तो ये स्वराः कण्ठाश्रिता मध्यमसप्तकरूपा इत्यर्थः। अत्र हेतुः। वेणुषु प्रधानसप्तककृतेषु मूर्च्छनानिर्देशकारिषु मध्यमेषु कण्ठेषु शारीरेषु मध्यमसप्तककृतेषु प्रदेशादेकीभावापत्तेरेव। वंशे बन्ध इति लक्ष्यवतां व्यवहारः। तारमन्द्रसप्तकं तु कथमित्याह। तच्चासाधारणे स्फुटत्वं तस्य सिद्धिर्यतो भवति स **श्रुतिलक्षणसिद्धिः** ओष्ठमुद्राविशेषः। तमवेक्ष्य यो वंशस्य **सन्निकर्षो**.....तेन छिद्रान्तर्गतमावरणं वंशस्य स्वोत्कर्षत्वेन छिद्रस्य स्पष्टत्वं तस्मिन् सति विपर्ययः कण्ठ्यसप्तकान्तर्गतलक्षणमुखसंयोगेन सङ्कटे छिद्रे विकारोदयो विकटेनामन्द्रसम्पत्तिरिति यावतैवं (यावत्। एवं) त्रिस्थानसिद्धिपादे त्रिवंशे। अतः शारीरवैणस्वरविषयलक्षणपोषणमनेन सम्यक् क्रियताम्।।९।।

यं यं गाता स्वरं गच्छेत् तन्तद्(तं तं) वंशेन वादयेत्।

शारीरवैणवंशा(श्या)नामेकीभावः प्रशस्यते।।

गच्छेदिति। यं गमिष्यति यो न च गच्छति स च गतवानिति कालसामान्येन दर्शितम्। अतो वंशस्य प्रदर्शकत्वं पूरकत्वादयो धर्मा दर्शिताः। **गाते**ति। ध्रुवगानस्याप्यत्र प्राधान्येनोपयोग उक्तः। **शारीरवैणवंश्यानामि**ति। तद्धितेनाप्यनावेक्षे प्येकत्र स्वरनिष्पत्तिर्दर्शिता। इतरेतरयोगभूतभेदत्वं सूचयता पथगुपयोगो दर्शितः तथा च श्रीमन्मतङ्गमुनिना वंशवाद्यस्य स्वरसाम्याश्रयो विनियोग उक्तः।

अध्वन्यागमने चैव कामिन्या निर्जितस्य च।
शोकार्तस्य प्रकुर्वीत मध्यमं मदुमिश्रितम्।।
श्रङ्का(ङ्गा)रे वा वियोक्तव्यमत्यन्तललितं द्रुतम्।
क्रोधे चैवाभिमाने च स्फुरितद्रुतकम्पितम्।।

इत्यादि। **एकीभाव** इति। अनेकरूपस्यैव शारीर्यादिरस्ति रूपस्यैव स्वरत्रयस्य निपुणनिर्मितसचित्रपानगन्धवदेकतयावभास इत्ययं तत्र **भाव**शब्देन दर्शितः। **प्रशस्यत** इति। दष्टादष्टविभवसिद्धिप्रदत्वादिति भावः।।**१०**।।

अथास्य वंशवाद्य(स्य) सर्वथोपयोग इति दर्शयति।

अविचलमविच्छिन्नं वर्णालङ्कारसंयुतं विधिवत्।

अविचलितमिति। स्थिरो ह्यत्र स्वर इत्युक्तम्। **अविच्छिन्नमि**ति। वीणातन्त्रीवद् दुष्प्रहतार्थसम्भावनेन साधारणक्लेशाभावेन निर्विघ्नम्। **वर्णालङ्कारः** सर्व एव..... शारीरान्तर्गतैः संयुक्तम्। अत एव सर्वान् वाद्यविधीन् तत्त्वानुगतान् लययतिप्रभतीनर्हतीति **विधिवत्**। एवं तावद्गीतिभागो नेन पूर्यत इत्युक्त्वा ह्यद्यतमं त्वेतदेवेत्याह।

ललितं मधुरं स्निग्धं वेणोरेवाश्रितं(वं स्मतं) वाद्यम्।

इति। **ललितमि**ति। स्वभावतो हर्षोद्दीपनेन रसचर्वणोपयोगि। **मधुरमि**ति। गात्रप्रयुक्तं परुषमपि स्वरं स्वावस्थापनया ह्यद्यतामपादयतीति। **वेणो**रिति सुषिरोपलक्षणम्।।**११**।।

अध्यायत्रयार्थमुपसंहरन् भाविना सह **सङ्गतिं** करोति। **एवमेतत् स्वरकृ(ग)तमिति**। शारीरवैणवंश्यादिस्वरा एवेति तैर्गानं स्वरपूणमिति। स्वरगतस्यैवोपसंहारः। गानप्राधान्या च **गानयोक्तभि**रित्युक्तम्। रूपे च स्वरे निरूपिते मनस्यनिरूपणावकाश इत्याह। **अतः परं घनातोद्यविकल्पनं प्रवक्ष्यामी**ति शिवम्।

आक्षेपयोजनवचस्करकल्पमेव
यद्वंशरन्ध्रचरणं तदुपास्य सम्यक्।
स्पष्टीकृतो भिनवगुप्तपदाभिधेन
तस्यैव लक्षणविधिः स गम्भीरभावः।।**१२**।।

इति महामाहेश्वराभिनवगुप्ताचार्यविरचितायां भारतीयनाट्यवेदविवतावभिनवभारत्यां
सुचिरातोद्यविधिरध्यायस्त्रिंशः।।

श्रीः

नाट्यशास्त्रम्

एकत्रिंशो ध्यायः

यस्यां कलाकाललया(य)प्रभावात्
साम्यं परं भाति जगत्क्रियाणाम्।
मायात्मिकां तां तनुमष्टमूर्ते–
र्वन्दे त्रिधा भोगपदं दधानाम्।।

ननु स्वरकृतं रूपं वीणांशयोरिवावनद्धेप्युपलभ्यते तद्ध(द्वद् ध)ने पि। नादात्मना स्वरस्य शब्दत्वेन नित्यव्याप्यत्वात्। अतश्चैवं तदा वनद्धे मार्जनानां स्वरविशेषयोजनात्मना वक्ष्यमाणत्वात्। सत्यम्। अनुहारेण परं स्वराणामवभासो त्र न स्फुटो नाक्षरात्मना। तथात्वे हि रसभावाद्यभिव्यक्तिरपि न भवेत्। तेन ह्यनुहारमात्रेण केवलमत्र स्वरात्मका(कता) क्षरषोडशवत्। अक्षराणां हि यद्यपि स्फुटत्वं स्यात् **करन(ज)करततकरथ(ट)गतकरिकरटकतटकटकाभरणकेलिकाल** इति श्रयमाणानां च यथा वाद्यप्रतिपत्तिर्भवति तथा वाद्यमानादपि स्यात्। तस्मादनुहारमा(स्या)त्मवत्तित्वादन्यत्र स्वराणां वंशनिरूपणानन्तरमेवोपसंहारो युक्तः। तदुपसंहारानन्तरं चोक्तम्। **घनातोद्यविकल्पनं वक्ष्यामी**ति (भ.ना. अ.३०–१२)। तत्र हन्यत इति धनः कठिनतैकरूपः। तत एव नमनोनम(न्म)नन्(न)मै(शै)थिल्यादियोगाभा(वा)दक्षरवैचित्र्यं स्वरवैचित्र्यं चानुरुध्यमानमात्रेणोपयोगी कांस्यतालिकादिरुच्यते। **मूर्तो घन** इति मूर्तिकाठिन्यमिति युक्तम्। तस्य घनस्य यदातोद्यं तोदनं हननं तस्य विधिवच्चरतः शीघ्रत्वसमत्वादिरूपं यद्विकल्पनं विभागस्तत्र चच्चत्पुटादिगतद्रुतलघुगुरुविभाग एव निमित्त इति स एव **चातोद्यविकल्पन**शब्देनोक्तो **त्राध्याये** वक्ष्यमाणतया प्रक्रान्तः। तस्य सङ्गतिं कर्तुमाह।

वाद्यं तु यद् धनं प्रोक्तं कलापातलयान्वितम्।
कालस्तस्य प्रमाणं हि विज्ञेयं तालयोगतः।।

इति। अत्र क्रिया च तालः कालो वा। ताल इत्याक्षिप्य गान्धर्वनाट्यभेदेन यो विषयविभागः कृतः स तुच्छ **इत्यस्मभ्यं** न रोचते। इदमत्र। **न कालः** क्रियाव्यतिरेकः अपि तु सर्वेषां परिच्छेदहेतुः काल इत्युच्यते। परिच्छेदश्च क्रियैव। क्रियैव क्रियान्तरस्य कालाभ्युपगमे पि वा कालावच्छिन्नेन कालं द्रव्यमिति। तदभावेन चापि क्रियाविच्छित्तिः। तेन परिच्छेदो न

सम्भवत्येव। एतावांस्तु विशेषो त्र सङ्गच्छते यद्गान्धर्वे कुत्रचित् परिच्छेद्ये परिच्छेदविधेयस्य साम्ये प्याकु चनाद्यन्यतमा काचिदेव क्रिया कस्मिंश्चिदेवाङ्गुल्यादिप्रवेशे वर्तमाना परिच्छेदहेतुत्वेनाश्रीयते तथेवादष्टसिद्धे गाने तत्परिच्छेदमात्रस्य साम्यादायतं तद्वारेण सम्पादनस्योद(त्त)रनिदानस्य साध्यत्वाद् या काचित् क्रिया गानवादनसंवादिनी परिच्छेदहेतुरुपादीयत इति। तत एवाह। **तलप्रतिष्ठाकरण** इति। अप्रतिभापरिच्छेदाद्रा––गालपनगत्यादिक्रियाविच्छेदभावेनारभ्यो पवर्ग इवाभिनेयो न्योन्यं च विशीर्णविश्वरूपतया एकपरिच्छेदात्मकसाम्यादाशा(काङ्क्षा)भावे शास्त्रस्य प्रतिष्ठानविशेषेण यत् प्रतिष्ठानसम्पादनं तत्र हेतुः क्रियाखण्डस्ताल इति तात्पर्यम्। तत्र च धनातोद्यमिति(रि)च्यत इति। यद् धनं नाम **वाद्य**मातोद्यं **प्रोक्त**मुद्दिष्टं तस्य तालेन भाविना शम्यादिसशब्दावापनिःशब्दक्रियाविशेषणयोगेन सति यस्तालः परिच्छित्यात्मककालखण्डे क्रियारूपो द्रव्यात्मा स एव गीतक्रियाप्रमाणपरिच्छेदोपायः। एतदुक्तं भवति। कांस्यनालिकारणक्रियायाः प्रसिद्धाया आवपशम्यादीनां साम्ये तदेतदावापादिपरिच्छिन्नं गीतं गेयमिति न तत्रावापादयः सत्परिच्छेदकाः। किं चास्य तालयोगेनत्याशङ्क्याह। कृताभिप्राये सविशेषमाह। **कलापाते**ति। कला तोद्या त्मना न विषयतया। कालः परिच्छद्यते आवापादिक्रियया सा कला। पात्यते शब्दश्रवणादिको(तो) परत्र चाङ्गितादिष्वागमगोचरीक्रियते स कालविशेषो येन शम्यादिपाते....। लीङ् श्लेषणे (पा. धा. ११३६) इत्यस्य लय इति रूपम्। तेन स्वरो वर्णो न्यो वा यस्यापादितस्तत्रैव वा लीनता विश्रान्तिः तत्सम्पादने ष्यन्ते पि तदनु रसानुरूपवैकृतध्वनिसम्भवासम्भवकृतः स लयः। यथाह। अशक्त्या पादन्यासं विधाय मध्ये विश्राम्यतीति विलम्बितं गच्छतीत्युच्यते। एवं च कार्न(शब्द)मुच्चार्य तदनुरणने तावन्तमेव कालं विश्रम्य यस्तु शब्दमुच्चारयति स विलम्बितं वक्तीत्युच्यते। यस्तु तद्वर्णकालं विश्रम्य स समलयेन वक्तीति। यस्तु वर्णमुच्चार्यानुरणे(णने) विश्रम्यैव वर्णान्तरोच्चारणं करोति स द्रुतलयेनेति। अत एव द्रुतायां वत्तौ यत्र न च तालिकास्तत्र मध्यमायां द्वादश विलम्बितायां षोडशेति पादान्ताधिकत्वं जानीयादिति। वत्तानामशेषं तु तत्त्वेदी **भगवाने**वाह **भाष्ये**। द्रुतमध्यविलम्बितेषु तत्र सर्वत्र तत्परम्। मार्न(न)**भेदेषु अध्यायन्ते** च प्रकर्षातिशयेन वक्ष्यते। **स तु मध्यलयं प्राप्य सन्निपातद्वयम्**। (भ.ना. अ. ३१।३६७) इति। एतदपि तत्पार्श्वे वक्ष्याम इत्यस्तां तावत्।

तदेवमेतेषु **कलापातलयेषु अन्वित**मनुयातीत्युपयोगी। ततो गानवाद्यस्य तालेन योग इत्याशयः। तेषां तथापि प्रतिष्ठारूपत्वात्तालव्यपदेशः। अत एव तालयोगो भि व्यङ्ग्यः। **तले भवस्ताल** इत्यपि निरुक्तमुक्तम्। येन प्रधानेनैव। एतदुक्तं भवति। यथा पूर्वरङ्गादावदष्टसिद्ध्यै संयतगीतकवर्धमानादि प्रयुज्यते। यो गायको यतीनामा(वा)पविक्षेप्रयोगं करोति। नर्तकवादकादयस्तदबलोकनं विना तत्परिमाणसमं च लयं कथ ंचच्चरति(न्त)। प्रयोगस्य साम्यं न स्यात्। सशब्दे पि पाते करशब्दस्य तथा स्फुटमाकर्णनं न भवति यथा घनशब्दस्य। एकलयविधौ निरनुपातयोगे पि

द्विकलचतुष्कलविधौ तु कालद्यवहितपातयोगे परिच्छेदकारी। पतदूर्जत इति सर्वपरिच्छेदो थना....उक्तं **प्रयोगसाम्योपयोगी**ति च। अनेन च गीतकादिनाना(गान)प्रवत्तादन्य एव कालपरिच्छेदकारी कांस्यतालघट इति धर्मि(ध्वनि)तम्। ध्रुवागाने तु दष्टफले गायनस्येव सो स्तु व्यापारः। आवापादीनां तत्रानुपयोगात्। गीतकादौ गानात् कांस्यतालिका क्वचिदुपयुज्यते। दक्षिणपातादयश्चोटिका या हस्ततलाभिघातेन वा सम्पन्नत्त्वान्नोपयुज्यन्ते। कनिष्ठाङ्गुलिनियमितं गीतेन चावापदेः सम्यक् सम्पादनं तद्धस्तेनाशक्यमेव। वाद्यनत्तगीतादिप्रयोगानुभावे नुगामिदष्टफलसिद्धौ गीतके गायकैश्च यथा न प्रमाणतयावापिनएव(पेनैव) प्रयोगसिद्धिः। तत्र घनापेक्षयायुतैव। **विशाखिलाचार्यादयो** स्या––नुवत्ति तालसाम्यं सुसम्पादमित्याशयेन कुत्रापि पथगेव तालकलानां विच्छेदे लये वा वधानवत्तामात्रक्रियाया आवापादिक्रिययया च सम्पादनया प्राणीभूतस्य गातुः प्रसादपरीक्षणप्रयोजनं कांस्यतालं मन्यन्ते। इत्यलं बहुना। अत एव तद्विशेषं तदवधानैकसारत्वं क्रियान्तरावधानव्यग्रत्वात् सूचयति। हि यस्मादर्थः। यस्मादेवमुपयोगि घनातोद्यं तस्मात् तद्विकल्पनं वक्ष्यामीति युक्तमुक्तम्।।**१**।।

तत्र कलाहिते तत्रत्यकालस्वरूपजिज्ञासायामाह। **सा लौकिकी**ति। लोके तावद् या कालस्य काष्ठा परा सौक्ष्म्यसमा सा कला। सा च कियतेत्याह। **निमेष** इति। स एव हि लोके तिसूक्ष्मः कालः। न च सा यदि तालकला। अपि त्वन्यैव।।**२**।।

शास्त्रीया (अ)स्या न निमेषा (अ)तिप्रसिद्धा निमेषषट्काष्टकदशकं कलेति वा स्यादित्याशङ्क्याह। **निमेषाः प च** इति। गीतकालस्य परिच्छेदकालान्तरं प्रमाणं **प च निमेषा** ह्रस्वाक्षरप चकं यावत्। कखगघङ इति व्य जनकालस्य पथगवभास इति प्रतिपादनात् कलाविशेषत्वमेवेत्याशयेन तदन्तर्वर्तित्वात् पुनः पुनः(नर्ल)क्षणमिति।।**४**।।

कलापातलयान्वित इ(मि)त्यत्र (भ.ना. अ.३१.१) यो **लय**शब्दः स व्याख्येय इत्याशयेन कलाया एव च लयं विना न स्वरूपलाभो **लय एव हि ताल** (भ.ना. ३१.३७०) इत्यग्रे वक्ष्यामीत्यभिप्रायेणाह। **ततः कलाकाले**ति। **ततो** विस्तीर्णः संज्ञासमज्ञानं रूढिगतो र्थो लयानां मध्यविश्रान्तिः। तदवस्थमेव विरामीति यावत्। अथ लयानां विभागमाह। **त्रयो लया** इति। न च विशेषलक्षणमेषां वक्तव्यमित्याह **विज्ञेया** इति। लोकत एव। विभागश्चानिर्व्याख्यात एव। अग्रतो लक्षणं तालसामान्यलक्षणप्रसङ्गे वितत्य भविष्यति। इह तु **कलापातालयान्वित** इति सूत्रार्थोद्भेदकमात्रमेतदित्यपौनरुक्त्यमात्रम्।।**५**।।

लयान्तरेण कलापातप्रयोगार्हात्तत्र विशेषाभिधाने प्राथम्याद्रुतलयप्रसङ्गादिदमाह। **यतस्तत्र(यस्तत्र तु)लयो मध्यः**। तत्प्रमाणकालमितेषु लयेषु मध्ये स्थातेति। लोक एवं प्रसिद्धिरित्यर्थः। तालयोगत (भ.ना. अ.३१.१) इत्यत्र यस्ताल उक्तः स चेह कलाभ्यो न्यस्तथा तद्योगे सति कलादिषु चान्वितं घनमिति कालं वदति। अथान्यः शब्दस्तालशब्देनाधिकं कि ि चदित्युक्तमित्याशङ्क्याह। **कलाकालप्रमाणेन ताल** इति। कलानां यः कालो लयत्वसंज्ञितस्तस्य यत् प्रमाणं परिच्छेदस्तेनोपलक्षितस्तालः। एतदुक्तं

भवति। धनपरिच्छेदव्याप्तकलासमूह एव च चत्पुटादिस्तालो नान्य इति समूहाभिप्रायेण प्रथमसूत्रे (लक्षित)स्तालशब्दः। उपात्तकालशब्देन सङ्ख्योपादानम्। मानाधिक्ये पि कलासङ्ख्या कालादयन्त इति दर्शयितुं **प्रमाण**शब्देन व्यवच्छेदं सूचयता षोडशकलाच चत्पुटोत्कर्षहेतुस्तालयोग इति स एवावधार्यते। एवं सूत्रे तालशब्दस्यार्थः। पुनरुपादानं समर्थयतश्चिन्तितं सामान्यलक्षणं तत् तालस्य(**स्या**)**ध्या**(**या**)**न्ते** स्थापयिष्यते। क्रियाविशेषावच्छेदाद् यो नियमो नुवर्तमानः स्थिरशीघ्रमध्यरूपो लयस्ताल इति।।**६**।।

एवं कलैवात्र क्रियासमूहरूपतां गता **ताल** इति प्रसङ्गादुपपाद्य कलामेव तेव (न) विभागान्तरितां विंभजति। **त्रिविधा ना**(**सा**)**चेति**। चकाराल्लयत्रयभेदो पि समुच्चरतस्तस्य त्विह तावन् मार्गनियमो न दर्शितः। मार्गत्रयेण यो नियमात् त्रैविध्यहेतुरुक्तस्तमाह। **चित्रे द्विमात्रा कर्तव्ये**ति। मात्राशब्देन तत्रोक्तनियमपरिमाणमुच्यते। यथा तैलस्य स्तोकं स्तोकं पततः षोडशबिन्दुपातकालः। इयं.....मा.....हुतिजापादीनामागमेषु यतिमाहेति। इतश्च नियतं परिमाणमुक्तम्। प चलघ्वक्षरं तदेव द्विगुणं तद्विगुणं क्रमेण मार्गत्रयमाविर्भावयति। तेन मात्रासंज्ञा कर्तव्येति नाशङ्कनीयम्। यत्र तु न द्वैगुण्यांशमूलभूतत्त्वाद् ध्रुवकमार्गमुच्यते तत्र प चलघ्वक्षरद्वैगुण्यं खण्डकलया गान्धार्यामन्यत्र च दश्यते। धकहि दुहिगिं दुहिगिं तुहिगिमत्यभ्यस्य गुरुत्वात् केवलं द्रूतचतुष्कविभागतो गान्धार्याः सिद्धये प चमं विश्रान्ता प्यस्य विदारित्वेनोपकल्प्य चतुर्भिः स्वरैस्तावद्भिश्च ह्रस्वैर्वर्णाङ्ताल इति व्यवस्थामकार्षुरिति सैव व्यवस्था (ना)न्या लोके प्रसिद्धा। तथापि च **द्विपदीवर्णाङ्गादौ प चस्वरैव कला वक्ष्यते** वर्णलेख्येषु नोपलभ्यते।

एवं कलां विभज्य तत्समूहात्मकं तालं विभजति। त्र्यश्रश्चेति। त्र्यश्राया भागा यत्रैति। यस्य मत्वर्थीयो कारः। **स** इति पूर्वपक्षितः। **द्विविधस्यापि तालस्य त्वेका प्रकृति**रिति। अनेनेदमाह। यदि कश्चिद् द्वयोरप्यनयोश्चत्वार एव भागा भविष्यन्ति तत् कथमेतद् वक्ष्यति। तत्रोत्तरम्। **एकाप्रकृति**रिति। गुरुरूपो यो भेदः सो त्रैकस्वभावे लघुप्लादिच्छेदविभागशून्यः सो त्र प्रकृतिमूलभूतः। तदपेक्षया च त्र्यश्रैतरविभागम्। **विशाखिलाचार्यस**्त्वाह। द्वये पि पादानामक्षराणां च सङ्ख्यासाम्यादेवात्र प्रकृतिरिति।

ननु यदि गुरुद्वयं गुरुचतुष्कं चात्र मूलप्रकृतिर्वक्ष्यमाणं तर्हि रूपं न प्रधानमित्याशङ्क्याह। तथा योनिद्वयं चेति। चो प्यर्थे। तथेत्यन्तरम्। तथापि योनिरूपमदष्टविशेषस्य हेतुभूतं कीर्त्य**मानमागमे** प्रसिद्धं यद् वक्ष्यमाणभेदद्वयमत एव प्राधान्यं तदेव मूलप्रकृतितयेह निरूप्यमाणं गुरुलघुप्लुतद्रुतबिन्दुवैचित्र्यादीनां सङ्ख्याभेदस्य द्वैगुण्यादिना च तालभेदस्य योनिभूतं जानीत यद्यपि मूलभूतं गुर्वेकघनप्रस्तारे इत्यर्थः।।**७**।।

तदाह। चच्चत्पुटे(ट)त्वि(स्त्व)ति।

देवश्चतुर्भिर्निश्वासैरक्षराणां चतुष्टयम्।
उदीर्यं तस्यातीते तु विश्रान्तो गिरिजापतिः।।

प्लुतान्तन्यासतो नायमुत्तमानां विधीयते।
द्वितीयो न तथा तेन ह्यधमानां प्रतीयते।।
चतुरश्रस्तु विज्ञेयस्ततश्चाचपु(स्तालश्चच्चत्पु)टो बुधैः।
त्र्यश्रश्चाचपुटः प्रोक्तो गुरुलघ्वक्षरान्वितः।।
आदौ गुर्वक्षरं ज्ञेयं लघुनी गुरु चैव हि।
त्र्यश्रः स खलु विज्ञेयस्तालश्चाचपुटो बुधैः।।
आदौ द्वे गुरुणी यत्र लघु च प्लुतमेव च।
स विज्ञेयः प्रयोगज्ञैस्तालश्चच्चत्पुटाश्रयः।।
सन्निपातस्ततः शम्या तालः शम्या तथैव च।
एवमेककलः शुद्धो योग्य(ज्य)श्चच्चत्पुटो बुधैः।।

इति। पुराणे चागमादौ भगवतो महेश्वरस्य वक्त्रचतुष्कोद्भूतमेतदक्षरचतुष्कमेतदावर्त्यमान––मभ्युदयदायीत्युक्तम्। तदभिप्रायेण चच्चत्पुटचा(श्चा)चपुटे(ट इ)त्याचार्यैनिर्दिष्टम्। तत्प्रस्तारमार्गसिद्धये तस्यान्यतो लाभात् तत्स्वरूपं वितत्य निरूपयति। चतुरश्रस्तु विज्ञेय इत्यादिना तालश्चत्पुटाश्रय इत्यन्तेन श्लोकत्रयेण। ततश्चाचपुट इत्यक्षरोदीरणमभ्युदयाय। चच्चत्पुटस्यात्र प्लुतस्वभावस्तद्वक्तव्यताप्रसङ्गेन गुर्वादिनिरूपिते चाचपुटे पीति शङ्काशमनार्थं पुनस्तन्निरूपणम्।।**८-१०**।।

अथानयोर्भेदेन प्रत्येकं त्रैविध्यमुपयोगं सन्निपाताद्युद्देशनिदेशाभ्यामाहं सन्निपातस्ततः शम्येत्यादिना चाचपुटे पथ(ग)त्यन्तेन सार्धचतुष्टयेन। शम्यादिचाचपुट(चच्चत्पुट)भेद आसारितप्रयोगेषु शिष्टे सन्निपातादिरित्युपयोगकथनम्। एककल इति। एका असहाया निष्क्रामादिकनिःशब्दविहिता कला पातात्मिका। यः शुद्ध इत्युकृष्टो नाम्ना पि निरूप्ये(प्यत इ)ति यावत्। तेन मात्राविशेषोपादानम्। तद्यथा। **चच्चत्पुटपरिवर्तः शम्यादि** (भ.ना. ३१–६५)रित्यादौ। तत्रैककलस्यैव ग्रहणमित्युक्तं भवति। द्विरिति वा अभ्यस्ताविति केवलोपादाने प्रत्येकमपि द्विर्भावः। शता शता ताल इत्येवं रूपो स्या इत्यनयो(रु)पादानम्। अभ्यस्तो यथाक्रमं समुदितो द्विरित्यर्थः।।**११-१४**।।

एवं च सन्निपातशम्यातालादिभेदानां नि(वि)धानं चच्चत्पुटचाचपुटप्रस्तारः। स ता सा सं ता सं सं ता सं सं ता संता संता सं सं सं ता संताता सं सं तासम्। द्विकः। तस्य भेदः प्रचुरप्रयोगः। तत्रैव निष्क्रामप्रवेशौ। एवं भेदत्रयसम्भवेन चाचपुटस्वेतरेण चार्य**विशाखिलादिभिः** स एवास्य भेदो दर्शितः। एक ओजः प्रथमवारो द्विविधकृतो युग्मेति यदुक्तं चच्चत्पुटचाचपुटयोर्भेदान्तरप्रसूतित्वं दर्शयति। षट्कलो ष्टकलश्चेति। चकारी विशिष्टभेदान्तरसूचकः। अस्मादिति। द्विविधादिति सम्बन्धः।।**१५**।।

निःशब्द इति। आबापादियोगादेतेन तु न किंचित् सं(ग)हीतं भविष्यतीत्याशयेनोपाध्याया मन्यन्ते। **शब्दवानि**ति। गीतवाद्याङ्गत्वेन।.....स्वकण्ठेनादशि (र्शि)तः। भेदश्च प्रेक्षणकादितालभङ्गलयकलानिष्क्रामादियोगे पि सूच्यते।।**१६**।।

षट्पितापुत्रक इति। अक्षरे या संख्या क्रियत इति। षट्पात इति यावत्। **उदाहृत** इति। संज्ञामात्रम(त्र)ध्येत्य(य)म्। नत्वत्र प्रप चनार्थो नापि ना (चा)न्च(या)र्थ इति।।**१७**।।

शम्यातालप्रवेशेनेति यत् सूत्रं तदेव स्पष्टयति भाष्येण श्लोकत्रयेण आ**द्यन्त(द्यं)प्लुतमित्य**ादिना **षट्पातास्तस्ये**त्यन्तेन। **षट्पितापुत्रको** न्वर्थः। संताशताशता।।**१८-२०**।।

भेदान्तरं त्र्यश्रस्याह। **तालादिस्त्र्यश्रभेदो न्य** इति। **सम्पक्वेष्टा(ष्ट)क** इति। संज्ञामात्रमेतदित्याह। **संज्ञित** इति। सम्पक्वा इष्टताला(ष्टका) अत्रेति। सम्पक्वेष्टक इत्यत्राक्षराणीत्येके। **अन्ये** पाकश्चात्र मिश्रित इति। तथाहि। प चपाणौ लघ्वात्मनामश्लिष्टात्मत्वं यदभूत्ततस्तदभिहितं ययोर्गुरुषु प चस्वरक्षरेषु स्थितेष्वाद्यन्तयोः प्रथमप चमस्थानयोः प्लुतकारिण्या मात्रया समन्वितः। गुरुप चग्रहणात् प चपाणिपदं सन्निपातभेदेनेति तावत्या(ता) मात्राभिधाने असन्निपातनियमो लब्धः। तेन तासं ता तालस्यैव भेदः।।**२१**।।

तमाह। **त्र्यश्रं सर्वगुरुं कृत्वा।** पक्षद्वये चाचपुटस्यैकं.....गुरुभूतं कृत्वेत्यर्थः। यद्यप्येककलोचितो निष्क्रामस्तथाप्यत्र यथाक्षरे पि तं कुर्यादिति तुशब्दस्यार्थः। **योजयेदिति। निष्क्रामं** यद्यपि न स्वमार्गोक्तं तथापि प्रकर्षाक्षेप एव प्रथममार्गे चित्र एवोक्तो यथा हि तथा निर्वपयेदित्यर्थः। प्रस्तार उद्घट्टस्त्रिगुरुभराद्वयमक्षरौघः। अतश्च गुरुत्रयात्मना वाद्योपभेद इति।।**२२**।।

अद्धट्टसंज्ञस्य **व्युदस्य युग्ममोजश्चेति कलाःप चेति** चास्य श्लोकद्वयस्य **केचिद**र्थमाहुः। चच्चत्पुटयोरुक्तं गुर्वादिसन्निवेशं त्यक्त्वा कलासङ्ख्याव्यामिश्रणया वक्ष्यमाणप्रवत्ताङ्गस्य **सप्त प च नव दशैकादशेति** प च ये तालास्ते उद्घट्टयौ(का)दय इति प्रत्येकं संज्ञां परित्यक्तुं विभज(ज्य)न्ते इत्येतन्न मनोज्ञं **तद्विदाम्**। तथाहि। प चानामिति संज्ञाकरणे प्रयोजनं न कि चित्। आवर्तिन्यो हि संज्ञाः। न चानया क्वापि व्यवहारः। प चकले कथं मिश्रता। न हि द्विकले तालकर(ण)स्य कि चिदुपयुक्तम्। **सङ्कीर्णा** इति चाभिधानं न समर्थितमेव। उक्तं च **न ह्येषामुपयोग** इति। न क्वचित् प्रयोजनमस्य स्यात्। तस्मादनयोः श्लोकयोर्भिन्न एवार्थः। तत्र गम्यस्तावदयमर्थः। चच्चत्पुटचाचपुटप चपाणीनां तावद् गीतकेषु बहुलप्रयोगः। तद्द्वारेण ध्रुवास्वपि। सम्पक्वेष्टाकस्यापि पूर्वरङ्गे विनियोग उक्तः। उद्घट्टप्रयोगस्य क्वेत्याशङ्क्याह। **व्युदस्य युग्मम**ित्यादि। इहोल्लोप्यको नाम यो गलाद(गीतविशेषस्त)स्य त्र्यश्रचतुरश्रभेदेन त्रित्त्वम्। त्रिष्वपि च प्रकारेषु प्रवत्तकम्। त्रीण्यङ्गानि स्थितं प्रवत्तं माहाजनिकमिति। तत्र चतुरश्रके प्रवत्तं नाम यदङ्गमष्टकलं तस्योद्घट्टाख्यकलात्रयमादौ वक्ष्यते।

आदावुद्घट्टकः कार्यः परिवर्तक एव च। (भ.ना. अ.३१–२६५)

इति। आवेणके पि द्वादशकलान्तरे प्यत(र)लक्षणस्याङ्गस्याभ्यनुज्ञानं भविष्यतीति। चत्वारस्तावदेते प्रवत्ताख्याङ्गतां गतास्तालभूतमवेक्ष्यन्ते। उद्घट्टकादयश्चतुरश्रकाख्यं च यदङ्गं तस्य चतुरश्रान्तर्गतप्रवत्ततालालक्षणमेवातिदेक्ष्यते।

अन्तस्य चतुरश्रस्य प्रवत्ते यो विधिः स्मतः।
विविधाङ्गेन तेनैव चतुरश्रकमिष्यते।। (भ.ना. अ.३१–२८७)

इति। एवं प चडा(ता)ल उद्घट्टकादयो भवन्ति।

ननु

सप्ताङ्गे द्वादशकं(कलं) द्वादशाङ्गे दशैव तु।
निष्क्राममादितः कृत्वा शम्यास्तिस्रः प्रयोजयेत्।। (भ.ना. अ.३२–२७७.२८६)

इति वक्ष्यते। तेन तत्राप्यायातमुद्घट्टकादित्वमित्याशङ्क्याह। **व्युदस्येति**। यत्र कथ ्चिदपि युग्मौजभेदो नानुप्रविशति तत्कलापसरणे उद्घट्टमा(का)दित्वं वक्तव्यम्। मा भूदनन्तर्भावकृता लक्षणवाच्यत्वेनासाधुत्वांशकेन सम्पिष्टके च कलात्रये व्य(व्या)प्तास्ते सप्ता(ङ्गा)नां मिश्रत्वं नवाद्यानां त्र्यश्रत्वं च तासां भाव्यमिति। न तत्रोद्घट्टादित्वेनोक्तेन कि ्चित्। प्रवत्ते(षु) चतसषु पथक् क्रियासु प चकलांशैकि(श)कस्य पुनर्भावनामर्हतीति स्यादसाधुत्वाशङ्का। न त्वेवमस्तु। न तथाप्युद्घट्टि(ट्ट)पथक्त्वातीते स(ति) स्यादाशङ्का। तस्यैव पुनरुद्घट्टस्य पथक्कालता किमर्थम्। उक्तौ प्रवत्तो ह्यष्टकल एव विशेषः स्यादित्याशङ्क्याह। **मिश्रा** इति। यथा हि पुनरुद्घट्टकेनाभिधास्यते तदैकरसता वा। असावष्टकलस्ताले गीयते। यदा पथगुक्तं तथापि ध्रुवां च कलां प चधा विच्छिद्य तत्र सामान्याभावाय यदि्भन्नसङ्गतं तं मिश्रीकृत्य प्रयोगार्हता कर्तव्या।

ननु भवतु विशेषलक्षणबाह्यत्वाशङ्का। ततः को दोषः। समयग्रूपता तु सामान्यलक्षणेन सङ्गहीतत्त्वादित्याशङ्क्याह। **गीताङ्गसंयुक्ता** इति। गीतेषु यद्द्रव्यं वत्तं तत्रैते शम्या उक्ताः (संयुक्ताः)। न च तालसामान्यलक्षण(णं) सङ्गहीतं विशिष्टोपयोगवस्तुप्रयोगार्हं यथा वाचकसामान्यलक्षणयोटक्तो(योक्तो)पि तत्कर्ता सा(सो)पि पात्रं वैदिकेषु कर्मसु। ततो विशेषलक्षणेनावश्यं सङ्गहीतव्यो यमर्थ इति तात्पर्यम्। तत्रैव त्रिप चसप्तनवदशैकाक–
–दशचतुर्दशेत्येवंरूपताभावे (विशाला) यां च सप्तकलं मध्यमे सुनन्दायां चोपोहनं नवकलं विशालाख्यबन्धमातोद्यकण्डिका दशकला सम्पिष्टकमेककलं मद्रके द्वादशकले द्विर्भावादौ वस्तुन्येककलत्वात् प्रत्युपोहनस्य तच्छिष्टमेकादशकलं तालरूपमास्थितम्। तस्यापि विशेषलक्षणं चच्चत्पुटादिवच्च पथक् संज्ञा कस्मान्न कृतेति चोद्यत्वे प्रथमं परिहरति। कला प चेत्यादि। **समुदाहृता** इति। सम्यग् लक्षणक्रमेणोदाहृताः। ननु नोक्ताः। यच्चात्रावसरे कस्मान्नोक्ता इत्याशङ्क्याह **सङ्कीर्णा** इति।।२३-२४।।

न ह्येषामुपयोग इति। नात्रैवोपयोगिनः। तल्लक्षणस्यामिश्रत्वेनैव तेषां कल्पिता इति। न विशेषसंज्ञाकरणं तेषां नोपयोगीति। न ह्येषां वस्तूपयोगो स्तीति संज्ञाकरणं व्यवहाराय यदि कल्पितं विषयादन्यत्रापि चच्चत्पुटादीनामिव गीतकेषु सम्पिष्टकवेण्यादीनां ध्रुवासु

तव(त्वावा)पयोः शम्यालाघवेन येणि(वेणी)पयोरेकेणाह। **प्रवत्तादिषु कर्तव्या एते भूय** इति। **आदि**शब्दः प्रकारे। गीतकवर्धमानासारितपाणिकागाधा(था)च्छन्दकनिर्गीतादिषु भूयः कृत्वैते च चच्चत्पुटादयः कर्तव्यां इति। भूयो भूयो(य उ)पयोगादतस्तेषां व्यवहाराय विशेषसंज्ञाभिः प्रयोजनमिति। **भट्टसुमनसा** तु श्लोकद्वयस्यायं वाक्यैकवाक्यतया महता प्रबन्धेनार्थो व्याख्यातो मिश्रणामिश्रणात्। तद्यथा। **तिस्रो द्वे इति प चधा ह्यत्र त्र्यश्रजातीयमिति तैर्विवक्षिता। चतस्रस्तिस्र इति सप्त। तिस्रस्तिस्र इति नव। यद्वा तिस्रः सप्त इति दश। अष्टौ तिस्र इत्येकादश। तत्र प्रवत्तस्योद्धट्टकादयो नोद्धातस्य। दशकलस्य तद्योगे सप्त।। द्वादशकलस्य नव। यद्यपि दशानामेकादशानां चोद्धटादिदादेकादशेत्युक्तम्। एके** च गीतकेषु ध्रुवा नोपयुज्यते तदा....केषु प्रवत्तादिषूपयोगिन आरम्भका इत्यर्थः। सम्पिष्टकस्य दशकलस्य गीतकध्रुवोपयोग यद्यस्ति तथाप्युद्धट्टकादितया सप्तकल एवासौ। सा नाम(**मा)स्मदु**क्तया व्याख्या विवेकायैवेयं तुलयतेत्यलम्।।**२५**।।

एके(ते) न भूयसोपयोगिन इत्याह।

यथाक्षरो थ द्विकलस्तथा चैव चतुष्कलः।

इति। एककलशब्देन चच्चत्पुटस्यैव व्यवहारो युक्तः। एकैव साधारणी कला यस्येति। चाचपुटस्यापि पादभागकल्पाना(या)मपि कलाद्वयचतुरष्टादिरूपतयाद(द्वि)युगरूपतयेव स्फुरति। तत एव चच्चत्पुटस्य प्राधान्यं प्रथमं निर्देशः। तथा हि। **एक(व)मेवैककलः शुद्धच(श्च)चच्चत्पुट** इति। **शुद्ध**शब्दो त्र **यथाक्षर**शब्दः। स सर्वत्र साधारणात्(णः)। **चच्चत्पुटश्चाचपुटः षट्पितापुत्रको(क उ)द्धट्टः सम्पक्वेष्टक** इति सर्वत्राक्षर सङ्ख्या तु तुल्या। अर्थात् पातानाम्। **चच्चत्पुट** इति। अमुना च गुरुद्वयेन कलाद्वयलक्षितचच्चत्पुटरूपं द्वित्रय **चच्चत्पुटः। चाचपुट** इत्यनेनाप्येवं कला लक्षिता सा चाचपुटरूपेण द्विरिति त्रिकलः। अक्षरशब्देन प्रकृतिरूपा अतस्ताश्च कला लक्ष्यन्ते। .....ति स तथा। तस्यैव प चपाणिरिति हि तालः। तथा हि। करतलपरिच्छेदरूपत्वात्तले भवतीत्यपि तालशब्दः **कैश्चि**निरुक्तः। .....**दत्तिलो** प्याह। **तत्र तालं च पाणिं च प्राहुरेक**मिति (दत्तिलम्–१५३)। ते प च ताला यते(था)। तथाहि। षड् द्वादश चाष्टचत्वारिंशत् षण्णवती(तिरि)ति त्र्यश्रस्य भेद एषः। एवं प्रकारषट्के पि षट्कलत्वं सन्निधीयते। इयतीत्यसला.....इति तस्य व्याप्तिगु(र्गु)रुत्रयरूपे च घट्टनं प्रकृतिरूपत्वात् पूर्वभावीत्युद्धट्टमानत्वादुद्धट्टनं वाद्यम्।

नन्वेवं सम्भाव्यस्त्र्यश्रयभेदः पूर्व वाच्यश्चतुरश्रभेदस्तु गुरुचतुष्टयरूपं(पः) परं वाच्यामि(इ)ति। अत्रैके स्रु(ब्रु)वते। इह पातविभागस्यैतत् प्रयोजनम्। यावन्तः पातास्तावन्य एव कला वाद्याक्षराणि परिमाणेन भवन्तीति। तेन यावन्त्येन वाद्याक्षराणि चच्चत्पुटगतानि चाचपुटे तावन्त्येव। अतो यावन्त्येव गुरूणि तावन्त्येव लघूनि पाताश्चेति।

नन्वेवं च त्र्यश्रचतुरश्रविभागौ गुरुलघुप्लुतविभागश्च विगलित इत्युच्यते। लयभेदकृतो ह्यसौ। विलम्बिते प्लुतो मध्यमे गुरुर्द्रुते लघुरिति। चच्चत्पुटे च प्राधान्यमुक्तं वक्ष्यते च। तत्र चेत्थं सत्यप्रधानता निर्व्यूढा भवति यदि समस्तं तालसर्वस्वं तत्रैव झटिति प्रदर्शितं

भवेत्। तालसर्वस्वं तालसारमात्रा। अत्र मध्यलयस्य सम्प्रतिष्ठानत्वात् प्राथम्यात्। प्राधान्याच्च द्विरुपादानमिति। प्रथमं गुरुद्वथं प्लुतस्य च च्छन्दोमध्याप्रसिद्धत्वाद् गुरुलाघवामिश्रणे लभ्यत्वाल्लघुस्वरूपमिति। पूर्व(वज्)ज्ञेयमिति। गुरुद्वयानन्तरं तत्। ततो हि द्रुतलयविलम्बितप्लुता इति। ते चच्चत्पुटे। पादाक्षराणि धिधिटधिसधिधिगुधिङ्। मध्यलयेन गुरुद्वयं करजद्रुतेन लघुः। रहधिङ्धिट। लघुविलम्बितेन प्लुतः। एवं चच्चत्पुटे चतुष्पाते तदनुपपत्तिः। अट्टभेदो पि चतुष्पात एव पूर्वमुक्तः। तेनोद्धट्टकस्यादौ नाभिधानादपि गुरुचतुष्कात्मकस्य चतुरश्रस्य तच्च(त्र) चाद्याक्षरजातो ध्रुवकमार्ग इति। एतदपरे लक्ष(क्ष्य)मित्याहुः। दर्शनान्तरसमुन्मिषितेन पुनरेवमाहुः। लय एक एव चच्चत्पुटस्य वाद्याक्षरान्न्यूनाधिकतया गुरुलघ्वादिविभागः।

अत्र प्राधान्यमित्थं प्रदर्शितं भवति। यदि सर्वसम्भवी प्रकारस्तत्र सू त्रेण शास्त्रेण दश्यते। असम्भवी यदीयानेव प्रकारो गुरुलघुप्लुता इति। द्रुतो नाम लयपातः। तस्य यथाक्षरमूलभूतेन मानमात्रेण प्रदर्शनम्। अस्य प्लुतः कथं धर्मस्त्विति संस्थित एव। ननु हल्मात्रस्य.....(त्वं) न द्विलघुपरिमाणत्वाद् यथाक्षरे प्यस्ति द्रुतः मैवम्। हल्मात्रं सन्निधीयमानं पूर्वस्याधो गुरुपरिमाणं दर्शयति।

ननु स्वात्मीयं कालं ज्ञाने वाचि व्य जनमिति उकाराकार(रादय) एव गुरुकाले लघ्व(भ्य)न्ते। अत एव भगवत्(वान्)**भाष्यकार**स्तत्रभगवद्**भर्तहरि**प्रभतयः स्वरकालानतिरिक्तावभासत्वं व्य जनकालस्य तत्र कथयन्तीति गुरुलघुप्लुतानामंशभवो **यथाक्षर** इति शिष्टप्राक्पक्षेण समानत.....तलभग्ना लघु.....तावन्य(न्तो)क्षरभेदाः अथेत्यानन्तर्ये। एतद्धि यथाक्षरारम्भकमूलतयावलम्ब्य तद्द्विगुणकालतया लयभेदादिकालभेदः। द्वे कला(ले) यत्रेति (**द्विकलः**)। तत्रैव च यथाक्षरप्रकारेण लयभेदाच्चतुर्गुणभूतेन **चतुष्कलो** भेदः। (न वा)द्वयष्टगुणादिभेदत्वेनानवस्था कस्मान्न भवतीत्याशङ्क्याह। **त्रयो भेदा हि तालस्य**। तालस्य (द्विगुणाद्) **द्विगुणा** इति।

अयं तावद् वाक्यार्थः। यत्र या(ता)वदन्यप्रकारो नास्ति विलम्बं शीघ्रमिति हि तत्तद्व्यवहारो लोके। न च मध्यापेक्षः। तत्र शीघ्रताद्रुतत्वानुग्राहकतेनापेक्ष्यै(तापेक्ष ए)**ककलः**। मध्यापेक्षो **द्विकलः**। विलम्बितापेक्षश्**चतुष्कलः**। न चास्य लयरूपस्य मार्गत्रयात्मकत्वमेव। न हि लये तूत्तरोत्तरद्वैगुण्यम्। त्रिभागाधिकत्वमस्य तत्र दर्शितत्वात्। मार्गभेदे तु द्वैगुण्यमेव केवलम्। तत्र तद्भव इति वीप्सा। तद्यथाक्षरस्यापि द्वैगुण्यं प्रसक्तम्। न च त्रिषट्प्रकारस्तु कर्मधा(र)यत्वादिगुण इति पठितव्यः।

तत्र **केचिदा**हुः। **द्विगुणास्तु गुणाः (स्मता** इ)ति। द्विगुणा द्विगुणाः। तत्रैवाक्षेपः। सङ्घाते व्यपदेशाः। तद्यथा। अक्षा भक्ष्यन्तामिति। तत्र हि प्रथमप्रकारास्तावद् द्विगुणः। अन्यौ क्रमद्विगुणौ। एवं सति सर्वे **गुण(णा)द्विगुणा** इत्युपक्रमः।

उत्पलदेवपाद(दा)स्त्वस्मत्परमगुरवो व्याचक्षते। तालस्य यस्मात् **त्रयो** भेदास्त्रिगुणा इति त्रिगुणपरस्परलक्षणधर्माणस्तस्मात् त्रयः स्मताः। द्विगुणत्वे हेतु**र्द्विगुणा** इ(दि)ति।

यथाक्षरस्य व्याख्या गुणगुणनीयत्त्वाद् द्विकलत्वम्। तस्यापि द्वाभ्यां गुण्यमानत्वाच्चतुष्कलत्वम्। चतुष्कलत्वाद् भेदाभावाच्च नास्य पुनर्गुण्यमानत्वमस्तीति।

वयं तु मन्महे। वीणायामपि यथाक्षरे द्वैगुण्यस्यासम्भवाभावः। असम्भवस्यापेक्षितत्वाद् द्वैगुण्यस्येति।

नन्वासारितवर्धमानगीतकपाणिकाच्छन्दकप्रभतीनां तावत् तालात्मकत्वम्। **तालस्य** चामी **त्रयो भेदा** इति। सर्वं यथाक्षरत्वं वक्तव्यम्। ध्रुवागुरुप्रस्तारवर्धनाद् द्विकलचतुष्कलादिचच्चत्पुटादिपाताः। परमार्थतस्तत्र पुनर्यथाक्षरक्लप्त्या तस्यैव च द्विगुणकालत्वेन द्विकलचतुष्कलादुदित(वुदिता) इति तयोरपि नान्याक्षरकल्पनावकाशः। एतच्चाग्रे वितत्य भविष्यतीत्यास्तामेतत्।।**२६**।।

अथ प्रयोगाभिप्रायेण तालयोर्व्याप्तिमाह। **चतुरश्रै(श्र)स्त्रिभिर्भेदै**रिति। तानाह। **चतुष्कलो ह्यष्टकलः कलाः षोडश चैव ही**ति। नियते कलाद्यभिप्रायेण **मन्तव्यम्**। पुनरुक्तं हि स्यात्। वक्ष्यमाणत्र्यश्रभेदद्वादशेभ्यो भ्यधिकस्य भेदत्रयस्याभि धानमसङ्गतं स्यात्। वक्त्रपाणा(ण्या)द्यपेक्षया चतुर्विंशतिकल एव चतुष्कलो भेदः स्यात्। न द्विगुणः। भेदद्वयोपादानं त्वसङ्गतमेव। तस्मात् प्रयोगाभिप्रायमेतत्। प्रयोगश्च न सर्वसमुदायात्मकतया। असौ वाक्यस्थानीयैरवान्तरसमुदायैरारब्धतया प्रकरणशब्देन **जाताध्याय** (भ.ना. अ.२८) उद्दिष्टः। एवं ह्यासारितेषु द्वात्रिंशच्चतुःषष्टिकलायोगो प्युक्तः। सन्निपातः सचिवो स्तीति षोडशादेव विरतिर्न स्यात्। प्रकर्याः षण्णवतित्रिगुणिताद्यर्थानि चत्वारि वा वस्तूनि वपुरिति समावसमावेव। कथं विरतिः। शीर्षकान्ते अङ्गव्यामिश्रणतया सारितकण्डिका दशपरिवर्तादिव्याकलनया च पिण्डीकरणेन कश्चित् सङ्ख्याया नियम इति कस्मादवान्तरसमुदायरूपः प्रयोगाभिमतः। तेनेदमुक्तं भवति। चतुरश्रषोडशकलाविभागो यावच्च सम्भवति ताले तावदवश्यं चतुरश्रभेद एव कल्पनीयः। तेनाष्टकलो पि तावत् प्रयोगे चतस्रः कलाश्चच्चत्पुटे। न बाह्यानुक्तिका त्वेका कलैव चकारेणावगहीता। एवं नवकले द्विकलच(श्च)चच्चत्पुटः। सप्तदशकले चतुष्कलः। ततो द्विगुणे चतुष्कलस्यैव द्वैगुण्यमिति मन्तव्यं नान्यताइ(थे)त्येवकारेणोक्तम्। हिहेतो(हेतु)पर(रः)। एवं तालस्य त्रयो भेदा इति तावच्चतुरश्रस्य व्याप्तिः।।**२७**।।

त्र्यश्रस्य तूच्यते। **त्र्यश्रतालंतु(लस्तु)षड्भेद** इत्यादिना **तथा षण्णवतिः कला** इत्यन्तेन। तथेति। द्विकलतयेत्यर्थः। **कला द्वादश चे**ति। यथा चाचपुटस्य चतुष्कलो भेदान्तरं समुच्चिन्नेति **चकारेणैव**कारेण(च)। तत्र व्याप्तिं समापयति। **चतुविंशतिरि**ति। **च**कारेण प चपाणिश्च षट्कलभेदान्तरं समुच्चिनोति। 'एवकारेण तस्यापि परिसमाप्तिं दर्शयति। **अष्टचत्वारिंशत्ताला** इति। तालस्तु यो मद्रकस्य प्रस्तुतः प्रयोगः। तत्र लयस्यावान्तरविभागे षोडशकलात्मनि मात्राभिधाने चतुरश्रयोग एव। एवं हि पादभागमात्रादिति चेद् भेदस्य चतुरश्रपर्यवसानाच्चतुरश्रस्यैव प्राधान्यम्। तथापि तादशैस्त्रिभिः खण्डैरवान्तरविच्छिन्नः। तत एवम्भावस्य विदारीविच्छेदे(दै)रारव्यो यः सो पि

माननीयः। विदार्या अवश्यमेव विधेय इति तस्य समुदायस्य भागतया कृत्वा ष्टचत्वारिंशत्कलत्र्य(स्त्र्य)श्रभेद इत्युक्तम्। एवं षण्णवतिकले प्रकर्याः प्रयोगे बहिरवान्तरभागैः षोडशकलाभेदैरारम्भ इति सो पि त्र्यश्रभेद एवेत्यवान्तरे चतुर्विंशतिकला वस्त्विति तावद्वस्तुनिबन्धेषु नाधिका व्याप्तिः। चतुर्विंशतिरेव द्विगुणा द्विगुणे कस्तुत्वाद्विक्षेपणत्वं मार्गाश्च तिसणां षण्णां द्वादाशानां चैककलद्विकलचतुष्कलोचितानां चतुर्विंशत्यष्टचत्वारिंशत्षण्णवतिकलासु निष्पत्तये त्र्यश्रभेदतैव युक्तेति **षण्णवतिकला**वधित्वात् त्र्यश्रस्य व्याप्तिरिति युक्तमुक्तम्। अङ्गनिषिद्धे प्युल्लोप्यकोत्त(र)रोविन्दकत्रयेणाङ्गे पि व्यवहार इति वक्ष्यते। तावन्मात्रा च षोडशकला। ततो यदि यथास्वमङ्गविभाग एव कलातिरिक्तः पूर्वे(वैं)रेवेति। ओवेणके पि चतुर्विंशतिकलः पादस्ततश्चैतदुक्तरूपतालातिरेकेण न क्वचित्ताले कश्चिदस्तीत्युपसंहरति।

तालो नवविधश्चायं समासात् परिकीर्तितः।

इति। चो भिन्नक्रमः। नवचतुरष्टषोडशत्र्यश्रेति षड्द्वादशचतुर्विंशत्यष्टचत्वारिंशत्षण्णवति––रूपो नवविधचच्चत्पुटचाचपुटषट्पितापुत्रकाणां त्रयाणां द्विकलचतुष्कलरूपः **परिकीर्तितश्च नवविधः। समासादि**ति सङ्क्षेपात्। शिष्टत्वेन द्वियमष्टात्मकं तालवैचित्र्यमित्युक्तं भवति। अत एवैतेषामेव प्रकीर्यमाणतया प्रक्रियमाणतया च मन्द्रकादित्वेन स्थितिरिति मन्द्रकादिप्रकरणं श्रुत्योद्दिष्टपूर्वकं **मात्राप्रकरणाङ्गानी**ति (भ.ना. २८.२६)। तेन दक्षिणमार्गेण षण्णावतेः कलानामन्ते त्र्यश्ररूपे पि ततात्मनि द्वादशकलासङ्ख्यापर्यवसानमिति कत्वा यदि त्र्यश्रस्य षण्णवत्यन्ता व्याप्तिरुक्ता तर्ह्यष्टाविंशच्छतान्ता चतुरश्रस्यापि व्याप्तिर्वक्तव्येति।।**२८-२६**।।

तन्निराकरोति तत्रेत्यनेन। स्थिते प्रयोग इत्यर्थः। एतदुक्तं भवति।.....**मानवैर्गन्धर्वैः स(सा)र्वलौकिकः।** इत्युक्तानुसारेण

दूराद् दूराभिगन्तव्या नियमात् ताल(गाः)कलाः।

सङ्ख्याया अनियमाद् गान्धर्वस्य वेदवदनादिसिद्धत्वेन नियतप्रयोगाङ्गत्वात्तत्र च षणवतिकलावान्तरसमुदायः षोडशकलात्मकपादभागसमुदायान्तरभागषट्कलप्रधानप्रत्यया––ख्यमहता तालरूपसंहता न्तरान्तरा रम्भको यथा स्ति तदेवमष्टविंशत्युत्तरशतात्मक इति।

एवं नवविधस्ताल इति तावत् तालस्वरूपो व्यवस्थिते तदुपयोगि यत्तालगतमुद्दिष्टं भवति गेयाधिकारारम्भे ष्टाविंशत्यध्याये

ध्रुवस्त्वावापनिष्क्रामौ विक्षेपो थ प्रवेशनम्।
शम्यातालः सन्निपातः परिवर्तः सवस्तुकः।।
मात्राप्रकरणाङ्गानि विदारी यतयो लयाः।
गीतयो लयमार्ग(वयवा मार्गाः) पादभागाः(मार्गाः)सपाणयः।।
इत्येकविंशतिविधं ज्ञेयं तालगतं बुधैः।

इति। (भ.ना. अ.२८–१८–२०) तन्निर्णेतव्यम्। तत्र क्रिया चात्र परिच्छेदोपयोगिनीत्युक्तमस्माभिः। सा च गान्धर्वे विशिष्टैवेति दर्शनात्। यथाक्षरद्विकलचतुष्कलविभागोपयोगि तनुद्दिष्टानुवादकपूर्वकमाह। **अ(तत्रा)वापो थ निष्क्राम** इत्यादि।

एतेषामेव वक्ष्यामि हस्ताङ्गुलिविकल्पनम्।

इत्यन्तम्। ध्रुवस्य सर्वकलान्तर्गतत्त्वादुद्देश(शे)पूर्वोपादानमिति वामदक्षिणकरान्यतरप्रयोज्य––त्वात् सशब्दत्वाच्च तज्जातीयशम्यातालान्तरमुपादानं पातमार्गयोश्च वस्तुत उद्देश एवेत्याख्यास्यते। संज्ञासाम्य.....लोकस्य तावत् क्रमहेतुकलानां चतुष्कलमार्गस्यैव प्रचुरप्रयोग इति तदुपक्रमवादित(न).....प्रयोगस्य तस्यैव प्राधान्यमित्यावापादीनामानन्तर्यम––थेत्युक्तम्। **दत्तिलाचार्यो** पि

अनादेशे तु सर्वत्र कर्तव्यः स चतुष्कलः। (दत्तिलम् १५६)

इति परिबभाषे। चत्वारो विकल्पा भेदा अस्येति (**चतुर्विकल्पः**)। तालात्मकक्रियासामान्यरूपो ह्यस्य पदार्थः। **निःशब्द** इति। शब्दशून्य एव। एते चत्वार इति प्रयोज्या इतिकर्तव्यान्तं निरूपणम्। **शब्देन संयुक्त** इति। अनेनापि शम्यादेश्चतुष्टवस्येतिकर्तव्यताशेष उक्तः। तत्र हस्तक्रियेति परिच्छेदसुलभ उपायः। तयोर्हस्तयोः क्रियैव **ताल** इति सामान्यलक्षणं तले भव इति कृत्वा। तत्र चाष्टावेव विभागरूपा(श्चित्रादि)दक्षिणमार्गपर्यन्तोचिता इति भावः। स चावापादिभिरेव क्रियाभिः समलाभिर्भवति। (यथा)ध्रुवकापेक्षया हि चित्रवार्तिकदक्षिणानां क्रमाद् द्वैगुण्यादष्टनीयत्वादिति वक्ष्यते। अत एवात्रापि चतुष्टयसङ्ख्येति क्रियाकलापेन परिमिततालकालकलितमेव दर्शितम्। तत्र केवलमदष्टप्राधान्यभावाभावाद्यनादरेणाङ्गतो––दनाविरहोपनतं सुकरललितरुचिकरक्रियात्मकत्वं दर्शितम्।

ध्रुवकापतिता चित्रे ध्रुवकासर्पिणी यथा।
पताकापतिता चेति वार्तिके गुरवः स्मताः।।
ध्रुवकासर्पिणी कृष्या वर्तिन्यथ विसर्जिता।
विक्षिप्ता च पताका च पतिता चेति दक्षिणे।।

इति। तथा न्यत्र।

अङ्गुलिप्रथमावापो विक्षेपस्तर्जनीकृतः।
प्रसारणं कनीयस्या विक्षेपः स्यास्त्व(त्त्व)धोगतिः।।
क्षेपः प्रो(त्)क्षपणं त्वन्या.....वामके।
अधोगतिस्तु विक्षेपस्तर्जन्यां तिसणां समम्।।
निष्क्रामस्त्वथ.....प्रवेशस्तदधोगतिः।
एवमष्टौ समासेन मात्र(त्रा)भेदास्तु दक्षिणे।।
आद्यद्वयं तथान्त्ये वत्तौ नित्यं चतुष्टयम्।

आद्यन्तद्वितयं चात्र..... ....।।

इति। गान्धर्वे त्वदष्टप्रधानतया शम्यातालगणनायानामिकाङ्गुलिसन्निदेशवामदक्षिणकर--विभागादभ्युदयिनी(दयी)ति नियता एवावापादयो दर्शिताः। हस्ताङ्गुलेः क्रियात्मकताल इति तद्विशेषाभिधानमेवावापादीनां विशेषलक्षणमित्युक्तम्। **हस्ताङ्गुलिविकल्पनम्**। तद्गतायां क्रियायां हस्ताङ्गुलिशब्द उपचरितः। हस्तस्य हस्तयोः अङ्गुलेः अङ्गुल्योः अङ्गुलीनां चेति समासः। एवकारेण ध्रुवकासर्पिण्यादीनामदष्टहेतुकत्वाभावान्न लक्षणं वाच्यम्। परिच्छेदमत्र हि शिरःपरिवाहादिना पि गाने सामान्यस्य च सम्यादिसिध्द्युदयात्मना क्रियतां को दोष इति भावः। तेन यत् **टीकाकारै**र्गानैव तत्पूर्वकत्वात् सर्पिण्याद्यपि सङ्गहीतं भवतीत्युक्तं तप्रयासमात्रमेव। अत्र तद्विशेषलक्षणमाह। **उत्तानाङ्गुली**ति। जात्येकवचनान्तेन समासः। तेन सङ्ख्याया अनैयत्यम्। उत्तानपदेनोर्ध्वाद(ध)स्तिर्यत्का(क्त्व)व्युदासः। **संज्ञित**मि(त इ)त्यनेनेदमाह। यत्रोत्पत्तिक्रमे यथाक्षरे द्विकलः ततश्चतुष्कल इति व्यवस्था तत्र (चित्रे) इति व्याप्तिमर्यादा वा। ततो पि वत्ते रूपमाह। तेन द्विकलान्तरव्याप्त्यर्थमपि तदधिक....वचनम्। अत्र प्रयोगवशात् सम्पादकतया बीजतया सन्तननतुल्यनिरूपणम्। तदेवं भूतया करक्रियया दर्शनीय इति समयो दष्टसिद्धि इति।।**३०-३२**।।

निष्क्रामो धोगतस्येति। अनागतावेक्षणं तन्त्रयुक्तिरिति वा सूत्रेषु सम्भाव्य लौकिकन्यायो(वा) वेदितव्यम्। व्यवस्थया वर्तितं च। हस्तस्येति। अधोहस्तस्येहापेक्षणीयम्। तेनाधोगतस्य हस्तस्य या अङ्गुल्यस्तासां साम्यमर्थान् मुष्टीभूतानां यत् प्रसारणं स्वावयव.. ..तलिकासंयोगकारणभूतपूर्वोक्तसंकोचनक्रियाविपरीतरूपं कर्म स निष्क्रामः स्यादिति। अस्यायमाशयः। यक्षाक्षरगताया एव कलाया यद्वैतत्यद्विकलसम्पादनमुक्तं तन्निष्क्रमणमुच्यते। निष्क्रान्ता नटतीति यथा। तच्च समुचितेनैव तेनाङ्गुलिनिष्क्रमणेन यद्यो(द्योत्य)त इति। **तस्य दक्षिणतः क्षेप** इति। **तस्ये**ति। प्रसारिताङ्गुलीकस्योत्तानभूतस्येति। तस्य ग्रहणं दूरस्थोत्तानत्वाद् वामस्यान्यथा निष्क्रान्ताङ्गुलीकस्याधोमुखस्य स्वदक्षिणपार्श्वेन **विक्षेप** इति स्यात्। द्विकलगता कला क्षिप्यते विस्तार्यते त्रेत्यनेन सामयिकेनाभिधानेन सूच्यत इति **संज्ञित**(त)ग्रहणम्।।**३३**।।

निवर्तनं च हस्तस्य प्रवेशो भि(धो)मुखस्य तु।

अङ्गुलीनामिति वर्तते। अधोमुखग्रहणेन **निष्क्राम**वैपरीत्यं **प्रवेशनस्य** प्रकाश्यते। अन्यथा दक्षिणतो **निवर्तनं** प्रतीयते। तनेत्थं प्रयोजनम्। निष्क्रामकाले **धोमुखस्य** हस्तस्य या अङ्गुल्यः प्रसारिता अभूवन् तासां **यन्निवर्तनं** सम्प्रवेशनं तत्पूर्वस्याव्यतिरिक्तसूचनायेदं सामयिकं विक्षेपवत् संज्ञामात्रं विक्षेपाभिधानमित्याह। **यदे**ति। यो धिकायाः कलाया अनुप्रवेशः तत्प्रवेशेनैवोचितमित्यौचित्यमस्ति। चतुर्णां कलाभिनयानां विषयमाह। **चतुष्कलो योगस्तदा त्वेष विधि**रिति। एकैव कला गुरुरूपा चतस्रः कला विततीभाववशाद् यदा सम्पद्यते तदा **एष** अ(आ)वापनिष्क्रामविक्षेपप्रवेशात्मको यथाक्रमं कलाप्रमाणाभिव्य जकश्चतुर्धा **विधि**रिति सामान्यरूपलक्षण इत्यर्थः।।**३४**।।

निष्क्रामश्च प्रवेशश्च द्विकल इति। या त्वेकैव गुर्वात्मका वा कलाद्वयपरिमाणं वैतत्यमेवैति तदा प्रथमकलाकालो निष्क्रामेण द्वितीयकलाकालप्रवेशेन व्यङ्ग्य इति सामान्यलक्षणम्।

अन्ये पठन्ति।

अ(आ)वापनिष्क्रामकृतो द्विकलो योग इष्यते।

इति। तत्र व्याख्यातम्। पार्यन्तिको वितर्को भवेत् चतुष्कलात्मकशङ्काभावादावावो(पो) यदा तिव्याप्तस्तदा वापो न्यो प्यत्र पार्यन्तिकमवधिकं सूचयतः। तत **आवाप**शब्देनोक्ते तयो**र्निष्क्रामो** पसरणं तदोपलक्षितमेष यदा विधिर्भवतीति तदा **द्विकलो योग** इति।

अन्ये तु पूर्वशेषत्वेन श्लोकार्थमाहुः। यो **द्विकलगतो योगो निष्क्रामरूपः** स एवाहितो यतः समाङ्गन्यायतया च प्रवेशो विक्षेपसहितः। ततो विशेषो नुवादाभावे पि स्यात्। प्रवेशस्य नामा पि न श्रूयत इति। न किंचिदेतत्।

अन्ये त्वेककले आयते यथा **निष्क्राम**स्तथा द्विकलनायामपि **भवत्वावाप** इति मन्यमाना यथाश्रुतमेवावापनिष्क्रामात्मकद्विकलं मन्यन्ते। ते पि पूर्वापरशास्त्रान्तर गुरुपरम्परालक्ष्यविरोधादुपेक्ष्या एव।।**३५**।।

अथ सशब्दताविषयप्रदर्शनं तावत् करोति।

एषामन्तरपातास्तु पाठ(त)संज्ञाः प्रकीर्तिताः।

इति। एतच्छेषा ये **प्रकीर्तिताः** शम्यादयस्तेषाम(मा)वापादीनामन्तरे समये प्रसङ्गे मध्ये च। एतदस्यापवादरूपतयेति। अतः **पाता** उच्यन्ते। अनेन द्विकलचतुष्कलविषयेष्वेते पवा––दत्वाद्भवन्तीत्युक्तम्। तथा येषामावापदीनां **यदन्तरं** कालपरिमाणं तत् **पात्यते** ऊनाधिकभावं गम्यते येषु गुरुलघुषु तेषु ते **पाद**(त)संज्ञाः पादैः(तैः)स व्यवहार उभयकरनिपतनस्वभावात् **संज्ञा** अत इति द्योत्यते(न्ते) आनीन्यन्त इति यावत्। आवापादीनां चतुर्णामभिनयानामेकरूपैव कला परिच्छेदनीया द्विकलचतुष्कलमार्गयोः सर्वत्र कलापरिच्छेदस्य सम्मतत्वाद्यथाक्षरे तु नैवमिति यथाक्षरात्मा एककलः पातानामेवेत्युक्तं भवति। यथा य एते पातास्ते द्विकलस्य चतुष्कलस्य वा यदि योगः शाश्वतो नास्ति तत्रेयं परिभाषा। तदुपपत्तिलिङ्गत्वं चास्याः पाठे द्विकल इति तदा नन्तरपाताः। एषां निष्क्रमादीनां मध्ये पतन्तीति ज्ञेयमिति परिभाषेयम्। तेन

शम्या तु द्विकला कार्या तालो(पि)द्विकल एव च(लः स्मतः)। (भ.ना. अ. ३१–२६२)

इत्यादौ पूर्वरङ्गोक्ते भाविनि निशनिता इत्यादिप्रस्तारे लभ्यते। यत्र द्विकलचतुष्कलोपपत्तिर्नास्ति न तत्रेयं परिभाषा। तदुपपत्तिलिङ्गत्वं चास्ये आद्ये पाठे **द्विकल** इति चेति। चतुष्कलमूलकस्यानुवत्या **द्विकलो योग** इति पाठे पि योग इत्युनुवत्यै तत्। **त्रिशम्यौपरिपाणौ** इति (भ.ना. अ.२६–८७) तथा **तालस्त्रिकलस्त्वा(श्चा)द्वौ शम्यैककला** (भ.ना. अ.२६–६१) इत्यादौ च तदुपपत्तिर्नास्ति। तत्रेदमान्तरपातत्वम्। एतच्च दर्शितं दर्शयिष्यते च।।**३६**।।

एवं पातानां विषयमुक्त्वा लक्षणमाह। **सव्यहस्तः सन्निपात(स्तनिपातः स्यात्)** इत्यादि। **सव्यो** त्र दक्षिणो **वाम**शब्दसन्निधानात्। **निपात** इत्यधोगमनम्। अत्रेदमुच्यते तत्र सशब्दमानागते पि लक्षणादपिनोक्तपूर्वाच्च शब्देन संयुक्त इति वचनात्। तत्र संयोगश्चोटिकापातस्यैवासाधारणो भवति। मुख्यतया सा एव ग्राह्यो हस्तान्तरसंयोगतो ह्यसौ भवेद् द्वयोरपि साधारणः स्यात्। अन्ये तु सव्यस्योतानत्वाधारतोचिते शब्दहेतुसंयोगकारणत्वसन्निपातनमिति व्याचक्षते। एवं तालो पि द्विविधः शम्याव्याप्यः शम्यापि। यद्यपि तालो हस्तलनिर्वर्त्यत्वाद् दक्षिणदिशो मङ्गलसूचने शम्यायाः। यद्वा शमीत्यत्रार्थे साधुः। शम्येति व्युत्पत्तिकृतेन शब्देन तस्या अभिधानात् तलद्वयनिपातनस्य चासाधरणेन सन्निपतनादिति निर्वाचनादनेन **सन्निपातेन** शब्देनाभिधास्यमानत्वात् परिशेषाद् वामहस्तसन्निपात एव तालः। **सम** इति। तुल्यकालमधोगमनम्। अनधोगतयोस्तिर्यक् स्थितयोः सम्मुखयोरुभयकर्मजशब्दहेतुः संयोगः। **समः पात** इति संशब्दः समार्थे।।**३७**।।

तत्र ध्रुवपातस्य मूलभूतत्वं **संज्ञाध्यायोद्देशे** (भ.ना. ३२.२) प्राथम्यात् दर्शितम्। **एतदध्याय**पठितानुवादश्लोके तु शम्यातालादनन्तरमभिधानाद् वामदक्षिणान्यतरकरप्रयोज्यता न तूभयसंवाद्यत्वं प्रयोजनाभावादिति सूचितम्। सर्वपश्चाल्लक्षणकरणेन तु यथाक्षरद्विकलचतुष्कलविषयोक्तपूर्वशम्यानिष्क्रामावाहिपा(वापा)दिमध्यपातित्वमस्य नास्ति। अपि तु तद्विविक्त एव। उपोहनध्रुवागतिरस्य विषय इति सूचितम्। तथा च वक्ष्यते।

अथ तत्र मुखप्रतानं(खं तालं)ध्रुवपातैरेव नियमितात्मा(न्मा)नम्। (भ.ना. ३१–१००)

इति। ध्रुवत्वं यत्र गच्छति तद् ध्रुवे(वमि)त्यादि च वदन्ति। **दत्तिलाचार्येणा**पि

उपोहनत्वाद्वैतस्याः (न च तत्राद्यं)स्मतं ताल(चार्थ)विवर्जितम्। (दत्तिलम् १६६)

इत्युक्तम्। अतो ध्रुवस्य लक्षणमाह।

कला या त्रिविधा प्रोक्ता तस्याः पातो ध्रुवः स्मतः।

इति। इव(ह) तावत् कालस्य यस्य विपरिमाणो(णामो) परिमाणान्तरोद्देशाद् देशाद्यपसर्पणं तदभिव्यङ्ग्योपलक्षणो नाम स एव प्रयत्नपरिच्छेदरूपत्वात् समुदायात्मकत्वाच्चान्यस्य कलापरिच्छेदव्यवहारस्य प्राधान्यादनपेक्षितातज्जातीयत्वेन च स्थैर्यात् परमास्थितो ध्रुवकस्तथापि नासौ व्यवहार्य इति न तेनास्माकं प्रयोजनम्। ह्रस्वस्य तु व्यवहार्यत्वमतज्जातीयत्वं च निरंशत्वात्। यथोक्तम्। **अल्पीयसा पि यत्नेन शब्दमुच्चारित**मिति। **यदि वा नैव गह्णाति वर्णं वा सकलं स्फुटमि**ति। वर्णाश्च ह्रस्वा एव। **दीर्घादेयान्ति धर्मत्वादि**ति। तथापि न तस्य ध्रुवत्वम्। संयोगादिपरस्य तत्कालेन यस्य प्रतिभासाभावात् व्य जनवल्लघुकालेन नास्ति व्यवहार इति गुरुकाल एव ध्रुवः। तदाह। **कला या त्रिविधे**ति। यस्याः कलाया द्वैगुण्यक्रमेण चित्रवार्तिकदक्षिणमार्गगतत्वेन त्रैविध्यमुक्तं **तस्या** इति। लघुरेव(क)कलात्मकत्वात् कालपरिच्छेदमयीं तमाश्रित्य यः **पात**श्छोटिकापूर्वकमधोगमनं तस्या लक्षणभूता(या) **ध्रुवो** नाम लक्ष्यभूतः स्यात्। अतो ध्रुवं स्थैर्यं (पा.धा.पा. १४०१) इति स्मतिलक्षणभावो हीत्थमेवावतिष्ठते। सामानाधिकरणनिर्देशात्तु

लक्षणप्रायेण छोटिकाशब्देनास्य पुनरुक्तिरित्यतो लभ्यते। पूर्वत्वं चास्य विशेषणत्वादेव गम्यते। शाक(साकं)ज्ञानावलम्बनत्वे पि विशेष्ययोरेकविकल्पग्राह्यत्वे वत्तेरौचित्यस्य च विशेषणस्य पूर्वनिपातात् तस्यैवोचितं पूर्वत्वं युक्तमिति छोटिकाशब्द एवोचितो त्र न तालशब्द इत्यभियुक्ताः। **अन्ये** तु दिग्योगे तु प चमीप्रकरणात्तच्छब्दग्रहणमाहुः। पातात् पूर्वं यः शब्दः स ध्रुव इति। सर्वं चैतद् व्यक्तम्। या लघ्वक्षरकालमध्ये छोटिका शब्दपूर्वकं हस्तपतनमाश्रित्य वामदक्षिणविभागो ध्रुवपात उच्यत इति।

ननु यत्तु लघुपरिमाणत्वात् कथं ध्रुवत्वम्। गुरुकालो ध्रुव इत्युपपादित इत्याशङ्क्याह।

यथाक्षरस्य मालस्य स च गुर्वक्षरः(रे) स्मतः।

इतीह गुरुरेव ध्रुवः। तस्य केवलमर्धमात्राविश्रान्त्या विना प्रयोगान्तरगमनं न सम्भवति। सर्वत्र हि विशेषान्तरावगाहेन मध्यै(ध्ये) तदुभयविशेषशून्यविश्रान्तिसम्भवो विशेषस्ताले तदवधानादेवोच्यते। **तालज्ञश्चाप्रयासेन मोक्षमार्ग**मिति (याज्ञवल्क्यस्मतिः ३–११५)। तेन गुरुद्वये मात्राचतुष्कलात्मनि संमील्य मात्राकालो विश्रान्तिरिति। एवं कालपरिमाणकला व्याख्याता। सा च प चमी मात्रामध्ये श्वासविरामादिविश्रान्तिसिद्धये शून्यरूपैव तावद्गीता(ते) वाद्ये (च) क्रियते। चतुर्भिः स्वरैश्चतुर्भिरेव च मात्राविशेषैर्गानं वाद्यं च विदधते। गीयमानं यदवगन्तव्यं व्य जनयोगाद् वाद्याक्षरमवश्यम्भावि हकारादिव्य जनवशाच्च। तत्रापि सा प चमी मात्रा चतुष्कलात्मस्फुटतया न्तर्वाहित्वेन भात्येव। स्फुटा न च। सा हि व्य जनकालानवभास उच्यते। न त्वनवभासपूर्वा अस्य मार्ग इत्यनयोरभ्युच्चारणे वादने वा स्वसंवेद्य एव कालभेदः। अत एवास्फुटावभासविलक्षणस्फुटाभासतत्स्वरूपलाभाय लक्ष्ये स्फुटा एव। क्वचन प च मात्रा वाद्याक्षरेषु लक्ष्यते(न्ते)। यथा खण्डकेट टिटुटु चचुचाचां गिगिगिनिगि इति। यद्यपि त(ता)नप्रसा(स्ता)रे लघुत्वमस्य तथापि चित्रापेक्षया म। ध्रुवकाश्रयं तु गुरुत्वमेव केवलमत्र विश्रान्त्यभावात्। प्राणायामवन्निरन्तरवाहित्वाद् गात्रवादकयोः प्रयत्नविशेषोपयोगः। खण्डके टटिटुटी इत्यत्र विश्रम्यैव द्वितीयो लघुः प्रयुज्यते। मुट्टिटिहसनीति विश्रान्तिकालस्यैव.... पलक्षणसिद्धये चटुलायां निगिनिगगि इत्येल्लघुप्रस्तारादिकामात्रलघुद्वयोचितं कालविशेषावधि शून्यकलोपक्रमं गिर्गि इतीयता, मात्रान्तरेण लघ्वन्तपूरणं ततो विटत् इति गुरुत्वे मात्राद्वयं विश्रान्त्या च मात्रे त्रिमात्रायोगिभिन्ना धी इति(रिति) मात्रासम्पर्केण मात्रादशरूपं भवति। एवं तु चतस्र एव वाद्याक्षरमात्राः। तत्र स्फुट एव विश्रान्तिकालः। यथा हेलाकुटिलादौ ग्रं विश्रम्भमभ्य.....तुङ्गहिडुममङ्व्ययस्मटिकषिद इत्यादौ। एवं स्थिते गुरुरेव यद्यपि ध्रुवस्तथापि गुरौ ग्रं इत्युदिते गीयमाने वश्यं गीतवशादेवाकर्षणेन भाव्यम्। आकर्षणं च सष्टः(ष्टि)प्रलयवददुच्चारणसमकालमेवेति शक्यं नियन्तुम्। अ(आ)वापादीनां कियदा(द)पकर्षणं शम्यादेः कियत्पातं चित्रादिवशादित्युक्तौ किं चित्रै(क)कला वार्तिके दक्षिणे वेति मूले पर्येष्यमाणे ध्रुवागान एवोपलक्षितकान्तत्वान्न नियमे हेतुः। अत एव ध्रुवपातनियन्त्रितकलाकलास(लित)स्वाभावत्वात् तन्मार्गो पि ध्रुवक इत्युक्तो मूलभूताश्च।

दत्तिलादिभिः प्रथममार्गायोद्दिष्टमूलं तेषां (**अथ मार्गा य उद्दिष्टास्तेषां मूलं**) **ध्रुव** इति (दत्तिलम् २४०)। तेन ध्रुवकद्वयं चित्रेत्यादिनियमलाभः। **मुनिना** चैतद्ध्रुवकाभिधानमूलमार्गसिद्धये **निमेषाः प चे** (भ.ना. ३१–४)त्युपक्रम्य। **द्विमात्रा स्यात् कला चित्रे (चित्रे द्विमात्रा कर्तव्या)** (भ.ना. अ.३१–७) इत्येवामाद्युक्तम्। अत्रान्यथा **निमेषदशमात्रा स्यात् कला चित्रे द्विगुणा वार्तिक** इत्यादि ब्रूयात्। **निमेषाः प चे**(भ.ना. अ.३१–४)त्यादिनिबन्धनमूलादेव ध्रुवत्वं लब्धमिति मार्गचतुष्कं सिद्धम्। तदनुसारेणैव बिन्दुद्रुतलघुगुरुप्लुतव्यवहारो लक्ष्यवेदिभिः कृत एव। एतदाह। **यथाक्षरस्येत्यादि**। (द्वितीय) चच्चत्पुटचाचपुटेत्यादे**र्यथाक्षरस्य तालस्य** ये द्वे गुरुरूपलक्षिते अक्षरे चच्चदिति पुट इत्याद्येव स ध्रुवकः। तत्काल.....लित्वा त्रिवेद्यर्थमात्रा अ इत्यत्रापि। अत एव तु ह्लपरत्वाद् द्वे मात्रे। एवं द्वितीये पि चकारे तस्य च ध्रुवस्थानकस्य न पथक् कला। साहित्येन हि पूर्वो लघुर्गुरुत्वं प्राप्त इत्येव। अन्तर्यामिस्थानीयत्वान् मुक्तस्फुटाश्चतस्रो ह्यमात्रा ध्रुवकलाः। तत्रेह कलेति परिच्छेद्यापरिच्छेद्येषु त्रिष्वपि **मुनिना** प्रयुज्यत इति दर्शयिष्यामः। नियतकालकलासम्पातश्च मार्ग उच्यते। परिच्छेदोपयोगिक्रियामात्रपात इति ध्रुवाया आतोद्य एव मार्गाद् ध्रुवकादि। एतस्मिन् गुर्वक्षरे सति गीयमानक्रिये कियद्विश्रम्यतामिति पुनरपि ध्रुवकस्य मूलमात्रपात्र(त) इत्याशङ्क्याह। **स्मत** इति। स्मरणं **स्मतं** तत्रास्तीति। एतदुक्तं भवति। यथा (चित्रतो) वार्तायामतश्चतुर्गुणं देहीत्युक्ते स्फुटस्मरणं न भवति। एतदेव त्वन्यद् देहीति स्फुटमेव स्मरणं भवति। एवं नियता छोटिकाशब्दं कृत्वैतावदेव पातनं हस्तस्येति स्फुटमेव स्मरणं भवति। ध्रुवो मूलभूत इत्युच्चारण एव त्रिगुणम्। एतत् सप्तगुणम्। एतेन प चगुणम्। हस्ताङ्गुल्या कृत्वा ना(दा)दिकं कुर्वीतेत्युदन्तमनुस्मरणं भवतीति ध्रुव एव मूलभूतः। तेन परमार्थत एको गुरुर्ध्रुवो भवति। अत एकगुरुकालनिरन्तरचोटिकापातपरम्परात्मा बलीति कदापि च ध्रुवपात एवोच्यते। अक्षरानुसारित्वाच्चात एव यथाक्षरत्वं भवति। एव(ष) एव च गभीराभिप्रायो **मुनिना गुर्वक्षर** इति प्रथमाद्विवचने सप्तम्येकवचने च श्लिष्टं प्रयु जानेन प्रकटित इत्यलं प्रकटितलक्ष्यलक्षणोपलक्षणमित(र)जनहृदयावर्जकेन बहुना प्रसक्तानुप्रसक्तप्रसङ्गेन। **गुर्वक्षरः स्मत इत्यन्ये** पठन्ति। गुर्वक्षरस्मतस्मरणं यत्र तु नानुभवपूर्वकं च तदिति द्वितीयमनुभूयमानमपि लभ्यत एव।।**३८**।।

एवं कलापातस्वरूप इति निर्णीय यदर्थमेतदुक्तं तद्यथाक्षरादिपूर्वोद्दिष्टं लक्षयितुमाह। **यथाक्षरकृतैः पातै**रिति। यावन्त्यक्षराणि तावत्सङ्ख्याकैस्तथा क्षरसदशकलोपेतैरिति बाहुल्याभिप्रायेण। उद्धट्टे हि यथाक्षरे निष्क्रामो प्यस्ति। अनतिवत्तौ सादश्ये च **यथा**शब्देनाव्ययीभावः। तेन चच्चत्पुट इति चतुर्भिः पातैर्गुरुद्वयलघुप्लुतकृतकालैर्यथाक्षरं चच्चत्पुट आस्तेहत्र परत इत्युक्तम्। एवं चाचपुट इति वाच्यम्।

गुर्वक्षरैश्च विश्लिष्टैः स एव द्विकलो भवेत्।

केचिदक्षरकृतस्य विश्लिष्टत्वं स्यादित्याशङ्क्य कलासगुरुप्रस्तारात्मककलमभिप्रेत्य तदुक्तमिति व्याचक्षते। तेन गुरुषु चचर्षु त्रिषु प चसु स्थापितेषु विश्लेषो यदा क्रियते तदा सप्तकलनवद् द्विकलनवद् द्विकलविरामस्य प्रकृतितादात्म्येनावभासो यथा तदेवेदं काष्ठं भस्मेत्याशयेन **स एवेति** निर्देशः। स तु कथम्। **विश्लिष्टै**रित्याह। विभावातीतैः श्लिष्टैरिति। यावद् द्विकप चकमतीते वैगुण्यं द्विर्भावशब्देनोपलक्षितं तस्यैकस्य पुनरावत्तिरेकद्विकलस्यापि गुर्वक्षरे विभागाद् द्वैगुण्येन वितततया श्लिष्टैः स एव **यथाक्षर**श्चतुष्कलः। अव्यवहिते कार्ये पि कारणतादात्म्यकापदेशात् तदेवेदं क्षीरं तक्रमितिवदेकैव कला द्वै चतस्रश्च यत्र भवति स द्विकलश्चतुष्कलश्च।।**३६**।।

एतदाह।

द्विर्भावाद् द्विकलस्यापि विज्ञेयो थ चतुष्कलः।

इति। **अन्ये** त्वाहुः। विशिष्टैर्द्विकलस्तत्र विश्लेषो विभागपदेन दत्तश्चतुर्गुरुप्लुतविषयमेव सम्भवति। तयोरल्पीयसेति न्यायेन विभागासम्भवादनेन गुरोवि(र्वि)भागे द्वौ लघूप्लुतस्य त्रयो लघुविभक्तः स एव। तदुक्तं **दत्तिलेन**।

गुरुप्लुतादि हित्वाथ द्विमात्रान् परिकल्पयेत्। (दत्तिलम् १३०)

पादभागादीनि त्रीणि हित्वैव मात्राकालत्वद्विकलचतुष्कलं न प्राप्तमिति। (अथ) ये च ते विश्लिष्टात्मानो लघवस्ते गुर्वक्षरस्वभावकलापरिमाणाः कर्तव्याः। लघुर्यद्यपि स्वात्मनि विभावाभावान् न विश्लेष्यस्तथापि समयन् नत एवासौ विश्लिष्टरूपत्वे स्यापि गुरुत्वमेव लब्धम्। एवं द्विकलस्य चतुष्कलतापादने पि मन्तव्यम्।

ननु स्पष्टमेव कस्मान् नोक्तमेताभिर्गुरुकलाभिः षड्दशभिश्**चतुष्कल** इति। मैवम्। विभागसिद्धेर्ह्येवं भवति। तया च मात्राविभागाः। चकारपदेनागममात्रे पीति वचनं वस्तुविभागश्च। एतच्च **गीतकलक्षणे** स्पष्टयिष्यामः।

कि च **गत्यध्याये** (भ.ना. अ.१२) गतेर्विचित्रकत्वेनोक्तत्वात् तदनुसारेण लक्ष्ये प्लुतगुरुलघुद्रुतकल्पना या चतुर्धा साप्यनेन विशेषेण सूचिता तथापि यथाक्षरे तावद् गुरुलघुप्लुतानां सम्भवः। ततो द्वि**र्भावाद्** द्विकलाद् द्रुतो लभ्यते। योगाक्षराणीष्टल्लब्धपूर्वं ततो पि द्विर्भावाच् चतुष्कलाद् बिन्दुर्नाम द्रुतार्थभूतो लभ्यते। य आद्याख्यां न लब्धः स एतदर्थमेव। **यं चाहुः स्वा कलेति** ध्रुवके पि विभक्तः। **एको हि मात्रे विश्रान्ताव**ित्युक्तम्। तेन मात्राकालो बिन्दुः द्रुतकालो द्रुतः तद्द्वयकालो लघुः चतुष्कलकालो गुरुरिति चेष्टसिद्धिः। एतदाह।

त्र्यश्रश्च चतुरश्रश्च षट्कलो ष्टकलः स्मतः।

ध्रुवाणां च भवेत् तालः।

इति। **त्र्यश्र** इति। यत्राश्रित एव यत्र त्रयः पाताः। **षट्कल** इति। द्विकद्विगुणलघुपातः। चकाराद् द्वादशकलः। तद्द्विगुणद्रुतपातश्चतुर्विंशतिकलश्चतुर्द्विगुणपातः। तत एव नास्ति

भ जनं प च। **चतुरश्रो पि** स एवंविधस्तालः प(प्र)सादाक्षेपान्तरनिष्क्रामादिगानेष्वस्ति। तत्र क इति चेदाह। **तं च वक्ष्यामि तत्त्वत** इति **ध्रुवाध्याये**।

एवं प्रसङ्गतो.....द्विकलचतुष्कलविषयो यः पूर्वमुक्तक्रमो **निष्क्रामश्च प्रवेशश्च द्विकले** इति (भ.ना. २१.३५) **यदा चतुष्कलो योगस्तदा त्वेष विधि**रिति (भ.ना. ३१.३४) च (य)देवं विभक्तं ग्रन्थान्तर.....स्तु **निष्क्राम** इति तत्प्रयोज्य इति यावत्।

अन्ये तु **ज्ञ्यश्र(श्च)चतुरश्रस्ये(श्चे)**त्यस्यामुमर्थमाह(हुः)। **यस्त्र्यश्रो** द्विकलत्वात् **षट्कलश्चतुर(श्र)श्च** द्विकलत्वाद**ष्टकलः स ध्रुवाणां** गीतकादिसमुदायारम्भकाणां वर्गाणाम्। यस्यास्**तालो** भवति तस्यास्तं **कनिष्ठाङ्गुलिनिष्क्राम** इत्यादिना वक्ष्यामि। प्रसङ्गतश्चतुष्कलमपि हेतुरत्र.....ध्रुवत्वात् स्थैर्येण या कला क्रिया ध्रुवमुच्यते। अङ्गिन्यवयवविभागेनावयवरूपमेव यदङ्गं परमाणिवदित्याशयेन ध्रुवमङ्गमुच्यते। तदङ्गं ताले युक्ते गीतकादीनि व्याप्तानि न तद् द्विकलं वक्तव्यम्। तत्र **त्र्यश्र** इति सामान्यलक्षणम्। द्विकले यावद्भागचतुष्काख्यां च **चतुरश्रस्**तत्र प्राथम्यं कनिष्ठया भिव्यङ्ग्यं पादभागस्येत्यादौ यद्यपि मुख्यं नियमादष्टजपाङ्गुलिपर्य(न्त)कमपि शेषवत्तया न्यायादत्राङ्ग इ(मि)त्याहुः। कनीयसी हि प्रथमा लोके गणनायां वे(वै)दिके.... यणीया यजुंषि ऋचि वा स्वरितप्रदर्शने कनिष्ठात आरभ्य स्वराणां कुर्वते। एवं यावत्वर्थ(व)त्वेनान्यत्वं पादभागस्य तर्जन्या भिव्यज्यते पादभागत्रयं चच्चत्पुट इति प्राथम्यं कनीसस्यत् द्वितीयमनामया नान्यतस्ततीयत्वेन न कश्चिदर्थ इत्यत्राभिव्यक्तो दष्टसामर्थ्यात् तर्जन्येव गह्यते। मध्यमा तु त्यज्यते। प चपाणौतु षट् पादभागाः। तत्र चतुर्थतर्जनीभिरङ्गुलीभिर्द्यौत्यते। पुनः पुनः प्राथम्यात् प चमे कनीयस्येवाङ्गुल्यन्तराभावात् प्रतिष्ठेति। एके वदन्ति(मध्यमां)त्यक्त्वा न्यत्वाभिव्यक्तो.....तदुक्तं **दत्तिलाचार्येण**।

आद्या द्वितीयमाद्यन्तात् पादभाग(गा)द्विदुःक्रमात्।
कनिष्ठानामिकाय(यु)क्तमध्यमाद्दे(दे)शिनीकृतान्।
अयं मध्यमहीनः स्यादाद्यन्ताधिक उत्तरः।। (दत्तिलम् १३६)

इति। विदुरिति **क्रमादिति स्यादिति** पदैरेवदान्तिमत्वं सूचितम्। यत्र तु पातोपपादत्वेन गच्छति तत्र साङ्गुलिर्व्यज्यते।

अन्ये तु तदङ्गुल्यङ्गुष्ठस्य हस्तान्तरस्य वा संयोगच् छम्यादिपातो विधेय इत्याहुः। एवं चतुष्कले पि मन्तव्यम्। तदेतदाह। **कनिष्ठाङ्गुली**त्यादिना **प्रागुक्ताङ्गुलिभिः कृत** इत्यन्तेन। तत्र भाविपातानुसारेणावापनिष्क्रा(मा)दिषु वामदक्षिणविभागः। तद्यथा। शम्यायां भाविन्यां दक्षिणेनैव निष्क्रामो मध्याङ्गस्तुल्यप्रयोगे स्तु(तु)ल्य इति मध्यमपदलोपी तर्जनीनिष्क्राम इति सम्बन्धः।

{उपसंहरति। प चस्वेवं कलानां निष्क्रामादीनां पातानां च शम्यादीनां विकल्पं प्रथमादिरूपत्वमङ्गुलीभिरुपलक्षणभूताभिर्निरूप्य द्विकलचच्चत्पुटद्वितीयरूपेण प्रवेशनसूचि––का कला शम्यापातरूपा कार्या प्रवेशनं तयैव सूच्यमित्यर्थः} एवं सर्वत्र। **प चमी**

तर्जनीक्रमादिति। क्रमप्राप्तो(प्ते) निष्क्रामे तर्जन्यत्र युक्तेत्यर्थः। उपसंहरति। **एवं त्र्यंश(त्र्यश्र)** इति। प्रस्तारः निश नाश निशं इति द्विकलं चाचपुटम्। **कलाद्वादशैरि(शक** इ)ति द्विकलप चपाण्युपसंहारः। तदयं प्रस्तारः– निप्र ताश निश ताप्र निसं इति।।**४०-५०**।।

एवं चच्चत्पुटचाचपुटप चपाणीनां द्विकलस्वरूपमुक्त्वा तत्रैवादिमध्ययोर्यथासङ्ख्यमा––वापविक्षेपौ यदि क्षिप्येते तच्चतुष्कलत्वं भवतीति संक्षेपेणाह। **एष त्वावापविक्षेपव्यवधानेने**ति। **एष त्वि**ति। एष एवेत्यर्थः। यो(यौ) निष्क्रामप्रवेशादिकौ तत्स्थानिकौ वानिप्रशप्रनिताताप्रेत्यादीनामन्यतयोपाधिरितिरि(ती)होक्तः स पादः। यदा वापविक्षेपाभ्यां व्यवधीयते स्थानादपसार्यते तदा **पण्डितैः** पूर्वानुसन्धानकुशलै**श्चतुष्कलविधिर्ज्ञेयः**। ततश्चावपेनान्यस्थानमाक्रम्यता निष्क्रामो पसार्यते द्वितीयस्थानं नीयत इति व्यवधानार्थः। प्रयोगस्य च व्यवधानं विस्तरीकरणमिति। अदा(आ)वापयोगेन निष्क्रामस्य विक्षेपप्रयोगेन प्रवेशस्य च प्रयोगो व्यवहितः। कार्यः। आवापविक्षेपाभ्यां तयोश्च व्यवधानमिति व्याख्यातम्। सर्वथा नावापविक्षेपौ निरन्तरौ निष्क्रामप्रवेशयोर्मध्ये(अन्ते आदौ वा क्षेप्यौ) इति मन्तव्यम्। तथा च **दत्तिलाचार्यः** स्पष्टमवोचत्।

विन्यस्य मध्ये विक्षेपमादावा(वा)पमेव च। (दत्तिलम् १३४) इति।।**५१**।।

ननु द्विकले चच्चत्पुटे चत्वारः पादभागा इत्युक्तम्। प्रोक्ताङ्गुलिविभागे तु चतुष्कले तद्वैगुण्यमतः कथमुक्तं **प्रागुक्ताङ्गुलिभिः कृत** इत्याशङ्कां शमयन् पादभागलक्षणं व्याकरोति। द्विकलच**(श्च)तुष्कलश्च पादभाग** इति। तेन चतुष्कले पि चत्वारः पादभागा इति यावत्।

ननु पादात्मा भागः। पादश्चतुर्भागः। तस्य.....विति निर्णीय त्र्यश्रे पि चतुरश्रस्यैव प्राधान्यं दर्शयति। मात्रालक्षणं **चत्वारः पादभागास्तु मात्रे**ति। तेनाष्टौ द्विकले चतुष्कले च षोडशकला इति मात्रा। तस्या अयं तुर्यो भागः। त्र्यश्रे पि च प्रकर्यादौ मात्रा षोडशकलैव भवतीति। तस्याश्चतुष्कलविधिना स्वरूपलाभात्। गीतकादिवस्त्वात्मनैककलद्विकलाभावे प्रकरीगीतकत्वचतुष्कलत्वव्यवहार उपपन्नगानः। त्र्यश्रत्वं च तत्र तथाभूताङ्गषट्कायोगा––दित्युक्तचरम्।।**५२**।।

न चैवं त्र्यश्रचतुरश्रयोः साङ्कर्यादभेदस्वरूपो भेदस्योक्तत्वादित्याशयेन समर्थयितुमाह।

चच्चत्पुटस्य तालस्य तथा चाचपुटस्य च।
प चपाणेश्च विहिता भेदा ह्येते पथक् पथक्।।

इति। यथाक्षरनिरूप(प्या) इत्यर्थः। उद्धट्टो पि यथाक्षरस्य चाचपुटस्यैव रूपं क्वचित् प्रयोगाद् रूपभेदेनोक्तः। एवं सम्षक्केष्टाको भेदः प चपाणेरेव। इत्येवं च तयोर्न पथग् द्विकलभावो लक्षणे लक्ष्ये च दश्यते। इत्येवमेतत्तालाभिधाने सर्वमध्याहारेणोक्तं भवति। तेन यदन्यत्राप्युक्तम्।

ऋचो वै ब्रह्मगीताश्च ब्रह्मणाभिहिताः किल।
दक्षेण पाणिकाश्चापि माधा(था)वै कश्यपेन तु।।
मातभिश्च कपालानि सामान्युक्तानि नन्दिना।
गीतकाधि(दि) तु सप्तैव नारदेनोदितानि वै।।**५३**।।

तदिदं रूपसप्तकमत्रापि नासङ्गहीतं भवतीत्याह। **एवमेव(ष) कलातालः समासादि**ति।

षष्ठाष्टगुणपर्यन्तं द्वात्रिंशच्चतुरादितः।
ऋग्गाथा ब्रह्मगीताश्च कपालानि त्रयोदश।।
षण्णवतिपादं साम तद्भेदेनापि च क्वचित्।
मुखं प्रतिमुखं चैव द्वात्रिंशत् समुदाहृतम्।।
गीतं द्वादशकं प्रोक्तं द्विगुणाविग्रहे यतः।
अष्टषष्टिकलोपेता ह्येकैका पाणिका स्मता।।

इत्यनेनैव सङ्गहीतं सर्वम्। जातिताला अप्यनेनैव स्वीकृताः। यथा च–

स्याद् द्वादशकला षाड्जी षड्जोदीच्यवती तथा।
मध्यमा रक्तगान्धारी कैशिकी षड्जकैशिकी।।
इतरा षोडशभिश्च यथा न्धी दै(धै)वती तथा।
गान्धारोदीच्यवा चान्या तथा गान्धारप चमी।।
मध्यमोदीच्यवाच्या(न्या) पि तथा कार्मारवी मता।
आर्षभी चैव गान्धारी तथा न्या षड्जमध्यमा।।
द्वात्रिंशत्कलिका चार्पि नन्दयन्ती प्रतिष्ठिता।
अष्टाभिः प चमी ज्ञेया कलामानं तु जातिषु।।

तेषु च स्वररूपत्वे पि क्वचिदन्यो सौ प्राग्वददष्टकलविहित इत्याशयेन य(प)दप्रक्षे(प)वत्तालयोजनं कार्यं गान्धर्वरूपतासिद्ध्यर्थमिति (न) केवलं सत्रस्वरूपमवधिकमदष्टोपयोगि। यथोक्तम्।

सकृत् प्रयुक्तौ(क्ता) पि हि नन्दयन्ती
यथाविधि ब्रह्महणं पुनाति।
यतश्च तालो नुकलाङ्गमात्रः
....।।

तेन विना गान्धर्वत्वमिति समनीचकलाधिक्ये पि न तालस्य हानिः। सप्त(कल)दशकलासारि(त)वत्। तत् सर्वमनेन सङ्गहीतम्। तत् कथमिदमाह–

आसारिते वर्धमाने गीतकेषु(च)यः स्मतः।

इति। न ह्यनेन ब्रह्मगीतादि व्यावर्तयितुं शक्यम्। ननु युक्तम्। न चेह शास्त्रमेतावल्लक्षणीयमात्रम्। अत्रा(त्र ताला)देरपि लक्षणदर्शनमुपलक्षणार्थमेव।

अन्यतमस्योपादानं युक्तं न त्रयाणामिति। उच्यते। यावदिदं जगति कालविजम्भितं तत् सर्वमुक्तं पूर्वादेव तालमार्गात्। तत्र तथा परमाणुचतुष्कात्तु गुणत्रयादन्यतो प्यवश्यमेव। आवर्तकादिक्रमेणान्योन्याभिभवादिक्रमेण वा प्रसतमिति स एव क्रमः प्राधान्यात् स्वकण्ठेन वचनार्हः। इहा पि तथाविधसन्निवेशेनावस्थानं विधातव्यमधिकप्रक्षेपणा**दासार**मित्युच्यते। **आङ्मर्यादाभिविध्योः** (अष्टा. २.१.१३)। स च वैतत्यात् तया सारणं स्थापनं मर्यादायां च क्षेपणं.....नाधिक्यमिति **न तदासारित**दिशा दर्शितम्। चच्चत्पुटप चपाण्योर्मर्यादया स्थापनं मार्गभेदादिना चैतत् प्रागुक्तस्य चाधिक्यस्य क्षेपात्। षट्कले च सर्वान्तर्भावः परिवर्तितादीनां च वद्धिगमनमिति वर्धमानेन सूचितम्। अत्रा पि चासारणं स्थितमेव। तथा विजातीयसजातीयबहुप्रकारविचित्रशकलक्रमोत्तानभेदरूपवैचित्र्यं गीतकमार्गेण प्रकटितम्। एवममुना त्रिशाखेनासारितक्रमेण समस्तजगद्वर्ति भेदसूचनमित्याशयेन त्रयाणामेव प्राधान्येनोपादानं कृतम्। प्राधान्यादेव च वत्ते पूर्वरङ्गतया तस्यैवोपयोग उक्तः। **गीतानां मद्रकादीनाम्।** (भ.ना. ५.१३) इत्यादि। **वर्धमान** एवासारितं प्रविष्टमिति त्रितयं तावदिह लक्ष्यते निर्गीतस्य पूर्वरङ्गे प्रयोगात्। लक्षणं पाणिकादिषूपयोगो वक्ष्यत इति त्रयस्योपादानं कृतम्। यथा च पार्थिवपरमाणुतया घटपटनीरग्रावाण इति नैषामस्य रूपसाङ्कर्यमवान्तरभेदात् त्रिभेदभिन्नता। त्रित्वे पि गीतकवर्धमानासारितादीनामिति सर्वं सुस्थम्। कि च त्र्यश्रचतुरश्रावेककलाभिन्नौ (अनुगतिकालं) केवलमाह। कणात्मक्रियासारितेष्वासारकृत्यं स्थाने न्यस्य स चारणं चतुष्कले चच्चत्पुटे षोडशमलधूते एककलतालस चारणरूपमासारणमात्रमिति सकलतालानुप्रवेशसहिष्णुचतुष्कलचच्चत्पुट––मात्ररूपत्त्वप्रधानमेतदिति। तदलं बहुना।।**५४**।।

तत्र **ताण्डवे(वं) यत्र युज्यते** (भ.ना. ५.१३) इति वर्धमानप्रयोगस्य प्राधान्यात् तदुपयोग्यासारितलक्षणं पूर्वमिह वक्तव्यम्। **दत्तिलादिभि**रतु गीतकलक्षानन्तरं तल्लक्षणमुक्तमवयवयव(वावयवि)भेदत्वादिति। तल्लक्षणं प्रतिजानीते। **अथासारितकानां त्वि**ति। वर्धमानानां बहिर्भूतानां वेत्यर्थः। प्रकर्षेण व्याससमासादिना तदाह। **भेदं चच्चत्पुटस्ये**ति। इदं ननु वर्धमानादबहिर्भूतस्य कनिष्ठासारितप्रसतेरासारितत्रयस्य लक्षणं वर्धमानबहिर्भूतं किं लयान्तरं न सम्भवतीति **वक्ष्यामः**। तत्र चच्चत्पुटस्यैव प्राधान्यं पूर्वमुपदिष्टम्। तस्य यो विततभावः स एवातारितत्रिकविततभावश्चतुष्कलत्वेनेति षोडशकले तावदायातः। तासां च सकलस्वरूपसन्निवेशमहत्वप्रतिपादनं कर्तव्यं नान्यदिति **भेदं चच्चत्पुटस्ये**त्यादिना दर्शितम्। तथाहि। चच्चत्पुटस्य तावद्भेदो विभागश्चतुष्कलरूपः षोडशकलात्मकः। स हि छेदः। एवं तत्र द्विकलविभागान्तरे सम्भवाच्छेद्यो पि। तस्य च षोडशकलागुरुप्रस्तारात्मना विष्टमध्रुवं तदित्याह तच्छेदम्। तत्कथमष्टौ। अष्टासु चतसषु कलासु गुरुभ्यां लघुना पातेन चोपलक्षितं कुर्यात्। चच्चत्पुटशब्दस्य प्रस्ताराच्चतस्रः कला लभ्यन्ते। **आदा**विति सामान्योक्तावपि समये पतिते पि च **गुरु**शब्दे(न) मध्यपतितत्वात् सङ्ख्यालाभः। एवं षोडशानां मध्यादन्यासु चतसषु कलासु गुरुभ्यां विकारः कृतः।।**५५**।।

शिष्टासु द्वादशसु तत् करोति। **प चपाणिं ततः कुर्याद् द्विरभ्यस्तं प्रयोगवित्। यथाक्षरं त्वि**ति। तद्विशेषे चाचपुटः पाणौ सत्यपि त्र्यश्व(श्र)त्वे चान्यो न य इति विकारो दर्शनीयः। तत्र चच्चत्पुटादि....र्मितत्र्यश्रः प चपाणिरेव दर्शनीयः। उक्तचतुष्कलात्मा(त्मिका)सु द्वादशकलासु यथाक्षरप चपाणिगतप्लुतलघुगुरुद्वयप्लुतात्मा (त्मकः) सन्निवेशः। ननु तेन षण्णां विकारः कुतो भवतीत्याशङ्क्याह। **द्विरभ्यस्तमि**ति। स्थानीयासु गुरुकलासु प्राप्तास्वतिव्यप्त्यादेशत्वेन षष्ठाक्षिप्तो यं प चपाणिस्तद् द्विः कुर्यादिदि सम्बन्धः। तेन द्विशद्वस्याभ्रूस्यशब्दस्य च न पुनरुक्तार्थत्वम्। **अभ्यस्त**ग्रहणेन स्थान्यादेशभावमभिदधन् मूलो(ल)भूतो यं चतुष्कलचच्चत्पुटो मात्रारूप इति दर्शयति। एवं चतुष्कलमात्रस्वभावत्वादस्य प्रकर्याः षोडशकलात्मिकात्वस्य प्लुतस्य त्रिमात्रै(त्रमे)व केवलमेतत्तालयोगीति लभ्यते। एतच्च प्रकरीलक्षणं तव **व्याख्यास्यामः**।

कनिष्ठासारितेनास्याः कार्यं संहरणं तथा। (भ.ना. ३१.२८१)

इत्यत्र **प्रयोगविदि**ति। प्रकृतिविकारा(र)भावा(व)ज्ञाने यत्नः कार्यः। लक्षणज्ञानं न ह्यत्रोपयुज्यते दष्टलक्ष्यं लक्षणसम्पत्येति। **यथाक्षर**ग्रहणं शिष्टद्वादशकलोचितस्य द्विकलप चपाणिहस्तस्याविशिष्टगुरुकत्वस्य प्रत्यापत्तये शङ्क्यमानाभिधानस्य निवत्त्यर्थमेव तावत्। षोडशानां कलानामादेशाद् गुर्वादयःकृताः। तत्र लोके प्रकृतिधर्मके विकारस्य दष्टौ.....। **सर्वत्र यथावद् विनिवेशयत्। शम्यातालमि**त्यादि। **सर्वत्र**ग्रहणम् स्थानिवद्भावप्राप्तकलानामेतावच्छम्यादिकलादेर्विकल्पसमुच्चयगमनार्थं सर्वेष्वेतेषु षोडशत्वम्। **यथावदि**ति। पाठक्रमेण चेदमित्थं निवेशयेत्। किं तदित्याह। **शम्यातालमि**त्यादि। **पुनश्चैवेति**। यस्यापि मुख्ययथाक्षरावस्थायामयं विधिरुक्तस्तथापि वस्तुदशायां न प्राप्नोतीति पुनरस्याभिधानम्। न च क्रमान् नामये(मानी)त्येवकारः। **अथापि चेति**। अथ अनन्तरं **प चपाणे**रादेशत्वेन न कृतस्तस्य यदा न्यमक्षरं प्लुतरूपमत्र **सन्निपातं योजयेदि**ति सम्बन्धः।।**५६-५७**।।

शिष्टासु प चकलास्वपि **तालं शम्या चेत्यादि। द्वितीये पि प चपाणावि**ति। विकाररूप इत्यर्थः। एष **एवेति**। यः प्रथमे वस्तुन्याद्याक्षरे सन्निपातमित्यादेः।।**५८**।।

एवं षोडशैव कला आसारितस्य स्वरूपम्। या तु सप्तदशकला सा अधिका वा पातः। तस्मात् तत एव मध्यमज्येष्ठदशायां तासामेव द्विगुणानामिति न त्यागा इति दर्शयति। **प्लुतच्छेद** इति। छेदे ग्रहणे **प्रयोक्तभि**रिति प्रयोगः। अयमितिकर्तव्यतातच्छरीरमाक्रामति। यथा परमेश्वरवन्दनप्रयोगे एवं क्रमः। तच्चरणोपरि निजशिरोनिवेशिनम्। न तु तावता तच्छिरस्तदङ्गमे(वे)ति। एवमपोहनमप्यक्रमरूपोनेतिकर्तव्यतारूपं मन्तव्यम्। येनोपक्रमोपसंहारवज्रः(घ्रः) षोडशकलाधर्म एव मन्तव्यः। एतदुपसंहरति। **एवं यथाक्षरं ज्ञेयमि**ति। **एव**मिति। परिदश्यमानविकाररूपयोगम्। **यथाक्षरं** प्रकृतिदशोचितचतुष्कलरूपम्। तत्प्रकारभूतए(मे)तत् कनिष्ठा**सारितम्**। अन्यद् द्विकलचतुष्कलरूपसम्भवत्वाद् बालमल्पं च

भवति। प्राकृतरूपौचित्यादासारः। तदासर एवमङ्गत्वादितः सरति। **ज्ञेयं** लक्षणमात्रमथोपयोगि च। यतस्तस्यायं प्रकारः कनिष्ठासारिते।

अत्र **केचित् शम्यातालं च** इत्यादिकं **यथाक्षरस्याक्षरैः** इत्यन्तं ग्रन्थमुपेक्षन्ते स्य दर्शनपरमार्थत(तो) वर्धमाने न्तर्भावेनोत्तानतया पौनरुक्त्यं मन्यमानाः। तत्र प्रथमो ग्रन्थः **शम्यातालमि**त्यादिपुनरुक्त एवेति व्याख्यातम्। ग्रन्थान्तरं तु योज्यते। इह तावत् परमार्थतस्त्रीण्येवासारितानि भवन्ति। तथाप्येककलद्विकलचतुष्कलप्रयोगोपपत्तिर्नायाता। अत एवान्यनालमध्ये नुप्रवेशान्तं तत् सम्भवतीत्येव तावत् त्रिधैवासारितक्रिया। तथा च पूर्वरङ्गे बहिर्गीतलक्षणे स्वकण्ठेन त्रयाणामेव नामग्रहणम्। लयान्तरं तु रागप्रयोगवैचित्र्यमात्रसम्भवम्। तच्च प्रयोगवैचित्र्यं तात्कालिकप्रयोगान्तरापेक्षया समाश्रयितुं युक्तम्। अन्यथा द्विगुणत्वमक्षरलयादीनामवश्यं ध्रुवापेक्षया चित्र इत्यादि लघ्वपेक्षया गुरोरित्यादिना च न्यायेन सर्वमस्तीति सर्व(र्वं)लयान्तरं भवेत्। तात्कालिकत्वप्रयोगान्तरं यदपेक्षणीयं तद्वर्धमानान्तर्भाव एव भवतीति तदपेक्षया यदि नाम तथाप्यप्रत्ययेन वा मनसश्च नान्योन्यविक्रियमाणेन वा व्यवहारयोगेन बहिर्भावे पि लयान्तरव्यवहारः। अर्थतस्तु वर्धमानमुख्यतद्व्यवहारो युक्तः। अत एव वर्धमानमासारितानां कारणमिति प्रतीयते। तथापि नवकलाविशालाचित्रगतार्थकला न्त्यवर्जं ध्रुवकप्रयोगवैचित्र्यं यदि नान्तर्भ(रभ)विष्यत् ततः कनिष्ठासारितं स्यात्। तदभावे ष्टकलो द्वितीयाप्रथमाकण्डिकासाहित्येन। अत्रापि त्रिखण्डत्वमेव गीततालयोः। द्वादशकला आद्यखण्डे। द्वितीये षट्कलाः। ततीये चतस्रः कलाः। आसां तालविधिमाह। **तालस्त्रिकलश्चेति** (भ.ना. २६–६१)। आदौ ततीयस्यां कलायां तालम्। एकस्यां शम्याम्। द्वितीयस्यां तालम्। द्वितीयस्यां शम्याम्। द्वितीयस्यां तालम्। **अन्ये** तु **तालो पि ह्येककात्मकः स्यादि**ति पठन्ति। **ते** शम्यानन्तरमेव तालमाहुः। ततीयस्यां सन्निपातम्। **शेषं तु विप्रा** इति परिपाट्या द्विकलपादभागानुसारेण युता। **पितापुत्रकश्च षट्पूर्व** (भ.ना. २६–६२) इति द्विकल एव प चपाणिः। चच्चत्पुटस्तथा द्विकल एव। तेन नीप्रताप्रशतादसतानिप्रतिसप्रसतिस इति **केचि**द्व्याचक्षते। अत्र क्रमादयः शब्दाः मा(सा)रणार्थे वर्तयितव्यास्तावन्त्यः यो(तेष्वन्तिमो) स्ति तत्र मध्यं च विकलोचितेन पूर्यते। ननु चाचपुटच(श्च)तुष्कलोचितेनेति प्रमाणाभावः। **षट्पितापुत्रको त्र द्विक** (भ.ना. २६.६२) इति प्रकरणं प्रमाणमिति चेदन्योन्याश्रयः। **द्विकलो द्विः प चपाणिरिति च त्रिकलश्च सन्निपात** (भ.ना. ३१.१६६) इत्यतो नन्तरं **भूय एवमि**ति बाधकत्वे **त्रिकलश्च सन्निपात** (भ.ना. ३१.१६६) इत्यतो नन्तरं **पितापुत्रकं च(कश्च)षट्पूर्व** (भ.ना. २६.६२) इति च न प्रयोजनम्। तथा चासारितेषु **च चत्पुटपरिवर्तः शम्यादी द्वे(द्वौ) च प चपाणियुतावि**ति (भ.ना. ३१.६५) वक्ष्यति। द्वात्रिंशति(त्) कलास्तद्भारतीये यद(दा)पदगणविभागाः। तस्मात् **तालस्त्रिकण(ल)** (भ.ना. २६.६१)त्यादो **त्रिशम्योपरिपाणविति** (भ.ना. २६.८७) निरन्तराये कलाद्वादशके पाताः। तानंताशं ताताशंशं ताताशंशम्। **तालो द्विकलश्चेदिति(श्चेति)**तु (भ.ना. २६.६१) पाठे संनि(पात)द्वयम्। अत्र

त्वन्ये तु तमेकेनैव सन्निपातेन भार्य(व्य)मिति। यदि सा विशालपरिवर्तक्रमेण न स्यात् कुतो लयान्तरम्। एवं द्वितीयाचतुर्थीभ्यां साहित्यात् तत्पूर्वकण्डिकाप्रयोगे मध्यमषष्ठयोरुद्भव इति। तथा सारितानि यदि भवेयुस्तस्य परिणामापेक्षया कण्डिकाविभागस्य तदभावे ष्टकलः। द्वितीया च(श्च) कथं दश परिवर्ताः। एकस्मिन् मूलवद्धिकृतः कलापरिवर्तकलावद्धिभ्यां साहित्यात् कृतं वर्धमानमित्यनयोर्बीजाङ्कुरवदन्योन्यकार्य–––कारणतासातिशयस्य वर्धमानस्य.....अनयोर्वर्धते। इह तदेवं स्थिते वर्धमानान्तर्गते आसारितविधावुत्पत्तिसिद्धये तावद्वर्ज्यते।

प्रथमां कण्डिकां कृत्वा बालतालप्रयोजनम्(जिताम्)।
अन्तिमार्धकलाहीनं (कुर्यादेवं) कनिष्ठिकम्।।
द्वितीयां कण्डिकां कृत्वा (प्रथमा सकला यदि)।
योज्यते पूर्वतालेन तदा(तत्)स्याल्लयान्तरम्।। (भ.ना. ३१.८१.८२)

इत्यादितश्चैतावतैव कनिष्ठलयान्तरितरूपसिद्धिः। बालस्य हि यस्तालः शम्यादिचच्चत्पुट इत्यादि। स एवाष्टासु चित्रगतासु। ध्रुवकाद्या षोडशीकृताश्च तेन तुल्येन गुरुरूपेण युक्तासु न पुनर्गुरुलघुप्लुटकोट(द्धट्ट)ने।।**५६**।।

नियममाह।

यथाक्षरस्याक्षरैश्च तालपातान् निबोधत।

इति। **च** एवकारार्थे। तदयमर्थः। **यथाक्षरस्य** कनिष्ठलयान्तरितात्मन आसारितस्यैव **बालतालप्रयोजितामि**त्यादौ (भ.ना. ३१.८१) **तान्(ल)शब्द**वाच्या पाता वक्ष्यन्ते तानक्षरैश्च चच्चत्पुटभत्यक्षरगतगुरुलघुप्लुतैरेव संयुक्तान् **निबोधत**। न तु केवलं गुरुरूपकलामात्रेण प्रदर्शयितव्याः। अक्षरैश्च संयुक्तास्ते पि च प्रयोज्या इत्युक्ते चच्चत्पुटचाचपुटषट्पितापुत्र–––कोद्धट्टसम्पक्वेष्टाकाक्षरणां च बहूनामसम्भव इति न निश्चयः कश्चित् प्रकरणात् चच्चत्पुटषट्पितापुत्रकयोर्लाभे पि.....न्याय्यः।

ननु पादस्याप्रामाण्यादिरेव प्रापकत्वेन प्रामाण्यादिति यदि क्रमव्यत्ययो भवतीत्याशङ्क्य वचनेनैव क्रममाह। **चका(त्का)रे तु भवेच्छम्ये**त्यादिना **द्वितीयो** प्येव**मेवस्यादि**त्यन्तेन। **द्वितीय** इत्यवशिष्टे कलाषट्क इत्यर्थः।

ननु सप्तावशिष्यन्त इत्याशङ्क्याह। **सन्निपातस्ततः परमिति**। एवमासारितस्यापि लक्षण(णं)कृतं भवतीति केवलस्वकण्ठेनास्याभिधानं वर्धमानान्तर्भाव एव। तदुभयस्य स्फुटत्वं यदुक्तन्यायादित्यल बहुना।

तुरेवकारार्थे। **चका(त्कार)र** एवेयमनुक्रान्ता शम्या गुरावेवेत्यर्थः। एवं तावद् द्वितीये गुरावेव शम्या। **पुनः** प्रकारे। **पुनः** शब्देन पूर्वतो विशेषो द्योतितः। **तालस्त(ष्ट)**कार **एव** प्लुते। एवमेवेत्यन्योन्यं योज्यम्। **अन्ये** तु

चका(त्का)रे तु भवेच्छम्या द्वितीये ताल एव च।

इति पठित्वा चच्चत्पुटसम्बन्धिनश्चतुरः पातान् पठित्वा **एवं चाचपुटे ज्ञेय** इति पठन्ति। प चपाणेस्तु पुटशब्दानन्तरं चतुष्पातानाहुः। ते विशालाया आद्यत्वं मध्यमानामेव पठन्ति। लयान्तरमेव केवलमभिप्रेत्य तत्र द्वितीयस्यां कण्डिकायामष्टकलायां च चच्चत्पुटषट्पितापुत्रक इत्यक्षरयोजनया समाप्तया प्रथमं विशालतो गह्यते। तत्र च (चच्चत्) इत्याद्यक्षरद्वयम्। तेन चच्चत्पुटशेषभूतमेव कृतमिति पूर्वकस्तु पाठः। कनिष्ठलयान्तरोभयानुग्राहिप्रयोगमेवोचितं चेत्यलं बहुना।।**६०-६३**।।

एवं कनिष्ठे लक्षिते मध्यमस्य लक्षणमाह।

गुर्वक्षराणां विश्लेषादेवमेव तु मध्यमम्।

इति। आदौ तावद् विश्लेषः कार्यः। स च योग्यत्वाद् गुरुप्लुतगत एव। तत्र गुरुणो द्विधा विश्लेषणम्। प्लुतस्य त्रिधा। तत्र विश्लेषणं(णे) कृते द्विर्भावाद् द्विकलोचितेन पादभागविभाग (उक्त) दिशा कार्यः। कृते च पादविभागे द्विर्भावे द्विकले चोचिता नुपूर्वशः परिपाट्या याता निष्क्रामकला प्रवेशकला सा (चादौ) पादस्य यथाक्षरतालश(स)म इति तस्यान्ते प्रयोक्तव्या। **यथावदनुपूर्वश** इति। तत्रे**दं मध्यमं** गुरूणां सम्बन्धि। विश्लेषकलाः सर्वा अविश्लिष्टगुरुरूपा इति यावत्। **अन्ये** सन्निपातश्चानन्तर्भावाद् यथास्थित एव। एवं च श्लोकयोजना। विशेषाद्धेतोर्मध्यमन्तं च **गुर्वक्षराणां** सम्बन्धि। एवमेवेति विकारे प्रकृतिरूपप्रत्यभिज्ञानात् तत्र च तालविधिः। **द्विर्भावे** द्विकलविभागे भागरूपे कृते द्विर्भावे व कलादेः शब्दरूपा सा **पातस्यान्ते** प्रयोज्ये **ते**(ति)। तदयं प्रस्तारः। शनितानिशतासनिप्रनिताशनितानिशातप्रतिसंनि प्रतांसनितासताप्रनितंप्रतासम्। **सन्निपातो न्त** इति वचनाच्च। सामान्येन प्रनि इत्यादि प्रस्तीर्य विशेषतयान्त आदौ प्रयोज्य इत्येतदाह **यथावदि**ति। ज्येष्ठे च प्रआनिवि इति पादभागे प्रस्तारः।.....। ततो विशेषपातः। गुरुणि च पादभागो लघुन्यथ पादभागः। प्लुते सार्ध इति स्थिते पादे चेवा(चैवे)तस्ततः कला एवं च क्रममु(म उ)त्तरत्रानुवादे स्पष्ट इति।

ये पूर्वमङ्ग(ङ्ग)लिकृताः प्रवेशनिष्क्रामसंज्ञया गदिताः। (भ.ना. ३१.१६८)

इति व्याख्यास्यते चैतदग्र एव।।**६४**।।

अथ **ज्येष्ठं** लक्षयति। **द्विर्भावान् मध्यमस्ये**ति। एवं तेषा**मित्यभिधीयते**। गुर्वक्षराणाम(मि)तिवर्तते। मध्यलयानि गुरूणि तेषां **द्विर्भावात् ज्येष्ठमभिधीयते** इति। **अतो** हेतोश्चतुष्कलत्वादिति यावत्। अस्य तालविधिमाह।

मध्यमस्य विधानेन न्यसेच्च द्विगुणाः कलाः।

द्विकलापेक्षया द्विकलश्चतुष्कलो विधिः। तद्विषयाश्च कला अपि **द्विगुण(णा)** इत्युक्ताः। ताश्चावापनिष्क्रामविक्षेपप्रवेशात्मिका उत्सर्गतः। ताश्**च मध्यमस्य**। यद्विधानक्रमः पातास्ते सम्प्रयोक्तव्ये (व्या इ)ति तेन क्रमेण न्यसेत्। तदयं प्रस्तारः।

अत्र विभक्तभङ्गे सन्निपातस्य मुक्तकमार्गरूपत्वे चच्चत्पुटे चतुर्भिः प चपाणिवन्न षड्भिः पातैरिति(त्यासारे) विंशतिः प चपाणौ शम्ये(म्यै)वेति पुनः प्रथमशम्यायामुक्तकल्पनां व्रजन्त्यां

प चपाण्यां(णौ)च सन्निपातयोश्च पूर्वपूर्वं तालविशेषत्वं व्रजतोर्मुक्तके च प चपाणिशेषभूते सा प्रवेशकला षड्भवा तत्त्वात् प चपाणेरिति वक्ष्यते। ननु **कनिष्ठं(ष्ठं)मध्यमं ज्येष्ठमिति च** या सप्तांशी निरूपिता निःशब्दा कृता न्या कनिष्ठकेवला मध्यमज्येष्ठयोर्निपातसहिता। वस्त्विति विशेषरूपलक्षणमित्यर्थः। सप्तांशेन सामान्येन यं(यल्)लक्षणं तन् निबोधत।।**७६**।।

अष्टौ तालास्तु यच्छ(षट् श)म्याः सन्निपातास्त्रय इति। एवं त्रैस्वर्यरूपं तद्रूपमिति यावत्। **संख्यावत्त्वाद् बलवत्त्वमिति न्यायादेष** क्रम आश्रितः। नात्र चच्चत्पुटप चपाणिबुद्धिः कर्तव्या। अपि तु वर्तनविधिः कार्यो यथा। **अष्टौ ताला** इत्यादिना क्रमेणासारितरूपसिद्धिरित्युक्तमप्**यन्येन।।६७।।**

केचि(कैश्चि)दत्र(त्रा) स्थितं(म्)। **चत्वारस्तु गुणा युग्म मि(इ)ति** (भ.ना. ३१.१०६) श्लोके आसारि(त)पदविधिः स्पष्टमरणार्थं विधीयते। तत्तु स्वस्या न एव व्याख्यास्यामः।

अन्ते च सन्निपातः स्यात् सर्वेषामप्ययं विधिः।

इति केचिदर्धश्लोकमप्यत्र सन्निपातस्यौत्सर्गिकमन्त्यत्वं दर्शयितुं पठन्ति।।**६८**।।

ननु नत्तोपयोगे प्राधान्याद् यदुद्देशेन लक्षणं तद् वर्धमानस्यैव प्रथमलक्षणं वाच्यम्। अथासारितानां समूहात्मकं तदिति। एषामादौ वर्धमानस्य कथं पथगुपादानम्। पूर्वमकारिते आसारिते वर्धमानाहितैव च चित्रतेत्याशङ्क्याह। **आसारितानां संयोगो वर्धमानकमिति। इह न** प्रत्येकमासारिते वर्धमानरूपता। न समुदितेषु। तथाहि। त्रीण्यासारितानि सप्तदश त्रयस्त्रिंशत् प चषष्टिरिति प चदशोत्तरं शतम्। कलानां वर्धमानं तु दशपरिवर्तक्रमेण चतुर्विंशत्युत्तरं शतम्। नवाष्टौ ततो नवाष्टौ नव षोडश द्वात्रिंशत् षोडशाष्टौ नवेति। यथा(दा) परिवर्तविहीनकण्डिकामात्रगणनं तदा यद्यपि प चषष्टिकला त्वाद्येष्वा(आद्यास्वा)सारितरूपता सम्भाव्यते तथापि नवाष्टौ षोडश द्वात्रिंशदित्येवम्भूतस्य विच्छेदस्यात्राभावात् त एव रूपतायाः पाताः केवलज्येष्ठासारिते। अभग्नपदकल्प्यमानरूपविशेषे वैचित्र्याश्रयभावन्यायेन खण्डिकाश्रयत्वाद् वर्धमानाश्रयत्वं स्यात्। नन्वेवमासारितानां किमादौ लक्षणेनेत्याशङ्क्याह। **सम्यग्** विचित्रेण प्रयोगेणायोगः। परस्परसङ्गतिः। तत्प्रमाणं **वर्धमानम्**। तथाहि कनिष्ठे गीयमाने कण्डिकाद्वयं संयुक्तं भाति। तस्मिन्नेव कला.....नान्या खण्डिका। मध्यमे च त्रयम्। ज्येष्ठे चतुष्टयम्। एवं परिवर्तदशखण्डिकासम्मितिर्या सारितेषु भाति **गगनतलभ्राम्यदभ्र(भ्रां)शकसंस्त्यानसिंह--व्याघ्रादिवैचित्र्यन्यायेन** ततो द्भुतत्त्वादासारितानामादौ लक्षणं कृतम्। वर्धमानस्य च पथगेव वक्तव्यम्। तत्र नत्ताश्रयत्वेनास्य **भगवदुपज्ञमेव** प्रवत्तिरिति पूर्वमुत्पत्तिर्वाच्येति दर्शयति। **उत्पत्तिं लक्षणं चास्येति। तत्रोत्पत्तिस्ताव**(दा)दौ नवमिति ताण्डव (प्रयोगो)..... **स्माभ्झिरताण्डवाध्याये** (भ.ना. अ.४) दर्शित इत्यर्थः।।**६९**।।

ननु नत्तं यद्युपपादितं वर्धमानस्य किं तत इत्याशङ्क्याह। अथ भूतचरै(**गणै**)रिति। अनुचरगणैरित्यर्थः। **तस्मिन् काल** इति। नत्यप्रयोगकाले। इदमित्युच्तपूर्वासारितसङ्गति--प्रयोजनात्मकं **दष्टमा**लोचितम्। आलोचने हेतुः **पिण्डीलब्धै(बन्धै)रि**ति।

तदुत्थाननिदानभूतकरणाङ्गहारप्रयोगसहे(हिते)ष्विति यावत्। एतदुक्तं भवति। **भगवा(न् वि)द्यया** विचित्रं नत्तमकार्षीत्। न चानुचरवर्गसमुचितं विचित्रं गीतमुत्प्रेक्षा चक्रे। विचित्रत्वादेव परिवर्तादिवैचित्र्यमुक्तम्। तत्र वैचित्र्योत्प्रेक्षणे ङ्गपरिवर्तादिवैचित्र्यमेव पर्यालोच्यमानं हेतुरिति **भगवता** वस्तुतो वर्धमानमुत्पादितम् न तु.....।**॥७०-७१॥**

किमिदानीं तदत्र प्रयोगेण। यदुक्तं

वर्धमानमथापीह ताण्डवं यत्र युज्यते। (भ.ना. ५—१३)

इत्याशङ्क्याह। **परितुष्टश्च तं (तद्) दृष्ट्वेति। सपत्नीकः सगणश्च परितुष्टः** सन् तादशमेव वरं ददौ।**॥७२॥**

कथमित्याह। **लक्ष्यलक्षणसम्यत्येति। मार्गा**श्चित्रादयः। **युक्ति**र्योजनम्। परिवर्तामिका(त्मको) **विधिः**। यथाक्षरद्विसङ्ख्यातरूपक्रमपरिवर्तनेष्वासारितोत्पत्तिलक्षणाः(णः)। एतैर्लक्षणस्य च सम्पदा घटितैरुपलक्षणं वर्धमानं ये प्रयु जते ते **शिवगोचरं** दष्टादष्टपरःश्रेयःप्राप्तिलक्षणं **यास्यन्ति**। भविष्यप्रयोगेण विविधफलानां धियः फलमुन्नतत्वकारणमित्याह। बहुवचनप्रयोगेण गातवादकनर्तकानां तुल्यफलत्वमाह।**॥७३॥**

एवमेतदिति। यतो भगवद्वरदारादेव(वं)भूतं नत्तमतो हेतोः **पिण्डीबन्ध**स्याङ्गहारप्रयोग——वैचित्र्यात्मनस्ताण्डवस्य निमित्तेन तत्पूर्वेण रूपसमुत्पत्तये **मयेति भरतमुनि**नैतन्नत्तं दष्टम्। पूर्वरङ्गे मया लेचितमित्येवमुत्पत्तिमभिधाय लक्षणस्यावकाशमाह। **अधुना तु प्रवक्ष्यामि लक्षणमिति**। जाते पूर्वरङ्गे योगे युक्तमस्य **लक्षणमित्यधुना**(नेत्य)स्याभिप्रायः। तुर्भिन्नक्रमः। यद्यपि सम्पत्तिरप्युपयोगिनो(न्यु)क्ता तथापि साध्याकारेण प्रतिनियोजितम्।**॥७४॥**

द्विविधं वर्धमानं स्यात् स्वप्रमाणविनिर्मितम्।

मार्गानुभवनसूचने आसारितानामाधाराधेयभावस्तावदस्ति। सा (स)च न स्वतन्त्राणाम्। अपि तु वर्धमानरूपं गतानाम्। तथाहि। वर्धमानरूपादुन्मीलिते प चषष्टिकले ज्येष्ठासारितान्तरमासारिते आधारभूते कनिष्ठाधि(ष्ठि)ता धेयता वतिष्ठते।**॥७५॥**

नन्वेवमासारितानां द्वैविध्यमाधाराधेयभावेन **वर्धमानमि**त्याशङ्क्याह। यस्मिन् वर्धमानरूपत्वे यत्प्रमाणप्रक्षेपो न्तर्भावः कण्डिकाङ्गकलाशम्याविभागश्च तेन यतो विनिर्मितमिदं द्वैविध्यं ततो वर्धमानस्यैव चतूरूपम्। न हि वर्धमानरूपत्वानासादने प चषष्टिकले ज्येष्ठे आसारितान्तरमाधीयते। तस्य विशिष्टतालयुक्तत्वादन्यरूपासहिष्णु——त्वात्।

ननु वर्धमानतायामपि कथं तस्यैवाधारत्वम्। आधेयतश्चोपाविकृताद्भेदादित्याह। **अता**लम्। **चो** हेतौ। चेत्यादि। यतस्तस्य वर्धमानस्य यतः प्रमाणं कालविभागस्तदतालम्। केवलसङ्ख्याभेदपरिच्छिन्नस्वशम्यादिविहितकण्डिकाचतुष्कमात्रं रूपं **सतालम्। शम्या तालं पुनः शम्या** (भ.ना. ३१.१४४) इत्यादि वक्ष्यमाणस्वरतालयुक्तं श्रुतम्। तस्मादाधाराधेयभावोपपत्तिः। एतदुक्तं भवति। **कण्डिच**ले(कडि भेदने पा—धतुपाठः १५८३) **कण्डिका।** चतुष्कलमात्रे प चषष्टिकले नुल्लिखितस्वकतालवैचित्र्ये अभग्नपदभित्तिप्रख्ये

चत्वार्या**सारितानि** पूर्वोक्तस्वकतालयोगेन प्रयोगे योग्यानि। तेन कण्डिकामात्रत्वाधारता सारितताल्प्रयोगसहितया वधे(ता धे)यता। **अन्ये** तूपोहनाङ्ग––स्याथ तत्र मुखतालमित्या(त्य)तालत्वमेकत्वात् प्रतिमुखादेकसतालत्वादङ्गवैचित्र्याद् द्विविधमित्याहुः एतत्तु न युक्तमित्यत्रैव **वक्ष्यामः।** तत्र यदतालरूपं तालं दर्शयति। **चतस्रः कण्डिकाश्चैवमिति**। कण्डानां नियतविभागात्मिका **कण्डिका। अन्ये** तु काण्डमवान्तरप्रकरणमिति मन्यमाना दीर्घं पठन्ति **काण्डिका** इति। कण्डिकैव केवला न तु तद्गतशम्यादि। **चतस्र** एव नाडिकाः। अतो हेतोस्**तावन्त्येव चत्वार्यासारितानि** तत उपपन्नाधाराधेयतेति यावत्। तुर्विशेषं द्योतयति। वर्धमानान्तर्गतानि यदि तानि तदा चत्वार्यन्तर्बहिर्भूतानि पुनस्त्रीण्येव। एतच्च त्राग् दर्शितम्।॥७६॥

न च कण्डिकानां स्वकतालाभावे स्वरूप एव लोप एवेत्याशङ्क्याह। **ध्रुवकेण कलाभिश्चेति। देवेन कल्पिता** भगवता योजिताः। **कण्डिका** इति तावन्मात्रमासां रूपम्। ततो ध्रुवपातयोगः शम्यादिकलाविशेषयोगो वा।

एतदुक्तं भवति। नियतकालकला कला चास्य.....कण्डिका धर्मरूपा **धर्मस्थानीयं**(यः) तत्र पातयोग इति।॥७७॥

ननु शम्याद्यभावे रूपसंयोजनबलेनात्पत्तिः क्रियते। किं तत् कण्डिकात्मकं वर्धमानशरीरं यत्रैवं मार्गयोजनेत्याह। **आद्या नवकला तु स्यादि**ति। दशपरिवर्तदशाहा(द्या)सारितरूपतायां यद्यष्यनियतमादित्वमासां तथापि कण्डिकारूपे प्रयोगे यमेव क्रम इति दर्शयितुम**ाद्येति तत्परेति** चोक्तम्। **ततीया तथैवे**ति। तत्परेत्यर्थः।॥७८॥

चतुर्थी कण्डिका चेति। तत्परेति यावत्। **एव**कारः क्रमं नियमयति। एवं **नवाष्टौ षोडश द्वात्रिंशदिति** चतसणां स्वरूपम्। एतच्चासारिते। आसां स्वरूपमुपसंहरति। **कलाभिरेवमिति। एवमि**त्युक्तसंख्याभिः **कलाभि**र्लक्षिता **मार्गेषु** चित्रादिषु **सम्भूतानां** सम्भाव्यमानस्वभावं केवलं कृत्वा **निर्दिष्टाः** शब्देन स्वेन रूपेणोक्ता(ः)। अत एव **तालयोगेन** स्वैरङ्गैश्चासारितमुखप्रतिमुखदेहसंहरणविभागयोगैरासारित**तालैर्वर्जिता**स्तत एतदवस्थाया आधाररूपता उक्ता इति भावः।॥७९॥

नन्वाधेयत्वं तर्हि कथमित्याह।

एकद्वित्रिचतुर्योगात्ताभिरासारितानि तु।
वर्धमाने प्रसूयन्ते मार्गतालाङ्गयोगतः॥

इति। **ताभिः** कण्डिकाभिर्हेतूभूताभि**रासारितानि** जायन्ते। कथम्। **योगात्। योगो मार्गतालाङ्गतः**। ततो हेतोः।

एतदुक्तं भवति। एकयोगा त्रिमात्राश्रिता कनिष्ठासारितोत्के(तके) ते(ता)ले ङ्गेषु च योजितेषु कनिष्ठासारितं प्रसूयत एव। **द्वियोगा**न्तेष्वेव तालेषु लयान्तरम्। क्रिया(**त्रि)योगात्तु** वार्तिकाश्रितमध्यासारितोचिततालयोगयोजने मध्यः। **चतुर्योपाद्** दक्षिणता स्वोचिता।

तालाङ्गनिवेशने ज्येष्ठम्। बहुस्वभावेत्यनया त्वव्यवस्थेत्याह। **वर्धमान** इति। प्रयोगापेक्षा गगनतलविचरज्जलदशकलघटनसिंहादिबुद्धिबदद्भुतफुल्लकल्पां(ल्पा) तदानीन्तना चेय––मासारितबुद्धिरिति चेत्(च) **प्रसूयत(न्त)** इत्यनेनोक्तम्। प्रसूय(न्ते) प्रयोगक्रमे सत्येवं ज्ञायते(न्ते) इति यावत्। अत एव लक्ष्यमेव प्रधानं न तु लक्षणम्। नेदं सुष्ठुतमं बुद्धावारोहतीति लक्ष्यसम्पत्तिरुक्तपूर्वा पि पुनरत्र सूचिता।।८०।।

नन्वेकयोगान्न कस्यचिदासारितसंवादं पश्यामः। एकत्र च कीदशो योग इत्याशङ्क्याह।

प्रथमां कण्डिकां कृत्वा बालतालप्रयोजित(ता)म्।
अन्तिमार्धकलाहीनं कुर्यादेवं कनिष्ठकम्।।

इति। नात्र द्वित्रि(द्विस्त्रिः)षट्कृत्वा कुर्यादिति वचनार्थितप्रयोग(:)। किन्त्वयमर्थचि(श्चि)त्रमार्गेण। नत्वहि(त्वादिमा)भिरकला हि कार्या। **प्रथमा(मां)खु(क)ण्डिकानां(कां) कृत्वेति** बुद्धौ गहीत्वा श्रयत्वेनालम्ब्य। कस्येत्याह। **बालेति**। कनिष्ठासारिते यस्ताल उक्तश्चच्चत्पुट(:) प चपाणिर्वेत्येवंरूपां चे(चै)वंरूपः। ध्रुवकानि मार्गचतुष्कदशावा(बाला)द्यान्यावस्थाभिर्व्यव(प)देशः। ततश्च बाले ताले ध्रुवकतालः। एवं चित्रमार्गगा न च कला प्रतिकलद्रुतमात्रेण द्वाभ्यां पाताभ्यां योज्यं शब्दकालत्वं यथा हि बालदशायां **कनिष्ठकम**भूत्। तद्वद् वर्धमानान्तर्भावे। **एवमि**ति। इमा ध्रुवकमार्गाश्रयलक्षणावस्थां(स्था) प्रा(ह्या)सं कुर्यात्। तत्रान्तिमां कलां चित्रमेव **केचिदाहुः। अन्ये** मार्गभेदसहमाना न शम्या अधे(र्धे) सन्निपातो र्था(र्धा)न्तरे च पातस्यानुक्तत्वादर्थः(र्धः) स्यादित्याह(हुः)। एवात(अत एव) एवमित(एव)मित्याचक्षते। अत एव तत् कनिष्ठासारित(ते) यच्चित्रमभूत् तदस्यां दशायामर्थ(र्ध)भूताभिः कलाभिर्हीनं न भवति। विचित्रस्य ध्रुवकवैगुण्यात् तथा विकलानां मद्य(ध्य)माद्यभागत्वे शम्यादिरूपेण स्थितमेवैतत्। पष्ठरूपं मन्त्रिमत्रे(पमन्तिममे)व कलानार्थं(र्ध)हीयते। ततो प्याह। **अन्तिमार्थ(र्ध)कलाहीन(म्)** इति। आदिमाभिरर्थ(र्ध)कलाभिः कलानामर्थ(र्ध)हीनमित्यर्थः। एवं च बालशब्द(:) कनिष्ठ एव व्याख्येयो न ध्रुवके। तेन व्यस्तस्य द्रुत एव लब्धत्वात्। एवमेकस्यामपि कण्डिकायां योजनात्मकयोग उपपादितः। तथा हि। चित्रे तावद् हीयमाने एकस्मिन् पादे पदं तदेवात्र ध्रुवकाश्रितो(ते)पातद्वये इत्येकयोगात् **कनिष्ठ**प्रसवो व्याख्यातः।।८१।।

अतियोगः कीदक् ततश्च कस्योत्पत्तिं(त्तिः) कथं चेत्याशङ्क्याह।

द्वितीयां ख(क)ण्डिकां कृत्वा प्रथमा सकला यदि।
योज्यते पूर्वतालेन तदा तत् स्याल्लयान्तरम्।।

बाल इति वर्तते। बालश्च कनिष्ठ एवेत्युक्तम्। वक्ष्यति च **बालं नवकलं ए(ये)षाम्** (भ.ना. ३१.९९) इत्यत्र। एवं कनिष्ठस्य यस्ताल उक्तश्चच्चत्पुटप चपाणिद्वयात्मा स सन्निपातः। तन्मध्यावद(ध्याद)ष्टासु कलासु सामि चच्चत्पुटःषट्पितापुत्र इत्यन्तो क्षरपातो विद्धि(धिः)। तावता बालतालेन प्रयोजिता स्थिता यामष्टकलां ख(क)ण्डिकां प्रयुज्य प्रमाणव(त्) कला अभग्नाभिरेव नवभिः कलाभिर्युक्ता यदि पूर्वेणोपक्रान्ता समाप्तेन तालेनावशिष्टेनात्र

षट्पितापुत्रकमुक्तं सन्निपातं चेत्येवं रूपेणोपोह्यते। **तदेति**। तस्यामेव दशायां न हि बहिर्भावयेदिति कनिष्ठं यदभूत् तल्लयकृताद्विशेषा**ल्लयान्तर**वाच्यं सम्भाव्यते। तदाह। **स्या**दिति।।८२।।

नन्वक्षरपातविधौ तावन्न कश्चिद्विशेष उक्तः। कण्डिका पि भावो पि यः पूर्व(र्वं)द्वितीयप्रथमेति सो प्येकासारितप्रयोगत्वे हस्ताभावाल्ललितकल्पं(ल्प)तत्कनिष्ठत्वभेदेन नेतुर्वाच्य इत्याशङ्क्य तयोर्भेदं

वर्धमानं विना विचि(चि)त्रे न हि वत्तौ लयान्तरम्।
बहिर्वा वर्धमाने वा कनिष्ठं न हि दक्षिणे।।

टीकाकृत तावदाह। **लयान्तरमिति। कनिष्ठमे**वोच्येत तदाश्रयत्वादुपचारेण। तदयमर्थः। **वर्धमानं विना** ततो **बहिर्भावे कनिष्ठं चित्र** एव भवति। ननु का(कदा)चिद्वत्तौ वर्धमाने लयान्तरस्वं धर्मा(न्तर)वति(र्ति)बहिर्भावेन कदाचन **लयान्तरमिति** तात्पर्यम्। **कनिष्ठं** तत् स्वतन्त्रं वा वर्धमानगतं वा न जातु **दक्षिणे** ध्रुवयति। किं ने.....स्या स कनिष्ठादपि ज्येष्ठस्य व्यक्तिः स्यात्। चातुर्गुण्यसहत्वान्न त्वेव। सा हि मध्यमासारितादिति। **अन्ये** तु शेषवत्ति(त्ती)श्चान्यथा व्याचक्षते। **कनिष्ठं** स्वतन्त्रं वा वर्धमानस्यान्तरं च। अन्तरत्वं दक्षिणेनापि वत्तेः। वर्धमानं तु विना चित्रम्। चित्रं तु वर्धमानान्तर्गतध्रुवकेणैव च। स्वातन्त्र्येण तु चित्रमार्गेण भवनीयम्। लयान्तरं च स्वतन्त्रवर्धमानगतं वा चित्रेण दक्षिणे किन्तु वार्ता एव वेल (वतिरेव वा लय) एव च मध्यमज्येष्ठयोर्मार्गत्रयविधेयत्वमित्युक्तं भवतीति। एवं च मार्गभेदादनयोर्भेद इति तात्पर्यमिति।

गुरुवस्तु स्पष्टमेव व्याचक्षते। एको हिशब्दश्चार्थे। अपरः शब्दार्थे। इत्थं च योजना। **लयान्तरं** नाम तद् **वर्धमानं विना न चित्रे च वत्तौ** न दक्षिणे भवति। मार्गत्रये पि स्वतन्त्रं तत्रास्ति। वर्धमानान्तर्गतं हि चित्रे पि हि भवति यदा चित्रा श्रिता नवकला विशालध्रुवकेण कनिष्ठं व्यनक्ति। वत्तावपि भवति यद्वा(दा) सद्वत्तिमार्गाश्रिता चित्रेण कनिष्ठाभिव्य ज्य(ज)का। दक्षिणे पि भवति यदा सा दक्षिणमार्गाश्रिता वार्तिकेण कनिष्ठं व्यनक्ति। न हि कण्डिकानां मार्गभेदनियमः कश्चित्। तथा हि सामान्येनोक्तम्। **वत्तिदक्षिणचित्रेषु विनियोजितं वर्धमानमिति** (भ.ना. ३१–७५)। एवं विना **चित्रे वत्तौ लयान्तरं नापि दक्षिणे। कनिष्ठं बहिर्वा भवति वर्धमाने वा** भवतीति पारतन्त्र्यनियमादनियतस्य कनिष्ठस्य सिद्धौ लयान्तराद्भेद इति।।**८३**।।

ननु भवत्वेवं तथापि यदा वर्धमानान्तर्भावदशाकृता(त)पारतन्त्र्यं तदातो भेद इत्याशङ्क्याह।

द्विगुणाक्षरसंयोगादन्यमार्गनियोजनात्।
नत्तकालविशेषाच्च बालादन्यल(ल्ल)यान्तरम्।।

यावन्त्यक्षराणि पदसम्बन्धीनि कनिष्ठासारितकलायां तलो(तो) द्विगुण(णानि) लयान्तरगतायाम्। ध्रुवके यदि कनिष्ठलयान्तरश्चित्रे नत्ते च विशेषो स्ति। यत्रान्तरे

गीयमाने न द्विकलाय(याः) कनिष्ठाया आवत्तिर्भवतीति। यदा गीतवशादङ्गं भूयो निव(व)त्त(र्त)ते नत्राद्यमभिनेयं स्वाच्छेषं नत्ते तद्योजयेदिति। यथाक्षरवैगुण्या(न्) मार्गभेदाच्च को न्या(न्यः) कालविशेषः। अक्षरद्वैगुण्यमपि लयवशात्। स एव कालो न तु मार्गभेदे तस्मात् कालो त्र नर्तकीप्रवेशवाद्यग्रहणादिवसरः।।**८४**।।

अथ कथं स्त्रि(त्रि)योगः किं च ततं प्रयोगत इत्याशङ्क्याह।

ततीया च द्वितीया च प्रथमा चैव तत्कृता(त्कला)
द्विकलं योगमाश्रित्य मद्य(ध्य)मासारितं तु तत्।।

गुर्वक्षराणां त्रिस्तेषामि(विश्लेषादि)ति (भ.ना. ३१–६४) पूर्व(र्वं) यो द्विकला(लो) योगा(ग) उक्तः समाश्रित्य षोडशाष्टौ नवेति यदि काकुताल**मद्य(ध्य)मासारितं** तेन सनिसासनिदावनि इति चच्चत्पुटम्। शनिप्रताशनितामीति पाणिगता षन्ता इत्येवं षोडशकला(प्य)त्यादौ कण्डिका। ततः षट्काल(कला)दिशयां(या) शतात्रम् इति प्राच्या वि(वी)चिषु का(क)लाश्च। चतुष्कं प चमाण्यन्तरगतं च कलाचतुष्कं शनिव्रता इति ततो नवकलायां शनिव्रतानि शनिशानि प्राच्यवशिष्टं कलाष्टकमुक्तकं च सन्निपात इति।।**८५**।।

अथ चतुर्योगबालं चाह।

चतुर्था(र्थी)मपा(मा)तिनं(दितः) कृत्वा चतस्रः कण्डिका यदा।
चतुष्कले ति(नि)यु(यो)ज्यते(न्ते) ज्येष्ठमासारितं तु तत्।।

चतस्र एव कण्डिकाश्चतुर्थद्वात्रिंशत्कलाका(क)ण्डिकादित्वेनाश्रित्य षोडश(शा)ष्टादशेत्यनया नुपूर्व्या चतुष्कलातालेन

द्वितीयमद्य(द्विर्भावान्)मद्य(मध्य)मस्यैव ज्येष्ठमित्यभिधीयते। (भ.ना. ३१–६५)

इत्यत्र निरूपितेन प्रयुज्यते। तथा ज्येष्ठस्व व्यत्किते(व्यक्तित्वे)न स आनिवि आव्रनिवि स आनिव इति चच्चत्पुटः। सआनिः सवि आता शआनिढिश सआनिवि इति प चपाण(णिः)। षोडशेति द्वात्रिंशत्कला तुर्या(स्तुर्यायां) कण्डिकायामादौ प्रयुज्यमाना(नः) पातविधिस्ततो पि षोडशकलायां सआताविवश सआनिव इति प्राप्य प चमाण्यवशिष्टं कलाष्टकं शआनिविद्य आतावित्यपरप चपाणिगतं कलाषट्कं प्रयोज्यम्। ततो षट्कलां कण्डिकायामारो(प्य)प्रयुज्यमानायां तस प चपाणिविशिष्टमध्या कताष्टांश(शेन) अन्विता अनिविनितो नवकलायां विशिष्टं कलाषट्कमुक्ते(क्त)क सन्निपातश्च शआताबिव्रआव्र अनिविश एवं मार्गताला(ल)योगः। **आसारितानि(नि) प्रसूयन्त** (भ.ना. ३१–८०) इति यदुक्त तस्य मार्गस्यैककलास्ता(ता)लस्य च शम्यादेर्योन(ग)ज्ञातमङ्गयोगं च विशिष्यते।।**८६**।।

तत्प्रयोजनं तत्स्वरूपं च दर्शयितुमाह।

प्रयोगस्तु यदा त्वेषां पिण्डीबन्धैर्विकल्प्यते।

इत्यादिश्लोकत्रयम्। तत्र **मुखमि**त्यङ्गना(म्)। ता(त)मिति। **उपोहन(नं)मुखमि**त्यादि। स्वरूपमप्रयोगस्थिप्यादि अप्रयोजनं तम्। इदमत्र तत्त्वम्। यद्यपि मुखादीनामाविर्भूतत्वेले(नै)वान(त्र न) कश्चिद्विशेषस्तथापि नत्ते स्त्येव विशेषः। तत्र

तूपयोग(ज)न कृत्वा **तन्त्रीगानसमन्वितमिति** यो विधिरुपायो (य उ)पोहने समूहसंज्ञाया गा(कया)प्यभिनेयपदार्थवत्यार्थगते(:) स खल्वित्यादिवशादिति प्रकटितमुपक्रम उपत्वाद्धि मुखमिव **मुखम्। प्रतिमुख**संज्ञे च चत्पुटे वैशाखस्थानकेनेति यो नर्तकीप्रवेश उक्तः सो पि च विचित्र एवाभिनयोपक्रमः। प्रथमं प चपाणेस्तु शरीरसंज्ञाया प्राधन्याभिनयभूयस्त्वं सर्वथैव तन्मयीभावात्। द्वितीये तु यथा पाणौ संहरणरूपत्वम्। अत्यन्तवत्यभि(न)यतो भिनयन्यूनतापादने नत्तप्राधान्यमिति। तदाह। **प्रयोगस्त्विति**। एषामासारितानां **पिण्डीबन्धे**(न्धैः)र्नत्ताङ्गहारैरुपलक्षितो यः प्रयोग(:) पूर्वोक्तः स यतो हेतोर्विचित्रया **पथक् पथक् कल्प्यते** ततो हेतोः **प्रत्येकमङ्गविन्यास**स्तेषामुच्यत इति शेषः। इति **हे(ही)ति** वर्धमानान्तर्गततया नत्ताश्रयत्वे एतान्यङ्गानि न तु स्वातन्त्र्येण प्रयोगः। तेन तत्रोपोहनाभाव **एवान्ये**। तत्रालि त च श.....त्येव तदर्थ एतदभावाय इति हि वते (उक्ते) **पथक् पथगिति** सर्वं स्वरवाचकीकृतं भवति। अङ्गचतुष्काभिप्रत्यङ्गनर्तकीप्रवेश इत्यादिक्रमो वतिष्ठते। **ताण्डवाध्याये** (भ.ना. अ.४) च स्वतन्त्रासारितेष्वपि प्रयोगो तिदिष्टः। **एवमेतेष्विति गीतेष्वासारितेष्विति** (भ.ना. ४–३०२) ग्रन्थेन **वर्धमानं तथापीति** (भ.ना. ४–१३) चापिर्वैर(रा)सूयाश्रितमपि प्रयोगस्थानत्वेनोक्तमिति। एतच्चात्र विचारयिष्यते युग्प्नइ(मि)ति। च चत्पुटः औज्ञावि....च प चपाणि(:)। ओज(:) शब्दो कारान्ते(न्तो) विषमार्थश्चतुरङ्गतायां च। वस्तुमत्र मयात्यनिविष्टसन्निपातच चत्पुटादिका नीयते(न्ते) कनिष्ठे। अन्ययोस्तु प चास्यादिभूत इति स्वरूपे प्यस्ति विशेषः।।८७-८६।।

एतदुपसंहरति। इत्येवं **चतुरङ्गानीति**। उक्तपूर्वेण प्रयोजनेन प्रत्येकमासारितप्रयोगेष्विव की एकार्तत(किमेकताल)स्ततो योगे(ग)तो कण्डिकाचतुष्कम्। दश तु.....परिवर्तते ते प्रसारितप्रसादा वर्धमानतेति स्पष्टरा(का)यत्वं दर्शितम्।।६०।।

ननु यदि नाम चतुरासारितैर्निर्वहन् न णीयता (र्निर्वहणीयता) वर्धमानता (सा का)र्या कुत इत्याशङ्क्याह। **वर्णतालेति।** सा तत्र दशा येयमासारितानां तदपेक्षया वर्धमानीभावदशायां वर्णादिवद्धियोगः। तथाप्युपयोग(त्वे)न योगान् नत्तवद्धिरिवाभिनयवद्धिः। अक्षराणां नर्तकीनां वद्धियोगश्च। **चतुर्थे ध्याये** दर्शितमे का **तु प्रथमं युज्याद्(योज्या)द्वे** (भ.ना. ४.२८६) इत्यादिना। **वर्धमानकमिति** संज्ञायां कः।।६१।।

एवमियन्त्या(ता) यत् फलं सम्पन्नं तद्दर्शयति। **वर्धमा**सत्त(न) यारीरस्येति। वर्धमाने कण्डिकानां सर्वासामेव चतुरस्रतालयोगेन कदाचित् प्रयोग इति वर्धमानशरीर चतुरस्रमासारितशरीरमत्येव। प चपाणि हि(र्हि) त्रिविकारया कृतोपवस्तु षोडशकलत्वमस्य रूपमित्युक्तम्। प्रागासारितस्येत्येकवचनभूमौ चतुःषष्टिरिति न परमार्थभेद इति दर्शयति। स एव हि निष्क्रामकलया विकलीभवतीत्युक्तमेव। ज्येष्ठासारितमध्ये च सर्वमेतत् स्थितमिति। अतो प्येकवचनम्। एवमासारितस्य वर्धमानस्य देहस्य यो न्योन्यकार्यकारणभावस्तेन वैचित्र्यरूपकल्पना जायते। तथा हि।

वर्धमानदशाप्रभावादासारितं अङ्गचतुःषष्टिरिति न परमार्थभेद इति दर्शयति। स एव हि निष्क्रामकलया वर्धमानदशायाः प्रभावादासारितमङ्गं चतुष्कला(ल)वाङ्कनयोगनत्तं प्रयोगिवैचित्र्यादासारितं भवति। आसारितप्रयोगरहितसन्धानबलाच्च परिवर्तयोर्द्वन्द्वान्तता जायते। अन्यथा कण्डिकचतुष्कलया मात्र(त्रा)रूपमेवेति रसभावनतपरस्परभाव्यभावकभाव--वदत्रापि मन्तव्यम्।।**६२**।।

अन्योन्याश्रयदोषानुभयासिद्धिरित्याश्रयदष्टान्तद्वारेणापवादयति। यथा वक्षो भवेद्बीजादिति। यावन्मात्रानुप्रविशति वक्षमेव बीजमेव स्थितेरेव पूर्वसिद्धमासारितमवेक्ष्य वर्धमानया जायते। वर्धमाने च निरूप्यमाणे पुनरासारितवद्धिर्जायते।।**६३**।।

आसारितात् सन्धा(वर्धमा)नमपि यं(यज्) जनयति सैव। ततीयवद्धेरभावादन्यहेतुकत्त्वमुक्तमिति तदेव दर्शयितुमाह। **योगादेककलामि**त्यादि। एतत् पुनरुक्त(त)योपकारकरूपमिति **केचित्**। युक्तम्। पूर्वं हि वर्धमाना(दा)सारितप्रस(व)तिरुक्ता। **प्रथमां कण्डिकामिति।** (भ.ना. ३१.८१) **ततीया सद्वितीया चेति** (भ.ना. ३१.८५) **चतुर्थीमादितः कृत्वेति** (भ.ना. ३१.८६) च। अनेन त्वासारिता(द्) वर्धमानोत्पत्तिरुच्यते। कथम्। यथा प्रजावता(ती) प्रसूके(ते)ति पुत्रवत् प्रमुच्यते। एवमिहापि।

तदयमर्थः। **कनिष्ठकं कलां च सूते** फले कृतो त.....आह। **योगादेककलामिति। एककला** आधारभूतं(ता) यस्य योगस्य पातपतद्द्वन्द्वसम्बन्धरूपस्य तत्कार्यभूताद्धेतोः।

एतदुक्तं भवति। यदि सप्तदशकलि(क)कनिष्ठासारितं प्रयक्ति(युक्त)तमन(म)भविष्यं(ष्यन्) न च कलाकण्डिकासप्तदशपादयोगलक्षणं(णा) वद्धिना(र्ना) भविष्यद् यदि च लयान्तरम्। यो(लया) न्तरं नाभिसन्धीयेत कण्डिका प्रथमकण्डिका नाना भा(भ)वेदिति प्रथमकण्डिकायां परिवद्धिलक्षणे कथं वद्धिर्भवेदिति। एवमेते(षु) वद्धिरासारिताभ्यां सङ्घातैर्द्विव(श्च) कलावका(वत्का)र्यभूताद्धेतोर्मध्यासूक्तं सफल(म्)। एवं चतुष्कं कलाज्येष्ठम्। इदमत्र(त)त्त्वम्। यद्यत्र मध्यम(मा)सारितस्य प्रयोगे(गो) नाभीष्टो भवे(द्) **द्विकलं योगमाश्रित्य** (भ.ना. अ.३१.८५) यदुक्तं **सततीया द्वितीया च प्रथमा चेति** (भ.ना. अ.३१.८५) द्वितीयाप्रथमयोरेकद्वितीयपराद्विलक्षणः कुतो वद्धिः स्यात्। ज्येष्ठानभिसन्धौ च कथं चतुष्कलं योगमाश्रित्य कथितं **चतुर्थीमादितः कृत्वेति** (भ.ना. ३१.८६)। ततीयाद्वितीयाप्रथमानामेकद्वित्रिपरावद्धिरूपत्वं सत(:) स्यादिति सा वद्धिराभ्यां जाता द्विकलचतुष्कलशब्दवत् सहचारिण्याम(ण्यां व)द्धौ मन्तव्यौ।।**६४**।।

अतो वर्धमानान्तर्भूतानां यद्यपि स तत्र दशाविहित एव वान्तवि(र्वि)धिस्तथाप्यस्ति कश्चिद् विशेष इति दर्शयितुं कनिष्ठासारितस्य तावदाह। च चत्पुटपरिवर्त इति। **च** शब्दो यद्यपीत्यत्रा(स्या)र्थे। तेन यद्यपि **कनिष्ठस्यायमेव कालविधि**स्तथाप्यस्ति कश्चिद्विशेष इति दर्शयितुं कनिष्ठासारितस्य वक्तव्यप्रतिमुखदेहसंहाररूपाङ्गविभागेन नत्तविशेषसिद्धये विदारि(री)विच्छेदस्तत्कालविरामे वर्णाङ्गसमद्धच्युचितस्वापन्यासं(स)योजनं पथक् स(स्वी)कार्यमिति यावत्। तथा चोदाहरणादेवम्। देवैः **संस्तुतनमितिमि**त्येको विच्छेदश्च

च चत्पुट(टे)। **दैत्यैर्यक्षैर्नागैः पितभिः प्रणमितचरणमिति प चपाणौ। त्रैलोक्यहेतुमीशं रुद्रं शरणमहमुपगत** इति **समुद्गके। तन्द्रे** यारि(चा)सारिते नानियम इत्युक्तं भवति।।६५।।

लयान्तरे प्येव(वं) दर्शयति। **अयमेव तालयोग** इति। परिच्छ(च्छि)न्नरूपवद्विरिति यावत्। कस्तर्हि अनयोर्भेद इत्याह। **विशेषसिद्धिरिति। द्विगुणाक्षरसंयोगादित्यत्र** (भ.ना. ३१.८४) श्लोकार्धमेवं संक्षिप्य च। **शब्दाद् भेदो लयाच्चेति।** अस्यापि यः शब्दपातस्तत्कृतो भेदः कनिष्ठे भ्य(ध्य)र्धकलायां शम्यां(म्यायां) लयान्तरे तु कलायामेव। अत्यन्तलयान्तररितं कस्मादित्याह। **लयाच्चेति**। लयकृताद्भेदाल्**लयान्तरित**मित्यर्थः। **एव** कारेणेदमाह। लयान्तर्वशादेव कनिष्ठ दक्षिणप्रयोगाभावो लभ्यते ततो गुणलयस्य मार्गान्तरस्याभावो लयान्तर इव स्यादुभयापत्तेरिति।।६६।।

एवं कनिष्ठस्य स्वतन्त्रभेदमुपदश्यं मध्यमस्यापि दर्शयितुं **उत्तरकाला(न्)** कृत्वा तिस्रः कलाः परित्यजेदिति। (त)मन्तरा द्विकलप चपाणिबहुवचने प्राथम्यात् त्रित्वक(कत्वम)पि नालभेत्(त) इतिवद् द्विकलप चपाणित्रयादाद्याकलात्रयमपास्य त्रयः खण्डाः करणीयाः। ते नवकलो आद्यखण्डो द्वितीयो द्वादश ततीयो पि द्वादश ततच(श्च) चत्पुटो..... निष्ठा(क्रा)मादि सन्निपातान्त एव। आद्या केवलमधिका शम्या मुक्तकसन्निपातकला। अन्रूायविट्वा(द्धा) र(के)वलौ खण्डनिष्क्रामादिसन्निपातान्तावेव। अत एककलद्विकलौ(लो) विधिरनुगहीतो भवति। तत्र निष्क्रामस्याद्यत्वेन दर्शनात् स्वातन्त्र्ये तु शम्यादिनिष्क्रान्तावखण्डौ द्वौ। सन्निपातादिनिष्क्रामादितामन्तकं च(कश्च) सन्निपात इति विशेषतो न सन्निपाताः। अत्र त्रयाच्छेदार्या(र्थात्) सन्निपातादो(दु)च्चभण्डाहे न(देर्न)र्तकीप्रवेशादेरपि भेद इति।।६७।।

अतः स्वातन्त्र्यावस्थातो नव(निय)मान्तर्भूतस्य ज्येष्ठस्य विशेषमाह। **ज्येष्ठा(ष्ठस्य) भवति नियमादादौ सैका चतुष्कला। सा चेति चतुष्कला या मात्रा चतुष्कलरूपा षोडशकलेति** यावत्। स ता (सैका) भवति। सारसंधरेके(संग्रहे)ण न वर्तते। कला चैकपात इत्याहादौ।

एतदुक्तं भवति। आवापादिसन्निपातः षोडशकलारूपो त्र। चतुष्कलच चत्पुटादौ तु शम्या मुक्तककल्पा न्तरवद् द्वौ परिवर्ती चतुष्कलमात्रा(त्रौ) नो(तौ)षोडशकलावै(वेव) कुर्या(त्)। तौ च कृत्वा तयोर्मात्रा अस्याः(स्यां) क्षेपणीयाः सा तु सकला। कथमित्याह। द्वन्द्वेन परिवर्तद्वयेन युक्ता।

एतदुक्तं भवति। **क्षत्(क्षिप)क्षेपे** (प्रेरणे) (पा. धातुपाठः ११२१, १२८६,१६४२) (इ)त्याद्याह। **आदावष्टकला(:) क्षेपा** इति। नो कं वीथी शंकिनि(नी)। एवं तु विंशत्कलः। आवा(पा)द्यादौ सन्निपातौ द्वावन्यौ खण्डादित्युक्तं भवति। स्वतन्त्रेषु तु ज्येष्ठासारिते शम्यादिविक्षेपतश्च चत्पुटखण्डसन्निपाताद्विधिक्षेपान्तौ तु प चमाणिखण्डौ मुक्तकश्च सन्निपात इति विशेषः। पात्रादस्वे(दिष्वि)यता स्यादिति पातै(र)था(थ) कार्यादित्यध्याहार्यम्। अन्यथा कृत्वा तदन्तेन तुल्यकर्तकं स्यादिति। एवमयं ग्रन्थः सर्वथैवापुनरुक्तार्थो

लक्ष्मलक्षणपरिचयवर्जितौ(तैः) पुनरुक्त इत्युपेक्ष्य सङ्ग्रहीकृतः स्मारकीकृतो न च पुनरुक्त(क्ती)कृत इत्यास्तां तावत्। एवं कार्यकरणता च दर्शिता।।६८।।

अधुना कनिष्ठस्या यद्रूप **प्रथमां कण्डिकां कुत(कृत्वा)** (भ.ना. ३१.८१) इत्यनेन दर्शितं तदेव पूर्वपक्षशङ्काशमनद्वारेण स्फुटीकर्तुमाह। **भा(बा)लं त(न)वकलमिति**। तत्रेयं पूर्वपक्षशङ्का। कश्चिद्धि ब्रूयात्। इह चतुरासारितौ बली(बालं)वर्धमानं चतस्रः कण्डिकाश्चैव। वर्धमान एकद्वित्रिचतुर्यामान्तान्यासारितानि।

प्रथमां कण्डिकां कृत्वा बालतालप्रयोजिताम्।
अन्तिमार्धकलाहीनं कुर्यादेव(वं) कनिष्ठकम्।। (भ.ना. ३१.८१)

इत्युक्तम्। तत्र स्पष्टमेव यथासङ्ख्ये(ङ्ख्यमि)ति नाश्रीयते। नवकण्डिकाकनिष्ठमिति सप्तदशपातानां षोडशद्धत्रिम(शार्धहीनं) पातयित्वा म(न)वपातमिह कनिष्ठमुध्य(मूह्य) तामिति। अत्राह। **न तेषां साधु सम्मतमिति**। अत्र हेतुः। **सन्निपाते**ति शब्देन वस्तूच्यते। भूयसा तस्य सन्निपातान्तत्वात्। तेन वस्तुनो विन्यासस्त्रित्वेन कल्पनं तत्र घटते। **अङ्गविन्यास**श्च प्रतिमुखादिरूपो **न घटते**।

ननु किं तेन घटितेनेत्याह। शाश्वतं हि लक्षणं मन्त्रमधमाणीअ(णमत्र वर्धमानमिव) कर्तव्यम्। तत्र चतुर्द्वन्द्वमु(यु)क्तमिति।

ननु कलैका द्वे तिस्रः समुद्गका(ता) इति। क्रियतां विभाग इति। नेत्याह। **पुनश्चैवेति। अङ्गविन्यासो पि पुनः शास्त्रत एव कलानियमेन कृतो** नाम विभागे न स्वेच्छा प्रमाणमिति यावत्।

केचित् घटते तत्र शास्त्रत इति पठन्ति। तेन **बालान्न(लं न)वकलं ए(ये)षां ते (ने)** ह्य(त्य)त्र च्छेदं कृत्वा **ते(ए)षां साधु सम्मतमित्य**भ्युपगम्यते। तदिदमत्र हेतुः। **सन्निपाताङ्गविन्यासो** न घटते। तत्र **शास्त्रत** इति व्याचक्षते।।६६।।

उपोहनं मुखं तेषामिति (भ.ना. ३१.८६) यदुक्तं तदिदानीं वक्तव्यम्। **अङ्गविन्यासो** हि शास्त्रेण चतुर्थः कृत(:)। तत्त्रीण्यन्यानि ज्ञातानि। चतुर्थ तु ज्ञातव्यम्। तदाह। **अथ तत्र मुखं ना(ता)लयति। तालो त्र मुखः**(ख्यः)। षोडशकलं तत्रान्तर्भूतत्वात् तालमुखम्। तत्र ध्रुव एताः शम्यादिविशेषहीनाः। यद्योगे पि च ध्रुवकमार्वेण कृताः।।**१००**।।

तस्य मुखस्य **का(क)लादि** वक्ष्ये। तत्र कलानां प्राधान्यात्ताल एव तावदाह। **ज्येष्ठस्य कला ह्यष्टावि**त्यादि। **अष्टा(ष्टौ) सप्त षट् प चेति**। क्रमेणोपोहनं कलानां ध्रुवनमाने(वानुपाते) सति ज्येष्ठ(स्य) प चषष्टिः क(ष्टिक)ल(ला)स्तच्च कण्डिकाचतुर्षु रूपवर्धमाना शरीरान्तर्गतस्य चैव चा(वा)चासारिता चास्याङ्गविभागो नत्तोपयोगादेव स्वतन्त्र(त्रा)सारितेषु नोपवहनमिति कथयितुं ज्येष्ठात् प्रभत्युपक्रान्तम्। तालमालामात्रासङ्ख्येयाक्षरोपयोगो स्ति।।**१०१**।।

तालप्रथमे(प्रमे)यं गीत्याधारत्वादक्षरेषु च लघुभेदादिति मात्राक्षराश्रयवतगुरुलघुवैचित्र्य–
–माह। **आदावन्ते गुरुणीति**। एतच्चतुर्ष्वपि। **आदौ सिद्धम्। अच**(न्ते) रुद्रः। **मध्ये त्व**क्षराणि कियन्तीत्याह। **बालतः प्रभति।।१०१।।**

अष्टौ द्वादश षोडश विंशतिरिति। तालकलायां चतुर्मात्रो गण इत्यनया स्थित्या मात्र(त्रा)विभागो न्त्ये तु कलाद्वयेनार्धत्वम्। एका कला **डुम्बितीया**। एव(वं) सर्वत्र। अथ दुष्टविशेषे पि हेतवो ब्रह्मप्रोक्ता वर्णा एषां पङ्क्तिक्रमो वक्तव्य इत्यत आह। **आसारितेषु आदावासारणानि युक्तानि।।१०३।।**

तान्यक्षराणि वक्ष्ये। आसारितोपवहनेषु यान्य(नि)कर्तव्यान्यक्षराणि **तानि वक्ष्ये**। कानीत्याह। आसारणे आसमन्तात् स्वररूपविकारो लाघवेन भविष्यति। उप(व)हनं तदर्थं यानि नियुक्तानि। तथा चोक्तम्। उपोह्यन्ते **स्वरा येनेति**।

नन्वेवं भिन्नाकारादिरपि क्रियतामित्याशङ्क्यानादिशास्त्रं बन्धप्रसिध्यवशिष्टाभ्युदये हेत्वर्थं केषाञ्चिदेवेत्याह। **यानि पुरा ब्रह्मणा गीतानि**। ब्रह्मरूपत्वेन च वेदमन्त्रवद्गीतानि। क्रमो पि चैषां नियतो वेत्याशयेनाह। **झण्डं(ण्टुं) जगति यदि शिरि(गिनिगि) झण्डुं(ण्टुं) प्रथमे** कनिष्ठे **लया**न्तरे **चा**पि। इदमेव विशेषं त्वाह। ती(ति)तिकुचवद्ध(द्धं) सम्य(ग)धिकीभूतम्। **मध्ये च लघु(घू)नी**त्युक्तत्वाद्धसि.....न्यनन्तरं सहि(ही)ति सचेति लयान्तरे। तदन्तरं रु(कु)चच्छ(झ)**लेति मध्ये** मध्यमासारिते वद्धं तद(न)न्तरं **तीति कुचेति** ज्येष्ठवद्धं सर्वत्र त्वन्ये कलाद्वये संघटितुमिति।।**१०४**।।

एतदङ्गमुपसंहरति। **इत्यक्षरपतनकलेति। अक्षरेषु पतनं** प्राप्तिर्यासा कलानां तन्निमित्ते गुरुलघुपूरेणोपलक्षिता ये **वर्णा** झण्डु(ण्टु)मादयस्तेषां या स्थितिर्नियतक्रमतया प्रविभक्ता। प्रत्यासारितमन्योन्यरूप उपोहनविनियु(धिरु)क्तो यस्यासारितेषु **मुखसंज्ञेति** सम्बन्धः। न चासारितानां लक्षणं **च चत्पुटपरिवर्ते** (भ.ना. ३१.६५) (र्त इ)त्यादिना कृतं येन पुनरुक्तं स्यादपि तु वर्धमानस्यैव विद्धि(धि)प्रतिपादनमित्थं कृतमिति दर्शयति। **एवमेतदिति। सविस्तारमिति**। वद्धां(विधि)युतमित्यर्थः। वर्धमानस्ये(स्या)यं विधिरुक्तेति(क्त इति) यावत्।।**१०५**।।

नन्वत्र वर्धमानलक्षणस्योपसंहारो यमन्यस्य समाप्तवा(त्वा)त्। अथा त्र पदगतं भेदं दर्शयितुमाह। **चत्वारस्तु गु(ग)णा युग्म** इति। तुर्विशेषद्योतकः यद्यप्यन्यत्र सामगीता(दा)वपवादगतो नियमस्नाबा(स्थाना)नन्दमस्यां सो(स) इत्यक्षरेण बहुतरं व्याप्तम्। तथापि नत्ते अभिनयस्य कर्तव्यतां तस्य च गीत्या च गीत्यर्थे भावित प्रवत्तेरर्थस्य चातिप्रकर्षावगमाभावादत्याधत्तौ च भि(न)त्ययं(लं)कारवैधुर्यापत्तेरयं मध्यमक्रमो हृदयहारी सहा(दा)नुग्राहको नु स(से)व्यन्ते(स्ते)न प्रतिकलं चतुर्मात्रो गु(ग)णः अन्या(न्त्या)यां तु कलायां विश्रान्तियोगात् स(द् गान्)धर्वगुणत्वामासादयति। अस्मान्ते(न्नैव) लघुरिव गुरुत्व(त्वं) छन्दा(न्दो)व्यवस्थाया(:)। तदाह। **द्वितीये प चपाणौ तु सार्धमि(र्धा इ)**ति। षोडे(ढै)वेत्युदाहरणान्निरुक्तन(त्वा)दपोहनवन्नियताक्षरनियम इत्याह तदुदाहरणा(नि)।।**१०६**।।

देवमित्यादि। भगवान् महेश्वर एवात्र स(से)व्यस्तत्परिवारत्वेन तत्प्रवणतयय च देवान्तराणां वर्णनम्। येन पिण्डीबन्धानां **तार्क्ष्यपिण्डी भवेद् विष्णोरि**त्येवमादीनां (भ.ना. ४. २५४) सर्वेषां निवत्तः(त्त)प्रति(ज्ञ)तां च(चा)वान्तरविच्छेद इति तथाविधान्यक्षराणि रचनीयानीत्युदाहरणानीत्य(स्या)भिप्रायः। उदाहरणादेव गणविभागे सिद्धे किं लक्षणेनेति चेद् गुरुलघुनियमो पि वर्णवत्तवत् सम्भाव्येत। व त्वराविष्टः। मात्रागणनयैवेष्टत्वा(त्)। न चोदःहरणादियती प्रतिपत्तिर्भवति। कियति भागे कियत्यो मात्रा इति लक्षणमपि करणीयमेवेति।

ननु मुक्तकसन्निपात आद्ये च चत्पुटखण्डेन तस्य सन्निपातान्यत्वाद् वस्तुत्रयस्य। तत्कथमुक्तं द्वितीये प चपाणौ सार्धाः षडिति (भ.ना. ३१–१०६)। अत्राह तालविभागभेदसिद्धये ग(एता)वदेव चैवमवश्यकर्तव्यम्। अनन्तरं तु गीतनत्तादिवशा(ः)सन्तु वीदरस्ता(न्तु)त्वितराः। (तालविभागस्य चेदमुदाहरणम्। अन्त्या च कला विश्रान्तिनाहरणीयकला प्रकर्षव(त्)सम्भाव्यमानपरिपूरणेनार्धगणेन कर्तव्या इयतीति तात्पर्यमत्र।।**१०७**।।

एवमेककले निरूप्य द्विकले यतिविधिं सोदाहरणमाह। **अष्टावेव गणा** इति। **पूर्वताले** च चत्पुटे। **अर्धत्रयोदश**मेषां ते **गणा** इति बहुव्रीहिगर्भकर्मधारया(त्) त्रयोदशानां गणानां च गणयतः स तथा।।**१०८-११०**।।

अथ चतुष्कलगणलक्षणमुदाहरणं चाह। **कार्याः षोडशेति। वस्तुसंज्ञक** इत्यनेनेदमाह। एष तावत् सर्वत्र विभागकलायां गणो न्यायान्त(न्ता)र्धग इति तत् त्रयोदशत्वाद्वस्तुनश्च सन्निपातान्तत्वात्। आद्ये भागे भ्यधिको यः सन्निपातात् प्रणमत। तद्बलाच्चात्रैवैको गुणः प्रविशति। तेन दैत्यैरित्यन्तम्। च चत्पुटांशमध्यमे विझण्टुमित्यन्त(म्)। ज्येष्ठेति **पथिवी**त्यन्तम्। स्वतन्त्रेष्वासारितेषु यथास्थित एव क्रमः।।**१११-११२**।।

स्वतन्त्रपूर्वकं च पारतन्त्र्यमिति स्वातन्त्रयोरभिप्रायेणेत्वमप्युदाहरणम्। अत्ररमित्यविद्यमानम्.....। **प्रवर**मुत्कृष्टम्।.....तत्। **पथिवी**मित्यादि **व्योमाख्या**मित्यन्ते द्वन्द्वे पि **ज्वलन** इत्यादावलुठः(ग्) ब्रह्मगीतत्वात्। अन्ये त्वसमस्तमेव वदन्ति। **यजमानो व्योमाख्यः कार्यो** यस्येति। **विद्या(निलयं) चन्द्रार्धधरमि**त्यादिना गौरीश्वररूपत्वमस्य। अत एवोक्तं **सपत्नीको वषध्वजः सह देवगणाधिपै**रिति। पूर्वं चोक्तम्।

वर्धमाने प्रयुक्ते तु रुद्रस्तुष्यति सानुगः।

इति। अत एव गणानां स्तुति**र्बहुभिर्विकृतै**रेति। इयमेव चैषां स्तुतिर्यत् परमेश्वरप्रकरणम्(णे) स्तुत्यन्त(न्ते)गणन(गण)प्रकाशनं हि स्तुतिः। अत्र देवैः **सन्तुतनमि(संस्तुतमि)**त्यादौ (भ.ना. ३१.१०७) देवानामपि स्तुतिरेव कृत्या(ता)मन्तव्येति। विकृतैरिति दिगम्बरैरित्यर्थः।।**११३**।।

अस्यैव पदगतं विशेषान्तथं वक्तुमुपक्रमते। **आसारितानामिति**। न केवलं वर्धमानान्तर्भाव इदं त्रैविध्यं किन्तु स्वतन्त्रे पीत्युक्तं **सर्वेषाम**पीति।।**११४**।।

तालच्छेदादित्यादि। इह(हा)निवत्तिरावत्तिरुच्यते। सा च पदैकदेशस्य पदस्य तत्समुदायस्य वा। सर्वथा यत्र सा नास्ति तद् (त्र)गीताक्षराणां नातिक्रमणवर्तमानत्वाद् यथाक्षरम्। **तदा निवत्तौ(त्ताक्षर)पदमिति। अक्षरं** द्वे त्रीणि। एवं पदातनिवत्तमावत्तिशून्यस्य। अत एव स(म)वर्णगणैर्हृतम्। गणाश्चतुर्मात्रास्ते सर्वे समवर्णाः। सम(मा)स्तुल्यास्थाल्या(य्या)दिवर्णा येषु। तुल्यं(ल्यत्वं)तस्य सदशाक्षरत्वात्।

नन्वेतन्न ज्ञायते कियति तालभागे कियदक्षरयोजनमित्याह। **तालच्छेदाद् द्विगुणितैरिति। ताल**श्च चत्पुटादि(:) तस्य छेदो भागो गुरुलघुप्लुतादि(:) तमु(म)पेक्ष्य **द्विगुणितानि** यान्यक्षराणि तैरुपलक्षिता ये गणाः।

एतदुक्तं भवति। वदन्ति या(यो) गुरु(:)स्तो(सो)त्र गुरुद्वयम्। एवं द्वितीये ए(रे)कार(रे) लघुद्वयं गकारे प्लुतद्वयम्। एवं प चपाणौ वाच्यम्। एवं तालभागद्विगुणितवर्णोपलक्षितैर्गु(ग)णैर्ह(र्ह्)तमिति वाहीति(द्विर्ह्रतं) स्वरूपं **यथाक्षरमिति** तात्पर्यम्।।**११५**।।

अथ **द्विसंख्याने(तं) लक्ष्यते। नि(व)त्या यत् समायुक्तं तद् द्विसंख्याता(तम्)। निवत्तिद्वयसंयुक्तमिति। निवत्ति**रावत्तिः। तया युक्तं **द्विसंख्यात(म्)**। तवा(द्द्वा)भ्यां त्रिसंख्यातम्।।**११६**।।

ननु **तालच्छेदाननुगुणै**रित्युक्ते गुरुद्वयं लघुनी प्लुतद्वयमिति प्राप्तम्। तच्चैतन्न दश्यत इत्यत **आह। चतुष्कादाविति। चत्वारस्तु गुणा** इति (भ.ना. ३१.१०६) चतुष्कमधिग्रहः। ओजे षडष्टावेव गणा इत्यादि च। तत्र चतुष्कादौ ये गणा उक्तास्ते **चतुर्मात्राः कार्याः।** न तु गुरुलघुनियमो त्र। तदाह। **यथोक्तेति**। उक्तेन विवक्षा वक्ष्यते। यथाभीष्टगुरुलघुभावा इति यावत्। तच्च **यथायोगं** च चत्पुटादिताले योज्यम्।।**११७**।।

यथायोगमित्युक्तं तन्मार्गत्रये पि स्फुटीकर्तुमाह। **अक्षरै**रित्यादि। **अक्षरैर्या चतुर्मात्रा द्विमात्रा वर्णतस्तु सा। चित्रे कलेति** छेद उच्यते। **तेनाक्षरैर्मात्रा**चतुष्कोपलक्षितो योगो भवति। स एव गीतात्मकवर्णमवेक्ष्य द्विमात्रो भागो भवति। चतुर्मात्राक्षरांशे दशलघ्वक्षरपरिमाणगुरुवाह्यस्तदर्धरूपो लघुस्तदर्धे षण्मात्रात्मके तु भागे प्लुत इति यावत्। चतुर्मात्र एवं त्वक्षरभागे विंशतिलघुपरिमाणो गुरुभाग एव लघ्वादिषु। **यथायोगमिति** वार्तिके चतुर्मात्रे चत्वारिंशल्लघुमिति(त)तालगुरुसार्धप्लुतमित्येवं सर्वत्र तदाह। **वत्तौ सा द्विगुणेति।** साक्षा(क्षर)योगाक्षिके(प्त)चतुर्मात्राकालवत्तौ तालकला चित्रापेक्षया **द्विगुणा(णां)**बिभर्तीत्यर्थः।।**११८**।।

या च सा चतुर्मात्रकलावत्तौ वर्णमात्राभिरुपलाक्षिता कृता सैव वार्तिकापेक्षया द्विगुणां कलां दक्षिणां बिभर्ति। तदाह।

वत्तौ यावद्(या) वर्णमात्राभिश्चतुर्मात्रा प्रकीर्तिता।
द्विगुणा दक्षिणे सा तु।। इति।।**११९**।।

तदेव स्थिरीकरोति। **न मार्गभेदो क्षरेषु कश्चिदपि** इति। मार्गेषु सर्वेषु च तावन्त्येवाक्षराणीति यावत्।

ननु तावत्स्वेवाक्षरेषु कथं प्रतिमार्ग कालभेद इत्याह। **वर्णमात्राद्विगुणनाद्वर्णभेद** इति। **वर्णाक्षरस्य भेद** इत्यादेः। **मात्रा**स्वरूपा ये कारादिकाः। तस्या **द्विगुणनात्। वर्ण**स्येति। गीते भेदो मार्गवैचित्र्यमिति यावत्। स तेन दैवेदिति चिते(त्रे) ए एति वत्ते(त्तौ)देएएएएएएए इति दक्षिणेः।।**१२०**।।

तदुपसंहरति। **यथाक्षरेषु भूयिष्ठमिति**। बाहुल्येनायं **विधिः**। अन्यथा पि कश्चिदस्तु मध्यमस्तावदयं प्रकार इति भावः। एतच्चोक्तं प्राक्।।**१२१**।।

एवं यथाक्षरस्य परीक्षां कृत्वा द्विसंख्यातत्रिसंख्यातयोस्तामाह।

द्विसंख्याते निवत्तिस्तु कार्या यस्यार्धयोगतः।
द्विसंख्यातार्धयोगेन त्रिसंख्याते पि चेष्यते।।

इति। आद्यस्य यथाक्षरस्यार्धयोगे **द्विसंख्याते निवत्तिरा**वत्तिः। **तस्यार्धयोगेन त्रिसंख्यातेन(पि)। देवं देवैः संस्तुतमिति** (भ.ना. ३१.१०३) यथाक्षरे चतस्रः कलाः। द्विसंख्याते **देवमेका** कला **देवं देवै**रिति द्वितीया **सप्लुते** ततीया **संस्तुतमिति** चतुर्थी। एवं यावता चतस्रः कलास्तावतैव वर्ध(मान)योगः। यदा तु देवं देवैः **संस्तुतनतमितमित्यनेतैककलापाते यावता द्विसंख्या द्वे कले तदा त्रिसंख्यापातं** द्वे संख्याने त्रीणि च त्रयस्तथा।।**१२२**।।

कियन्त्यक्षराणि तालकलायामित्याशङ्क्याह। **न चित्रे द्वित्रिसंख्यातमिति। चित्रमार्गे यथाक्षरमिति। वार्तिके** तु यथाक्षरं **द्विसंख्यातम्(म)** त्र। तत्र तु **त्रिसंख्यातं न** मा(भा)ति। **दक्षिणे** तु वयमपि तदा तत् **त्रिसंख्यातं दक्षिणे स्यादिति।।१२३-१२४।।**

तत्र त्रिसंख्यातस्य स्वरूपं स्फुटयति। **दक्षिणेनैवेति**। दक्षिणमार्गोचितं देव इत्यस्य शब्दस्य वर्णप्रकर्षं कृत्वा वत्तौ(त्तिः) कर्तव्या। तस्यैव देव इति शब्दस्य ततो र्धप्रकर्ष कुर्यात्। तदाह। **वत्तिवत्** पुनरावत्तौ च।।**१२५**।।

ततो प्यर्धप्रकर्षस्तदाह। **चित्रवच्चेति। अनेनैव विधानेनेति। यथान्यायमिति।** तेनैवात्रैक एवातिदेशः। वार्तिकेनैव गत्यादो निवत्तौ **चित्रवद्** भ(व्र)जेदिति वार्तिके। **दक्षिणेनैव गन्धा(त्या)दौ निवत्तौ वत्तिवदिति दक्षिणे। केचिद्** ध्रुवकमार्गापेक्षया चतुस्संख्यातमपीच्छन्ति। तत्तु **मुनिना** देहावतमार्गत्रयस्यैव बाहुल्येन प्रयोज्यत्वात् तेन **देव** इति देवैरिति देवं देवैरिति **देवं देवैः संस्तुतनमितमिति** त्रिसंख्यातम्।।**१२६**।।

ननु चित्रे तावता द्विसंख्यातं नास्ति। यत्र स्व(त्व)स्ति तत्र निवत्ताश्रयरूपम्। निवत्तिश्च तस्मिन् स्थाने कार्येति निरूपयति। वत्तौ **वा दक्षिणे चेति**। प्रयोगस्य गीतकासारितादेर्यद्वस्तु **तस्यादौ मध्ये प्यन्ते वा निवत्तयः** कर्तव्याः।।**१२७**।।

अङ्गानां विवधादीनां **बलाबलं विचार्यम्**। विदारीवशाद्धि निवत्तयो भवन्तीति यत्र विविधो विशेषत उपदिष्टस्तत्र सामुद्गसिद्धयै आदावन्ते चावश्यं निवत्तिः। तत्र निवत्ताश्रयं

(तद्रूप निवत्तिश्च कस्मिंस्थाने कार्येति निरूपयति। (व)) **उपवर्तने** मध्यनिवत्तिरिति। अथात्रोपदेशान्तरमाह। **निवत्तौ तु** कला न्यूनेति। **निवत्ता**विनिवत्तौ च चतुर्थः। अस्य प्रयोगस्यालङ्कारादेर्वा सामर्थ्यात् यदा चतुर्मात्रा भवन्ति तदा न्यूनभाग एव कालप्रकर्षवर्णस्वरो निवत्तिमानावर्तमानः कयो(र्यो) वतील(शिष्ट)कलायां पूर्णता वर्णव्यवस्था (का)र्या (य)दि का(त)स्य निवत्तिस्तत्रैव। न्यूनो(ना)व्यङ्गे वस्थानात्मनि वत्तिर्निर्नावा(मा) निवत्तिः। तामेव न्यूनां कलामाश्रित्य कलामाश्रित्य यत् कला(लो)नताल कलपूरणं तद्द्वाप्यवर्णस्याय्यादिनिवत्तिमान् परिसपाप्ति(प्तः) कर्तव्य इति। तद्यथा च चत्पुटे **दाहिपवणांदोळइआ (दक्षिणपवनान्दोलिता)** इत्यत्र योगाल्ल(घुः) इत्यनेन सहितः (तं)प्लुतः (तं)पूरयति। तुल्याथ्रे अनिवत्तिमपि समुच्चिनोति।

ननु यथाक्षरे पाठे सौकर्यम्। अर्थावबोधसौकर्यं च द्विसंख्यातात्। घौ(घा)तुको गुण उक्त एव दोषा न्य(अ)त इत्याशङ्क्याह। **वर्ण्यो(र्णा)लङ्कारसौभाग्यमिति। गीति**शोभाकरणस्य तदनुसारिणस्तन्त्रीपाठ्यादेर्विच्छित्तिवि(र्वि)चित्राच्छेदास्त्वतो सानुगतानां चोत्कृ(ष्ट)लक्षणानां प्रकृष्टयोजना**निवत्तीनां** द्वित्रिस(त्रेष्व)न्तग(र्ग)तानां **प्रयोजनं** यथाक्षरे हि वैचित्र्यान्तरं न किंचिद् ग(गी)तवाद्ययोरिति।

ननु पादयोजनया किमत्र प्रयोजनमित्याशङ्क्याह। **वर्णतालाक्षरन्तु(राणां तु) संयोगो यमिति। वर्णः** स्थाय्यादिः। **अक्षराणि** पदानीति। **संयोग** इति सम्यग् योजना। स्वरतालपदात्मकं गान्धर्वमिति। प्रागुक्तमिति भावः।।**१२८-१३०**।।

गीतेष्विति संयोगादुक्तम्। **वर्धमानेष्विति** बहुवचनम्। यथाक्षरं द्विसंख्या(ता)पेक्षया। तथाहि। चित्रे यथाक्षरं वर्तते। द्विसंख्यातं तच्च दक्षिणे। त्रीण्यधीति षोढा वर्धमानम्। एवमासारितस्य वर्धमानान्तर्भूतस्य स्वरूपं वर्धमानशरीरमेव तु वाच्यम्। कि च वर्धमानपदासारितान्यासारितेभ्यो पि वर्धमानोत्पत्तिर्व्याख्येया। तत्र ज्येष्ठा वर्धमानशरीरमन्वेति। तद्द्वारेणेतरेभ्यः। ज्येष्ठान्या(स्वा)सारितानामनुप्रवेशात्। तत्र कीदश्यो ज्येष्ठस्य खण्डनया तज् ज्ञायत इति वाच्यम्।

ननूक्तं चतस्रः कण्डिकाश्चैवेति (भ.ना. ३१.७६)। सत्यं तनु(त्तु)ध्रुवके हि कलादिभिश्चेत्याद्या न च काले.....द्या चतुर्भिर्न प्रायमेवोक्तमिति प्रस्फुरयितुं ग्रन्थान्तरं वर्धमानान्त(नं तु) विज्ञेय चतस्र इत्यादि। चतुर्धावतः खण्डनमतश्**चतस्रः ख(क)ण्डिकाः।।१३१।।**

तत्र दशपरिवर्ते आद्यायाश्चतुराधत्तिरिति सा **विशाला**। द्वितीया ततः प्रभति संगते रूपक्रमात् संगमे वात्र लयान्तरनिवत्तेः **संगता**। विततिं हाहाभावात् ससमद्धिकला उपक्रम्यते हि कला–तालप्रमाणं च मध्यमासारित(त)स्ततीया न.....सा **सुनन्दा**। चतुर्दशपरिवर्तप्रमुख एवास्त्विति **सुमुखी**। तासां चासारित(व)देवो(पो)हना। **प च षट् सप्ताष्टौ** कलाक्षराणि त्वत्रान्यानि। तदाह। **उपोहनं विशालाया** इत्यादि वाक्यम्। नाकं वा

गुरुत्रयमाद्यम्। झण्टुं अन्त्यं वा। **गुरुसंयुते(त)** इति **गुरुणी(रूणि)** च। एतान्येव गुरुणी(रूणि)।।**१३२-१३७**।।

नन्द(तत्र) किमर्थमुपोहनं कस्मान्नो वचनमुच्यत इत्याशङ्क्याह। **उपोह्यन्ते स्वरा येनेति।** गात्रवीणायां येन वा का(क)रणमात्रेण स्वरा **उपोह्यन्ते भाविनी**त्युपारम्भिण ऊहविषयाः क्रियन्ते ऊह्यन्ते च धार्यन्ते उत **तदुपोहनमु**पवहनइ(मि)त्यापि दश्यते। व्यवहारा ये त्र च। दारव्यां वीणायां **गीतं प्रवर्तते।** तस्माद् व्यक्तवाक्करणानुकाररूपे गीतप्रतिपत्तिः।

ननु व्यक्तार्थरुद्रादिपदद्वारेणैवेत्येवं गात्रदारुवीणागतं यद्वाक्करणमात्रं **तदेवोपोहनम्**। तच्च हरेति ष्ट(ह)काराद्यन्यतमा व्यक्तार्थवर्णयोजनाय प्रक्रम्ये(मे) प्राप्ते भ्युदयसिद्धौ न यतते। झण्डु(ण्टु)मादिभिर्योज्यते। न तु ताद्येव। तदाह। **शुष्काक्षरसमन्वितम्।।१३८।।**

एवं गात्रदारुवीणाभिप्रायेण सप्रयोजनं निर्वचनमुक्त्वा ग्रन्थ(थ्य)मानं नत्यमाश्रित्याह। **अथै(थ)वोपोह्यते यस्मात् प्रयोगः सूचनामिति(दिभिः)**। सार्थवेदविषयो यम्। प्रयोगमश्रित्यैवेत्यादिसूचनाभिनयेन शुष्काक्षरगाने भाण्डसहिते यदुक्तं

ये पि चान्तरमार्गाः स्युस्तन्त्रीवाक्करणैः स्मताः।
तेषु सूचा(ची) प्रयोक्तव्या भाण्डेन सह ताण्डवम्(वे)।। (भ.ना. ४–३१८)

इति। **तेनोपोह्यते** प्रयोगसूचनाभिनयद्वारेण सूचि(च्य)ते **यत्र तदुपोहनम्।।१३६।।**

अथवा विधिमाह। **शम्य(म्या)तालाविति।** द्विरित्युक्ते **भ्यस्ता**त्वि(त्रि)कयुक्ते पि प्रत्येकं स्यादिति। ससता इति स्यात् तदर्थमाह। **अभ्यस्तौ** समुदितौ। द्वित्रिकाल उद्भट्ट**तालादि**र्युक्त(क्तश्)च चत्पुटः। **तथैव चेति**। न विशालायां शम्यादिच चत्पुटगतगुरु––लघ्वादिविभागः। अत्र तु तद्गतो गुरुलघुप्लुतविभागो न स्वरगुरुप्रस्तारं कलासप्तकमिति यावत् तदयं प्रस्तारः। शंतंशंताशंनिशिताश निशनिताशप्रश। अथ विप्रयोगमाह। न द्विरभ्यस्त इति सूच(यन्) नत्यप्रयोगभेदद्वारा वत्ति(:)। अतालसतालभेदादित्यन्ये। कथं खण्डी(कण्डिका) कार्येत्याह। **आनुपूर्व्येति**। न त्वासारितसम्पाद इव व्युत्क्रमेणेति।।**१४०-१४३**।।

तत्र गुरुकण्डिकारूपत्वे योग्यतापरं वर्धमानशब्दवाच्ये तालविधिमाह–

शम्या तालो पुनः शम्या ततस्तालो यथाक्रमम्।
त्रिकलः सन्निपातश्च।

इति इसनितानि इसताप्रनि इस इति तापनकलायां प्रस्तारः। यथाह।

मध्यमासारितान्यस्य वस्तुनो यदुदाहृतः।

इति। अक्षरार्थस्तु इह कलादिकद्विकलयुग्मता दश्यते। तत्र सिस्र इदि प्रस्तारे प्राप्ते आह। **प्रकीर्तित(:)**। प्रस्तारस्य प्रवेशश्च कीर्ति(तः)। प्राधान्यमादित्वं प्रतीति। तत्राष्टासु कलासु नत्तापवादौ शम्यतालौ किमविच्छेदेनेत्याह। **पुनरिति**। विच्छेदः पुनरर्थस्य दर्शनम्। ततेह(त इह) कण्ठोक्तशम्यातालान्तरबाधितेन विच्छेदो लक्ष्यते। तेन विच्छिन्नौ तावित्यर्थः। ते

सनिता पुनरस्ति काकाक्षिवत्तेन प्रनिशम्। एवमर्थं केचिदक्षरारूढं कर्तुमशक्ताः प्रकरणादिबलादमुमेवार्थमाहुः।।**१४४**।।

च चत्पुटश्च द्विकलः सङ्गत(ताया) इति। **चतुष्कलः सुनन्दी(न्दा)यः(याः) स एवेति**। च चत्पुट एवेत्यर्थः। आनिविश आनिवित आसविव आनिविशं सन्त चतुष्कलत्वात्मकसा(स)मद्धियोगः। **टुनदि समद्धाविति** (पा.धा. ५७) हि स्मतः। इयमेव द्विगणिकमुख्यारोपमत एव द्वौ सन्निपातौ भवतः।।**१४५**।।

षोडशकले तावद् द्वे मात्रे सम्पद्येते। तदाह–

सनिपातद्वयोपेतो द्विमात्रस्तु प्रयोक्तभिः।
कार्यश्चतुष्कलो युग्मः समुख्य(सुमुख्या)श्च।

इति। किमिति द्वि(:) सुनन्दा इति। सुमुखीति सन्देहप्रयोगस्य प्रागुपक्रान्तखण्डिकात्मन उपोहनस्य च भेदादपसार्यते तदा **प्रयोक्तभिरिति।।१४६।।**

एतदुपसंहरति। यथाक्रमं

वर्धमानस्य तालो यं कण्डिकानां पथक् पथक्।
मया प्रोक्तः।

इति। **वर्धमानस्य** वद्धियोगस्य प चषष्टिकलस्य याः कण्डिका भागास्तेषां **पथक् पथगेवायं ताल**विधि**रुक्तो** न चैक(त्र) स कदाचिदेताः प्रयोगार्हा इति। **यथाक्रम**मिति क्रमेण चतुष्टयप्रयोग इत्यर्थः। तत्र प चषष्टिकलत्वाज्ज्येष्ठासारितावदवभाति। अत्र तदनु प्रविष्टानि चासारितान्तराणि तन्नात्तरीयकानि च भवन्ति। एवमासारितचतुष्टयोचितकलासंख्ये चोभये चाहतचतुष्के प्रयुज्यमाने स्फुट एव तन्निरासः। एवं कण्डिकारूपं वर्धमानमासारिताभासवर्धमानं चोक्तम्। अथ वर्धमानासारितस्य स्वरूपं वक्तुमुपक्रमते। **पुनश्चैव संहतानामिति।** संहतविषयः पूर्वविधिरुक्तः। **प्रथमां कण्डिकां कृत्वा** (भ.ना. ३१.८१)। .....**द्वितीयां कण्डिकां** कृत्वेत्यादिना (भ.ना. ३२.८२)। अधुना पि तद्विषयो पीति **पुन**र्ग्रहणम्। न च पौनरुक्त्यमात्रमाशङ्क्यम्। अनवगतपूर्वं इहात्रार्थो यथोच्यते तदाह। **निबोधतेति।।१४७।।**

संहतत्वे चान्योन्यापेक्षवत्तित्वे दशपरिवर्तयोगे इहोच्यत इत्याशयेनाह। **पूर्वं विशाला कर्तव्येति**। तस्यां च प चकलोपोहनयोग(गो)क्तनिष्ठासारितधीस्तावयुङ्क(दङ्कु)रीभवति। तदनन्तरं न केवले पि प्रयोगकलायां कलाद्वयं पिण्डीकृतनून(तनू)मयं कनिष्ठासारितप्रयोग इति धीर्भवति। दढरूढप्राच्यप्रत्ययप्रभावानुवर्तिनि हि दढ उत्तरप्रत्यये प्रसारितधीनाशकबाधाविशेषो दश्यते। इह पुनः संवर्ती तद्रूपोपरिगतस्तद्विशेषो दश्यते बुद्धौ। अत **एव** वक्ष्यते। **बालं नवकलं ज्ञेयमिति** (भ.ना. ३१.१५५)। एवं षट् परिवर्तास्ततो पि सङ्गता। **तद(न)न्तरं** किमित्याह। **सङ्गताया ग्रहं कृत्वेति**। आदौ गह्यमाणत्वाद्ग्रहः उपोहनम्। तेन षट्कलमुपोहनं कृत्वा **तदनन्तरं सङ्गता** प्रयोज्या।

तत्समनन्तरमेव च **विशालेति**। लयान्तरमेतत् क्रियापा(सा)र्वकाल्यमात्रे प्रतीयते। न तु समनन्तर्य(र)मिति तदनन्तर्य(र)मित्युक्तम्।।**१४८**।।

ननूक्त एवायं परिवर्तविधिरित्याशङ्क्याह।

कनिष्ठासारिते ताले(लो) यो मया परिकीर्तितः।
स सर्व एव कर्तव्यः प्रथमे कण्डिकाद्वये।।

इति। कनिष्ठासारितितालः कण्डिकाद्वयतालविषयस्तदवबन्धस्तद्रूपत्वं प्राप्तः कर्तव्यः। तेन सङ्गताविशालातालकृत्ये न्यया(नेन) चायं(चेदं) लयान्तरम्। अत एव वर्धमानरूपाङ्कुरितत्वाद्वर्धमानासारितमिदमुच्यते। **कण्डिकाद्वय**शब्देन **त**ज्जातस्तालः। अन्ये(ने)न **प्रथमे कण्डिकाद्वये यो मया ताल उक्तः स सर्व(:)** कनिष्ठासारिते कार्य इति योजयति।।**१४९**।।

एवं त्रयः परिवर्ता उक्तास्ततो पि

सुनन्दा सङ्गता चैव विशाला च यथोदिता।

इति षोडशाष्टौ नवेति यावत्। क्रममात्रनेतदुक्तमित्यत्र प्रयोगमाह। **सुनन्दाया ग्रहमिति**। सप्तकलमुपोहनं कृत्वैवं तूक्तक्रमं यत्र का(कु)र्यादिति।।**२५०**।।

अत्र.....तालविधिमाह। **मध्यमासारित** इति। **मध्यमासारिते यस्तालः सो स्य सुनन्दाद्यत्रयस्य** सम्बन्धिनस्तदधितिष्ठतस्तदाक्रान्तस्तालः कार्य इति। शम्यादिरत्र स्थानीयः सम्पद्यते। यदि वा **ताल** इति तत्स्थानभूतकलास्वस्याधारो भवति। यदि वा ज्स्य(य)त्र यत्र **ताल** उक्तस्तेषु मध्यमः कार्य इति।।**१५१**।।

एवं षट् परिवर्तास्ततस्तु **सुमुखी** चेत्यादि। **प्रथमेति**। विशालाक्रममुक्त्वा प्रयोगमाह। **सुमुख्या**स्त्विति। **ग्रहः** उपोहनमष्टकलं कृत्वा चतस्रः प्रयोज्यन्ते। ज्येष्ठासारितं निष्पाद्यते। उचितोपवहनसिद्धय एव चेत्थं क्रम उक्तो प्युपोहने तु कर्तव्ये सुमुख्या आदिभावो यस्मादेव येन षष्ट्यष्टसंख्यापूरणं त्वन्यथापि सम्भवत्येव। एवं पूर्वत्रापि मन्तव्यम्।।**१५२**।।

अत्र तालमाह। **ज्येष्ठासारितेक** इति। ज्येष्ठतालस्य(श्च) तिसणां सम्बन्धीत्ययत्नः कायो(र्यः)। यद्वा **चतसणां तस्ताल** उक्तः **स ज्येष्ठासारितके** कार्य इति प्रागु(ग्व)द्योजना।।**१५३**।।

अत एवाह। **संयोगे कण्डिकानां तु तालो यमिति। तु**रवधारणे। आसारितात्मनि **संयोगे** योजनाविशेषाधीने प्रयोगे **कण्डिकानामेव** सम्बन्धी **ताल** उक्त इति दश परिवर्तः। आद्ये कनिष्ठमत एव रूपान्तरेणासारितात्मना परिवत्तिसहिष्णु(व)त् प्रथमे परिवत्तिव्यवहारः। न तु केवलमावत्तिबलोचितव्यपदेशद्वितीयादिपरिवत्तिसाहचर्यमात्रादेवैकत्वाभ्यावत्तिकृतसकृतच्छब्द –व्यवहारवद् द्वयोर्लयान्तरम्। त्रिषु मध्यमं चतुर्षुज्येष्ठमिति विभागः। ततो पि समुदिता वर्धमानोत्पत्तिरित्याह। **एवमासामिति। एवमिति** दशसु। **आसामिति** कण्डिकानाम्। प्रधानमत्र तत्तालयोगः। सर्वत आसमन्ताद् योजनया दशरूपिपरिवर्तरूपाया वर्धमानं चतुर्विंशत्युत्तरकलाशतात्मकमित्यर्थः।।**१५४**।।

दशसु परिवर्तेष्वासारितविभागं स्फुटयति। **बालं नवकलमिति। नवकले** प्रयोगे सम्पिण्डिततद्रूपप्रतिपत्तिरूपोपोहनयोगाद्भूताद् भविष्यतश्च प्रयोगौचित्यादित्येतदाह **ज्ञेयमि**त्यनेन। तदनन्तरप्रयोगोपस्कारादेव सप्तदशकलयानान्तरं क चक(कण्डिका)रूपं ज्ञेयमित्यत्रापि प्रयोज्यम्। अन्यथा पूर्वानपेक्षायां कनिष्ठमेव स्यात्। **मध्यमं तु त्रयस्त्रिंशत्।** परिवर्तत्रयेणेत्यर्थः। **तु**र्विशेषं द्योतयति। पूर्ववदपेक्षा स्तीति। **प चषष्टिस्तथोत्तरमु।** ज्येष्ठं परिवर्तचतुष्केणेत्यर्थः। **तथे**त्यपेक्षाविरहो त्र मध्यमादेव।।**१५५**।।

ननु कण्डिकाचतुष्कमात्रमेव वर्धमानमस्तु। किमनेन परिवर्तक्रमेणेत्याशङ्क्याह। **कलानां वद्धिमासाद्य त्विति**। तालस्वरूपविशेषो वर्धमानं तालस्य च कलात्मकमिति तद्वद्धचैव मुख्यं वर्धमानत्वम्। तद्रूपान्तरमाह सहिष्णुत्वमात्रादेव। सा चेत्थं प्रदर्शितेन यथा भवति। चतुर्विंशत्युत्तरशतरूपतापत्तेः। तद्वद्धेरेव च प्राधान्यम्। क्रियादर्शितसामान्येति तदायत्ता चाक्षराणां पदवाक्योभयात्मनां वद्धिः। तद्वद्धौ यस्य वद्धिरिति तद्वद्धिरिति।।**१५६**।।

नन्वासारितेषु पदविधिरुक्तः। **चत्वारस्तु गुणा** इति (भ.ना. ३१.१०६)। अत आसारितवर्धमानाद्वि(वि)भागे कण्डिका न लभ्यतां नाम। पदविधिकण्डिकाप्राधान्ये तु कथमसावित्याशङ्क्य पदविधेर्व्यापकं लक्षणमाह। **आसारितेष्वपि**। सर्वत्र बहुवचनम्। उक्तवक्ष्यमाणभेदात् **तालयोगेन द्विगुणाक्षरविधि**स्तेन। तालमात्रायाः पदमात्रे द्वे। तालमात्राद्वयोर्न(न)रूपोच(पश्च)तुर्मात्रो गणः। अक्षरग्रहणं समर्थानर्थकसर्वसंग्रहार्थम्।।**१५७**।।

अत्रापवादमाह। **समापा(प्ता)वन्तरचित** इति। तालकलायां चतुर्मात्रो **गण**स्तावादिति सर्वस्योत्सर्व(र्ग)स्तस्याहं(यं)विशेषो पवादः। **अन्त्य(न्त्या) असम**स्तस्य गीतकासारितवर्धमानपाणिकाकण्डिकादेर्गेयस्य या परिसमाप्तिस्तत्काले कला **सा द्विमात्रे(त्रा)त्विति** द्विमात्रैवेति चेत्येवमादिरूपपदगते(ति)र्यस्यां सा तादशी **ज्ञेया। तु**श्चार्थे। **यो सावन्तरचित इत्यन्ते** मध्ये चित्तः.....दितः **सन्निपातः**। तद्यथा। आसारिते प्रथमार्धप चपाणावाद्यस्य यदा समाप्ता भवेत् मुख्याङ्गविभागपरिकल्पने तदा चासा..... सन्निपातकलान्तरसमाप्तगताविमात्र इव भवति। अपरथा विभक्ताङ्गस्य विभक्ताङ्गविशेषो दुरुपलक्ष एव स्यात्। **मुनिना** तूदाहरणं **देवं देवै**रित्यादि (भ.ना. ३१.१०७) यदुक्तं तदविभक्ताङ्गमाङ्गमाद्यम्। अन्त्य(न्त्या)कला द्विमात्रेतीयता सिद्धेः शिष्टश्लोकभागो व्यर्थ एवेत्यलमनेन। **प्रयोक्तभिरिति**। प्रयोगविश्रान्त्या यासविदलीभावे सति शेषप्रयोगसौकर्यमिति भावः।।**१५८**।।

एवमेतदिति। अपौनरुक्त्यमाह। **एवमिति** पूर्वोक्तेन प्रकरणेन **वर्धमानस्य लक्षणं** विच्छित्यन्तरेणेति यावत्। अथेदानीं ध्रुवकासारितलक्षणं वक्तुं ध्रुवकस्य सकलमार्गभूतस्य स्वरूपे तालतत्त्वमार्गान्तरस्वरूपं च सुज्ञातं भवति। किन्तु तथा सारितरूपेण साकं वर्धमानस्य कार्यकारणभावाधाराधेयताभिज्ञातेयं वर्धमानस्य ध्रुवकमार्गस्याधारात्। उक्तं हि प्राक्।

वत्तिदक्षिणचित्रेषु मार्गेषु विनियोजितम्। (भ.ना. ३१.७५)

अत आधेयभावाद् वर्धमानलक्षणमुपसंहृत्य ध्रुवकासारितलक्षणमासूत्रयति। **आसारितानामिति**। वत्स्वादयो वत्तौ भावप्रधानाः। **आसारितानां** ध्रुवकलापातानां ज्ञापकं ध्रुवकमार्गस्य **लक्षणं वक्ष्यामी**ति। नित्यसापेक्षत्वादसमासः। तच्च **लक्षणं विस्तरं** कृत्वा **वक्ष्यामि**। प्रतिपदं शम्यादिपाते निष्क्रामावापादिनाङ्गुलिविभागस्तु विस्तीर्णता। अत्रैव सकलं निरूपितम्।.....त्याशयेनासारितानां न वर्धमानबहिर्गीतानां **ताण्डवाध्याये**। (भ.ना. ४१.४) प्रदर्शितः प्रयोगविधिरित्यतिदेशेन–

एवं प्रयोगः कर्तव्यो(एवमेषविधिः कार्यो) गीतेष्वासारितेषु च (तेष्वपि) (भ.ना.४.३६२) इति। तेना यं ध्रुवासारितविधिः स्वतन्त्रो प्युपदेश्य एव। सकलमार्गमूलभूतरवा(स्य) चा स्याभिधानार्हता।।**१५६**।।

तत एव न्यूनाधिकतालकलाप्रयोगो त्र कलासाम्यलाभे तदर्धादिभेदलाभात् तदाह। **अन्यूनायां कलायां तु ध्रुवमिति**। तुरेवार्थे। ध्रुवमार्गे न्यूनायामेव कलायां कुर्यात्। एवं हि कलामाने लब्धे तद्द्वैगुण्यादिना चित्रादिमार्गविभेदो ज्ञातुं शक्यस्तदाह। **प्राज्ञ** इति।

ननु यद्येकरसगुरुप्रस्तारारूपता तर्हि चच्चत्पुटादिरूपत्वम्। यदासारितप्राणि(ण)त्वेनोक्तं तद्वत् सुज्ञानमित्याशङ्क्याह। **अथ तालाक्षरवशाच्छेषान् पातानिति**। यद्यपि परः प्लुतादिविभागो त्र नास्ति तु चच्चत्पुट–इत्यादि–तालाक्षरकृतस्तदापि तदाया(य)ता ये त्र पाताः शम्यादयः शिष्यन्ते ताने(त ए)व योज्यन्ते न च च चत्पुटादिक्षिप्तः(प्ताः)। अथेति यद्यपीत्यर्थे। **चो** वधारणे।।**१६०**।।

एतेष्वपि शेषं स्फुटयति। **प्लुते** इत्यादि। **ध्रुव** इति गुरुः। **तेन प्लुते लघ्वक्षरे गुरुणि च** प्रयुज्यमाने **साम्यं न** विज्ञायते। ते शम्यादिभिस्त्वेभिः **पातै**रुपलक्षितं **समत्वमुपनीयते** बुद्धौ निवेश्यते। अनेन ध्रुवकमार्गेणेदि भावः।।**१६१**।।

एवं हि सत्येवंभूतो यमासारितप्रयोगो भवतीत्याह। **तालैश्चेत्यादिध्रुवेण चे**त्यन्तेन। एकरसगुर्वात्मना ये शम्यातालसन्निपाताश्चकारव्यावत्तिस्तत्र कण्डिकोपोहनगमितो ध्रुवश्च तैः कन्निष्ठमध्यज्येष्ठादि कर्तव्यम्। **एव**शब्दो **ध्रुवेणे**त्यन्तो(तो) नन्तरं द्रष्टव्यः। चकारो स्य वत्तिं द्योतयति। विशेषाश्चकाराः समुच्चये।।**१६२**।।

ननु कनिष्ठे तु **योगक्षेमता** कथमितरयोरित्याशङ्क्याह। **द्विगुणोत्तरयेति।** द्विगुणो प्यन्तादेव द्विगुणत्वं गुणः पु(पू)ज्य अण्वन्तानामिति। भिन्नं **मुनीनां** मतम्। आभ्यां गुण्यन्ते नोत्तरा प्लवमाना वद्धिमनुधावन्ति। या वद्धिस्तयोपलक्षितः। यस्मान् मध्यमं विधेयं तस्माच्छम्यादयो ह्युक्ताः।

नन्वेवमेकशम्यास्थाने द्वे शम्ये स्यातामित्याशङ्क्याह। **प्रस्तारेणेति। कलानां निःशब्द**रूपाणां यः प्रस्तारो विकल्पविधौ प्रवेशनिष्क्रामात्मा **तेनोपेतं शम्यातालयो**रन्तरे मध्ये।।**१६३**।।

ततश्चायं प्रस्तारो भवतीत्याह। **पूर्वं शम्या कार्ये**त्यादि। **द्विगुणस्ताल** इति। द्विकले यस्याधिष्ठेये। तेन द्वितीयस्यां कलायां स स्वयं तालस्तिष्ठति। पूर्वस्यां निष्क्रामं निवेशयति स्वरतालेनाधितिष्ठत इति वामहस्तेन भवति। एवं **त्रिकल** षट्कल इत्यादयो पि मन्तव्याः।।**१६४-१६७**।।

ननु प्रथमप चपाणेराद्या सन्निपातकला प्रथयवस्तुनापहृता प चपाणिना च **द्वितीय**स्येति कथं द्वादश कला भवन्तीत्याशङ्क्याह। **ये पूर्वमङ्गुलिकृते(ता इ)**त्यादिना **प्रवेशो निष्क्रावो(म)** इत्यन्तेन क्रमेण ये **गदिता**स्ते पूर्वं कृत्वा क्रमेण कनीयस्यां द्वङ्गुलीभिः **कृताः** सम्पादिताः कर्तव्याः। **तेना**विभक्ताङ्गे चच्चत्पुटे द्विकले पादभागे प्रथमे कनीयसीति यावत्। अन्त्ये तर्जनीं प्रतिं प चपाणौ आद्ये कनीयसीं स(प्र)ति चतुर्थे तर्जनी(नि)कादि(दी)नि। प चमे कनीयसी शता। शष्ठे तर्जनीं प्रतीति। एवं द्वितीये मुक्तसु(क)सन्निपातः। विभक्ताङ्गे तु आद्या शम्या मुक्तिकास्थानीया। ततो नितानिशता प्रनिशता प्रनिश इति पादभागः। चतुष्के कनीयस्यादयस्तर्जन्यन्ताः निप्रनाशनितानिप्रतिशिसं पादभागषट्कः प चपाणे कनीयस्याश्चतस्रः पुनः कनीयसी तर्जनी चेति।।**१६८**।।

एवं **ज्येष्ठे।** एवं द्विधा चाङ्गुलिविभागो मन्तव्यः। तदाह। **अथ ज्येष्ठे कर्तव्यमिति**। प्रनीति। एवं द्वितीये मुक्तस्तत्सन्निपातः। विभक्ताङ्गे ज्येष्ठे प्येकमेव द्वैविध्यं कर्तव्यमिति यावत्।।**१६९-१७०**।।

तत्र विभक्ताङ्गं तावत् प्रस्तारद्वारेण स्वकण्ठोक्तेन दर्शयति। **पूर्वं शम्या कार्येति।** कृतविभक्ताङ्गे शम्याद्या मुक्तप्राये(या इ)ति। प्रथमवस्तुन्यष्टकले प चपाणेराद्यः सन्निपातः प्रविशति। तत्र प चपाणौ द्वितीयस्याद्यः सन्निपातो त्यन्तं भजते। द्वितीये तु मुक्त इति शम्याद्वयेन.....न्त्या बोध्यते। तेनायं प्रस्तारः। स अनिविता आनिवस्स आताविप्र आनिवसं आनिविप्र आताविश आनिविता आनिविश आताविप्र आनिविशम् तदाह। **पूर्वं शम्ये**त्यादिना **कार्यश्च सन्निपातो पि षट्कल** इत्यन्तेन।।**१७१-१७२**।।

प्रथमं वस्तूक्तं **सन्निपातश्च षट्कः(ट्कलः)संविधातव्य** इत्यन्तेन। द्वितीयं **विधिरेव एव कृत्स्नः पुनस्ततीये पि सन्निपाते तु** इत्यन्तेन। द्वितीयं **सन्निपात** इति। **सन्निपाते त्वि**ति यावत्। अत्र स्वकण्ठेनाङ्गुलिविभागो नोक्तः स नो(चो)हनीयः। तेनाद्या शम्या मुक्तमेकीकृत्य पादभागव्यवस्था। तदनुसारेण कनीयस्यादिविभागः। एतच्च सूचितं **तच्चा(स्या)वापो** थेत्यादिना (भ.ना. ३१.१७०)। अथ विभक्ताङ्गे पि प्रकारान्तरमस्ति। यत्र शम्या मुक्ता क्रियते अपि तच्छम्यान्त एव प्रतिभागविभागः। प्रथमवस्तुन्येव यस्तु सन्निपातो मुक्तमेकीक्रियते स च प चपाणिसम्बन्धे त्र कल्पनीय इति प चपाणासावापादिक एव पादभागकल्पनेति तदेतत् प्रकारान्तरमङ्गुलीद्वारेण दर्शयति। **पुनरेवैषामिति। एषां** विभक्ताङ्गानामिति कलानामङ्गुलीनां विक्षेपो विभागेन न्यासः शम्यादि।।**१७३-१७४**।।

विक्षेपान्ते कनीयसीति छेदकारिणा **अथ**शब्देनाह। एवं द्विकलात्मनि चतुष्कलात्मनि पादभागे आद्याङ्गुलिः। द्वितीये यावच्चतुर्थे च तर्जनी। ततो मुक्तकत्वात्

पादभागगणनायामनुप्रविष्ट एव सन्निपातः। तदाह। **कलाः सप्तदशेति। सन्निपात** इति। द्विकले पि। एवंविधकल्पना सन्निपातान्त एव कार्य इ(र्ये)ति यावत्।।**१७५-१७८**।।

अथ प चपाणौ पादभागषट्कविभागमाह। **आवापश्च पुन**रित्यादिना। **निर्गमो** निष्क्रामः। चतुर्षु पादेषु भागेषु चतस्रो ङ्गुलिविभागं सूचयितुं पादभागविभागमाह। **प्रथमः षोडशकलः।** तेन चतस्रो ङ्गुल्यः। **चतुर्विंशतिकस्तथा द्वितीयश्च। तेन** तत्र सन्निपातादि।। एवं पादविभागः। तत्रैकविंशतितमा शम्यैव भवति षट्पातत्वात्। स च प चपाण्यात्मा द्वितीयश्च। **तथेति**। स्वोचितेन पादभागविभागेनाङ्गुलिषु संविभक्तव्यं इत्यर्थः। ततीयश्च सन्निपातादेव। तस्य त्वन्ते मुक्तमलेत्याह। **सन्निपातकलाधिक** इति।।**१८६**।।

नन्वेसं भ्रयसि वैचित्र्ये न्यदेव किमपि गीतकपाणिकादिवक्तव्यमेकरसमासारित—रूपत्वमित्याशङ्क्याह। **प्रत्येकं पतनान्येषु दश सप्तेति। हि** यस्मात् सर्वे सप्तदश पातास्तस्मात् सामान्यकृतमेकरसामासारितत्वं वैचित्र्यान्तरयोगे पि। एवं ज्येष्ठादिभेदे पि वक्तव्यम्।

ननु सप्तदशपाताः शास्त्र एव न श्रुता इत्याशङ्क्याह। **शम्यातालकृतानी**ति। त्रय एव। वत्या वस्तुत्रितये साप्तद(द)श्यं तत् पूरयति।।**१८७**।।

तात्पर्यं कथमिति चेदङ्गषट्कत्व**मष्टताल**त्वं **त्रिसन्निपातं** चेति। **सर्व**मिति। कनिष्ठादिभेदभिन्नं स्वतन्त्रं वर्धमानतालयोगेन सप्तदशपातत्वम्। तत्र स्वतन्त्रासारितं त्रिधा। लयान्तरमपीति चतुर्धेति। अन्येषां प्रत्येकं मार्गे चतुष्टयभेदाच्छोडशत्वम्। तत्राप्यविभक्तविभक्ततया द्वात्रिंशत्। वर्धमानं तु मार्गभेदेन षोढा कृतम्। तत्र चासारिततालेन विभक्ताविभक्ताङ्गतया द्वादश भेदाः। एतादासारितवर्धमानम्। आसारिताभासवर्धमानप्येवं द्वादशधा। एवं वर्धमानासारिते विभेदाः। कण्डिकावर्धमानं चेति सप्तप चादशमी भेदा भवन्ति। उक्तं च **पुराणे**।

आसारितं वर्धमानं सप्तप चादशात्मना।
सन्ध्यासु प्रमथैर्देव्या सह नत्यति शङ्करः।। इति।।**१८८**।।

आसारित एकपाणिश्चेति सप्तकलस्तालमार्ग आसारितानामेव। इतिकर्तव्यताविशेषा—द्वर्धमाननिष्पत्तिरित्यासारणायाः प्राधान्यात् कनिष्ठमेवोपसंहरन्नाह। **आसारितानामित्येवमिति। इतिः** समाप्तौ। **एवं** शब्देन भेदात् प्रयोगे वैचित्र्यं चाह। कस्मादेषामादौ लक्षणमुक्तमित्यतो त्र हेतुमाह। **गीतानां वस्तुकानामिति। गीतानां** मद्रकादीनां यानि **वस्तुकादीनि** षण्मात्रादीनि **च**कारादङ्गादीनि येषां **प्रयोग**स्तालवैचित्र्यपरिकल्पितेनासारितलक्षणेन। आसारितपूर्वं हि तालवैचित्र्यमित्युक्तम—सकृत्। एवं केवले ताण्डवे प्राधान्ययोगादासारिताभिधानः। तस्मादिति हेतावित्युक्तं भवति। **अन्ये** तु **वस्तुक**शब्देन **पाणि**कालास्यगानादीनां **संग्रहमा**हु।।**१८९**।।

अथ वक्तव्यान्तरमाह। **अतः परमि**ति। **गीतका(ता)नां वस्तुकेषु अपि** शब्दादङ्गेषु च कर्मणि। **त्रीण्यङ्गानि** यद्वशाद्गीतिकल्पनमिति व्यज्यते तानि वक्ष्यामि। **विवि(व)धस्य** प्रथमोपादानमाद्ये मद्रकगीते प्राधान्यात्। तथा च वक्ष्यति।

विवधैक(क)योपायो(योः प्रायो) मद्रके तु प्रयोजनम्। (भ.ना. ३१.१६३)

इति। यद्यपि चोद्देशविधावुद्देशो **विधा(दा)री यतयो लयाः** (भ.ना. २८.१६) इति प्रकरणोपयोगात् तदन्तरमङ्गानां विदा(र्या)द्या(दे)श्चे(श्चो)द्देशः। तथापि लक्षणावसरे ङ्गनिरूपणपूर्वमङ्गिनिरूपणं वक्तव्यमिति प्रोक्तं तन्निरूपणम्। ततो ये स्थूला आरम्भकविभागास्ते विदारीत्वे वक्ष्यन्ते।

त्र्यपरैकादशपरा विदार्यः परिकीर्तिताः।

चतुर्विंशतिरेतासां प्रमाणं परमं स्मतम्।। (भ.ना. ३१–१६७–१६८)

इति। अत्र वस्त्वारम्भकानामत्यारम्भो विदारीभेदः सो ङ्गत्वेनेह निर्दिष्टः। अङ्गसंज्ञा च प्रयोजनगीतकरूपतासिद्धिप्रतिपादनमेव। तथाहि। स्थाय्यादयो ये वर्णास्तन्निष्प(ष्पा)द्यमानं गीतं गीतकमिति तदनुवर्ती विच्छेदः कर्तव्यः। परिच्छेदस्य परिच्छेदतनुत्वाद्विदार्याश्च साम्यात्मतया परिच्छेदनरूपत्वम्। अत एवेयं तालगीतैर्निर्दिष्टा। एवं च वर्णानुवत्तित्वादेव वर्णाङ्गकमिति तालाङ्गेभ्यः पथगेव गीतिवैचित्र्यात्मनाभिधानेन प्राधान्यतयोक्तम्। तदवधारणेन व्यपदेशेन गीतकमित्युच्यते। तत्र तु तालभिघात आसारणाप्रसादादेवेत्यङ्गत्वादेव गीतकत्वसिद्धिः। आरम्भकाणां च वस्तूनां मुखप्रतिमुखादीन्येवमप्यङ्गसंज्ञा एव(मेव) लभते(न्ते)। तथा च **दत्तिलाचार्येणो**क्तम्।

वक्ष्यमाण(णं) मुखाद्यङ्गं विज्ञेयं तच्चतुर्विधम्। (दत्तिलम् १४३)

इति। वस्तुनिबद्धानां वस्तुषट्निबद्धानां वा द्वयं वायव(वयव)षट्केषु यतो भवन्ति तत एतान्यङ्गानि। अत एवंविधेन संदिह्यते किं द्वावेककौ द्विवि(व)धौ वेति। अङ्गसंस्था विदारी तद्विवि(व)ध एवेति निश्चयात्। अस्मिन् विषये तावता(त्ता)नि भवन्ति सम्भाव्यते यद्य(द्द्व)पहदो(देशे)नोच्यत(न्त) इति यावत्।।**१६०-१६१**।।

अथैषां विशेषलक्षणान्याह। **एककं तु विदार्ये**केति। एको विच्छेदः। **एककं** दौ(द्वौ)**विवधं** विशिष्टो वधो हननं विभक्ततापादनमिति यावत्। त्रयश्चत्वारः प चविधेष्वपि छेदावत्तं वर्तते। भूयानेव भेदो यत्रेति वत्तम्। **षट्परं त्र्यप(व)रं वत्त**मिति। तस्य चावान्तरभेदद्वयमित्याह। **द्द्वङ्गं तच्चे**ति। त्रिविधमपि संहरणं कर्तव्यम्। संह्रियते परिसमाप्यते गतिरत्रेत्यत एव वर्णाङ्गत्वम्। स्वगीतिपरिसमाप्तिश्चान्या। सस्वरेण तन्त्र्या वाद्येषु वाद्य(द्या)न्तरेण न्यासापन्यासेन विन्यासेनेति तत् स्वरान्तरमुक्तं भवति। **संहरणमिति**। न्यासापन्यासौ तदन्तत्वात् संहरणमित्यन्ये।।**१६२**।।

अथैषां विशेषतो विनियोगमाह। विवक्षया युज्यन्त(त) एव व्यपदेशः। प्रकर्या अपि षण्मात्रं वस्तु। तत्र तत्रापि षडेककानुवत्तमिति वा यदुच्यते तदङ्गिनः सम्भवत्येव। प्राग्वत् तेनापि विवधैकके तिसषु मात्रासु विभज्यते। तदाह। **प्रका(क)र्याश्चापि वस्त्वर्थ(र्ध)** इति।

एवं षण्मात्रे रोविन्दकपादे वाच्यम्। तदा **पादे रोविन्दकस्य** चेति। एतच्च सम्भवमात्रेणोक्तम्। न चैष नियमः कश्चित्। अत ये(ए)वापरान्तस्यो(स्यौ)वेणकस्य यो ति(चाभि)धाने पि न दोषः कश्चित्।।**१६३**।।

अपवत्तस्य विषयमाह। रोविन्दकशरीरे पादो ङ्गी। तस्य विवधैककयोकक्तः। तेन रोविन्दकशरीरेणोत्तरशरीरेण च सहोल्लोप्यके वत्तं प्रयोज्यम्। तथा **पाणिकायां बहिर्गीते**। आरम्भादावुक्तरलक्षणे लास्य इति च लास्यगाने उक्तवक्ष्यमाणलक्षणे वत्तमेव। पाणिकालास्यगानोपयोगादिहो.....ता गीतकमध्ये तत्परिगणनाद्वा गीतकसमानयोगक्षेमत्व––ज्ञापनार्थम्। **मद्रकादीना**मिति (भ.ना. ५.१३) वचसा पूर्वरङ्गे पाणिका पि प्रयोज्यत्वेनोपदिष्टा। तत एवासो(सौ) ऋग्गाधा(था)दिपरिहारेण वक्ष्यते। ध्रुवोपयोगसूचकलक्षणे भिधाने प्रयोजकस्य ऋग्गाधा(था)दिभिध्या.....।।**१६४।।**

प्रवत्तमिति यदुक्तं तदिदानीं विभजति। **प्रवत्तमवगाढं** चेति। आरोहणे गात्रसङ्कोचनमित्य**वगाढ**व्यपदेशः। अवरोहणे सुखा(त्) प्रवत्तिरिति प्रवत्तसंज्ञा।।**१६५**।।

आरोहणावरोहणे च प्रत्येकं द्विधा।।**१६६**।।

न्यासयोगेनेत्येक(:) प्रकारः। **अपन्यासो** विन्यास एवेति तन्मध्य एव निक्षिप्तो न तु पथक् सङ्ख्यया गणितः। अनन्तरमार्गेण संवाद्यनुवाद्य(दि)बलयोगेनेति द्वितीयः। **न्यासापन्यासा**वंशस्य वादिनो वारोहणावरोहणं चेति यावत्। **मार्गान्तर**मन्तरमार्गो **जात्याध्याये** (भ.ना. अ.२८) **स चारांशे(ख)बलस्थानां** (भ.ना.२८.७५) इत्यत्रोक्तम्। एवं वत्तस्येत्यादि षडवरविदारीकस्यारोहणेन प्रतिकल(विच्छेदेन) चतुर्विधेनावरोहणेन भेदात् त्रिंशद्भेदा भवन्ति। अत्र कश्चिद्विशेष उक्तः।

शुद्धास्वंशबलात्तत्र ज्ञेयमन्तरमार्गतः।
न्यासापन्यासयोगेन विकृतासु च जातिषु।। (दत्तिलम् १४७–१४८)

इति **दत्तिलाचार्यः।** एवं वस्तुनिबद्धेष्वङ्गनिबद्धेषु स(श)म्याव्यापेक्षया वान्तरविदारीं समभिधाय ततो गीतिवैचित्र्याद्वर्णाङ्गभेदो निरूपितः।

नन्वेवं सर्वे ङ्गनिबद्धा एव स्युः। सत्यम्। किन्तु तेषां वस्तुकल्पनात्मनि भागयोगे तदाश्रयाण्याङ्गानि निवेश्यन्ते। वा(व)स्तुप्राधान्यं वात इति तत्कृतो व्यपदेशे(शो)युक्तः। उल्लोप्यकादौ तु वर्णाङ्गनिबन्धनैव भागपरिकल्पनां। तथा हि। संहरणादीनां तालसाम्ये पि वर्णाङ्गभेदादेवान्यत्वमित्यङ्गान्येव प्रधानानीति तन्निबन्धनता प्यानीयेत। इत्येवं वर्णाङ्गकृतमङ्गनिबन्धनत्वमिति **मन्यन्ते। अन्ये** तु तालाङ्गकृतमङ्गनिबन्धनत्वं न वर्णाङ्गकृतमित्याहुः। तदेतदिह तावदास्तम्। प्रकृतं तु ब्रूमः।

अवान्तरविदारीस्वरूपं तावदुक्तम्। अधुना महाविदारीस्वरूपं वस्तु निबन्धेष्वर्धश्लोकेनाह। **त्र्यवरैकादशपरा** इति। अत्र वस्तुन्येका महाविदारी तत्र त्रिवस्तुत्वं गीतकानां....। तद्यथा। मद्रकस्य प्रकर्या वा तावत्तत्र तिस्रो महाविदार्य इत्यनुयोगः। भूयोवस्तुत्वं त्यर्थ(र्ध)चतुर्थवस्तुत्त्वप्रभति यावत् साप्तवस्तुत्वं यदपरान्तके। तत्र प्रतिवस्तु

विदारी सप्त विदार्य इति शाखा। अर्थ(र्ध)चतुर्थेषु वस्तुषु प्रतिशाखेति। तद्गताश्चतस्रो विदार्य इत्येकादेशे**ति परयो**गः। तेन चत्वारि (एका)दशान्तमत्र मध्यमयोगेन संगहीतम्।।**१६७**।।

मतान्तरमप्याह। **चतुर्विंशतिरेतासां प्रमाणमि**ति। अनेनेदमुच्यते। त्रिमात्रे वस्तुनि मात्रार्धे यावद् विदारी कर्तव्या। येन चतुर्थवस्तुके मद्रके पिण्डीकृत्य **चतुर्विंशति(:)**। प्रतिवस्तु षडिति गणनया। षण्मात्रे तु प्रकृते वस्तुनि नार्धमात्रायां विदारी कार्या। एवं हि त्रिवस्तुके षड्विंशद्विदारिका धिकत्वे धिकविदारिका पि प्रकरी स्यात्। एतस्मान्नियमात्तु न भवतीति ज्ञातमात्रायां तत्र विदारीत्युक्तं भवति।

अपरे सामान्यकालाभिप्रायेण यथासम्भवं विच्छेदसंख्याप्रतिपादनं श्लोकार्धस्य तात्पर्यमाहुः। तथाहि। चच्चत्पुटे समुदायविच्छेद एका विदारी। प्रतिकलविच्छेदे चतस्रः। कलार्थविच्छेदे ष्टौ। तदर्धे पि च त्रिचतुष्कलदक्षिणादियोगे पि चित्रे पि च ह्रस्वमानमित्युक्तम्। तेन कलार्धार्धापेक्षया षोडश। एवं त्र्यश्रे वाच्यम्। यावत् प चपाणौ चतुर्विंशतिः। एवं.....या.....त्येव कला.....तावत्स्वेव पदेषु वर्णानुकर्षाद् द्विकलचतुष्कलयोगः शम्य(म्या)प्रि(प्रा)यः(शक्यप्रायः)। यथा रु.....द्र.....इत्येकस्यामपि कलायां चत्वारो विच्छेदाः। यावद्वर्णानुकर्षेणेति चतुष्कलयोगे पि यदेवं परं भवतीति गणाधिक्याभावे पि द्विकलत्वादिप्रकारान्तरमुक्तं भवतीति।

अथोल्लोप्यके विदारीस्वरूपमाह।

अध्यर्धाधैततीयाश्च सन्निपाताः प्रमाणतः।
उल्लोप्यके विदारी तु स्मता वैहायसे तथा।।

इति। इहोल्लोप्यकमपरतः सप्ताङ्गं प्रकर्षं पुनर्विंशत्यर्थे तत्रोल्लोप्यकमिति मात्रैवाङ्गीति कथ्यते। न च षोडशकलासु तावन्ति वर्णाङ्गानि निवेशयितुं शक्यानि। परिमिते हि तत्र मात्रारूपे कथमेककादीनि पौनःपुन्यनिवेशनया प्राप्तामनेकसंख्यामनुवर्तितुमुत्सहन्ते। एवं **वैहायसे** द्वादशकले कृथमङ्गानां निवेशनमिति। तत्रानेनोपाय उच्यते। तत्र यथा सप्ताङ्गत्वं चिकीर्षितं भवति तथा षोडशैव कलाः। तथा वर्णप्रकर्षेण कला साधकलारूपेत्यनेन येन गातव्या यथा फलश्चतुर्विंशतिः कला भवन्ति। तत्र सप्ताङ्गानि निवेशनीयानि। कलात्रये ङ्गके चतुष्कलाषट्क इति कृत्वा यथा तु विंशत्यन्तो विधिः स्मतस्तथा षोडशसु कलास्वेका कला त्यर्थ(ध्यर्ध)कलाद्वयमिति। इयता वर्णप्रकर्षेण गानं कर्तव्यम्। यथा मात्रैवमध्यर्धततीया मात्रा फलतश्चत्वारि षट्कलारूपाणि भवति। तत्र कलाद्वये ङ्गमिति विंशतिर्मात्राः परा.....स्तीति। तथा ध्यर्धार्ध**ततीयाश्च सन्निपाता** इति। **सन्निपातो त्र** मात्रा। तत्कृतविच्छिन्नरूपत्वात्। तेनाध्यर्धश्च सन्निपातः। अध्यर्ध(अर्ध)ततीयश्च सन्निपात इति द्वन्द्वः। एवं सप्ताङ्गे च परापरयोगेन व्याख्यायते। सपादो सन्निपातत्वमित्यादिरपि भेदो लभ्यते। **अन्ये** तु **प्रतिकलम**ङ्गमित्यध्यर्धसन्निपाते प्यस्ति विंशत्यङ्गतेत्याहुः। **एवं वैहायसे** पि वाच्यम्।

एवं महाविदारीमुक्त्वा यदर्थमयं विधिरुक्तस्तान्यङ्गान्यत्रदर्शयति।

विवि(व)धेन च ताः कार्या युग्मवत्तेन चैव हि।

इति। ता इत्यध्यर्धसन्निपातप्रभाणाः अर्धततीयसन्निपातप्रमाणश्च महाविदार्यः।।**१६८-१६६**।।

न ह्यत्र(र्ध)सन्निपाते( )स्या द्भ(भ)वेदङ्गसमापनम्।

एकैव तावन् मात्रा मुखप्रतिमुखरूपतयोल्लोष्यके विभज्यते। तत्रार्धमात्रायां मुखरूपायां कथमङ्गानां समाप्तिः। विंशतीनां समाप्तिविंशतिरूपत्वम्। **अर्धसन्निपात** इत्यर्थमात्रा। **अन्ये** त्व**र्धसन्निपाते** चेत्याहुः। **अकृत** इति चाध्याहरन्ति। तेनार्धततीयमात्रत्वे ङ्गेनाङ्गसमाप्ति–र्भवेदित्यर्थः।

केचित्तु युग्मवत्तिसमाश्रयणे हेतुमाहुः। त्रिविदारीकत्वे चासमच्छेदो न भवतीति तात्पर्यम्। अस्या विदार्याः सन्निपाते विषमे विच्छेदाङ्गसमाप्तिरूपनं **समापनं भवेत्**। अर्धकेनात्रापूर्णतावैषम्यं लक्ष्यते। अर्धस्य सन्निपातैर्विच्छेद इति षष्ठीसमासः एवमेतेनावान्तरमहाविदारीभेदेन यत् फलं तदाह। **गीतानि** सप्तेति। विदारीवैचित्र्यशून्ये हि गीतव्यवहारे स्वरालापः पुस्तकवाचनादाविव। तत्र

मद्रकोल्लोप्यके चैव तथा चैवापरान्ति(न्त)कम्।

इति। **तथा चैवे**ति। एककलारूपमेतेषां त्रयाणामिति। एवकारेण प्रातिस्विकं नियतमेषां रूपमित्याह।।**२००**।।

प्रकर्यो वैणकं चैव रोविन्दकमथोत्तरम्।

इति। तत्र चतुष्कलत्वमेव। अत्र च कानिचिद् वस्तुनिबद्धानि। अपराण्यङ्गैरिति **ताण्डवाध्याये** (अ.४) सूचितम्। तत्र तालाङ्गमेवाङ्गम्। तत्र महाशरीरत्वे वस्त्विति व्यवह्रियते। अल्पायां (विदार्यां)त्वङ्गमिति **केचित्। अन्ये तु** वर्णाङ्गप्राधान्यलब्धविभागैस्तालैरारब्धान्यङ्गनिबद्धान्याहुः। तत्रैकं त्वङ्गविभागं विवक्षुर्वस्तुनिबन्धादि सूचयति। **द्विविधं मद्रकमि**ति। संज्ञयैव मद्रकांशग्रहत्ववस्तुना लभ्यते गीतकमिति।।**२०१**।।

शीर्षको यद्वदसंकीर्णरूपज्ञप्तिहेतुस्तद्वत् प चपाणिः। असंकीर्णं त्र्यश्रकत्वं मद्रस्यावेदयत इति शीर्षकत्वेनोक्तम्। शीर्षकस्तु त्रिवस्तुक एव। न चतुर्वस्तुकत्वे **परान्तके** प चवस्तुनि **षट् सप्त** वा। अन्ते शीर्षको परो द्वितीयो न्तो वयवः प्रतिशाखात्मा यत्रेत्यपरान्तकम्।।**२०२**।।

प्रकर्यास्त्रीणि सार्धानि वस्तूनि **चत्वारि। प्रकीर्णत्वाद्** विक्षिप्तत्वात्। विक्षिप्तत्पं च वस्तुनः षण्मात्रमेव क्रियत इति। **प्रकरी** गौरवादि.....ङीषः (गौरादित्वान् ङीष्) (पा.अ. ४. १.४१)। वस्तुनिबन्धेषु वस्तुविभागः।।**२०३**।।

अथाङ्गनिबन्धेष्वङ्गविभागमाह। **रोविन्दकस्त्वि(कं त्वि)**ति। **इहा**ङ्गनिबद्धेषु क(कि)िचदेव तालरूपं प्रधानं वस्तुनिबद्धेष्विव वस्तु तावत्। व्यवस्थितेन **रोविन्दक**शब्देन प्रस्वारात्मकं शरीरम्। प्रकृष्टस्वराणां वर्णानुकर्षरूपं च प्रस्वारं च जीवितम्। तेन रसनं

शब्दनम्। रसनस्य विन्दे लब्धे रसे **दक्षिकपिविन्देषु(शः)**। ततः समासात् **संज्ञायां कन्** (पा.अ.५.३.८७)। एवमेतद् **रोविन्दकं सप्ताङ्गमपरतः षोडशाङ्गं यथायोग**मित्युच्यते।।**२०४-२०५**।।

न कला द्वादशकले य इति सप्तपराणि षोडशपराण्यङ्गानि.....त्याशङ्क्य वर्णानुकर्षेण कलभूयस्त्वसिद्धार्थमाह। **आकारश्चे**ति। आकरणं वितीकरणम्। **आकारः** शुष्काक्षररूपः। **आकार(श्चा)स्य मध्ये चे**ति। **शीर्षि(र्ष)कं** शिर इव प्रधानम्। तत **एवाविकल्पितम्।।२०६।।**

अथौवेणकाङ्गविभागमाह। **सप्ताङ्गं द्वादशाङ्गं चे(वे)ति।** तत्र **माषधात** एवात्र प्रधाम्। तथा च **दत्तिलाचार्यः।**

असमानत्वनित्यत्वे तस्य प्राधान्यकारणे। (दत्तिलम् २०३)

इति। स च द्वादशकल इति कलयाङ्गमासूत्रयन् द्वादशाङ्गानि यावत् क्रोडीकृत्यावतिष्ठते। तत एव माषेण द्वादशभागात्मना हननं गुणनं यास्य(यस्ये)ति स **माषधातः।** स एव **चौवेणकम्**। अस्यते इत्यसमाङ्गमसुभेदात्। असु वेणयति वेणीरूपा या नेकसन्धारूपाः करोतीति असोःक्विप्। वेणी प्रातिपदिकार्थजणिजन्तात् ष्वुल् षष्ठोसमासः। तत्र यदा सप्त तस्य या एककादीनि तदा द्विविधो न्तः। तत्र यदा द्वादश तदा त्र्यश्रचतुरश्रमिश्रात्मना त्रिविधः।।**२०७**।।

तत्र **पाद** इत्यादीन्यप्येवं द्वादशाङ्गादीनि। तालाङ्गवादिन एत एव। एतन्मध्यात् **संपिष्टकमुपपातं प्रवेणीद्वयमुपवर्तनं** च हित्वा स(प्ता)ङ्गता कार्येति। **वर्णाङ्ग**वादिनश्च तालाङ्गच्च। पादद्वययोगेनान्तादभेदगणनया चाधिक्यसंख्ययान्तर्भावे वा ऊनत्वं मन्यमाना वर्णाङ्गान्येकप्रतिपत्तिबन्धनीयानि। तानि च द्वादश सप्त वा। तालाङ्गानि तु तदाश्रयभूतानि सम्पिष्टकादीनि। वर्जनं च वर्णाङ्गेषु सप्तसु विधीयते न तु तस्मादेव सप्ताङ्गमित्याहुः। **एककं चतुरस्र**मिति। एकाश्रयभूतं चतुरश्रमित्यनियमः। यद्यन्तर(रं) **(द्वद्वङ्गं)संहरण**मिति। अन्ताहरणेनान्तेन च युक्तमिति यावत्। एवं द्वादशाङ्गे पादादयः सप्ताङ्गे त एव सम्पिष्टकतालांशा इति विशेषः।।**२०८-२१०**।।

विशेषान्तरमप्याह।

निवर्तनं च सप्ताङ्गे तुल्यवर्णपदं स्मतम्।
अन्तयोरिति।।

अन्तयोरिति यदावर्तनं तत्र गीतिः पदादि चेत्याह। यत्तुल्यसप्ताङ्गद्वादशाङ्गे तु गीतात्मा वर्णपरः। तुल्यपादानि त्वन्यानि। तदाह। **द्वादशाङ्गे तु तथान्यपदमि**ति। एवमन्ते विचारयितुं प्रक्रान्ते तस्यान्यमपि विशेषमाह।।**२११**।।

तत्प्रसंगादुल्लोष्यके प्यतिदिशति। **उल्लोप्यके पी**ति। तदेवैकप्रकरणमेव

अवगाढं प्रवत्तं च माहाजनिकमेव च।।
त्र्यङ्गोन्तःस्यात्।।

पुनरिदं मन्तव्यम्। **अङ्गानामि**त्यन्तसम्बन्धिनाम्। **एष एव** य ओवेणके। तत्र तावत् को **विधि**रित्याह।

इति। अन्त **अवगाढ**मिति वर्णाङ्गस्थितताला‌श्रयम्। **अन्येषां** पाठः। **स्थितप्रवत्तं च** तदेति। तथा **व्यङ्गो माहाजनिकवर्जितः स्थितप्रवत्तसंयोगाद्।** रूपस्याह। **एकाङ्गो** वेति।।**२१२-२१३**।।

कथमित्याह।

एकाङ्गे संविधातव्यं तथा (माहा)जनिकमेव च।

इति। अथैषां त्रयाणां वर्णानामङ्गविधिमाह। **व्यङ्गं स्थितमिति। वापीति**। भिन्नक्रमेण। **तेन स्थितं प्रवत्तं च व्यङ्गमेकाङ्गं** चेति।।**२१४**।।

के ते तयोरर्थे अंशाङ्गा इत्याह। **व्यङ्गे व्याससमासाभ्यामिति। यदा** एककद्वयं तदा समासा(सो)ल्पत्वात्। यदा प्रवत्तं विविधं तदा व्यासो विदारीणां बहुत्वात्। माहाजनिकत्वनियमादङ्गानां स्थित एवार्थत्वमेककं नामेत्युक्तं भवति। एवमन्तविधिस्तावद् व्यपोदितम्(तः)। इदानीं प्रकृते ओवेणके उपदिशति। **ओवेणक**स्येति। यो यं **संहारो** तः स उक्तः। ओवेणके यदा क्रियते तदा भ्यामङ्गाभ्यामेककेन व्यङ्गेन व्यङ्गे। एकद्वयं विवधद्वयं चैकाङ्गत्वनियम इत्युक्तं भवति। एवमोवेणक उपदिश्य प्रागुपक्षिप्तमनुदेशमनुसन्धत्ते। **उल्लोप्यके तु चान्तानामि**त्यादिना **चतुरश्रस्तदा(था)त्र्यश्रो मिश्रश्चान्तः प्रकीर्तित** इत्यन्तेन। कस्मादयमन्त उच्यत इत्याह। **ओवेणकस्य संहार** इति। **आदौ मध्ये** वायमन्ते **न प्रयुज्यते**। अपि तु **नित्यं संहारे**। व्रतेनायमन्तः संहार (उ)क्त इत्यर्थः।

नन्वतः कस्मादङ्गानि। वर्णाङ्गमध्यो यं पठित इत्यत आह।

एककं(को)विवधं(धो)वापि कार्य(र्यो)ह्यन्ते प्रयोक्तमिः।

इति। हिर्यस्मादर्थे। अङ्गाश्रयत्वादङ्गमेतदिति यावत्। **अन्ये** त्वतिदेशात् सन्धानग्रन्थं (**स्थित**मित्यादि) चतुःश्लोकात्मकं **प्रयोक्तभि**रित्यन्तं नाधीयते। **अन्ये** द्विपाठत्वेन पाठः। **एके** श्लोकं विभज्य **उल्लोप्यके** ङ्गानि विभजन्ति। **उल्लोप्यकं षडवरं विंशत्यङ्गं परमि**ति। वर्णाङ्गानामियं परतोक्ता। तत्रोल्लोष्यमिति मात्रा लुप्यते। ऊर्ध्वं शून्यतारूपेण यतः। एतच्च वक्ष्यामः। **तच्च** मात्रारूपं **संहरणन्ते कार्यम्**। तावन्मात्रमेवोल्लोप्यकं कार्यमिति यावत्। तत्र मात्रारूपं मुखमर्धतः **प्रतिमुख**मर्धत इति विभजनीयः(यम्)। अत एवोर्ध्वं यद्वैहायसकादि तद्यतो लोप्यकमतो पि भवति ततो प्युल्लोप्यकम्।।**२१५-२२१**।।

तच्च द्विधा वैहायसकेन संयुक्तं रहितं च। प्राक्पक्षे त्रीण्यस्याङ्गानि वैहायसकेन संयुक्तानि। द्वादशैककानीत्यावत्या वैहायसके एकमङ्गं **षट्परं** कार्यमिति यावत्। अस्य स्थानमाह। **अस्य चाङ्गत्रये तीत** इति। **टीकाकारा**स्तावद् व्याकुर्वन्ति। इह चतुरश्रे स्मिन् प्रधानाङ्गो न वैहायसिकेन तादश(शं)भाव्यं। द्वादशकलाश्रितं तत्कृतं चतस्रः कलामात्रान्तरशून्यप्रयोगेन वर्णानुकर्षणान्निर्वाह्यम्। तत्र चैककान्यङ्गत्रयम्। तदाह। **अस्य**

वैहायसिक**स्याङ्गत्रये** ततः शून्यरूपे **प्रयोगं** कुर्यात्। अत एव विहायसि शून्ये भवमिति वैहायसमिति लक्ष्यं चेत्थं वक्तव्यम्। यत्तु तत्र हितं तत्तालान्तराद् द्रष्टव्यमिति मन्तव्यमिति।

अन्ये लक्षणमित्थं पश्यतो(न्तो) ङ्गत्रय इति। तन्मर्यादामात्रायामतीतायां वैहायसकं कुर्यात्। कच्च द्वादशकलत्वे पि चत(तु)रश्रमेवेति द्विकलैककलत्वं चच्चत्पुटप्राधान्यात्। अत एव तु द्वादशकलतोक्ता। न वा तच्चातुरश्र्यमावतमस्य। तस्या नानारूपमपारमार्थिकम्। तत एव शून्ये भवमिति वैहायसकमिति मन्यते(न्ते)।।**२२२-२२३**।।

प्रसङ्गादुत्तरस्याप्येतद्रूपं तुल्यकक्ष्यात्वलक्षणभङ्ग्या तिदिशति। **उल्लोप्यकोत्तराभ्यां तु मुखप्रतिमुख** इति। चतुर्थीयं तादर्थ्ये। **तत** इति। मुखप्रतिमुखरूपाया मात्राया परतो ङ्गानि(नां) वैहाय(स)कान्ताहरणादीनां संक्षेपेण विकासेन वा प्रयोगः।।**२२४**।।

ननु मुखप्रतिमुखाङ्गविभक्तमात्रत्वे त्रयङ्गत्वमुक्तं **त्रिष्वङ्गेष्ववरमि**ति (भ.ना. ३१.२२२) वचसा। तत्र कानि त्रीण्यङ्गानीत्यत आह। **मुखप्रतिमुखे** (इ)ति। **मुखे विवधः प्रतिमुखे स च वत्तं** चेत्यङ्गत्रयम्।।**२२५**।।

उल्लोप्यके शाखाप्रतिशाखा(खे) विधातुमपरान्तरयोश्चातिदेष्टुं तुल्ययोगित्त्वेनाह। **उल्लोप्यक** इति। **शाखैव** प्राधान्यात्। शाखातुलना तु **प्रतिशाखा** च। सा **सवर्ण**शाखा(ख)या तुल्या गीताः। **अस्याः** पादानि तु गीत्याधारभूतान्यानीति **वद्धैः** स्मतम्।।**२२६**।।

उत्तरमङ्गैर्विभजति। **उत्तरं द्वादशपरं षडङ्गावर**मिति। आकारपातौ च वर्जयित्वा न्यद्रोविन्दकतुल्यमत्र।।**२२७**।।

अन्ते च मिश्रादीनां(अन्तादीनां) अन्यतरे **विशेषेण** स्थिते सतीति वाक्यशेषः। **शीर्षकं चास्य** कार्यम्। अत एव **मध्य** इति। अन्यो(न्ये) ङ्गनिबद्धे च क्वाप्यत्र न शीर्षकम्। अत्र तदस्तीति वैलक्षण्यादुत्तरव्यपदेशो लोकोत्तरो यमिति यथा त्रोत्तरं सर्वपश्चादस्य लक्षणम्। यतः पूर्वोपजीवकत्वेनेत्यत आह। तच्चासत् लक्षणस्वे(स्ये)च्छाधीनत्वेन पौर्वापर्यानियमात्। अत एव तमुपसंहरति। एवमिति। सप्तस्वङ्गानि यद्यपि तथा ङ्गकृते तालवैचित्र्ये तन्निबद्धता(ल)व्यवहारो न सर्वत्रेत्युक्तम्।।**२२८**।।

एवं यथाश्रयगीतत्वं **तद्वर्णा**ङ्गवैचित्र्यमुक्त्वा **वर्णा**ङ्गेन यद्गेयं तन्नियतप्रमाणावच्छिन्नं निरूपयितुं प्रतिजानीते। अतः **परमिति**। असति(वसतो) वर्णाङ्गतालाङ्गे क(य)स्मिन्निति **वस्तु**। तस्य **कल्पनं** परिमाणवैचित्र्यं **वक्ष्यामी**ति। तत्र मद्रकस्य तावत् प्राथम्यादेककलस्वरूपमाह। **गुरुच्छेदाष्टकमि**ति। छेदो भागः।।**२२९**।।

आद्ययोर्गुरुणोरुपोहनम्। **ततीये प्रत्युपोहनमिति। प्रत्युपोहनं** नाम प्रथमवस्तुव्यतिरिक्ते वस्त्वन्तरे प्रसिद्धः(द्धम्)। तत्र त्रिभिश्चतुर्भिर्वा मद्रकमिति पूर्वमुक्तम्। तदेककले पि भवतीति द्वितीयवस्त्वादो प्रयुपोहनं गुरुमात्रमित्युक्तम्। अनेन तद्धि प्रथमवस्तुगतोपोहनापेक्षया ततीयं भवति। प्रथमस्य प्राधान्यात् तदपेक्षयैव व्यवहार इति ततीयतुरीये पि **ततीय** इत्युक्तमिति **चेदन्ये** तु **ततीये** वस्तुनि यद् गुर्वक्षरं **तत्प्रत्युपपोहन**मिति वैयधिकरण्येन व्याचक्षाणा

द्वितीययोस्तन्नेच्छन्ति। **केचित्त्वे**कस्य सङ्कोचस्वभावत्वादेकवस्तुकमेव। तत्रैव तूपोहनं कलाद्वयम्। चतुष्कले तस्य तावत्कलत्वात् प्रत्युपोहनं चतुष्कलं तावदवश्यं भवति। चच्चत्कलाचतुष्टयवस्तुपर्यन्तं तच्चेह ततीयाया कलाया आसूत्रितम्। गर्भाधानस्थानीय एककले यन्नास्ति तच्च चतुष्कले पि कृतं(कथं)स्यात्। तेन फलतस्त्रीणि स्याद् गुरूणी इ... ...षेरित्युक्तं भवति। तत्रैवोपोहनप्रत्युपोहनव्यवहार इति प्रतिपन्नाः। लघुनि कलार्थं(र्ध)गुरूणि कलेति ये ते प्रमाणम्। प्रस्तारो स्य प्रदर्श्यते। शशताशशशताताशतासम्। एवं द्वादशकलो यं मद्रकतालः। एतद्द्विगुणस्तु द्विकल इति दर्शयति। **गुरुविश्लेषणादेकं(तद्)द्विकल**मिति।।२३०-२३४।।

गुरुणा विभिन्नेन द्वितीयेन गुरुणा श्लेषणं सम्बन्धः। स चादौ निवेश्यते। तदुचिता निःशब्दा कला प्रथमं भवतीति यावत्। अतश्च विशेषवचनाल्लघुना मिश्रीभूतेन सम्बन्ध इत्युक्तं भवति। द्विकलसामान्यान् द्विलघूनामत्र कलिकत्वमेव। तेन चतुर्विंशतिकला **इत्युपोहनम्**।।२३५।।

द्वे एका वा **नैव वा**। त्रिषु गुरुषु पातो नोक्त इति पादभागत्रये तदभावः। प्रनि... ..... इति द्विगुणो द्विकलमन्द्रकः। अथैतद् द्विगुणं चतुष्कलमाह। **द्विर्भावा**दिति। अत्रैवावापविक्षेपाः। यतो **विश्लेषणे कला यत्र पूर्वं पूर्वं निवेशयेदि**ति (भ.ना. ३१.२३५) वचनादादौ सा धिका कला योज्यते।।२३६।।

अनया परिभाषया **सप्तमे** एककलादर्शनदर्शितकलाच(तुष्टय)योगे **लघुन्यादा**वावापप्रयोजना न प्राप्ता आयता इति। अतोत्यष्टमे सन्निपातलघुन्यादौ विक्षेपकलेत्यन्ये(न्ते) पादभागे अताविशमिति प्राप्ते **तद**पवादमाह। **सप्तमे लघुनि त्वन्ते द्विभावो स्मिन्नि**ति। द्विर्भवतीति **द्विर्भावो** साव्य(व)धिक आगतः स चान्त्य इति **चतुष्कले** ह्याद्य आवापस्तदपेक्षयान्त्यो निष्क्रामः स **विधीयते**। सो पि किं तालात् पूर्वं निवेश्य(:)। नेत्याह। **अस्मिन्नि**ति। अङ्ग एव स्थान इति यावत्। तेन तानि विंशतिपादभागो न्यो जायते। **अन्ये** तु **द्विर्भाव**शब्देन तालं व्यचक्षते। सो न्त्यः प्राप्त आवापस्थाने **विधीयते।** तदनन्त(र)न्त्वर्थान्निष्क्राम इति। फलादेवाद्यमित्यन्ये स्पष्टमेव पठन्ति। **अष्टौ कला आद्ये वस्तुन्युपोहनम्।।२३७।।**

शेषेषु यथाक्रम**मेका द्वे च चतस्र** इति। **अन्ये च-** स्थाने **वा**शब्दं पठन्तः प्रत्युपोहने सर्वेषु वस्तुष्वेकद्विचतुःसंख्यां विकल्पितामाहुः**।।२३८।।**

एककले मद्रके चतुष्कलेन प चपाणिना द्विकलमिति विश्लेषणमिति। चकाराच्चतुष्कलेन मिश्रेण वा। **अन्ये** त्वेककले एककलेन द्विकले द्विकलेन **चतुष्कले** चतुष्कलेन। एवं संकुलवद् रूपस्फुटीकरणात् सुष्ठुतः शीर्षरूपतां निर्वहतीत्याहुः।।२३६।।

एतदुपसंहरति। **त्रिवस्त्विति**। चतुर्थमपि हि वस्तु तच्छीर्षकाङ्गसन्निविष्टम्। तथा च **दत्तिलाचार्यः। भवेद्वस्तु कलासंख्ये**त्याहुः (ह) (दत्तिलम्१६५)। इहापि मिश्रकत्वेन तदुक्तमेव। चतुर्वस्तुकत्वेन शीर्षकं शीर्षकमन्यत् प्रागेव निषिद्धम्। तेन **त्रि**वस्त्वित्युक्तम्।

त्रीणि प्रमाणानि (इति **त्रिप्रमाणम्**)। ननु तालान्तराण्येवैतानि सन्तु किं तदनुयायिरूपं यतो मद्रकतेत्याशङ्क्याह। **पातैस्त्रयोदशभिरि**ति। अद्वैतरीत्यैतत् त्रिष्वनुरूपेष्वङ्गानि वस्तुनो रूपं तदेव च **मद्रकमि**ति यावत्।।**२४०**।।

अथापरान्तकम्। अथ **गुर्वक्षराणि चत्वारि**। चतुर्णां गुरूणां **ततीये तुर्ये च शम्यातालौ।** लघुचतुष्टये तालशम्यातालसन्निपातानचक्षाण आद्यं गुरुद्वयमुपोहनप्रत्युपोहनबीजकध्रुवप्र––योज्यमिति दर्शयति। लघ्वक्षरा एककलिकापाता यत्रेति **स्मारयन्** गुर्वक्षराणि ताश्च कलिका इत्यपि स्मारयति।।**२४१-२४२**।।

एतदुपसंहरति। **यथाक्षरं बुधैरेतदि**ति। एककलमिति यावत्। **अपरान्त**कनिर्वचनलब्धा च प्रतिशाखा सर्वत्रेति लक्ष्यविदः। एतदपि च त(म)द्रकषट्कलत्र्यश्रतालमेव। प्रस्तारःउडशंताताशंताशम्। अथैतद् द्विकलीकर्तुमाह। **आदौ कला(लो)पवहनं विश्लेषाद् दिगुणमि**ति। तत्र न(म)द्रकवदेव गुरूणां द्विर्भावं लघूनामेव कलारूपत्वं **विश्लेषणे कलाश्चात्र यथापूर्वं निवेशयेत्** (भ.ना. ३१.२३५) इति सर्वं पूर्वोक्तमनुस्मरेत्। आदौ यावच्छायत्वादुपोहनत्त्वेनोक्ता ध्रुवा वा पातत्वेनैव कार्या। तेन प्रथमे पादभागे न विश्लिष्टा कलेत्युक्तं भवति।।**२४३**।।

तत्र द्विकले कला द्वेधा। **उपोहनं कलिकम्। कलिकं प्रत्युपोहनमि**ति। व्यादिवस्तुभूयस्त्वात्। एवं द्विकलस्य प्रस्तारः। डडनिप्रनिशनिताताशंताशतासम् द्विकलमपरान्तकम्।।**२४४**।।

अथ चतुष्कलमाह। **एतदेव द्विगुणमि**ति। अ(आ)वापविक्षेपयोजनयेति भावः। अत्रापि मद्रकवदन्त्यः पादभागः प्राप्तः। **पूर्वं पूर्वं निवेशयेदिति** (भ.ना. ३१.२३५) वचनात्। तदपवादमाह। **लघ्वक्षरे द्वितीये तु द्विर्भावे न्या(न्त्या)कलेति**। तेन तानिविशसमित्यमिन्त्यापवादो न तु अनिविशमिति। एतच्च श्लोकार्धं प्राग्वदेव व्याख्येयम्। तदयं प्रस्तारः। अनिविद्रअनिविश आनिविता आताविश तानिविसम्।।**२४५**।।

गणयन्तस्तस्यापि **प्रतिशाखामा**हुः।।**२४६-२४७**।।

गते च **वस्तुचतुष्टये** प चमस्यारम्भेन निवत्तिरावर्तनं कार्यम्। सा च वत्तौ मार्गे चकारात् प चपाणिना।

एतदुक्तं भवति। चतुर्थवस्त्वन्ते यान्येव द्वादशकलासु गीयन्ते पादानि तान्येव शीघ्रोच्चारणेन प चमवस्त्वादिभूतकलाषट्के गेयानीति तत्र च न्यासो र्धसमाप्तिश्चे**त्याचार्याः।।२४८।।**

प चमस्य विशेषमुक्त्वा द्वे वस्त्वित्याह। **शाखायामि**ति। **शाशायां** यत् पश्चिममन्त्यं वस्तु **प्रतिशाखायां** च द्वयोर्वस्तुनोर्या अन्त्याः **षट्कला** विशतानिविसमित्येवंरूपास्तास्तु(सु) संताशताशता इति प चपाणिपाताः। **अन्ये** तु पाणिपातास्त एव प चपाणिगतस्तु प्लुतं च प्लुतलघुगुरुद्वयलघुप्लुतरूपतात्र केवलपरिवर्ते प चपाणिंअ(णिग)तः पातविधिरिति मन्यन्ते। अज्ञातस्तालस्तालिकाज्ञाता च वस्तुरूपग्रासीकारात् प चपाणि(रुन्ने)न(त)व्यः।।**२४६-२५०**।।

अथोपोहनविधिमाह। **उपोहनं च वस्त्वर्धमि**ति। आद्ये च वस्तुनि द्वादशसु कलास्वन्येषु द्वयोर्यदि दक्षिणमार्गे वार्तिकेषु चतसष्वपि। **अन्ये** तु वस्तुनिबद्धपश्चिमे समाप्ते पथग्मूतामेव षट्कलां तालिकामाहुः। **दत्तिलादयस्तु** द्वितीयं पादविभागं आनिविशरूपं चतुर्थं आनिविप्ररूपमाहुः।

अष्टमी विंशिका चैव द्वे शम्ये परिकीर्तिते।
द्वादशाष्टादशौ तालावेकविंशस्तथैव च।। (दत्तिलम् १७२–१७३)

इति वदन्तः। एवश्चेत्यर्थः।।**२५१**।।

वस्तु भवतीत्याह। **त्र्यश्रतालेत्या**दिना **वस्त्वि**त्यन्तेन। वस्तुन एव च भाविप्रतिशाखापेक्षया **शाखे**ति व्यपदेशः। प्रतिशाखायां च स एव प्रस्तार इत्याह। यथा **शाखे**ति। प्रतिशाखात्वेन च प्राधान्यात् कदाचिद् भागो प्यस्या इत्या**चार्याः।** प्रतिशाखायाः स्वरूपमाह। **पश्चिमार्धसमेति।**

विशाखिलाचार्याः प्राहुः। **पश्चिमं वस्तु सप्तकादिरूपत्वमि**ति तस्यैव यत् पश्चिममध तत् पथक् प्रतिशाखात्वेन चतुर्विंशतिकलं वस्तुगत्या तद्गतान्त्यद्वादशकलात्मा प्रतिशाखेति वस्तुनि मन्तव्यम्। अत्र च लिङ्गं यदोवेणके एककेन पादे लक्षितव्ये आद्यः पादः समः शाखायाः परस्तु प्रतिशाखाया इति **वक्ष्यति** (भ.ना. २८१–२८२)। उपपातस्य प्रतिशाखातालाः षट् द्वादश कलातालिका मध्यपतिते प्युपपातो न ततो धिको भविमुमर्हति। तत्राद्यतुल्यगीतित्वे **चान्यपदार्थ**मिति। **अग्रे निर्णेष्यते चैतत्।** यदि तदेवं तत् कथं साम्यमित्याह। **(अन्य)पदे**ति। गीतितालाभावे चाक्षराण्यस्यामन्यानीति। अनन्तर **ए(मे)ककलेन प चपाणिना शिरः।** केचित् तदपि शाखामध्ये।

अथ शाखाप्रतिशाखाप्रसङ्गागतं वस्तुनिबद्धप्रकरीपरित्यागेनाप्युल्लोप्यकं वा(व्या) चिकीर्षुराह। **उल्लोप्यकं त्विति**। अनेन पूर्वत्र्यश्राभ्यामचातुरश्रयेणाविशेषं सूचयति। शताशता इति। यथाक्षरमुल्लोप्यकं यथाक्षरं वैहायसकादन्यन्न किंचिदिति तत्रोक्तम्। अत एवोर्ध्वं सर्वं लोप्यमत्रेत्यु**ल्लोप्यकम्।।२५२।।**

एतदुपसंहरति। **प्रत्यक्षरकृतैरिति**। ननु **यदि प चभिः पाते**रयं तर्हि कथं **चतुरश्र**ता। आकारविच्छेदगुरुरेको त्र लघुद्वयेन शोभते। तेनापूर्वेण च चत्पुटपरिवत्तौ विभक्त इति यावत्।।**२५३**।।

अथ द्विकलचतुष्कलयोगमुपपादयति। **पूर्वोक्तेने**ति। द्वैगुण्येन कलाः पूर्वं निवेशयेदिति च। विधिनेत्यर्थः। तेन निशनिताशनानिसं द्विकलः। अनिविश चतुष्कलः। **अस्य चे**ति। **अस्यैव** द्विकलचतुष्कलात्मनो **वैहासयकम्। अङ्गत्रये तीत** इति **टीकाकारः** पठति व्याचष्टे च शून्यरूपे परं गीतमात्रात्मनि कलाचतुष्कनिष्ठे वर्णाङ्गत्रये प्रयुङ्क्त उपपादनमिति। **लक्ष्यानुसारिण**स्तु मात्रागत एव मुखप्रतिमुखगते वर्णाङ्गत्रये तीते द्य प्रयोग इत्युक्तवन्तः। वैहायसकत्वं तु यथाक्षरापेक्षया शून्ये स्थाने स्य परता।।**२५४**।।

तदिति वैहायसक**मेकाङ्ग(ङ्गा)वरं द्वादशपरं** प्रोक्तम्। षडङ्गपरमित्युक्तं(प्राक्)। तेन विकल्पो त्र व्रीहियववत्। अस्य स्वरूपमाह। **प्रमाणं द्वादशकलमिति। तथा पातमि**ति। द्वादशपातमिति यावत्।।**२५५**।।

पातानाह। **अस्य तु विकला शम्या द्विकलस्ताल** इति। त्रिकलत्वमनयोः। **द्विकला शम्ये**ति। निष्क्रामान्तरगा। तत्र द्विकलत्वे चच्चत्पुटे अन्त्या सन्निपातकला। अन्तस्थानादेव (क)कलश्चचच्चत्पुटगताद्यशम्यया पसारितद्विकलैककलयोर्ह्ययं तत्र मध्ये सन्निपातः स्यात्। एकः संता एको यं ताल इति न स्यात्। प्रशस्त.....द्विकलगता सप्तकानन्तरं मध्ये शम्यादिरेककलचच्चत्पुटाक्षिप्तस्तदनन्तरं सा सन्निपातकला। अष्टम्यपि द्वादशसंस्थानता। तदेतदाह।

द्विकला च पुनः शम्या तालश्चैककलः स्मतः।
ततः शम्या ततस्तालः सन्निपातः।।

इति। (प्रस्तारः) निविशनिवितानिशताशता वैहायसम्। **शाखेयमिति** वैहायसम्। केचित् **प्रतिशाखे**ति। यावत्। **नित्यमि**ति यदि भवति तत् सर्वथै**वान्यपदे**ति यावत्। अन्त्ये ती(त्वि)ह **नित्यमि**ति लिङ्गं **प्रतिशाखाया अन्यत्रा**नित्यत्वस्येत्याहुः।।**२५६-२५७**।।

यदा त्विति विशेषो द्योत्यते। अन्तेन हि **संहितोनान्ताहरणम्।** तद्धि संहारमर्हतीति **संहार्यम्**। अन्तस्याहरणं सूचकमिति यावत्। तच्चैककलेन **प चपाणिना।।२५८।।**

यदि त्वन्तो न क्रियते तदायं विधिरित्याह। **स्वतालेने**ति। स्वतालो वैहायसम्। तेनैव संहारः समाप्तिः। तदपि यदा न क्रियते तदा **स्वतालेन** प्रथममात्रारूपैव न समाप्तिरित्यावेदयितुं **स्वतालेने**ति साधारण्योक्त्या व्यवहृतः। यदा त्वस्य(स्या)न्त इत्युक्तं ततस्तदाह। **द्विप्रकारनिवत्तश्च त्र्यङ्ग** इति।।**२५६**।।

एतत् स्वयमेव निर्णिनीषुस्त्रिविधित्वं तावदाह। **त्र्यश्रश्च चतुरश्रश्च मिश्रश्चे**ति त्र्यङ्गत्वमाह।

स्थितप्रवत्ते तस्याङ्गे माहाजनिकमेव च।

इति।।**२६०**।।

त्रिविधस्य प्रयोगपौर्वापर्यमाह।

स्यात् प चपाणितालेन तदन्ताहरणं यदा।
तद स्थितं भवेद्युग्मम्।

इति। **यदे**ति यतः। **तदे**ति ततः। यत्तद(यदातदोर)यमर्थः। आदौ युग्मस्थितं कार्यं चात्रान्ताहरणे प चपाणिः। अयुग्ममिति परभागे न विच्छित्तिर्भवति।

अन्ये तु **यदे**ति यस्मिन् ताल इति व्याचक्षाणा **अन्ताहरणमन्तेन** नियतमपि तु विपर्यय इति। ततश्चान्ताहरणभावे यदान्तस्तदायं **नियमः**। आदौ युग्ममिति स्थिरमिति नामबलात् स्थायिवर्णप्रधानमेतत्।

अन्ये त्वेकस्याभेदत्वात् स्थितत्वमित्येकक्र(म)मुक्तमित्याहुः।।**२६१**।।

शम्या द्वे चेति। द्विकलचच्चत्पुटो यम्। निशनिताशनि प्रनिसंस्थितम्। प्रवत्तवर्णाङ्गयोगाच्च **प्रवत्तम्।।२६२।।**

अस्य तु **द्विकले**ति। निशताताशताशसं वत्तम्।।**२६३**।।

स्थितस्य तालः। स एव महाजनिकस्य किन्तु निवत्तिरन्ते कर्तव्या। अत एव पुनः प्रवर्तनादपि प्रवत्तम्। तदाह। अस्य तु **निवत्तस्तालः कर्तव्य** इति। निवत्तिरस्यास्तीति मत्वर्थीयः। अनि(**नि**)**वत्तस्ताल** इति तालान्तो भावः कलाचतुष्टयात्मा स पुनरावत्तः कर्तव्यः। आद्यासु चतसषु कलासु यानि निष्पन्नानि तान्येव पातानि यावत्। न केवलं **माहाजनिकमेव** निवत्या युक्तम्। यावदुक्तलक्षणं प्रवत्तमपि। द्विप्रकारो निवत्तो न्त इति। अत एव हि पूर्वमुक्तमित्येतदित्याह **प्रवत्तस्यापि तत्त्वतः।।२६४।।**

अत्रेति। अत्र यत् प्रवत्तमुक्तं न तु वर्णाङ्गरूपं तस्यापि **यस्तालविधि**रुक्तः सो पि **प्रायश उपवर्तने** निवत्तविषये कर्तव्यः। अन्यत्रभावो विषयार्थः। **प्रायश** इति। प्रकर्षगमनेनेत्ययमत्रार्थो विवक्षितमि(त इ)त्यभिप्रायमाविष्करोति। **आदावुद्धट्टकस्तालः कार्य** इत्यनयात्मनि युग्मरूपक्रमवशेन द्विकलचच्चत्पुटे पि। अत एव प्लुतलघुविभागहीने पवादतया कर्तव्यत्वेनोक्तः। **परिवर्तक**व्यपदेशश्च द्विकले पि परिवत्त्यागतत्वादन्यस्तालादिश्चच्चत्पुटतालः कर्तव्यत्वेनोक्तः। **च**कारात् सन्निपातश्च नोपवर्तने प्रयुज्यत इति प्राच्वेन सम्बन्धः। तत्र पथक् सामान्येन चोपवर्तनमिति बहवो भेदाः।।**२६५**।।

ननु तालसमुदायरूपं प्रवत्तं पश्यामः। तत्र कथमेकरसच्छलमुपवर्तनमित्याशङ्क्याह। **युग्मो ह्यन्त** इति। अन्ताङ्गप्रवत्तमात्रान्तःसकलचच्चत्पुटत्वादेक एव ताल इति यावत्। विशेषे किं प्रमाणमित्याह। **युग्मे ही**ति। हि यस्माद्युग्मो न्तविधिरत्रोपक्रान्त इति। प्रकरणमात्र इति यावत्। तच्चैकरसो यद्ययमष्टकलस्तालः। कथं तर्ह्युद्धट्टकादिव्यपदेशो भवता न व्यधायीत्याशङ्क्याह। **मिश्रतालत्वा**दिति। उद्धट्टकचच्चत्पुटोचितव्यामिश्रतामात्र—मत्रेति यावत्।

अन्ये तु परिवर्तकमित्यनेन चच्चत्पुटसङ्ग्रहविशेषसन्निपातो न्तः प्रयुज्यत इत्यनेन स्वीकृत इत्याहुः। एवमयं श्लोकः प्रवत्तस्योपवर्तनमिति विधिपर्यवसायी रुद्र(**उद्भ**)**टादिभि**स्त्वेकमर्थमबुध्यमानैरुक्तः। स श्लोकपाठविप्रलब्धैः सर्वत्रैवाष्टकलस्योक्तः। प्रस्तारस्य वत्तस्यादौ पथग्भूत उद्धट्टः। कर्तव्ये नाम्ना तदा तत्तु लक्ष्ये चिरन्तने न दश्यते प्रक्रान्तयुग्मायुग्मविभागं च विध्यंसयतीत्यनपेक्ष्यमेव। **विवधैककसंयुक्तः पूर्वं पश्चादि**ति। उपवर्तनस्येति विशेषः।।**२६६**।।

एवं चतुरश्रमुपसंहरति। **यथावदन्त्यतालो यं युग्म** इति। अथ **मिश्रः** संकीर्ण इति यावत्। उद्धट्टयोगेन संकीर्णतायां शक्यत्वे साप्यपसारितेति भावः। अन्ये त्वकारप्रश्लेषं नेच्छन्तो यद्यप्यन्तालेन मिश्रस्तथापि उक्तयुक्त्या **युग्म** उक्त इति व्याचक्षते।।**२६७**।।

त्र्यश्रे स्थितमाह। **शम्या त्वि**ति। निशताप्रनिसंस्थितम्। **प्रवत्तमतः परिमि**ति वचनात् स्थितमेतदिति ज्ञायते।।**२६८**।।

परिवर्तनमिति। परिवर्तनयोगात् तत्र चैककलः प चपाणिः।।**२६९**।।

स्थिततालेनैव निवत्तियुङ् **माहाजनिकम्**। तदाह। **अत्रापी**त्यादि **निवत्ततालः कर्तव्यस्तथे**त्यन्तम्। एवं प्राधान्यादादौ युग्मस्ततस्त्र्यश्रो न्तः कर्तव्य इत्युक्त्वा तद्द्वयपूर्वकत्वात् सर्वपश्चात् कर्तव्यमिश्रान्तमाह। **अत्रापि निवत्तिमात।।२७०।।**

युग्मौजमिश्रतालत्वादियुग्मौजरूपाणां स्थितादीनां वैचित्र्याद्बहुप्रकारमिश्र इत्यर्थः। सो पि च पथक् **प्रयुज्यते।** न तु पौनरुक्त्या शङ्क्या न प्रयोज्य इति। अत्रापि निवत्तिस्थाने आवत्तिरित्य**त्रापी**त्यर्थः। अथ तस्याङ्गान्याह। **विवधैककेति**। स्थितादि त्रये प्येतद्। उत्सर्ग इत्यर्थः।।**२७१**।।

विशेषं त्वाह। **व्यङ्गमेकाङ्गमवि** वेति। व्यवस्थितविभाषाविषयमिति वर्शयति। **तत्र युग्मं व्यङ्ग त्र्यश्रमेकाङ्गमि**ति।।**२७२**।।

प्रवत्ति(त्त)विशेषमाह। **प्रवत्तमपी**ति। प्रवत्ते पि पूर्ववद्व्यवस्थितविभाषैव मन्तव्या। **महाजनिक**स्तू(कं तू)भयमप्ये**काङ्गं संहरण**रूपं सर्वसमाप्तिकाले यं माहाजनिकः। तद् **व्यङ्गं** मध्यवर्ति **त्वेकाङ्गमेवे**त्यर्थः। **अन्ये** तु **संहरणमि**त्याहरणं **त्र्यङ्ग**मिच्छन्ति।।**२७३**।।

एतदुपसंहरति। **स्थितादिकः प्रवत्तान्त** इति। यावदङ्गानां विवधादीनां चैकव्द्यादिरूपतया भूयांसो त्र सन्ति प्रकारा इति सूचयति। **ऊहापोहे**ति। ऊहनमनुक्तस्योपवर्तनभेदादेः कल्पनम्। अपोहनं तूक्तस्यान्तविध्यादेरपसारणम्।।**२७४**।।

एवं वस्तुनिबद्धमपरान्तकमभिधाय शाखाप्रतिशाखाप्रसङ्गबद्धमुल्लोप्यकमुक्तम्। अधुना तु यथाप्रस्तुतां **प्रकरी**माह। **प्रकरी वस्तु षण्**मात्रमिति। प्रकर्या वस्तु प्रकरीरूपं वा त(व)स्त्विति समान(ना)कृतौ भाषितपुस्तकत्वमिति यावत्। **पाता एकोनविंशतिः**। अन्यं(न्त्यं) तु **चतुष्कल**मात्रासमुचितमाहिद्यपादी(द इ)त्युक्तम्।।**२७५**।।

पातानाह। **आद्यमात्राद्वयस्यान्त** इति। षोडशी कला **शम्या** मात्रायामाद्यायां द्वितीयस्यां तु तालः।।**२७६**।।

अन्यत्र त्रये पि षोडशी शम्या। तुर्यमात्रायां **द्वादशतालः। प चम्याष्टम** इति प च मात्रास्तावदुक्ताः।।**२७७**।।

षष्ठयां तु चतुष्कलत्वोचितौ प्राप्तावावापविक्षेपौ न कार्याविति दर्शयति। **षष्ठयां त्वि**त्यादि। **द्विकले**ति। द्विकलोचिताधिनिष्क्रामानन्तरभाविनीत्यर्थः।।**२७८**।।

इति वस्त्विति। मात्राषट्कमिति। यावत्। तेनायं प्रस्तारः। आनिविप्र आनिविप्र आनिविप्र आनिविप्र आनिविप्रता आनिविता आनिविता आनिवा आनिविप्र आनिवि..... आनिविप्र आनिविप्र आनिविता आनिवित निशता निता नितानि शशता शता (२८) ।।**२७९**।।

एतदुक्त**मन्यैरतो** द्वैकलमद्रक्य इति **यदा त्वर्धचतुर्थानीति** सार्धवस्तुत्रयपक्षे प्रागित्याद्यं यदर्थं वस्तुनो मात्रात्रयरूपं तत् पश्चिमाद्यन्तद्वितीयेनार्थेनान्येन मात्रात्रयेण तुल्यं **निवेशयत्।** तेन चतुर्थ्या मात्राया यस्तालः प्रथमाया प चमीगतो द्वितीयायाः षष्ठयास्तु यस्तालः स **एव** ततीयस्या इत्येवं वस्तुत्रये गीते ततो वस्त्व**र्धं पश्चिमार्ध**रूपं प्राधान्यादित्यर्धचतुर्थवस्तुमित्यमुं **केचिद्**ग्रन्थमनैषुः।

टीकाकारस्तु पश्चिमार्धं यन्मात्रात्रयं तदादौ कुर्यात्। तस्य चोपोहनमन्तेन(न्तरेण) द्वैकलमद्रकीभिर्युक्तं यन् मात्रात्रयं तस्य चोपहने(नं) कुर्यात्। **यदा र्धचतुर्धा(र्था)नि वस्तूनि प्रकरी** तदर्धमिति। **तेना र्धचतुर्धा(र्था)नि यदा** तदादौ कुर्यात्। तस्य च यस्तालविधिरा(ह)**पश्चिमार्ध**शब्देन तत्तालस्तमर्हतीति। अत्र तु पक्षे उपोहनत्वं यदुक्तं तत् कथमिति न विद्मो **मुनिनो**क्त्वात्। **दत्तिलादि**भिरेव हि

उपोहनं च तत्राद्यं स्मतं चार्धविवर्जितम्। (दत्तिलम् १६६)

इत्युक्तम्। तेनाधिकं यद्वस्त्वर्धं तस्य स्थाने तालविधिः (उपोहने)नोच्यत इत्येतावदेतत्।।**२८०**।।

कनिष्ठासारितेति। **अस्या** इति। चतुर्थवस्तुकायाः सार्धवस्तुरूपायाश्च प्रकर्यां **संहरणं** नामाङ्गं कार्यम्। **कनिष्ठानासा(ष्ठासा)रिते**ति। आ(अ)ब्रह्मदत्ते ब्रह्मदत्तव्यवहारवत्। वस्त्वर्धो त्र य(ग)म्यते। तेन तदीयसा(ता)लो तिदिश्यते।

ननु गुरुलघुप्लुतविभागेनाप्युपोहनमन्त्यसन्निपातस्य च मुक्तत्वादत्रानतिदेश एव। आद्यमात्रावत् षोडशकलामात्रैवेयमिति.....मत्रार्धेन प्रकर्या.....सङ्गता। एषा च मात्रा द्वैकलमद्रकतालः षष्ठमात्रास्थाने कार्येति **केचित्। अन्ये** त्ववस्तुनि सप्तम्यैवेयं मात्रेति मन्यन्ते च प चपाणितालानुप्रवेशात् त्र्यश्रत्वसूचिकाप्रकर्या इयमेव शीर्षकरूपेत्याहुः।

अथौवेणकं लक्षयति। **पादः पूर्व** इति। **अपरान्तकं** यद्वस्तु सैव शाखाय(खा तया)चोक्तं वस्तु शाखाख्यमिति। तेन चतुर्विंशतिकलाः पादः।।**२८१**।।

द्वितीयो पि तस्यैव प्रतिशाखयेति। विशेषवचनं तुल्यगीतित्वे अन्यपदत्वाभावः। यथाह **दत्तिलः**।

अथ नान्यपदौ पादौ तुल्यगीत्यादिलक्षणौ।

पथगोवेणकस्यादावपरान्तकवस्तुवत्।। (दत्तिलम् २०१–२०२)

इति। **अनित्यमि**ति। शीर्षकमस्य भवति वा न वा। **माषधातस्ततः परमिति।** उद्धट्टस्तत एव चाबिकल्पित इति यावत्।।**२८२**।।

तस्य स्वरूपमाह। **कर्तव्या द्विकला शम्ये**ति। तानि तानि शता प्रनिशसम्।।**२८३**।।

सन्निपातस्येति। तदुपलक्षितस्यास्य माषघातस्य पश्चिमे र्धे पाक्षिकमुपवर्तनम्।।**२८४-२८५**।।

तत्र चैककलः प चपाणिस्तालः।

अत्र **केचिदाहुः।** कदाचित् पूर्वार्धे कदाचित् पश्चिमार्धे। तेन माषघाते वान्यक्षराणि द्वादशकलासु तान्येव लयशीघ्रतया षट्कलासु प्रयोज्यानि। तच्चा(तान्या)दौ पश्चाद्वा माषघातस्येति।

अन्ये तु माषघातस्य षट्कलासु तैरेवान्तरैरन्याः षट्कलाः प चपाणिगतप्लुतादिविभागेन गेयाः। तालस्तु माषघातीय एव क्रमायात इति।

अपरे त्वाहुः। **सन्धि**स्तावदेककलेन **प चपाणिना** कार्यः। तत्र माषघातीयानामेवाक्षरा––ण्यन्यानि चेति कदाचिच्छब्दस्यार्थ इति।

त्र्यश्ररूपे भाविन्यङ्गद्वये वा सन्धायत्वेन **सन्धिः।।२८६।।**

तस्याङ्मेककको विवधो वा। अन्तस्येति। चतुरश्रं तस्य यत् प्रवत्तमङ्गं द्विकलचच्चत्पुटमुक्तं तदेव विवधाङ्गं चतुरश्रम्।।**२८७**।।

तन्नामाङ्गं पुनरपि च सन्धिताल इव वज्रमेककाङ्गतं विवधाङ्गत्वं च। अत्र वज्रस्यान्तेनैककलैककमात्राङ्गम्। तत एवाभ जनीयत्वाद्वज्रत्वम्। चतुरश्रव्यवहिता त्र्यश्रधीः पुनर्वज्रलेपेनेवानेन वद्धिकृते पि वज्रम्। सप्ताङ्गे ओवेणके **सम्पिष्टकं दशकलं द्वादशकलं** वा।।**२८८**।।

तत्राद्यस्य प्रस्तारमाह। **निष्क्राममि**ति। निशशशससससताताशताशसम्।।**२८६**।।

सम्पिष्टकं चच्चत्पुटचाचपुटादिरूपस्य स(र्व)वासचूर्ण इवात्र द्विदलवाससम्पेषणमिव ।।**२६०**।।

द्वादशाङ्गे दशकलमाह। **द्विःशम्यातालयोगेने**ति। शम्यायास्तालस्य च यत् त्रित्वमुक्तं तदपसार्य द्वित्वं कार्यम्। अत एव **नव पाता** भवन्ति। निष्क्रामश्चाद्यः। **प्रागेकादशपाताः।** निशशताताशताश.....दशकलसम्पिष्टकम्।।**२६१**।।

सम्पिष्टकाक्षरैरेवैकलप चपाणिनापवर्तनं वज्रवद्भावादेकाङ्गं तथा वज्रवदिति। आद्या **प्रवेणीति** विवेधन। अपरा तु वत्तेन।।**२६२**।।

तत्राद्यायास्तालः **प चपाणिर्यथाक्षरः**। अपरस्याः स एव **द्विकलः**। यदि **वः मिश्र** इति। एककलद्विकलच चत्पुटसमुदायरूप इति लक्ष्यते। प्रकृष्टा वेणीति **प्रवेणी**। वेण्या शिरो लक्ष्यते। अनेन प्रधानमिदमङ्गम्।

ननु यदि द्वयोरपि तालस्तुल्यस्तर्हि को विशेष इत्याह। **प्रयोगो ङ्गवशानुग** इति। अद्यायां विवधो न्यस्यां च वत्तमित्यङ्गभेदाद्भेद इति यावत्।।**२६३**।।

पाक्षिकं भेदान्तरमप्याह। **अन्ते वा स्या** इति। द्वितीयस्याः पर्व(प्रवे)ण्या **अन्ते उपवर्तनमा**वत्तिः कार्या। तथाभूतात् प्रकरणात् **तन्त्रान्तरेषु** च स्वकण्ठोक्तेनैवास्य द्वादशकलत्वोक्तेः।

प्रवेण्या अवपातश्च द्विकले स्युरिहोत्तरे।

इति। तदत्रान्तस्य द्वितीयपादस्य तावद् द्वादशकलत्वम्। तच्चापरान्तकप्रतिशाखाया द्वादशकलत्वे लिङ्गमिति तदेतत् प्रतिज्ञानं(न) सहन्ते। प्रकरणं द्वादशकलतां निश्चिन्वत्

द्वितीयप(पा)दतालेनेत्यस्यैव विशिष्टे विग्रहे स्थापकम्। यतो द्वितीयं पादस्य द्वितीयपादः। अपरमर्थं द्वादशकलपादस्य। **द्वितीयततीये**ति (अष्टा.२.२.३) समासः। तत्र प चपाणिना **द्वितीयपादतालेन** द्वादशकलेनेति सम्बन्धे द्विकलप चपाणिताल एव लभ्यत इति। प्रताशनितानिशताप्रनिस उपपातः।

अन्ये तु प चपाणिग्रहणं नानुवर्तयन्ति। तत्राद्यपादद्वितीयार्धतालमुपपातं प्राहुः। अनिविता आताविशतानिविश उपपातः। तदुक्तं **दत्तिलाचार्येण**

उपपातद्वितीयस्तु तालः कैश्चिदुदाहृतः। (दत्तिलम् २०८)

इति द्वितीय इहान्यपातद्वितीयार्धनिविष्ट इत्यर्थः। एतत्त्वबुद्ध्वा **दत्तिले विवरणकृतो भ्रान्तास्**तालं विशेषं व्याख्यातवन्तः। वज्रतालेनान्ताहरणग्रहणादेककलाप चपाणिरेकाङ्गत्वं च लभ्यते। चतुर्विंशे यद्यन्तं चिकीर्षितं तदेवं कार्यमिति। **अन्ये** पि नोच्यते नात्रान्ताहरणमित्ययमसौ विशेष इत्याहुः।।**२६५**।।

अथ रोविन्दकं कक्षयति। **रोविन्दके त्विति। षण्मात्रा** इति। **चतुर्दशे(शो) पि प चम्या** (भ.ना. ३१.२६८) इति वक्ष्यमाणत्वात्। चतुष्कला त्रिमात्रा षोडशभिः कलाभिः। तत्र षट्सु पातानाह। अथार्धे न्ते **चेति। यथाक्रममिति** वचनात् सर्वासु मात्रास्वर्धे तालान्ते शम्येति। **आचार्या**न्तरमतानुसारेण व्याख्या चेति यत् **टीकाकारेण** कल्पितं तालो र्धो न्ते चान्यासां शम्यार्धे न्ते न तुर्यस्यां तालो र्धो न्ते प चम्यामिति तदुपेक्ष्यमेव। तथा हि **दत्तिलाचार्यः।**

तथा र्धे न्ते च मात्राणां तालः शम्ये यथाक्रमम्। (दत्तिलम् २११)

इति। **प चम्यां चतुर्दशो पि ताल** इत्येकादश पाताः। प चसु **षष्ठी** त्वष्टपाता मात्रेत्याह।

चतुष्कला न्त्यया तुल्या षष्टी मद्रकमात्रया।

इति। चतुष्कलमद्रकमन्त्या योक्ता मात्रा तुल्ल(ल्य)तालात्र **षष्ठी**ति।।**२६६-२६८**।।

पात इति षण्मात्रः। अत्राष्टकल**मुपोहनम्**। अङ्गनिबद्धकेन पातस्यैव प्राधान्यात् मात्राविभागस्य तत्सम्पादनकृतित्वेन गलितत्वात्। प्रत्युपोहनं **द्विकलं** यदन्यैः कल्पितं तन्नाट्यमतिक्रमतीति **मुने**र्भावः।।**२६६**।।

प्रतिपातमेकैम क्रियमाणे सति मात्रान्तात् सन्निपातः। स च विदारीकत्वाद्विवधनिबद्धो भवति। पातद्वयापेक्षिका हि मात्रा। अतस्तदाह–

पाताश्च सन्निपाताश्च विवधैककयोजिताः।

इति। एतच्च बाहुल्यातिशयेनोक्तम्। प चम्या हीति पातत्वं षष्ठया ष्टपातत्वमिति कथं विवि(व)धयोगात्। तत्र पादे यं प्रस्तारः। ओ ओ ओ ओ ओ ओ ओ ओ(८) आनिविप्र आनिविश आनिविप्र आनिविता आनिविप्र आनिविश आनिविप्र आनिविता आनिविप्र आनिविश आनिविप्र आनिविश आनिविप्र आनिविता आनिविप्र आनिविश आनिविप्र आनिविता आनिविप्र आनिविश आशालिता आतालिश आताविश तानिविश संता।

अथ द्वितीयं पादं निरूपयिष्यंस्तस्याद्यं भागं तावदाह। **वर्णानुकर्षो ष्टकलस्त्वन्यः प्रस्तार** इति। वर्णम्य गीतिवर्णस्य गीतिलक्षणस्यानुकर्षात् प्रत्यनयनप्रत्यासत्या प्राप्य

पावान्त्यमात्रापर्यन्तं कलाष्टकनिविष्टस्य द्वितीयपादप्रथममात्राद्यकलात्मकोपोहनात्मनि पुनर्योजनं सो न्य इतर गीतिकासाधारणः प्रस्वारो नामाङ्गम्। प्रकर्षेण स्वरणं शब्दस्येतिं सामान्यत्वं हीति त्रिगीता(तो) भवति प्रथममादस्यान्ते द्वितीयस्याद्यन्तयोरिति।।**३००**।।

द्वितीयपादस्य स्वरूपमाह। **तुल्यवर्णोपवहन** इति। सैव गीतिस्तदेवोपोहनं स्तुतिपदानि त्वन्यानीति यावत्। एतत् पादद्वयं शकुनिशरीरस्येवावश्यं स चारकमिति शरीरं वक्तव्यम्। तदाह। **शरीरतालः कर्तव्यः प्रस्वार** इति। प्राच्यगीतानुकर्ष इति यावत्। **अस्य विशेषत** इत्यसाधारणेनोक्ता(क्तः)।।**३०१**।।

ननु कौ सौ शरीरतालो यः पूर्ववर्णाकर्षणेन प्रस्वाररूपः क्रियत इत्यत आह। **द्विकलेनैव प चपाणिना कर्तव्य** इति। शरीरताल इति विशेषः। प्राच्यवर्णानुकर्षात् प्रस्वारक्रिया क्रियत इत्याह। **कलाद्वादशेति। अस्येति** प्रस्वारस्य।

एतदुक्तं भवति। द्वितीयपादस्य षष्ठ्यामल्पासु द्वादशकलासु या गौत्या द्वादशकला द्विकलप चपाणितालेन गीयमाना उपोहनं च षट्केन प्रागुक्ता। यतः प्रधानभूतास्ताः शरीरमित्युच्यत(न्त) इति।।**३०२**।।

तदाह। **रोविन्दकशरीरन्तु षट्कलोपोहनमि**ति। तस्या शरीरस्यादिरुपोहनाख्यस्तत्र **विवधो वत्तं** वेति प्राक्तनं स्मारितम्।।**३०३**।।

आकारवत्तमिति व्याख्यातम्। वत्ताख्यं वर्णं आ इत्येवंभूतैः स्तोभैस्त्रिश्चतुर्वा प्रयुक्तैः कार्यम्। यदाह। **चतुष्कं त्रिकमेव चे(वे)**ति। नातो न्यूनमिति यावत्। अस्येत्याकारवत्तस्य मध्यस्थितस्याङ्गचतुष्कृतस्**योपर्यध**श्चान्योन्यविशिष्टान्यङ्गानि कुर्यात्। शरीरे प्रस्वारः षोडशाङ्गता चेत्यवधानं सम्पाद्यमित्यत्रावन्या(श्यं) विधेयम्।।**३०४**।।

तत्रैककलप चपाणिना वर्णाङ्गैर्यथारुचि द्विस्त्रिर्वा या(आ)वत्तमनावत्तमेव कार्यम्। तदाह। **अविशेषनिवत्तं तु शीर्षकमिति।।३०५।।**

अस्य विशेषमाह। **आकारैककमस्यान्त** इति। वत्तस्यावरोही **प्रवत्ताख्यो** भेद उक्तः। सो स्य शीर्षकस्यान्ते **नियमात्** कार्यः। एकाकिन्याकारे स्तोभपदे आकार(रे) एकको यस्याकारस्**तदाकारैककमि**ति बहुव्रीहिः। **एकक**शब्दो शब्देन संख्येति नास्य पूर्वनिपातः।।**३०६**।।

एतदुपसंहृत्यान्यदासूत्रिकं दर्शयति। **मुखप्रतिमुखौ स्यातामुल्लोप्यकवदि**ति। **उत्तरे** आदो(दौ)मुखप्रतिमुखविभक्ता षोडशकला मात्रा।।**३०७-३०६**।।

अनन्तरं द्वादशभिः कलाभिः **शाखा।** नत्र **पाताःषडु**च्यन्ते। **तस्यां तु त्रि(द्वि)कलस्ताल** इति कला। द्वादशकलेन प्रकरणं द्विकलः प चपाणिराक्षिप्तः। न ह्यत्र प्रकरणे चाचपुटचतुष्कलः क्वापि श्रुतः। तेनात्र त्रि(द्वि)कलं विभागोपलक्षणमेव द्विकलत्वादिप्रकर्यन्तमात्रवदिति। चतुष्कलत्वप्याह। **तथै**वेति। प्रतिदिशनिशताप्रनिशं शाखा। प(पा)ठतो त्र वर्णाङ्गानि षट् परतो द्वादश। एवंभूतैव **प्रतिशा(खा)न्यपदा**। अत्र च

रोविन्दकानन्तर्याच्छरीरत्वमुपजीव्यत इति वर्णानुकर्षात्मा प्रस्वारः प्रतिशाखायाः कार्य इत्याहुः।।**३१०-३११**।।

तर्हि प्रस्वारस्यात्र कियन् मानमित्याह। **अविशेषनिवत्तिश्चाप्यस्यान्तो नियत** इति। प्रतिशाखात्मक एवात्रान्तःसंहरणकारित्वात्। स चाविशेषेण वर्णनिवत्तिरूपवर्तनात्मा यस्यास्तादक् कार्यः। स च **नियतः। अन्ये** तु **दत्तिला**द्यनुसारिणो व्याचक्षते। शाखाप्रतिशाखात्मा न्तः पथग्भूतः **सन्नियतः**। चकारेणावत्या न्तश्च स्थित आदिभूतो यदि भवेत् तन्नियतम्। अनियतो न्तस्त्र्यश्रादीनामन्यतमो यथारुचि कर्तव्य इति। **अस्ये**ति। शाखाप्रतिशाखमपश्यन्त इति प्रतिशाखायाः समाप्तौ। **मध्य** इति शाखाप्रतिशाखे। अन्तराशीर्षकमिति शीर्षकद्वयम्। **अन्ये** त्वेकमेव शीर्षकं तथा कार्यं यथा.... न्ते मध्ये च कृतं भवतीति व्याचक्षते। **तेन** शाखान्ते शीर्षकं कार्यमित्युक्तं भवति।।**३१२**।।

अथा त्र मार्गवैचित्र्यनिरूपणार्थमाह। **तालो यं दक्षिण** इति। सप्तरूपतालः **परिकीर्तितः। स दक्षिणे ता**वद् बाहुल्येन चतुष्कलत्वात् तद्गततत्वाच्च दक्षिणस्य दक्षिणेन चात्र विलम्बितो लयो वक्ष्यते। तेन विलम्बिते लये तावदयं प्रयोगः। अथ मध्यद्वयमप्यनुजानीते। **य एव दक्षिण** इति। विलम्बितलयनिष्ठो यं ताल उक्तः। **स वत्तावपि**। न तु दक्षिणे सौ तालः।।**३१३**।।

तस्य तर्हि वत्तविषयता विदग्धा। सा हि द्विकल एवोचितेत्याशङ्क्याह। **कलार्धं तु कला** तत्रेति। दक्षिणे यत् **कलार्धं** तत्तु वार्तिके कलारूपं कर्तव्यम्। न च सार्वत्रिकमेतदिति दर्शयति। **विशेषो न्यश्च कीर्त्यत** इति। वर्तमानसमीप्ये पवादो त्र वक्ष्यत इति यावत्। **कलार्धं** तु **कले**त्युक्तम्। तत्र स्तुतिपदवर्णाङ्गादेरङ्गीकरणं प्रतिकलमिति यो विपरीतं बुध्येत् तं प्रति बोधयितुमाह। **अर्धयोगस्तु तत्कालादिति। यो यमर्धयोगः** प्रकीर्तितः **कलार्धं तु कला तत्रेत्य**मुना वचनेन स दक्षिणकलादर्धकालो मन्तव्यः। स्तुतिपदवर्णाङगादिसर्वखण्डमेव केवलं कालमात्रमेव भिद्यते। अत एव लयभेदमात्रमिति तात्पर्यम्।।**३१४**।।

अपवादो वक्ष्यत इत्युक्तम्। तमाह–

उल्लोप्यकोत्तरमुखे हित्वा युग्मैककं तथा।

इति। इह परिमिते पि तालशरीरे यत्र वर्णाङ्गभूतस्वतन्त्रविलम्बितलयेन विना तत् संवादम्। एवं स्थिते उल्लोप्यकस्य यद्विंशत्यङ्गपरत्वमुक्तं तत् प्राधान्यान् **मुखे** तावन्निवेश्य तच्च परिमितं मात्रार्धरूपत्वादुत्तरे प्युल्लोप्यकवद्भावादयमेव विधिः। **युग्म**शब्देनात्रौवेणकाङ्गं च चतुरश्रं नाम। तत्र च स्वरूपेण विविधाङ्गमुक्तं लक्षणम्। तस्य चतुरश्रस्य **प्रवत्ते यो विधिः स्मतो(तः)। विविधाङ्गेन तेनैव चतुरश्रकमिष्यत** (भ.ना. ३१. २८७) इति। तस्यैव **च सप्ताङ्गं द्वादशपर(कल)मि**(भ.ना. ३१.२८८)त्यत्रोद्देशे **पादः सन्धिर्माषघात** (भ.ना. ३१.२०८) इत्यत्रैकं चतुरश्रं चेत्युक्तम्। तदेतदतीतग्रहेणावपाणिना पा तत्स्वरूपातिरिक्तं कार्यम्। तच्चेत् मध्यलये न क्रियेत तद्विषमीभवेत् प्रयोगः। तथाहि।

प्रवत्तसम्बन्धी तत्र तालः। प्रवत्ते चोद्घट्टचच्चत्पुटयोगस्तालोपलक्षणमात्रम्। न तु त(य)थाक्षरम्। तथापि द्विकलमन्यथात्वेन चतुरश्रं स्यात्। द्विकलमपि तच्चतुस्कलत्वादङ्गिनस्तदौचित्याद्विलम्बितमेव प्रयुज्यते। एषा च सर्वाङ्गेष्वेककद्विकलतायोगे पि व्यनस्था। ने(ना)त्र यदोवेणकपादे मध्यमलयेन क्रियते तदेककं तल्लयानुवर्ति चेत् तदङ्गिनस्तदङ्गताङ्गस्येति। तस्मात् पूर्वोपात्तां च स्थितिं चेच(द)ज(मु)ज्झु(ज्झ)तीति। उल्लोप्यकं च भूयो ङ्गानतीतशरीराणामुपलक्षणम्।

उत्तरं तु तस्याङ्गान्यप्राप्यतिदेशादिकं स्पष्टमिदमुपात्तम्। **युग्मैककम**ङ्गानामुपलक्षणम्। एवं विलम्बिते मध्ये च सप्तरूपं प्रयोज्यम्। तथाहि। **यस्तत्र तु लयो मध्यस्तत्प्रमाण(णा)कले**ति (भ.ना. ३१.६) तावन् मध्यमः। अत एव तत्र वर्तमानत्वाद्वत्तिव्यवहारः। विधिरपि भर(व)तु। समस्तं वर्णतालपदादि(कं दष्टफले) केवलवैचित्र्या(या)यमस्य प्रयोगो न चादष्टफले वैचित्र्यं शासितुमुचितमिति। अथान्यथा मार्गभेदमाह–

चतुष्कलं स्याद् द्विकलं त्रिकलं च यथाक्षरम्।
रोविन्दकोल्लोप्यकयोर्मद्रकोत्तरयोस्तथा।
शरीरेषु विधिर्ह्येष।। इति।

केचित् यस्य येनार्थसम्बन्ध इतीत्थं योजयन्ति। रोविन्दकोत्तरयोः प्रस्वारात्मकं शरीरं द्वादशकलम्। तद् **द्विकलम**पि तद्यथाक्षरं स्यात्। स(प्रस्वारः)। **उल्लोप्यकमद्रकयोस्तु चतुष्कलं शरीरं तद् द्विकलं** स्यात्। **न** त्वेककलतां तन्नेयम्।

नन्वेककलं तयोरुक्तमेव। सत्यम्। इदं त्वन्यद्रूपं यद्विका(रा)त्मकं नाम। चतुष्कलगतान्यन्यदे(दै)व हि वर्णाङ्गस्तुतिपदानि द्विकलीक्रियन्ते। तथाहि। **देवं रुद्रं प्रणमामि सदा इति यश्चतुष्कलः** पादभागः स एव। नैव गीत्यान्तरिकयोगेन द्विकलः पादभागः क्रियते।

नन्वसावेककलीकर्तव्य इत्युक्तः। द्विकलं त्वेककलीकर्तव्यमित्युक्तमेव। रोविन्दकोत्तरयोस्तु विकाररूपमेककलमस्ति न तु प्रतिरूपमिति।

अन्ये त्वाहुः। द्वादशकलत्वे चतुष्कलत्वमेव। यदाह।

अनादेशे तु सर्वत्र कर्तव्यः स चतुष्कलः।

इति। द्विकलता केवलतालपातोपलक्षणाय। तेन चतुर्ष्वपि चतुष्कलं यदुपरान्ते तु वाचनिक एवाविकारः। तदाह। **शेषेषु प्रकृति**रिति। चतुष्कलत्वे चेत्यर्थः।।**३१५-३१६**।।

ननु प्रकृतिर्नाम स्वरूपमुच्यते। तच्च मापघातस्य द्विकलं द्वादशकलत्वादा(वा)वापविक्षेपाभावाच्च न चाचपुटगता येन चतुष्कला स्यादित्याशङ्क्याह। **प्रकृतावपी**ति। **द्विकलेन।** अपिशब्दादेककलेन च । उपलक्षितायामपि प्रकृतौ **चतुष्कलमेव** नेयम्। निर्वाह्या स्यादिति न्यायत एव सम्भाव्यत एतत्। प्रधानानुविधानमङ्गानामिति।

नन्वमादान्तप्रकर्षणमोवेणकेषु सर्वथैव वत्तियोगो नास्तीति कथमविशेषणोक्तम्। य एव दक्षिणे तालः स एव। वत्तावपि स इत्याशङ्क्याह। **कालेनैव भवे**दिति। चतुष्कले मार्गस्थितानामपरान्तकादीनाम(नां)वत्तिविषयो यो र्थयोगः। **एवमि**ति पूर्वमुक्तः। सकलार्थात् थरणाद् भवेत्। एवं संख्या तु कलानामन्यूनैवेति न विकार योगः।।**३१७**।।

वैचित्र्यान्तरमप्याह। **वत्तौ चतुष्कलो योगो दक्षिणे स्यादि**ति। चतुष्कले पि प्रयोगे वचनेन यो वत्तिमार्ग उक्तः। तद्यथा। अपरान्तके

वत्तौ निवत्तियोगश्च गते वस्तुचतुष्टये। (भ.ना. ३१.२४८)

इति। स कदाचिद् **दक्षिणे** स्यात्। यच्छेदमर्ध(र्थ)योगेन दक्षिणस्यापि वत्तरूपत्वमुक्तम्। तन्मुखनाम्न्यङ्गे उपोहनप्रत्युपोहनेषु च न भवतीति सोदाहरणं दर्शयतीति। न **मद्रकोल्लोप्यकयो**रिति। **न मुखोपोहनेष्**वयं विधिः। मुख उदाहरणमुल्लोप्यकमुपोहनेषु मद्रकम्।।**३१८**।।

अथ चित्रमार्गस्थिरस्यैककलस्य विकारमाह। **यो दक्षिण** इति। **दक्षिणे यस्तालविधि**श्चतुष्कल**वत्तौ** च द्विकलस्तौ चित्रे एककले क्रमेण युगपद्वा भवतः। एतदुक्तं भवति। एककले यान्क्षराणि तान्येव द्विगुणतालयोगेन। तावत्ये(न्त्ये)व कलारूपे निष्क्रामप्रवेशने कदाचिद् द्विकलतया कदाचिदावापाद्यध्यावापेनचतुष्कलतया गेयानीति व्यस्तपक्षः। क्वचिद्भागे द्विकलतया क्वचिच्चतुष्क(ल)त्वेनेति **समस्त**पक्षः। ए(अ)त एव चित्रमार्गेण।।**३१६**।।

वैचित्र्यात् सामस्त्यस्यापवादमाह। **शाखानिवत्तादि**ति। शाखानिवत्तं प्रतिशाखातन्त्रेण च निवत्तमुपवर्तनं तेन प्रतिशाखायामुपवर्तने च **चित्रमुभयमार्ग**युक्तं भवतीत्यर्थः। उपसंहरति। **इति मार्गत्रये** पीति। उक्तेन वैचित्र्येण **सप्ता**पि वितस्तादिमार्गत्रयभा जीति यावत्।।**३२०**।।

अथ भेदान्तरमध्याह। **द्विविधा प्रकृतिश्चे**ति। **अस्ये**ति सप्तरूपस्य स्वभावः। एकार्थपरस्परान्वितार्थवस्त्वङ्गयुक्तं **कुलकम्** विपरीतं **भेद्यकम्।।३२१।।**

तत्रापि प्रत्येकं त्रयो भेदा इत्याह। **निर्युक्तमि**त्यादि।।**३२२**।।

बहिर्गीतेनोपोहनप्रत्युपोहनात्मना **ङ्गैः** शाखाप्रतिशाखाभ्यां च **युक्तं निर्युक्तम्।** निःशेषस्वरूपयोगाद्वस्तुशाखामात्ररूपमुपोहनान्तैरङ्गैश्च **हीनमनिर्युक्तम्।।३२३।।**

उपोहनैरेव हीनं **पदनिर्युक्तम्**। अर्थप्रतीतिनिबन्धनपरिश्लेषतायोगात्। एतदुपसंहरति। इत्येतदिति। **प्रकृतं** प्रकारो भेद इत्यर्थः। ते सप्तानां भेदाः। तद्यथा मद्रकादिति(दीनि) चत्वारि त्रिधैककलादिभेदात्। प्रत्येकं पुनर्विकारभेदात् त्रिधा। पुनर्मार्गभेदात् त्रिधा। पुनर्नियुक्तादिभेदादिति त्रीणि शतानि चतुर्विंशत्यधिकानि वस्तुसंख्यया। अङ्गपरावरवैचित्र्यसङ्ख्यायाश्च भेदाद् भूयांसो भेदाः। ते त्वनुपयोगान्न प्रतिपदं लिखिताः। अन्येषु त्रिषु मार्गभेदाद्विकारभेदाः। सनिर्युक्तादिभेदास्वयस्त्रयो(दास्त्रयो) भेदा इत्येकाशीतिः। तत्राप्युक्तवद् भूयांसः प्रकाराः। प चाधिकानि चत्वारिंशतानि प्रधानभेदाः। ते च सर्व एवोपभेदा अप्यदष्टोपयोगिनः। अङ्गभूयस्त्वं तु फलभूयस्त्वायेति न्यायः।।**३२४**।।

अथ सुकुमारप्रायाल्लास्यद्वारेण पूर्वरङ्गोपयोगिनीं **पाणिकां** लक्षयति। अष्टाङ्गेति। अवरनः **षोडशा**ङ्गेति परतः। अङ्गानि शीर्षकादीनि तालाङ्गानि चैककादीन्यङ्गगात्रेभ्यस्तु.....देहावयववाचिनो ग्रहणान्निर्दिष्टम्। मुखत्वमस्याः शरीरमात्रायाः षोडशकलायास्तदाह। **मात्रायुक्ते**ति। सा च **मात्रा** ओजा भवति यदा सादयो युग्माः द्विगुणाः। एवमस्या असंख्या भेदाः।

अन्ये त्वाचार्यास्तां (**आन्तिकी चैव पाणिके**ति पठन्तः भ.ना. N.S. Edition P.521) सङ्कुचितमतयो व्याचक्षते। आदौ मात्रायुक्ता मात्रया युक्त(क्तं)द्वयमस्यां तेन रोविन्दकमात्रकलमुखं चेति द्वे मात्रे। ततो देहमाह। ओजस्त्र्यश्रो युग्मः षट्कल आद्यत्वात् प चपाणिर्यस्याः। कियानसौ प्रमाणतः। प्रमाणानि चत्वारि **न्यायप्रजापतेरक्षपादस्**येति (न्यायसूत्रम् १.१.३) चत्वारः प चपाणयो देह इति यावत्। अष्टाङ्गेत्यादौ वर्णाङ्गं षोडश प चाङ्गे यस्यां तेनौवेणके पदे शीर्षकमाषघातप्रायस्ततोपवर्तनसन्धिचतुरश्रकवज्रानन्तरं यदष्टमं सम्मिष्टकं नविद्यते यस्मात्। षोडशं वान्ताहरणम्। कस्मादियं पाणिका। आह **स्तुतियुक्ताः(क्ता)।** तेन पा(प)णिस्तुतानि(वि)त्यतो (पा.धा. ४३६) भावे घुडि(ठक्)मत्वर्थाः(र्थः)। पठन्ति च **रूप**मिति। **स्तुतियुक्तेत्य**नेन च(क)क्षीयत्वमस्याः कथयति। सुकुमारप्रयोगे हि पूर्वरङ्गे तदङ्गे वा चारीप्राये नियमे च प्रधानं सुकुमारत्वात्। एवं च गीतकतुल्यकक्ष्यतयैवेयं लक्षयितुं युक्ता। एवं तावत् प्रधानयोगो व्याख्यातः। तदनन्तरं तदनुयायिन एव र जनाप्रधानस्याप्रयोगेन भाव्यम्। तत्र यथाकथ ंचिदत्रै(त्रै)वाद्यानुषक्तमेव वैचित्र्यं प्रायः। तत्र गीतकासारितादीनां छन्दकरूपमनुयायि। पाणिकायास्तु चतुष्कलालास्याङ्गानम्।।**३२५**।।

तत्रान्यस्य लक्षणमाह। **सर्वेषामि**ति। आसारितवर्धमान**गीताना**मित्यर्थः। **आसारित**वर्धमानयोरपि **हि** वर्णाङ्गकृत(तो) योगम(गो)स्त्येव। गीतत्वं केवलमासारणवद्भिभ्यां व्यपदेशः प्रयोगे प्राधान्यम्। अत एतन्नत्तप्रयोगश्छन्द(गे छन्दत)इच्छातः प्रवर्तितत्वाच्छन्दकम्। जातावेकवचनम्। तस्य च यता यदा त्र्यंशं शरीरं क्रियते तद तालङ्गानां वर्णाङ्गानां चान्यतमानि चत्वार्यङ्गानि। अथ चतुरश्रमेव तत्र चैव कारेणानेनाधिकव्युदासः। चतुरश्रविशेषमाह (**त्र्यश्र** इति)। प्रधानत्र्यश्रचतुरश्रभावस्यानुवर्तनं विशेषः।

अन्ये तु वैचिव्यातिशयेन वैपरीत्यं विशेष इत्याहुः। **अन्यत्रा**प्युक्तम्। मुखपादाः शीर्षकसंहरणान्ता यथारुचि छन्दके पूर्वगीतानुवर्तिन्यथ विपर्यय इति।।**३२६**।।

अथ सुकुमारप्रयोगोपक्रमप्रधानपाणिकानन्तर्भाविप्रयोगलास्यगानं दर्शयितुं चतुष्पदां लक्षयति। **चतुष्पदा तथैकाङ्गा त्र्यङ्गा चे(वे)**ति। तथेह स्वरुच्या तस्या एकमङ्गं त्रीणि वाङ्गानि च व्यस्तान्यनन्वितानि तावन्त्यन्तराभिधेयपदानि तस्या यदा छेदकरूपा यदा कुलकरूपा तदा विपरीतानि। तदाह। **अङ्गैर्व्यस्तै(समस्तै)र्वे**ति।।**३२७**।।

शरीरं चास्यां चतुरश्रं वा **शङ्गारभूयिष्ठ**मिति **भूयिष्ठ**ग्रहणात् कामावस्थादावपि परिग्रहो न हि तदैकरूपत्वे भूयिष्ठव्यवहारः। **स्थितभूयिष्ठं भोजन**मिति द्रुतादिलयशद्वाच्च वत्यादिसंज्ञा। तत्करचरणप्रयोगभेदः पक्षे पा(स्या)त् प्रयोजनम्। तथाहि। द्रुतानां प्रयोगस्य प्रकर्षेण वर्तनं करचरणक्रियाबहुलत्वाद् **विलम्बिता** नाम विपर्यये मध्यमानां तु द्वयमिति। तत्र द्रुता त्र्यश्रा खण्डा। चतुरश्रा नकरग.....कमध्यापये। आक्षिप्तिका परिगीतिके विचलिते पकृष्टोत्थित इति षोढा ङ्गभेदा द्वादशधाभेद्यकुलकभेदाच्चतुर्विंधतिधा। पदे चतुष्कयोगाच्चतुष्पदीति। अनया च **विशाखिलादि**लक्षितं सर्वमेव लास्यगानं स्वीकृतमुपलक्षितं च।।**३२८-३२६**।।

अन्ये तु चतुष्पदा तथेति (भ.ना. ३१.३२७) वचनाद्गीतककारि.....स्कन्दकप्रक.....कादीनि मन्वते। न तु तत्र प्रयोगे चतुष्पदे युगपत् प्रयुज्यत इति मनसि कृत्वा तद्विषयं तद्वैचिव्यं तत्काव्यबन्धं च दर्शयितुमुपक्रमते। **लास्यमित्येवे**ति। **यदिति यस्मादिति** तस्मात्। **एव**कारो **यथाक्रममि**त्यस्यानन्तरः। तदयमर्थः। यस्मा**ल्लास्यं पूर्वं कीर्तितं** लक्षणं च तस्माद्यथाक्र**ममेव प्रयोगमधुना वक्ष्यामी**ति।।**३३०**।।

तत्र पूर्वं **यत्ताण्डवाध्याये** (भ.ना. आ.४) **दशरूपके** (भ.ना. अ.१८) इह च तदेकीकुर्वन् स्मारयति। **लसनाल्लास्यमि**ति। **लसनं** क्रीडा चित्तसंश्लेषः स्त्रियः पुंसि तस्य वा तस्यां भावः। स्त्रीपुंसेत्यभिधाने तु शङ्गार एव सङ्गहीतो भवेत्। तेन लासमर्हति तत्र साधु **लास्यम्।** अनेन **तुर्याध्यायोक्तं** स्मारितम्। स्त्रीपुंसयोस्तु संलाप इति। एकार्थः पथगर्थश्चेत्येतद**ध्यायो**क्तम्।

ननु पथगर्थत्वे न्योन्यसम्बन्धे वैरस्य स्यादित्याशङ्क्याह। **तदङ्गैः पथगर्थ** इति। वचनस्य पश्चात् परिपाट्या वचनान्तरमित्यनेन क्रमेण यद्यपि सङ्गतिर्नास्ति तथापि स्त्रीपुंसभा(पुंभा)वरूपे प्रधाने र्थै सर्वमन्वितमेव। तथा च डोम्बिकास्वेका(कासु स एवा)र्थः प्रधानभूत इति **चूडामणौ** स्पष्टमेवोक्तम्। **चोरिअमिकुणभवं मह सा कुकुहे मितइ** (चौर्यमैथुनभवं महत् सा ककुदे मित्रे) इति। तथा च चिरन्तनो यं.....दयप्रवाद(दः) **पडमचूडामणिया**(प्रथमचूडामणिना) इति। (तदेतद्) **भट्टतोतेन काव्यकौतुके** वितत्य दर्शितं च **आसारैस्तु न.....ष्यत** इति श्लोके। **शास्त्रान्तरे** चैवं प्राधानाङ्गान(नां)प्रधानानुयायिनामन्योन्यमनुनयः सन्मत एवेति यावत्। तत्र स्त्रियाः पुंसि भावो यथा **फलादि तरुणी अणसंछओ** (फलादि तरुण्यनुसंक्षयः) इत्यादयः।।**३३१**।।

पुंसि स्त्रिया अन्योन्यं यथा सिद्धा कटकेषु यथा वा **सोल्लासा मल** इत्यादौ। **भाणवच्चैकाहार्यं स्यादि**त्यनेन संध्यध्यायोक्तं (भ.ना. अ.१६) स्मारितम्। भाण इवैकप्रयोज्यमिति। एकेन पात्रेण हरणीयं निर्वाह्यमिति यावत्। **ऊह्या(ह्य)व**स्त्विति। स्वशब्दाभिहितव्यङ्ग्यो र्थः। प्रधानाभिद(ध)छेकोक्तिबहुलमिति यावत्। तथा

सन्तउपच्छइ विहुवि(पि)कअइवेच्च अळज्जिआए हुइ प च।
सन्तव करुणा कलजि(पी)अमकुविन्दोपउख्खेख्खाण।

वेरणुलो अओ वासलति वेझिमिमअरनयसरगुणिहतं महअम्।।
(सन्तापपक्षे विधुपिकालिवच्चालज्जिताया भवन्ति प च।
सन्तापः करुणा कलपीतमधुवत् दोषोत्प्रेक्षणम्।
वैरानलस्ततो विलसति वैरिणमिममनवसरगुणहतं महान्तम्।।)

इति। अत्र हि दूत्याः स्वशब्देन भावी भाव उक्तः। छेकोक्त्या तु नायिकान्तरोद्भेदेन नायकस्य मूर्खत्वं स्वसख्याः अनुरागित्वं सौभाग्यं सुरक्षितत्वं चेति। यदिदं सोल्लासामला इत्यत्र सोत्प्रेक्षया न्यमवियोगः शोभावहत्वमौचित्यं च (चेति तत्) वस्तूत्पाद्य वस्त्विति वा। **एकाहार्यमि**ति। पात्रान्तरमत्रोक्तं पूर्वं नेति भावः। अत्र दश लास्याङ्गानि **सन्ध्यध्याये** (अ. १६) वैचित्र्या(द्यङ्गोपजीवेन) नाट्यसंस्काराय निरूपितानि। इदं तेषां लक्षणम्। क्षेत्रमारुह्यासारितवर्धमानगीतिकवर्णस्योद्धतपूर्वरङ्गोपजीविकाभिनययोगिनो यथालक्षणम्—ध्याये यथासुकुमारपूर्वरङ्गोपयोगिनो लास्याङ्गवर्गस्येति। न ह्यत्र गान्धर्वमात्रं लक्ष्म। सामकपाल देरलक्षणात्। सापि ध्रुवोपयोगी(गिनी) मागध्यादीनां लक्षणाभावात्। न च स्वतन्त्रं गान्धर्वमिव लक्षणार्हम्। न तु वेदत्वात् तत्र **गेयपा(प)दं** लास्यम्। पूर्वरङ्ग इत्यनुद्भिन्नतत्वं वाक्यं **टीकाकृतः**।

इदं त्वत्र तत्त्व**मुपाध्याये**र्निरूप्यते। इदं द्विविधं हि नाट्यम्। उद्धतं सुकुमारं च। वीरशृङ्गारयोरेव नायकगतयोरशेषपुरुषार्थसिद्धिषु व्यापारात्। तत्र प्रथमे समुद्यतःपूर्वरङ्गी महेशचरितप्राधान्येन। यथोक्तं **प चमे**(चतुर्थे)। **माहेश्वरैरङ्गहारैरुद्धतैरि**ति (भ.ना. ४.३११) **महेश्वरस्य चरितमि**ति (भ.ना. ४.३१६) च। शृङ्गारप्रधाने तु नाट्ये सुकुमार एव पूर्वरङ्गो यदि हि प्रायेण **प चमे** लास्यं सूचितम्। तं वागङ्गनिरूपणेन तत्र ह्युद्धत समवकारः सूचितः। पूर्वरङ्गो **मुनिना** भगवदग्रे प्रयुक्तः। तस्यैव **परमेश्वरेण** चित्रता कृता। तदभिप्रायेणाह। **गीतानामि**(ति)श्लोके (भ.ना. ५.१३)। इह समुद्धते गीतकं वर्धमानं तत्र सुकुमारमिति दर्शयितुमिहेत्युक्तम्। तेन साधारण्यं चारीमहाचार्योः समुद्धताङ्गानां निरूपणेनौद्धत्यं च वर्धमानादिप्रयोगेण पूर्वरङ्गस्य **प चमे** निरूपितम्। तदुपयोगी चाङ्गसार्थस्तत्र तन्निरूपणे निर्णीतः। अधुना सुकुमारोपयोगि दर्शयितुं ग्रन्थान्तरमिति।।**३३२**।।

तत्र गेयपदं तावदित्युपक्षिप्तस्य दर्शयति। **स्थापित** इति। **पटे पसारिते** सति भाण्डस्य त्रिपुष्करस्य विन्यासे यथास्थानं कृते ब्रह्मस्थानमवेक्ष्य पूर्वदिशि नर्तकीनां पार्श्वद्वये च वैणिकानां गायन्तीनां च।।**३३३**।।

मदङ्गेषु दत्तमार्गेषु चकाराद्वीणायामासारितायामितीयता प्रत्याहारादीनां दष्टार्थानामवश्चकर्तव्यतोक्ता। यत् पुनरेव तत्परितोषार्थमदष्टार्थं च बहिर्गीतविधानं तत् सङ्कोचयतीति **त्रिसाम्नि प्रयुक्ते तन्त्रीवे**णुयुतं **मार्गासारितकं कुर्यादि**ति। आद्यन्तप्रयोगेन मध्यप्रयोगपूरणमाह। अनेन च लास्यात् परमेश्वराधने न्तरङ्गं समस्तादष्टसिध्यै विष्क(घ्न)प्रशान्त्यै च पर्याप्तमिति सूचयति।।**३३४**।।

ततो मध्यपातीय आसारितविधिः। **तं** कर्तव्यत्वेन दर्शयति। तस्य कलापातोत्पत्तिमूलहेतुकत्वात् समुत्क्षिप्तस्य प्रयोग इत्याह। **भाण्डवाद्येन संयुक्तमासारितमि**ति। ए(क)कलं विवक्षितम्। तत्र प्राथम्यात् कनिष्ठस्यैव प्रयोगः। बुधैरित्यनेन गीतकविध्याख्यस्यान्यस्य बहिर्यवनिकाङ्गन्यस्थ(स्त)स्य पाणिकाप्रयोगः। **ललितैर्देवीकृते(तै)रङ्गहारै**रित्याह (भ.ना. ४.३१२)। उक्तं हि पूर्वम्। **गीतकेषु प्रयुक्तेषु देवास्तुष्यन्ति** (भ.ना. अ.५.४७)। **वर्धमाने प्रयुक्ते तु रुद्रस्तुष्यती**ति (भ.ना. अ.५.४८) कीर्तनात्। **देवतानां च यो ज्ञेयो (च ज्ञेयो) गीतविधिः** (भ.ना. ५.२१)। इह चोक्तम्। **स्तुतिप्रयुक्ता पाणिके**ति (भ.ना. ३१.३२५)। तदेतद्वाक्यार्थसंमितेन स्थान्यादेरन्तर्भावसम्बन्धत्वमिति।।**३३५**।।

एवं गीतकविधिस्थाने पाणिकां तदनन्तरं गेयपदं संक्षेपेणोत्थापनपरिवर्तनयोः स्थानमित्यवसरमस्याभिधाय लक्षणमाह। **त्र्यश्रेण द्विकलने**ति। चाचपुटेन द्विकलेन **परिधानकं** नामाङ्गम्। परितो धीयते बुद्धौ धार्यते प्रतियोगो नेनेत्यर्थापन्नत्वं दर्शितम्। अनेन कैरपि परिधान(क)लक्षणं कृतम्। **परिधानकं** त्र्यश्रमपकृष्टमेकावरं चतुर्वस्तु वा द्विगुणलयोपवहनमिति यावत्। **अपरै**स्तु अष्टचत्वारिंशत्कलं वस्तु द्वादशपोहनं मध्यो लय इति। तेनैवावर्तमाने दिग्वन्दनाय **परिवर्तनं** कार्यम्।।**३३६**।।

द्धनु किं तत्र काव्ये गीयमाने निबध्यत इत्याह। **पुरुषो त्र** इति। स्त्रीपुंसयो(सो)स्तावदत्र संल्लापो निबध्यते। तत्रादौ **परिवर्तने पुंवाक्यं** तत्प्रेरणारूपं ततः स्त्रीवाक्यं तदनन्तरं पुंवाक्ये द्वे स्त्रीवाक्यानि त्रीणि। त्रिभिः कैशिक्यङ्ङ्गैर्नर्मस्प जो(न्दो) ह्यवसानात्मक इति मङ्गलप्रधाने त्र निबध्यते। निवत्यावत्युपवर्तनवाचोयुक्त्या गीतावर्तनम्। न तत्र प्रसिद्धमपीह परिवर्तनमित्युक्तम्।।**३३७**।।

परिवर्तनाङ्ग इत्यासूचनाय **प्रत्यर्थमि**ति। वस्त्वन्ते निर्वहणमुत्थापनीयवस्तुविषयाभि--वन्दनविषयमवाक्यान्तरवाक्यार्थसिद्धिसमाप्तिरूपं **कार्यं** स्त्रीपुंभावसमाश्रयत्वं न त्यजेत्। निर्वहणमन्ताहरणमित्यन्ये। गेयादिपदान्यत्रेति। पाठ्याशङ्कां व्युदस्य निर्वचनमेव। प्रथमग्रहणादङ्गाभिधानाच्च सुकुमारपूर्वरङ्गलास्यस्याङ्गित्वम्। अन्यथा किं तल्लास्यं यस्येदमङ्गं स्यात्। काव्यरूपं किंचिदिति चेताब(द्)दष्टार्थम्। तथात्वे प्राथम्यतालादिभेदं नियमस्यानभिधेयत्वात्। अदष्टार्थत्वे तु पूर्वरङ्गद्वारं किंचित् त्यज्यते। अत एव वस्तुप्रधानत्वं **परमेश्वर**शङ्गारवर्णनं चात्र प्रधानम्।।**३३८**।।

स्थितपाठ्यस्येति। **ततःपरमि**त्यनेन नान्दीस्थानिकत्वमस्य इह **वत्तमेकश(कमथ)द्वे वा योजयेदि**ति पठेदिति यावत्। वत्तस्य नान्दीस्थानकत्वात् तद्धर्मकवाच्यार्थं मन्तव्यम्। **एकं द्वे वे**ति दीर्घाल्पापेक्षया। अनन्तरं त.....**प चपाणिना** चच्चत्पुटेन वा गीयमाने अभिनयनत्ताभ्यां वा **योजयेत्।।३३६।।**

अनन्तरमवसानं तदर्थनिर्वहणं कार्यम्। द्रुतलयेन द्विकलेन **प चपाणिना** गातव्यं नर्तितव्यम्।।**३४०**।।

इति करोति क्रियासामान्यमिह विशेषनिष्ठीकरोति। अवसानमङ्गसमाप्तिमन्ताहरणं च। **इती**त्येके मन्त्रवर्णाङ्गम्। वाशब्दः समुच्चयार्थ इति **केचित्।** प्रविश्य स्थितयैव भूचारीस्थया नर्तक्या पठ्यते त्रेति **स्थितपाठ्यम्।** अथान्यत् पूर्वरङ्गे प्रा(प्र)धान्य(न)मिति तत्रैवान्तरङ्गमाह। **उपोह्य तालमि**ति। चाचपुटेन शुष्कमुपोहनं कुर्यात्। प्रकरणाद् **द्विकलने**ति **केचित्।।३४१।।**

तेन चोपवहनेन स्थानके आसने वा आसित्वा **सीनपाठ्यं यु जीत। पौरुषैर्भावैर्लक्षणा**लङ्कारादिगीतस्पर्शैरिति यावत्। उक्तं हि पूर्वं **पुरुषस्य पाठे त्रैव स्त्रिया गीतमि**ति। तत्पठेदित्याह। (**बहदिति**) बहतो न चाक्षरस्य छन्दसः **समैः** संवत्तगतैः **पादै**रुपलक्षितम्। ततस्तत्समुचितार्थां चतुष्पदां(दीं) **प चपाणिना** गायेत्। तस्याश्च **नत्ताभिनयादि**प्रयोगः। तदाह। **गेयं चतुर्भिरि**त्यादि।।**३४२**।।

ततो पि चच्चत्पुटेनैकश्लोके ष्टभिर्द्वादशभिः पादैरवान्तरवाक्यैर्नात्यु(त्यनु)चितैर्युक्तः प्रयोज्यः। सो तीत इत्यतीतग्रह उपरिपाणिः कार्य इति यावत्। **अतीत** इति वत्ते प चपाणाविति **केचित्।।३४३।।**

दशग्रहणं मिश्रपूर्वरङ्गसूचनार्थमिति **दीर्घदर्शिनः। अन्ये** त्वष्टद्वादशान्तरालवर्तिनी **दश**संख्यैवोभयानुग्राहिणी ग्रा(ग)ह्यते (इति)। एव**मन्ये** उपान्ते इत्याचक्षते। **अपरे** पथगन्यरूपाण्येवैतानि **पदानीति** मन्यन्ते। ततः **प चपाणिना** पाणिसन्धिप्रतिपादकं कार्यम्। लास्यप्रस्तावात् सर्वत्र स्त्रीपुंसयो(सो)स्तु संल्लाप इत्यादि योज्यम्।।**३४४**।।

एवं नान्दीस्थाने ङ्गद्वयमुक्त्वा शुष्कापकृष्टाप्रसङ्गे पुष्पिगण्डिकामाह। **स्यात् पुष्पगण्डिके**ति।।**३४५**।।

समवत्तं पुरुषभावाढ्यं जनस्तुतिसमुचित**श्लोकं चतुर्भिः** पादैः प्रतिपदं चच्चत्पुटेन युक्तमत एव चतुःसन्निपातं तावद् गायेत्। सामान्योक्तिः समासव्यासवशा**दाचार्य**बुध्यैककलं (ल)द्विकलानां यथेच्छं प्रयोग इति सूचयति।।**३४६**।।

अस्य प्रयोगमाह। **पादे पादे त्वि**ति। एकं पदमभिनीय तदनन्तरं तावदेव शुष्कगानम्। तत्र च विचित्रं **वाद्यं नत्तं** च। एवं सर्वेषु पादेषु। अत एवोक्तं माल्यग्रथनवत् पुष्पगण्डिका इति (भ.ना. अ.३२) लक्षणं भवति बहुभेदत्याग(त्वाद)**स्यास्माभिरिह** न लिखितम्।।**३४७**।।

ते **चान्ते** शुष्कापकृष्टायास्ते रङ्गद्वारोक्तप्रयोगसूचके नर्तिगातव्ये इति यावत् **तेन** रङ्गद्वारमित्युक्तं भवति। एवं शुष्कापकृष्टा रङ्गद्वारे तिरसप्राया रसवति पुष्पगण्डिकाङ्गे निवेशिते।।**३४८**।।

अथ चारीप्रस्थाने प्रच्छेदकमाह। **ज्योत्स्नायामि**त्यादि। एतत् सम्भोगोचितकालोपलक्षणं प्रत्येकं सम्बध्यते। प्रियतमप्रतिबिम्बदर्शनेन तदवियोग उपलक्ष्यते। तेन स्वाधीनभर्तकोचितमत्र पानगोष्ठीजलक्रीडा न्योन्यप्रसाधनविषयमत्र गेयकाव्यमित्युक्तं भवति। निवत्तार्थं तदवकाशसिद्धये यत्।।**३४९**।।

प्रसादो मानभङ्गः। तत्र या **क्रीडा** भङ्गी तत् पाठ्यम्। उक्तं ह्येत(त)।

यस्मिन्नङ्गे प्रसादं तु गह्लीयाद् युवतिः स्वयम्। (भ.ना. ४.३१०)
इत्यादि। **हेलादयः** सामान्याभिनयोक्तः(क्ताः)। अङ्गजाः स्वाभाविका यत्नजाः सर्वे धर्माः। **आदि**शब्दो ह्यत्र प्रकारे।।**३५०**।।

त्रीण्यङ्गान्यस्य व्याचक्षाण आद्यमाह। चच्चत्पुटेनास्य **प्रक्रीडिता**ख्यमङ्गमन्वर्थात् काव्यलाभार्थलाभः। वत्तमस्य **मात्रावत्तं समं** च। नन्वत्र **सम**विषमो(म)**पाद**ग्रहणे(णं) आर्याद्यर्थनिवत्यर्थम्।।**३५१**।।

अथास्य द्वितीयं **तोटकाख्य**मङ्गमाह। **बह्वक्षरार्थसंयुक्त**मिति। अक्षरमिति तद्ग्रन्थोपलक्षणम्। बहुबि(र्वि)पुलो गम्भीरः। तेन गम्भीरो क्षरेषु यो र्थो यथा। .....अत्र हि मितैरक्षरैः कपोतलसंक्रान्तसखीप्रतिबिम्बावलोकनपरत्वं गम्भीरार्थो दर्शितः। तेन **संयुक्तं तोटकमि**ति भेदनाद्धर्षयोगादीर्ष्याप्राये त्र काव्यार्थ इति मन्तव्यम्। तत्र **द्विकलः प च पाणि**स्तालः। **एककलमिश्रो वा द्विकलः। अन्ये** तु द्विकलैकमिश्र एककल इति व्याचक्षते।।**३५२**।।

नाराचकाख्यं ततीयम्। शक्त्या शराभ नाराचरं(कं) चेत्यन्वर्थान् मदनशरः। प्राधान्येन मारपरं स्यात्।..... इति लभ्यते। **गुरुप्रायाक्षरं** चात्र वत्तम्। ताल एककलश्चाचपुटः। स चाष्टकृत्वस्तदाक्षरसन्निपातैरष्टभिरिति।।**३५३**।।

विवधैजकावत्र वर्णाङ्गौ। **कैशिकीजातिमि(मा)श्रितमि**ति। श्रङ्गारप्रधाना वत्तिरत्र गेयकार्याख्यमादिशति। **केचिल्ला**स्यलक्षणादतद्विशेषणाच्चैकार्थमेतदि**त्यभियुक्ताः।** तेन कैशिकी **जाति**रत्र। तेन तदंशरूपेण **मलवकैशिके**नात्र मानमित्युक्तं भवति। प्रकरणमप्यत्रार्थे साक्षो लक्ष्यते। अग्रे हि **गान्धारीजातिमाश्रितमि**ति भविष्यति। यद्यपि च पूर्वरङ्गे षाडवेन गानं स्वरवाक्यकलां तथापि लास्येन यथा(दा) भवत्यपरितोषणं तदा न्यदेव प्रधानम्। रागविनियोगादि तु र जनातात्पर्येण। तथा हि। स्वादकः स्वरुचितेन ह्रद्येर कुसुमधूम(प)विलेपनेनैवेत्यादिना भगवन्तं भवानीपतिमाराधयेदिति विधौ कण्टककुसुमकन्दुरिक(न्दलित)पूतिकेननखादीनां तु प र(रि)वर्जनं ह्रद्यतयाक्षेपात्। एवमिह **लसनाल्लास्यमि**त्येवमाक्षिप्तो(प्तं) परं च कवर्गलास्यमेवादष्टहेतुरिति मन्तव्यम्। अनेनैवाशयेन देवगहेषु प्रेक्षणीयकयोजना परमेश्वरतोषणं सर्वत्र प्रसिद्धमिति। अयमेवोद्धतपूर्वरङ्गे विचित्रतया मन्तव्यः। उपसंहरति। **अङ्गप्रच्छेदकमि**ति। अस्यान्वर्थतां व्याचष्टे। **युक्तं प्रक्रीडितादिभिरि**ति। प्रकृष्टच्छेदो ङ्गविभागस्येति। भावजिज्ञासोः पष्ठस्थितस्य मदिरादौ निपतितप्रतिबिम्बवलोक्य नायिकास्तन्मदनविकारवर्णनमप्यत्र काव्यार्थम्। तदेव प्रतिबिम्बयोगाद् प्रच्छेदकम्। प्रच्छेदो हि प्रतिबिम्बमप्याचित(चष्ट) इति।।**३५४**।।

अथ महाचारीस्थानकं **त्रिमूढकमाह। अनिष्ठुरे**ति। प्रयतोद्युक्तकान्तस्य पौरुषप्रधानं गुणनिकरं वर्णयेत्। यत्र काव्यार्थ उत्साहो वा स्या(द)थवेति रौद्रस्थानिकत्वकृतौद्धत्याल्लब्यम्। तत्र च कार्यं पुरुषानुप्रासप्रायं सम्बध्यत इति

तत्परिहारार्थम**निष्ठुरे**त्यादि। **श्लक्ष्मा**दि व्याख्यातुं माधुर्यश्लेषगुणप्रधानान्यत्र पदानि। तालो त्र **द्विकलश्चच्चत्पुटः।।३५५।।**

षोडशकृत्व आवत्तश्चतुर्भिः पादैः। तदाह। **चतुःषष्टिः सन्निपाता** इति। ते च **यथामार्गम्**। ध्रुवकादिचतुष्कला..... मार्गो गहीतः। तदुचितेन प चलघ्वक्षरादिना कलामानेनोपनीताः।

अन्ये तु यथोचितो मार्गो **यथामार्ग** इति विग्रहेण सुकुमारत्वाद् ध्रुवक एवात्रोह्य इत्याहुः। यथा हि **भट्टगोपालेन** स्वाभिप्रायेण ध्रुकके विधिरिति भेदः(प्रोक्तः) तेन भेदे **विवधे विदारिकेना(णा)न्वितास्तु सन्निपाताः।** तेन प्रतिपादं सन्निपाते विदार्यावित्युक्तं भवति।।**३५६**।।

पौरुषोचितादुद्धताअ(द)ङ्गहारा अर्थे ये प्राप्नुवन्ति तेषां कि्चद्विशेषमाह। **अङ्गहारान् सविष्कम्भानि**ति। **विष्कम्भो** विस्तारः। तेनातिविस्तीर्णा**नङ्गहारानत्र न** कुर्यात्। लास्यसामान्यलक्षणमनुवर्ण्यमनुगच्छेदिति।

अन्ये तु विष्कम्भाख्यं करणम**ङ्गहारांश्चा**त्र न कुर्यादित्याहुः। तेन करणैरेव मसणेंरेतत् प्रयु जीतेति।

नन्वेवं पौरुषशङ्कि। आह। **केवलमि**ति। पौरुषसूचका भावाः सात्विकादयो त्र वाक्यार्थे योज्याः। तेन नाट्यायिता नाट्यकल्पा न तु सर्वथा नाट्यरूपा एव। प्रतिबिम्बप्राणप्रस्तावनाकल्पं हि नाट्यस्य नत्तगीतमित्युक्तं प्राक्। तन्नाट्यायितं वा। **स्थेने(तेने) ध्रुवास्वभिनय** इति तत्सादश्याच्चात्र तद्व्यपदेशः। यदित्यभिनये नित्यप्रवत्तिविधिमाह।।**३५७**।।

नर्कुटं ख जकं चैवेति। नर्कुटख जकवत्तबन्धं काव्यम्। **त्रिविधो** भिनयो जायेत। आहार्यस्यात्राभावात्। भाव्यं तु कि्चद् भवतीति ज्ञापयिष्यते न **पाठ्यं स्वल्पमित्यत्रेति** (भ.ना. ३१.३८०)। तेन वाचिको प्यभिनयो स्त्येव।

उपाध्यायासत्वाहुः। नर्कुटख जके च नायकस्य व्यलीकवन् नायिकास्वेष्टा(स्विष्टे)। वे(ई)र्ष्याप्रणयभङ्गलज्जादिस्त्रिविधो त्रो(त्र) वर्णनीयः। अत एव त्रयाणां मोहात् **त्रिमूढ**संज्ञः। नानारूपस्य श्रङ्गाररसस्योपपत्तिरत एवेति लास्यसुकुमारत्वाच्चारीलक्षणद्वय––प्रधानं सरसत्वादित्याशयेन तद्गतमङ्गद्वयमन्यदाचक्षाणो **मुनि**श्चार्याङ्गसम्बन्धं तावत् सैन्धवकमाह। **सैन्धवीमाश्रितां भाषामि**ति। सरसकुमारतावर्जितम्। **भाषे**ति सैन्धवी। अत्रमिश्रिता। सैन्धवीशब्दान् मत्वर्थीयेति(णि) सैन्धवमिति रूपम्। एतदुपजीवनादेव लोके प्रेक्षणीयाख्यानि डोम्बिकावि(बी)जकप्रस्थानादीनि जात्यैव भाषया कविभिर्निबद्धानि। तत्र त्वङ्गानामेषां दशानां सम्बन्धि काव्यार्थवैचित्र्यमिति रूपकं तत् प्रकृतं प्रति.....त्यादि यत् तादातोद्यविधौ निरूप्य च **पुष्कराध्याये** (भ.ना. अ.३४) वक्ष्यति। तेन युक्तालो त्र **चच्चत्पुटः।।३५८।।**

पुष्करवाद्ये विशेषान्तरमप्याह। **वितस्तालिप्तमार्गेणे**ति। वीराद्भुतरौद्राणां **वितस्तमार्गेण** वाद्यम्। **योज्यं त्वालिप्तमार्गेण** इति वक्ष्यमाणत्वात् तदर्थबन्धो पि छायया त्र योज्यः। तथा हि।

रसालूणिकझल्लि ण तु पइमुद्वहि चरु तुझ कपत्थी।
रझरा मम रूपराइणिआ ताराअ सासराअ च।
अत्वरमुपविजइ हण हणगणकारि विपरिपण्डि।
(रसालनिर्मललहरि न तु पतिमुद्वहेश्चारु तव कल्पस्त्रि।
रक्ताया मम रूपयागिण्यास्तारायाः स्वाश्रयाय च।
सत्वरमुपव्रजामि श्रणु धनगणकार्ये विपरिपन्थिनि।।)

इत्यादि क्रोधशोकविस्मयोत्साहछायया निबद्धं गीतवाद्यप्रधानं च लास्यं न काव्यार्थप्रधानमिति। काव्यार्थः स्त्रीपुंभावाप्राधान्ये वितस्तालिप्तयोरविरोध इत्**यभियुक्ताः। अन्ये** तु सप्तमी न प्रोचुः पठन्तः। उद्धतगोमुखगतमत्र वाद्यमिति मन्यन्ते।

श्रङ्गारहास्ययोगे वाद्यं योज्यं तथा ड्डिते मार्गे।
बीभत्सभयानकयोद्वाढयं(र्वाद्यं) कार्य तु गोमुख्याम्।। ।।**३५६**।।

अत्र च मनागपि **पाठ्यं** न कार्यम्। अङ्गान्तरेषु **स्वल्पं** कार्यमिति भावः। तथा च लक्ष्ये पि भाणकादी तदल्पशब्दवाच्यं प्रसिद्धम्। अथ महाचार्यङ्गमाह। **मुखप्रतिमुखोपेतमि**ति। मुखप्रतिमुखे अङ्गे सन्धी(न्धा)य इत्**यन्ये**। पादचतुष्कं **चाचपुट**कृतम्।।**३६०**।।

त्रिरावत्तं तालो त्र। तदाह। **सन्निपातैर्द्वादशभिरि**ति। **नैक**शब्दः प्रतिपदिकान्तरमनेकपर्यायः। अनेककार्ययुक्त्या योज्यमानेन आन्तरछायाबन्धे ति**विचित्रः** प्रकृतो र्थो यत्र। प्राधान्येन च त्रिमूढ उत्साहः। उत्साहेनात्र वर्ण इत्याह। **पौरुषं भावमाश्रितमि**ति।।**३६१**।।

एककेन वर्णाङ्गकेन च युक्तमत्र **शीर्षकम्।** तच्च **गत्ये**ति नाभिनयप्रधानम्। अपि तु परिवत्तिप्रधानमिति गतिप्रमाणम्। तेन प चपाणिरत्र तालः। प्रकरणात् प्रमाणमित्याहुः। द्वयोश्चात्र नायिकानायकयोर्व्यामोहाद्यम्। तत् त्रिमूढकमेव हि तालकाव्यवशात् स्वल्पशरीरं **द्विमूढ**कम्। अथ त्रिगतस्थानिकमु**त्तमोत्तमकमाह। आदौ नर्कुटमि**ति। वत्तविशेषं तच्च नर्कुटवत्तम्।।**२६२**।।

शेष**विचित्रेण** वा न्यादिप्रधानेनार्थेन युक्तं कुर्यात्। तं च **तथै**वेति **पाठमार्गेणोपपादयेत्।** न तु गायेदित्यर्थः। अनन्तर द्विपदीयोजनया **यद्वस्तुकाख्यं** वत्तं तच्चतुर्विंशतिकलेन तालेन योज्यम्। तदाह। अपरान्तकशाखयेति। तेन तद्गत एव कला योगो त्र।।**३६३**।।

शीर्षकमेककल**प चपाणिना। उत्तमे**भ्यो लास्याङ्गेभ्य इदमु**त्तमं हेलादि**योगेनोत्कृष्टतमत्वात्। **अन्ये तूत्तम**स्यान्त्य**स्योत्तमं** लास्यमित्येवमिति। यत्र भावा नियम(मे)नोक्त(क्ता)स्तत्र प्राथम्यात् संस्कृतैव। यथेच्छमित्**यन्ये**। स्त्रीपुंभावाश्रयत्वात्

प्राकृतभाषैवेत्**यपरे**। सैन्धव्येति प्रकरणादिति **भट्टतोतः।** तदाह **काव्यकौतुके। न भाषानियमः पात्रे काव्ये स्यात् सैन्नवी**। मि(इ)ति। एवं लास्यपूर्वरङ्गो यम्। भेदान्तरमपि च **पुष्कराध्याये** (भ.ना. अ.३४) भविष्यति। ताण्डवपूर्वरङ्गतः पुष्करतालगतमनुसन्धीयते **मुनिना**। द्विरङ्गविधौ प्रकरणषट्कत्वं परिनिश्चीय कुशलमिति। साम्यं तावद् यच्चेदमासारितवर्धमानगीतकछन्दकलास्याङ्गरूपं तालवैचित्र्यं तत् मानरूपत्वान् मेयरूपप्रमाणमुक्तं तेन प्रमाणेन गानं स्वरात्मकं ज्ञेयम्। **बुधै**रिति मानमेय(ज्ञे)रिति।।**३६४-३६७**।।

अथा त्र कमप्यधिकमगादितालस्वरूपमस्ति। तत् कस्मान्नोक्तमित्याशङ्क्याह। **ऋग्गाथापाणिकादीनां सप्तरूपमि**ति। ऋगादीनां यद्रूपं तत् **सप्तैव**। गीतकसप्तरूपानतिरिक्तमेवेति यावत्। त्र्यश्रचतुरश्रतालप्रकारातिरिक्तं हि(ऋगा)दिः। **षड्भ्यो ष्टगुणपर्यन्तमि**त्यादि। आदिर्येषामित्युपलक्षणाद्विनियुक्तेन सामकपाला(लापा)दिना (ऋग्गाथा)पाणिकादि हि स्वरूपेणैव लक्षिते(तमि)ति।

अथास्य ताल(विधेः) बहुमानास्पदत्व(त्वं)माशङ्कीत्याशयेनाह। **यस्तु तालं न जानाती**ति। गायन्नपि **न गाता**। वदन्नपि (न) **वादकः**। प्रयोगो हि तालसूत्रस्यूतो हि नटप्रवेशयोग्यो भवतीत्युक्तमसकृत्। गेयादितालवद् गीतमन्योन्यविषयि। तालस्य प्राधान्यात्। असकृन् नटो प्यतालज्ञः। अत एव तालस्य सामान्यलक्षणं वाच्यम्।।**३६८**।।

चच्चत्पुटादिभिर्विशेषस्तस्येत्याह। **अङ्ग**भूता **हि तालस्य यतिपाणिलया** इति। **यतिपाणिलय**समूह इति तालस्य सामान्यलक्षणम्। तत्र ताल एव तावत् क्रियाणा सर्वासां परिच्छेदक इति प्रसिद्धम्। अतो नटानामपि च क्रियाकालस्य चिरक्षेपणादिति परमार्थः। सो पि च (लयः) न (काल)स्य पारमार्थिकी(क्रिया)। अपि तु काल्पनिकी। तथात्वे पि चान्योच्यापेक्षया तत्कल्पने द्वयोरप्यवकल्पनं स्यादिति मध्यो वधिभूतः। अत्र ततीयों शः प्रकीर्तनीयः। ते चैवं न त्रयो लयाश्चिरं विलम्बितं शीघ्रद्रुतं मध्यं मध्यममेवेति।।**३६९**।।

लया(य) एव ताल इति मनसि कृत्वा तस्यैव प्राग् लक्षणमाह। **त्रयो लयास्तु विज्ञेया** इति। लोकसिद्धत्वादिति भावः। उक्तो विभागो लयस्य लक्षण(णं)त्वान्न(त्वत्र)।

छन्दोक्षरपदानां हि समत्वं यत् प्रकीर्तितम्।
कलाकालान्तरकृतः स लयो नाम संज्ञितः।।

इति। ह्रस्वरूपा तस्या(स्ये)यमुच्चारणा कला प्राकृतव्यपदेश्यतया। प्रसिद्धा। अन्योन्यमध्यवर्ती **कालः**। तत्कालानन्तरं तत्**कृतः** सम्पादितो त एव वैकृतस्वभावो **लयो नाम संज्ञितो** न्वर्थलब्धात्(ब्धः)। श्लेषविश्रान्त्यात्मार्थः स लयः। तस्य च स्थूलसूक्ष्मकार्यगग्यं स्वरूपमाह। **छन्दोक्षर** इति। **यदि**ति। यस्माद्विश्रान्तिलक्षणाच्छन्दश्छन्दोन्तरेण समं तुल्यकालं प्रयुक्तमिति व्यपदेशो जायते तेनाक्षरगतः **पदगतः** सकल**वाद्यगतश्च लय** इत्युक्तं भवति। अनेन च यतिभेदस्यास्यावकाशो दत्तः। न च लयमात्रस्तालः। सकलक्रियासु तद्भावे पि

तालाभिमान(ना)भावादिति। तद्विशेषणभूतां यतिं निरूपयति। **स्रोतोगता च** गोपुच्छा समा चात्रेति। त्रिधा यतिः। अत्र लये विशेषणतया या यतिः सा त्रिधा।।**३७०-३७१**।।

ननु विभागो यम्। अस्या लक्षणं तु वाच्यमित्याह–

लयप्रवत्तवर्णानामक्षराणामथापि च।
नियमो या(यो)यतिः सा तु गीतवाद्यसमाश्रया।।

इति। गीतवर्णानां स्थाय्यादीनां वाद्ये **वाक्षराणां** झुण्टुकटकथादीनां सम्बन्धिनां या **लयप्रवत्ति**र्लयविशेषो द्रुतादिस्तयोपलक्षितो **यो नियमः स यतिः।** क्रमेण **गीताश्रया वाद्याश्रया** च। पूर्वं **यद्गेयाधिकार** एवमुक्तं **शिरःकर्मादिवर्तनाचार्यादीनां लयप्रवत्या नियमो नित्यवाद्यमात्राश्च सा यति**रिति तन्मन्तव्यम्। एतदुक्तं भवति। लयस्य यः कश्चित्तालनियमो नुवर्तनं अत्र चरितप्रध्वंसित्वेन सा..... लघुमपि गुरुमपि लघू.....त्स विचित्रे नियमः। तत्र प्रथमभागे विलम्बितस्य यावदन्ते द्रुतस्य नियम इति स्रोतोवद्गमनात्तथा यतिरुक्ता। एतद्विपर्ययाद् गोपुच्छा तादूप्यादेव। यस्तु प्रथमे तावद्यतिनिर्वाहपर्यन्ता स एव लयो नियमः सा **समा।** तत्रासां क्रमेण द्रुतविलम्बितमध्याः प्राधान्याशयेन विषय उच्यते। परमार्थतस्त्रिष्वपि तिस्र इति। एवं नियमविशिष्टो लयस्ताल इति तावत्। अत एव नियमांशस्यैव प्राधान्याल्लोके यतिरिति तादूप्यव्यवहारः। एवं साक्षाद्यत्र साम्यं वक्ति फलं फलसाम्यद्वारेण दष्टमपवर्गान्तमपि तस्य लौकिकस्यैव लक्षणं यद्यवच्छिन्नलयं तालमिति। यत्र तु साक्षाददष्टमपि फलं तत्रान्यदपि रूपं वक्तव्यम्। तत्र चिरशीघ्रतादौ क्रिया यद्यपि या काचिदप्युपायस्तथा नियमादष्ट(फल)सिद्धये विशिष्टहस्ताङ्गुलक्रियेवोपयोगिनी। सा च **पाणि**शब्देनोक्ता। तदाह **दत्तिलः। तत्र तालं (च) पाणिं च प्राहुरेकमि**ति (दत्तिलम् १५३)। तद्गतया क्रियया क्रियान्तरमपि वीणापुष्करवादनानि(दि) स्वीक्रियते। तेन विशिष्टक्रियापरिच्छेद्यो यद्यवच्छिन्नो लयस्ताल इति गान्धर्वीयतालल्लक्षणादेर्वीणावाद्यादेश्च क्रियायाः प्रदेशान्तरे लक्षितादिह न पाणेः सामान्यलक्षणं कृतं विशेषलक्षणं वा।।**३७२**।।

यस्त्वविशिष्टविशेषस्तमाह। **सम(पाणि)श्चे**ति। ननु साम्यं पश्चाद्भाव्युपर्युपरिभावित्वं च। एतदेवात्र विश्राम्यतीत्याशङ्क्याह। **गीतवाद्यसमाश्रया** इति।।**३७३**।।

पथग्विशेषलक्षणान्युच्यन्ते। **लयेन यत्समं वाद्यमि**त्यादिना। काचिन्नियमादष्टा रक्त्यतिशया वा न्या क्रिया वच्छेदिका तया गीतस्य समकालता गन्तुककालता वा। तत्रेहावापादिका यात(काल)ता। तया सह यथायोगं समकालत पूर्वलकाता समकालत्वे मन्तव्ये। यथाह **दत्तिलाचार्यः।**

समं वोपरि वा तस्य यद्वाधः संस्थितं भवेत्।
वाद्यं पदाति(नि) पाणौ वा तदेवमभिधीयते।। (दत्तिलम् १५३–१५४)

इति। तत्र लय इति तात्पर्यत्वाद्गीतमुच्यते। तथा च **त्रिशम्योपरि पाणौ** (भ.ना. २६.८७) इत्याश्रावणकाले आदौ वीणादिवाद्यग्रह इति प्रदर्शित**मभियुक्तै**र्यथायोगं क्रियान्तरेण सह

सामर्थस्य चिन्तनात्। तेन गीतक्रियायां नाट्यक्रियातुल्यकाला(लः)**समपाणिः**। स चोद्वेजिन्यात्ममध्यमेव। यथा(दा) तु गीतक्रियाप्राधान्यात्.....तक्रिया पश्चात् तथा(दा)(**व)पाणिः।।३७४।।**

द्रुतलयोचितो यस्यातिशीघ्रं गच्छति स प्रथममेव निर्याति स चापरमपि न प्रतीक्षते गीतक्रिया तु यदा न तावत् प्रवर्तते प्रथममेव वाद्यानि क्रियान्तरं **तदोपरिपाणिः**। स चौचित्यावलम्बिते लये दीर्घसूत्रो हि सहचरेषु प्राङ्निर्गतेषु गतिमारभत इति। **सोपरी**ति। **सो चि लोपे चेत्पादपूरणमिति** (अष्टाध्यायी ७.१.१३४) लोपः। एवं यतिपाणिभ्यामुपक्रियमाणो लय एव ताल इति तस्यैव प्राधान्यं दर्शयितुं पुनस्तद्विषयमेव वक्तव्यान्तरमाह। **तत्र स्थितलयो यो वै** इति। **वै**शब्दो तिशये। तदयमर्थः। इह द्रुतमध्यविलम्बिताः क्रमेणाधिका इति तावदुक्तम्। तत्र यद्यतिशयो भवति द्वैगुण्यं न ततः परं वक्ष्यते। ऊर्ध्वं **प्रमाणं तु कलानामि**ति (भ.ना. अ.३१.३७८)। **सन्निपात** इति। हेयरूपकम्।।**३७५**।।

तदेको यदा येन विलम्बितेन लयेन गायतीति तदा तावतैव कालेन परो द्विर्गायति मध्यलयम्। तदाह। **सन्निपातद्वयमि**ति। ततीयस्तु चतुर्गायति स द्रुतलयः। तदाह। **सन्निपातचतुष्टयमि**ति।।**३७६**।।

ननु तत्रा पि कि ंचदष्टकृत्वस्तदेव नि(यमरहिता)दित्यादिलयानवस्थेत्याशङ्क्याह।

यावत्तत्रान्त(त्रोत्त)रकला द्रुत एव लयो हि सः।

एवकारो भि(भिन्नक्रमः)। **उत्तरैव** या **कला** अहेत्या(आहत्य) स द्रुतलयाश्रयत्वाद् द्रुतो लयः। एतदुक्तं भवति। यत् कलावर्णाङ्गस्वरूपे तद्यतः परं न निर्वहति **स एव द्रुतलय** इति। तेन (न) काचिदनवस्था। अथात्र प्रसङ्गादवपाण्यौचित्यं दर्शयति।

सो वपाणिस्तु विज्ञेयस्तज्ञैर्द्रुतलयाश्रिताः(तः)।

इति। लयादवकृष्टं स्यादिति यतो लक्षितः। एतच्च दिङ्मर्शनं मन्तव्यम्। अन्ये त्ववपाणिं विलम्बिते (उ)परिपाणिं द्रुते विनियु चते। तत्तु वाद्ये प्रधाने गीते चानुयायीति मन्तव्यम्। तत्तु प्राधान्ये।

अथ प्रकृतमेवाह। **अत ऊर्ध्वमि**ति। द्वैगुण्यादूर्ध्वं विलम्बितादिषु यत् **प्रमाणं** तत्र **विधीयते** विधिना शास्त्रेणोच्यते इत्यत्र **दष्टप्रधाने गान्धर्वे** इति भागाधिकत्वादारभ्य द्वैगुण्यं द्रुतादीनामुत्तरीत्तरमित्युक्तं भवति। स्वच्छन्दप्रयोगो तु न **नियमः** कश्चिदिति यावत्। अतस्तत्र लययतिपाणिभेदानामन्योन्याश्रयानुगुणपौर्वापर्यस्य भावप्रसतिर्लोष्टप्रस्तरेण भेदः। अत एव लयत्रयस्यैव परमार्थ(तः) प्लुतलघुगुरुलघुरूपता विलम्बिते पि त्रिभागाधिकत्वं प्लुते गुरौ च लघौ द्वैगुण्यमिति मूल एव सकलतालतानप्रधानभूते भगवत्पार्वतीपतिवक्त्रचतुष्टयोद्गीते चच्चत्पुटे सुरचितमेव। तथा च गीतकादावदष्टफले तैरेव व्यवहारः साम्यमात्रोपयोगिता तालव्याप्ते तु लयवर्ध(ना)त्तेन तदर्थेन बिन्दुना सार्धेन वा द्रुतेन विरामवना सबिन्दुकेन वा सद्रुतेन वा गुरुप्लुताभ्यामेवंभूताभ्यां वा भवन्ति

विचित्रास्तालगतयः। तत एवापरिसंख्येयत्वान् **मुनिना** दर्शिताः। **लक्षणकारेण** प्रतिपदं लक्ष्यं कथं दर्शनीयम्। लक्षणेन {च ते **गता(त्य)ध्याये** (भ.ना. १२) **चतुरर्धैकक(र्धक)लं (वा)स्यात्तथा(द)र्धकलं वा(लमेव च)** (भ.ना. १२–३१) (इ)ति। **अपरार्धानुसरण.....धतो तथा एतेष्वधगतिप्रज्ञविलक्षी**त्यादिना।

अपराद्धानुसरणे श्वापदानुगतौ तथा।
एतेष्वेवं गतिं प्राज्ञो विकलां सम्प्रयोजयेत्।। (भ.ना. १२.३६)

इत्यादिना} च संगहीताः **(पुष्करा)ध्याये** (भ.ना. अ.३४) च संग्रहीष्यन्त इत्यास्तां तावत्।।**३७७**।।

वत्तमध्यायमुपसंहरन् भाविनमासूत्रयन् सङ्गतिं करोति। **इत्येष लक्षणविधि**रिति। लक्ष्यते नेनेति **लक्षणं** तालः। तत्र **विधि**(धिः)दष्टोपयोगी सास्ति(म्य)त्वक्रममानता(स्ता)लः। **अत ऊर्ध्वमि**ति। एतदध्यायोक्तवस्तुताया(ला)**दे(व ध्रु)वा** इति प्राप्तावसरत्वात्ताल(ला) इदानीं लक्षणीयाः। इति शिवम्।

पोप्लूयन्ते यदुपरि(परे) पारलाभानवाप्ते
य(र्य)त्प्रोक्तानां विमलमपि सन्देहमेवावहेत।
मायोपाधिप्रकटगहनात्तालतत्त्वादमुष्मात्
प्रोत्तीर्णाः(स्मः)स्मरदमनममी संस्मरामो ध्रुवार्थम्।। ।।**३७८**।।

इति महामाहेश्वराचार्याभिनवगुप्तविरचितायां नाट्यवेदवत्तावभिनवभारत्यां तालाध्याय एकत्रिंशः समाप्तः।।

श्रीः

नाट्यशास्त्रम्

द्वात्रिंशो ध्यायः

प्रावेशिक्यपवर्गन्ततिमहाभागेषु या क्षेपिका
चित्रात् ससतिरङ्गमण्डलतलादस्माच्च नैष्क्रामिकी।
सम्भोगान्तरसंप्रसादसुभगश्रीशुद्धविद्यात्मिका
च्छन्दःसारमयी ध्रुवा विजयतां स्पर्धात्मिका सा तनुः।।

उक्तं तावदनन्तर**ाध्याये** (भ.ना. अ.३१) ध्रुवाणां लक्षणं वक्ष्यामीति। तत्र ध्रुवाशब्दार्थं व्याचिकीर्षुर्युगलकमाह। **ध्रुवासंज्ञानि यानि स्युरि**ति। पूर्वं **नारदाद्याश्च गन्धर्वा गानयोग** इति (भ.ना. १.५१)। तदयं सम्बन्धः। **नारदा**द्यैर्यानि गीताङ्गानि वर्णाङ्गानि सप्तरूपाङ्गमात्रा मुखप्रतिमुखानि सप्तरूपप्रमाणं त्र्यश्रचतुरश्रादि याश्चर्च ऋग्गाथा(:) पाणिका इह नियुक्तानि तदेवं **ध्रुवेति संज्ञितम्**। नान्यत् किंचिदिति नपुंसकेन गीताङ्गसप्तरूपप्रमाणानां सम्बन्धः। या इत्य(ने)न ऋग्गाथापाणिकानाम्। इहेति नाट्ये। **अनेकश** इति व्यस्तसमस्तादिप्रकारवैचित्र्येण विशेषोपर जनाय **नियुक्तानि। तद् ध्रुवेति संज्ञितम्।** कथं **सर्वाणि** सन्ति। सर्वशब्दः प्रकृतः कात्स्र्येन यावन्ति यथ र जनातिशयान्नियुक्तानि तावन्ति तत्र समुदितान्येका ध्रुवा।

ननु कस्मादेतत्समुदायो ध्रुवा। आह **ध्रुवसंज्ञा**नीति। स्त्री(न)पुंसकैकशेषः। तदयमर्थः। **गीताङ्गसप्तरूपाङ्गसप्तरूपप्रमाण**स्य ध्रुवेति संज्ञा। ऋग्गाथापाणिकानां च ध्रुवा हि मूलप्रकृतिरुच्यते। एतावच्च गीतानुपदे सौष्ठवादौ जगद्वर्तिनि गेयमार्गे मूलप्रकृतिः। तेन कारणेन गतेन ध्रुवेति व्यपदेशेन कार्यरूपं समुदाये पि भवितव्यम्। या ऋग्गाथा यानि गीताङ्गानीति। (ए)वेति भेदोपक्रम उपजीव्यांशस्य विनियोगभेदं ज्ञापयति। तं च यथावसरं दर्शयिष्यामः। **अन्ये तु गीताङ्गानि यानि ध्रुवासंज्ञानि नियुक्तानि** च तानि **ध्रुवसंज्ञानी**ति तच्छब्दाध्याहारेण श्लोकं प्रथमं योजयित्वा **या ऋच** इति द्वितीयं पथगेव योजयन्ति।

ननु कारणे मूलप्रकृतित्वादुन्मीलिताद्यष्टके तावदस्ति ध्रुवाव्यपदेशम्(शः)। यथोक्तम्।

उन्मीलिता मा(म)ता चैव विश(शा)लाविरले तथा।
उत्सष्टा विश्रुता चापि विप्रकीर्णा तथोद्गता।।
एता ह्यष्टौ ध्रुवास्तत्र वर्णतालेन चित्रवत्।
अक्षराणि यथाकुडयं तद्विद्याद्गुरुलाघवम्।।
....।
....।
....।
....।
शशिचूडामणिं विरचितशोभं वरदम्।
शरणं गतो स्मि भगवन्तमीश्वरम्।
पितवनरङ्गमहानर(ट)मजितं शम्भुं नमामि सर्वोत्कृष्टम्।।
शम्भुं नमाम्यखिललोकपतिम्।
नमत महेश्वरपदयुगलम्।
प्रणमाम्यहं शिवं वरदम्।।

एता(इत्या)दयः।।**१-२**।।

मलिप्रकृतौ ध्रुवाव्यपदेश(शो) दष्टे कार्ये पि भवतु नाम। कार्यस्य तु स्वरूपं वक्तव्यमित्याह। **एभ्यस्त्वङ्गानीति। एभ्य** इति सम्परामश्यते। गीताङ्गेभ्यो पि प्रथमस्य कस्यचिदंशोद्धारः। स एवेहाङ्गमित्युक्तम्। एतानि गीताङ्गादीनि समुदायरूपाणि या आलम्ब्य यब्द्रियन्ते उत्कभाजो भवन्ति। तथा ध्रुवामवं नानाप्रकारं रसभावप्रकृत्याद्यौचित्यात् प्रवत्तं मात्रावत्तविशेषमाधारमाश्रित्याथैव सङ्घातरुषतां भजन्ते। यानि कार्यरूपाणि **ध्रुवात्वं** तद्व्यपदेशं **गच्छन्ति अथ तानि वक्ष्यामी**ति वाक्यभेदेन सम्बन्धः। **अथेति** वाक्यभेदेन सूचकः। **उद्ध त्ये**ति। क्रियारूपमिति भिन्नकर्तताभावः।

एतदुक्तं भवति। यथा भ्यूहात्मनि सङ्घातेन रसनायमङ्गानि पुरुषभद्य(ट)गजादीनि केनचिदुत्कर्षेण स्थितानीति कृत्वा सङ्घातान्तरेण सम्पाद्यमानापूर्वदशावैचित्र्येण कारणकार्यात्मभावो भिव्यनाक्ति तथा गीताङ्गादीन्यदष्टप्रधाने गीतकादिरूपसंघातोत्थितानि कुतश्चिद्रसभावकृतान्यौचित्यसमर्पणशात्मकर चनायोग्यलक्षणादुत्कर्षादुचितगीयमाप्रवत्तविशे –षाश्रयेण संघात्मकरूपं प्रतिपन्नकारणत्वं प्रग्द(प्राग् द)शाया अननुभूय कार्यमौत्तरकालिकं भजन्ते करणशब्दव्यपदेश्यानि च भवन्तीति।।३।।

तानि यद्यपि **तालाध्याये** (भ.ना. अ.३१) दर्शितानि तथा(पि) विस्मरणशीलायोपलक्षणार्थं पठति। **मुखं प्रतिमुखं चैवे**त्यादिना। षट्कलाप्रमाणं पूर्वोक्तमिति (न)लिख्यते। न चात्रैतदीयमुपकरोति(तीति) लक्ष्यते। तथा ष्टकलमानं सङ्गहीतमिति किं प्रतिमुखादिना। एवं सन्धिप्रस्वारवज्रादौ पौनरुक्त्यं स्यात्। क(स्मिं)श्चिदेवाङ्ग उपजीव्यत्वं **वक्ष्यामः**। संहरणमन्तम्। **च**काराः परिगणनाशङ्कां व्युदस्य नाना गीताङ्गानि वर्णाङ्गादीन्यपि स्वीकुर्वन्ति।

तदयमर्थः। गीतकानामग्गाथापाणिकानामङ्गतो यत् किंचिदुत्कृष्टमङ्गरूपं लक्ष्यते तत् सामान्यानुगुणैः प्रावेशिक्यादिभिः प चभिः सङ्घातैः स्थापयितव्यम्। स नास्ति सङ्घातो यत्र सप्रा(र्वा)णि तानि न व्याप्रियन्ते। रूपरसगन्धस्पर्शा इव..... भावेषु बाहुल्यादल्पवैचित्र्यकृतस्तु विशेषः। तथाहि। प्रधानार्थसूचना मुखात्। तदनुवस्तुसूचनं प्रतिमुखात्। पशुन्या(वस्तुन्य)लङ्कारयोजनं **वैहायसात्**। यथास्थितप्रस्थितानुबन्ध(ः)स्थितानां (त्)। निवत्तानां सन्धानं **प्रवत्तात्**। अर्थापादनं वज्रात्मना(नो)ह्यनुसन्धानं **सन्धेः।** वाक्यार्थसमाप्तिः **संहरणात्।** वर्णानुत्कर्षः **प्रस्वारात्।** सम्पिण्डिततात्पर्ययोगो **माषघातात्**। पुनरावत्या गीतमुप**वर्तनात्**। पूर्वार्थनिगमन**मुपपाता**त्। एकस्यैवार्थस्य वैचित्र्ययोगो **वेणीप्रवेणीभ्याम्**। द्वैधीकरणं **चतुरश्रकात्।** प्रधानार्थविश्रान्तिः **शीर्षकात्।** छन्दःक्रमायातगुरुलघ्वादिसंपूर्णत्वेन गतिवैचित्र्यं **सम्पिष्टका**त्। भाव्यर्थान्तरसमाक्षेपो – –**न्ताहरणात्**।.....मिति पूर्वोक्तं **म(मा)हाजनिकात्**। एवमन्येभ्यो वाङ्गेभ्यस्तद्रूपमनुसर्तव्यम्। तद्यथा। अङ्गिनो ङ्गेभ्यो गीयमानमग्भ्यः पदविच्छेदस्य गीतमध्यविघट्टनम्। तथा चोक्तम्। **सामिग्रथितावस्थाने वग्रहो भवेत्** इति। गाथाभ्यो हृदयाल्हादकवत्तोपयोगः। यथोक्तम्। **नानाच्छन्दःसंस्तुतानि। ह्लादनार्थस्य च्छन्दे**

च्छ(छदेश्छ)न्द इति स्मरतः सौकुमार्यादिगुणगणयोगः। पाणिकायास्तालविभागः शम्यादिकमपि हीनसप्तरूपप्रमाणम्। तत्र हि तालो न्योन्यैः शम्यादिभिरुपनीयमानसंसर्गो दष्ट इति प्रमाणमा(म)त्र एव ध्रुवासु निवेशयति। तदेवं प्रतिध्रुवं गीताङ्गादिभ्य एतदुपजीवितम्। गान्धर्वसंस्कृता नारदाद्या(नारदीयशिक्षा १–२)गानयोगं(ग)चिकीर्षवस्तस्य गान्धर्वप्रकृतित्वेन व्यवस्थापयन्तो भोगोपयोगिनमुक्तपूर्वसंघातं नायमस्माभिः स्वमनीषिकाकृतः किन्तु प्रकृतावपि न दष्ट इत्यागमप्रामाण्येनोपोद्बलयन्ना(न्त आ)गमानुरसा(नुसारि) हि दष्टफलमपि भोजनादि प्राणाः(णायाम)सन्ध्याद्या इत्यागमानुसन्धानेनोपबहयन्ति। नैतन्न वाच्यम्। किमिति एते साक्षाद्धर्मार्प(र्थ)साधनोपात्ताः। किमनया.....कल्पनयेति। ये त्वेतद्व्रतं गत्याद्युपजीव्यमित्याहुस्ते किमत्र फलमिति प्रष्टव्याः। भोजनप्राङ्मुखतादिवद् दष्टफलतायामप्यदष्टमिति चेत् तत्समस्तानां युगपद्वा विकल्पनेन वेति सर्वसम जसप्रयासम्। तस्मादुक्तधर्मोपजीवनमेव **परमगुरु**निरूपितं युक्तम्। यथोक्तं **श्रीमदुप्तलदेवपादैः**।

स्थितात् स्थायित्वसम्पन्नात् प्रस्तुतस्थेमयोजनम्।
ध्रुवासु यद्यदन्येभ्यस्तद्वत् प्रज्ञोप(ज्ञः प्र)कल्पयेत्।।

इति। **भट्टमतेना**पि।

गाथानां पाणिकानां च गानमा(नं म)सणसम्पदा।।

इत्यादि ध्रुवकार्ये कारणवद् धर्मानुगमात्।।**४-६**।।

ध्रुवोति सामान्यव्यपदेशे स्थिते पि तालप्रमाणगानगताद् विशेषव्यपदेशेनाह। **एकवस्त्विति।** यत्रैकेनैव तालेन वर्णाङ्गेन च निर्वहणं तत्र ध्रुवेत्येव संज्ञा। यत्र त्वसमवत्तपादो (युग्मौज इति नि)यमे द्वाभ्यां तेन परिच्छिन्ना गीतिरत्रेति कृत्वा **परिगीतिके**त्यपि संज्ञा। यत्र तु त्रिभिरपूर्वैर्वर्णाङ्गैः स्तुत्याङ्गानां निर्वाहे कृते तुर्यस्य भागस्य तन्मध्यादेव केनचिन्निर्वहणं त्र्यश्रराङ्गोचितपरिक्रमण इव वादिखण्डत्वमेव खण्डनेति ध्रुवासु नियमाभावात् तन्मन्द्रकगीतकवत् त्र्यङ्गत्वान् **मन्द्र(द्र)कम्**। विषमवत्तवत् तुर्ये पि ताले न्यतालवर्णाङ्गयोगे **चतुष्पा(प)दे**त्यपि संज्ञा।।**७**।।

अन्ये त्वेकद्विचित्रिचतुःखण्डकृता एताः संज्ञा इत्याहुः। गीततालपदान्यत्र। एवं करणानुगमाद् ध्रुवेति यो व्यपदेशस्तमन्यथा पि समर्थयतो।

ध्रुवा वर्णा ह्यलङ्कारा यतयः पाणयो लयाः।
ध्रुवमन्योन्यसम्बन्धा यस्मात् तस्माद् ध्रुवाः स्मताः।।

इति गीतकादौ.....पातानां स्थाय्यादीनां (द्रुतादीनां) च ब्राह्मणाद्या(दिष्व)न्योन्यमनुवर्ण्यानु––वर्णकभावः कश्चिद् विनियोगमुखेन प्रकृत्या सर्वेषां तत्र भावात्। ध्रुवासु तु रसाद्यनुगुणो यो गीयमानस्य वत्तस्यार्थस्तवानुगणो यः प्राधान्यात् पातादीनामन्यतमः। तदौचित्येनान्ये पि प्रवर्तन्ते। यथा रथगत्यौचित्याद् द्रुतरूपे पाते तदनुसारिणो वर्णवर्णाङ्गादयः। करुणरसोचिते वर्णाङ्गे तदनुगुणा गुरुप्लुतादिरूपेण पातादयः। एवं प्रत्येकं वाच्यम्। तत्र

ध्रुवा इति पाताद्याः। एतेषां ध्रुवादीना**मन्योन्यसम्बन्धे** व्यभिचारितया ध्रुवरूपे निमित्तं पदम्। आधारत्वाद्यौ(दौ)चित्ययोजनाच्च। न हि निराधारा वर्णादयो(य इति)। दर्शितं चैतत्।

अन्ये पि **कुड्यचित(त्र)**दष्टान्तेन तेन ध्रुवाणामाधारः पदमिति पर्यायात् तद्विद्यते यस्यां वत्तजातौ सा ध्रुवेति। अत एव लक्ष्ये गीयमानं रूपकमेव ध्रुवेत्याहुः। अक्षरयोजना(च्च)ध्रुवा द्रुताद्या लयाः। तस्या (वर्णा)द्यपेक्षामाश्रित्या**न्योन्यसम्बन्धा** भवन्ति(न्ति)। ध्रुवं पदं तस्माद्धेतोः प्रावेशिक्यादयो ध्रुवा इति।।८।।

तासां विभागा **रसाध्याये** (भ.ना. अ.६) यद्यपि दर्शितास्तथापि तदवान्तरभेदसम्भवाभिधित्सया तदनुवदति। **ध्रुवास्तु प चेति।** प चैव प्रावेशिक्यादयस्त एव...नाना.....। अत्र विशेषणद्वारेण हेतुः संस्थाने तु गुरुलघुसन्निवेशो क्षरमात्रेयत्ता रसभावप्रकृतिभेदश्च तदाश्रयेण प्रकारनानात्वम्। तथाहि। प्रावेशिक्या एव रसादिवशात् स्थिताकारादिभेदान्तरात्.....च्छन्दोवत्तभेदाच्चासंख्यभेदाः। तासां त्वप्रत्येकं यद्यपि समस्तो रूपादियोगो दर्शितास्तथापि कि ्चिदङ्गं प्राधान्येन निवेशयितव्यमित्येतत् सूत्रयति।।९।।

उपवत्तमिति। उपवर्तनप्रवत्ते प्रावेशिक्याम्। तथाहि।

प्रविशति दयिताविरहजमतिमोहास्थानजगुरुकोपम्।

जलद्र(द)तटि(डि)त्कृतलक्षणं कु चरनाथो वनम्।।

इत्यादिकं प्रवेशध्रुवया निमितानुसन्धिः क्रियते। प्रवेशके ह्युन्मतो भविष्यतीति तादशश्चिरं भवति। ततः प्रविशतीति हि दूरस्थो सामाजिक(का)गोचरः प्रयोगानङ्गत्वात् तदीयं सर्वैव प्रावेशिकी निवत्तानुसन्धानं प्रवत्तावुपजीवति तदवकाशदर्शकस्तु ग्रन्थः।.....द्धि समस्तवस्तुगर्भाधानस्थानीया। (त)च्च वस्तुमात्राख्यशीघ्रता नावश्यमेव युक्तम्। अतिमग्नचित्तवत्तेरपि **सागरिकाया** मनोरथकल्पितप्रियतमसमागमालापादेवौत्सुक्यप्रवत्त—
—स्वराविषयो स्त्येव (**रत्नावली**)। तथा चित्तद्रुतलयात(त् तु) प्रायस्त्र्यंशकं प्रयु जते। **चलं हि गुणवत्तमि**ति (ब्रह्मसूत्रशाङ्करभाष्यम् २.२.६ योगभाष्यम् २.१५) नीप्या चित्तव्यभिचारिभावानुसन्धिः स्थायिभावानामित्युक्मसकृत्। (इ)ति तथाविधचित्रतासूचकः समस्तलय इत्यादिसिद्धये भाव्यं गानेन। तदुपवर्तनानीतमस्थि(स्वस्ति)पूर्वकैव सर्वा चेति। का गतिरिति दीप्ते विलम्बितादिरेवोचितः प्रयोग इति सर्वा तावत् प्रावेशकी प्रवत्तोपवर्तनाभ्याम्। अन्ये तु सुखावबोधाय तु विदारिकत्वं वत्तावित्याहुः। तत्र

शीर्षका चोद्धता चैव अनुबन्धा विलम्बिता।

अड्डिता चापकृष्टा च षट्प्रकारा ध्रुवा स्मता।। (भ.ना. ३२.३२८)

इति प्रतिध्रुदं षड् भेदा विशेषरूपा रसभावप्रकृतिकथादिभिदा वक्ष्यन्ते। तेन प्रावेशिक्यपि षट्प्रकारा। तस्यां सर्वत्र तावत् प्रवत्तोपवर्ण(र्त)ने उक्ते। अधुना तस्या एव च शीर्षकभेदे धिकं कर्तव्यमाह। **वज्रं च शीर्षकं चे**ति। **च**कारेण प्राक्तनोपजीवनं पथक्कारेण प्रावेशिक्यामेव शीर्षकभेद इत्याह। तत्र यथाप्रथममन्यत्र पात्रमुपक्रान्तम्। यथा सूत्रधारस्य प्रवेशेच्छादेर्वा प्रवेशने शीर्षकं शिरःस्थानमेव। द्वितीयं तत्र वित(त)तया

विभावादिव्याकीर्णनेन सो र्थो वर्ण्यमानो दढीकर्तव्यः सामाजिकानां धियि तदेतदवज्ञाप्रधाने विश्रान्ति(मन्ति)मशीर्षकात्।

अन्ये तु प्रावेशिकीभेद एव शीर्षकं ध्रुवायामेतदपि तु प चानामपि शीर्षकभेदे विनियोगो यमित्याहुरुत्तरत्रापि च।।**१०**।।

अथाङ्डिताख्ये ध्रुवाणां भेदे विनियोगमङ्गानामाह। **प्रस्वार** इत्यादि। श्रङ्गारप्रधानाङ्डिता। तत्र वर्णानुत्कर्षाद्विभावादिसम्पिण्डीकरणमन्यार्थसमर्पणमर्थस्व वैचित्र्योत्प्रेक्षणपूर्वका(कं) चेत्यवश्यकर्तव्या। यद्वक्ष्यति।

अङ्डिता तूत्कटगुणा श्रङ्गारसम्भवा।

यस्मात् स्थानप्रसन्ना च तस्मादेता(षा) ङ्डिता स्मता।। (भ.ना. अ.३२.३३४)

इति। तदेतत् प्रस्वारा**देरुपद्या(पा)तान्**तात्।।**११**।।

अथापकृष्टाख्ये भेदमाह। **मुखप्रतिमुखो**पेतेति। **अपकृष्ट**माकृष्टं वर्ण(न)म्। मिताक्षराण्येतस्यां प्रधानम्। तदनुगामि सूचनीयम्।

अथ विलम्बिताभेदमाह। **वैहायसान्ताहरण** इति। **वैहायसान्ताहरणे स्थितायां** द्रुतविलम्बितायां शून्यालङ्कारयोगात् विलम्बितत्वादेव सवैहायसकात्। मध्यमानां च सा वक्ष्यते।

मध्यमानां प्रवेशे तु ज्ञेया द्रुतविलम्बिता। (भ.ना. अ.३२.३३६)

इति। एषां च प्राधान्यात् प्रधानानुयायित्वमिति भाविक(त)प्रधानार्थस्याक्षेपः। **अन्ताहरणा**त् सैव च द्रुतविलम्बिता। प्रासादिक्या भेदत्वमस्ति तस्याम्।।**१२**।।

अङ्गविनियोगमाह।

संहारश्चतुरश्रश्च ख जभ नर्कुटे तथा।

इति। हास्यप्रधानत्वात् तस्य च मितशरीरत्वाद्वाक्यार्थसमाप्तिः। श्रङ्गारानुगमयोगाच्चार्थस्य द्वैधीकरणं ललितभावत्वाद्धास्यश्रङ्गारयोग्य इति हि वक्ष्यते (भ.ना. अ.३२.३४०)। तदेतत् **संहाराच्च(रश्च)तुरश्राच्च(श्रश्च)**। तथेति यथासंख्य उ(मु)पासनाय। उद्धतानुबन्धयोस्तु सामान्यविनियोग एव पूर्वोक्तः। एवं प्रावेशिक्या अतिसामान्यतो विशेषं चेति विनियोग उक्तः। आक्षेपिकाप्रासादिक्यान्तरानैष्क्रमिकीनां चातिसामान्यतो विशेषतश्चेति द्विधा। अन्तरध्रुवायास्तु ततीयमपि सामान्यविनियोगमाह। **सन्धिः प्रस्वारसंयुक्त**स्त्वन्तरायामिति। भाविनो नुसन्धिर्वर्णानुत्कर्षश्चान्तरध्रुवाभेदेषु सर्वेषु प्राधान्येन योज्यः। यत्र पठिताङ्गविशिष्टतानुविशेषयोजनं रसभावप्रकृतिपरमार्थोद्दीपनमिति **टीकाकारै**रुक्तं तद्युक्तिमार्गागमातिपातं लक्ष्यते। विरुद्धं च तदुपेक्ष्यमेव।।**१३**।।

ननु ध्रुवायास्तु(वास्तु)प च विज्ञेया नाना संस्थानसंश्रयाः। (भ.ना.३२.६) इत्यत्र छन्दोवत्तरूपं संस्थानं यत्सूचितं तत् कुत्रांश उपयुज्यत इत्याशङ्क्याह।

यान्यङ्गानि कलाश्चैव गीतकान्तर्गतानि तु।

तानि छन्दोगतै(वत्तै)र्विभाव्यन्ते ध्रुवास्वथ।।

इति। **अङ्गानि** विवधादीनि **कला** गुरुलघुप्लुतद्रुताद्या नी(ना)तिवैचित्र्यात् कृतानीत्यनुसारेण वर्धमानादि**गीतकान्तर्गतानि मुखं च (खं)प्रतिमुखं चे**ति (भ.ना. ३२.४) **च**काराल्लययत्यादयः। **एव**कारो भिन्नक्रमः। **तु**र्विशेषद्योतकः। तेन कलादयो यावच्छन्दोगीतैरेव वत्तैर्विरच्यन्ते। निराधाराणां पदेन विना केषा िचद् दर्शयितुमशक्यत्वात्। तद्यथा। मुखप्रतिमुखाद्युपजीवितस्यार्थस्य केचित्तु शक्या अतिरसभावप्रकृत्यादिनिरूपक—योग्या न भवन्ति यथा विवधादयः।

नन्वेवं पदमात्रमस्तु किं वत्तेनेनति तु शब्दवत्तमपि स्फुटमेव रसभावादिव्य जकमित्युक्तं पूर्वं **वाचिकाभिनये** (भ.ना. अ.१४.२)। **वत्त**ग्रहणं च्छन्दसो दण्डकादिगतगुरुलघुनिवेशात्मकवत्तापाकरणार्थम्। लघुकन्याक्षरसंख्यामात्रस्या..... गायत्र्यादिसदशस्य व्याकरणार्थम्। मात्रावत्तेष्वपि च्छन्दस्तदेव मात्रासंख्या। तथाहि। गायत्र्यादित एवोद्ध त्य च्छन्दो प्यभिप्रेत्य भेदसंकरेण मात्रावत्तानि दर्शितानि। **ध्रुवादिगणावि**(ध्रुवास्वि)ति। **षण्मात्रा** यावत् षड्विंशतिमणीनामादौ कलहललितं चतुर्थाङ्गम्। अन्तरायास्तु हंसस्यादयो दण्डकल्पमात्रावत्तभेदाः।।**१४**।।

नन्वङ्गानि नु विविधानीति संज्ञातपूर्वकाणि। कलाः पुनरित्यभिप्रेत्य शम्याद्यशङ्कां परिहर्तुमाह। **त्र्यश्रश्चे**ति। **त्र्यश्रचतुरश्री** यौ **ध्रुवात्मकौ** च मूलप्रकृतिभूतौ ये(यौ) च मूर्व तद्विकलभेदौ **षट्कलाष्टकलौ** कार्यो तालरूपौ। **च**कारान् मिश्रभेदौ। **चतुष्कलमिति चैतन्यप्रदमि**ति दर्शितम्। अतिविततचतुष्कलप्रकारो पि **च**कारेण **द्वितीयेन** सङ्गहीतः।।**१५**।।

एवं कलास्वरूपमभिधाय गीताङ्गेषु वक्तव्यमाह। **पूर्वेषामेव गीतानामि**ति। **पूर्वेषां** सामवेदतुल्यानां मद्रकानां **यान्यङ्गानि तेषां** मध्यादेकको **विवधो** वा। अथ शब्दाद् वत्तं कार्यम्। एकमेव वर्णाङ्गं ध्रुवासु निवेश्यम्। न तु काव्येष्विव। आवत्या विंशत्यङ्गपरत्वादिति तावदेको विशेषः। विशेषान्तरमप्याह। **वत्तविधावि**ति। गीतकेषु तालोचितवर्णाङ्गानुसारेण मात्रानियमात्मकं वत्तम्। यथोक्तम्।

अक्षरैर्या चतुर्मात्रा द्विमात्रा वर्णतस्तु सा। (भ.ना. अ.३१.११८)

इति। **चत्वारस्तु गुणा** (भ.ना. अ.३१.१०६) इत्यादि च। इह तु विपर्ययः। रसभावोचितं वत्तमेव प्रधानम्। तथा तु गुणेन शय्या बन्धः स्थितो वर्णाङ्गतातो नियो(ज्य) इति। **केचिद् वत्तिविधौ कार्यमि**ति पठन्तो वत्तौ वत्तं वर्णाङ्गशब्दतालिकादिकमाहुः।।**१६**।।

विदा(री)तियोगः(:)कृत एककादिभिरिति सा वक्तव्या। नन्वतिक्रान्ते ध्याये (भ.ना. अ. ३१) ङ्गलक्षण एवा(णा)वसर एव विदारीलक्षणं कस्मान् नोक्तम्। उच्यते। वेदे विच्छेदसम्भवात्। विदारी निवेश्यमाना शोभातिशयं पुष्णातीत्याशयेन **ध्रुवाध्यायेन** (भ.ना. अ. ३२) तल्लक्षणमाह। **पदवर्णसमाप्तिस्तु विदारी**ति। अवान्तरवाक्यस्य समाप्तौ स्थाय्यादिवर्णस्याप्यपन्यासेन न्यासेन वा **समाप्तिर्विदारी।** विदारणं **विदारी**। विभाषाख्येन

बहुना वत्या इति **कृदिकारान्तान् ङीषि** (अष्टाध्यायी ४.१.४५) च रूपम्। तदाह। **अभिसंज्ञिता** अन्वर्थेति। तद्योगाच्च गीतखण्डो **विदारी।।१७।।**

एवं प्रसङ्गाद्विदारीं लक्षयित्वा ङ्गानां प्रवत्तिभागेन विनियोगमाह। **एतेषा**मिति। **विधि**र्विभागः **प्रकृतिषु सम्भवो** स्येति। तत्र वत्तं बहुवैदारिकम्। ज्येष्ठेषु तेषां हि प्राधान्यात् तदवान्तरार्थविश्रान्तिः सम्भवति। यत्र विश्रमो लङ्कारयोगः। विचित्रव्यभिचारिकत्वात् स्थायिता(नः)। यथा। .....**रो अनुसरइ गुरु अइ च्छिज्ज हण्णेण किणीवणे विणज्झि रइत्दिम्**। (अनुसरति गुरुमपि शिष्यो दण्डेन केलिवने विनक्ति दष्टिम्) (अत्र) वत्तं च नियम्यते न तु ज्येष्ठाः। तेषु विवधैकयोरपि सम्भवात्। एकद्विखण्डादाविह तालस्य लक्ष्यते। अधमस्य त्वन्यत्र गुणीभावाद् बहुचेष्टाभाव इत्येकैव विदारी। यथा **विदूषकस्य**। यथा। **महुअर इह सिरिअ** (मधुकर इह श्रित्वा) इति। मध्यमस्य तु मध्यमादेकको विवधः सम्भवी। अत्र चोभयतो पि न नियमः। अत्र **टीकाकारे**णाक्षिप्तम्। **वज्रं च शीर्षकं चे**ति (भ. ना. अ.३२.१०) विनियोगः प्रागुक्तः। तत्र वज्रादिषु वर्णान्तराङ्गानां **तालाध्याये** (भ.ना. अ. ३१) बहुना बहुशाखिः(खी) पूर्वापरविरोध इति। **तदेतस्मदागम**व्याख्यायां निरुत्थान(रूपित)मेव। अन्यदेव हि वज्रादिभ्य उपजीव्यमिति **दर्शितम्**। तेना पि न परिहारमुत्प्रेक्षमाणेन प्रज्ञातयेयमेव दिक् सष्टा। सदा**गमाभावात्तु** न स्पष्टीकर्तुं पार्यते हि। तथाहि **तेनो**क्तम्। प्रकृतिविकारभावमात्रमेतत्। अन्यथा गीतकाङ्गमेवेदं गीयत इति भवेत्। लयभङ्गोत्थानबीजगतं चेदमेवेति।।**१८**।।

अथ रसप्रसादनोपयोगकृतात् प्र(प्रा)धान्याद्वा प्रासादिकीं ध्रुवां विचारयति। त्र्यंश(त्र्यश्रं) वेति। युज्यते **योगो** वाक्यम्। प्रयोग उक्तो वक्ष्यमाणो विनियोगस्तज्जम्। **त्र्यश्रं चतुरश्रं वा** पाठ्यं **ज्ञात्वा** तत्पदप्रमाणे च प्रासादिकी कर्तव्या। एतदुक्तं भवति। इह **त्र्यश्रं चतुरश्रं वा भागेन** तावच्छन्दोवत्तविनियोगो वक्ष्यते। तदनुसारेणैव तत्सदशवत्तौ प्रासादिक्यां पाठ्यान्तरभाविन्यां कुर्यात्। एकं हि ध्रुवापाठ्यं योग्य(ग्या)ङ्गमौचित्येन। अवसायो वसानं निश्चयो रसः। तत्प्रयोजनमित्यस्या(मस्येत्या)**वसान(नि)की**।

अपरे तु न वत्तमनेन प्रासादिक्यामुच्यते तस्य वक्ष्यमाणत्वात्। अपि तु पद्योचितस्तालरूपश्च विनियोक्ष्यमाणत्वात्। अपि तु या त्र्यश्रा चतुरश्रा। उचितवत्तपाठ्यानां तु चतुरश्रताल इत्याहुः। इदमेव युक्तमि**त्युपाध्यायाः। अन्ये** तु त्र्यश्रं चेति प्रावेशिकी कार्या। अल्पीयो क्षरे च्छन्दसि न विभावानुभावाभ्यां स्फुटनिरूपणा।।**१६**।।

अथास्य शब्दाङ्गस्याह। **गायत्र्यां चाति(पि)शक्वर्यामिति। अन्तरग्रहणात्** तयोरुपलक्षणमात्रत्वं न कार्ययोगात्। **मैत्रचैत्रयो**र्द्विजांस्तद्भोजयेति। **तेन** उष्णिगनुष्टुप्त्रिष्टुव्जगत्यतिजगतीशक्वरीच्छन्दःप्रमाणेन वानैककेन द्वाभ्यां त्रिभिश्चतुर्भिरधिकैर्वा प्रासादिकी कार्या। अल्पीयो क्षरे च्छन्दसि न विभावा.....नि स्फुटरूपणा। अतिविततते च पाणिकात्वमपि तु योग्य(म)पि न चेदुभयं चैतत्

प्रसिद्धिविरुद्धमित्येवम्परमेतत्। तासु यत् प्रमाणं तदुपचारात् सामानाधिकरण्येनोक्तं तेनेति।।२०।।

एवं वर्णवत्तैः प्रासादिक्यां तालव्यक्तिमभिधाय मात्रावत्रैरप्याह। शक्वर्यां **चाभिकृत्यां** चेति। चतुदर्शाक्षरा **शक्वरी। एक**विंशत्यक्षरा **भिकृतिः**। यदन्तरालं यानि मात्रावत्तानि तत्पादयोगेन प्रासादिकी कार्या। मात्राभूयस्त्वे पि ह्यक्षराणि गुरुप्रवेशान्न भूयांसि भवन्ति। **मात्रे**ति यात्रावत्तादि। तदयं समन्वयः। **शक्वर्यभिकृत्ययोरन्तरे मात्रा विहिते**ति मात्रावत्तान्युक्तानि। तेषां ये **पादास्तन्मयी अवसानिकी ध्रुवा स्मते**ति। ये इत्युपरितनशब्दोपक्रमः। तेषमित्युपचारविषयो यथा **समभारो या च ऋतकामाय यो मोदो(दा)** तस्मादागत(म)वत्।

अन्ये तु श्लोकद्वये पि **च**कारादुपलक्षणमपि संगह्णते। छन्दोविनियोगमात्रमत्र। न तु श्रव्यतोपयोगिता। गुरुलघुयतिनियमे मात्र कृत्यम्।।२१।।

गीतवशादेव यत्याद्यवच्छेदाच्छ्रव्यत्वसिद्धिरिति **यो मयोक्त** (भ.ना. १४.१) इत्यत्र तं प्रत्याह। **यतिच्छन्दोविधानेने**ति। **छन्दो** विधीयते येन प्रयोजनेन **तच्छन्दोविधानं** श्रव्यत्वम्। तेन **ध्रुवपादो यत्या** विरामेणोचितेन शुद्धतया चोपलक्षितः कर्तव्यो वर्ण्यत्वे च नियमो **गुरुलघुभिरन्वितः** कर्तव्यो मात्रावत्तत्वे यादशमेव प्रमाणमागमोदितं रूपं यथा वैतालिकी यतिरन्तराणां वा समपादो.....दत्तेन युक्तः कार्यः। एवं **चावसानिको** रसवत्तिनिश्चयकृद्भवति। यथा गीतियोगे प्यवसानिको निश्चययुक्तः कार्यो न वत्तं यत्यादिसमाच्छादकं कार्यम्। अपि तु तदनुवर्ण्येव कार्यमिति पूर्वपक्षिकसम्मतं हेतुद्वयमप्यहेतुकृतम्। **अवसानिक** इति मत्वर्थीयःषच्(यष्ठन्) (अष्टाध्यायी ५.२.११५)।।२२।।

एवं पाठयोजनया प्रासादिक्यास्त्र्यश्रादितालविभागं निरूप्य प्रकृतिभोगेनाप्याह। **मध्यमोत्तमयोः कार्या चतुरश्रे**ति। गीतके प्यवसानिको निश्चययुक्तः कार्यः।

एव**मुत्तमस्य** तावच्चतुरश्रतालेन **मध्यम**स्यापि तदनुगतस्य चतुरश्रैव। अधमस्य तु त्र्यश्रा तद्बाहुल्ये मध्यमत्वे च। एवमेव द्वित्रिचतुरश्रेति.....पादयुक्तानां प्रासादिकीनां वत्ततालविधिरुक्तः।।२३।।

यासां तु नियमेन पादचतुष्कं तासां विधिमाह। **अथ पूर्णपदी**ति। पूर्ण(र्णः) पादो यो द्वितीयपादस्तावच्चतुर्भाग इति पूर्णत्वमस्य। चतुर्वर्ष(ष्पद)त्वमनेन चतुष्पदी या प्रासादिकी सा प्रावेशिकी वत्तेनैव कार्या। न तु तत्रैव.....इष्टम्। कविप्रथमस्वीकृतस्य प्रवत्तस्य **प्रामाण्यात(त्)** प्रमाणीकृतच्छन्दोविशेषाद् **ध्रुवा कार्या।** न तदेव वत्तमपि तु तच्छन्दकमिति यावत्। **प्रमाणत** इति चतुरश्रादिनेत्यर्थः।

टीकाकार(रा)स्तु परिक्रमणैस्त्रिकोणचतुष्कोणरङ्गापेक्षया त्र्यश्रचतुरश्रतालविभागमाहुः। तदस्मद्गुरुभ्यो न रुचितम्। पादविभागेन बहिरङ्गविभागत्वात्। तत्त्रिकलचतुष्कलविभागेन चाचपुटे पि **चुल्लवराअय्यज्जषाज्ज रस्सणीआ** (चालपराजययशो द्य रक्षणीयम्) इति पादचतुष्टययोगे मुखचतुष्टयदर्शनात्।।२४।।

एवं प्रासादिकीं विचार्य सर्वध्रुवाविषयं विचारमाह। **ध्रुवास्त्विति**। या एताः **प चापि ध्रुवा यथास्थानरसोपेताः** स्थानं प्रवेशादि(दिं) रसं अनतिक्रम्योपेता उचिता(क्ता)स्तथा वक्ष्यमाणा **नानावत्तसमुद्भवास्ता उत्तमाधममध्यमास्तु ज्ञेया** यथोत्तमादिप्रकृतिविषये स्वस्वप्रमुख एव ज्ञेयम्। तथा हि कर्तव्यमिति यावत्।।**२५**।।

तत्रोत्तमविषयं कनीयस्या ग्रहणेन सूच्यते। कनीयस्याश्चाद्यपरिक्षेपप्रवेशात्। अन्यतमदर्शनेनोत्तमविषये यं ध्रुवेति दर्शयेत् कुशीलवानां तदुचितपुष्करवाद्यादिसंविधानावधानसम्पत्तिरित्थं कार्या। मध्यमध्रुवा तु हस्तद्वयसन्निपातेन ग्रहणकालप्रथमभाविना सूच्या। एतदुभयाभावेन शून्ये च ग्रहणमात्रेणाधमा **ध्रुवा।** अङ्गुल्यूर्ध्वतया गुणप्रकाशनमुत्तमेषु सन्निपातो मध्येषु शून्यत्वं गुणशून्यादधमेष्विति **केचिद्** यथासङ्ख्योल्लङ्घनेन व्याचक्षते। **अन्ये तु कनीयसी** प्रहारपातेनोत्तमध्रुवासु भाण्डग्रहः समहस्तप्रहारपातेन मध्यमध्रुवासु शून्यवर्तनामात्रोपक्रमेणाधमध्रुवास्त्विव्त्याहुः।

उपाध्यायास्तु मन्यन्ते। कनीशब्देनाद्य एव पादभागः। तेनोत्तमध्रुवायां गानसमकालं पुष्करवाद्यमित्यर्थः। तेन ध्रुवातुल्यवत्तत्वं भाण्डवाद्यवत्तमुत्तमे येन गानं स्फुटमिति यावत्। **सन्निपातः** प्रथमपादान्ता कला। तथा प्रथमध्रुवासु भाण्डम्। मध्यमेष्वादावेव भाण्डग्रह इति।।**२६**।।

ननु गान्धर्वमुखेन भागवद्गानमिह लक्षयितुमारब्धम्। गान्धर्वे पि तथैव च स्वरविधिरध्यायत्रयेण (अ. २८.२६.३०) दर्शितः। तालविधिरध्यायेन (अ.३२) च। तत्रैव पदविधिरिति(रपि) दर्शितः। कुलकच्छेद्यादि नाप्रमाणमिति किमपि कथितम्। **द्विगुणाक्षरसंयोगात्** (भ.ना. ३१.८४) **कार्यस्त्वक्षरजो विधिः** (भ.ना. ३१.१५७) इति। तद**भिनयाध्याये** (भ.ना. अ.८.६) ध्रुवाणां प्रवेशादिभेदो रा(र)साद्यौचित्यमात्रं च निरूपणीयम्। किमन्ये(ने)न वितनेन च्छन्दोवत्तिविचारेण। अथोच्यते पदमिह प्रधानं तद्गान्धर्वे पि तथैवेतदित्याशङ्क्याह। गान्धर्व यन् मया प्रोक्तमिति। **गान्धर्व** यत् कारकादिवत् **प्रोक्तम्**। अदष्टप्राधान्यात्तस्य चापूर्वप्राधान्यं न भवेत्। अभ्युपगतमेतत्। किन्त्वन्यथा तस्य गाने प्राधान्यमन्यथा च गान्धर्वे। तत्र हि स्वरतालौ प्रधानम्। तौ चानाधारौ न शक्यौ प्रयोक्तुमित्याभारतया यदुपयोगि तदाह। **स्वरतालानुभावकमिति।।२७।।**

नन्वर्थावगतिरत्र प्रधानं गान इव। अनश्चैतत्। अक्षराणि गान्धर्वे पदानीति यावत्। यत् स्यादक्षर**सम्बद्धमि**ति। **निबद्धमि**ति। **झुंटुं दिग्ल**त्यादि (भ.ना. २६.६६)। एवं हि **प्राक्तना(प्राक् ता)न्यक्षराणि वक्ष्ये यानि पुरा ब्रह्मगीतानि** (भ.ना. अ.३१.१०४) इति। **अनिबद्धं देवं शर्व**मिति (भ.ना. ३२.४८) कविभिर्न(रा)देयत्वात्। **निबद्धं पद्यमनिबद्धं** गद्यमिति तु युक्तम्।।**२८**।।

अतालमिति। अप्रतिष्ठं च। द्वयमन्योन्यसंगतौ। एवं गतं तावद् गान्धर्वे पदप्राधान्यं गाने स्थितं तदित्याह। **सतालं च ध्रुवे**ति। **सतालं** परस्परसंगतिप्रधानः(म्)। अर्थेषु च रसोचितेषु **निबद्धं** यदीदक् पदं **तद् ध्रुवा**। अतो नादष्टार्थ **ध्रुवापदं** गान्धर्वपदवत्। अत्र हि

सम्भवत्पदे च स्तोत्रार्थापेक्षा। नागमापेक्षि देवतापरितोषकृत्। स्तुतिसम्भवमात्रादेव तत्सिद्धेः। गाने तु तदवगमं प्रधानं सामाजिकं प्रति। तदाह। **सर्वसाधकमिति।।२६।।**

ननु नाट्येषु स्वरालापप्रभतिगानमनक्षरमेव दष्टमित्याशङ्क्याह। **यत्तु वाक्वरणोपेतमि**ति। **वाक्करणं** वाक्क्रियामात्रस्वरालापे हुंकार इति तदुक्तं यद्गानं तदतालप्रतिष्ठं यावद्गति यावच्छक्ति च प्रयुज्यमानत्वादनिबद्धं च। स्वरयोजने पि गान इव रसापेक्षकवर्णालङ्कारादिनियमाभावेन यथाकविस्वातन्त्र्यं तदेवंविधमतालं त्र्यश्रमात्रादिरूपविहीनं ध्रुवागानात्मकमेतच्च भवतीति यावत्। ननु किं तथाविधस्य प्रयोगेनेत्याह। **सर्वतोद्ये**ति। **सर्वातोद्या**नां ततसुषिरादीना**मनुर जकं** स्वाद्यांशस्य भाविध्रुवार चनोपयोगिनस्तद्वीणावंशादिवशात् पूरकमिति यावत्।।३०।।

ध्रुवाक(ङ्क)मेवंविधमानमिति दर्शयति। **नियताक्षरसम्बद्धमिति नियतानि** प्रकृतसाद्यौचित्याय त(द्)गुणालङ्कारसंघटनादीनि **यान्यक्षराणि** तैर्युक्तम्। च्छन्दसाक्षरपरिमाणे **यत्या** विरामेण युक्तम्। सह **तालेन** यत्राक्षराणि सह **पतनेना**वगमनवत्।।३१।।

ननु लक्ष्ये वाद्ययोगे पि तालप्रधानमिति विगीतं ताल(ला)कारादिनार्थशून्यं दष्टं तस्य कर्ह्युपयोग इत्याशङ्क्याह। **अनिबद्धाक्षराणि स्युरि**ति। अनिबद्धान्यर्थशून्यानि यान्यक्षराणि जात्या छन्दोरूपया विहितानि **तेषां यद्विधानं तदातोद्य**गतैः पुष्करवीणादिगतैः करणैः क्रिया **भिनिर्मितं** सम्यग् निर्णीतम्। एतदुक्तं भवति। उद्धतपरिक्रमणादौ भाण्डवाद्यमात्रे प्रधाने तन्मात्रोपदर्शनमात्रम्। तेन तच्चापि ध्रुवारूपं न भवतीति यावत्।।३२।।

एवंभूतेषु च गायनसावधानत्वं यत्नेन विधेयमिति दर्शयति। **अपदानी**ति। एवंभूतानि यान्यक्षराणि र जयेद् यत्नेन रक्तियुक्तानि सम्पादयेत्। कथमित्याह। **आतोद्येष्विति**। वीणावंशस्वरादिमिश्रीकरणेन नियोजनेनेत्यर्थः।

नन्वयमेव तत्र र जनाप्रकार इति कुत इत्याह। **अपदानीति**। किं....पदम्। अनिबद्धान्यर्थशून्यानीत्यर्थः। अत एव विद्यमाने पि ताले तत्कार्यकरणतच्छून्यानि विना ह्यर्थेन तालो पि परिक्रमणादिरूपत्वादकि ित्कर इति यावत्।

अन्ये तु ततसूषिरगतानां स्वराणां वैचित्र्यं यथा क्रियेत तदनेनोच्यत इति व्याचक्षते। तते सुषिरे च विपदवत्तानुहीनानि यानि स्वरमात्राणां करणमात्रजनितानि र जयेत्। आश्रित्येत्यध्याहारः। तानि तालपदवत्तवन्त्यक्षराण्याश्रित्य तन्मेलनीयतां तदनुहारेणेति। अत एव गान्धर्वाद्विकलक्षणमत्र पदप्रधानमिति स्थितम्।।३३।।

तत प्रकृति.....**यानि चैवमि**ति। वैचित्र्यमिति। पदानीति प्रकरणाद्विशेष्यम्। प्राधान्येन चारब्धानि ध्रुवारूपाणीति सामानाधिकरण्यम्। **छन्दोवत्तिविधाना**द्धेतोर्यतो वक्ष्यति तत एव **पूर्वाणि** प्रधानानि। अवत्तपदमात्रापेक्षया तानि रसाद्युपयोगीनीति विशेषत उक्तमसकृत्। **अन्ये** तु **पूर्वाणी**ति पदं ध्रुव याः शुष्काक्षराणीति तावन्त्येव पश्चात् कर्तव्यस्यार्थस्य संग्रहार्थमित्याहुः।।३४।।

एकैकाक्षरैर्नार्थपुष्टिरिति द्विरादि(रक्षरैरि)ति। अत्युक्तादि **गायत्र्यन्तं** विलम्बिताह्य(स्व)**पकृष्टासु** च त्र्यश्रभेदः। **उष्णिगा**द्याश्चत्वारि(तस्रः) **प्रासादिक्यां** निरूपयति। **अत्युक्तं चेति। च**कारात्। सुप्रतिष्ठा। **स्थितासु** विलम्बितासु ध्रुवास्वपकृष्टासु छन्दः। **जातय** इत्युषचारात् सामानाधिकरण्येनोक्ताः। छन्दस्सु जातिशब्दप्रयोगो वक्तव्यः। तदनुयायित्वाद् वत्तेषु जातिशब्दप्रयोगो ध्रुवाभेदे प्यनुगमात्। ध्रुवासु जातिव्यवहारो रसभावकृतभेदस्यान्वयात्। एवमि(म)त्य(त्यु)क्तादि **गायत्र्यन्तं** विलम्बितास्**वपकृष्टासु** च त्र्यश्रभेदे। **उणिगाद्या**नि चत्वारि **प्रासादिकीषु** त्र्यश्रभेदो(दे)।।**३५-३६**।।

अनुष्टुब् बहती जगती प्राविशिकेषु। तत्रैव **विलम्बितादी**नि वत्तानि।।**३७**।।

उक्तासु **पङ्क्त्यादीनि** प च।।**३८**।।

जातीनामिति। यस्वच्छन्दसामिति।।**३९**।।

अपकृष्टेति। विलम्बिता(त)लयवती प्रायो **गुरुप्राया। शेषे**(षा इ)ति। मध्यलयविषया (गुरुलघु)**प्रायाः।।४०।।**

व्याप्तिं शिक्षयितुमाह। **वत्तान्योजकृतानि। भवन्ती**ति शत्रन्त(म्)। **युतानीत्यन्ते**। तत्रार्थे तत्र दुःखे न तत्प्रधाने करणादौ। **ओजकृतानि** त्र्यश्रभेदविषया(पकृष्टासु) युक्तानि स्यु**र्वत्तानि। तानि** द्रुतलययोग्यासूद्धतास्वप्यवान्तरेण गुरुस्थाने **लघुयुग्मेन** योजितानि योज्यानि। तद्यथा। अत्युक्तादीनि त्र्यश्रे स्थितानि स्वरभेदेन यान्युक्तानि तान्येव लघुयुग्मीकृतगुरुरूपाण्युद्धतासु। **ईशं वन्दे। देवं शर्वम्।** (इत्यत्र लघुयुग्मीकरणे) **द्रुतगति गजपतिरिह किल विचरति** (इति)।।**४१**।।

एतद्विपर्ययेण व्याप्तिमाह। **यानि चाल्पाक्षराणी**ति। ह्रस्वाक्षराणि यानि यानि वत्तानि तानीति। छन्दोपेक्षया ल्पच्छन्दसि तथा स्थाप्यन्ते। युग्मस्य गुरुकरणा**त्तान्याक्षेपिकीषू**द्धतासु द्रुतलयास्वप्युक्तानि। अनया भङ्ग्या **स्थितापकृष्टया** करणार्हाणि। चो प्यर्थे। यथा।

पवणनछन्दोधत्तो भवणिवदे उपक्क्रम सोवत्त।

(पवननछन्दौधात्तो भवानीपतेरुपक्रमः संवत्तः)

लघुयुग्मस्य गुरुकरणे।

सेव्वणअकाअरा रूपाभाग संणेइ(आ)।

(सेवानयकातरा रूपाभोगा संज्ञेया) ।।**४२**।।

अथाक्षेपिक्यां कीदग् वत्तं प्राधान्येनेत्याह। **योन्योजयुग्मछन्दांसीति।** वत्तान्योजयुग्मगतपथग्लक्षणत्वाद् योगो युग्मानीत्युच्यते। तेनार्थसमानि वत्तान्याक्षेपिकेष्ञु पूर्ववद् गुरोर्लघुद्वयस्थाने योजनया स्थितायां विलम्बितायाम्। **अन्ये त्वोजे** (ज इ)ति सप्तमीं पठन्तश्चतुरश्रविषयाणि च्छदांसि भङ्ग्यन्तरेण त्र्यश्रे पि विधेयानीत्येवं वाक्यस्य तात्पर्यमाहुः।।**४३**।।

गुर्वादिषु गुरुः कार्यो लघ्वादिषु लघुस्तथा।

इति। (न)क्वचिदपि लोके दश्यते। यद्वत्तलघुगुरुस्थाने यथासंख्यं तालोचितगुरुलघुयोजनं कार्यमिति। .....कर्तुं लयादितालजातं संगहणीतेत्यथ **विरहे मअणो अहिअं दहंद्ध(हउं)। (विरहे मदनो खिलं दग्धुम्)।** अनेन लघुद्वयगुर्वात्मना चर्चरीतालः संगहीतः।।४४।।

एव समार्थसमविषमविचारं कृत्वा विषमवत्तविषयं तमाह। **विषमांशाक्षराणि स्युरिति। विषमांशानि** मात्रावत्तानि। अंशो हि चतुर्मात्रादिः। विषमाक्षराणि च वर्णवत्तानि विषमाणि वैषम्यसंख्यया वान्तरसंख्यायोगे पि गुरुलघ्वात्मना वोभयथा वा।

ननु तत्र प्रतिपादं तालस्य कथं समत्वेन योजनमित्याह। **शम्यातालेनेति**। अत्र यास्वित्यध्याहारः। यासु विषमाण्यक्षराणि च पादे हेतुभिस्ता ध्रुवासु च चत्पुटादितालेन **योज्यात्(:)। आकर्षितेन च वर्णेन**। एतदुक्तं भवति। लघुस्थाने वर्णे वाकर्षणीयो गुरुस्थानेन क्रमणीय इत्येवं वा साम्यपादयेदिति। शम्यादिताल ग्रहणेन च चत्पुटादितालो लक्ष्यते। **केचित्तु** श्रमपरिहारार्थं भोजनप्राङ्मुखतान्यायेनादष्टसिध्द्यर्थं शम्यातालौ ध्रुवातालेष्वावत्या यावत्संभवं योज्यौ। तथा च भट्टवद्धदत्ताधि(धीन)पाणितल(ल)यभ्झङ्ग––लक्षणपुस्तकेषु सर्वत्र शता इति प्रस्तारो दश्यते।

ननु किं तथाविधैः पादैराश्रितैरित्याह। **अर्थवशानुगा** इति। अर्थो ह्यत्र प्रधानमित्युक्तम्।

अपरः श्लोकस्यार्थः। प्रकल्पितेनापि विकारभाजा **वर्णेनो**पलक्षितम्। यच्च **शम्यातालमिति** तालविशेषः कश्चित् प्रतिपादमप्रूभ्यस्तेन योज्यः। अर्थसमविष्ज्ञमेष्वयं..... भवति श्लोकः। तेन च चतुर्लयद्विलयचतुर्भङ्गे यदुपभङ्गादीनां लक्ष्ये दश्यमानानामिव तद्बीजमिति साम्यापादनाय शम्यातालावत्र नादष्टार्थमिति यद्यन्ते(मन्यन्ते) तदसत्। अन्यतरेणान्येनापि वा तत्रोक्तेन वा पा(प)द्यान्तरेण वा ध्रुवकासर्पिण्यादीनामपि साम्यसिद्धेः।।४५।।

जातीनामिति ध्रुवाणाम्। **छन्दोग्रहणं** दण्डकादिव्युदासाय। **निदर्शनं** ग्रन्थं वक्ष्यामीति। तेन ग्रन्थेन कथं छन्दो वत्तं प्रदर्श्यत इत्याह। **स्थानेति**। **स्थानं** विनियोगविषयः स उदाहरणाल्लक्ष्यते। तदर्थमेवोदाहरणमिति **वद्धाः।** यथा। **सोअदि तारा अस्सु किलिण्णा** (शोचति तारा अश्रुक्लिन्ना)। इत्युदाहरणम्। भूतलं **तन्व्याः** श्लोकविषये प्रयोग इति गम्यते। **प्रमाणं लक्षणं(णम्)। संज्ञा** श्रीरित्यादिका। तेनोदाहरणलक्षणासंज्ञाभिरिति यावत्।।४६।।

तत्रायं ग्रन्थः स्पष्ट इति विषमस्थाने व्याख्यायते। सुखग्रहणार्थं इति निजेन **श्लोकेन** हि तासां संग्रहं ब्रूमः। उदाहरणाच्च पादं लिखामः। यतिविषयः श्रव्यत्वाद्विनिबोधसिद्धये।

श्रीगौ विद्युद्रो यो धतिः स(सस्)त्रियामा।
रगौ प्रतिष्ठा सभगौ मत्तालिः स्गौ जया जगौ।
विस्मया त(म)गगास्तन्वी भगगा(:) पद्मिनी शन्ल(नल)गाः।।

वन्दे। शङ्करः। उमेशः। मदनो(नः)। वाति(दि) वातो(दो)। हंसवहू। वणहत्थी। पविण्णइ(ओ)। मेहा गज्जन्ता। सोअदि तारा। भमइ णहे।**।४७-७०।।**

वागुरा र्लगा जगा(:) शिखा।
सगा(:) पङ्क्तिका तयौ तु मध्यमे(मा)।
भरौ मालिनी न्य(न्यौ) शीर्षिका च।
निर्मला स्यौ तु वीथिका मसौ नरौ गिरा।।

शि(णि)च्चणिव्व(प्प)हो। परुप्या(ण्ण) अव्व। रुददिव्वब्भम्। भूमिं पतदिव्व। पुण्णिमवन्दओ। विलसदि वादो। विहआ णमत्ती। णच्चन्ते सिहिणो। सुणिअ कुंजरो।।**७१-८६**।।

तरौ जला म्यौ तु सुनन्दिका।
भमौ विद्योतिका सौ नलिनी र्म(र्मौ)नीला।
द्रुता गतिर्नौ सजौ गुरुस्तनुः।
शिखार्जगा(:) षट्पदिका नसौ गुरुः।।

हंसी परुण्णिआ। भीमा काळमेहा। किंसि पिए कुद्धा। कुसुमागभए। विक्खिरण्दी(न्तो)वादो(दी)। रमणि रतिकरम्। पिअवादिवादओ। वादि वामवादओ। रम्मं सरसि तोअम्।।**६०-१०६**।।

भौ गो भोगवती (मधुकरिका तनगाः)।
जरगि मनोज्ञा नरगी मत्ता।
मुदिता यसगी प्रकाशी नरगा।
चरगा विलम्बा सरिगी दीप्ता।
भजगी च चलगतिरमलाम्बु सनलगगणा।।

चक्काणामवहू। एसा पिअअलदां करेणुआ अहूणो। पविचरितो हत्थी। महामेहविदाणम्। रमणि वादि वादो। पडे(टी)परित्थहंसा। पवणो पुप्फवाही। सोहदि न(ण)हंगणे। विहगो भमइ सरे।।**११०-१३०**।।

ललिता नजलगि नसलगि धरणी।
मधुकरिका नौ गौ नजलगि नलिनी।
छनगी(भ्नलगी) च नदी।।

विलसदि हंसवहू। परिसरदि हंसिआ। लसदि सरदि वादो (पअरदि सारसिआ।) हिण्डअद महुअरिआ।।**१३१-१४०**।।

अनुच्छेदा मध्यमोत्तमासु प्रावेशिक्याम्।
अथ निकृष्टासु।।**१४१**।।
रुचिरा तभया(:)।
प्रमिता सजसगि नसना गौ च विशोका।।

तेजस्सुएहि रुददिव्व। ण विभादि जोह्णरवि(हि) इन्दू। जलहरविआणवि(पि)हिअंगो।।**१४२-१४७**।।

तभजलगा विश्लोका ललितं तभजरि कथितमिदं वत्तज्ञैः।

अत्थं अव्वेदि अरुणाभिहदो। रम्मे वणे गअवरो पलाअदी। ।।**१४८-१५१**।।

एतदुपसंहरति।

एतास्तु जातयो ज्ञेयाः स्थितानां हि प्रयोगजाः।

इति अन्यथा सूत्रयति। आक्षेपिक्यप(व)कृष्टानां सम्प्रवक्ष्यामीति। आक्षेपिकीत्वे सत्यवकृष्टत्वं यासां ता आक्षेपिक्यवकृष्टयः(ष्टाः)। तेन रसाक्षेपकृतमाक्षेपिकीत्वमनुबध्यते। करुणादौ भवत्येवेति दर्शितम्।।**१५२**।।

सुप्रतिष्ठादिकमिति। मिताक्षरम्। आस्ववकृष्टास्विति यावत्। न सकलध्रुवागाने नाट्योपर जके वकृष्टानामयं विधिर्यावत् पूर्वरङ्गगते गान्धर्वे कृष्टावकृष्टध्रुवायामिति दर्शयति। **वत्तान्यन्यानि यानि स्युरि**ति। **देवस्तुल्याश्रयाणि** निवत्तान्युक्तानि ईशं **वन्दे** इत्यादीनि तान्यवकृष्टध्रुवाविधौ पूर्वरङ्गयोगे स्युः।।**१५३**।।

अवकृष्टत्वं निर्वचनतो दर्शयितुमाह। **अक्षराणि लया वर्णा** इति।।**१५४**।।

पाण्यवकर्षणादवकृष्टेति यदुक्तं तदेव स्फुटयति। **स्थायिवर्ण(र्णा)** इति वर्णस्य स्थायित्वमेवापकर्षणं लयस्य विलम्बितत्वं पाणेः समत्वं पातश्च।

केचिदाहुः। समपाणेः समयतेश्च मध्ये यो विनियोगो विलम्बितलयायामवकृष्टायां संयोगात् सम उचितो यः पाणिः उचिता या यातिः सा त्र मन्तव्येति।

अन्ये तु यतिपाणिपरस्परापेक्षया समौ तुल्यौ परस्परानुबन्धाविति ईदशं साम्यमाहुः।

उपाध्यायाश्च मन्यन्ते। औचित्यं तन्त्रापेक्षया पूर्वमुक्तम्। मध्यमे लये समपाणिः समा च यतिरित्यादि। वस्तुतः सर्वत्र सर्वस्य विधेः सम्भव इति।।**१५५**।।

कलान्तरकृताक्षरेति यदुक्तं तद्विस्पष्टयति।

अवकृष्टध्रुवाणां हि कलान्तरकलासु च।
अक्षराणां निवेशस्तु वत्तजात्यामिति।।

वत्तजात्यां यान्यक्षराणि गुरुलघुरूपाणि तेषा**मक्षराणां** कलान्तरे कलायां च यो **निवेशः** स सावकृष्टासु विधीयते। एषो सावकृष्टाक्षराणामवकृष्ट इति यावत्।

एतदुक्तं भवति। गुरुणाक्षरेण स्वराधारभूता तालकलया व्याप्ता तदपेक्षया द्विकलाव्यापिनी या तत् **कलान्तर**मित्युक्तम्। लघुना त्वेकैककला निर्वाह्येति। एवमेव च लक्ष्ये करुणादो द्विपदीभ चकादिप्रयोगो दश्यते। यत्तु दक्षिणमार्गेण या कलान्तरमात्रेति तदतिविततदर्शनाच्चोपेक्ष्यम्। चत्वारिंशल्लघुकालस्तालकलाध्रुवामनुलक्ष्य लक्षित इति।।**१५६**।।

मिताक्षरच्छन्दो यद्यवकृष्टायामुक्तं तथापि विततमपि भवति तस्यानिबद्धत्वादिति यो मन्येत तं प्रत्याह। **अल्पवर्णान्तरा चैवे**ति। वर्णविशेषा अल्पस्यान्ते दश्यन्ते **वा वकृष्टे**ति नियमः। भूयो क्षरत्वे च भेदातिशयसम्भवात्। एवं यदा क्षेपिक्यवकृष्टा भवति तद्दर्शयति।

प्रावि(वे)शिक्यास्तु संक्षेपः कारणानां परिग्रहात्।

इति। **प्रावेशिक्या** अपि **संक्षेपो** मिताक्षरत्वं भवति। कुतः। **कारणानाम**वकर्षणहेतुनामक्षरलयाद्यवकर्षणानां **परिग्रहणान्या**(दा)श्रयणात्।।**१५७**।।

एतदुपसंहरति। एवं **ज्ञेयो वकृष्टानामि**ति। एवं विलम्बितामभिधाय द्रुतध्रुवां प्रतिजानीते। **अत ऊर्ध्वं द्रुतानामि**ति।।**१५८**।।

तत्र सन्धिर्मुखमत्रेत्यसत् यावन् मात्रातस्तावत् साधारणं रूपमाह।

मुखे तु दोधकं कृत्वा शेषं ह्रस्वैस्तु योजयेत्।
युग्मभोजं विमिश्रं च तथैव लघुस चयः।।

इति। सन्धिर्मुखत्रेत्यसत् अप्रकृतत्वात्। किंतु प्रारब्धप्रथमपादे **दोधकं कृत्वा शेषं** पादत्रयं **ह्रस्वैः** कुर्यात्। (**युग्मं**) चच्चत्पुटमोजं चाचपुटं **मिश्रं** वा सप्तकला तदिह योजयेदित्यावत्या सम्बन्धः।

ननु पादत्रये यानि ह्रस्वानि क्रियन्ते तानि कियन्तीत्याशङ्क्याह। तथैव **लघुस चय** इति। दोधकमात्राणां पूरक एव **लघुस चयः** पादत्रय इति यावत्। **अन्ये** तु

जगत्यादि भ(र्भ)वेत् सा तु तथा तिधतिनैधना। (भ.ना. ३२.१६०)

इति वक्ष्यमाणत्वात् पदत्रये जगतीमारभ्यातिधत्यन्तं यानि च्छन्दांसि तेन लघुसंख्यां कुर्यादित्याचक्षते।।**१५९**।।

एवं तावद् द्रुवध्रुवासु–सामान्यविधिमुक्त्वा विशेषमाह **जगत्यादिरि**ति। अतिधत्यन्तादिवत्तेन द्वादशाक्षरमप्येकोनविंशत्यक्षरं द्रुतासु च्छन्द इत्यर्थः।।**१६०**।।

(मेघसमूहनिंबद्धवितानं जलभरितम्।
शोभत इन्द्रधनुरुज्ज्वलमध्यं गगनतलम्।।)

एतत्विति। द्रुतध्रुवा। तत्र जगत्याः प्रभति वत्तानि दश्यन्ते। **दीर्थाण्यष्टावित्य**ादि।

मत्रयसा **विक्रान्ता** मद्वयतनगाश्च **मदनिका तन्वी**।

भमसभसाः **सुकुमारा** त्रिभतनगा–

विझूद्वण्णौ पीणाआन्तो णादिगओ। एसो मेहो णाणद्दन्तो अच(ल)कनि(णि)हो।
पादपसंडं कम्पयमाणो पड्डणिणदो। मेहसमूहणिबद्धविदाणं जलभरिदम्।।**१६१-२६८**।।

–(नज)जयनलगा **माला**।

स्खलिता सभमसभसयुजि चपला नजजनभंसी च।
मुखचपला नजनसननगा अष्टावेतानि द्रुतविधौ प्रयोज्यानि।।

असणिरवाहदपादवकूडो धरणिधरो। गहणे मेहविमुक्खे सोम्मसहाओ रतिसुहखो(गो)। पवणविघुण्णिदपंकअकुसुमं सरसिजक(ल)म्। पविचरदे मदसुरभिमुही सुरवरयुवदी।।**१६९-१७७**।।

सर्वत्रात्र प्रतीयस्या(ता)अमूइति(भूदिति)आसां विषयं निरूपयिध्यंस्खलो विषयान्तरेभ्य एव द्रुतध्रुवां कल्पयेदिति दर्शयति।

एता ह्यष्टौ परित्यज्य ध्रुवाणां मूलजातयः।

आभ्यो विनिःसताश्चान्या युग्मौजविषमाः पराः।।

इति। यावता जगत्यादावतिकृत्यन्ते च्छन्दसि विक्रान्ताद्या मुखचपलान्ता अष्टौ दर्शिताः। ताः **परित्यज्य** वर्जयित्वा **परा इत्येता** वक्ष्यमाणविषयव्यतिरिक्तविषयान्तरागता अन्या **एता** द्रुतध्रुवाणां **मूलजातयः** योनिः इति शेषः। **कथमन्या.....** इत्याह। **आभ्यो विनिःसता** इति। **कथमित्येवं युग्मौजत्वेन विषमाः।** एतदुक्तं भवति। एतास्तावदुत्तमविषये अष्टौ तन्मध्यमाधमेषु योज्याः। एतदीयैरेव तु यथेच्छं पादौ(दै)र्मिलितैर्विषमवत्तस्वभावान् मध्यमाधविषयाः कल्प्या इति।।**१७८**।।

नन्वासामष्टानां को सौ विषय इत्याह–

एतास्तु जातयो ज्ञेया द्रुतानां वत्तसंश्रयाः।

देवानां पार्थिवानां च। इति।

उत्तमानामिति वत्तवशादपरार्थानुसरणरथगमनादिद्रुतक्रियावतामेव विक्रान्ताद्यष्टौ द्रुतध्रुवा इति। देवपार्थिवादयो धिका वर्ण्यन्ते ध्रुवास्वित्याह। **औपम्यगुणसम्भवाः।** सादश्यधर्मेण सम्भवो यासां ताः। सदशं सुरगजहंसादि तत्र वर्ण्यमिति यावत्। **देवपार्थिवग्रहणं** प्रकरणान् **मालविकादेः**(मालविकाग्निमित्रम्) **सागरिकादे**(रत्नावली)श्चोत्तमत्वे पि नियमार्थम्।।**१७९**।।

अथ मध्यमाधमविषयसाधारिणीं द्रुतध्रुवामाह। **सप्तदशद्वादशकै**रिति। **सप्तदशा**क्षरेयम्। मध्यमाधमसाधारण्येन **मुनिनो**दाहरणं नास्या दत्तम्। उदाहरणाद्धि विषयसंकोचशङ्का स्यादिति। सजजयनलगा मध्यमाधमयोर्द्रुतविषया साधारणी भवति प(प्र)वणा। **आक्षिप्ति**केति प्रकरणादेतध्द्रुवेत्यर्थः।।**१८०**।।

अथा स्यां बहुविषयत्वमेव यादच्छिके तालयोजनया प्रकटयति।

गुर्वादिरथ लघ्वादिर्युग्मौजावथवेतरा।

एतद्द्रुतगता या तु विज्ञेया सा द्रुता ध्रुवा।। इति।

तालगतिरिहोच्यते। ध्रुवाबन्धस्यैव ग्रहचक्रस्य तालस्य गत्यनुबन्धस्य गीतनत्तवाद्यादिक्रिया(प्र)बन्धस्य (इति) विकटा शङ्का न (अभ्यूहनीया)। एतदुक्तं भवति। द्रुतविषयो **गुर्वादिर्लघ्वादिः। अथ**शब्दात्तन्मध्यतो वा त्र्यश्रचतुरश्रो मिश्रो वा यस्तालविशेषः स एकस्मिंस्तूक्तलक्षणे सप्तदशाक्षरे वत्ते योज्यामि(इ)ति। तालधेदश्च लोके भङ्गलयादिर्यः प्रसिद्धः सो ग्रे **मुनेरेव** सम्मत इति स्फुटं स्वावसरे **दर्शयिष्यामः**।।**१८१**।।

पूर्वं बहत्याद्यान्यतिजगत्यन्तानि च्छन्दांसि त्रिविधा वकृष्टात्मध्रुवासङ्ग्रहे दर्शितानि। अधुना तु द्रुतध्रुवादिविषयाणि तानि दर्श्यन्ते। **आद्ये** इति।

अथ **कनकलता** तनया(मा) **शशिलेखा** नजया **ह्यविचलिता** नसया।

मणिकृन्नौ सः **सिंहाक्रान्ता** मभसाः **सुरदयिता** भतनगि।

कुमुदा मननगि दोधकविषया भत्रयगयुता मससगि **चोद्धतिका**।

भमसगि **पङ्क्तिरथा** नजयगि **विपुलभुजा चपलगतिस्त्नौ** नलगा।

चप(कम)लाक्षी नज(य)नलगा द्रुतगा नजजलगा समनलगा **विमला**।
रुचिरा भज(त)नगयुग्मा नौरलगापरवक्त्रा कमला नौससगी।
अतिचपला नचतुर्गुः(र्गा) नजनसगा **मदकलिता।।**
एताः प्रावेशिक्यो द्रुतलयविषयाः।
एसो गगणदळे मेहो। पडुपवणेण विधूदम्।
ससिकिरणलम्बहारा। उडुगणकुसुमवदी।
आकम्पन्तो गगणदळम्। पंकअसण्डे विमळजळे।
संपतो(त्तो) असु णवसरदो। मेहरवं सुणिउण गओ।
अब्भं अम्बुहरेइ पिणद्धम्। पीणसमूहं पीणबळाकम्।
जलहरणादसमूव्विग्गो। एदे खिदिधरवरसदिसा।
परिधुणमाणो किरण पडम्। गगणतलंगाणहिंडणऔ।
कुसुमाकिण्णे णिम्मळसळिळे। मेहविदाणं अवधुणभाणो।
गिरितडविवरे विघण्णिदो। पवितकिरणसहस्सपिणद्धो।
दिअगणमुनिवरपरिपडिदो। गगणतळंगणमभिरुहमाणो। ।।१८२-२२३।।

एतदुपसंहरन् सहदिशं शिष्याणां दर्शयति। **एतास्तु जातयो ज्ञेयाः प्रावेशिक्यो द्रुता** इति। **एताः** प्रावेशिकीनां **जातयः**। एतन्मध्यादेव चान्या अविशङ्क्योत्प्रेक्षाद्य(क्ष्या य)था विश्रान्तान्मुखचपला। पा(दगता)न्यक्षराणि गहीत्वा वक्तान्तरं निर्वर्त्यते। तथा च विक्रान्तायाः। **विण्णविज्जो(विज्जुद्वण्णो) पीणा अंतो णादिगओ।** (भ.ना. ३२.१६२) (विद्युद्वर्णः पीतान्तो नातिगतः)। इत्यत्राष्ट(ष्ट)भिरक्षरैराद्याश्चतुर्भिर्वक्तान्तरं कल्प्यम्। तदाह **ज्ञेया** इति। अन्यदधुना प्रतिजानीते। **समवक्तपदानां तु वर्धमानमि**ति। समवक्तेषु ये पादास्तेषां क्रमेणाक्षरे वद्धिं गते यद्रूपं तन्निबोधतेति। शानच् तद्द्वापरमभिदधद्वीप्सां सूचयति।।२२४।।

तत्र चतुरक्षराणां या प्रतिष्ठाया आरभ्य **जगत्य**न्तमक्षरस्योत्तराधिक्येन वद्धिरुदाहरणे दर्शिता। **तत्रोष्णिग्गतं वर्धमानं** त्र्यश्रे। **अन्यच्चतुरश्रे**। एवं यान्येतानि वर्णवक्तान्युक्तानि तेषां तालयोजनां त्रिभिरभिधाय मात्राविभागो वक्तव्य इति तमाह। **अत ऊर्ध्वमिति। गण**श्चतुर्मात्रः। **मात्रा**ग्रहणं द्वयत्रयादिसंग्रहार्थम्। गणद्वारेण विधानचिभागार्थकल्पनं वर्णवक्तानामेव योजनं **वक्ष्यामीति।।२२४-२३६।।**

तत्र त्र्यश्रायास्तालजातेः **प च** गणाश्चतुमात्राः। **सन्निपातः** परिच्छेदः। **चतुरश्राया अष्टौ।।२३७।।**

तत्र प चाक्षरा सुप्रतिष्ठा। तदवसानं त्र्यश्रभेदो दर्शितः। तत्र सर्वगुरौ पादद्वये दश गुरवो भवन्ति। त एव मात्राविभागेन प चगण इति पादद्वये तालसमाप्तिः। तदाह। **द्वौ पादौ सन्निपातश्च ध्रुवाणामि**ति। अत्रापवादमाह। **द्रुतं च शीर्षकं हित्वे**ति। तयोस्तु गणविधिरन्य एव वक्ष्यते। एवमेतद् गण्यम्। यान्यन्यानि वक्तानि तान्यनेन क्रमेण भवन्ति।

एवं वर्णवत्तेषु मात्राविभागेन तालयोजने दिग्दर्शनं कृतम्। न त्विदमेव तावदेवेति मन्तव्यम्। तेनाष्टाक्षरायामनुष्टुभि सर्वगुरुणा पादद्वये गणाष्टकम्। भवति तावत् त्रिचतुरश्रतालः एवं गुरुलघुव्यतिकीर्णेषु वत्तेषु गणविभागकल्पनया पादे वा द्वये वा त्र्यश्रचतुश्रयोजनं कल्प्यम्। तद्यथा। **वसन्ततिलकं** (भ.ना. १५.८७) मात्राविभागे प चगणमिति त्र्यश्रे।।२३८।।

एवं विभागेन तालच्छेदं वर्णविभागेनैवाह। **अक्षरपिण्डस्त्र्यश्रे प चादिर्नवपर** इति। बहत्यन्त इति यावत्। **अष्टादिश्चतुरश्रे त्रयोदशपर** इति। अनुष्टुभो जगत्यन्तः।।२३९।।

ननु यदा प चाक्षराणि त्र्यश्रे तालच्छेदस्तदा कीदग् गुरुलघुविभाग इत्याह। **सर्वगुरुश्चाष्टादी(दिरि)**त्याह। प चशब्देन प चको क्षरपिण्डः सर्वगुरुः। तेन **देवं वन्दे शर्वं त्वामि**ति त्रिकले तालः। अन्यकला हि विश्रान्त्या गुरुणैकेनैव। **पर** इति। नवकपिण्डो यः परः सर्वलघुः। **जय जय शशिमकुटा**(ट)। ततीया कला ह्रस्वेनैव विश्रान्त्या। चतुरश्रे तु **गौरीदेहाधम्** तावत् **वन्दे** यावत् **जय जय भुवननत शशिधर**। एतदन्तरालस्त्वित्यमेव गुरुलघुविभागेनोह्यः। यथा त्र्यश्रे षडक्षरे द्वौ लघू चत्वारो गुरवः..... **मां त्वामि**ति। एतन्निगमयति। **एष त्वक्षरपिण्ड** इति। **द्रुतं शीर्षकं च हित्वे**ति तद्विषयं रूपान्तरं सूचितम्।।२४०।।

तत्र द्रुतविषयं प्रतिजानीते।

गणमात्रांशविकल्पं व्याख्यास्यामि द्रुतायास्तु।

अर्धषष्ठगण इति।

द्रुतलये बहूनां वर्णानां गीत्या ग्रासः कार्य इत्यर्धगणो त्राधिको भवति। तेन त्र्यश्रायां द्रुतध्रुवायां सार्धप चगणाः कार्याः।।२४१।।

अत्र **द्वाविंशतिर्मात्रा** भवन्ति प्रतिगणं चतस्र इति कल्पनया। गुरुलघुनिवेशस्तु यादच्छिकस्थानमात्रम्। द्रुतायामर्धाधिक्याभिधानेन चतुरश्रद्रुतायां सार्धा अष्टौ गणा इति दर्शितमेव भवति।।२४२।।

एवं द्रुतानां विधिमुक्त्वा शीर्षकाणामाह। **नानावत्तसमुत्पन्नः(न्नं)कुर्याद्वै शीर्षकमिति। शीर्षकं** ध्रुवोचितं वत्तशीर्षकं **नानवत्तेभ्यः समुत्पन्नमु**क्तपूर्वेभ्यो वत्तेभ्यो गणविभागौचित्येन कल्पनमिति यावत्। तत्र च तालविधिमाह।

गुर्वादिरथ लघ्वादिर्युग्मः सर्वलघुस्तथा।

इति शीर्षकाणामुत्तमविषये विनियोग इति **युग्म** एव चच्चत्पुटः। चतुरष्टषोडशात्मकभेदास्त्रयः। तथेति। तेन वत्तप्रकारेण योज्यम्। अन्येन चच्चत्पुटस्य कलापाद(दि)वैचित्र्ये ये प्रभेदा भवन्ति तेषु दिग् दर्शिता। तदाह। **गुर्वादिरि**ति। प्रथमप्रस्तारभेदः। तथा **लघ्वादिः**। प्रस्तारान्तरप्रकारः। **सर्वलघुरि**ति। सर्वान्त्यभेदेन प्रस्तारसमाप्तिरिति पिशुनतया.....**कोहला**दिप्रदर्शितमिति भवति।।२४३।।

एवं तालविधिप्रस्तारं

गुर्वादिरथ लघ्वादिर्युग्मः सर्वलघुस्तथा।

इत्यनेनाभिधाय **नानावत्तसमुत्पन्नं शीर्षकं कुर्यादि**ति यदुक्तं तद्गणविभागेन सामान्येन निर्णेतुं **चतुर्मात्रो गण** इति गणस्वरूपाभिधानपूर्वकमाह। **अर्धाष्टमगणाः पादाः शीर्षकस्ये**ति। एवं च गणनामेव प्राधान्यं न तु वर्णानामिति दर्शयति।।**२४४**।।

युग्मौजाक्षरकैः पदैरिति। युग्मानि सामान्योजानि विषमाणि येषु सन्ति तैः। मत्वर्थीयष्ठञ्। **पद**शब्देन पादः। एतदुक्तं भवति। अक्षराणि समानि विषमाणि वा एकादशप्रभतीनि चतुर्मात्रा गणा योजयितव्या इत्यवधातव्यमिति। अथ शीर्षके वर्णवत्तिविषयं सामान्यलक्षणमाह। **शीर्षकस्यैकविंशत्या षड्विंशतिपर** इति। **शीर्षकस्यै**कत्र पाद अक्षरश्रुतिकर्तव्यः। एषा यदि परसंख्या कार्या आहरेः। **एकविंशत्ये**ति लक्षणे ततीया।।**२४५**।।

निश्चयादिति। एतावानेव परवान् नियम इत्यर्थः। तेन सर्वलघुत्वे षड्गणा मात्रा द्वयाधिका इत्युक्तं भवति।

अथात्रैव विशेषमाह।

युग्मा ओजा मिश्रा आदौ कार्या गणस्तु चत्वारः।
(नियतं शीर्षविधाने) पश्चाल्लघुसंचयः कार्यः।।

इति। **अक्षरपिण्ड**विषयमेतत्। तेनादौ चतुर्मात्राश्चत्वारो **युग्मा** गुरुद्वयलघुचतुष्टयरूपाः। **ओजा** द्विलघुस्वरूपाः। **मिश्र**रूपा.....लघव इत्ययमक्षरपिण्डः परिपूरयितव्य इति। वक्ष्यमाण **मत्ताक्रीडा**दि (भ.ना. ३२.२६८) विषयमिदमिति **केचित्।** युग्मौजमिश्रत्वं तालकृतम्। तच्च समुदायस्य शीर्षके। तथोत्तमविषये तु युग्मत्वमन्यं त्वन्यविषयमिति **केचित्**। उदाहरणम्। **भगवन् परमशिवत्वां वन्दे सपदि**। इति।।**२४६**।।

त्रीणि गणा यस्य मुखे त्रीण्येव हि यस्य चावसानानि।
मध्ये चेद् गुरुणी द्वे तच्चपलमिति।।

अवसानापेक्षया नपुंसकत्वम्। अन्ते निर्वहन्तीत्याशयेन सामान्योपक्रमात् प्रथमं तेनैव निर्देशः। यतिश्च प्राप्या। अक्षरपिण्डविषयमेवोदाहरणम्। **शिव तव पुरमिह वन्दे सकलजनहृदयकृत**मिति। द्रुते पि यथा पादः शीर्षकस्य।।**२४७**।।

अस्यैव पूर्वत्र्यामिश्रणेन भेदान्तरमाह। **पूर्वे ह्यर्धे** इति। **चतुर्ह्रस्वाश्चतुर्मात्राश्चत्वारः पूर्वे र्धे। मिश्रा** इति। सम्भवेत् ततो **लघु** इत्याद्ये पादद्वये लक्षणमित्यस्मिंस्तु पादद्वये य(व)स्त्वन्यदुक्तं त्रीणि गणा यस्येति कृतलक्षणं योज्यम्। **पाद** इति जातौ। पादयोरिति यावत्। एकवचनानुरोधात् त्रिपदीयं वत्तजातिरिति **केचित्।।२४८।।**

अथात्र तालविधिवैचित्र्यमाह–

एकद्विकला(लं) त्रिकलाश्चतुष्कलाः षट्कलास्तथा(तो)ष्टकलाः।

इति। **प्रासादिकी**त्वेताक्षेपिकीत्वेतोलक्षिते ध्रुवाविधाने त्रिचतुःषडष्टकलाःक्रियन्ते। **ततस्कारेण** एककलद्विकलौ यौ विधी उक्तौ तदनुसारेणैककला कार्या। एककलानुसारश्च यथाक्षरविधिना विचित्ररूप इति प्लुतगुरुलघुद्रुतात्मेत्युक्तं भवति। एककलाप्रस्तारात्

प चद्विकलो विधिः। अत एव चतुष्कलः पुनर्नोक्तः। द्विकलप्रस्तारस्य तदीयस्य लाभात् यावापादिभेदस्य चानुपयोगात्। अनेन प्रावेशिकीनैष्क्रामिक्योरेव गुर्वात्मा प्रस्तार इत्युक्तं भवति। शीर्षकप्रकरणे पि, प्रसङ्गादयुग्मतालो पि (प्रतिपादितः)।।**२४६**।।

अथ प्रावेशिकीनैष्क्रामिक्योर्वक्तव्यशेषमाह। **त्र्यश्रे विरामस्त्रिकल** इति। समस्तविवक्षिततालान्ते विरामः कार्यः। न तु मध्ये (इति) तात्पर्यम्।।**२५०**।।

अथान्यासु विरामनियममाह। **विरामो द्विकल** इति। अन्तरध्रुवायाः पदसमाप्तौ कलाद्वयपरिमाणालंकारवैचित्र्येण वा तूष्णीकतया विश्रान्तिः कार्या। **अत्यन्तमि**ति ततो धिकेत्यर्थः। तुश्चार्थे। आक्षेपिक्या अप्येवमेव। **द्विविराम** इति। द्विकलो विराम इति मध्यमपदलोपे **द्विविराम** इति। **स्थितायाः प्रासादिक्याश्च** पादद्वये समाप्ते तावती विश्रान्तिः। न तु त्रिपादमिति यावत्।।**२५१**।।

अथ वत्तविभागेनापि यथाक्षरस्थित्या तालवैचित्र्यमस्तीति दर्शयितुमाह–

कलाकलार्धयोगेन गुरुलघ्वक्षरान्विता(:)।

इति। **कला**सहितं **कलार्धं** प्लुतं **कला** च गुरुरूपा **कलार्धं** लघु कलार्धं चेत्येकशेषं(षो) युज्यते। आद्यावस्थायां लघुभावेन नियोगे द्रुतकला कलार्धादियोगश्चेति समाहारः। तदयमर्थः। प्लुतगुरुलघुद्रुतोपलक्षिततत्समूहरूपा वक्ष्यमाणा ये **ध्रुवाणां त्रयः संयोगा**स्ते **वत्तश्रयाः कार्याः। वत्ताश्रयं** त्वाह। **गुरुलघ्वक्षरान्विता** इति। गुर्वक्षरे लघ्वक्षरे च द्वि(कल)ता लग्ना। एतदुक्तं भवति। यत्र छन्दो गुरु तत्र तालगुरु(तालो गुरुः)। एवं लघु निवार्यम्। यत्र च लघुगुरु(रू) तत्र तालप्लुतं तथापि च तालद्रुतम्। तद्यथा। षट्कलमित्यत्र गुरुलघुगुरूणि गुरुद्रुतगुरूणि प्लुतगुरुणी गुरुप्लुते इति चतुर्धा प्रस्तारः स्थापनीयः। एवं सर्वध्रुवासूह्यम्। एष एव समवत्ते पि चतुर्लयादेर्विषयः। तत्र त्रयः संयोगा इत्याह। **सर्वदीर्घ** इति। यत्र सर्वे प्लुताः। **सर्वलघुरि**ति यत्र सर्वे द्रुताः। **गुरुह्रस्वाक्षर** इति। प्लुतगुरुलघुद्रुतमय इत्यर्थः। प्लुतद्रुतयोश्च गुरुलघुत्वमुक्तपूर्वम्।।**२५२**।।

अस्य वत्ताश्रयस्य तालस्य विभागमाह। **गुरुप्राया स्थिते**ति। यथा.....। **लघु प्राया द्रुते**ति। यथा **खरनखर। गुरुलघ्वक्षरप्राया** तु यथा **अनन्तादि। प्रासादिक्यन्तरे** प्रत्येकं सम्बन्ध्य(ध्ये)ते।।**२५३**।।

प्रासङ्गिकमुपसंहरति। **एवमिति। वत्तसम्भवा** वत्तगीतगुरुलघ्वाश्रया **ध्रुवाणां जातयः।** तालप्रकारा **एवं** कार्याः। अथ प्रकृतमेव शीर्षकविधिमनुबध्ननाह। अत **ऊर्ध्वमिति।।२५४।।**

लक्षणविशेषं तत्प्रकृतेराद्यमुत्कृत्यन्तमाहाद्यमित्यादिना।

जौ गौ श्रुतिमं (नं)गश्च श्येनी।
न्जौ ज्यौ नौ लौ गुरुरिति चपला।
मतयां(यं) श्रुतिनं गयुतं क्रौ चम्।
भमसागं श्रुतिनं गं सम्भ्रान्तम्।
भत्रयमथ गौ श्रुतिनं गं स्खलिता।

मौ गौ शरनं लगि चेन् मत्ताक्रीडा।
नजनसभं श्रुतिनं लगि वेगा।
अष्टौ शीर्षकजातय एता उत्तमविषये युग्मताले।
सागरं समुद्धणन्तो रह(व) इव लघुगदिरभिभवहि(दि)।
मुनिगणमण्डलिबन्धि(वन्दि)द ओ(ते)जो विधुणिअ तिमिरपडम्।
एसो च्छ(च)न्दो णिम्मळबजोहणा विधुणिअ अणुतमवन्धमिदम्
(घणअसिदपटणिहम्)।
पुप्फविदाणं उद्धुणमाणो रव इव दुतगति अभिपडदि।
किरणसहस्सं विख्खि(क्खि)रमाणो फळिकमणिरुचिरधवळणिहो।
वातसमुद्धतवीचितरङ्गे स्फटिकनिकरसदशजले।
एसो मेहो सेलाभोओ असणिमुरजपडुपडहसम(द)रवो।
गगणतलङ्गमभिरुहमाणो उडुगणगहगणसमणुगदो।

अवाधमविषयाः प्रासादिक्यो ध्रुवा उच्यन्ते। **पुनर्नर्कुटकाना**मिति। नटो धमप्रकृतिः। तत्र भवानि नर्कुटानि वत्तानि। ततः संज्ञायुं(यां)कः (कन्) (अष्टा. ५.३.७५) अधमविषया च त्र्यश्रो त्र तालः।।**२५५-२७२**।।

रनर(भ)लगी तु रतोद्धतिरथ नजरं वद्बुदकम्।
सजस(य)जगुरूद्गतिं वंशपत्रमथ भरनभनलगम्।
प्रमिता सजिसौ ध्वजिनी सजसगिभरनंगौ।
सश्रुतितोटकमुदितं हंसास्यं सरभरमित्यष्टौ।।

रेणुपि जरिदचारुगतिआ। विचरदि एस मेहओ। भयभीदओ भअ(ज)दि पादपं दीणदीणओ। चूदवणं पफुण्णतिलकं कुरदअसहिअं। कमणाअरेसु भमऊण चिरं। विलसन्ति या कमलसण्डे छप्पदिआ कुलं समुपयादि। रमणीसहिदो रअणीविरमे। विअहंसा वसन्ते सलिलासए।) ।।**२७३-२६१**।।

अथ मध्यमाधमं विषयं ख जकं जातीयेन प्रतिजानीते। **पुनस्तु ख जकानामि**ति। प्रासादिक्यादिध्रुवा एवोत्तमाधमविषयतया शीर्षकमिति नाम्ना नर्कुटख जकनामा(म्ना) च व्यवह्रियते। तासां चोक्तरूपमिदं वैचित्र्यान्तरेणोच्यत इति पुनः शब्दार्थः।।**२६२**।।

भरनरनगि रजरी जरलगि
मोदकभाविकमत्तविचेष्टा(:)।

ख जक इति गतिकैवल्याद्वद्धः। अन्ये तु युवा पि विकलाङ्गो न्तःपुरोचित इति। तद्विषयत्वात् **प्रमोदा**दित्रयं **ख जक**मुच्यते।

णि च(प)मत्तजुत्तबहुपक्खिसंघपरिघुट्टणादमुहले। जातिफुल्लपानमत्तओ। पफ(फु)ल्लपुप्फपादवम्।

अन्ये त्वाकृते(तौ) छन्दस्यधमविशयत्वं न युक्तमिति मन्वानाः प्रमोदकस्थाने बद्बुदवर्गं पठितमपि **वंशपत्रपतितं** पठन्त्युभयपठितमित्युभयविषयता सिद्ध्यर्थमिति।।**२६३-३००**।।

आभ्यो विनिसता इति। अर्थसमविषमरूपतयेति भावः।।**३०१**।।

अथ सर्वध्रुवासु गायत्रमेव प्रधानमिति दर्शयति। **चतुःषष्टिध्रुवाणां** त्विति। षडक्षरे गायत्रे चतुःषष्टिभेदा श्छन्दोध्याये (भ.ना. अ.१४.५५) दर्शिताः। **समवत्ताक्षराद्** गायत्रादेव च पादक्रमेण नीवदि भुञ्जि द्विभागेन च सर्वच्छन्दोभेदसिद्धिः। तथाहि। पादचतुष्टयोपरि पूरिते षड्विशत्यक्षरोत्कृतेश्चतुःषष्टिमूलजातयः। ते (ता) अनन्ताः। अत एव **गायतस्त्राय**(ते) इति गायत्रमाहुः।।**३०२**।।

एतदेव स्फुटयति। **समवत्ता**दिति गायत्रताल**समवत्ताव**न्या समार्धसमविषमभेदाद् त्रिधा **ध्रुवा** जायते। तासां च प्रत्येकं तालभेदस्त्रिधा। **युग्म औजो मिश्र**श्चेति नत्वम्। एतावता नन्तो लक्ष्ये जयभङ्गोदाहरणेषु यो ध्रुवावत्तप्रप चो दश्यते सो पि सङ्गहीत एव।।**३०३**।।

केचित् पठन्ति।

त्र्यश्रायां सुप्रतिष्ठादिबहन्त्यन्तादियुग्मकः।
उष्णिभ्यः शक्वरी यावत् त्रिष्टुभो यावदुत्कृतिः।
युग्म एव विधातव्यः किन्तु कार्या द्विपादिका।।

इति। तत्रत्यचतुरश्रविकृष्टात्मकता विविधमण्डपभेदो विषयत्वमस्य ग्रन्थस्य व्याचक्षिरे। तत्र हि परिक्रमे विषमार्थयोगेन बहुधा मतिपूरणमिति।

अथार्धसमादेः संख्यामाह। **तत्रार्धविषमाणां तु षट्प चाशे शत** इति। षट्प चाशादिकानि यत्र ते द्वे शते।।**३०४**।।

स्वेन नाम्नेति। यत एव समवत्तद्वयादर्धसमं तदेव तस्या नामेत्यर्थः। यथा श्रीशङ्करभक्तिशालिना भट्टशङ्करेणार्धसमवत्तप्रकरणे दर्शितम्। **उद्धता सभोजसमौ वलिता जवन** इत्यादि।।**३०५**।।

प चहेतुकानिति। निमित्तकृतान् प चप्रकारान् वक्ष्यामीति।।**२०६**।।

तत्र निमित्तप चकमाह। **जातिः स्थानं प्रकारश्च प्रमाणं नाम चैवेति।।३०७।।**

वत्तेक्षर प्रमाणं जातिः। स्वरूपजननात्। स्थानं बहु वक्तव्यत्वादग्रतो भिधास्यते। **समा**र्धसमविषमता **प्रकारः।।३०८।।**

षट्कलाष्टकलप्रमाणे द्विकलाभिधाने नाम। जात्यादीनामत्र प्रयोजनमाह। कलाधिक्ये पि समुदायताले हि त्र्यश्रता विभाति। अवयवताले बहुधेति। **अन्ये** तु नात्यल्पत्वन्नातिवि(स्त)तत्वाच्च **षट्कलाष्टकले** वक्तव्ये इत्याहुः। उपलक्षणमात्रमेतदित्यपरे। अथ नामाह। यथागोत्रकुलाचारैरिति। आश्रयणेनान्वर्थयोगेनोपेतम्।।**३०६**।।

ध्रुवाणामपि चेति। न केवलं रसभावानामित्यर्थः। किं तन्नामेत्याशङ्क्य पूर्वोक्तं स्मारयति। **प्रवेशापेक्षे(क्षेपे)**ति। **रसाध्याये** (भ.ना. अ.६.२६.३०) व्याख्यात श्लोकः।।**३१०**।।

एतेषु नामान्वर्थं योजयति। **नानारसार्थयुक्तेति। नाना रसा भावा अर्था**श्च विभावादयः तेषां युक्तं(क्तः) सामाजिकानां हृदयेषु प्रवेशो ययेति प्रयोजनम्। **नणामि**ति। एकशेषे नारीणां च।।**३११**।।

प्रविष्टस्यावश्यं निष्क्रमणं न त्वेवमाक्षेपादित्याशयेन नैष्क्रामिकीमाह। **अङ्कान्त** इति। अङ्कस्य समाप्तौ असमाप्ते प्यङ्के यदा पात्राणां निष्क्रमणं तदा चेत्यर्थः। निष्क्रमणक्रियाया**मुपगतो** वर्ण्यत्वेनाङ्गीकृतो **गुण** इत्युपचरितार्थो हंसराजादिर्यस्याम्।।**३१२**।।

अथाक्षेपिक्याः समर्थेन स्वरूपमाह। **क्रममुलङ्घ्ये**ति। प्रस्तुतं रसम्। **द्रुतलयने**ति। खलु खलंकादिवाक्यप्रयोगो या रसापेक्षयोजना तद्विषयः(या) प्रयुज्यते(सा) **आक्षेपिकी**। तत्राक्षिप्यमाणरसस्य दीप्ततया **द्रुता**। यथा **उदात्तराघवे** रामस्य प्रस्तुतश्रङ्गारक्रमोल्लङ्घनेन

अदे तापस स्थिरी(रो)भव। क्वेदानीं गम्यते।

स्वसुर्मम पराभवप्रसव एकदत्तव्यथ।

इत्यादिना (**रावणवाक्येन**)। यथा (**द्रुता**)वाक्याकर्णनेन **वीर**रसस्याक्षेप्यस्य तु रसस्य मासण्ये। स्थितेति विलम्बिता। यथा श्वत्थाम्नो **युद्धवीरे** क्रमोलङ्घनेन

कुतो द्यापि ते तातः। (**वेणीसंहारम् ३.८**)

इति नेपथ्यश्रवणादि तस्य करुणरसस्य।।**३१३**।।

अथ प्रासादिकीमाह। या च रसान्तरमुपगतमिति। **उपगत**मभ्युपगतं प्रस्तुतं **रस**विशेषं यदा प्रसादयति निर्मलीकरोति। कथम्। अनुक्तस्य विभावानुभावव्यभिचारिवर्गस्य आक्षेपवशात् स्थिरीकरणसमर्थत्वादिति। काव्यगतेनोत्कर्षेण **रागप्रसाद**स्य जात्यंशकगीतिवर्णालङ्कारस्य सौभाग्यकृतस्य सामाजिकहृदयं तन्मयीभावापत्तियोग्यतामात्मनो जननमिति गीति**शोभया** वा प्रासादयोजनः। **प्रासादिकीं विद्यात् विशेषमस्या** द्योतयति। इयं हि प्रावेशिक्याक्षेपिक्या अनन्तरमवश्यप्रयोज्या भवति।।**३१४**।।

अथान्तरागानमाह। **विषण्णे मूर्च्छिते भ्रान्त** इति। अन्तरे छिद्रे गीयत **इत्यन्तरा ध्रुवा।** तदाह दोषप्रच्छादन(ना) इति। तान् दोषानुदाहरति। **विषण्ण** इति। अनुकर्तुर्यदनाशङ्कितधनविषयादत्युद्धतप्रयोगश्रमवशाद्वा भ्रमादिदोषसम्भावना वस्त्राभरणावकाशदित्सया(या)गीयते **सान्तरा ध्रुवा। तत्र च** प्राक्तनं भावि वा रसस्वरूपमनुवत्तमित्यवश्यं द्रुतमध्यविलम्बितान्यतमेन भाव्यं(व्यम्)। **श स एव च ताल** (भ. ना. ३१.५) इत्युक्त्वात् तदाधारभूतया छन्दोनिबद्धया भाव्यं। केवलं छिद्राच्छादनमात्रप्रयोजनायामस्यां न सार्थकपदकदम्बयोजनमुपगीतिशुष्काक्षरैरेवेयं **लक्ष्ये च लतिकादि**नाम्ना प्रसिद्धा गीयत इति नाट्यधर्मी(र्म)प्रायेयम्। यद्यपि प्रावेशिक्यादेरपि नानुकार्यविषयसम्भवस्तथापि काव्यवाक्यैकवाक्यतायां–

तरलयसि दशं किमुत्सुकाम्।

इत्यादि काकतालीयश्रुतिशकुन्ययेन लौकिकस्य सम्भवं नात्यन्तं नाट्यधर्मभावः। एवं नाम व्याख्यातम्।।**३१५**।।

अथ **जातिः** स्थानं प्रकारश्च **प्रमाणं** नाम चेति श्लोके (भ.ना. ३२–३०५) यत्प्रमाणमुद्दिष्टं तल्लक्षयन्नुपक्रमते। **ध्रुवाणां चैव सर्वासामिति**। तत्र **स्थान**स्य सामान्यलक्षणमाह। **यत्र गेयं प्रयत्नत** इति। रसोपयोगी पात्रविशेषः **स्थानमित्यर्थः**।।**३१६**।।

ननु प्रवेशनिष्क्रमाक्षेपप्रसादच्छिद्राण्येव गेयस्थानानि। तानि च नामनिर्वचनेन लब्धानि। तत् किमिदानीं स्थानं नाम्ना विशिष्यत इत्याशङ्क्याह। **द्विविधं तु स्मतं स्थान**मिति। न प्रवेशादिस्थानमत्र लक्ष्यते किन्तु प्रधानभूतो यो **रसभाव**ादिरर्थस्तदुपयोगि तावद्गानम्। तत्र कदाचिद्यत्रैव यो र्थस्तुद्देशेनैव गीयते। यथा **रामस्य** सीतादिप्रयुक्तविप्रलम्भे तदाश्रयमेव कदाचित् पात्रान्तराश्रयणेन। यथा तस्यैव विप्रलम्भे लक्ष्मणाश्रये **ति(नि)तराम(मा)हुरित्य**त्रं तदाह। **परसंस्थात्मसंश्रय**मिति। परस्थगतं **लक्ष्मणस्य**। आत्माश्रयं **रामस्य।** तेन स्थानमिति स्थानाश्रयं गानं **द्विविधमि**त्यर्थः। नन्वपरस्यासौ करुण एव भवति। न हि रामे विप्रलब्धे **लक्ष्मणस्य** विप्रलम्भः। केवलं तद्दुःखदुःखितस्यास्य करुण इत्याशङ्क्याह। **यत्वाक्षेपसमायुक्तमि**ति। **यदि**ति यस्मात् **आक्षेपः** तद्रसोपेक्षेपित्वेनोपयोगः। तेन आसमन्तात् **युक्तं** स्वपरसंस्थं **समि**ति सम्यक् अवैकल्यपूर्णतया तेनायुक्त्या त्मसंश्रयम्। एतदुक्तं भवति। लक्ष्मणस्य करुणे विनयोचितं(ते) मसणमन्थरं(रे) गान(ने) प्रयुक्ते पि तु रामविप्रलम्भ एव तत्र प्रयोजकीभवति। तथा च **लक्ष्मणस्य** तदुपसर्पणैव परैव तत्परा गानं प्रयोजयति। परस्थो प्यसौ प्रयोजको भवति। स वायं प्रयोगे विधिनोपदेशदिशा व शक्यं(क्यः) प्रतिपादयितुमिति दर्शयति। **तच्च** मे सन्निबोधतेति।।**३१७**।।

तत्राक्षेपिक्यां तावत् स्थानद्वयोचितं लयविभागेन विशेषं यथायोगं निरूपयितुमाह। **बद्ध** इत्यादि। बद्धो निगडादिना **निरुद्धो** वष्टब्धः। **पतितो** महापातकयोगात्। **मत** इति मुमूर्षा। **अवकृष्टे**ति विलम्बिता। **करुणाश्रय** इति निर्वेवादौ।।**३१८**।।

स्थितेति। मध्या विलम्बिता च।।**३१९**।।

एतेष्वेव तु भावेषु करुणेति। तदाश्रयेषु **जावेषु** द्रुता ध्रुवा कार्या। केषु पात्रेष्वित्याह। **करुणे**ति। करुणस्यावेदनं येषु स्वयमुत्पन्नकरुणस्यावेदनं येषु। तेन शोकस्थायिभावपरिपोषकादिव्यभिचारिसंवलितेषु परिजनादिष्विति यावत्। अत एवाह। **भावसंश्रये**ति। भावप्राप्तिस्तन्निकटप्राप्तिर्निमित्तं वा **द्रुता ध्रुवेति।।३२०।।**

तर्हि परदुःखे सर्वत्रैव ध्रुवा। नेत्याह। **यत्र प्रत्यक्षजं** दुःखमिति। दुःखज्ञानम्। कुत्रेत्याह। **मते**ति। **मत**स्यापमत्युना **अभिहतस्य** आकस्मिकतीव्ररोगशोकादिना अभिवातस्य च **दर्शनं** यस्मिन् तत् **प्रत्यक्षजं दुःखम्**। तत्र विलम्बिता कार्या। **करुणे** त्विति। परसंस्ये।।**३२१**।।

उत्पातो भूकम्पादिः। विषादे वत्ते सति। (**प्रहर्षे**) झटिति यः प्रमोदस्तत्र।।**३२२**।।

द्रुताव्यापकं लक्षणमित्याह। **आवेगे सम्भ्रमे** च द्रुतेति।।३२३।।

प्रसादविषये **याचने।।३२४-३२५।।**

सानुबन्धेति। अनुबन्धः त्वरा तेन सानुबन्धेति द्रुतलयेत्यर्थः। क्व सा क्रियते। आह। शरीरस्य व्यसने रोषे प्रवत्ते सति। यत्पुनःसन्धानकर्म तस्मिन्। एतदुक्तं भवति। शरीरव्यसनवशाद् दो(रो)षवशाद्वा यदा नटे(टो) पसर्पति तदा तस्थाने न्यस्य तद्भूमिका(यां) द्वितीयस्य योजनं त्वस्याः कर्तव्यम्। तत्र **चान्तरा ध्रुवा** द्रुतेति।।३२६।।

अथ यत्र प्रावेशिकीशून्यं तदाह–

अध्रुवास्तु प्रवेशाः स्युर्गायतो रुदतस्तथा।
सम्भ्रमे प्रेषणे चैव ह्युत्पात विस्मये तथा।

इह **प्रावेशिकी** नाम प्रवेक्ष्यतः पात्रस्य स्वरूपं सामाजिकमनसि संक्षेपेण समर्पयितुं गीयते। तत्र गायता यदा प्रविशति तदा प्रावेशिक्यां गीयमानायां प्रकृतगानं रोदनं च व्यदीय(र्य)त। सम्भ्रान्तस्य परेण त्वरया प्रेषितस्य तुत्पातविस्मयावावेदयितुमायातस्य त्वरयेव प्रवेश उचित इति।

अन्ये त्वाहुः। पूर्वप्रविष्टस्य च प्रधानपात्रस्य देवीप्रायस्य गायतो रुदतो वा सम्बन्धी परिजनो यदा प्रविशति तदा ध्रुवा स्य प्रवेशे मा भून् मुख्योपरोधकत्व इति। कार्यान्तरव्यग्रे च प्रधानपात्रे उत्पातविस्मयाद्यवेदनाय तन्निकटमुपसर्पतो मध्यमपात्रस्यापि स(अ)ध्रुवः प्रवेशः। प्रधानपात्रस्या पि **सम्भ्रमे** सत्यध्रुव एव। **शङ्खचूडस्येव जीमूतवाहनभक्षणाकुलगरुडनिकटमुपसर्पतः** (नागानन्दम् ५.१७)। प्रेषणग्रहणं नैष्क्रामिकी विषयं प्रसङ्गात्तेन त्वरतया प्रतीहार्यादेः प्रेषितस्याध्रुवनिष्क्रामणम्।

अत्र तु प्रविष्टपात्रेण गायता रुदता वा सह यदा प्रविशतो झटिति नास्ति सम्बन्धस्तदा प्रकृताषु(सू)परमो मन्तव्यः।

उपाध्यायास्त्वाहुः। **गायतो रुदत** इत्यनेन हर्षवीरक्रोधशोकविपत्स्वेव क्रमेण लक्ष्यते। तेन च सम्भ्रमो विशेष्यते। तेन क्रोधशोकहर्षाविष्टस्य सम्भ्रमे अध्रुवः प्रवेश इति। तथा चाग्रे वक्ष्यति **अपटाक्षेपकृता चात्ययिकी हर्षरो(रा)ग कार्येषु** (भ.ना. ३२.४१३) इति। एतच्च स्वस्थान एव व्याख्यास्यते। तच्च प्रकृतरसस्योपरोधिका ध्रुवा न प्रयोज्यैवंपरमिति मन्तव्यम्।।३२७।।

अथ कविशिक्षार्थमाह। **एवमर्थविधिमि**ति। **अर्थविध्यादिकं** ज्ञात्वा **ध्रुवा बुधैः** कविभि**र्योज्या**। तत्रार्थ**विधि**राक्षेपप्रसादनादिप्रयोजनप्रकारं हंसगजादिरित्यन्ते। **देशः** सरो ण्यादिः। **कालं** रात्र्यादिकम्। **ऋतु**र्वसन्तादिः। **प्रकृति**रुत्तमादिः। **भावो** रत्यादिः। **लिङ्ग**मनुभाववर्गः। येषां मध्ये यदेव प्रधानमन्ते वार्ध द्विशस्त्रिशः सामान्येन वा कविना ध्रुवायां व्यावर्णनीयमिति यावत्।।३२८।।

अथ प्रावेशिक्यादिषु प चस्वपि प्रत्येकं प्रकारषट्कं सम्भवतीति दर्शयितुमाह

शीर्षका चोद्धता चैव ह्यनुबद्धा विलम्बिता।

अङ्किता चापकृष्टा च। इति।

विलम्बितेति। द्रुतविलम्बिता ध्रुवाणामनियताक्षरका। सा गानप्रयोजगमपनयन्ती काव्यस्वरूपं परिपूरयितुं प्रयुज्यते **तत्पूरणं** च प्रकृतिमुखेन वा रसभावचेष्टितमुखेन वा तत्रोत्तम प्रकृतिः प्राधान्येन प्रवर्तमाना हि **शीर्षका**। उत्तमसमाश्रयो हि रसभावादिरनन्तपरिजनादिगतचित्त—वत्यन्तरजीवितकल्पः। अतो स्य शिर इति व्यपदेशः विचित्र प्रकृतिचित्रवत्तिकल्पत्वेन प्राधान्यात्। चेष्टितप्राधान्येनोद्धतसङ्गतां समस्तविभावानुभावव्यभिचारिसम्पदं सूचयत्**यनुबद्धा**। अधममध्यमनीचैरित्यादिस्थिता तु भिन्नां प्रकृतिचित्तवत्तिं भिन्नं च तद्गतं चेष्टितं सूचयति **द्रुतविलम्बिता**। सापेक्षभावरूपं संविद्विकासमुन्दरं रसमाश्रयत्य**ङ्किता**। तद्विपरीता **पकृष्टे**ति प्रतिध्रुवं षोढा विभागः।।३२६।।

तस्माद्धेतोरेतत् संगतं शिरस्थानीयं प्रधानं भवति। **तस्माच्छीर्षके**ति सङ्गतिः। **उद्धता तूद्धते**ति गमागमभ्रमणादिप्राधान्यात्। **अन्ये** तु वीररौद्रविषयेयमित्याहुः।।३३०।।

यतिं लयं वाद्यगतिं पदं वर्णान् स्वराक्षरान्(रम्)।

अनुबध्नाति यत्रैवमनुबद्धा भवेत्तु सा।।

इति। **यतिः** समाद्या। **लयो** द्रुतादिः। **वाद्यगति**श्चतुर्विधातोद्यवैचित्र्यम्। **पदं** वत्तगो यत्यात्मा विरामः। **वर्णो** वत्तगत एव गुरुलघुभेदः। स्वर्यते यथोचितं गीतक्रियायां विस्तार्यते यतः स्वरशब्देन वर्णाङ्गरूपा गीतिः। **अक्षरं** गीयमानं पदम्। **अन्ये** तु चच्चत्पुटादिताल**मक्षर**माहुः। न क्षरति न साम्याच्च्यवते गीतवत्तादिकं येनेति। एतद्यत्याद्यक्षरान्तरम्। यस्यां ध्रुवायामेवमिति प्रयोगौचित्येन कविर्नाट्याचार्यो वर्णकविर्गाता नटो वा **यत्रानुबध्नाति सा ध्रुवा अनुबद्धा।।३३१।।**

अनुबन्धनं व्याचष्टे।

आपीडितप्रवत्तो यश्चतुर्थलयकारकः।

नाट्योपचारजनितः सो नुबन्धः।। इति।।

अनुबन्धमापीडितमन्योन्यसंश्लिष्टं कृत्वा प्रकर्षेण प्रवर्तनं यत्यादीनामक्षरान्तानां यतो भवति तदा क्रियाविशेषो नुबन्धः। स च कवेस्तथोचितध्रुवार्थयोजनम्। उचितश्च ध्रुवार्थः। तत्र विभावादिपूर्णसविद्रूपः। तस्मिन् योजना पानकमिव **रसं** प्रसूते। तद्योजनार्थश्च यत्यादेरक्षरान्तस्य व्यामिश्रीकरणात्मा वर्णकवेः। क्रियाविशेषः गातुश्च तथैवाबिकलो लयात्मा। आचार्यस्य **सम्यक्** तदर्थयोजने किमपि तत्वान्तरमिव विद्यत आत्मा। पात्रगतपात्रस्य तदा पात्राङ्गेन निर्वहणम्। अत एव परस्परयतीनां योजने **अन्ये** च (न) यतिवस्तु। यतिलयानां च योजने द्रुतादिव्यतिरिक्त एव लयो भवेत्। एवं पाकविद्यादीतमिपि स्वतः परस्परतश्च योजने किमपि तत्त्वानन्तरमिव विद्यत आत्मा। पात्रगतपात्रस्य तदा पात्राङ्गेन निर्वहणम्। अत एव च परस्परयतीनां गुडमरीचादिरसयोजनमये पि पानक इव रसान्तरमत्वम्। तदाह। चतुर्थेति। चतुर्थलयो द्रुतादिभ्यो न्यं करोति स्फुरयतीति। **लय**ग्रहणं प्राधान्यात्। **लय एव हि ताल**मित्युक्तमसकृत्। लयेन सर्व वैचित्र्यं लक्ष्यते। अत

एवायमनुबन्धो नाट्यव्यवहारेणैव जनितः। सर्वथैवातिलौकिकत्वान्नाट्यस्य च रसस्योपचरणहेतुः। विभावादिसम्पत्तिजनितं **नाट्योपचारं** च नाट्यायितमुपचारादि--सामान्याभिनयरुचितम्। तै**र्जनितो** लब्धसत्ताको नाट्यायितप्रयोजनबहुल इति। ईदक् क्रियाविशेषो नुबन्धनमित्युच्यते। तद्योगाद् ध्रुवाा नुबद्धेति।।**३३२**।।

एवमनुबद्धां व्याख्याय **द्रुतविलम्बिता**माह। **नाट्ये त्वरितस चारे**ति। **त्वरितो** द्रुतः **स चारो** यस्यां सह **विलम्बितेन स चारेण** वर्तते प्रकृतिभेदात्। अत एव **नाट्यधर्मीकृत्य** चित्रं रसादिवैचित्र्यं च **अनु** तदौचित्येन **व्रतं** नियमो विद्यते। **तस्येति मत्वर्थीयो च्** (अष्टा. ५.२.२७) तेन कृत्प्रयोगान्ता वा द्वितीयैव।।**३३३**।।

अङ्किता तूत्कटगुणेति। **उत्कटो** तिस्फुटो गुणो नुभाववर्णः श्रङ्गाररससम्बन्धी यस्यां व्यावर्ण्यते सा **उत्कटगुणा। अत्(त)** (पा.धा.पा.३८) अतिक्रमे। अतिशयेन क्रमणमाक्रमणं व्यापारं च रसस्य (विभावादिभिः सञ्चितम्)। उक्तं **शरीरं व्याप्यते तेन** (भ.ना. ७.७) इत्यत्र। अन्तरे श्रङ्गारग्रहणं सुखप्रधानं हास्याद्भुताद्युपलक्षणम्। तेन हृदयस्थेन विवक्षारूढेन **सम्भवो** निर्माणं यस्याः अस्याः। अङ्कितत्वे निर्वचनं स्फुटयति। **यस्मात् स्थाने प्रसन्ने**ति। **स्थानस्य** चित्तवत्यवस्थात्मनः **प्रकृष्टं सन्नं** व्यापनं यस्माद् भवतीति।।**३३४**।।

अन्यभावेषु कृष्टा चेति। **कारुण्ये** सम्यगु(ग्यु)क्ता उचिता प्रकृष्टा यस्मात् कृष्टमुत्थानं कृत्वा गीयते। किं करुण एवेत्याह। अन्येषु च कृष्टहेतुषु। कर्मणि चित्तवत्यवसादरूपे मान्थर्यकारणेषु विप्रलम्भभयानकादिषु व्यभिचारिभूतेषु निर्वेदग्लानिश्रमचिन्ताप्रभतिषु चो भिन्नष्क्रमः।।**३३५**।।

अथ सम्भवानुसारेण विष(य)दिशमासां दर्शयति। **यातु प्रावेशिकी**त्यादि। **प्रावेशिकी**ग्रहणमुपलक्षणार्थम्। **नणामि**ति चेष्टाबाहुल्यसम्भवात्। **अन्ये** तु नियमपरत्वं व्याचक्षते। तच्चेद(द)ष्टाङ्गं लक्ष्यविरुद्धमित्युपेक्ष्यमेव। परसंस्थत्वाशयेनायं ग्रन्थ इतीतरे। **प्रासादिको नामाडिडत्यु**(तो)पलक्षणम्।।**३३६**।।

प्राकारास्तु प्रवेशजा इति। स्त्रीणाम(मि)ति वर्तत इति **केचित्। या द्रुता सा विलम्बिता या न्तरा** सा स्त्रीणामनुबन्धेति। **अन्ये** तु नियमपरत्वं व्याचक्षते। **अवकृष्टे**त्येतच्च **शीर्षका चोद्धता चैव** देववपार्थिवयोरित्युक्तग्रन्थेन योजयन्ति। वक्ष्यते इत्यध्याहार्यः(म्)।।**३३७**।।

दिव्यपार्थिववेश्यानामिति। अप्सराणां गणिकानां च। **स्त्रीणामि**ति। कुलाङ्गनामपि।।**३३८**।।

मध्यमानां नीचानां च सम्प्रवेशे द्रुतविलम्बिता। तस्यां च ख जनर्कुटे कृते कार्य इति सङ्गतिः। **तु**रप्यर्थे।।**३३९**।।

प्रसादिक्यपि स्थाने वसरे ख जनर्कुटरूपा। अवसरमाह। **हास्यश्रङ्गारयोरि**ति। अत्र हेतुर्ललितभावत्वादिति। तौ रसौ सुन्दरस्थायिभावौ। ख जनर्कुटे च ललितभावे लालित्यं भावयतः श्रव्ये इति।।**३४०**।।

मते कस्मिंश्चिन्नीचपात्रविषयः। तथा स्त्रीणा**मनुबन्धं लयाश्रयम्।** चतुर्थलयकारकं कुर्यात्। नीच एव हि करुणे बहुविधेति दर्शितम्।

स्थैर्येणोत्तममध्यानां नीचानां परिदेवितैः। (भ.ना. ७.६३)

इति। **राजन्यवैश्यानामि**ति। उत्तममध्यमानामपि **अपकृष्टा** करुणे।।**३४१**।।

मानमाह। **चत्वारः सन्निपाताः प्रावेशिक्या** इति। चत्वारस्तालपरिवर्तना इति यावत्। **शेषा** नैष्क्रमिक्यादेः। **सन्निपाताः**। अत्रैवमपवादमाह। **शीर्षका षट्पदे**(रा इ)ति। द्वी परिवर्तौ। तत्रावरता षट्परता।।**३४२**।।

अथ मन्थरभावावसरे प्राप्तमपि स्थिताङ्गितयोः प्राप्तमभिदव्यात्(धत्) पूर्वोक्तं स्मारयति।

स्थितं चाप्यङ्गितं चैव नीचानां न हि कारयेत्।

इति नाट्यो(ट्या)चार्यो त्र प्रयोजकः तेषां तु यन्नटनं प्रयोगसम्पादनं तदाश्रिता(त) विषयत्वेनोचितैः ख जनर्कुटैः कार्यः(र्यम्)। कीदशैः सर्वे भावा येषां व्यङ्ग्यत्वेन तैः। उद्धतप्रयोगे तैरेव द्रुतलयर्ध्वाप्रयोगे तैरेव विलम्बिते(तैरि)त्यर्थः।।**३४३**।।

तत्र किम्भावरूपैरषां प्रधानपदाश्रयेण भूयसा मानमित्याह। **त्रयो भावा** इति। **हास्यशोकभया** ओजःप्राचुर्यैणेत्यर्थः।।**३४४**।।

पूर्वमुक्तं लक्षयितुं पूर्णं चाभिधातुं स्मारयति। **वस्तु प्रयोगमि**त्यादि।।**३४५**।।

एतत् क्रमेण लक्षयति **वस्तूद्देशसमुत्थमित्या**दिना **अवस्था या तु विज्ञेया सुखदुःखार्थसम्भवा** इत्यन्तेन। **उद्देशसमुत्थं** यदुद्दिश्य गानकार्यस्य समुचितमुत्थानं प्रसरणम्। **नागरः** कीरहंसादिः। **प्रयोगो दिव्यमानुषा**श्रय इत्येकशेषेण। तं वेति दिव्यमानुषाद्या ततीया पि स्वीकृता तद्भेदेन गजादेर्भेदः। **काव्ये** तद्यथा। **दिव्ये सुरगजे** इत्यादि।।**३४६**।।

उत्तमादिका **प्रकृतिः।** तद्भेदाद् रथाङ्गचक्रवाकमधुकरादिवर्णनम्। **रसा भावौ तु पूर्वोक्ता**विति। **रसाध्यायो**क्तौ (भ.ना. ६)। जातिवाचिनोरेकवचनं तयोरद्व(यन्द्वं)न्द्वः। **कालकृतः** कालवशात् कुसुमादिविशेषोद्भेदरूप ऋतुरित्यर्थः।।**३४७**।।

वयः शिशुयौवनवद्धत्वमिति। **शिशु**शब्देन निःशेषे समाहारे द्वन्द्वः। **कक्ष्या**विभागेन **जनितः** कल्पितः पर्वते चाग्रहादतिदेशः **दिग्भागजनितः** पूर्वोत्तराविति **द्विविधो देशः।।३४८।।**

रात्रिःदि(त्रिन्दि)ना(व)कृत इति। सामान्यविषयः **कालः**। याभकालकृतस्त्वहरष्टधा विभज्य रात्रिमष्टधेत्यनेन। येन राजादिविशेषविषया सुखदुःखादर्थ(खार्थ)ना रूपा चार्थिता। व(त)त्सम्भवो स्या इति त्रिधा वस्था सुखित्वं दुःखित्वमर्थित्वं चेति यावत्।।**३४६**।।

एतदुपसंहरन्नेव योजयति। **स्थानानी**ति। स्थानानि त्वनिमित्तानीत्यर्थः। **नानावस्थानीत्य** परिसंख्येयावान्तरभेदानीति यावत्। यस्त्वादिमध्ये च रसभावौ प्रधानमित्याह। **रसभावौ समीक्ष्य** त्विति। **तु**रन्येभ्यो नयोर्विशेषकः। न केवलं गीतिभावो त्र र जनोपयोगित्वःत् प्रधानं

यावत् कार्यभावो विकृतरसगतस्य वाच्येनास्पष्टस्यानुभावस्य व्यभिचार्यादेः पूरणमिति दर्शयति।।**३५०**।।

यानि वाक्यैस्तु न ब्रूयात्तानि गीतैरुदाहरेत्।

इति यस्त्वशक्यो वर्णयितुमित्यर्थः। काव्यवाक्यैर्वर्णयितुं कुतश्चिन्निमित्तवशान्न शक्यन्ते ते गीतवाक्यैरुदाहर्तुं कथयितुं शक्याः। तर्हि नाटककाव्यवद् गीतकाव्ये सन्धितदङ्गनिर्वहणादिप्रयाससम्भवः। (न) **तैरेवे**ति। राजादिवर्णनया **न तानि** गाने पि तत्सदशरसादिवर्णने।

न तैरेव तु काव्यार्थैरन्यैरौपम्यसंश्रयैः।

इत्युक्तम्।।**३५१**।।

तत्र कस्य केनौपम्यमिति प्रस्तावयितुमाह। **ध्रुवाणामाश्रया** इति। वर्णनीयाः। **वौ(औ)पम्यं** सादश्यं तदेव **गुणः** प्रकृतोपयोगसम्भवप्राप्तिरौचित्यं वेषामित्यर्थः।।**३५२**।।

कस्य किमुचितमिति दर्शयति। **आदित्यसोमपवना** इत्यादि। अत्रापि प्रतावाल्हादकत्वशैघ्र्याद्यवस्थान्तरं राजादेरन्वेष्यम्। एवं सर्वत्र।।**३५३**।।

ग्रहा जीवादयः। **उडुवषभा**स्तिष्यादयः काला इति सम्यगाहुः।।**३५४**।।

ये चान्य इति। क्षत्रियाद्याः।।**३५५**।।

रश्मिः प्रकृतेः स्त्रीलिङ्गतात्पर्यापवादिदीधितिमरीचिप्रभाद्या अचेतनाः। अधमा विषयास्ते सहकाराद्या अपि।।**३५६-३५७**।।

हिंस्रसत्वेष्विति। हिंसाप्राधान्ये विवक्षिते क्रव्यादः(दाः)। अत एव राक्षसेषु।।**३५८**।।

(कुमुदाकराः) समुदाः। तदभावविषया उक्ताः।।**३५९-३६४**।।

गत्यर्थोपमिता इत्यादिना क्रियात्विति(विषय)त्वं **प्रावेशिक्यादि**विषयमाह। **गत्यर्थस्तूपमितं** सामाजिकहृदयसमीपे प्रक्षेपो यैश्**चलना**र्थेधातुभिस्ते त्रापि प्रवेशे। दर्शनीयमिति **तथैव चे**ति। प्रदर्शनवेशादिप्रकारेणैवेत्यर्थः। कामिभिर्दर्शयितुमात्मानं गूहयितुमित्यादिभेद इत्यर्थः।।**३६५**।।

भूयत्वाभिप्रायेण कालौचित्यमाह। **प्रावेशिक्याश्रया यास्तु(पू)रा(र्धा)ह्णा(र्ध)** इत्यादि। तत्काले कार्याभ्युत्थानस्य भूयसा दर्शनात्। तदाह। **नक्तन्दिवे**ति। तुर्यद्यपीत्यर्थे। प्रावेशिक्यामर्थत्वेनाश्रीयमाणायां कार्यविशेषा यद्यपि रात्रौ दिने च समुत्तिष्ठन्ति। तथाहि(पि) भूयस्त्वाश्रयेणेदमुक्तम्। एतदुक्तं भवति। प्रकृतं कार्य यत्र काले भवत्युपमानं तु पूर्वाह्ने योज्यम्। एवमौचित्यात् प्रवेशः स्फुटं सूचयतीत्यर्थः।।**३६६**।।

एवं **सौम्या पूर्वाह्णे दीप्तिर्मध्याह्ने** शोकाद्य**पराह्णे** वर्णनीयमित्याह। **अन्ये** सौम्यं वस्तु पूर्वाह्णकाले प्रयोज्यमिति प्रयोगकालनियमो यमिति मन्यन्ते। **अन्ये** तु वन्दिमागधादीनां सौम्या(म्य)दीप्तादिवस्तुविषय(:) स्तुत्यादिगते(:) कालनियमो यमिति। प्रतिपन्ना जलक्रीडा क्षक्रीडादयो र्था **आक्षेपिक्याः।।३६७।।**

अत्र हेतुः। **आक्षेपा एवमेव स्यु**रिति। एवमेव लयभिन्ना अ(इ)त्याक्षेपाः। साम जस्ये द(त्विय)मुद्धता क्रिया। **एवमेवे**ति। चलनादिरूपकतयैव भवतीति सम्भाव्यते। कुतस्त इत्यादिविशेषा भवन्तीत्याह।

रोषामर्षादिसम्भूताः शोकाद्भुतभयानकाः।

इति। पु(लिङ्ग).....त्वान् **मत्वर्थीयो च्** (अष्टा. ५.२.२७) शोकः पुत्रशोकादयः कारणत्वेन येषां सन्ति। अत एव शोककृताक्षेपमध्ये विलम्बितलयस्य सम्भवः।।**३६८**।।

यदुक्तमस्माभिरादित्यसोमेति (भ.ना. ३२.३५३)। एवं स्थितिरि(ते इ)त्यादि(भ.ना. ३२. ३७४)दिक्प्रदर्शनमिति। तदर्थमाह। यद् द्रव्यं **वसुधासंस्थमते दैवतमानुषांश्च** (षान्। तांश्च) वर्जयित्वा। आदित्यादयस्तु परिदृश्यमानस्वभावा एवोपमानत्व उचिताः। मनस्त्वधिष्ठातदेवतास्वरूपं दैवतम्। तद्वर्ज्यम्।

ननु किमतो नियमाद् दृष्टं भवतीत्याशङ्क्य हेतुमाह। **तत्सर्वमुपनेयं त्वि**ति। तुर्हेतौ। यस्माद् गजेन्द्रपवनादीनां विशिष्टे प्रवेशादिके श्रूयमाणे स्वयमनधिकारिशरीरत्वादव्यग्रत्वाच्च न तावन्मात्र एव वाक्यार्थे सामाजिकस्य प्रतीतिर्विश्राम्यति। अपि तु **प्रस्तुतप्रशंसि**न्यायेनाधिकारिणि प्रकृते चित्तवत्तिर्धावति। अतश्च तद्वस्तूपनेतुं प्रकृतार्थं प्रति सङ्गमयितुं शक्यं भवति। कि च नाट्योत्पत्ते **रसाध्याये** (भ.ना. ६) प्रतीतिविश्रान्ता आहार्यादे(रधिकं) न प्रयोज्यत्वमपि तु चित्तवत्ति(त्ते)रिति वितत्य दर्शितम्। तत्राधिकारशरीरव्यतिरिक्तस्याद्यस्य पुस्तचित्रालेख्यप्रख्यस्य चित्तवत्तिं ग्रासीकारयोग्यत्वादुत्तानतया भासमाना सौ सर्वत्र विशेषेणोपनेतुं शक्या यदुपनयाद्रसास्वादः। यथोक्तं **भट्टतोतेन**।

संविशिष्टेन केना पि ग्रासीकारादपह्नुतः।

प्रकाशते त उत्ताना सर्वस्यास्वादनिर्भरम्।। इति।

इन्द्रादेरर्जुनादेश्च गानकाव्यार्थनेतुः स्वयमेवाधिकारित्वात्तवन्मात्रविश्रान्तिसम्भवान्नोपमेयत्व––मिति। गानयुक्त(काव्यगी)तिनाटकगानोभयकाव्यर्थोचित्तस्य गीतिविशेषस्याभियोजना तु संवित्साधारणी भवति। गीतेश्चितवत्तिमात्रद्योतका(कत्वा)दिति।।**३६९**।।

अत्रापि शिक्षान्तरमाह। **स्थावरैःस्थावरमि**ति। एको र्थशब्दो परो रूढिशब्दस्तेनावस्थानशीले सहकाराद्युपमानं भवति। सहकारतरुः शोभत इति। न धावतीति। तत्र तेषु स्थानेष्ववश्य(श्यं) स्थायिनी गतिः।।**३७०**।।

सा च विभज्य वर्णनीया। उपमानं च तत्रोचितमाश्रयणीयं सत्कविभिरिति दर्शयति। **भू(मि)**स्थेत्यादि। भू(मि)स्थ पादचरी **गतिविभ्रमो** गतिवैचित्र्यम्।।**३७१**।।

तदुदाहरति **रथपत्रे**ति। **पत्रं** युग्यादि। **पक्षि**भिर्गरुडाद्यर्यानं येषाम्। स्थादि**शिविकाश्च(स्थाः)पक्षियान(ना)**श्चेति द्वन्द्वः। काव्ये **पद(दं)द्रुत**(तं) लघुवर्णम्। **वर्णो** गीतिः। सा पि **द्रुतवर्णा** इति। स्फुटवर्णपर्युदासेन तत्सदशा **अवर्णा** पौष्करा वर्णानुहाराः। ते पि द्रुता लघुबहुलाः। द्रुतैः पदवर्णावर्णैरुपलक्षिताः। द्रुतेति सम्बन्धः।।**३७२**।।

ओजस्कृतेति दीप्तार्था तेभ्यः। गरुवर्णेति। वर्णशब्दो त्राग्रे वर्णयेवि(र्ण्येते)ति तालाक्षरेषु। सेति ध्रुवा।।**३७३**।।

एतदेव व्याप्त्या दर्शयति।

द्रुतगमने लघुवर्णा विलम्बितागतौ च दीर्घवर्णकृता।

इति।।**३७४**।।

यस्मादविद्यमानं गुरुवर्तनं यत्र पदे सादश्यस्य नास्ति **तस्माद्** गानस्य गीतिस्थानगतस्योद्धतमसणादेराश्रयणाद्या गीतिर्वर्णाङ्गरूपा विलम्बितद्यौचित्येनायाति तां विचार्य तद्वत्यां तदुचितगुरुलघुनियमां **ध्रुवां** वत्तजामिति योजयेत् गीतावसानतया सम्बन्धयेदिति।।**३७५**।।

त्रितयासाम्यमेव स्फुटयति।

तस्माद्वाहनगत्यर्थैर्ध्रुवा कार्याक्षरैस्तथा।

अङ्गानां समता यत्र वा(भा)ण्डवाद्ये करिष्यति।।

पुष्करवाद्याक्षरैः सेति। अङ्गानां वर्णानां गानमेककादीनां श्येनविन्द्वाद्यलङ्काराणां च **समतामुचितलयत्वं करिष्यती**ति चिकीर्षितम्। तस्मादिति। भाण्डवाद्यं हृदयेनावलम्ब्य **वाहनगत्यर्थै**रद्वक्षरैः पदैरुपलक्षिता **ध्रुवा। तथे**ति। तत्प्रकाररैरेव **कार्येति** सम्बन्धः।

एतदुक्तं भवति। इदमत्र वाहनगत्यादि वर्णनीयम्। ईदशेनात्र वर्णाङ्गेन भाव्यम्। तत्र चेदशेन भाण्डवाद्येन तत्र चेदमुचितं ध्रुवावत्तमिति पर्यालोचनम्। कवि(ता)ध्रुवाङ्गमत्र पदत्रयस्य साङ्गोपाङ्गमुत्तर(क्तं) श्रवणादिति **केचित्।।३७६-३७७।।**

अत्र साम्यकलमाह। **पूर्वं गानमिति। पूर्वं प्रधान**मपि र जकत्वसाधारणीकारणाभ्यां रसस्यान्तरङ्गत्वाद्यत्र लथसाम्यार्थं **वाद्यं** तदनुवर्ति च पाज्ञस्य गत्यादिरूपं गात्रविक्षेपात्मकं **व(न)त्तम्।** यद्यपि **गत्या वाद्यानुसारिण्या** (भ.ना. ४.२.२७४) इत्यत्र नाट्ये ङ्गविक्षेपं (पस्ततो) **गीतवाद्यं** न तु विपर्यय इत्युक्तम्। तथापि सिद्धे प्रयोगे न तदवोचितमिति प्रतिवक्तुः प्रतीत्यभिप्रायं(यो) मन्तव्यम्(व्यः)। प्रयोगस्य तु सिद्धिरेतद्यदा क्रियते तदा प्रयोक्तव्यवहारस्थिता(ते) गीतवाद्ये पूर्ववद् व्यव(हार)स्थापितो(ते) पि रूपे यदा भवतस्तदा द्रुतं तदपेक्षी भवेत्येवेत्यलं बहुना।

एवं गीतानां सम्यग् योजनं प्रयोगं प्रकृष्टं योजनमिति कृत्वा ये तु ताण्डवाभिप्रायमेतद्यथाश्रुतं नाट्यविषये पूर्वं नत्तं प्रयोज्यमिति वर्णसन्ति न ते प्रकरणं प्रयोगहृदयं च पराम(म)र्शुरित्यास्ताम्।।**३७८**।।

अथ प्रासादिक्यां वक्तव्यं विशिष्टं पूरयितुमाह। **हृदयस्थं तु (स्थस्तु) यो भाव** इति। तुरेवार्थे। अथेति चार्थे। **हृदयस्थ** एव गतिर्भू(भू)त एवं(व) न तु पथग् वाच्यार्थतां प्रायोभावनित्तवत्यात्मिका(को)चेष्टात्मा वा। अत एवैभिरङ्गाभिनयैरेव साध्य इत्यङ्कुराभिनयेषु सूचाभिनयेषु च यो **भावो** भिनयात्मको भिनयमात्रसारस्तत्काले काव्यस्य व्यापारात्। तत्रैतेष्वङ्कुर**निवत्यङ्कुरसूचा**विषनेषु भावेषु **प्रासादिकी** ध्रुवा योज्या

योजनमर्हति। प्रहर्षलक्षणः सामाजिकानां यो र्थः प्रयोजनं स एव गुणो यत्र साध्यं तस्योद्भवो यस्या इति प्रयोजनमन्वर्थत्वं चोक्तम्।।३७६।।

विषयान्तरमप्यस्य दर्शयति। **आकाशपुरुषो यत्रेति**। प्रविष्टेना पि सता येन सम्भाषणमादौ ततः प्रवेक्ष्यमाणता या सा काशभाषणेनेह लक्षिता। यस्तु नैव प्रवेक्ष्यति भाणादाविवोन्मादादि कल्पन्त(ल्यत) एव वा स **आकाशपुरुष** उक्तः (भ.ना. २२.३२१)। **तत्राकाश**संश्रयाव्यवधानं सूचिकैवार्थानुगता **ध्रुवा** कार्या।

कम तुं तरिअं णिअ सहअरिअ सग्गइ सामु
पुरिओसु अरसु अयदि।।
(कं त्वं तरिरिव सहचरि स्वगते स्वामिनि
पुरीष्वरसमयसि।।)।।३८०।।

अपि सर्वप्रासादिकी भवति। तथापि धीरादौ भाण्डवाद्यकोल(ला)हलादिप्राधान्यमिति श्रङ्गारे सा प्रधानभूतेति दर्शयितुमाह। **प्रा(प्र)सादनाश्रया वा(च)पीति।।३८१।।**

अन्यरसविषयत्वात् सम्भवत्येवेति दर्शयति। **यानि प्रासादिकानीति**। रसप्रसक्तिः प्रयोजनं येषां काव्यस्थानां तेषु **प्रासादिकी** अन्वेक्ष्यति। सा हि तत्प्रयोजनेति भावः।।३८२।।

अथ प्रकृतिषु भाषा ध्रुवाविषयत्वाद् विभजति। **भाषां तु शौरसेनीमि**ति सामान्यविधिः। मागध्यां तु नर्कुटमिति साधर्म्यविषयेयमित्युक्तं भवति। नर्कुटस्यैतद्विषयत्वेनाभिधानात्।।३८३।।,

दिव्यानां तु देवनपाणां **प्रमाणै**र्व्याकरणादिलक्षणैरुपेतं **संस्कृतं गानं** शुद्धम्। मनुष्याणा**मधर्मसंस्कृतम्। (अन्यत्) त्रिवर्ग(वर्गं)** प्रसिद्धं पदमध्ये संस्कृतं मध्ये देशभाषादियुक्तं तदेव कार्यम्। **दक्षिणापथे मणिप्रवाल**मिति प्रसिद्धम्। **काश्मीरे शाटकुलमि**ति। **अन्ये** तु सकललोकप्रसिद्धैर्व्याख्याननपेक्षिभिः संस्कृतैः कृतमर्धसंस्कृतमाहुः। **अपरे** वररुच्यादिप्रणीतप्राकृतलक्षणान्वितं **शौरसेन्या**दिदेशभाषाद्यतिरिक्तं प्राकृतमेवार्धसंस्कृतमिति मन्यन्ते। यस्य या पाठे भाषा तयैव तस्य गीतमिति मुनिमतमित्य(त्यु)पेक्ष्यम्।।३८४।।

ननु ये पूर्वमादित्याग्निसोमादय उपमानत्वेनोक्तास्तेषां यदा प्रयोगवशादितिवत्तौचित्यात् साक्षादेव **प्रवेशो** भवति यथा **रामाभ्युदये** मेदकस्तथा ध्रुवायां किं वर्णनीयमित्याङ्क्याह। **ये त्वौपम्यकृता** इति। गणिकास्तेषां **समाश्रयं** वर्णनीयत्वे श्रण्वित्यवधारयेति मुनीन् प्रति प्रत्येकं **भरत**मुनिराह। न तेषामुपमानमुखेन वर्णनमपि तु स्वरूपेणैव ध्रुवा। तदन्यः(न्य)पात्रदेव त्रयेष्वपीति **केचित्। अन्ये** त्वधिष्ठानदेवातायाः प्रवेश एवाश्रयो लोकपरिदश्यमानभूतरूप उपमानमिति प्रतिपन्नाः। **अभियुक्ता**स्तु स्वयमाश्रत इत्युपमागत वर्ण एवाश्रय उचितत्वादाश्रयेणे(त्य)र्थः। उपमानत्वेन सजातीयत्वाच्च स्वतन्य(न्त्र)ता। अग्नेर्मध्याह्नादित्यः स एवोपमानतया कार्य इति वर्णयन्ति स्वेनोपमानाश्रयमिति। **अन्ये** तु

गानध्रुवा तावदन्यपात्रपदै(रन्य)त्रैतद्दष्टेत्यधिशा(धीश)स्तुतिर्ध्रुवा प्रयोज्येति। एतदनेन ग्रन्थेनोच्यत इति। एतदेव च युक्ततरं देवस्तवसूचनात्।।**३८५**।।

यस्त्वेषां सात्विक इत्यादिना विकलं यत्स्वरूपं च वर्ण्यमिति दर्शयति। **प्रमाणगुणसंश्रयमि**ति। सकललक्षणोपेतमित्यर्थः। स्वरूप(त)स्तु **प्रमाणं** गान्धर्वशास्त्रं **तद्गणै**रविकृतैरेव जात्यंशकैरदष्टप्रमाणकथनैस्तथाविधेषु गानं कार्यम्।।**३८६**।।

एवं पुण्यनिमित्तत्वं लक्ष्यत इत्याहुः। **कर्मसंकीर्तनाद**पि पुण्यनिमित्तं केवलं गान्धर्वयोगादित्यपि शब्दार्थं वर्णयति।।**३८७**।।

माला वक्त्रमित्यादिना विकलं प्रवत्तिविधिमाह। स च उक्तभावे(व इ)त्याह। **पूर्व**मिति। **अन्ये आत्मि(चूलि)**केत्यत्र चूर्णिकेति पठन्ति। वत्तान्तगं वत्तचूर्णिकेत्याहुः। **जयाशीर्वादे**ति। **स जयतु पायादित्या**दित्युक्तानि। तदर्थमेव हि तेषां(विधिः)। तमिह वदेदिति नाप्रकृतमेतदिति शङ्कितव्यम्। आ(अ)र्हेति कार्याणीति अर्हे कृत्यः (अष्टा. ३.३.१६९)। गान्धर्वमपि योज्यमानं सुकुमारमेव योज्यम्। र जनार्थत्वाद् (ग)न्धर्वाणामिति।।**३८८-३८९**।।

ऋग्गाथाः पाणिका इति। चकारो न्यदपि सुकुमारं च चतुष्पदां सङ्गह्णाति। एवकारः सुकुमारं व्यवच्छिनन्ति। **सुश्रव** इत्ययं हेतुः। इत्ययमग्गाथातिसम्बन्धी तालविधिः।।**३९०**।।

स्वरविधिस्तर्हि वक्तव्य इत्याह। **गान्धारमध्यमयुताः प चमयुक्तास्त्रि**ति। गान्धारी मध्यमा प चमी चेति। अत एव गान्धारप चमे भिन्नं यत् प चमं न चोक्षप चमेन प्रयोक्तगीतिः।।**३९१**।।

दिव्यविषये चतस्रो ध्रुवा इत्याह। **प्रासादिकं स्थितं चेति। प्रमाणमि**ति ताल परिच्छिन्नं गानम्। तदपेक्षमेव **प्रासादिक**मित्यादौ नपुंसकम्। स्थितस्य रसान्तराक्षेपः कार्यमिति **स्थित**मत्राक्षेपिकं गानम्। अन्तरत एवान्तरगतविषयस्याभावाच्च स्थान(स्थिति)गानं स्यात्।।**३९२**।।

यदा बहुतरं तदङ्गं प्रविष्टस्य रङ्गे स्थितिस्तदा न्तरध्रुवा पि भवति। तत्र च **संस्कृतमनुष्टुब्**गानम्। मार्गदीर्घकलायां तु स्थितौ सा नैव भवतीत्याह। **विना** तथेति। अन्तरध्रुवापीत्यर्थः। **गुर**वस्तु मन्यन्ते। नैष्क्रामिकं सम्प्रवेशज(न)मिति। साहित्यसूच(चि)तेन प्रावेश(शि)की नैष्क्रामिकी च दिव्येष्ववश्यं भाविनी। कृतेआ(ताबा)पदसम्भ्रमादेर्ध्रुवान्तरं तु कालपर्या(य)सापेक्षमिति।।**३९३**।।

अथ वत्तानि विभजति। **वक्त्रं चेति। वक्त्रापरवक्त्रमालाः** प्रावेशिक्यो देवानाम्। **पूटचूलिके** निष्क्रामे।।**३९४**।।

प्रासादिक्य(क्या)मुद्गता। आक्षेपिक्यामनुष्टुप्।।**३९५**।।

नत्वाक्षि(न्वाक्षे)पिकी स्थितिलया यदा भवत्येषां सा का(ला)वकाशवशादित्याशङ्क्याह। **स्वप्नभ्रंशाश्रयकृतमि**ति। यथा क(चिदा)श्चर्यार्थः कश्चिदेव स्वामिनां भगवद्रुदविष्णुविरि चादीनां परवश एव भ्रष्टदिव्यभावो बहुतरं कालं विभज्यते। तथोग्रदुःखयोगे स्थितलस्य शोकोचितस्यान्तरा स्वस्थानशरणाद्युपवर्णनेष्वस्त्यवकाश इति

तात्पर्यम्। नत्वत्र शापादिना स्वर्गभ्रंश इति भ्रमितव्यम्। तदानीं दिव्यत्वव्यपगमे करुणे स्मिन्न वक्तव्यं स्यात्।।**३६६-३६७**।।

ननु किमर्थं दिव्यानां मा(म)नुष्यमध्ये प्रवेश इत्याशङ्क्येतिहासवत्तान्तस्मरणयो(णेनो)त्तरं ददाति। **उत्पादनार्थमि**ति। इन्द्रस्यावतरणमर्जुनजन्मनेत्यादि। विहरणं क्रीडन(ना)यानुसरणम्।।**३६८**।।

यो पि दिव्यो मर्त्यधर्मेण वर्तते यथा भगवान् कृष्णो रामो वा सदा स्वं स्वरूपं स्मरति तदास्य दिव्योचितप्रमाणेन शास्त्रविधिना तु लौकिकस्य च्छन्द(न्दो)रीतिक्रियया गानं कार्यम्।।**३६६-४००**।।

अन्यदा तूत्तरप्रयोगिन्यो ध्रुवा उत्थाप(पि)न्यादिकाः **प चमाध्याय**वर्णितस्वरूपा वक्तव्यशेषेण पूरणीयाः। तत्प्रस्तावप्रयोगे सम्बन्धे च दर्शनव्याजेन भणाहि(नी)ति **ध्रुवाणां विकारस्य** प्रकारप चकस्य य **आश्रयो** नाट्यप्रयोगस्तस्य पूर्वेण(पूर्वरङ्गे) सहायः प्रकृष्टो योगः **स यथा कर्तव्य**स्तं **निबोधत**। चकारो त्र वक्तव्यशेषं सूचयति।।**४०२**।।

स्थापिते **भाण्डविन्यासे** इत्यर्थेन प्रत्याहारावतरणे सूचिते **आश्रावणाद्यमि**त्यर्धेनान्तर्यवनिकाङ्गानि पूर्वरङ्गे प्रयोजयेदिति बहिर्यवनिकाङ्गजा तत्प्रसङ्गेन गानान्तरिता ध्रुवा सोप(वर्णिता)।।**४०२**।।

नाट्याचार्यकलितानां तु **पूर्वरङ्गा**ङ्गवदनादि**गान्धर्ववेद**परिदष्टा(नाम्)। **प्रकृतीनामि**ति। उत्तमादिपात्राणां प्रवेशः प्रावेशिकी।।**४०३**।।

अथ पूर्वरङ्ग उत्थापनादिषूक्तं **परिवर्तास्तु चत्वारः पाणयस्त्रयः** (भ.ना. ५.४१) इत्यादि तच्चानुद्भिन्नमुद्भेदनीयमित्याशयेन पूर्वरङ्गविषये वक्तव्ये शेषा अभिधानार्थमुत्तमाङ्गक्रमस्या(प्रा)यास्तं(तान्)निरूपयति। **गत्याश्रयेणे**त्यादि। ये परिवर्तास्तत्रोक्तास्तैः **पादैरनुगतै**रिति चारीभिस्तालप्रमिताभिर्गतेराश्रयणेन तथैव परिवर्ताः प्रयोज्याः। कथम्। रङ्गस्य त्र्यश्रचतुरश्रविकृष्टभेदत्रयस्य य उचितः परिक्रमः (स) किन्निमित्तिः परिवर्तकानामित्याह। **गानेनार्थवशेन चेति। गान** इ(मि)ति सामवेदम्(दः)। अथ(र्थः) प्रयोजनम्।

एकस्मिन् परिवर्ते तु गते प्राप्ते द्वितीयके। (भ.ना. ५.३६)

इत्यादि **प चमाध्याये** दर्शितम्। तेन परिवर्तबहुलगतिः। **सामवेद**प्रभवत्वं जर्जरग्रहणं तन्मन्त्रजपनादिकं च प्रयोजनं परिवर्तेषु निमित्तमित्यर्थः।।**४०४**।।

तत्र च **ध्रुवा देवताभिर्युता**। देव(ता)बहुवचनेन मत्राङ्गे यादशी क्रियमाणत्वेन देवतोक्ता सैव तत्र ध्रुवायां स्तुत्येति दर्शयति। **वन्दे पितामहमि**त्यादिनां (भ.ना. ३२.४०५)।।**४०५**।।

गतिं स्मारयति। **तत्र पाता** इति। पादपाताः **प चमे ध्याये वामवेधस्तु (तत्रापि) विक्षेपो दक्षिणस्य च(तु)** (भ.ना. ५.८४) इत्यादि षड्विंशतिः। **एकविंशतिः त्र्यश्रा वा चतुरश्रा** वा द्विप्रकारतां पूर्वरङ्गस्य स्मारयति। नाट्यविषयात् प्रयोगात् प्रागयं क्रमः। **अन्ये तु ध्रुवा नाट्ये ध्रुवेति च।** (नाट्या)भिनयप्रक्रमादावयं विधिरिति।।**४०६**।।

त्रिकलं त्र्यश्रायां पादपतनम्। अन्यत्र **चतुष्कलम्।।४०७।।**

अत्र**ोत्तम**त्वं देवताविषयम्। **मध्यमत्वं** राजादिविषयम्। **प्रशास्त्विमां महाराजः पथिवीमि**त्यादौ। **अधम**त्वं विदूषकादेः। **त्रिगतकथितका**दौ। **अन्ये तु देवता**नामेव कृतित्रयं योज्यमित्याहुः। मध्यमाधमस्य(योः)स्यान्न तेन विशेषः। **त्र्यश्रता** तुल्यतै(तयै)व तयोः।।**४०७**।।

चारीमहाचारीरङ्गद्वारादिषु रसादेशवैवश्येन गतिस्त्रिकलाधिकेति दर्शयति। **स्वस्थगतो ह्येष** इति। अनादेशे त्रिकलचतुष्कला वा गतिः। **सम्भ्रमोत्पातरोषेषु** महाचार्यादौ **कलिकं वा पादपतनमिति** संभ्रमादसमं स्यात्।।**४०६**।।

भाण्डादीनां सङ्गतिरवश्यमेव तत्सूचकमुचितमिति यो विपर्यस्तस्य भ्रान्तिमपसारयितुं तालसाम्यमेव सर्वत्र वि(हि)तमिति दर्शयति। **त्रिकलद्विकलैककले**त्यादि।।**४१०**।।

नन्वर्धकलिका कलिका च गतिरुक्तेति तावत्यपि स्याद् ध्रुवेति भ्रमं वारयति। **न ह्येककला द्विकला ध्रुवाविग(रा)मा** इति। कलायां निषिद्ध.....मार्गस्वरूपनिरूपणा..... **प चलघ्वक्षरपरिमाणं लघ्वक्षरमि**ति। इत्थं ध्रुवस्य प्रतिपादितं तेन प्लुतो गुरुरेव। गुरुस्तदपेक्षया लघुः। लघ्वपेक्षया ल(घुर्ल)घुरेवेति प्रस्तारे विभागः। तत्र प्रस्तारविधिरुच्यते।

आद्यगुरोर्लोपः स्यात् पर(द)मुपरि पदादितो गुरुः पूर्णे।
लघुना पूरणमत्र च यावद्गति गुरुलघुत्वं स्यात्।।

तेन प्लुतस्तद्भङ्े ष्टादशभेदास्तेन सह षड्भेदः। लघू द्वौ। तद्यथा। एतेषां प्रत्येकं विरामभेदतुल्यो द्विगुणस्त्रिगुणश्चतुर्गुण इति प चधा विरामभेदः षष्ठकलायाः कलार्धस्य सार्धकलायां(या) वा। अतएव च **विरामो मध्यविरामो मूलं भवत्येव। आद्ये सन्धानादिति हि कोहलाचार्यः।** तेन प्लुतभेदाश्चतुर्दशाधिकं शतम् (११४)। गुरुभेदाः षट्त्रिंशत्। लघुभेदा द्वादश, तेन चच्चत्पुटस्य तावता गुणने (५३७७) तस्य द्वादशभिर्गुणने तस्याङ्कस्य चतुर्दशोत्तरेण शतेन (गुणने ७७५५७३६)। एते गुणकृता भेदाः। अवान्तरभेदानां तु निस्सङ्ख्यत्वमेव। चच्चत्पुटवत् चाचपुटादिभेदेन भेदान्तराण्यपि दर्शनीयानि। यथोक्तम्।

असङ्ख्यानि सहस्राणि कोटीनामयुतानि च।
तालद्वयप्रभेदेन पुरा प्रोक्तानि शम्भुना।।

इति। एवं मिश्रभेदो प्यनुसर्तव्यः। अत एव त्र्यश्रतुरश्रमिश्राणां षट्पितापुत्रकस्य च मूलप्रकृतितया ध्रुवाशब्दवाच्यानां भ िजनाट्ये प्लुतगुरुलघुद्रुतमयास्ताला विरामभेदा विचित्राः। तथा भङ्गव्यपदेशेन यदाहुः ध्रुवाणां **भ जनाद्भङ्गा** इति। एवं त्रिचतुष्(ड)ष्टकध्रुवातालभ जनं भङ्गानां रूपस्य। उपभङ्गास्तु सङ्कीर्णस्वरूपेभ्यः **कलाः प चे** (भ.ना. ३१.२४)त्यादिनोक्तस्य भ जनादपि भवन्ति। तथा भिनयकाले त्र्यश्रा। त्र्ययगत्र्यद्वैगुण्या। मिश्रा च **दशकलाचतुष्क वलयमथ गत्रयमित्येव(वं)**रूपी(पिणी)। यत्र तु द्विविधत्वाद् गुरुलघुप्लुतद्रुतविरामादिरूपेण भ जनं ते पि भङ्गाः। लयभेदेन तु यत्र वैचित्र्यं तद्यथा द्विविधानां चित्रपदानां गुरुरूपप्रस्तारसाम्ये पि लयकृतविभेदः। एवं

भङ्गोपभङ्गविभङ्गलयरूपा तावच्चतुर्धा तालजाति**र्गोबलीवर्दवत्या** लक्ष्यते। तद्व्यपदेशाद्विभक्ताः संव्यवहारसिद्धये **कोहलाचार्य**प्रभतिभिस्तु तथाविभागं विनियोगशेषं च दूषितम्। तद् द्वयं तु **नास्मभ्यो** रुचितम्। पूर्वप्रसिद्धिर्हि यथोपपद्यते तथा मतिचतुरिमा संहरणीयः। एवमेव गणभेदभङ्गस्तस्य च प्रस्तार **आचार्य**प्रस्तारवद्यथोक्तया **दण्डापूपाचरितै**(तयै)व। कथं तर्हि **कु(क)लिकं पादपतन**मि(भ.ना. ३१.४१०)त्याह।

एवं साम्यं कुर्याद् भाण्डेन सम च गानेन।

इति। भाण्डवाद्यगानाभ्यां सहगतेः। एवमिति। कलाद्वयकलार्धकलारूपेण **साम्यं कार्यम्**। तत्र ध्रुवा समवायितव्या। तथा हि। हितार्थस्य षष्टिः। तालगतभेदद्वयगत्या गतं च। अपि तु गीतवाद्ययोस्तावत्यवान्तरविदारीयोगः कार्य इति तत्र तात्पर्यम्।।**४११**।।

लयत्रयवैचित्र्यमपि चात्र भवतीति दर्शयति। **ये पूर्वोक्ता भावा** इति। पूर्वरङ्गमहाचार्यादौ यथामन्थरत्वरितारूपा चित्तवत्तिस्तत्सम्बन्धिनं तत्सूचितं पादपाताद्वा परिक्रमणं कार्यम्।।**४१२**।।

अथानेन प्रसङ्गेन साम जस्यं न क्वचिदपि युक्तमिति दर्शयति।

अपथा(टा)क्षेपकृता चेदात्ययिकीहर्षरागशोकोत्थैः।
यो वि(वि)च्छेदस्तत्र समः कार्यस्तज्ञैः प्रवेशे तु।।

इति। **चेदे**ति यद्यप्यर्थे। करणं **कृत्**। अत्यये भवे(वा)**आत्यायिका(की)**। अप्रयुज्यमानां तदीयं योजनाहर्षादिभिरुपलक्षिते पात्रप्रवेशे पदाक्षेपकस्याकरणेन यद्यपि प्रावेशिकी ध्रुवा सम्भवति। **अध्रुवास्तु प्रवेशजा** (भ.ना. ३२.३३७) इत्युक्त्वात्तत्रेत्यविद्यमानध्रुवास्थाने पि प्रविशतः पादस्तालेन समीकर्तव्यः। एवं वलनिकादिना ततः कलिकेनापीति।।**४१३**।।

एवं प्रसङ्गादुक्तम्। प्रकृतं पूर्वरङ्गमेवानुसरन्नुक्तमुपसंहरन्नन्यदासूत्रयति। **एवमेते (बुधैर्ज्ञेयाः प्रयोग) परिवर्तका** इति। **भाण्डग्रहविकल्पनं** प्रवक्ष्यामीति च।।**४१४**।।

अभाण्डमेव गानस्य परिवर्तनं प्रयोजनम्। **चतुर्थे** सन्निपातम्। भाण्डग्रहणे सन्निपातः। परिवर्तने तुर्ये परिवर्तने भाण्डग्रहाद्यास्त्रयः शून्या इति। अन्ये त्वाद्य एव परिवर्तो भाण्डशून्यः। तदानीं यावत्यः सन्निपातकलाः सन्धीनां त्रयो न्ये भाण्डवाद्यमुक्ता इति।।**४१५**।।

सन्निपातग्रहाः काश्चिदिति। **ध्रुवा हस्तद्वयहननजैरक्षरैस्तर्जनीग्रहति**भिः कृते लक्षणशून्यवर्तनामात्रेण वा भाण्डवाद्यस्य ध्रुवानुग्रह इति त्रिधा। **अन्ये** त्वाहुः। एककले ताले सन्निपातन्त्यकलातो द्विकले चतुष्कले च ध्रुवायास्त्विव तर्जन्या इति। तदुपलक्षिततुर्यपादे भागप्रथमकलान्तः। एककलादिनियमाभावे तु आकाशाच्छून्याद् गीत एव नामभाण्डग्रह इति। अस्मत्परमगुरुभिश्च **श्रीमदुत्पलदेवपादै**रयमेव प्रतिपन्नो र्थः।।**४१६**।।

गानसम (भ.ना. ३२.४२२) इति **सन्निपातश्च शम्याचे**–(भ.ना. ३२.४२१)त्यकारणं भाण्डस्यैव साक्षीति। भाण्डवायशा(शी)ले च गतिपरिक्रम इति दर्शयति। **ध्रुवायास्त्वि**ति।

कलः(काललयान्वितः)। कालश्चित्रादिभेदेन त्रिधा। तथा **लयो** द्रुतादिः। **तदन्वितो** यः। भाण्डेन साहित्यग्रहसङ्गतिः **परिक्रम**विषये योजनीया।।**४१७**।।

शीर्षकोद्धतयोः प्रदेशिन्या द्रुतविलम्बितार्थस्थितयोततीयपातान्त्यात्।।**४१८**।।

नर्कुटादीनां प्रासादिकी। द्रुतानामूर्ध्वके आद्ये वा देयः सन्निपातः। तत ऊर्ध्वके मुरज इति केचित्।।**४१६**।।

नैष्क्रामिकमित्यनुबन्धयोर्गानसम एव ग्रहः सन्निपातादेतस्माज्जायते गानकाले। एवं तर्जन्यादिग्रहणोक्तः। न मुरजाक्षराणि। अनयोश्च **परिवर्तो** न कार्यः।।**४२०**।।

नर्कुटस्य शम्यायां**स्तालः**। सन्निपाताच्छून्या**देव** भाण्डग्रहः। शम्यातालाभ्यां सव्यापसव्यहस्तप्रहारजान्यक्षराण्येवेति। **अन्ये** एतत् पूर्वरङ्गविषयं परिवर्तात्थापनादि ध्रुवासु तत्तल्लक्षणाङ्गदर्शनेन शीर्षकोद्धतादिव्यवहारयोगास्त्विति। **अन्ये** तु दष्टप्रयोजने पि नियमादष्टप्रयोजने पि नियमादष्टं भोजनप्राङ्खमुखत्ववदिति।।**४२१**।।

स्थितानां भागानां विषयं(य)प्रसङ्गादेतदुक्तम्। (द्रुतायां नोक्त)मित्याशङ्क्याह। सम्प्रमेत्यादि। **सम्प्रमादौ प्रवेशे गानसमो ग्रहः। उद्घात्येन** उद्रेकहननार्हेण खलखलकेन।।**४२२**।।

भूषणवासःपतनादावपि खलखलकस्य प्रयोगः।।**४२३**।।

एतदुपसंहरति **एवं प्रयोक्तिभिरि**ति। **यथास्थानं यथाश्रयं** च प्रवेशादावुत्तमादौ नाट्यध्रुवागानं यथानत्तगतं पूर्वरङ्गध्रुवागानं कुर्यात्।।**४२८**।।

ननु पूर्वरङ्गगतं त्वदष्टसिद्धये नाट्ये तु किं तेनेत्याशङ्ख्योपर जकत्वेन रसोपयोगितामप्याह। **यथा वर्णादते चित्रमिति। वर्णो** हरितालादिः। वैचित्र्यान्निवेशितमिति। घटिकामात्रादिनेति भावं(वः)। रसभावोक्तिरनेन सूचितेति **टीकाकाराः**। **अस्माभि**स्तु रसतत्त्वं विमष्टपूर्वमेव।।**४२५**।।

पूर्वरङ्गेदष्टे प्यप्रयोजनं तदाह। **देवपूजाधिकार**स्त्विति **तु**रप्यर्थे।।**४२६**।।

ननु किं तत्र स्वरगतमित्याह। **ग्रामद्वयगत**मिति अष्टादशजात्यात्मकमित्यर्थः। **यथास्थानसरान्वितमिद**मिति चारीमहाचार्यादौ यत्र रसं प्रत्यनुलवणत्वं यथा..... **यौगन्धरायण**प्रवेशे **रत्नावल्याम्** (अङ्कः १)।।**४२७**।।

तत्र शरदाश्रयं गानमिति दर्शयन् तत्र युक्तं परमतमप्रतिषिद्धमनुमतं **अंशो....सुगतं चे**ति नीत्या **काश्यप**मुनिप्रभतिभिर्निरूपितमपि ग्राम(राग)नागरगानं स्वीकरोति। **मुखे मध्यमग्रामः। षड्जः प्रतिमुखे। गर्भे साधारितः। प चमो वमर्शे।।४२८।।**

प्रधाननिर्वहणे **कैशिकमि**ति। गानापेक्षया नपुंसकप्राचुर्यम्। शुद्धानां ग्रहणमित्**यन्ये**। भिन्नं **गौडानामपीत्यपरे।**

पूर्वरङ्गविधाने तु कुर्याद्वै चोक्षषाडवम्। (भ.ना. ३२.४२६)
इति।।**४२६**।।

अवश्यप्रयोज्या ध्रुवा इति दर्शयति। **य(त)था रसकृता** इति। **प्रकरणं** प्रवेशादिपदार्थस्य वर्णयितुम्।।**४३०**।।

पूर्वरङ्गे पूर्वरङ्गध्रुवा गाने गान्धर्वे चित्रं गीतिचतुष्टयमिति प्रयोगानुसारेणावश्ययोजनीयमित्याशयेनस्थानान्तरपूर्वोक्तमपि तत् पुनरिह दर्शयति। **मागधी**त्यादि।।**४३१**।।

आद्याविति। **अर्धमागधी** निवत्तावत्तौ।।**४३२**।।

सम्भाविता लघुवाद्याक्षरा **दक्षिणे पथुला गुर्वक्षरा**। वीणामुरजयोर्यथारूपादि करणानीति। .....विधयश्च नाममात्रेण तद्वत्स्थानान्तरोक्ता गतयो गुणदोषसम्बन्धार्थमिहोक्ता न गीतिभिः परमार्थतो भेदे पीति केचित्। तदयुक्तम्। दष्टान्तदार्ष्टान्तिकयोर्लक्षणभेदासिद्धेर्यथा **पुष्कराध्याये** (भ.ना. ३४) वक्ष्यामः।।**४३३**।।

एताश्च गीतयो न केवलं पूर्वरङ्गे यावन्नाट्यध्रुवगाने पीत्याह। **गानयोगे चतस्रस्तु योज्याः सर्वत्रे**ति। तत्र हेतुमाह। **यथाक्षरकृता** इति। **अक्षर**शब्देन तदर्थ उच्यते। नार्थानुसारात् परिवर्तयोगो पि विलम्बितादियोगो पीति।।**४३४**।।

अथ **गुणनिरूपणाध्याय** (भ.ना. अ.३३)स्तत्रार्थमुद्दिशांति। **पूर्णस्वरमि**त्यादि। पूर्णःस्फुटो वर्णः स्थाय्यादिः। **स्थान**त्रयमुरः प्रभति। **समं तालयुक्तश्लक्षणम**स्फुटितम्। **मधुरं** श्रोत्रयोः। **रक्तं** तु नाट्योपर जकम्। एवंभूतं गानं प्रशस्तम्।।**४३५**।।

यतः सूचयति **शय्यामिति**। रसस्य गानेन प्रथमं ततः प्रभत्यासूत्रणात्। तदस्य भित्तिकल्पमित्यर्थः।।**४३६**।।

अथाध्यायमुपसंहरन्नन्यं(न्यत्) सूचयति। **एतदुक्तमिति। अतः परमि**ति।।**४३७**।।

ध्रुवाया विवतिर्लघ्वौ वस्तुनिर्देशिनीकृता।
कृताभिनवगुप्तेन शिवदास्यैकशालिना।।

इति महामाहेश्वराभिनवगुप्तविरचितायां नाट्यवेदवत्तावभिनवभारत्यां ध्रुवाध्यायो द्वात्रिंशः समाप्तः।।

श्रीः

नाट्यशास्त्रम्

त्रयस्त्रिंशो ध्यायः

ज्ञानक्रियादिवर्गविधानहेतु–
दोषापवर्जनपटुः किल भक्तिभाजाम्।
आनन्दपूर्णपरशङ्करसारसिन्धु–
धारास्थितिर्विजयतां परमे श्वरो सौ।।

एवं गान्धर्वस्वरूपं यदुपयोगित्वेन प्रदर्शितं तत् प्रकृतनाट्योपयोगिध्रुवागानमभिधाय तत्रैव द्वये परतत्त्वं निरूपयितुमध्यायान्तरमारभ्यते।

अथ **केचित्** मन्यन्ते। उपर जनात्मनि गान एव सुतरां गुणग्रहणं दोषाववर्णनं चादत्य उपर जनं प्राणं हि गानम्। उपर जनं च गुणदोषायत्तविवेकायत्तम्। अत एव तद्विवेकसय गानं प्रति प्राधान्यं प्रयोजयितुं पथक्त्वं प्रत्यध्यायारम्भः। गान्धर्वे तु र जना न तथा प्रधानमपि तु चच्चत्प्रयोक्तुदष्टफलं तदिति।

नैतत्। तथाहि। यथा स्वरूपं विकलं प्रवत्तो विधिः फलं प्रसूते। शारीरपौ(दा)रवस्वरूपसम्पत्तिरेव च रक्ताकण्ठस्वदितहस्त्वादिना विना कथं लयादितत्वज्ञानम्। या त्र विकृता कालसम्पत्तिरतत्त्वज्ञानस्य च का सङ्गतिरदष्टफलसङ्गत्या। उक्तं हि।

वीणावादनतत्त्वज्ञः श्रुतिस्मति(जाति)विशारदः। (या.स्म. ३.११५)

इति। **तालज्ञ** इति च। तस्माद् गान्धर्वे सुतरां गुणदोषविवेका(को)र्थवान्। स्वरस्थ हि तावदपरुषमधुर जनात्मकमेव लघुः(घु)तालस्यापि गानं प्राणस्तदुभयमपि गुणायत्तं तदायत्ता वा दष्टसिद्धिः। **विशाखिलाचार्यः** साम्यादिह सिद्धिः परत्रेति वदन् प्रादीदशन्(त्)। अथ ब्रूयात् तालादिस्वरूपाविशेषे गान्धर्वाद् गानस्य को भेदः। यद्यनेकलक्षणं तन्वतो भिवद्यते स्वरूपमिव च तथा च गानाभिमतं गान्धर्वं स्वरूपेणेति ततो निगदस्य हि व्यापकं ततो भिन्नलक्षणत्वम्। अन्यथा भेदापातापत्तेस्तु च(तन्)नोपलभ्यते धुनेति व्यापकतानुपलब्धिः। तथा सिद्धो हेतुः। **स्वरतालात्मकं गान्धर्वमि**ति (भ.ना. २८.११) गेयाधिकारारम्भ एव **मुनिना**सङ्गीतगानस्य न(च)तत्स्वरूपादिकं लक्षणमुक्तम्। इदानीं तत्रोच्यते। इहायं गान्धर्वशब्दो लोके शास्त्रे च द्विविधो नाटकशब्दवत्। सामान्यविशेषणास्य प्रयोगदर्शनात्। **गान्धर्विक** इति।

गान्धर्वमेतत् कथितं मया वः पूर्वं यदुक्तं प्रपितामहेन। (भ.ना. ३३.२३)

इत्यध्यान्ते नाट्योत्पत्तौ सामान्येन गीतिरित्युक्ते गान्धर्वं गानमपि। अत्र विशेषे तु गान्धर्वः। अत्रेत्यादौ गान्धर्ववेद इति च। तत्राद्ये पक्षे सिद्धसाधनपरमे त्वसिद्धो हेतुः। न ह्येतावदेव गान्धर्वास्य लक्षणं बालगोपालसारमादि(रस)बाला(बलाका)दिगीते पि गान्धर्वापत्तेः। तथा च तत एवादष्टलाभे यं न वैय्यर्थप्रसङ्गो यदा(द)यमग्नेर्दयन्तः(हतः)फलाद् व्यतिरेकाच्चेति।

नन्वेवं गान्धर्वस्य किं लक्षणमुक्त**मध्यायचतुष्टयेषु मुनिना**। तथाप्यनुसन्धानबन्ध्यो महाभो(भा)गं बोधयितुमनुसन्धीयते। स्वरतालपदविशेषात्मक प्रवत्तिनिवत्तिप्रधानदष्टादष्ट––फलसामवेदप्रभवमनादिकालनिवत्तमन्योपर जनगुणताविहीनं गान्धर्वमिति स्वरूपफलात्

कालाद् धर्माच्च भिद्यमाना (नम)वश्यं गानवैलक्षण्यं भेदैकसम्पादनम्, तदुभयानुग्रहयोगाच्च वाद्यानाम्। गाने तु काकल्यन्तरश्रुतिपरिभ्रमणाद् विचित्रश्रुतिग्रहणम्। स्वराणां मालवकैशिके चतुश्श्श्रुतिकाङ्गस्य दर्शनात् कियद्वा रागभाषाविभाषादेशीमार्गादिगतानां स्वराणां श्रुतिवैचित्र्यं ब्रूमः। उक्तमपि च प्रतीतमनुचित्रा(त्री)यते। प्रतीतानामप्यलक्षणज्ञानां बालविज्ञानवद् वेद्यम्। परतन्त्रतपः (त)या विषयो दिग्दर्शनात्। तस्मादपि तथेति। किं चान्तरालनियमो न्तःप्रमाणस्थानस्वरकालांशवधान्न(शाद)सारतया गान्धर्वे वश्यसंवेद्यः। न त्वेवं गाने। लोपो पि नियतगान्धर्वे दर्शितो ग्रामद्वयभेदेन च जात्यंशभेदेन दर्शितः। गाने तु रक्त्यनुसारेण प्रवेन्ते(वत्ते)रसावनियतः। तथापि गान्धर्वे यस्मादनादित्वमेव समर्थितं तस्यापि मध्यमस्य भिन्नषड्जकालिन्यां लोपो दश्यचतुरस्वरप चगन्धर्वानभ्युपगममपि। अन्तरमार्गो(र्गे) पि विधायिवर्ग(गा)गान्धर्ववेदगीता यो शोभानुरोध एव तत्र करणम्। नटकैशिकलो(ला)टन(ना)गरादावषभगान्धारयोर्भूयसा नवलोकनात् सप्तचत्वारिंशदधिक--जात्यंशकोचितसङ्गीतवशविचित्रीभवदेकैकस्बरस्वरूपयोगात् त्रिस्वरोनमध्यगतं स्वराणां गान(म्।) गान्धर्वे गाने शुद्धभिन्नगौडराग(वेसर)साधारणभाषाविभाषान्तरभाषारूपगीत्यष्ट--कोचितललित गीतनादि(द)स्वरस्वरूपलाभे प्रत्येकदर्श(श)पूर्णषट्प चचतुःस्वरभेदयोगाद् द्वात्रिंशता सह त्रिंशतेः स्वराणामुक्तसङ्गतिवैचित्र्यात् स्वराणां ये ङ्कनाद्यचष्टचत्वारिंशत्तानि तावत् प्राधान्ये न्यस्व(र)संरवभट्टगान्धर्वे च मूर्छनाश्चतुर्दश तनाश्चतुरशीतिरिति। यदैवं स्वररूपसम्पत्तिं गाने तु द्विस्वरात् प्रभति पूर्णस्वरपर्यन्तं द्विधा षोढा चतुर्विंशतिधा तथा विंशसप्तशतधा चत्वारिंशत्प चसहस्रधेति कथितनीत्या यः कूटनभेदस्तत्कृतं स्वरवैचित्र्यं वर्णावषीणा(त्तीना)मेव च ह्येतत्। बिन्दुप्रभतीनामलङ्काराणां प्रयोगो न तद्विपरीतानां मन्द्रतारप्रसन्नादीनाम्। एतेन गान्धर्वे स्वरः प्रधानं तदाधारत्वेन गुणभूतं पदमिति यत् तद्विपरीतं गान्धर्वे र्थसंवेदयोगेन पदस्य प्राधान्यात् तदुपर जनाच्च गुणभावात् स्वरस्येतदपि ह्यकर्णितं भवति। वैणस्वराणां च धातुप्रयोगनियमानपेक्षो रक्त्यतिशयप्रवाहाय न प्रयोगभेदोचित एव प्रयोगो वैणवानामप्ययमेव पन्थाः। एतेन गान्धर्वे देवताविशेषपरिभाषानुसारिणि विनियोगो यथेच्छं वा। गाने तु रसभावनियमौचित्यविशेषो दर्शित एवेति स्वरगते तावद्विशेषः। तालो पि गान्धर्वे नियतत्वेन संख्यापरिमाणं भ(र) जनं परिच्छेदोषायं यतिस्वरैर्वत्तिमेव मेलनमातोद्ययोगमङ्गाङ्गिभावव्यावरुध्यमानः साम्यमात्रफलमिति न शक्यं वक्तुम्। तथा हि। चच्चत्पुटादिष्टनियता चतुरादिका कला संख्यापरिमाणाय चित्रादिभेदे मात्रालयादिभ जनमपि। एककला पि त्रयस्थित्या चतुष्कलान्तत्वे पि। एकरसलघुप्रस्तारयोगो(पि) प्लुतलघुभेद्यप्येकरसगुरु र्यन्तमेव। परिच्छेदो पि वा यो पि कालायातरूपो नियतो नियतक्रमश्रायतेरपि मध्ये स्रोतोगता यती(तिरि)त्यादावदष्टोपयोगप्रधानत्वे। परिवत्तिरपि विशाला सङ्गता चेत्यादावुपवर्तनभेदे च नियतैव। गेयात्मना मेयेन च गान्धर्वतालस्य मेलना। पाणित्रयवैचित्र्येणातोद्यघाटो(द्याधारो) **प्यभाण्डमेकं गात्र(न)स्ये**ति (भ.ना. ३२.४१५) **चतुर्थे**

सन्निपात (भ.ना. ३२.४१५) इत्यादौ विचित्र एवाङ्गानां योगो पि। वर्धमानासरिताया वर्धमस्त(मान)बद्धगीतपाणिकादौ नियत एव तु तस्य भेदमुपनिवहनं वस्त्विवं वास्वे(स्ये)दं शीर्षकमिति वैचित्र्यविधिरेव प्रभवति यतो गाने पुनरुत्तमादिभेदभिन्नप्रकृतित्रयमतयथोचित--मसणमन्थरोद्धतादिभेदभिन्नसङ्गीतप्राणवलन एवोपाङ्गपरिस्यन्दितपरिक्रमणाद्यनुसारेण साम्यसम्पादनफलयोगे कलासंख्यादिभेदेन प्लुतगुरुलघुभावभ जनद्रुतबिन्दुपर्यन्तभङ्ग--सम्भवान्न कलापर्यन्तकमप्राधान्यम्। न यतेराकस्मिकत्वेनादष्टमात्रफलता। नापि परिवर्तितपाणिरुभयभाण्डग्रहणान् न वाङ्गाङ्गिभावेन वितनितं तालमकाराम्भकण(क)मनुरुध्यत इति सो पि विलक्षण एव। पदमपि विनियुक्तादिभेदत्रयस्य कुलकादिभेदत्रयगुणनया नवधा भवेन् देवस्तुतौ प्रधानम्। गान्धर्वे तत्रैवार्थानुसारमनवेक्ष्यैव जात्यन्तरविचितवर्णाङ्गाधारभासं तालप्रमितस्वरप्रधानतया गुणत्वेन प्रतिपाद्यते। गाने पुनश्छेद्यकामे मूल एवासम्भवेरसभावोचितवत्त जातिनिबद्धम्। यत्तु काव्ये तन्नोक्तमित्युक्ते रसपूरणोपयोगात् प्राधान्यमुपस्तुवन् तत एव चित्तवत्त्युचितजात्यङ्गकविशेषग्रामरागाङ्ग--भाषाङ्गगीतिमुपर जकतया समाश्रयात् क्वचित् सुरोचितम्। भिण्डिकाद्विपदीगानादौ स्वरालङ्कारशोभा इत्येव यत् क्वचिद् वीररौद्रोचितपरिक्रमणादिसरणादिदुत्तालीकृतताल--विभ्रमं सम्पादयत् क्वपि च विप्रलम्भशङ्गारोचितबन्धत्वविचित्रबन्धत्वविचित्रादिगान इव नाट्यायितावकाशमादधानं स्वं वाच्यं प्रोन्मार्जयदवभातीति स्वरतालस्थानेषु यथोचितकारिषु नयस्वामिभावमालम्बमानभागमास्त इति। एवं तावत् स्वरपादतालात्मकस्वरूपवैचित्र्य--वैलक्षण्यम्। अनेन च फलवैलक्षण्यमपि व्याख्यातम्। गान्धर्वस्य प्रयोक्तरि प्राधान्येन दष्टफलत्वाद्। गानस्य तु पात्रवर्गे साम्यसम्पत्तिः सामाजिकजने चोपर जनपूर्वकं प्राग् **रसाध्यायो**(भ.ना. ६)दितसाधारणसन्धिधत्यात्मकरसभाववत्तानुस्यूतिहेतुसूचितसादश्ययोग--श्चेति दष्टं मुख्यं फलं प्राङ्मुखभोजनत्त्वदष्टमप्यस्तु।

ननु त(य)दुद्दि प्रवत्तिः सो यं कार्यभेदः कारणभेदो पि गान्धर्ववेदवत् स्वयमनादिर्वा सामवेदप्रभवत्वे पि वा तदर्थादितया तस्येदम्प्रथमतयोत्पत्त्यनुपलब्धेरनाद्ये च गान्धर्वप्रभवस्तु नादोत्पत्तौ तदुपयोगि कल्पितमिति। गान्धर्व वा नाट्योपकरणभूतमेव सत्फलसम्पत्तये। गानं तु नाट्यसामग्रीमध्यनिजस्वरं सफलायेति स्वरूपभेदो पि। एवं परोक्तो हेतुरसिद्धीकृत इति यदेव केवलं यदसत्पक्षे वैलक्षण्ये पि साधकप्रमाणज्ञानमाख्यातमेव। यद्यद् स्वरूपेण कार्येण धर्मेण च भिद्यते तत्तु तेन विलक्षणं भावो भावान्तरादिव। भिद्यते च स्वरूपादिना गानम्। गान्धर्वाद् वैलक्षण्यस्य हि तन्मात्रनिमित्तत्त्वं व्यापारान्तरमिति व्यापकानुपलब्ध्यापि पक्षादपि वैलक्षण्याद् व्यावत्तो हेतुः पक्षेण वैलक्षण्येन व्यापत इति। तत्र च गान्धर्ववेदोदितविधिप्रबन्धप्रधानत्वादिदं गान्धर्वम्। गीतिसारत्वाच्चेदं गानमिति। अत एव **कठकाठक**वद् गान्धर्ववित्त्वाद् गन्धर्वव्यपदेश**मेके** मन्यन्ते। गन्धर्वाणामिदमिति तु सामान्यशब्दो प्ययं भवेदेव। उक्तं हि प्राक्।

नारदाद्याश्च गन्धर्वा गानयोगे नियोजिताः। (भ.ना. १.५१)

इति। तथा गानशब्दे पि गीतिः। तत्राश्रयेणास्ति सामान्यवचनता। **अभाण्डमेको(कं)गानस्ये**त्यादौ (भ.ना. ३२.४१५) पूर्वरङ्गे गान्धर्वमेव प्रधानम्। न त्वस्य तर्हि तदङ्गत्वे कथमेकान्ततः स्वप्राधान्ये सम्भवमात्रेण तु गानस्यापि तत्। न हि नाट्याद्बहिर्लयभङ्ग(ङ्ग्या)पि ध्रुवागानं गीयमानमुखपादमुत्पादयति। श्रोत्रपुटे चेयं वपुर्निजं वा ज(जा)गदतीति सो यमत्र लालित इव गुरुसङ्घसेवावैकल्यादनुसन्धिसवर्ज––स्तथापि न स्मर्यते सुकु(मा)रमतिरे(मे)ब हि प्रति प्राय इदं प्राय इदं प्रव(प्रा)वतत्। न पूर्वरङ्गो नामान्यः कश्चित्। अपि तु गीतकान्येवेति दर्शितं **प चमे**। **पादभागाः कालाश्चैवे**त्यादिना (भ.ना. ५.६)। तदेवं सामान्यशब्दत्वे पि द्वयोस्तत्रान्तःपातिपरीक्षकहृदयानुसारेण विशेषशब्दत्वं यत्तन्नायुक्तम्। यत्तु **भट्टतोतेन** तद्भेदसिद्धये **क्रियाभागे तु काल**स्ताल इति निरूपितम् तत् क्रियातो नन्यो वा कालो वा भावप्रबन्धः। एवं सा ताल इत्यादि पदान्तरमानयत् तत्तथा प्रकृतोपयोगीति **काव्यकौतुका** देव ज्ञेयमिति च नास्माभिस्तत्परिवर्तनप्रयासः कृतः। इयतैव सिद्धो गान्धर्व गानयोर्भेदः।

नन्वेवं स्वरतालादिरूपत्वे द्वयोरपि समाने किमिति विवेको ध्रुवागानोपयोगित्वेन दर्शितः। तत्र केचिदाहुः। सत्यं मधुरकण्ठत्वजितहस्ततालगुणोपादानमपि स्वरत्वादिदोषपरिवर्जनं च समानमुभयत्र। किं तु प्रत्यग्रवयस्त्वादिवद् गात्र(त)प्रभतेर्गुणत्वेनोच्यते। तद्गानोपयोगी नाट्यस्य सुन्दरवपुःप्राणत्वात्। न तु गान्धर्वे। तत् पुनरेतदुच्यमानं गेयहेतोवमर्शस्तस्माल्लब्धेति वचनं स्मारयति। गातरि प्रत्यग्रवयस्त्वं गायिकास्वरूपादियोग इत्येतावदेव ह्यतो धिकात् स्यात्। न च तावता पि भेदःकश्चित् प्रत्यग्रवयस्त्वेन स्वरसम्पादनोचितबलयोगो युपलक्ष्यते। यत्राकृतिस्तत्र गुणाः। प्रसिद्धा च रूपादियोगेन प्रकृतकलावैलक्षण्यस्यापि पादसिद्धता लक्ष्यते। नावं(वाचं) विसजेदित्यत्र **नक्षत्रदर्श(ने)नैव** कालविशेषः। गानगान्धर्वोभयविशेषभावप्रतिपादनायैव च पथगध्यायारम्भः। अन्यथैकता शेषतैव शक्यत इति।

कथं तर्हि **गुणात् प्रवर्तते गानमि**ति। प्रकृतोपयोगादेवमभिधानम् सामान्यशब्दत्वाद्वा। उक्तं चैतत्। **कलापाततत्त्वज्ञ** (भ.ना. ३३.२) इति। **चित्रादिवाद्यकुशल(लौ)** (भ.ना. ३३.८) इति च। गान्धर्व एवा जस्येन सङ्गच्छत इति सिद्धः पथगध्यायारम्भो पि।

गुणात् प्रवर्तत इति। प्रकृष्टतयोत्कृष्टतया वर्तन इत्यर्थः। दोषोपहतयोश्चित्तनिश्चयेनास्य विक्षिप्ति। नत्वेकाग्र करोति। न र जयतीति यावत्। अनेनैवेदमाह। यद्यपि गुणाभावो दोष एव तथापि भाविकपिम(प) लापस्थितादिदोषाणामभावे च गाता तावत् क्षिपति न तूत्कृष्टदोषयोगे तु तद्गानमेव न किंचित्। गर्दमाभाषितं हि तत्। गुणायोगे तूत्कृष्टस्तद्भवति विक्षोदीति **नाट्याचार्य**स्य गुणवत आदान (तुं) दोषवतश्च त्यक्तुमिति।।**१**।।

तत्र शारीरस्वरपूर्वि(र्व)कत्वाद्वै गुणानां वंश्यानां च क्रमेण गातणां विप ची वादको(क)वंशवादकानां च गुणास्तावदाह। **गाता प्रत्यग्रवया** इत्यादिना। स्निग्ध

इत्यपरुषस्वरः। उपचारान् **मधुर**शब्देन माधुर्यम्। (तेन युक्तः स्वर)स्त्रे(स्ते)नोपचितः **पूर्णः कण्ठ(ण्ठो)** स्येति नादो त्र कण्ठः। तेनानुद्वेजको विश्रान्तिदश्च यस्य स्वरः। **लयो** द्रुतादि(:)। (ता)लश्चच्चत्पुटादि(:)। कला आवापादिः। **पातालः(तः)** शम्यादिः। प्रमाणं चित्रादिमार्गः। **योगो** योजना समपाण्यादिः। एकत्वं विवक्षितमित्येके।।२।।

एवं तन्मध्य(ध्ये)सौ केवलं यत्र(त्रा)धारप्राया **माधुर्योपेते**ति। अत्र चेष्टानुल्बणता **माधुर्यं तेनोपेतं सत्वमि**ति बलम्। **पेशलो** विकारशून्य(:)। मधुरोल्बणवर्णविभाषि(षी)। **स्निग्धः**(:) नेत्रतल्लकम्। **अनुनादो(दी)**विच्छेदाभावयुक्तः। समः परस्परं कीर्ण(र्णो) मिलितः। **रक्तः** कोमलो भिरामः। **शुभो** गीयमानपदश्राव्वककर्ण(ण्ठः)। **(रू)पाणि** यासामिति तावत्।।३।।

शक्तिः **सुविहितः** शक्ता च व्यतिरिक्ता चेति न्यायेन ज्ञानापरपर्यायमन्तर्मार्यतया विदधत इति व्युत्पन्नत्वं गीतवाद्ययोर्लयः शेषाणाम्। तच्चातोद्यविषये करणस्य श्रोतमनो र्पणाद्भवतीत्यभ्यास उक्तः। **श्यामा** इति तरुण्यः। तद्वर्णा एव च क्लेशसहत्वात्।।४।।

गायिकानां बहुत्वे हेतुं दर्शयति। **प्रायेण त(तु)स्य(स्व)भावात् स्त्रीणां गानं नणां च** संविधिरिति। उपमागर्भमेतत्। **प्रायेणे**ति लयं व्याचष्टे।।५।।

यत्(त्र)स्त्रीणां पाठ्यमिति। **यत्र** बा(ब)लित्वे सति स्त्रीणां गुणपाठ्यात् गुणान् जनर जनमधुरकण्ठत्वे च सति नणां गानविषये मधुरत्वं सर्वेषामिति स्त्रीणां पुंसां **चालङ्कारः** कादाचित्कत्वान्नादरणीयः एवमत्र प्रलघुरलक्ष्यमाणाचारः।।६।।

गात्र(त)गुणैरिति प्रत्यग्रवया इत्यादिभिः। स्वराङ्गीतिगीतं चाभ्यामिति।।७।।

मेलति(नि)काकुशलेनाहेतुरवसानः। स्फुटमानमगहीतमूहापोहाभ्याम्। स्वयं न विकृतम्। तत एव च चित्रम्। करणपादिकया ययोरित्यागमानुसारे पि वैचित्र्ये(र)से यतनीयमित्युक्तं भवति। यदि वा वैणिकवैपञ्चिकयोस्तुल्यकालवादने परस्परमनुसारिणां वैलक्षण्यं चेत्यनेन दर्शितम्। गीतश्रवणाः फला इत्यभ्यासः प्रकृष्टवीणाविप चीययोश्चित्रादौ मार्गद्वये। यद्वा.... मुक्तं तत्र कुशलेन। **आदि**ग्रहणाद् वैपञ्चिको वैणिकश्च।।८।।

वंशवाद(क)। इत्युद्देशत्वाद् तस्य गुणानाह। **बलवानि**ति। जितप्राणम्(णः)। दढपाणिरिति। स्वरस्थानादचलाङ्गुलिः।।९।।

अत्र फलमाह। **अविचलितमि**ति।।१०।।

स्वस्थानाद् दोषाणां गात्रकुशलं **विज्ञानम्**। तदुपयोगिनो वागादेः करणवर्गस्य गुणवन्तः(त्ता) करणयुक्ताः(क्ता) करणतेत्यर्थः। **जितग्रन्थते**ति धारकत्वम्। वचनं वारयन् हि परस्मै ब्रूयात् स(न) विस्मर्ता। देशादिसम्पदाराधनं प्रयोगसिद्धिः। शिष्यबुद्धिमनुसत्यादेष्टुत्वं यद्वैचित्र्यं तच्छिष्यनिष्पादनम्। अथ्ज्ञ गीते स्वराणां प्राधान्यमिति दर्शयितुमेतावन्तो गुणा अवश्याह(द)रणीया इति।।११।।

तात्पर्येण **कण्ठस्य नादस्य** गुणानाह। **श्रावण** इत्यादि।।१२।।

एतत् क्रमेण लक्षयति। त्रिस्थानत्वं **केचिदा**क्षिप्य प्रतिसमदधाति। वायुर्नाभेरूर्ध्वमभिहत्योरसि वक्तः शिरस्यभिहतो मुखेन वक्तःसञ् छन्नमागच्छन्नयमुरस्यं नाडिकाक्षेपं तथापि तत्रैवायं शब्द इति प्रतिभास्यो यत्नवशादिति तथात्वमिति समाधिः। अस्माभिस्तु यदत्र वक्तव्यं तदुक्तमेव **काक्वध्यायादा** (भ.ना. १७) वित्यलम्।।**१३-१५**।।

अथ दोषं तद्देशलक्षणाभ्यामाह। **कपिल** इत्यादिना।।**१६**।।

कम्पनं कपिस्तं लाल्य(लयतीति).....ज्यतालं **ग(ध)र्धरायितः स्थानाच्च्युतिः श्लेष्म**णा पि स्थानस्यालाभस्ततो वैस्वर्यम्।।**१७**।।

अव्यवस्थानाव्यवस्थितो नादः।।**१८**।।

दन्तयन्त्रसन्दंशात् **सन्दष्टः**। काकोदुम्बरिकाम(मु)क्तं किन्तु स्व(र)तन्तुवीणाशब्देन च सादश्यं यस्यास्ति शब्दस्य स **काकी तुम्बकी** च।।**१९-२०**।।

समप्रहरणादिसव्यसाचिवद् द्वापवि प्रयोगसमौ स्वदेहिनस्तन्त्री विसारणयति।।**२१**।।

अध्यायार्थस्योपसंहारमन्यस्यासूत्रणं करोति। एते गुणाश्चेति। एतदर्थागानसिध्यर्थं **गान्धर्व**युक्तमिति समासं **केचिदा**हुः। **अन्ये** तु **गान्धर्व**मिति सामान्यशब्दो लोक इह चामुत्र चेति शिवम्।।**२२-२३**।।

इति माहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदवत्तावभिनवभारत्यां
गुणविवेकाध्यायस्त्रयस्त्रिंशः।।३३।।

श्रीः

नाट्यशास्त्रम्

चतुस्त्रिंशो ध्यायः

मार्जनानुगतमार्गसुन्दरं
पुष्करत्रितयमाश्रितं सदा।
चित्रदानपदक्लप्तविग्रहं
श्रीसदाशिवतनुं शिवं नुमः।।

वत्ते ध्याये वनद्धिविधिं ब्रूम इत्युक्तम्। तत्र पुनरर्ध(र्थ)स्फुटयितुमाह। तत**वाद्यविधानं तु यन् मये**ति। यत्तद्विधानं पूर्वमुक्तं **तस्यैव लक्षणं वक्ष्यामी**ति सङ्गतिः पुनरर्धः(र्थः)। न च पुनरुक्ततया तावदन्तर्धानं गतमिति प्राप्तमपि तस्य विधेयस्वरूपं भवति तच्च नोक्तमिति। अवहननं चर्मणा बन्धः। स यद्यपि वीणादावस्ति तथापि स्वों शो त्रारादुपकारी न सन्निपत्य

तन्त्रीपणवादौ ततांशवदिति। तव व्यपदेशो पि कृतः। तत एव बद्धपाणिकरटादीनि। यद्वादकेषु पक्षातोद्यकव्यवहारो लोके तैश्च संयुक्तं कृत्वापि। **तथेति** तस्माद्धेतोरुक्तम्। तस्मान् मदङ्गाणां(नां) त्रयाणां पुष्कराणां **पणवस्य दर्दरस्य** च लक्षणात्मकं विधानं चर्मादिकारणत्वं **वाद्यं च** फलं संक्षेपाद् **वक्ष्यामीति** पूर्वेण सम्बन्धः। एकश्चो यस्मादर्थे द्वितीयः समुच्चये। अन्यथा त्रय उदीयेरन्। **धर्मे चार्थे च कामे च मोक्षे चे**ति (महाभारतम् १.६२.२६) यथा। **नारद**ग्रहणं गातुः पुष्करवाद्यज्ञानमवश्यमुपयोगीति शिक्षयति। ब्रह्मग्रहणं कवेरपीति। अत्र पूर्वनिपातात् **स्वातिर्भाण्डे नियुक्तः** (१.५०) इति **प्रथमाध्याये** दर्शितत्वात् **स्वाति**रत्र प्रधानमिति पुराकल्पेन दर्शयति।।**१-३**।।

अनध्याये कदाचित्विति। तुरागमद्योतकः। **नारदादिभ्यो** विशेषो वा। **अनध्याये** इति प्रकृतानुपरोध उक्तः। **सलिलानयनं प्रतीति** तषाहत(ति)प्रतिषेधः।।**४**।।

प्रवत्तो वर्षितुम्। प्रवत्तवर्षो (मेदिन्यां) ततो **जलाशये** वा।।**५**।।

पुष्करिणी कमलखण्डः। तत्र **पत्राणां शब्दो भवदि**ति सम्बन्धः। स्थलकमलषण्डे हि न चित्राणि पत्राणि विततावितरूपाणि भवन्तीति **जलाशय**ग्रहणम्। अत एव वक्ष्यति। **ज्येष्ठमध्यकनिष्ठानामि**ति (भ.ना. ३४.८)।।**६**।।

अवधारितवानिति। ईदशः शब्द एव चित्तवत्तिं तोषयतीति स्वसंवेद(ने)न निश्चिता(का)येत्यर्थः।।**७-८**।।

ध्यात्वेति। अभिसन्धाय। मत् अङ्गं येषाम्। मच्चर्मेत्येके। मर्दनादिति। **पुष्करानि**ति। पारम्पर्येण पुष्करप्रभवत्वादिति भावः। **सहितो विश्वकर्मणे**ति। आकृतिारणे **त्वष्टु**रिव कुम्भकारादिमौरजिकोपदेशापेक्षस्य व्यापार इति सूचयति।।**६**।।

ननु च वाद्यं तेन **स्वातिना** रूढपूर्वं दष्टं प्रतिभाति। दष्टपूर्ववैचित्र्यमुल्लिखेदित्याशङ्क्याह। **देवानां दुन्दुभीर्दष्ट्वे**ति। मङ्गलार्थानि चर्मनद्धानि नाभूवन्। केवलं स्वाति(:)क्रमाक्षरादियोजनया तद्वाद्यं रसभावद्योतनोपयोगि सो(स्वो)पज्ञवैचित्र्यान्तरमुत्प्रेक्षाचक्र इत्यर्थः। मुर(रा)सुपधिषसाश्च (सूपधिष्ठिता च) श्लक्ष्म(क्ष्ण) सुकुमारायां मदि प्ररोहतीति मदपि मुरा। ततो जाता **मुरजा मदङ्गा** इत्यर्थः। **ङ्यापो**रिति (अष्टा. ६.३.६३) संज्ञायां ह्रस्वः। तानाह।

आलिङ्ग(ङ्ग्य)श्चोर्ध्वकश्चैव तथैवाङ्किक(क) एव च।

इति। एकश्चकारस्त्रिपुष्करत्वं नियमयति। **अन्यश्चकारः** पक्षातोद्यमनुगह्णाति।।**१०**।।

दर्दरं तथेति। चर्मनद्धम्। **तन्त्रीभि**रिति। **च**काराच् चर्मणा चेति।।**११**।।

(**काष्ठायसेति**)। काष्ठं सुषिरीकृत्य कृतानि। अत **एवायसं** तेन **कृतानि। आयसं** ताम्राद्युपलक्ष्यते। **झल्लरी** कांस्यतालम्। तन्त्रीव क्रान्तः(कान्ता) पूर्णा पटहिका। पटहः शुद्धः। **आदि**ग्रहणात् करटाहुडुक्कमर्दलादेर्ग्रहणम्।।**१२**।।

आतोद्यसमवाय इति। **आतोद्य**पूरणनिमित्तं(त्तानि) यानि योजनाङ्गानि तानि च चकारेति पूर्वेण सम्बन्धः। ननु त्रिपुष्करमेव वाद्यम्। तच्चालिङ्गकोर्ध्वकाङ्ग(ङ्क)केषु

पूर्णं दर्दरपणवस्य झल्लरीपटहार्देवा न योग इत्याशङ्क्याह। **अङ्गप्रत्यङ्गयोगेने**ति। स्वरूपपरिपूर्व(र्ण)त्वेनावश्यभाव्युपकरण**मङ्गम्**। अन्यत् **प्रत्यङ्गम्**।।**१३**।।

तत्त्ववनद्धस्यैव किमयं न तत्तादेरपीत्याह। **विप ची चैव चित्रा चे**ति। व्याख्याते प्राक्। **दारवीष्वि**ति। वीणासु ते **अङ्गम्। कच्छपी** कूर्मी सैरन्ध्रीति प्रसिद्धा। **घोषकः** पिष्टनका। तौ **प्रत्यङ्गौ।।१४।।**

मदङ्गा इति। पुष्करत्रयव्यतिरिक्ता एवात्र महन्(हा)मर्दलाकारास्ते। **पटह(हा)मदङ्गा(न्) दर्दरं तथेत्य**र्धोक्ताः (भ.ना. ३४.११)। ते मदङ्गदर्दरपणव(वा) मदङ्गादिषु त्रिपुष्करे **प्रत्यङ्गानि**।।**१५**।।

सुषिरे न्तरितान्यङ्गप्रत्यङ्गानीत्याह। **अङ्गलक्षणसंयुक्त** इति। पूर्णस्वरे वंशे ङ्गस्वरत्वादङ्गत्वेन लक्ष्यमाणो वंश एवासावित्ये**वकारः। शङ्खवत् तुण्डि(ण्ड)किनी** तर्तुकेति प्रसिद्धा तत् **प्रत्यङ्गम्।।१६**।।

नन्वेवं न किंचिदिहातोद्यं त्यक्तं भवति नाट्ये इत्याह। **नास्ति किंचिदनायोज्यमि**ति। क्वचित्तु किंचिदित्याह। **रसभावे तु**।।**१७**।।

क्वचित्तु सर्वमपि योज्यमित्याह। **उत्सवे** दैवकार्यादि(दौ)। एव एवंप्रकारे समुच्चयः। द्वितीय एवकारः प्रकारान्तरव्यावर्त्तयै। **यानं** दण्डयात्रादि। एतच्च नाट्ये लोके पि च।।**१८-१६**।।

स्वभावेन ग्र(ग)हवार्ता। उद्यानगमनादिरनाविष्टभावात्मा। **तत्राल्पं भाण्ड**वाद्यम्। भणतीति **भाण्डं** त्रिपुष्करम्। **उत्थानमि**त्युत्साहः। तत्प्रधानेषु **काव्यबन्धेषु** वीररौद्रादिविनियमेषु डिमादिषु **सर्व(र्वा)तोद्यानि**।।**२०**।।

नन्वेवं श्रङ्गारपरिक्रमादौ दीप्तत्वायोगिनि किं भाण्डवाद्येनेति शङ्कित्वाह। **अङ्गानामि**ति। शाखोपाङ्ग(च)रणादीनां **समत्वाय** परिक्रमणे। **छिद्रप्रच्छादन** इत्युत्तरध्रुवागाने। **विश्रामहेतो**रित्याक्षेपगानादौ। **शोभार्थमिति** प्रसादगाने।।**२१**।।

एवमुत्पत्तिस्वरूपप्रयोजनान्यभिधायावनद्धस्य वाद्यं लक्षयितुमुपक्रमते। **तत्रावनद्ध** इति। **स्वर(स)मुत्थितम्। स्वरं** शब्दमभिसन्धाय यो विधिः प्रवत्तः इत्थमयं शब्दो भवतीति **वक्ष्यामि**। स्वरषट्काद्यनुहाररूपवर्णना नुहाररूपं च शब्दमात्रमिह करणरूपादिषड्विधमार्गोचितत्वं ताभिश्चतुर्धा**जातिः** शुद्धादिकाष्टादशधा च लक्ष्यते। लेपमार्जनादेरत्रैवोपयोग इत्याशयेन तदिह नोक्तम्। **अन्ये** तु **स्वर**शब्देन स्वरानुहारं च। अक्षररूपं तु वर्णः। अनुहारकरणशून्याः संगृह्णते।।**२२**।।

ननु झल्लरीपटहादौ पूर्वं वर्णाद्यनुहार इत्याह। **यावन्ति चर्मनद्धानी**ति। आदौ त्रिपुष्करे वाद्यं प्रधानं येषां तदङ्गानि सन्ति तानि प्रयुज्यन्ते।।**२३**।।

अन्यथा तु **एतेषां तु पुनर्भेदा** इत्यफंख्यत्वादलक्षण इ(मि)त्याशयः नन्ववनद्ध एवानारम्भणीयः। नेत्याह। **किन्तु त्रिपुष्करस्येति**। वाद्ये अन्यपदार्थबहुव्रीहिः। अवयवेन विग्रहः। समुदायो वत्यर्थ इति **गुर्वाचार्या**दिः(दयः)।।**२४**।।

नन्विङानीमङ्गप्रत्यङ्गकृतो ज्ञेय इत्याह। **शेषाणामि**ति। **कर्मबाहुल्यमि**ति। वाद्यं तत्तद्बहुलं तेषु। अत्र हेतुः।

न स्वरा न प्रहाराश्च नाक्षराणि न मार्जनाः।

इति। षड्जादिस्वराभा(वा)त् त(त्सम्पत्तये)। मर्जना मायूर्याद्य(द्या)स्ते त्रायस्तास्तत्सम्पत्ति––फलाः। **अक्षराणां** षोडशानां मानं तदभावात् तत्सम्पत्तये। निगहीतादयस्त्रयः प्रहाराः।।**२५**।।

ननु स्वराभावे कथं शब्दवैचित्र्यमित्यत आह। **भेरीपटहज झभिरिति। तुरीये ध्याये** स्वरूपमुक्तमेषाम्। एतैर्यः क्रियते स्वरः शब्दस्तत्र केवलं **शैथिल्याद्** वध्रचर्मकीलिना.....त् धामभिर्यन् मदुत्व**मायतत्त्वात्तु न गाम्भीर्य**मुच्चत्वम्। **आवत्याकारः** श्लिष्टः। एतदुक्तं भवति। उच्चनीचतामात्रमेवात्र परं तु न तावता स्वरोदयः। स्वरान्तरश्रुत्याद(दावा) यत्तो हि संस्फुटो भवतीत्युक्तम्। मत्तकाकिलादयस्तु न तथा। भावरक्ति.....योगादेतच्च स्वरगते न्यक्षेण चर्चितमित्यास्ताम्।।**२६**।।

पुनर्न चैषां सर्वदा नोपयोग इति दर्शयति।

प्रायशस्तानि कार्याणि कालं कार्यं तमीक्ष्य तु।

किन्त्विति। प्रकृतं सूत्रयति। **त्रिपुष्करस्यास्य श्रूयतां यो विधिरि**ति।।**२७**।।

तत्र शब्दस्य तावत् स्वरूपमाह। **वाय्वात्मको भवेच्छब्दः स चापि द्विविध** इति। **वायु**रात्मस्वरूपं जन्मन्युपादानं व्यक्तौ वा निमित्तमात्रं यस्य शब्दस्य। एतच्च

वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते।

इत्यत्र ब्रह्मकाण्डोद्देशे विवेचितम्। इह त्वप्रकृतमिति न विस्तारितम्। स्वरात्मकं स्वरूपं यस्य नित्यमस्ति स **स्वरवात्** नादमात्रात्मकः। ननु पाण्डित्ययोगनियमपर्यवसायितवं वदता वर्णात्मके नादरूपता नास्तीत्युक्तम्। अभिधाने समयादिना र्थप्रतिपादनं विद्यते यस्य सो **भिधानवान्** वर्णात्मकः।।**२८**।।

तत्रेदमिह वक्तव्यं मत्वा पूर्वाभिधानोपयोगिनमाद्यमाह। **स्वरवानि**ति आतोद्ये वीणादौ स एव भवतीति।।**२९**।।

तदसम्यक्। (ना)नाश्रय आतोद्य एवेति **कश्चिदमंस्ते**त्याह। **शारीर्यामेवे**ति। तत्रैवोक्तः श्रुतिसम्बन्धः। **यतस्तेभ्य** इति। शारीरेभ्यां **विनिःसता** इति। तत्सामान्यादिति भावः। **आतोद्ये**ष्विति ततादिषु।।**३०**।।

तदपि गुणप्रधानतामाह। **पूर्वं शरीरादुद्भूता** उत्पन्ना अभिव्यक्ता वा ततो **गच्छन्ति दारवीम्**। वीणायां पूर्णत्वात् तत्प्रा(पा)णिकृताया रक्तेः। अनेन वैणवा अप्युपलक्षिताः। ततः **पुष्करजं चैवमनुयान्ती**ति। वीणास्वरेषु यादशी रक्तिः पूर्णतादशी पुष्करेषु केवलं साम्यानुहारमात्रम्। तदाह। **ध्वनिमनुयान्ती**ति।

नन्वेवमनुहरणं साम्यस्य(दारव्या)दावप्यस्ति। तत्कथमुक्तं **स्वरा** इति। तत्रैकमेवानुहरामात्रइ(मि)ति न स्वरानुहारत्वं तत्र स्फुटम्। इह तु मार्जनायोगात् तत्पठनेन

च सम्पादितत्रयान्तरसम्पत्तावप्येकस्त्रिष्विवान्यो भवन् नीचभावसंवेदाद् व्यक्तस्वरानुहारो मिश्रत्वान्। तदाह। **युता** इति। सु.....नत्वादित्यर्थः।।**३१**।।

एवं त्रिपुष्करे मार्जनास्वरयोगं सूचयतः प्रहाराक्षरयोगमपि सूचयिष्यन् तत्प्रकृतौ..... द्वीणायां दर्शयितुं सामान्योपक्रमं सूचयति। **तेषां वाक्करणैर्ज्ञेयाः प्रहार(रा)वचना(श्रया)** इति। **तेषा**मित्यातोद्यानां परामर्शः। **आतोद्ये**ष्विति प्रक्रान्तत्वात्। वाक्करणैस्तोमाक्षरैरुच्चरद्भिर्जायते। आतोद्यानां नाश्रयो(य)वर्णानुहारसम्पादका हस्ताङ्गुलिप्रहारा भवन्तीति। वाच एव क्रिया न त्वर्थ प्रतीत्यादि। किंचिदित्यत्र तद्वाक् वचनं वर्णा इह तु तदनुहत्रः। ननु कानि स्तोमाक्षराणि। कुत्रेत्याह झष्टुं झांझेति। न प्रकारे वि(हि) वीणावाद्यप्रयोगे विद्यते येषां हेतुनेति **वीणावाद्यप्रयोगिनः**।।**३२**।।

ननु वीणायां वागभवाद्यवदक्षरमिति का नामेत्याशङ्क्याह। **शारीर्यामथ। झण्टुं जगति यदि चे**ति। **आदिना** दिगिनिगिझण्टुप्रभतीनि। ननु तुल्येऽङ्गुलिप्रहारे कथमकारादिस्तन्त्र्यां विशेष इत्यतः शिक्षां ददाति।

भवेद्वाक्करणं तत्र नानाकरणसंयुतम्।

इति। नखाङ्गुल्यग्रमध्यादिना तीवतीव्रस्पर्शनं तत्र तस्यां तन्त्र्यादिभावेष्विति। **नाना**रूपक्रिया झण्टुमादिवाक्करणेन कार्यभूतेन संयुज्यते श्रुत्या।।**३**।।

अलं तदाह।

यं यं गाता स्वरं गच्छेत् तमातोद्यैः प्रयोजयेत्।

इति। **आतोद्यैः** वीणादिभिः। **यतिपाणयो** व्याख्याताः। **परमगुरवश्च** प्रकृतं व्याचक्षते।

गुरुलघ्वक्षरे गीयमाने अन्वितमाश्रितम्।
स्वन्तं स्वरं वादमानं वादयेदेव भासयेत्।
कथं यतिर्विरामः(स्यात्) तत्प्रधानेन पाणिना।।

इति **पाणि**प्रहारेण संयुक्तम्। **पाणिना** वंशेषु फूत्कारो लक्ष्यते। गुरौ गीयमाने गुरुणा विच्छेदो लघोः शीघ्रतयेति।।**३४**।।

ननु भवत्वेवं वीणादौ। प्रकृते पुष्करे कथमेदित्याह। **पौष्करस्य। तथै**वेति। नैव स्वराक्षरं वादनप्रकारेण हेतुना **पौष्करस्य** लक्षणं वक्ष्यामि तदनुषङ्गी लाभश्च। **दर्दरस्य मदङ्गपणवाश्रययं** कृत्वा। तेन मदङ्गपणवस्य चानुषङ्गिणो **विधानं** स्वराक्षरसम्पादकं प्रकारं **वक्ष्या**मीति सम्बन्धः।।**३५**।।

षोडशाक्षरसम्पन्नं चतुर्मार्गं तथैव च।

इति। अक्षरप्रकारेण मार्गच्छेद इति।

द्विलेपनं षट्करणं त्रियति त्रिलयं तथा।
त्रिगतं त्रिप्रकारं च त्रिसंयोगं त्रिपाणिकम्।
दशार्धपाणिप्रहतं त्रिप्रहारं त्रिमार्जनम्।
विंशत्यलङ्कारयुतं तथाष्टादशजातिकम्।।

इति। तत्र योजनमाह। एवं प्रकारैर्यस्मात् **पुष्करजं वाद्यं** परिपूर्ण तस्मान्नाट्ये रसभावाभिव्य जनसमर्थमित्यतो भणनयोग्यमिति सम्भाव्यते। तत्र पौष्करं वाद्यं प्रकारत्रयेण नाट्योपयोगिनि(गीति)। वर्णानुसारेण स्वरानुसारेण साम्यात्मना ताले च। तथा हि। वर्णाः कस्मैचिदपि वाद्यविशेषतया प्रभवन्तो प्यज्ञातार्थश्रुतिमात्रेणैव पुरुषं नागरग्राम्योपनागरिकात्मवत्तित्रयाणि ताल(लय)भेदेषु दीप्तमध्यमसणरूपसंविद्वत्तिव्य जका इति तावत् प्रसिद्धमेव। ततश्च प्रागलङ्का**राध्याये** (भ.ना.१६) निर्णीत**यस्माभिः सहृदयलोकलोचने** (ध्वन्यालोकलोचनम् ३.२) च। त एव त्वनुहाररूपतायां वर्णरूपत्वन्यक्कारेण नादरूपतया संछादितात्मानो भवन्तो नादस्य लालित्यपारुष्यादितारतम्यभेदे नितरां द्विरावत्तिमेवोद्दीपयन्ति। नादो हि चित्तवत्तेरन्तरङ्गः समयानपेक्षित एव। लोके पि चित्तवत्ति(त्ते)र्व्यनक्ति। संवित्प्राणितं तु वाक्तत्त्वस्य प्रथमं नादात्मना विवत्तस्य। वर्णात्मा चरमो विवर्तो बहिरङ्गः। यतः सा चेयं नादरूपतयैवं वक्ष्यमाणा पातहन्मना(ना)न्यपुष्करमुखोदितान्येव चोच्चार्यमाणेषु वर्णेषु प्रयत्नशतैरपि न सम्पद्यते। तत्र हि सर्वधा(था) वर्णप्राधानयमेवोन्मीलति। नादप्राधान्या.....उच्चार्यमाणं(र्णा) वर्णा वाद्यमानं तु वादिभूतवर्णमयं सन्ध्यायां शाबलेयादय इव गो भूताः। **अत एवोच्चार्य**माणं वाद्यमपि प्रसिद्धमपि तूद्धट्टयति। उद्धट्टनं सूत्रमुच्यते। सो यं वर्णान्तरानुहारभागौ रसभावप्रकृत्यादिभिः सूत्रतया विमलमत(तम)दष्टिना **मुनिना** ज्ञात्वा तथैवोपदिष्टः। तत्र वर्णस्वरूपं पुष्करहस्तयोगजन्म। तत्र च पुष्करगतः संस्कारौ लेपद्वये आलिङ्गके ऊर्ध्वके च। निगहीतं यत्ताडनसमनन्तरं पीडितम्। अनुरणनक्षणे **यत्तन्नि(दर्धनि)गहीतम्**। विश्रम्य(विश्रम्य)पीडितमेतदनुरणननसिद्धये। **मुक्तं** च पीडितत्सम्पूर्णानुरणनसम्पत्यै इत्येतत् प्रहार**त्रयम्। (प चपाणिप्रहतं)**समार्धतदर्धपार्श्व––प्रदेशिन्यात्मनि हस्तसन्निवेशात्मनि करणरूपे धातप चके इति कर्तव्यतां संपूरयद्धस्तस्य संस्कार इति लेपघातप्रकारप्रहारसर्णानुहारः। प्रत्युपयोगिनां वर्णानामेव **त्रिय(ग)तम्। संयोगः** मार्गे आलिप्तादिश्चतुर्विधः। गुरुलघुमिश्रतावर्णस्वरूपः। निगहीतादित्रयमिति संयोग त्रयवर्णस्वरूपतापत्यैव। **प्रचार**त्रयस्य मार्गचतुष्टय एवो**पयुज्यते**। हस्तसाम्येन वैषम्येणोभयथा चेति। यदा मार्गभेदास्तावत् सिद्धस्तज्जातयो ष्टादश शुद्धा दुष्करकरणेत्यादयः। यद्यपि चासां समस्तमेवैतदुद्देशगतं (लघुप्लुत)लयद्युताद्यधिगमनरूपमत एव हि सर्वं भीलनाज्जायत इति निर्वचनं चासामेव प्रयोगपर्यन्तम्। तथापि मार्गारब्धमासां शरीरमिति मार्गजास्ता उक्ताः। तेष्वेव वर्णेषु पणवदर्दरमदङ्गं वाद्ययोजनया वैचित्र्योत्पादककरणः(म्)। यद्रूपकृतिप्रकृतमित्यादि करणषट्कम्। अत एव प्रचारत्रयसहितमार्गाभिधानादनन्तरं पणवदर्दरलक्षणमकालकूष्माण्डपतनदेशीयमिति न शक्यते।

षोडशाक्षरसम्पन्नं चतुर्मार्गं द्विलेपं षट्करणं त्रिप्रचारं त्रिसंयोगं दशार्धपाणिप्रहतं त्रिप्रकारमष्टादशजातिकमिति। यस्तूद्देशभागे वर्णानुसंहारविषयो यस्तु स्वरानुहाराशस्तत्र

द्विलेपमिति। स्वरूपसिध्यै **त्रिमार्जन**मिति। स्वरसंयोजनांशे नादीभूतवर्णसम्पत्यनुभावि सदनुणरनरूपं तद्गानांशस्थितस्थायित्वं स्वरूपमनुवर्तमानं तत एव तत्कृतचित्तवत्त्युद्दीपन एव सुतरात्मानमाश्रयतीति यत्तत उपदिश्यमानस्वरानुहरांश इति **प्रकारत्रयम्**। घातप चकारदेरत्र यत्रोपयोग एव। गतयो लयास्तत्त्वादीनि **त्रिगतम्**। समपाण्यादित्रयमिति साम्यांशात्ताल उपयुज्यते। साम्यं यत्र यस्यान्योन्यमदङ्गद्यङ्गैर्झार्झार्यादिपत्यङ्गैस्ततादि—भिरातोद्यान्तरैर्ध्रुवागानेन परिक्रमणादिपात्रवेष्टितेनेति तद्विचित्रीकरणे **विंशतिलङ्कारा** इति। एवं पुष्करवाद्यमनुर जकत्वे पि विवाह.....शोभामावहतीति। तथा च **नन्दिमते**।

न पुष्करविहीनं हि वाद्यवत्तं विराजते।
तत्रैव हि श्रुते लोक उन्मुखत्वं प्रपद्यते।।

इति। विभक्तविषयत्वे पि मिश्रितत्वेन प्रयोगे तत्सम्पादनं न हि विभज्येति प्रतिपादयितुं **मुनिः शङ्करे(संक्षेपे)णो**ददिक्षत्।।**३६-४०**।।

एतदत्र वस्तुतत्त्वं शिष्टं ग्रन्थयोजनामात्रम्। तदाह **मुनिः। एतावत् सूत्रमि**ति। स(सा)मात्यौ.....नेत्याह **अतः पदभेव** इति। सूत्रे स्मिन् **यानि** पदानीत्यवान्तरवाक्यानि तानि व्याख्यायन्ते स्मिन्निति स ग्रन्थस्तथोक्तः। तत्र **पणवदर्दरमदङ्गे**ष्वरक्षरविभागं **पुष्करेषु** तावदाह।।**४१**।।

कटढतथरास्तु दक्षिणमुखे त्र धमहाश्च वामके नियताः।
गदकारौ चोर्ध्वाख्ये कढणद(खठडध)लाश्च स्युरालिङ्गे।।

दक्षिणस्य पुष्करस्य सव्यतो वामतश्चेति मुखद्वयम्। अतएव सयवाङ्को लक्षणमस्तीत्यङ्किकः। तस्य दक्षिणस्य **दक्षिणमुखे** षड्वर्णाः। वामे त्रयः। मध्यमे तु प्रधानत्वादङ्गिकालिङ्गाभ्यां सार्धं त्रयम्। तालाभ्यामाधिक्येन चतुस्तालत्वेन वक्ष्यमाणत्वाच्चोर्ध्वकशब्दवाच्ये द्वौ वर्णौ। आलिङ्गके पणवदर्दरवाद्येन मिश्रीक्रियते यस्य वाद्यमालिङ्ग्यकरणत्वबहुलत्वमेव तद्वाद्यम्। न तु तच्छन्यं कदाचित्। तत्रालिङ्गके प च। एवं **षोडश**।।**४२**।।

तेषां स्वरसंयोगमाह। **तत्रे**त्यादिना **हकारमा(म)**कारौ शुद्धावित्यन्तेन। ऋलऐऔअः इत्येतद्वर्जम्। अत्र स्वरविनियोग इति। लक्ष्ये हि हडदित्यादौ टकारो न मन्तव्यः। हकारश्च(स्य) शुद्धस्याप्यभिधानाल्लक्ष्ये तर्हि गहतदित्यादौ गन्तव्यमित्यादि शाङ्ग्य(वाद्य)म्। अग्रे च यद्वाद्ये कुतूहल इति कर्तव्यम्। न तु कूतूहलमिति। शिष्टं स्पष्टम्।।**४३**।।

अथ व्य जनसंयोगमाह। **ककारे**त्यादिना **एवमेतैः संयोगै**रित्यन्तेन। संयोगैरिति। **भावसाधनम्**। एतद्योजनोपलक्षितानि यान्यक्षराणि तानि हस्तद्वयसंयोगजानि। व्यापाराद्वत्तिभेदाद्बहुहस्तसंयोगजत्वमपि सम्भाव्यमपीति द्विग्रहणम्।।**४४**।।

अनुबन्धशब्दत्वेन मिश्रत्वेन वैचित्र्यमाह। एत एव हि (**द्वि)पुष्करे द्विमुखे ङ्गिक** इति। मुखद्वये **समं** कृत्वा **हस्तनिपातादिति सम**ग्रहणं क्रमनिषेधार्थम्। अत एवाव्यक्तपूर्णान्तरमेवेदं केवलमुद्धट्टने। तत्रैवेत्यङ्किके दक्षिणमुखे द्वयमित्युक्तम्।।**४५**।।

षोडशाक्षरमिति निर्णीय तदुपयोगि **दशार्धपाणिप्रहत**मिति निर्णेतुमाह। **प चपाणी**ति। **प च**सन्निवेशैः **पाणिभिः** प्रयोगसिद्धये **हतं हननं** येषां ते वर्णा **निगहीतादि**त्रयरूपाः कार्या इति। त्रिप्रकारस्येतिकर्तव्यतारूपतामाह। **यथायोग**मिति। व्याचष्टे **समपाणिप्रहतमि**(त इ)त्यादिना। **अर्धपाणिप्रहतार्धनिगहीत** इति तुल्यत्वे पि तुष्करभेदात् **स(ग)**कारादीनां भेदः।।**४६**।।

ननु तत्र यदि वर्णानुहारस्वरभवा एते न्य एव तथा सति संयोगजनां ध्वनीतां परमार्थतो न्यत्वमेव। तथा रूपादिकरणवमदङ्गध्वनेः पुष्करध्वनिमेलने वक्ष्यमाणे वस्तुतो न्य एव विचित्रो निनाद इति किमर्थो यं षौडक्षरनियप्रयास इत्याशङ्क्याह। **षोडशैतानी**ति। **तु**र्हेतौ। यस्मा**दनेन** षोडशाक्षरात्मना **विधानेन वाक्करणं** वाचां ताल्वोरुद्धट्टनं बुधैरनुहारसादश्यविवेककुशलैर्यो जयितुं शक्यते। तद्योजनया च.....लिना तट्टाच्याभ्याससम्पादनमशक्यत्वात् प्रयोगविच्छेदमित्यवश्यं योजनार्हम्। एतैरेव षोडशभिरुद्धट्टनिकारूपैः सर्वमेव वाक्करणं योजनार्हम्। अधिकान्यक्षराणि नापेक्षत इति। ततो हेतोरेतानि **वाद्या**ज्जातानि कल्पनया तत आ(अ)पोद्धारेण लब्धस्वरूपाणि **षोडशाक्षराणि दष्टानी**ति सम्बन्धः।।**४७**।।

अथैषां वर्णानां चतुर्धा समूहीभावं रसविशेष उपयोजयितुं प्रक्रमते चतुर्मार्गमिति। **यदुक्त**मिति। उद्देशसूत्रे मार्ग आकाङ्क्षा तया सम्बन्धनं समूहीभावात्मा लक्ष्यते। स चतुर्धा। **एको द्विक** इत्यङ्गिकमुखम्। तच्च प्रथमो(ममु)क्तम् कटरथकटस्थानं मदङ्गपूर्विकमङ्गम्। इह यत्र घटकारय(यु)क्तैरेतद्गतैः प्रहारर्युक्तो द्विको मार्गः।।**४८**।।

अङ्किता ध्रुवा श्रङ्गारविषया **ध्रुवाध्याये** (भ.ना. ३२) दर्शिता। तत्रोचिते कृत्वा ङ्ग(ङ्क)कस्य यद्वाममुखं यत्र **धहमाश्च** वामकमित्युक्तम्। यच्चोर्ध्वकं कटस्थानं **तत्प्रहारयुक्त आलिप्तमार्गः।** शोकातुरो हि शरीरपरिकर्मविरहान्(होन्)मुख आलिप्तः। तदुचितकरणोचितश्चायमिति। ऊर्ध्वके पदस्थाने ङ्किस्य दक्षिणमुखे करटशतद्वये उक्तिरसातिशयवेगताडनहस्ताभ्यां प्रहारं प्रकृष्टहननं यत्र स **वितस्तमार्ग**श्च। अस्य दक्षिणो स(वित)स्तस्येति नाशयति तस्य भावोचितस्तां हिंस्रतां तद्विषये दीनरौद्राभावस्य विनियोगो यतः। वितस्तिमात्राक्षिप्तहस्तप्रहरणसूचनार्थं **वितस्तमार्ग** इत्यन्ये पठन्ति। सर्वेषु पुष्करेषु यद्धनन बाहुल्येन चाङ्ग(ङ्क)क एव नोर्ध्वकस्थाने स गो**मुखीनः। गोमुखम**न्तर्वक्त्रं न तूर्ध्वम्। तत्र बीभत्सयोग इत्यक्षरसङ्गतिरपि **गोमुखी**त्युक्ता।।**४९**।।

तत्र मार्गचतुष्टये तान्यक्षराणि दर्शयति। तत्राङ्किताप्रहारजातमित्यादिना **गोमुखीमार्ग** इत्यन्तेन।।**५०**।।

अथात्रैव मार्गचतुष्टयेनेत्युक्तम्। विशेषमाह। **कुर्यादिति**। आङ्गिकदक्षिणमुखगतो रेफो वितस्त**मार्गः।** प्राप्ता उर्ध्वककटताश्च दकारस्तालभेदं निषिध्यते। नकाराकारस्यालिङ्गके प्यप्राप्तस्य हमयोश्चाङ्गिकल(स)ममुखगतयोरप्राप्तयोर्निषेधः। मध्ये स्य तद्वर्गप्रक्षेपाद्यज्ञाय तदाहरणम्। अवर्जितान् प्रहारांस्त्वङ्कितमार्गेणोपलक्ष्य(क्षि)ते

वितस्ते कुर्यात्। मत्वर्थीयो त्र चयोगे। ते शेषा इह वर्जिता वर्णास्ते **गोमुख्यां कार्या** इति। प्राप्तानामप्येषां पुनर्विधानं भूयस्त्वं ख्यापयति।।**५१**।।

आलिप्तमार्गे रेफस्य पूर्वलक्षणाप्राप्तिरित्यन्यानुबन्धत्वेन रेफावेशेनात्र भवतीत्युदाहरणव्याजेनाह। **द्रोमा**मित्यादिना। **गो**मुखीमार्गे सर्वेषां रवादीनामविशेषे प्राप्ते ड(ङ)कारो न्येन तुल्य इत्युदाहरणछद्मना दर्शयति प्रणव इत्यादिना।।**५२**।।

अङ्गितावर्जनमार्गत्रयमुक्त्वा विशेषान्तरमपि परस्परानुग्रहतो भवतीति दर्शयितुमाह। ये त्वालिप्तसमुत्थानमाकर्मभ्यो येषां ते। आलिप्तादयस्त्रय इति यावत्। तेन सर्वे त्रयो पि मार्गा इत्यर्थः। **विधातव्याः**।

ग्रहमोक्षक्षणसन्धानैस्तु मदङ्गानां ग्रहो भवति।

इति। अयमर्थः एकं मदङ्गं यदा वादयितुं प्राधान्येन स्वीक्रियते तदा मदङ्गान्तराद् द्रुतं कुर्यात्। तद्यथा। ऊर्ध्वकाङ्कालिङ्गका दक्षिणमुखाद्यतो(मुक्त)रिति। अथ तत्र मोक्षस्तदा(दिग्रहा)दिति सन्धानम्। तत्र व्यामिश्रित्वेन वर्णस्य जननं विचित्रमेव लिपौ दर्शयितुमशक्यमेव। एवं ग्रहमोक्षसन्धानानामेकभेदा(स्त्र)यो द्विभेदाः षट् त्रिभेदाश्च षडिति। यथा प चदशभिर्भेदैः पुनर्मार्गाद्यैर्वैचित्र्यम्। यथोक्तं **नन्दिमते**।

षोडशस्वपि वर्णेषु भेदाः प चदशोदिताः।

ताडने ग्रहसन्धानमोक्षैर्मुखचतुष्टये।।

इति। **अन्ये** तु चत्वारो मार्गा आलिप्तसमुत्था इत्यनेन स्वीकृताः। सूत्रे तदादित्वेनोक्तया नीत्या चक्षते।।**५३**।।

अथास्य मार्गचतुष्टयस्य लक्ष्यसमवायितमुदाहरणभेदमाह। **दर्शनानीति**। निर्दिश्यते लक्षणं पूर्वा.....तं येषु। पूर्वं हि रूपोदाहरणमात्रं दत्तमित्यपौनरुक्त्यम्। तदाह। **यथाक्रममिति**। यावल्लक्षणं तावदुदाहरणं दत्तमिति यावत्। प्रायशो त्राभिरेव **ग्रन्थकृता** लक्षणाद्यं दर्शितमिति भङ्गो(ङ्गो) यथा भवति तथा पाठे यतितव्य(म्)। .....इत्यादिना ग्रहणमोक्षेण दर्शितौ सन्धानत्वलक्षणमित्युक्तम्।।**५४-५८**।।

अथ मार्गशेषभूतमेव **त्रिप्रचारमि**ति व्याचष्टे। **त्रिविधः प्रचारमि**(र इ)ति। वामस्य हस्तस्य वामभागे दक्षिणस्य दक्षिणे प्रचरणं स **समप्रचारः**। वैपरीत्येन स्वस्तिकवर्तनादिना **विषम**प्रचारः। मिश्रतायां **समविषमः**। तेन च वर्णानामेव तीव्रादिरूपजननं न तथा वैचित्र्यान्तरमाधीयत इति मार्गशेषता।।**५६**।।

तत्र मार्गभेदेन योजनमाह। **वामोर्ध्वकयो**रिति। **आलिप्ते** मार्गे वाद्यक्रियायाः कर्तव्यतायां हस्तप्रभतिः। तस्याः कर्तव्यतायामयं विधिः। वामोर्ध्वकप्रहार इति। **आलिप्त** इति तावदुक्तम्। तत्र वामोर्ध्वकयोर्मध्यमाद्वामे ङ्किके वाममुखे सव्येन गते सति ऊर्ध्वकेनापि दक्षिण एव हस्तः **कार्य** इत्येकहस्तः **समप्रचार आलिप्ते।** तुरव्यर्थे।।**६०**।।

अथ यथाग्रहसन्धानमोक्षरचनं तथा विधिमाह। **वामोर्ध्वकसव्यानामि**ति। ग्रहावेशाद्वामोर्ध्वकसंयोगमवलम्ब्य हस्तप्रचारे व्याप्रियमाणे हस्ते हस्तं प्रवत्ते सति त्रयाणामपि पुष्कराणां प्रघाताय वामो हस्त इति द्वितीय एव हस्त समप्रचारः।।**६१**।।

शेषा ग्रहादिविहीना ये मार्गभेदकरणभेदा मार्गेषु क्रियाभेदास्तेषु करणांशसम्बन्धि हननं यथारुचि तेन तत्र हस्तद्वयप्रचारो पि। एवं सम्प्रचारस्त्रिविधः। **अङ्डितगोमुख**योस्तु **समविषमो** हस्तप्रचारः। तेषु तु विषम एवेत्यर्थाद् दर्शितं भवति। **करणेष्**विति बहुत्वं व्यापारभेदात्।।**६२**।।

अथैषां विनियोगमाह **शङ्गारे**ति**। शङ्गारे हास्ये प्यङ्डितः।** वाराद्भुतयो रौद्रे वितस्तः।।**६३**।।

करुणे चालिप्तः। बीभत्सभयानकयोगोर्मुखी।।**६४**।।

व्यभिचारादिविषये तु स्वयमूहः कर्तव्य इति दर्शयति। रसभावसत्वयोगमिति। **रसेषु भावा** व्याभिचारिणः **सत्व**मित्युत्तमादिः प्रकृतिः। अभिनयशब्दो त्र शाखाव्यापारः। तत्र गतो... ..... वाद्ययोगः। गतिप्रचारस्तु प्रवत्ते नाट्ये परभावादित्यनाट्य एव। तदाह। **यथायथ**मिति। **वत्त**शब्देनात्र नाट्यमिति।।**६५**।।

प्रचारत्रयमुपसंहरति। **एवमि**ति। अथ मार्गवैचित्र्योत्पादनाय करणषट्कं निरूपयिष्यन् तदुपयोगि दर्ददपणवं मन्यमानः पणवं तावदाद्यं लक्षयितुमुपक्रमते। **वक्ष्यामी**ति। सामान्यो(न्येनो)क्तम्। विशेषस्तूच्यत इति **भूयः** पातस्य। तच्च त्रिधा।।**६६**।।

पुष्करतः पूर्वमपि वाद्यम्। **यद्यनुवाद्यं** मदङ्गैर्हेतुभिर्यदनुगतं व्यपदेश्यतां नीतमित्यर्थः। **अन्ये** तु विपर्ययेणैतदाहुः। **अग्रत** इति पश्चादर्धे। तदन्तः सामान्यसमवायं पूर्वोक्ताक्षरेभ्य एव। **केचिद**नुबन्ध.....(**साम्येन**) तुल्यतेति दर्शयति।।**६७-६८**।।

कखगा टढणा इत्यार्यया।।**६९**।।

आर्यान्तरेण प्रयोगोपयोगि तेषा.....माह। **थोथोणा**। इत्यादिना।।**७०**।।

अस्य पणवस्य **कनिष्ठिका नामिका ग्रकोण**श्च कोणाग्रमिति सम्बन्धः। **अन्ये** त्वग्रे मध्यम इत्याहुः। **मध्यमाङ्गुल्ये**त्या (भ.ना. ३४.७३)दि वक्ष्यते। पूर्वं तु मध्यमानामिकामाहुः। **शिथिलता** मार्दवम्। तच्च न गाढीकरणम्। तच्च कक्ष्याश्च स्कन्दारोहिणो वध्राश्च बन्धनरज्जो.....काष्टिकावस्कन्धस्य वादकसम्बन्धिनः। शिथिलीकरणपीडनाभ्यां विचित्रवर्णनिवर्तितां क्रियां सम्पादयति। तदाह। **नानाकरणविभागै**रिति।।**७१**।।

वादकः कोणः। कोणश्चानामिका।।**७२-७३**।।

अथ तत्कोणानामिकभ्रान्तकयोगः। व्याचष्टे **भ्रान्तवादनाग्रेणेति।।७४-७५।।**

स्वस्तिक(ित)त्वं यदा पणवस्य.....

यस्माद् दक्षिणशब्दं स्वयं नत्यति शङ्करः।

तस्माद् यत्नादसौ योज्यो गीतकासारितादिषु।।**७६-८०**।।

सोच्छ्वास इति। मुक्तप्रहारे।।**८१**।।

स्कन्दकरकं(**टङ्कारेण स्वनजं**) पवनेन कम्पमान इत्यर्थः।।८२।।

तिर्यक् कृत्वा गहीतस्य वादनस्य मुखे अग्रे **वर्तितः(तः)** परिवर्तनेनोत्पादिताः(तः)।।८३।।

दर्दरवाद्यं वक्तुमाह। **वक्ष्यामी**ति। दश्(**द)विदारणे** (पा. धातुपाठः १४६४) इत्यस्य कर्तरि अचि(क्यचि)यङ्लुकि दर्दर इति पदम्। तथा च **पुराणे**।

तस्य ये मङ्गलान्याहुः श्रुत्वा दर्दरजं ध्वनिम्।

इति। **अन्ये** तु (द)दर्द इति शब्दं **राति** ददातीत्याहुः। मुरजपणवदर्दरस्य तु **मुनिः** स्वयमेव नामनिर्वचनं करिष्यति (भ.ना. ३८.२८६)। ततस्तत्रैव व्याख्यास्यामः।।८४।।

एवमिति संक्षेपात्। **निषण्णाः** पीडिताः।।८५-८८।।

शीघ्रकरणानुबन्धस्थितिरेव हि निःस्वनं खलितकं स्यात्।

इति। शीघ्रक्रियाया अनुबन्धेन चिरकालानुवर्तनेन स्थितिर्यस्य शब्दस्य तत् **खलितकं** शब्दसंचयरूपत्वात्। **खल स चये** (पा.धा. ५४५)। यतस्तत्खलितकमिति **लोके**।।८६।।

अष्टाव**सङ्करा**। दर्दरवाद्याक्षराणामेवं सङ्करः। तेन कृता **शुद्धिः**। अनामिश्रवाद्यम्। इह तु निरूपयति **दर्दरपणवमदङ्गानि** पुष्कराणि। **लक्षणग्रन्थे** विच्छेदः स्फुटो न प्रतीयत इत्यभिप्रायेण **कुर्या**(त्).....।।९०।।

तत्र मिश्रा एकरूपवर्णा गतयः प्रहाराः। अन्ये तु विविधाः। युगपत् क्रमेण वा। तदाह। **व्यक्तीभाव**मिति। तत्रै(व) नैकशः प्रयुक्ताः पर्याय**करणा** वर्णानुगता यौगपद्येन संयुक्ता मिश्रितत्वेनैकैकं कृत्वा सम्यक् प्रयुक्ताः। **पर्यायरणना** इत्यन्ये पठन्ति।।९१।।

तत्र मिश्रान् निरूपयितुमेतावत् प्रतिनियता अमिश्रा इति सार्थया र्यया दर्शयति। **एकैके**त्यादि। .....**आनद्धमदङ्ग** इत्येके।।९२।।

अन्ये न्तेन **दर्दरपणवयोः** खत्यादिसहितार्यार्धेन **पणवे** मिश्रा उक्ताः।।९३।।

मिश्रानाह। **आभ्यो ये न्ये** इति। षोडशाक्षरादिके मा शङ्का भूदिति **निःशेषपदमन्य**पदं च। सुशिक्षितवादकवशात्त्वेते पि भवन्ति मिश्रा इत्याह। **पूर्वे पी**ति। **यथायोग**मिति। अभ्यासबलात्।।९४।।

अथ **युगपत्करणानी**ति। अक्रमा उक्तः।।९५।।

पर्यायकरणानाह। **ध्रुर्यकृतास्तु क्रमश** इति। पूर्वधुर्यस्ततः परिवादकः करोति यः पणवयोरेव क्रमः।।९६।।

अनुबन्ध इति। परिवादकेन छिद्रेषु प्रयोज्यमित्यर्थः। अत परस्परं क्रममाह।

भूयः प्र(ति)कृतिभेदे(दो) मार्दङ्गिकदर्दरिभ्यां वा(च)।

इति। **प्रतिकृति**रनुकारः पश्चादनुकरणम्। स षोढा भिद्यते। यदा मुख्यमदङ्गं(ङ्गः) ततः पणवस्ततो **दर्दर** इत्येको भेदः। दर्दरः पणव इति द्वितीयः।।९७।।

एवं पणवे दर्दरे च मुख्ये प्रत्येकं द्वाविंशतिः **षट्**। तत्र गतिप्रचारे परिक्रमणादौ मुरजप्राधान्यं क्रमकरणयोग इति दर्शयति।

यद्यत् कुर्यान् मुरजे प्रहारजातं गतिप्रचारेषु।
अनुगतमक्षरवत्तं तदेव वाद्य तु पणवे पि।।

इति। **दर्दरे पि। अनुगतं** रसादिवशायातम्। **वत्तं** प्रकारः।।६८।।

अत्र(गतौ) द्वित्रियुगपत्करणं निषेधति। न हि चित्रं कर्तव्यं **गतिप्रचारेषु वादनमि**ति। अत्र हेतुः।

समविषमं तत्र हि यत् तल्लक्ष्यं पादस चारे।

इति। तत्र विचित्रे **यत् समं विषमं** च प्रकारजातं **तत् पादस चारे** लक्षणीयं योज्यम्।।६६।।

न च ताण्डवादि मुक्त्वा गतौ तद्योजनाङ्गमित्या(त्य)कृतशेषः। गतिप्रचारादन्यत्वे तु न शेष इत्याह। **उपरिकरण** इति। वाद्यप्राधान्य इत्यर्थः।।१००।।

अथ तदर्थं पणवदर्दररूपमुक्तं तत् करणषट्कं च वक्तुमुपक्रमते। **वक्ष्यामी**ति।।१०१-१०२।।

रूपं नाम विभक्तकरणमिति। मुरजे गुरुद्वयम्। अन्यत्र तत्समकालं लघुद्वयम्। गुरु चेत्यादिना विभक्ता यत्र क्रिया तद्रूपम्। **देघं** इति मुरजे। **किटिमा** इत्यन्यत्र।।१०३।।

कृतप्रतिकृतम्। यत्रैकं करणं त्रिपुष्करमप्युद्भावयति।

सर्ववाक्षरयुक्तमिति यावत्। एकस्मिन् कृते न्यदपि प्रतिकृतं संविभक्तं पुष्करं यत्रेति। **धुंखुंखुमणे** इति। **उपाध्यायास्**त्वाहुः। नैतावता पणवादिभिः सह किंचिदुक्तं स्यादिति। तदयमर्थः। **एकमि**ति। एकं पणवादिकरणमित्यर्थः। पश्चाद्भावि सपुष्करवाद्यमुद्भावयति अनुकरोति सति प्रतिकृतमिति। वीणावाद्यमित्यनुकृतं भवति। न हि सादश्यमात्रमेतत्। ततो र्थत्वादनुबद्धस्येति। उदाहरणमखण्डधा विभजनीयम्। लंखुंखुणै इति मुरजे प चधा। **क्रमिमोटं** इति पणवे इत्यादि।।१०४।।

मदङ्गानां युगपदेव **करणे** क्रियमाणे **यदुपरिकरणेन**। तद्यथा। लघुद्वये मुरजेन प्रयुयुक्षिते पादस्थे गुरुनियते तदा **प्रतिभेदः। धोधो** इति प्रयोज्यमानः। **कुहलमि**ति।।१०५।।

रूपशेषः करणानामिति। यथा(दा) मौरजिको विरामं करोति तदा तच्छिद्रे पाणविको वा वादयति। एतदन्यदपि क्रियमाण(णं)विच्छेदः। **खुखुणं** इति मुरजविरामे **णंणंणं** इति पणवे इत्यादि।।१०६।।

प्रतिशुष्को(ल्को) नुस्वार इति। बहुकं कालं **मार्दङ्गिकेन** प्रयोगे कृते ध्रुवावर्तितत्कालं पणवस्य दर्दरस्य वा प्रयोगः। **घटमधि** इत्यादि।।१०७।।

ओघे प्रयुक्ते पणववाद्यं **कुटकुटण केटखटखिट**। ओघो विलम्बितलये मुख्ये एको द्रुतलयः। एतच्च करणषट्कं (पिण्डी)प्रतिसरादिनत्तेषु दश्यते। हुलडुक्का पणवभेद एव।।१०८।।

उपसंहांर कुर्वन् करणस्य सामान्यलक्षणमप्याह। **करणानां समायोगः षड्विध** इति। **भिन्नानां वाद्यक्रियाणां** मिश्रि(श्र)ता येन क्रियते तत् करणमिति यावत्। रूपादीनां चान्यवयस्त्**ताध्याये** (भ.ना. २६) व्याख्यातः। एतत्करणानुसारेणैवो**द्धतिका** कार्या इत्याह। **अनेवैवे**ति।।**१०६**।।

एवं वर्णानुहारवैचित्र्यमुक्त्वा तालप्राधान्येनावनद्धप्रवत्तं तदुपयोगि यत्यादिकमाह। **त्रियती**ति। **यति**त्रयाणां **तालाध्याये** (भ.ना. ३१) उक्तं रूपमितीह परमां मेलनामाह। त्रिविधः संयोगः स च **त्रिप्रकार** इति। न च तावदत्र सम्भवन्ति भेदाः। इह तत् त्रय उपादेया इति भावः।।**११०-११२**।।

समा यतिर्द्रुतो लय उपरिपाणिरिति **राद्धः** सिद्धो नन्यापेक्षो द्रुतादेव समाप्तेः।।**११३**।।

स्रोतोगता मध्यः समपाणिरिति **विद्धः**।।**११४**।।

उभयरूपानुवेधाच्छेषवच्छय्यागतः शय्यां विश्रान्तिं प्राप्तो यतः।।**११५**।।

प्रयोगविधिमाह। **स्थिताल्लयात् प्रभती**ति। **एषामि**ति राद्धादीनाम्। **हानिरि**ति न्यूनप्रमाणात्।।**११६**।।

उपसंहरति। **यतय** इत्यादि। **संश्रया** नियामकाः।।**११७**।।

अथ स्वरानुहारभागं निर्णेतुमुपक्रमते। **त्रिमाजन**मिति। **स्वराश्रया** इति। स्वरानुहारभेदा इत्यर्थः।।**११८**।।

गान्धारो वामे आलिङ्गके। दक्षिण आङ्गिके **षड्जः**। ऊर्ध्वके **प चमः**। विश्रुतिमायूरीयम्। मध्यमग्रामे निषादधैवतर्षभानामेतत्पीडनादेव सम्पादितत्वात् स्थितिः। चतुर्थे त्ववशिष्टे मुखे मध्यम पूर्वस्वरत्वम्।।**११६**।।

वामे षड्जः दक्षिणे ऋषभः। ऊर्ध्वके धैवतश्चतुश्श्रुतिः। **अर्धमायूरी** षड्जग्रामे।।**१२०**।।

ऋषभो वामे षड्जो दक्षिणे ऊर्ध्वके तु **प चमः** स त्रिश्रुतिश्चतुश्श्रुतिर्वा।।**१२१**।।

अत इयं साधारणाश्रया लक्ष्यते। साधारणं तुल्यग्रामद्वयाश्रयणं यस्या इति। स्वरत्रयन्यासे पि प्राधान्यस्वरान्तरं भवेदित्याशङ्क्याह।

एतेषामनुवादी तु जातीनां यः स्वरो मतः।
आलिङ्गमार्ग(र्ज)नां प्राप्तो निषादः व विधीयते।

इति। मत्तिकायाः समं **मार्जनाम्**। तत्कृतः स्वरयोगो पि तथा। तन्त्रीशिथिलीकरणायमनात्मकसाधारणाप्रभवो हि स्वरयोगः। साधारणायोगेत(न) एतेषां स्वराणां मध्ये यः स्वरो जातिध्रुवां गानजात्यङ्गरागादीनां यो वादी अंशस्वरः स(अनुवादि)नेति शेषः। आलिङ्गसम्मार्जनादुत्थितमार्जनं(न)शब्दवाच्यं गान्धारम्। अन्यत् सादश्यलक्षणेन यं प्राप्नोति **निषाद**स्वरो त्र स विधीयते निषादांशत्वे प्राधान्येनाश्रीयते। एष षड्जस्य तु.....मन्तव्यः। अनुवादीह संवादीति। **अन्ये** तु भिन्नं व्याचक्षिरे।।**१२२**।।

श्रुतिनियमाद्विभागमाह। **मायूरी**त्यादि।।**१२३**।।

जात्यंशकगतस्थायिस्वरप्राधान्यकृतं प्रधानमभिधाय स्थानस्वरकृतमपि भवति प्राधान्यमपि(मिति) दर्शयति।

स्वराः स्थानस्थिता ये तु श्रुतिसाधारणाश्रयाः।
त एव मार्जनकृताः शेषाः स चारिणो मताः।।

इति। इह **स्थितः** लयः। स्वर **इत्यन्ये**। स्थानस्वरो न्यश्चांशस्वरस्तथा च लब्धो व्यवहारो **देवताप्राप्तिककुभषड्जो गीयते**। इत्यादि। तेन यत्स्थानत्वेन त्वाश्रयणं ग्रहणं येषामित्यर्थः।।**१२४**।।

अथ मार्जनासु स्वरत्वमाह। **वामके चोर्ध्वके चे**ति। **लेपत** आहरणीयः **स्वराः** कर्तव्याः। अन्यत्तु चर्मण एव**ायतत्वशैथिल्य**कृताभ्यां चाह। हननं पातनं वध्राणां वा वध्रकानाशैथिल्यगाढत्वाभ्यामपि द्वित्रि(शस्त्रि)शश्चेति। समुच्चयमाह चग्रहणेन।।**१२५-१२६**।।

पि(पै)च्छिल्यम्। लेपार्थं मत्तिकां लक्षयति। **निश्शर्करे**त्यादिना।।**१२७-१३०**।।

कम्रभावे विधिमाह। **यवगोधूमचूर्णे**ति। मिश्रीकृतमित्याहुः।।**१३१**।।

अथ त्रिसंयोग व्याचष्टे। **गुरुस चय** इत्यादि स्पष्टम्।।**१३२-१३५**।।

त्रिगतमाह। तत्त्वमित्यादिना। अनेन सह यद्गमनं मिश्रता तद्गतस्त्वं त्रिविधम्। अत एव स्वातन्त्र्येण ताण्डवादौ वाद्यप्रयोगे गानाभावे नाट्ये पि छिद्रछादनोधम्। अनुगत गाने शय्यागतसिद्धराद्धभेदाद्गाने सह मेलनेन कृतं तत्त्वादन्यमि(दि)त्यपौनरुक्त्यम्। तत्र तत्त्वमाह।

अक्षरसदशं वाद्य स्फुटपदवर्ण तथैव वत्तसमम्।
सुविभक्तकरणयुक्त तत्त्वे वाद्यं विधातव्यम्।।

इति। इह विचित्रे यथाक्षरसादश्यमपि नास्ति। यदा दुकटरधादिभिरक्षरैः सादश्यं तदा तत्त्वम्। यथावाद्यमताद्रूप्यस्य सम्भवात् सादश्यमुक्तं न ताद्रूप्ये नुगतम्। यथा।

अभिहतदर गरहरणकरण
हरललाटोत्थिततणिभारणि(मारण)काम
क्रमगीतिशि(तीश)शीर्षरणिततम(मो)हते
कुरु त(तं) कुरु त(तं) मम करणगणा(णम्)।
गिरिगुरुतन्द्रहा द्ध(ध)रोद्धरण–
मि(म)हाति(वि)मलकि(शी)लन्ततुझा(तन्तुधा)रधा–
धमधामहा हाघटितोदित–
कातरकीटककोटिराकर्षक
कदु(कुरु)तडो (ण्डो) रतमकाण्डे।।

इत्युच्चार्यमाणा(णे) या र्थप्रतीतिः सा च तत्त्वादिः स्यात्।।**१३६**।।

पदे गीयमाने यो वर्णः स्थाय्यादि(:) स स्वरानुहारेण यत् तत् स्फुटं वत्तसमयमित्यष्टौ साम्यानि लक्ष्यन्ते। एतच्च सुविभक्तं कृत्वा प्रहारक्रिया भवतीति गानेन सह तादूप्यम्। तत्त्वसमपाण्यवपाणियुतस्फुटप्रहारस्तु करु(र)णानुगं चैव गेयस्य वाद्यस्य वा उभयभेदघाताय त.....तत्त्वे गीतं सर्वथा प्रधानम्। इह तु वाद्यमपि तेन समैः पाणिप्रहारैरवपाणिभिः स्ववर्तनादिवैचित्र्यप्रवत्तैर्यत्तदनुगतमेवाह। त्रिप्रहारक्रियास्फुटनकृत.....पाटनमनुगच्छति ।।**१३७**।।

ननु तत्सर्वात्मना वस्कन्दतीत्युभयं सा(स्या)दनुगतत्वं यस्याप्यधातकं यतः।

नैककरणाश्रयगतं ह्युपर्युपरिपाणिकं द्रुतलयं च।
आविद्धकरण बहुलंयोज्यं वाद्यं बुधैरोधे।।

इति। **नैक**शब्दः प्रातिपदिकान्तरं विविधार्थे। **करणं** क्रियाघातः। **(उ)पर्युपरिपाणेरिति** प्रहाराणां न विभक्तत्वम्। अत एवाक्षरसादश्यमप्यर्थं(र्थ) दुर्लक्ष्यम्। आविद्धा निरुद्धा हि पणवदर्दरकरटादिक्रिया हि। **बहुल**मिति द्रुतलयमित्येतौ पौनरुक्त्यम्।।**१३८**।।

तानि साम्यानि तत्त्वे सूचितान्याह। **सर्वस्यापी**ति। पणवादेरपि।

अक्षरसममङ्गसमं तालल्ययतिसमं ग्रहसमं च।
न्यासो(सा)पन्यासससमं पाणिसमं चेति (विज्ञेयम्)।। इति।।**१३९**।।

(**अक्षरसमं**) पदगतं तावद्गाने **गुरुलघुनी** वाद्ये समम्।।**१४०**।।

(**अङ्गसमं**) ताले सामाङ्गानि तु चत्वारि सामानि। तत्राङ्गं ध्रुवाणां स्थितप्रवत्तादौ। तेन बन्धस्फुटादिसमुदायसाम्यमङ्गसाम्यम्।।**१४१**।।

तद्भाभूताभिः प्लुतलघुगुरुकलादेः साम्यम्।।**१४२**।।

लययतिसाम्ये व्याख्याते।।**१४३-१४४**।।

स्वरगतं द्विधा। ग्रहेण न्यासापन्यासयोरितरेतरवत्तेन। तद्दर्शयितुमेतत् साम्यमुक्तम्। यत्रादौ श्रुतिस्तत्साम्यं ग्रहणम्। विपरीतं वा साम्यं वा।।**१४५-१४६**।।

तत्र गीतायत्तं यद्वाद्यं तत् **पाणिसमम्**। इत्येत.....लाङ्गसाम्यमाहुः।।**१४७**।।

अथोक्तं पूर्वोक्ते समस्तं यज्जायते। जायमानत्वाद्रसभावप्रकृत्यादिविशेषप्रतिपत्तेर्जनन––हेतुत्वाज्जतिवाच्यं प्रयोगं वक्तुमुपक्रमते। **अष्टादशजातक**मिति।

शुद्धा दु(पु)ष्करकरणा विषमा विष्कम्भितैकरूपा च।
पार्ष्णिसमा पर्यस्ता समविषमकृता वकीर्णा च।
पर्यवसानोच्चितिका संयुक्ता संप्लुतिका महारम्भा।
विगतक्रमा विगलिता वाचितिका चैकवाद्या च।। इति।।**१४८-१४९**।।

क्वचिल्लक्षणमेव। क्वचिदुदाहरणमेव। अन्यदूह्यम्। एकस्याक्षरस्य कृता आवत्तिर्यत्र। **सार्वमार्गिक**मिति। रसभावौचित्यात्।।**१५०**।।

मध्यमस्त्रीणां शुद्धेत्युक्तत्वाद्विपरीतलक्षणा युक्ता।।**१५१**।।

दु(पु)ष्करणेति। दु(पु)ष्करं चित्रं स्वस्तिकादि करणं यस्याः। साधनं.....तस्यामित्याहुः। अस्या उदाहरणमूह्यम्। **घटविप्युघटगणणधुंधुं** इत्यादि एवमन्यत्र।।**१५२**।।

दीर्घाक्षररूपात् **स्वभाव**रूपे **गमने राज्ञाम्। विषमे**त्युक्त्वात्।।**१५३**।।

गुरुलघुपातौ (**तोटकमिति**) लघुयुगैकगुरुरूपा राज्ञां त्वरितगतौ **विष्कम्भिता। त्वया मयि ते सत्त्वेन** विष्कम्भो माधुर्यमस्यामिति (**विष्कम्भिता**)।।**१५४**।।

(**वामे**त्यादि)। **ओधे** इत्यादि। करुणेए(णै)करूपा। एकाक्षरसूचनादिति।।**१५५**।।

(दि(धि)**त्थमि**त्यादि)। षौर्ष्या(पार्ष्ण्या)धातकृता **पार्ष्णिसमा**। करुणेतरविषयसोपग्रहणोप––स्थाने (प्रयोगः)।।**१५६**।।

(**ताघेमि**त्यादि।) गुर्वक्षरत्वे पि यत्र स्वरस्य नानाकारो नेकगत्यादेर्नैकरूपत्वं सा **मध्यमपुरुषेषु पर्यस्ता**।।**१५७**।।

(**कृत्वे**ति)। गुरुत्वेन परितः क्षेपो यस्या स्थायिनि ह्लादत्वात् तदेव द्रुतलयो**परिपाणितया समविषमा**।।**१५८**।।

(**अवकीर्णमि**ति) अधमानां (समविषमगतिप्रचारेषु) तेषामेव सम्भ्रमावकीर्णे यत्र तदेव द्विगुणं द्विगुणीक्रियते। **त्थोत्थोमटमट धिधिमटमटधिधी**त्यादि।।**१५९**।।

(**पर्या(र्यव)गच्छतीति।**) **प्रस्तुतं करणजातं** युक्तं यस्याः पर्यवसाने क्रियते सा पर्यवसाना। तेषामेव त्रिषड्विधलयेष्विति। नत्तादियोगलय इत्यर्थः।।**१६०**।।

(**द्रोह्णा(घेण्टांदोह्ण)**मित्यादि।) उल्लसिता पि निश्चैतन्यमस्यामिति। उदस्यते चितिका उच्चितिका।।**१६१**।।

(**थकेटाके** इत्यादि।) **काचेटानां गतौ संयुक्ता**। एकाङ्गिकमुख एव।।**१६२**।।

(**सर्वाङ्गुली**ति)।।**१६३-१६४**।।

(**ऊर्ध्वाङ्**केति।) **दिव्यानामि**ति। **सार्धयार्यया** सम्बन्धः। **वितस्ता**.....खेति। वाद्यग्रहणं दर्शयति। **अङ्कोर्ध्वक** इति। **प्रवत्ते**ति। उदाहरणादिशं दर्शयति **धुंधुं** इति।।**१६५-१६६**।।

(**लघ्वक्षरे**ति।) चित्रलघ्वक्षरवाद्ये अंविसर्पि अपुनारूपेण **करणं** क्रिया यस्याः। अपुनरुक्तवाद्येत्यर्थः। **सा विगलिता** नाम। विटादिपरिक्रमे विशेषेण गलितमनावत्या ग्रस्तमिवाक्षराणां यत्रेति।।**१६७**।।

(**करणे**रिति)। चित्र**प्रहाराः सर्वमदङ्गा**नाम्। राज्ञो न्येषामु**त्तमानां गतौ सा वचितिका। वच(च)गताव**िति (पा. धातुपाठः १८६)।।**१६८**।।

(**ध्रोध्रो** इति) एकमेवाक्षरं संयुक्तं पुनरन्येन संयुक्तं पुनरन्येनेति वैचित्र्येण येन वाद्यते नत्ते (सा) एकवाद्या।।**१६९**।।

एतदुपसंहरति। एवमेतेनेति। अस्य जात्यष्टादशकरूपस्य प्रयोगस्येतिकर्तव्यता नाट्यनत्तापेक्षया भिधान(या)स्य प्रथमं तावदुभयरूपतामाह। गतिप्रचारे **गीते चे**ति। उत्तरार्धात् त्रिधा स्य मा(गा)नोपेक्षया समुच्चये। तेन लययोजना। दशरूपे च गीते ध्रुवागीतविषये।।**१७०**।।

गीतकसप्तकस्य विधाने प्रयोगे च **छन्दकासारित**प्रयोगे च वादनं कर्तव्यम्। विशेषतो **गतिप्रचार** इति। पुनरेवार्धश्लोकमावत्य गीतकादौ तत्त्वादित्रयरूपं स्वातन्त्र्येण वाद्यमिष्यत इति सम्बन्धनीयम्। तत्र हि वाद्यस्यापि प्राधान्यं प्रयोज्यत्वेन भवति। यथोक्तं **तुर्याध्याये। गत्या वाद्यानुसारिण्ये**ति (भ.ना. ४.२७४)। नाट्ये गत्यपेक्षया नियतं वाय(द्य)म्।।**१७१**।।

तदाह। **वाद्यं गुर्वक्षरकृत**मिति। **अत एवाल्पवाद्याक्षरम्।।१७२।।**

तत्त्वादीनां चान्यतमं कदाचिद्भवति।।**१७३**।।

तत्रापि यदा नत्तांशे वा प्रावेशिक्यादौ वा क्रमत्वरायोगे वा त्रयाणामपि तत्त्वादीनां प्रयोगस्तदा क्रममाह। तत्त्वं **तु प्रथमे गान** इति।।**१७४**।।

गतौ **ध्रुवासु** गाने गीतिक्रियायां तद्राजविषयं राज्ञामित्यनुवत्तौ (भ.ना. ३४.१७३)। **शेषाणाम**धः(थ) प्रकृतीनाम्। **छन्दत** इति। इच्छातः। **विचित्रं** तत्त्वादि। (**स्थितावकृष्टाया**)मनुगतात्मा।।**१७५**।।

प्रावेशिक्यां तत्वौघम्। अन्ये तु **तथा** शब्दादोघ इत्याहुः। नैष्क्रामिक्यामध्रुवायां च किल।।**१७६**।।

द्रुतासु प्रासादिकीषु द्रुतलयेनो(नौ)**घेन**। (**प्रकरणे**ति) प्रकरीमुद्धतमसणादिसंयुक्तं विचार्येत्यर्थः।।**१७७**।।

प्राधान्येन ध्रुवासु तत्त्वम्। तत्रा पि तत्त्वाष्टकमध्ये लयसममक्षरसमं च प्रधानमिति दर्शयति। **मात्रांशकविकल्पस्त्वि**ति।।**१७८**।।

एतत्त्वन्यविषयप्राधान्येनोक्तत्वान् नत्तप्राधान्यमाह। **ताण्डवे सुकुमारे चे**ति।।**१७६**।।

अभाण्डमेकमित्यादि।.....तदन्यत्र प्रयोगक्रमसम्पत्तये तूदितम्। तथा चेति यदि चेत्यर्थः।।**१८०**।।

अङ्गादीनामपि सम्पिष्टकादीनाम्। अनेनैकदुक्तम्। क्वचिदुपवर्तनादौ शास्त्रोक्तमेव परिवर्तनम्। क्वचिदनुक्तमपि नत्तशोभार्थं क्रियत इति। अत एव सकलस्यापि गीतस्य वस्तुप्रायस्य त्वविलम्बितादेर्गीतशोभार्थं पुनरावत्तिर्भवतीति। **सङ्गीतस्ये**ति। साकल्ये व्ययीभावः।।**१८१**।।

एवं स्थिते प्रकृते किमित्याह।

यत्राधीने त्वभिनयं(त्राभिनेयमङ्गे तु) तत्र वाद्यं प्रयोजयेत्।

इति।।**१८२**।।

ननु नास्ति न(य)त्र वाद्यमिति सम्भवमात्रं तत्र वाद्यम्। न तु प्रधानमित्युक्तम्। तस्य विधिमाह। **यद्वत्तं तु पदं गाने तादशं वाद्यमि**ति। अतश्चेदं सम्पाद्यत इत्याशङ्क्याह।

गीतवाद्यप्रमाणेन कुर्यात् स्वाङ्गविचेष्टितम्।

इति।।**१८३**।।

गुर्वक्षरैरेव वाद्यम्। इदं हि गीतकयोगेनावत्तं भवति। **मुखोपवहन**म्। यन्मुखं तन्। यदा **प्रकृते**ति यदा भाममपेक्ष्य वर्ण्यत इति।।**१८४**।।

वर्णाङ्गात्मकगीतिभागमपेक्ष्य स्थितं विलम्बितलयं भवति। तदा शुद्धजातिगतैः प्रहारैर्वाद्यम्। यदा मध्यलयस्तदाक्षरसमम्। यदा द्रुतलयस्तदो**परिपाणिकं कार्य**मिति सम्बन्धः।।**१८५**।।

सङ्क्षिप्याह। **सममि**त्यादि। एत**त्तुरीये** (भ.ना. ४.२६७) व्याख्यातम्।।**१८६**।।

अङ्गलक्षणमाह। **सनत्ते**ष्विति। नत्तप्राधान्ये **तत्त्वमनुगतं** च। तदभावे तत्तत्स्वरूपोन्भीलकमन्तम**ोधः**।।**१८७**।।

यदीह तत् प्रधानं तत्र तदनुसारि वाद्यमित्याह।

स्थिते मध्ये द्रुते चापि यथा गानं तु गीयते।
तथा नत्ताङ्गाहारेषु तेन चैव क्रमेण तु।।

अथ द्युवापुष्कराध्यायद्वयं(ये) (भ.ना. ३२.३४) नाट्योद्देशेन यदुक्तं तन्नत्ते प्यतिदिशति। **यो विधिर्गानवाद्यानामि**ति।।**१८६**।।

जायत(तय) एव प्रयोगसमवायिन्यः प्रधानाः। तासामेवेवं प्रयोगेतिकर्तव्यता कथितेत्याशयेन ता एवोपसंहरति। **एतास्तु जातय** इति। तुरप्यर्थे। न केवलं स्वरजातयो ष्टादश यावद्वाद्यजातय इत्यपि। अथ विंशत्यलङ्कारयुतमिति निर्णेतुमाह। **अत ऊर्ध्वमि**ति। प्रकृष्टता क्रियन्ते ये तेषु(क्रियते येषु ते) प्रकारा ऊत्कर्षहेतवो लङ्कारा इत्यर्थः। काव्यगानविषयताशङ्कां शमयति। **वाद्यसंश्रया**निति। वाद्यं तावत् जात्यात्मकम्। तस्यैवोत्कर्षहतव इत्यर्थः। आतोद्यान्तरमेलातिकृतो ह्यत्रोत्कर्षः।।**१६०**।।

तानुद्दिशति। **चित्रः समो विभक्तश्छिन्नश्छिन्नविद्धो विद्धो वाद्यसंश्रयो नुसतः प्रतिविद्युतो दुर्गो वकीर्णो र्धावकीर्णः परिक्षिप्त एकरूपो नियमान्वितः साचीकृतः समलेखश्चित्रलेखः सर्वसमवायकृतो दढ** इति।।**१६१**।।

सप्तम(मो)लङ्कार इत्यर्थः।।**१६२-१६३**।।

(**नात्यायत** इति) **यत्राक्षरपाण्यादौ** स्फुटो विभागः स **विभक्तः**। इत्थं कार्यस्वातन्त्र(न्त्र्य)मुक्तं भागाकारः। एवं सर्वत्र।।**१६४**।।

वाद्यमिति। अन्यस्मिन्नपि वीणादौ वाद्यमाने पि मुरजवाद्यस्य मध्ये तूष्णींभावः। तदाह। **भिन्नेष्वि**ति। अविरमस्वित्यर्थः। **स छिन्नः**।।**१६५**।।

.....(ट)पवर्णमुक्तेषु **मदङ्गेषु पणव उपरिपाणि**र्यत्रालङ्कारे स प्रथमं मदङ्गछेदश्चि(श्छि)न्नविद्धः।।**१६६**।।

(**शुद्धेति**) आदौ शुद्धं तत आतोद्यान्तरेणानुविद्धं यत्र वाद्यम्। अनुविद्धं व्याचष्टे। **परस्परानुवेधेनेति। सो नुविद्धः**।।**१६७**।।

मदङ्गेति (**मदङ्ग**क्रियायां प्रयुक्तायां **पणवा** यदा वादयन्ति वाद्यं कुर्वन्ति। ..... **विचित्रैः सूचीविद्धैरि**ति। सूक्ष्मसूक्ष्मैरक्षरैर्मध्ये विभागो बहिः करणैः क्रियाभिस्तन्मध्ये यो सौ **विद्धः**।।**१६८**।।

(**विशुद्धे**ति) गीतमनुसरद्**वाद्यसंश्रयः**। वाद्यस्य गीतसंश्रयणमस्मिन्निति। स्वभावोक्तिश्चालङ्कारः।।**१६६**।।

(**मुरज**(मि)ति)। मुरज(जं)पणवा(वो) यदा दर्दरवाद्यस्य पक्षे दर्दर(रं)पणवा(वो) मुरजस्य सदशप्रयोग एत**दनुसतः**।।**२००**।।

(**अनुगम्ये**ति)। अष्टविधसाम्यसंयुक्ते वाद्ये कर्तव्ये (तदनू)त्तरोत्तरानुसतः। येन वाद्यं कर्त। अनुगम्य यदा तु स्ववाद्यम्। **श्रान्तवदि**ति। विलम्बितलयेन प्राप्नुयात्। तद्यथा। मुरज(:)पणवस्ततो दर्दरः। ततस्तदेव तदा प्रतिद्योतनम्। विद्योतनात् **प्रतिविद्युतः। इगुपधके** (अष्टा. ३.१.१३५)।।**२०१**।।

(**वाद्य** इति।) **विषमप्रचार**योगात् **सर्वमार्ग**व्यामिश्रणाच्च **दुर्गः। अविभक्त**त्वादक्षरपं(क्षरपदो)वर्णविच्छेदः। दुःखं नात्र (खेनात्र) गम्यत इति यत् (दुर्गः)।।**२०२**।।

(**समवत्ताव**िति)। **समवत्तौ तु** तुल्यकालप्रयोगे सति पणववाद्यं यदा मुरजवाद्यस्यावकीर्णतां न्यक्कारं करोति तदा **वकीर्णः**।।**२०३-२०४।।**

(**पणवैरिति**)। यदा मदङ्गो ल्पयोगः पणववाद्यं प्रधानं तदा परि तस्यैव क्षेपात् **परिक्षिप्तः**।।**२०५**।।

(**सर्वातोद्यानी**ति।) सर्वैरातोद्यैरेकस्मिन् प्रयोगे निर्वाह्यमाणे **एकरूपः**।।**२०६**।।

(प्रशान्तेति) **प्रशान्तस्य** गतिविरामस्य **नियम**मनुवर्तमानो **नियमान्वितः**।।**२०७**।।

(**चित्रमिति**)। **एकेनैव** मुरजपणवदर्दरस्यान्यतमेन सर्ववाद्योचितान्यक्षराणि यदा प्रयुज्यन्ते तदा न्यस्य पराङ्गमुखीकरणात् **साचीकृतः**।।**२०८**।।

(**कृत्वेति**)। यदेवमुरजेन वहनीयस्तदेवोपरिपाणिनेति प्रथमं दर्दरेन पणवेन वा क्रियते पश्चान् मुरजेन यत्र न (स)समवर्णोल्लेखात् **समलेखः**।।**२०६**।।

(**चित्रमि**ति)। अयमेवहि नानाक्षरत्वे चित्रत्वं **चित्रलेखः**।।**२१०**।।

(**सर्वेति**)। **विभक्त**रूपैर्मार्गैर्मिश्रीकृत्य सर्वसमवायकृतः सर्व**समवायितः**।।**२११**।।

(**यस्त्वि**ति)। स्वप्राधान्येन वर्तमानो **मध्यमलयो** येन तेन **दढः**।।**२१२-२१३**।।

एवमुद्देशं परिसमाप्य प्रयोगे नाट्यपरिक्रमे जातिमार्गशुद्धे नत्ते पुनरलङ्कारबाहुल्यमित्येतदाह। **ये वै** इति। **प्रचारेष्वि**ति।।**२१४**।।

पूर्वरङ्गे तावत् प्रयोगं दर्शयति। **प्रयोगमि**ति। तत्र प्रत्याहारं तावदाह। **तत्रे**ति। रङ्गसामाजिकसङ्गमे प्राङ्मुखरङ्गपराङ्गमुख उपविष्टे सति यवनिकादानपूर्वकं **कुतपविन्यासः**।।**२१५-२१६**।।

तत्रादष्टसिद्धये करिष्यमाणस्य त्रिसाम्नामु(णत्रिसामो)पक्रमाय प्रथमं भाण्डानित्थं परीक्ष्याणीत्याह। (**अचलेति**)। **अचले** दढे **अकम्प्ये** निष्क्रिये **अस्खलिते** उत्तानत एव **आसने उपविष्टेषु मार्दङ्गिकादिषु शिथिलादिषु अचिता**न्यायतानि वाद्यानि वध्राकोटनकल्पितस्वरे(ष्वि)त्यर्थः। यथा **ग्रामरागमार्जनालिप्तेष्वि**ति। **ग्रामराग**प्रयोगः। तथा

वाद्यं जानीते। **यथा ग्रामराग**श्च गतिप्रधाने **मार्जना**सिद्धये यवादिचूर्णेषु **लिप्तेषु**। **ऊरुद्वयेन** समुत्पीडितं तस्मिन् सति। **मुक्तप्रहारेषु दर्दरेषु।** तथा ऊरुद्वयेन पीडनशिथिलं वाध्रणकस्य। किमित्युक्तम्। **देवतानां** रङ्गे पूजितानामावाहनार्थं तन्त्रविसर्जनार्थं **त्रिसाम**।।२१७।।

तत्र **वाम** इति। गीयतीति। **दक्षिण** इति। नयेन। **जालजं** ब्रह्मजालम्। ऋषींस्तर्पयति संगायतीति।।२१८।।

आग्नेयं वह्निमुखवत्। तत्सर्वदेवतातर्पणम्। त्रीणि सत्वपूर्वं विसर्जनम्। कं.....त्यत्रेति **त्रिसाम**। तदाह। **त्रिसामत्वादि**ति।।२१९।।

एक एव गुरुलघुसन्निवेशो क्षरवैचित्र्यान्निर्भिद्यते। तदाह। **त्रिप्रकार**मिति। क्रमेणात्र द्रुतादीत्याह। **त्रिगुणितमि**ति। वाद्यविधिमाह। **अङ्ङिताश्रयमि**ति। स्वरूपं तस्य **त्रिकलं षडक्षरम्।** तालस्तु त्रिकलः।।२२०।।

तान्यक्षरान्याह।

त्रिसामाक्षरपिण्डस्तु गुरुलघ्वक्षरान्वितः।

इति। गुरुलघुविभागमाह। **यकारश्च मकारश्च त्रिकैस्त्रिगुणितमि**ति। यत एवं त्रिकाः।।२२१।।

समुदाय इति। तदपेक्षं त्रिकैरिति बहुवचनम्। **ति(त्रि)चा साकमिति**। तद्द्वयमक्षरपरिवत्या त्रीन् भेदानाह। .....त्रिषट् चाह। अज्झलेति स्वरवारम्। झण्टुम्। अस्य त्रिसाम्नो न्ते विधिमाह। **तदन्त** इति पूर्वरङ्गविधिमाह। **प्राप्ये**ति। अनुकृतायां वाद्यविधौ। बहिर्गमनमाश्रवणादावुक्तम्। तद्बाधेन गुरुलघुयोगादनुसरणीयम्। ननु प्रत्याहारस्तु लक्षणमकृतम्। कृतमित्याह। **यवान(या चासाव)वतीर्णकोटिस्तत्र वाद्यमि**ति। अवतरणस्य मार्गे न्तरसर्वमार्गमिश्रवाद्यम्। **अन्ये** तु यावदवतीर्णकोटिकोटीति पठन्तस्त्रिसामावतरणयोर्मध्ये सर्वभाण्डे वाद्यमिति मन्यन्ते। तत्र हेतुमाह। **पूर्वं हीति। सिद्धं**(द्धिं)व्याचष्टे। **स्त्रीबाले**त्यादिना। कुतूहलवननमेव सिद्धिः प्रधानमित्यर्थः।।२२२।।

आचार्या एतत्तत्त्वविदः। **पण्डिताः** वैय्याकरणादयः। स्त्रिय इति यत्र मधुरम्। इतरे बालमूर्खादयो विकृष्टन्ति(मिति) प्रतिवत्तम्।।२२३।।

तस्यैवेति। बहिर्गीतोत्तेजितस्य वाद्यस्यान्ते। तु गीते। अङ्गुलिप्रचलनप्रायमिति। अतीवप्रायमित्यर्थः। गीतप्रयोगाभिनये समाप्ते तदन्यसन्निपातात् प्रभति लास्यनत्यमनुगतवाद्यं करणधातुयुक्तवीणामिश्रम्। अन्ये तु कृतादिषट्कमत्रेत्याहुः। एवमुत्तरत्र। **उत्थापने त्वालिप्तमार्गोचितजाति**क्रियावाद्यम्। परिवर्तिन्यां सर्वमार्गेषु शुद्धायां जात्यां करणाश्रितमिति। धातूचितं सन्निपाताक्षरयोजना.....स्येति। प्रदेशिनीपातेन यस्य ग्रहणं तत् **प्रदेशिनीग्रहणम्। एवं पूर्वरङ्ग** इत्युपसंहृत्य नायकविषयमाह। नायकानां त्विति। यद्यपि जातिविनिश्चययोगो गतिप्रचारे कृतस्तथापि ग्रहमोक्षे

सन्धानयोगान्येतान्यक्षराणि तत्र मिश्रणीयानीत्येवं योजनामाहुः। **अन्ये** तु विकल्पमिच्छन्ति।।**२२४**।।

गतिप्रचार इति **गत्यध्याये** (अ.१२)। **चतुष्कल(ला)** इति आङ्गिकमुखद्वये ऊर्ध्वकालिङ्गके।।**२२५-२३३**।।

औपस्थायि(प)को.....प्रतिनटः। **निर्मुण्डो** जातिखलतिः।।**२३४-२३५**।।

सामान्यतो भिनये सामान्याभिनये क्रोधादयः। आसां स्त्रीणाम्। अपतिशो वादयो दर्शिता इति। तदनुसारेण स्त्रीणामपि वाद्यं न केवलं पुंसाम्।।**२३६**।।

जातयः शुद्धा या इत्यादि व्याख्यातम्।।**२३७**।।

गानपरिक्रमं च विना यद्वाद्यं तदुत्तत्त(दन्त)रवाद्यम्। तच्चतुर्धा।।**२३८**।।

अनुबन्धो नाम यदङ्गानुसारेणाभिनयः। मध्यम एव वर्तना। प्रयोगकालवाद्यम्। अध्यायसमापा(प्ता)ववान्तरवाक्यार्थछेदे **विप्रतिहारम्**। यथा **यशश्शेषता**मित्यत्र विशेषेण प्रहारः।।**२३६**।।

अशङ्कितविभवलोभे भिनयपाठ्यादौ विधिः स्मतः **सिद्धिः।** पूरणार्थं सिद्धि**ग्रहणम्**।।**२४०-२४२**।।

ध्रुवगाने भविष्यति समाप्ते च यद्वाद्यं ध्रुवाषट्कपर्यन्तं नियतषट्कलत्वावधिकृतात् **परिच्छिन्नम्**। तदन्तरवाद्यमेवोत्तरवाद्यविषये अक्षरैर्विभजति। **तत्रोत्तमानामि**त्यादिना। **ध्रुवाणां ग्रहणे उपशमने** च यत् **परिच्छिन्नं** नाम चतुर्थमन्तरवाद्यमुक्तम्।।**२४३-२४४**।।

तत्र ग्रहे यद्वाद्यं तदेव षड्ध्रुवाभेदेन स्फुटयितुमाह। **अथ प्रासाद(दि)की**त्यादि।।**२४५-२४७**।।

द्रुतायां ध्रुवायां विप्रहारितस्य ध्रुवादिविषये नामान्तरेण प्रयोगमाह। उद्घात्वम्। उत्कृष्टं हननं यत्रेति।।**२४६**।।

एवमुद्दीपनापरपर्याये ग्रहे भिधाय प्रशमनप्रलये मोक्षे दर्शयति। **मोक्षमिदानीमि**त्यादिना।।**२५०-२५१**।।

तत्रास्य द्वौ संहननौ। स चरसंहननं यत्र संयोगाक्षराणि बाहुल्येनान्यत्वासरणे समानुसरणं प्रयतितव्यमिति यदुक्तं तण्डुना र्थवादेन तद् द्रढयितुमाह।

अकालज्ञमतालज्ञमशास्त्रज्ञं च वादकम्।
चर्मघातक इत्येवं प्रवदन्ति मनीषिणः।।

इति, **शास्त्रज्ञत्वं** लक्षणज्ञता। **तालज्ञता** प्रयोगकौशलम्। **कालो** द्रुतादिः। **ताल**श्चच्चत्पुटादिः। चर्म निहन्तीति जुगुप्सोक्ता।।**१५२**।।

लक्षणमित्याकारः।।**२५३-२५४**।।

हरीतक्याकृतिरङ्गि(ङ्क)कः।।**२५५**।।

सार्धतालत्रयो द्वादशाङ्गुलकः।।**२५६**।।

ऊर्ध्वाधो यवाकृतिश्चतुस्तालश्चतुर्दशाङ्गलमुखाकारः।।**२५७**।।

आलिङ्गो गोपुच्छाकृतिः। त्रितालो ष्टाङ्गुलमुखः।।**२५८**।।

दैर्ध्येण षोडशपरिणाहेनाष्टौ मुखतः प चाङ्गुलः **पणवः**।।**२५९**।।

अङ्गु(ओ)ष्ठो यत्र चर्म विश्राम्यति। तेन सोर्ध्वो(र्धो)ङ्गुल्यमध्यतः। अङ्गुलद्वयस्थूलं तु काष्ठमित्यर्थः।।**२६०**।।

नवाङ्गुलमुखो द्वादशाङ्गुलसुषिरः पीनाष्ठौ घटाकृतिर्दर्दरः।।**२६१-२६२**।।

अथ मुखोपयोगलक्षणमाह। **न ज्वरोपहतमि**त्यादि।।**२६३-२६४**।।

पूर्व गोमयेनोक्तास्ततः **सुमर्दिताः**।।**२६६**।।

चन्द्रकैरिति। वध्रा निरवद्यास्तथा कार्या यथा चन्द्रकाकाराः क्वचित् क्वचित्वद्धकुसुमवर्तनाकाराः। **त्रिवर्ति**मिति। त्रयाणां वध्राणामन्योन्ययोजनावैचित्र्येण ।।**२६७**।।

कक्ष्याख्य वै परिकरमिति। येन स्कन्धे निवेश्यत इत्येतत् पणववत् प्रवेशयेत्।।**२६८**।।

अक्षके साध्ये सति द्वे वध्रे वन्धयित्वा स्पष्टात्तवध्रेषु मध्ये ततीये **वध्रे(प्र)वेशये**दिति पणवत्वम्।।**२६९**।।

ततस्त्रिभिर्बध्नीयात्।।**२७०**।।

वातपुष्करिकां चैव योजयेत्तनुचर्मणा।

इति। घातदाढर्य विनापि लघ्वक्षरपवनवशादेव यथा मधुरशब्दादयो विचित्रा भवन्ति य(त)था कुर्यादिति।।**२७१**।।

दातव्यं रोहणमिति। येन चर्मणा(णो) वाद्यं प्ररोहति तद् द्रव्यम्। **घत(तं)**तिलतैलं **तिल**कल्कं चेति। चर्मणि लेपः।।**२७२-३७३**।।

अध मुरजपूजा यत्नेन कर्तव्य(ध्या)माह। **चित्रायामि**त्यादि। **उपाध्याया**(व) इति। मोरजिकाः(कः)।।**२७४-२७६**।।

आलिङ्ग(ङ्ग्य)म्।।**२७७-२७८**।।

स्वयम्भुवः ब्रह्मणा(णः)।।**२७९-२८०**।।

उन्मत्तं धत्तूरम्।।**२८१-२८३**।।

वज्रेक्षणादयो ग्रतः पूज्याः।।**२८४**।।

अथ निर्वाचनमाह। **मण्मयत्वान् मदङ्ग** इति। मुखे चेति सुखं मङ्गलं च करोति। **भाण्डम्**। भस्य डा आदेशः। तदाह। **भमयतीति रसयतीत्यन्ये** पठन्ति। **एके भणत** इति च **भाण्डमाहुः**।।**२८५**।।

मुरजाः सर्वकरणादिषु मुरा(द् वेष्टनाज्)जाता **मुरजाः**। **ऊर्ध्व**करणमुन्नतं सौषिर्यं च। **अन्ये** तु मुजि(पा.धा. २५१)ज्विनति विक्रमःष(मख)रूपमूर्ध्व समनुकुर्वन्तीति प्रातिपदिकाद् धात्वर्थे(पा.धा. १८१६)णिचि टिलोपे पचाद्यच् (अ. ३०१.१३४) **मुरजा** इत्याहुः। **आतोद्यं** तोदनात्। **भाण्डस्यादौ प्रणीतः पणव** इति। तेनैव पूर्व व्यवहाराद् भ(प)ण व्यवहारे (पा.धा.

४३६) द्रव्यनिचयः। **दर्दरः**। तदाश्रयत्वाद् वाद्यमपि। नणामन्ते(द विदारणे) क्यचि रूपमित्युक्तमेव (३४–८४)।।**२८६**।।

अथ मेघानां तत्राधिष्ठातत्वं सूचयन् पुराकल्पमाह। **मेघैश्च स्वर**संयोग इ(मि)ति। मेघगर्जितेन हेतुना ततःस्वरयोजनामाश्रित्य। पुष्करपत्रैस्तु वर्णाः षोडशेति भावः।।**२८७**।।

तेनोर्ध्वके चैरावतः। आलिङ्गेन वामेन निनादः।।**२८८**।।

दक्षिणे त्वङ्किके कोकिलः।।**२८६**।।

ऊर्ध्वके नन्दी। आङ्किके सिद्धिः। आलिङ्गे पिङ्गलः।।**२६०**।।

इति परमेश्वरगणविशेषाधिष्ठानद्वारेण सूचयन् तेषामप्यत्र पूज्यत्वमाह। भूतान्यन्ताद् वेदनीयानि तर्पणमनुभावनीयानि। येन तामब्दली(तेषां प्रियो बलिः)।।**२६१**।।

करीषस्य शुष्कगोमयद्वा(ग)शिशेषमध्ये। यत्रैषां चर्मबद्धविकृतिर्न भवति। **सङ्घातान**न्योन्यविश्लिष्टान्।।**२६२-२६६**।।

कलश्चतुरो **रिभितो** दीप्तो **मधुरः** श्रुतिसुखदो **हस्तो** यस्येति। सुश्लिष्टो द(ह्व)ष्टो दटा(ढो)सहः।।**२६७**।।

प्रतिग(ग्र)हीता सिद्धीनामिति।।**२६८**।।

अन्तरवाद्यज्ञः। **गुणिता** अभ्यस्ता **ग्रहा** ग्रहमोक्षसन्धयो (ये)न। सुष्ठु **सङ्गीतप्रयोग**मेलनिकां जानातीति तथोक्तम्।।**२६६**।।

भ्रान्तेत्यत्र भ्रमणक्रियाचतुर **ऊर्ध्वा**धःस्थिरश्च हस्तो यस्य।।**३००**।।

वादनस्य मुरजवाद्य(द्या)**न्तरं** मध्यान्तरं चेति विशेषश्च।।**३०१**।।

नोक्तं यच्चेदितीति। हुडुक्का विसिसंक्षानशङ्कामात्रमेतत्। वस्तुतस्तु न सर्वमुक्तमिति दर्शयति।।**३०२**।।

विकृष्टमिति। आराच्छ्रवणयोग्यम्।।**३०३**।।

नाट्यस्य वदन्ति वाद्यमिति। प चधेति साम्यात् प्रतिष्ठितं भवति। तदाह। **गीते**। वाचा पि तु **सम्प्रयुक्तो नाट्यप्रयोगो न विपत्तिमे**ति। गीतातोद्याभ्यां **रामरावणादि**विशेषास्पर्शनेनैव रसाभावचर्वणौचित्यमाधीयते साम्यं च यतो भवन्ति सर्वाः सिद्धय इति शिवम्।।**३०४**।।

नादान्तसादाशिवभक्तिधाम
सन्तानकृत्यः **कखिला**भिधानः।
रात्रिन्दिवं तस्य सुतेन दष्टा
सु**पुष्कराध्याय**समाप्तिवत्तिः।।

इति श्रीमहामाहेश्वराभि(न)वगुप्ताचार्यविरचितायां नाट्यवेदवत्तावभिनवभारत्यां
पुष्कराध्यायश्चतुस्त्रिंशः।।

श्रीः

नाट्यशास्त्रम्

प चस्त्रिंशो ध्यायः

यद्भूमिकालाभपराः सदाशिवपदस्थिताः।
तां वन्दे परमां शक्तिं चन्द्रमौलेः परां तनुम्।।

एवमातोद्यपर्यन्तं निरूपिते नाट्यविषये यद्यपि न वक्तव्यान्तरमस्ति तथापि कठिनापदेशेनास्य शास्त्रस्य प्रवत्तेर्नाट्याचार्येणेत्थं भूमिकानिवेशः कार्य इति शिक्षयितुं समाधानान्तरम्। तदाह। **विन्यासं भूमिकानां चे**ति। नाट्यस्यावष्ठम्भस्थानमि(मे)व **भूमिका**। ता(साम)वष्टम्भो हि योग्यबलनिमित्तानुभावहराद् रसभावप्रयोगकौशलमस्येति। **नाटकमि**(इ)ति।।१।।

नाट्ये **सत्वं** मानसो हेवाक्र(क)म(सः)। **शीलं** शारीरःआर(मा)हार्यमन्तः।।२-३।।

स्वाभाविका गुणाः सामान्याभिनये व्याख्याता एव। ते यस्य सति(न्ति)।।४।।

स्त्रीभूमिकायामिति। कौशिकीप्राधान्यख्यापनाय पूर्वं स्त्रीभूमिकोक्ता।।५।।

विशि(श्लि)ष्टाङ्गमिति। विभक्ताङ्गम्। रत्या दीप्त्यात्मकं सन्ततम्। **स(सु)स्वर**मिति।।६।।

सुकुमार(त)या च पुरुषाणां ये प्रयोगा(गे) भूमिकायोगि(गे)न उपयोगिनो धर्मा उक्तास्त एव प्रियया तद्योषिता युक्ताः कर्तव्यास्तेन **स्थूलाः(लमि**त्यादि)।।७-१२।।

प्रत्युत्पन्नविनिश्चयमिति। झटिति भानवन्तः(म्)। **सेनापतेरमात्यानामि**ति पाठे।।१३।।

त्रयो **घोणसु(नासं)** च। कुटिला (ना)सा स्येति।।१४।।

एवमिति। उक्तव्यतिरिक्ता ये न्ये तापसप्रभतयस्तद्विषये **नाट्यधर्मे**णानुरागेण प्रवेशने कर्तव्ये **देश**हेवाकानुरूप्येण वयोवर्णाश्रमादिरूपावस्थो विचित्रानवस्थोचिताय भूमिकामुपयोजयेत्।।१५-१७।।

अ(उ)परा(रो)धष्विति।।१८।।

अतः परिजनभूमिकाध्यायं **यदि** तु स्वभावतस्तादग्(न) भवति तदा भूमिकास्वभावोचिता **चेष्टा आचार्या(र्यबुद्ध)या कार्या। चेष्टा**ग्रहणेनाकाराद्यपि प्रतिशीर्षकादिना कर्तव्यमिति लक्ष्यते।।१६।।

सा चेष्टा चार्येण नियमनीया। तथा स**त्यभावे** पि भवा(**भावि)नी** भवित्री भवति। भावश्चारत्यादिकं भावयति रसार्णेन(ना)पि विरौति तच्छीला।।२०।।

भरतानामिति। नाट्योपयोगिनाम्। इयता परिकरेण विद्या नाट्यं तु न निर्वहतीत्येतावदवश्याहरणीयमिति भावः।।२१-२२।।

स्वधुर्य(धुर्य)वदिति। यः सर्वत्र प्रतिज्ञागर्भितरसभरोद्वहनाद्धरत्वच्छेदैर्गीतिविविधं कृत्वा दूषितादिवाचयैवानुभावादिप्रतिजागरं कुर्वता(न्न)न्यरसः।।**२३-३३**।।

प चमविधमित्याहार्याभिनये दर्शितम्।।**३६-३७**।।

कुशा(न् ला)तीति **कुशलः**(:)। निरूढिलक्षणा। तेषां लावण्या(न्या)दियम्। अत एव कुशजातिं कुशिं कुर्या(शा) यो लुनाति अयोविकारमपि यश्छिनत्ति स **कुशीलवः**। उपचारात् कर्मणि पुनर्नाट्योपकरणयुक्तेनापि नटविदूषकादिशिल्पप्रयोक्ता(क्त) कू(मुकु)टकारादि(दावि)ति शिवम्।।**३८-४१**।।

इत्यभिनवगुप्ताचार्यविरचितायां नाट्यवेदवत्तावभिनवभारत्यां भूमिका(वि)कल्पः
प चत्रिंशः।।

श्रीः

नाट्यशास्त्रम्

षट्त्रिंशो ध्यायः

यस्मिन् निगूढपरमार्थमबुध्यमानाः
संसारनाट्यरसभावमुपाश्रयन्ते।।
बुध्वा पुनर्मुहुरहो निजमेव यान्ति
तत् पूर्णधाम शिवतत्त्वमहं प्रपद्ये।।

यदिदं नाट्यमुक्तं तस्य रसभावरूपताप्रतिपादने नियतानुकारतानुकारितैव चावितत्य निरस्याह्या(त्या)यतं पूर्वरङ्गस्य न नाट्यरूपतेत्युक्तम्। तदेतदिहाध्याये प्रश्नोत्तरमुखेनेतिहासदशा दढीक्रियते। न तत्र प्रथमं पूर्वरङ्ग एव नाट्यत्वं तावदाचक्षते। तत्पूर्वकत्वान्नाट्यं ततो ष्यनुकारकथा निरस्यते।।**१-५**।।

तत्र प्रश्नं तावत् दर्शयति। **एवं तु मुनय** इति।।**६-८**।।

तत्र यान्या परिहासप्रायनाट्यशास्त्रविरुद्धं च **नाट्यतो यन्त्रितापर्यन्त** इति वचनान् नटानां जीविकोपायो यमित्याशंङ्कां वारयति। **परिहासेने**त्यादिना।।६।।

तपः **(तूप)शिक्षार्थमि**ति। तत्त्वनिर्णयार्थमित्यर्थः। **नाट्यगुह्यमि**ति। नाट्ये यत् तात्पर्यारूढ्यर्थं गुह्यम्।।**१०**।।

शेषाणां लोकगुह्यानामिति। लोके यानि दश्यन्ते अथ च पूर्वरङ्गे क्रियन्ते तैस्तावल्लोके चरितैर्भवितव्यम्। **लोकस्य चरितं** यतो **नाट्यम**तो **लोकगुह्यानाम**िति साभिप्रायेणाध्यारोपेण(प)गर्भेयमुक्तिः।।**११**।।

तथा चाह। **लोकस्य कस्य चरित**मिति। परिदश्यमानस्य भावना। एतच्चरितं न नूनं गूढो (ढम)तः कश्चिल्लोको स्तीत्यादयः। दश्यं सर्वं च यदिति स(स्व)र्ग एवैतन्नाट्यं सकलं सुखस्थाने। अति च (तश्च) नोपदेशो यत्तयोरुपदेशो मर्त्य....।।**१२**।।

तत्र कथमेतत् तदाह। **कथमूर्वीतल** इति।।**१३**।।

नाट्यवेदवित् त्वदीयो वंशो **नटसंज्ञायां(ज्ञया)** मूर्खत्वेन कथं प्रसिद्धम्(:)। यद्यपि बहवः प्रश्नास्तथापि नाट्यविषयो यं संशय एको बहुधर्मविषयो यथा स्थाणुर्वा नभो वोच्चशिलादावेव कुशलं वेत्येक एव संशयः।।**१४**।।

गुह्यार्थस्याभिनयम् प्रथममेतदर्थमिति यावत्। **अन्ये** तु गुह्यार्थो यत्र तादगभिनयो नाट्यं तम्।।**१५**।।

प्रविघ्नन्ति। **निर्वह(वर्ह)णं** रङ्गपूजनम्। **तस्यानुबन्धेन** तत्प्रसङ्गेन।।**१६**।।

शरीरावरणं कवचानि(दि)।।**१७-२०**।।

नान्दीनामेति। नन्दनात्। अत एव **नान्द्यन्त** इति पूर्वरङ्गान्त इत्यर्थः।।**२१**।।

काकुस्वर इति। पूर्वरङ्गसिध्यर्थे पाठ्यम्। ततः **शङ्गारसयुक्तां पठेदार्या**मित्यादौ (भा. ना. ५–१२२)। न त (तु) सदैव देवेन परतन्त्रीकृतस्य कदाचिद् द्विजन्मादेरिति वाद्याद्युपभोगावसरः।।**२२-२३**।।

ततो वेदविरुद्धमित्याशङ्क्याह। **आवाहे च विवाहे चे**त्यादि।।**२४-२५**।।

आरा(**ग**)मिकत्वमस्यार्थस्याह। **श्रुतं देवादिदेव(वात्)तत्त्व(तः) शङ्करादि**दमुत्कृष्ट––मिति।।**२६-३१**।।

भूस्पर्शादपवित्रीभूतं तदेव पवित्रीभूतं **प्रहसनैः.....बाधन्त** इति। तच्च नाट्यस्याविदन्तो नियतमनुकरणीयं मन्यमानाः। **परचेष्टानुकरणोल्लास** इति नीत्या सर्वे प्रहसितवन्त इति। सायं प्रतिपन्ना इति निन्दार्थत्वात् त एत एतत्पक्षं प्रतिक्षेपकृदुत्पत्तिविधातं निन्दार्थत्वादेता नाट्योत्पत्तावेव दर्शितं **र(व्य)ङ्गकरणमि**ति ।।**३२-३५**।।

विडम्बकं(नं) गण्डसंश(श्र)यमिति। गण्डवदन्यापदेशमुखेनेत्यर्थः।।**३६**।।

ज्ञानमदे(दोन्)मत्ता इति। मिथ्या ज्ञानमिदं युष्माकमिति पर्यवसितमिति भावः। **विद्धा** ब्रह्मणा। वेदबाह्याः।।**३७**।।

निराहुताः परिभवभाजः।।**३८-४०**।।

सुरा इन्द्राद्याः।।**४१**।।

याचनानैरिति। ऋषीन् प्रार्थयदु(दि्भरु)क्तम्।।**४२**।।

तत्र कुत्सितानियताकारसभागोचितं स्वस्थितरसभावप्रयोगे वस्थाप्यत इत्याह न त्वेतं(तद्) विहितं(विनशिष्यति)।।**४३-४६**।।

निधने आत्महनने।।**४७**।।

जनिध्य(जानी)ध्वं तत्तथा नाट्यमिति। तत्त्वापरिज्ञानादयं भवति शापो जात इदानीमत्रैव तत्त्वपरिज्ञाने रसभावस्वरूपे यत् तच्च दर्शितं वितत्व रसाध्यायादौ (भ.ना. ६) तत्र कैश्चिद् वार्तिककारीयं श्लोकद्वयं शूरग्रन्थमध्ये आक्षिप्तम्।

नाट्यस्य ज्ञाततत्त्वस्य वदभीण्डं प्रयोजनम्।
तत्त्वतस्तदनिर्णीतं शानाध्यायेन दर्शितम्।।

इत्यादि। रसप्राधान्यमेवाह।

यथास्त(स्वा)दप्रसङ्गेन सूचाद्यर्थोपयोगिता।
आस्वादकानां प्रीत्यर्थं केवलं रसयोजनम्।।

न च जीविकादक्षिणेन च योग इति भावः।।**४८-४६**।।

स्त्रीणां च न कश्चनास्य प्रयोगे वेदार्थत्यागशङ्कावकाश इति दर्शयति। इदं **नाट्यमप्सरोभ्यो दत्वा प्रायश्चितं चरिष्यथे**ति। येन च भावलाभाद्भ(भवल्लाभो) भविष्यति।।**५०**।।

इत्यभिनवगुप्ताचार्यविरचितायां नाट्यवेदवत्तावभिनवभारत्यां नटशापाध्यायः षट्त्रिंशः।।

श्रीः

नाट्यशास्त्रम्

सप्तत्रिंशो ध्यायः

आकाङ्क्षाणां प्रशमनविधेः पूर्वभावावधीतां
धाराप्राप्तस्तुतिगुरुगिरां गुह्यतत्त्व प्रतिष्ठा।
ऊर्ध्वाधध्यः(धो यः) परभुवि(च) वा यत् समानं चकास्ति
प्रोढानन्तं तदहमधुना नुत्तरं धाम वन्दे।।

अथ यद्वशान्नाट्यशास्त्रमुपादेयं तदुपदेशसम्भवमूलभूयिष्ठभूतं भूलोकावतरणं नाट्यस्येतिहासेन प्रदर्शयन्निितिहासोपजन्न(न्य)त्वाद् गूढत्वेनोपदेशरूपस्य सारभागस्य तत्त्वस्य कथनाद् **गुह्यतत्त्वकथनम**ध्यायमारभते। **कस्यचित्त्वथ कालस्य नहुष** इति।।**१**।।

कालेन प्रयुक्तो यतो देवराज्यं चकार ततस्तत्सम्बन्धित्वेनोक्तं **गान्धर्व**मिति। नतं **नाट्यं** स्वर्गे **दष्ट्वा** बद्धमिति श्लिष्टम्। तेनाप्सरस एवमन्ये वतरन्त्वित्यर्थः।।**२-६**।।

मामिति भरतमुनिम्।।**७**।।

प्रतिश्रुतमङ्गीकृतं व्यक्ततामवलम्ब्येति। व्यक्तीभूतं तु **त(त्व)त्सकाशात्**।।**८**।।

पितामहगहे ब्रह्मलोके यत् तदस्माभिरिति मर्त्यै**रन्तःपुरजने** लब्धं दष्टं चेत्याह। **पितामहक्रियायुक्त**कर्मण्यां यद्ब्रह्मणा कृतं **तदुर्वश्यां** सत्यां **सम्प्रवर्तितं पुरूरवतो** गहे वतीर्णम्।।**९**।।

तस्याः प्रणय(या)पला(ली)यमानं स्वर्गगमनम् जातम्। स्वात्मने प्राणार्पके प्रणयिनि नपे पुरूरवसि वि(प)ने(न्ने) यो पि च तत्परिजनः सो पि **विपि(प)न(न्न)** इति प्राणसङ्ग(ङ्क)तं(टं) नाट्यमस्माकम्।।**१०-१९**।।

प्रयोज्यत्त्वेन वाद्यं(नाट्यं) ब्रह्मणैवोक्तमित्यलङ्घ्यो यमिति भाव इति शेषः।।**१७**।।

कोहल इति। यदस्माभिर्लोकानुमानादिसिद्धत्वे नोक्तं निमित्त इति।।**१८**।।

उत्सर्गे तु नोपदेशफलमपि तु **क्रीडनीयकहेतुकम्**। रसचर्वणापात्रसारमननुवत्या विभावानुभावनभागगते कर्मफलसम्बन्धावबोधविश्रान्त.....तत्र **भरत**श्चापि। **नारदैर(देना)प्सरोभिश्चाधिष्ठितं परिरक्षितम्**।।**१९-२०**।।

तेषु तेष्विति लीलादिषु। **द्विजोत्तमा** इत्यत्र पूर्वभोगत्वात् तावदेव प्रीताः।।**२१-२२**।।

शिष्यैर्भरतसुतैः।।**२३**।।

कोहलादिभिरिति। तत्प्रधानैः सर्वशास्त्रनिबन्धनदर्शनमितिहासपुराणार्थवादकार्यचित्र––पुस्तलेपादिभिः।।**२४**।।

सर्वं नाट्यस्यांशाः सर्वत्र रसप्राधान्यात् साक्षात्कारकल्पबुद्धिसम्पादनात् प्राव(वी)ण्याच्च। यथोक्तं **ते विहितेर्ष्यामि**त्यादि। सन्तो(तो)बुद्धिविषयान् प्रकाशयन्तीति।।**२५-२६**।।

गान्धर्वमिति। नत्यं **नाट्यं यो नुपालयेत्**। उपदेशव्याख्यानविवरणादिना च। **ईश्वरगणेशतां(शानां) लभन्ते(ते) सद्गतिं परामिति शिवसायुज्यम्**।।**३०**।।

अनुयायिताकरण**मनुकृतिः नरपति**रिति। पुरुषोत्तम ईश्वरः सकलजगत्पालयिता। इति शिवम्।।**३१**।।

श्रीमध्यदेशभवविप्रवरार्तिगुप्त–
वंशोत्थितः शिवपदार्पितचित्तवत्तिः।।
(संगीत)रागनयश्चङ्खल(सु)प्रसिद्धो
वंशोद्भवस्थितिवशात्त**नसिंहगुप्तः**।।**१**।।
तस्यात्मजो **भिनवगुप्त**पदाभिधानो
भट्टेन्दुरात्मपदपांसुपवित्रमूर्तिः।।
सद्विप्रतातवदनाधिगम्य **नाट्य-**
वेदं व्यधत्त विवतिं लघुमर्थपूर्णाम्।।**२**।।

शिवपुरविजयहेतुविजयादिकरुद्रसहस्रपूतया
प्रवरपुराभिधान**काश्मीरक**धानशुभे **वितस्तया**।।
अधिगतजन्मवसतिस्मतकरशेखरभक्तिसक्तितो
रचयति **नाट्यवेदविवतिं** लघु**मभिनवगुप्तभारतीम्**।।३।।
प्रभुः शम्भुर्यस्य प्रथितपरमार्थस्थितिसुखः
पराधीनश्चेतो व्यधित स तदाराज्र्(ध)नविधौ।।
ततः शस्तस्वान्तरह्रदयविश्रान्तिकृतिनः
कृतिं तस्येत्थं भोः श्णुत भगवन्तः सह्रदयाः।।४।।
सज्जनान् कविरसौ न याचते
ह्लादनाय शशभत् किमर्थितः।।
नापि निन्दति स्वलान् मुहुर्मुहु–
र्धिक्कुतो पि न हि शीतलो नलः।।५।।
नाट्यार्थप्रथनात् तस्मात् तुष्ट(ष्टो) नाट्ये परेण यत्।
क्रियात् तेनैष जनतामानन्दोल्लाससुन्दराम्।।६।।

इति महामाहेश्वराभिनवगुप्ताचार्यविरचितायां नाट्यवेदवत्तावभिनवभारत्यां गुह्यतत्त्वकथनं सप्तत्रिंशः।।

।।समाप्ता चेयमभिनवगुप्तकृतिः।।